कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यविरचितं

# त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्

( पञ्चम-षष्ठ-सप्तमपर्वाणि )

सम्पादकौ :

स्व. पं. श्रीरमणीकविजयजी गणि

विजयशीलचन्द्रसूरि



श्रीहेमचन्द्राचार्य

प्रकाशक :

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति शिक्षण-संस्कारनिधि,

अमदावाद.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यविरचितं

# त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्

(पञ्चम-षष्ठ-सप्तमपर्वाणि)

सम्पादकौ :
स्व. पं. श्रीरमणीकविजयजी गणि
विजयशीलचन्द्रसूरि



श्रीहेमचन्द्राचार्य

प्रकाशक :
कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी
स्मृति शिक्षण संस्कारनिधि, अमदावाद

ई.२००१ वि.सं. २०५७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्

(पञ्चम-षष्ठ-सप्तमपर्वात्मकः तृतीयो विभागः)

सम्पादकौ :
**स्व. पं.श्रीरमणीकविजयजी गणि**
**विजयशीलचन्द्रसूरि**

**प्रकाशक :** कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी
स्मृति शिक्षण संस्कारनिधि, अमदावाद

प्रतयः ५००

वि.सं. २०५७  ई. २००१

सर्वेऽधिकाराः प्रकाशकायत्ताः

प्राप्तिस्थान : (१) **आ. श्रीविजयनेमिसूरि-जैनस्वाध्यायमन्दिर**
१२, भगतबाग, जैननगर
शेठ आणंदजी कल्याणजी पेढीनी जोडे
अमदावाद - ३८०००७

(२) **सरस्वती पुस्तक भण्डार**
११२, हाथीखाना, रतनपोळ
अमदावाद - ३८०००१

मूल्य : रू.

मुद्रक : *मनन टाईप सेटर्स*
*दिलीप आई. पटेल*
*८७६, त्रीजो वास,*
*नारणपुरा गाम, अमदावाद.*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# समर्पण

जैन श्वेताम्बर मूर्तिपूजक संघना
समर्थ सुकानी,
वात्सल्य अने करुणाना
महासागर,
परमदयालु आचार्य भगवंत
**श्रीविजयनन्दनसूरीश्वरजी**
महाराजनी
महामंगलरूप पुण्यस्मृतिमां......

—शीलचन्द्रविजय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रकाशकनुं निवेदन

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यनी नवमी जन्मशताब्दी(संवत् २०४५)ना पुनित उपलक्ष्यमां, पूज्य आचार्य श्रीविजयसूर्योदयसूरीश्वरजी महाराजनी शुभ भावना तथा प्रेरणा अनुसार आवेला आ ट्रस्ट तरफथी श्रीहेमचन्द्राचार्ये रचेला त्रिषष्टिशलाकापुरुषचरित-महाकाव्यनो त्रीजो भाग प्रगट करतां अमो अनहद आनंद अनुभवीए छीए.

अगाउ, सं. २०४६मां आ ग्रन्थना प्रथम तथा द्वितीय भागोनुं प्रकाशन आ संस्थाए कर्युं हतुं. त्यार पछीना भागोनुं संपादन पू. आचार्य श्रीविजयशीलचन्द्रसूरिजी करी रह्या हता. ते पैकी पंचम षष्ठ अने सप्तम पर्वात्मक त्रीजा भागनुं प्रकाशन आजे थई रह्युं छे.

आ ग्रन्थनुं संपादन करी आपवा बदल तथा तेना प्रकाशननो लाभ अमने आपवा बदल पू. आचार्यश्रीना अमो ऋणी छीए. आशा छे के बाकीना भागोनुं पण तेओश्री सत्वरे संपादन करी आपे, जेथी तेनुं पण प्रकाशन अमो करीए.

आ ग्रन्थनुं सरस मुद्रण करावी आपवा बदल अमदावादना श्रीसरस्वती पुस्तक भण्डारना संचालकोना अमो खूब आभारी छीए.

आ ग्रन्थना प्रकाशन माटे अमदावादनी श्रीजैन श्वेताम्बर मूर्तिपूजक बोर्डिंग-संस्था तरफथी घणो आर्थिक सहयोग प्राप्त थयो छे, जे माटे ते संस्थाना अमो ऋणी रहीशुं.

लि.

**कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम**
**जन्मशताब्दी स्मृति शिक्षण संस्कारनिधिनो**
**ट्रस्टीगण**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# संपादकीय

'त्रिषष्टिशलाकापुरुषचरित ' ए श्रीहेमचन्द्राचार्यनुं एक उत्तम कक्षानुं महाकाव्य छे, जे लगभग छत्रीश हजार श्लोकोमां पथरायेलुं छे. आ महाकाव्यनुं अध्ययन सैकाओथी जैन संघमां अविरतपणे चाली रह्युं छे. आजे पण साधु-साध्वीसमुदायमां तेनुं पठन-पाठन चालु ज छे. आ महाकाव्यनी अनेक आवृत्तिओ अगाउ प्रगट थई चुकी छे, एटलुं ज नहि, पण तेना गुजराती, हिन्दी तेमज अंग्रेजी अनुवादो पण थया छे अने छपाया छे.

आम छतां, आ महाकाव्यनी समीक्षित अने संशोधित वाचना अद्यावधि छपाई नथी. आ दिशामां सौथी प्रथम काम स्व. मुनि श्रीचरणविजयजीए आदरेलुं, अने आ महाकाव्यना प्रथम पर्वनी शुद्ध वाचना तैयार करेली. ते पछी द्वितीय-तृतीय-चतुर्थ एम त्रण पर्वोनी वाचना स्व. आगमप्रभाकर मुनि श्रीपुण्यविजयजीए तैयार करी हती.

आ पछीनां पर्वोनी वाचना तैयार करवानुं कार्य स्व. पंन्यास श्रीरमणीकविजयजी गणिए करेलुं, जे अद्यावधि अप्रकाशित हतुं. आ अप्रकाशित फाइलो प्रत्ये मारुं ध्यान जतां मने थयुं के आ कार्य करवुं जोईए. तरत ज ते कार्य हाथ पर लीधुं. अवलोकन करतां लाग्युं के पं.श्रीरमणीकविजयजीए जे हस्तप्रतिओना आधारे वाचना तैयार करी छे, ते उपरांत पण केटलीक महत्त्वपूर्ण प्रतिओ छे, जेनो उपयोग थाय तो वाचना वधारे समीक्षित थई शके. एटले ए रीते में प्रयत्न आरंभ्यो, जेनुं परिणाम प्रस्तुत पुस्तक छे.

प्रस्तुत पुस्तकमां पांचमुं, छठ्ठुं अने सातमुं एम त्रण पर्वोनो समावेश थयो छे. आ पर्वोना संपादनमां पं. श्रीरमणीकविजयजीए निम्ननिर्दिष्ट संज्ञावाळी प्रतिओनो उपयोग कर्यो जणाय छे.

पर्व ५, सं., छा., वा.१-२, दे., ता.

पर्व ६, प्र., हे., पा.

पर्व ७, कां., मो., छा., हे., ता., पा.

आनी सामे मारा द्वारा उपयोगमां लेवायेली प्रतोनी संज्ञा आ प्रमाणे छे:

खंता. १-२(खंभात ताडपत्र भंडार), पाता.(पाटण-हेमचन्द्राचार्य भंडारनी ताडपत्र प्रति), ला.(ला.द.विद्यामन्दिर, अमदावादनी कागळनी प्रति) उपरांत मुद्रित प्रति तो खरी ज (मु.संज्ञा).

आमां खंता. संज्ञक प्रतिओ विशेष प्राचीन अने शुद्ध होवाथी तेमांथी घणा श्रेष्ठ तथा शुद्ध पाठ मळी शक्या छे.

आम आ पुस्तक, बे हाथे रंधायेली रसोई जेवुं थयुं छे. ते केटलुं उत्तम छे अथवा नथी, तेनो निर्णय तो सुज्ञजनो पर ज छोडवो हितावह गणाय.

आ संपादन माटे जे-ते भण्डारोना कार्यवाहकोए पोताना त्यांनी प्रतिओ के तेनी झेरोक्स कॉपीनो उपयोग करवानी संमति आपी छे, ते बदल तेमनो आभार मानुं छुं.

प्रस्तुत ग्रन्थना कार्यमां मुनिश्रीकल्याणकीर्तिविजयजीए खूब सहाय करी छे, जे अनुमोदनीय छे.

बाकीना भागोनुं संपादन पण हाथ पर लीधेलुं ज छे. श्री देव-गुरु-धर्मना पसाये ते वेलासर परिपूर्ण थाय तेवी भावना.

ज्ञानपंचमी,२०५७ — -शीलचन्द्रविजय

भावनगर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# त्रिषष्टिशलाकापुरुषचरितस्य
## पञ्चम-षष्ठ-सप्तमपर्वणां
## विषयानुक्रमणिका ॥

### पञ्चमं पर्व

#### प्रथमः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| श्रीशान्तिनाथभगवंतः पूर्वभवेषु प्रथमभवे श्रीषेणराजस्य वर्णनम् | १ |
| श्रीषेणपत्न्योः अभिनन्दिता-शिखिनन्दितयोः पुत्रयोश्च इन्दुषेण-बिन्दुषेणयोर्वर्णनम् | १-२ |
| कपिल-सत्यभामावृत्तान्तः | २ |
| श्रीषेणपुत्रयोरिन्दुषेण-बिन्दुषेणयोर्वेश्याकृते युद्धम् | ४ |
| पुत्रयुद्धनिवारणेऽशक्तस्य श्रीषेणराजस्य तत्पत्न्योः सत्यभामायाश्चाऽऽत्मघातः युगलित्वेन चोत्पत्तिः | ४ |
| मणिकुण्डलिविद्याधरेण युद्धवारणं पूर्वभवकथनं च | ४ |
| इन्दुषेण-बिन्दुषेणयोः प्रतिबोधः दीक्षा मोक्षश्च | ५ |
| युग्मधर्मिणां श्रीषेणादीनां देवत्वप्राप्तिः | ५ |
| अर्ककीर्तिराजगृहे श्रीषेणजीवस्य अमिततेजस्त्वेन सत्यभामाजीवस्य च सुतारात्वेनोत्पत्तिः | ५ |
| त्रिपृष्ठवासुदेवगृहेऽभिनन्दिताजीवस्य श्रीविजयत्वेन शिखिनन्दिताजीवस्य च ज्योतिष्प्रभात्वेनोत्पत्तिः | ६ |
| कपिलस्य चमरचञ्चायां अशनिघोषनामविद्याधरराजत्वेनोत्पत्तिः | ६ |
| अमिततेजो-ज्योतिष्प्रभयोः श्रीविजय-सुतारयोश्च विवाहः | ६ |
| देशनाश्रवणेन विरक्तस्याऽर्ककीर्तेर्दीक्षाऽमिततेजसश्च राज्याभिषेकः | ६ |
| अमिततेजसः श्रीविजयदर्शनाय पोतनपुरे आगमनं श्रीविजयेन नैमित्तिकसंदर्शितापाय-तन्निवारणादिवृत्तान्तकथनं च | ६-७ |
| अशनिघोषेण सुताराहरणम् | ८ |
| अमिततेजसः साहाय्येन अशनिघोषपराजयः | १०-१२ |
| बलदेवमुनेरचलस्य केवलज्ञानं, देशना, पूर्वजन्मादिकथनं च | १२-१४ |
| अशनिघोषस्य दीक्षा | १५ |
| श्रीविजयामिततेजसोर्विविधधर्मानुष्ठानानि | १५-१६ |
| नन्दनवनं गतयोः श्रीविजयामिततेजसोश्चारणमुनियुगलसकाशात् देशनाश्रवणं, दीक्षाग्रहणं, प्राणतविमाने उत्पातश्च | १६ |


#### द्वितीयः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| रमणीयविजये शुभानगर्यां स्तिमितसागरनृपगृहे अमिततेजसः बलदेवत्वेन श्रीविजयस्य च वासुदेवत्वेन उत्पत्तिः, अपराजितः अनन्तवीर्य इति तयोर्नामनी | १७ |
| स्तिमितसागरनृपदीक्षा चमरेन्द्रत्वेनोत्पातश्च | १८ |
| विष्णु-बलयोर्विद्यासाधनम् | १८ |
| चेटयोर्नाटकं प्रेक्षमाणाभ्यां विष्णु-बलाभ्यां नारदावज्ञा तेन च दमितारिनृपप्रेरणम् | १९ |
| दमितारिनृपेण चेटीमार्गणं, विष्णु-बलयोश्च प्रज्ञप्त्यादिविद्याः स्वयंसिद्धाः | १९-२० |
| चेटीरूपाभ्यां विष्णु-बलाभ्यां दमितारये नाटकदर्शनं तत्कन्यायाः कनकश्रियश्च हरणम् | २०-२३ |
| दमितारिणा युद्धं तद्वधश्च | २३-२४ |
| मेरुपर्वते कीर्तिधरमुनेर्देशनाश्रवणं कनकश्रीपृच्छायां च पूर्वभवकथनं च | २४-२६ |
| कनकश्रियो वैराग्यं स्वयम्प्रभजिनान्ते दीक्षा मोक्षश्च | २७ |
| बलदेवपुत्र्याः सुमतेर्वृत्तान्तः | २७-२९ |
| आयुःक्षये विष्णोः प्रथमनरके उत्पत्तिः | २९ |
| बलदेवस्य दीक्षा अच्युतेन्द्रत्वं च | २९ |
| नरकान्निःसृतस्याऽनन्तवीर्यजीवस्य विद्याधरत्वं अच्युतेन्द्रेण प्रतिबोधः दीक्षा अच्युते उत्पातश्च | २९-३० |


#### तृतीयः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| रत्नसञ्चयायां क्षेमङ्करनृपगृहे बलजीवस्य वज्रायुधत्वेन जन्म | ३१ |
| विष्णुजीवस्य तत्पुत्रत्वेन जन्म सहस्रायुध इति नाम च | ३१ |
| ईशानेन्द्रश्लाघामसहमानेन देवेन वज्रायुधस्य परीक्षा ततः प्रतिबोधश्च | ३१-३२ |
| दमितारिजीवदेवेन वज्रायुधस्योपसर्गकरणं, तदनु इन्द्रेणाऽर्चा च | ३२-३३ |
| वज्रायुधस्य राज्याभिषेकः,क्षेमङ्करस्य दीक्षा केवलज्ञानं तीर्थकृत्त्वं च | ३३ |
| वज्रायुधस्य चक्रित्वम् | ३३ |
| वज्रायुधसभायां विद्याधरत्रयवृत्तान्तः | ३३-३५ |
| सहस्रायुधपुत्रकनकशक्तिवृत्तान्तः | ३५-३७ |
| वज्रायुधस्य जिनान्तिके दीक्षा सिद्धिपर्वते वार्षिकी प्रतिमा च | ३७ |
| अश्वग्रीवसुतजीवदेवाभ्यां कृत उपसर्गः इन्द्राणीभिश्च वारणम् | ३७ |
| सहस्रायुधदीक्षा, वज्रायुध-सहस्रायुधयोर्मेलनं च | ३७ |
| ईषत्प्राग्भारे तयोरनशनं ग्रैवेयके उत्पत्तिश्च | ३८ |


#### चतुर्थः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| पुण्डरीकिण्यां घनरथराजगृहे वज्रायुध-सहस्रायुधयोर्जन्म | ३९ |
| तयोर्मेघरथ-दृढरथ इति नामस्थापना | ३९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठम् |
|---|---|
| विवाहार्थं गतयोः सुरेन्द्रदत्तेन युद्धं जयश्च | ३९-४० |
| परिणयनं पुत्रादिपरिवारश्च | ४०-४१ |
| कुक्कुटयुद्धं घनरथेन तत्पूर्वजन्मकथनं च | ४१-४२ |
| मेघरथेन तयोर्विद्याधराधिष्ठितत्वकथनं तत्पूर्वजन्मवर्णनं च | ४२-४४ |
| कुक्कुटयोरनशनं भूतनायकत्वेनोत्पत्तिर्मेघरथाय च पृथ्वीदर्शनम् | ४४ |
| मेघरथस्य राज्ये दृढरथस्य च यौवराज्येऽभिषेकः | ४५ |
| घनरथस्य दीक्षा कैवल्यं तीर्थकृत्त्वं च | ४५ |
| मेघरथस्य उद्यानगमनं, तत्र भूतैः सङ्गीतकरणं तत्सम्बन्धिनी कथा च | ४५-४६ |
| पौषधव्रतिनः मेघरथस्य दयापालने श्येन-पारापतवृत्तान्तः पूर्वभववर्णनं च | ४६-४८ |
| प्रतिमास्थस्य मेघरथस्य ईशानेन्द्रमहिषीकृता परीक्षा पराजयश्च | ४९ |
| मेघरथस्य दृढरथस्य च घनरथजिनान्ते दीक्षा सर्वार्थसिद्धगमनं च | ४९-५० |

### पञ्चमः सर्गः

| विषयः | पृष्ठम् |
|---|---|
| हस्तिनापुरे विश्वसेननृपगृहे अचिरादेवीकुक्षौ मेघरथजीवस्य समवतारः | ५१ |
| चतुर्दश महास्वप्नाः | ५१-५२ |
| प्रभोर्जन्म | ५२ |
| दिक्कुमारीभिः सूतिकाकर्मकरणम् | ५२-५३ |
| इन्द्रादिभिः कृतो जन्मोत्सवः | ५३-५४ |
| राज्ञा प्रभोः शान्तिरिति नाम स्थापनम् | ५४ |
| यौवने परिणयः राज्यप्राप्तिश्च | ५४ |
| प्रभोः पट्टमहिष्या यशोमत्याः कुक्षौ दृढरथजीवस्य अवतरणं चक्रायुध इति च तन्नामकरणम् | ५४-५५ |
| चक्ररत्नस्योत्पत्तिः षट्खण्डसाधना च | ५५-५९ |
| लोकान्तिकदेवकृता विज्ञप्तिः | ५९ |
| प्रभोर्वार्षिकदानं दीक्षा केवलज्ञानं च | ६० |
| प्रथमसमवसरणे कृता देशना | ६१ |
| चक्रायुधस्य दीक्षा गणधरत्वेन च स्थापना | ६२ |
| प्रभोर्यक्ष-यक्षिण्योर्वर्णनं पृथ्व्यां विहरणं च | ६३ |
| हस्तिनापुरे आगमनं राजपृच्छायां च तद्वृत्तान्तकथनम् | ६३-६८ |
| प्रभोः परिवारवर्णनम् | ६८ |
| सम्मेताद्रावनशनं निर्वाणं च | ६८ |
| चक्रायुधस्याऽपि कोटिशिलायां निर्वाणम् | ६८ |


# षष्ठं पर्व

### प्रथमः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| श्रीकुन्थुनाथप्रभोः पूर्वजन्मचरितम् | ७० |
| हास्तिनपुरे शूरनृपगृहे श्रीकुक्षौ प्रभोरवतरणम् | ७१ |
| चतुर्दशस्वप्नावलोकनम् | ७१ |
| प्रभोर्जन्म | ७१ |
| दिक्कुमारीभिः सूतिकर्मकरणं इन्द्रादिभिश्च जन्मोत्सवकरणम् | ७१ |
| प्रभोः कुन्थु इति नामस्थापनम् | ७१ |
| यौवने परिणयः राज्यप्राप्तिश्च | ७२ |
| चक्ररत्नोत्पत्तिः षट्खण्डसाधनं चक्रित्वाभिषेकश्च | ७२ |
| वार्षिकदानं दीक्षा मनःपर्ययज्ञानोत्पत्तिश्च च | ७२ |
| पारणं सहस्राम्रवणे कैवल्यप्राप्तिश्च | ७२-७३ |
| समवसरणरचना स्तुतिः प्रथमदेशना गणधरस्थापना च | ७३ |
| यक्ष-यक्षिण्योः परिवारस्य च वर्णनम् | ७४ |
| सम्मेताचलेऽनशनं निर्वाणं च | ७४ |


### द्वितीयः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| श्रीअरनाथप्रभोः पूर्वजन्मचरितम् | ७५ |
| हास्तिनपुरे सुदर्शननृपगृहे देवीकुक्षौ प्रभोरवतरणम् | ७६ |
| चतुर्दशस्वप्नावलोकनम् | ७६ |
| प्रभोर्जन्म | ७६ |
| दिक्कुमारीभिः सूतिकर्मकरणं इन्द्रादिभिश्च जन्मोत्सवकरणम् | ७६ |
| प्रभोः अर इति नामस्थापनम् | ७६ |
| यौवने परिणयः राज्यप्राप्तिश्च | ७६ |
| चक्ररत्नोत्पत्तिः षट्खण्डसाधनं च | ७६ |
| वार्षिकदानं दीक्षा मनःपर्ययज्ञानोत्पत्तिश्च च | ७६-७७ |
| पारणं सहस्राम्रवणे कैवल्यप्राप्तिश्च | ७७ |
| समवसरणरचना स्तुतिः प्रथमदेशना गणधरस्थापना च | ७७ |
| यक्ष-यक्षिण्योर्वर्णनम् | ७८ |
| विहारे पद्मिनीखण्डपत्तने आगमनम् | ७८ |
| प्रभुदेशना तदनु गणधरदेशना च | ७८ |
| सागरदत्तश्रेष्ठिना कुम्भगणधराय निजदुहितृकथाकथनं तत्पतिवीरभद्रविषयकपृच्छनं च | ७८-७९ |
| गणधरभगवता कथितोऽखिलोऽपि वीरभद्रवृत्तान्तः | ७९-८६ |
| सुव्रतागणिन्या अरजिनेश्वराय वीरभद्रस्य पूर्वभवपृच्छा भगवता तत्कथनं च | ८६ |
| वीरभद्रस्य दीक्षा देवत्वप्राप्तिश्च | ८६ |
| प्रभोः परिवारवर्णनम् | ८६-८७ |
| सम्मेताचलेऽनशनं निर्वाणं च | ८७ |


### तृतीयः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| बल-विष्णोः आनन्द-पुरुषपुण्डरीकयोः प्रतिविष्णोश्च बलेः पूर्वभववर्णनम् | ८८ |
| वैताढ्येऽरिञ्जयपुरे बलेर्जन्मादि | ८८ |

| विषयः | पृष्ठम् |
|---|---|
| दक्षिणार्धभरते चक्रपुरे आनन्द-पुरुषपुण्डरीकयोर्जन्मादि | ८८ |
| पद्मावतीकन्याकृते विष्णु-प्रतिविष्ण्वोर्युद्धं बलेश्च मरणम् | ८९ |
| पुण्डरीकस्य दिग्जयः | ८९ |
| मृत्वा षष्ठनरकपृथ्वीगमनम् | ८९ |
| आनन्दस्य वैराग्येण दीक्षा मोक्षश्च | ८९ |


## चतुर्थः सर्गः


| | |
|---|---|
| सुभूमचक्रवर्तिनः पूर्वभवसम्बन्धः | ९० |
| जमदग्निवृत्तान्तः | ९०-९१ |
| परशुरामस्योत्पत्तिः | ९२ |
| पितृघातवैरेण पृथ्व्याः सप्तकृत्वो निःक्षत्रियायाः करणम् | ९२ |
| तापसाश्रमे सुभूमस्य जन्मादि | ९२ |
| सुभूमकृतः परशुरामवधः वैरेण च एकविंशतिवारं पृथ्व्या निर्ब्राह्मणत्वकरणम् | ९३ |
| षट्खण्डसाधना | ९३ |
| मृत्वा सप्तमनरकगमनम् | ९३ |


## पञ्चमः सर्गः


| | |
|---|---|
| नन्दन-दत्त-प्रह्लादानां बल-विष्णु-प्रतिविष्णूनां पूर्वजन्मकथनम् | ९४ |
| वैताढ्ये सिंहपुरे प्रह्लादस्य जन्मादि | ९४ |
| वाराणस्यां दत्त-नन्दनयोर्जन्मादि | ९४ |
| गजहेतुकं विष्णु-प्रतिविष्ण्वोर्युद्धं प्रह्लादवधश्च | ९४-९५ |
| दत्तस्य दिग्जयः | ९५ |
| मृत्वा पञ्चमनरकगमनम् | ९५ |
| नन्दनस्य दीक्षा मोक्षश्च | ९५ |


## षष्ठः सर्गः


| | |
|---|---|
| मल्लिनाथप्रभोः पूर्वजन्मसम्बन्धः | ९६ |
| मिथिलापुर्यां कुम्भनृपतिगृहे प्रभावतीकुक्षौ प्रभोः स्त्रीगर्भतयाऽवतरणम् | ९७ |
| प्रभोर्जन्म देवकृत्यानि च | ९७ |
| नामस्थापना | ९७ |
| षण्णां पूर्वभवमित्रजीवराज्ञां पुरतः विविधप्रसङ्गेषु मल्लिकुमार्या वर्णनं तैश्च तस्याः वरणाय दूतप्रेषणम् | ९७-१०० |
| मल्ल्या कारिता निजसुवर्णप्रतिमा तस्यां चाऽऽहारप्रक्षेपः | १०० |
| षड्भिर्दूतैर्निजनृपाणां वर्णनं कन्यायाचनं च | १००-१०१ |
| कुम्भराजेन सर्वेषां सतिरस्कारं निष्कासनम् | १०१ |
| क्रुद्धैः षड्भिर्नृपैर्मिथिलारोधः | १०१ |
| हैमप्रतिमापिधानापनयनद्वारा मल्ल्या षण्णामपि प्रतिबोधकरणं पूर्वभवकथनादि च | १०१-१०२ |
| लोकान्तिकदेवप्रार्थनया वार्षिकदानं दीक्षा च | १०२ |
| मनःपर्ययोत्पत्तिस्तत्रैव च दिने कैवल्योत्पत्तिश्च | १०२ |
| समवसरणं इन्द्र-कुम्भकृता स्तुतिर्देशना च | १०२-१०३ |
| षण्णां नृपाणां दीक्षा | १०३ |
| शासनदेवतयोः प्रभोः परिवारस्य च वर्णनम् | १०४ |
| सम्मेताद्रावनशनं निर्वाणं च | १०४ |


## सप्तमः सर्गः


| | |
|---|---|
| मुनिसुव्रतप्रभोः पूर्वजन्मसम्बन्धः | १०५ |
| हरिवंशोत्पत्तिः | १०५-१०८ |
| राजगृहे नगरे सुमित्रनृपगृहे पद्मावतीकुक्षौ प्रभोरवतरणम् | १०९ |
| प्रभोर्जन्म देवकृत्यानि च | १०९ |
| नामस्थापना | १०९ |
| यौवने प्रभावतीप्रभृतिभिः परिणयः | १०९ |
| सुव्रतनाम्नः पुत्रस्य उत्पत्तिः | १०९ |
| प्रभो राज्याभिषेकः | १०९ |
| लोकान्तिकदेवप्रार्थनया वार्षिकदानं सुव्रताय च राज्यदानम् | १०९ |
| दीक्षा ब्रह्मदत्तनृपगेहे पारणं च | १०९ |
| नीलगुहोद्याने कैवल्यं समवसरणं च | ११० |
| शक्र-सुव्रतकृता स्तुतिः | ११० |
| प्रथमदेशना गणधरस्थापना च | ११०-१११ |
| शासनदेवतयोर्वर्णनम् | १११ |
| भृगुकच्छे गमनं अश्वप्रतिबोधः तत्पूर्वभवकथनं च | १११ |
| कार्तिकश्रेष्ठिवृत्तान्तः | ११२ |
| प्रभोः परिवारस्य वर्णनम् | ११२ |
| सम्मेतशैलेऽनशनं निर्वाणं च | ११२ |


## अष्टमः सर्गः


| | |
|---|---|
| महापद्मचक्रिणः पूर्वभवसम्बन्धः | ११३ |
| हास्तिनपुरे पद्मोत्तरनृगृहे विष्णुकुमार-महापद्मयोर्जन्मादि | ११३ |
| उज्जयिन्यां सुव्रताचार्यशिष्यकृतो नमुचिपराभवः | ११३-११४ |
| नमुचेर्हस्तिनापुरगमनं महापद्मेन च तस्य स्वसचिवकरणम् | ११४ |
| नमुचिपराक्रमं दृष्ट्वा महापद्मप्रदत्तो वरः | ११४ |
| मातृदुःखेन महापद्मस्य नगरान्निष्क्रमणम् | ११४ |
| विविधकन्यकाभिः परिणयः चक्रित्वं च | ११४-११६ |
| हस्तिनापुरे प्रतिनिवर्तनं तदा च सुव्रताचार्यस्याऽऽगमनम् | ११६ |
| देशनाश्रवणेन पद्मोत्तरनृप्रतिबोधः विष्णुकुमारेण सह दीक्षा च | ११६-११७ |
| पद्मोत्तरमुनेः कैवल्योत्पत्तिर्मोक्षश्च | ११७ |
| विष्णुकुमारस्य लब्धिमत्ता | ११७ |
| सुव्रताचार्यस्य हस्तिनापुरे चातुर्मासीस्थिरता | ११७ |
| नमुचिना प्राक्निक्षिप्तवरयाचनं मुनिपराभवकरणं च | ११७ |
| विष्णुकुमाराह्वानं तेन च नमुचिबोधनम् | ११८ |
| विफले बोधने क्रुद्धेन विष्णुकुमारेण शरीरवर्धनम् | ११८ |
| देवादिभिः सङ्घेन महापद्मेन च तस्य कोपोपशमनम् | ११८-११९ |
| त्रिपद्या त्रिविक्रमनामोत्पत्तिः | ११९ |
| विष्णुकुमारस्य मोक्षः | ११९ |
| महापद्मस्य दीक्षा मोक्षश्च | ११९ |
| अस्मिन् पर्वणि वर्णितानां चतुर्दशशलाकापुरुषाणां गणना | ११९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सप्तमं पर्व

## प्रथमः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| रक्षःकुलवर्णनम् | १२१ |
| वानरकुलस्योत्पत्तिः | १२१-१२२ |
| वानर-राक्षसानां वैरं मुनिना तत्कारणकथनं च | १२२-१२३ |
| स्वयंवरे श्रीमालया किष्किन्धिवरणं ततश्च क्रुद्धेनाऽशनिवेगपुत्रेण विजयसिंहेन युद्धकरणं अन्धकेन तद्वधश्च | १२३ |
| अशनिवेग-किष्किन्ध्योर्युद्धं पराजयेन च सुकेश-किष्किन्ध्योः पाताललङ्कायां पलायनम् | १२३-१२४ |
| अशनिवेगेन लङ्काराज्ये निर्घातस्य स्थापनम् | १२४ |
| सुकेशस्य माल्यादयस्त्रयः किष्किन्धेश्च आदित्यरजः-ऋक्षरज इति द्वौ पुत्रौ | १२४ |
| किष्किन्धिना मधुपर्वते किष्किन्धपुरवासनम् | १२४ |
| माल्यादिभिः लङ्काराज्यस्य पुनर्ग्रहणम् | १२४ |
| इन्द्रजन्म विद्याधरसाधनं दिक्पालस्थापनं च | १२४ |
| इन्द्र-माल्योर्युद्धं मालिवधः सुमालिनश्च पाताललङ्कायां पलायनम् | १२४-१२५ |
| इन्द्रेण लङ्काराज्यस्य वैश्रवणाय दानम् | १२५ |
| सुमालिपुत्रस्य रत्नश्रवसः कैकस्या विवाहः | १२५ |
| कैकसीकुक्षे रावणजन्म हारप्रसङ्गेन च दशमुखइतिनामकरणम् | १२५-१२६ |
| कुम्भकर्ण-चन्द्रणखा-बिभीषणानां जन्म | १२६ |


## द्वितीयः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| विमानारूढवैश्रवणदर्शनेन मात्रा ज्ञातवृत्तान्तानां दशमुखादीनां विद्यासाधनम् | १२७ |
| अनादृतदेवकृतोपसर्गेऽपि तेषां निश्चलत्वं विद्याप्राप्तिश्च | १२८-१२९ |
| अनादृतदेवेन क्षमायाचनं स्वयम्प्रभनगरनिर्माणं च | १२९ |
| स्वजनानामागमनं रावणस्य चन्द्रहासखड्गसाधना च | १२९ |
| रावणस्य मन्दोदर्या अन्याभिश्च कन्याभिः परिणयः | १२९ |
| कुम्भकर्ण-बिभीषणयोर्विवाहः | १३० |
| इन्द्रजिन्मेघवाहनयोर्जन्म | १३० |
| वैश्रवणेन सह युद्धं, तस्य पराजयः दीक्षा च | १३० |
| सम्मेताद्रावर्हत्प्रतिमावन्दनार्थं गतस्य रावणस्य भुवनालङ्कारहस्तिनः प्राप्तिः | १३१ |
| यमेन आदित्यरजः-ऋक्षरजसोः कारानिक्षेपं श्रुत्वा रावणस्य तेन सह युद्धं तस्य पलायनं च | १३१ |
| यमस्य इन्द्रशरणगमनं तेन च तस्मै सुरसुन्दरपुरदानम् | १३१-१३२ |
| आदित्यरजसः वालि-सुग्रीवौ पुत्रौ श्रीप्रभेति पुत्री च ऋक्षरजसश्च नल-नीलौ पुत्रौ | १३२ |
| वालिने राज्यं दत्वा आदिरजसः दीक्षा | १३२ |
| खरेण कृतं चन्द्रणखा हरणं पातालल‌ङ्कासाधनं च | १३२ |
| विराधोत्पत्तिः | १३२ |
| वालिना रावणसेवकत्वे निषिद्धे तयोर्युद्धं वालिजयो दीक्षा च | १३२-१३४ |
| अष्टापदे प्रतिमास्थस्य वालिनः रावणकृतोपसर्गः | १३४ |
| वालिकृतां शिक्षामनुभूय रावणेन क्षमायाचनं वालिस्तवनं च | १३४-१३५ |
| अष्टापदोपरि रावणस्य भक्तिः | १३५ |
| तुष्टेन धरणेन्द्रेण दत्ताऽमोघविजयाशक्ती रूपविकारिणीविद्या च | १३५ |
| वालिमुनेः कैवल्यं मोक्षश्च | १३५ |
| सुग्रीवस्य तारया विवाहः अङ्गद-जयानन्दयोर्जन्म च | १३५ |
| ईर्ष्यया साहसगतेः शेमुषीविद्यासाधनम् | १३५-१३६ |
| रावणस्य दिग्यात्रा | १३६ |
| रेवातीरे जलक्रीडया क्रीडता सहस्रांशुना युद्धं जयश्च | १३६-१३७ |
| सहस्रांशोर्दीक्षा तज्ज्ञात्वा च अनरण्यनृपस्याऽपि दीक्षा | १३८ |
| नारदविज्ञप्तेन रावणेन कृतः क्रतुनिषेधः | १३८ |
| पशुवधात्मकयज्ञसम्भववृत्तान्तप्रसङ्गे नारदकथितं निजवृत्तं | १३८-१४० |
| महाकालासुरकथा | १४१ |
| शाण्डिल्यरूपधारिणा महाकालासुरेण पर्वतस्य सहायता, सर्वत्र हिंसामययज्ञकारिता च | १४१-१४२ |
| रावणकथितो नारदपरिचयः | १४२ |
| रावणस्य मथुरागमनं हरिवाहन-मध्वोः परिचयः सम्बन्धश्च | १४२-१४३ |
| नलकूबरेण युद्धं जयश्च | १४३-१४४ |
| इन्द्रेण युद्धं जयश्च | १४४-१४६ |
| निर्वाणसङ्गममुनिकथित पूर्वभववृत्तान्तः इन्द्रस्य दीक्षा च | १४६ |
| रावणस्य अनन्तवीर्यमुनिवन्दनाय गमनं देशनाश्रवणं च | १४६ |
| देशनान्ते परस्त्रीनिमित्तकं निजमृत्युं ज्ञात्वाऽभिग्रहग्रहणम् | १४६-१४७ |


## तृतीयः सर्गः


| विषयः | पृष्ठम् |
|---|---|
| वैताढ्ये प्रह्लाद-महेन्द्रनृपाभ्यां निजपुत्र-पुत्र्योः पवनञ्जयाञ्जनयोर्विवाहनिर्णयनम् | १४८ |
| रात्रौ सखीभिः सहाऽञ्जनाया वार्तालापस्य श्रवणात् क्रुद्धेन पवनञ्जयेनाऽञ्जनायास्तिरस्कारः | १४८-१४९ |
| वरुणेन सह युध्यमानेन रावणेन सहायार्थं प्रह्लादाय दूतप्रेषणम् | १४९ |
| पितरं निषिध्य पवनञ्जयस्य तत्र गमनाय पत्न्यास्तिरस्कारपूर्वं प्रयाणम् | १४९-१५० |
| रात्रौ मानसतीरे वियोगिनीं चक्रवाकीं दृष्ट्वा प्रत्यागतस्य पवनस्याऽञ्जनया सह समागमोऽङ्गुलीयकदानं च | १५०-१५१ |
| श्वश्र्वा केतुमत्या गर्भवत्या अञ्जनाया निष्कासनम् | १५१ |
| पितृगृहादपि सख्यन्वितायास्तस्या निष्कासनम् | १५२ |
| अरण्ये चारणमुनिदर्शनं तस्मै च सख्या वृत्तान्तकथनं पृच्छा च | १५२ |
| मुनिना गर्भस्थजीवस्याऽञ्जनायाश्च पूर्वभवस्य कथनमाश्वासनं जिनधर्मे च स्थापनम् | १५२-१५३ |
| मणिचूलगन्धर्वेण सिंहात् तयोस्त्राणम् | १५३ |
| पर्वतगुहायां सुतजन्म अञ्जनायाश्च रुदनं श्रुत्वा प्रतिसूर्यविद्याधरागमनं तेन च तेषां स्वनगरे नयनम् | १५३-१५४ |
| विमानाद् बालस्य पतनं तेन च पर्वतचूर्णनम् | १५४ |
| हनुपुरे हनुमान् इति नामस्थापनम् | १५४ |
| पवनसाहाय्येन वरुणस्य रावणेन सह सन्धिः | १५४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठम् |
|---|---|
| गृहागतस्य पवनस्याऽञ्जनावृत्तश्रवणेन तच्छोधनमग्निप्रवेशप्रतिज्ञा च | १५४-१५५ |
| प्रह्लादेन पवनस्याऽग्निप्रवेशवारणं सेवकैश्चाऽञ्जनान्वेषणम् | १५५ |
| प्रह्लादसेवकैः पवनप्रतिज्ञां ज्ञात्वा समातुलाया अञ्जनाया तत्र गमनं पवनेन सह मेलनं च | १५५-१५६ |
| हनूमतो यौवनप्राप्तिः वरुणसाधने रावणसहायतया च गमनम् | १५६ |
| युद्धे हनुमत्साहाय्येन रावणजयः विविधकन्याभिश्च परिणयः | १५६ |

## चतुर्थः सर्गः

| | |
|---|---|
| वज्रबाहु-उदयसुन्दरवृत्तान्तः | १५८ |
| सुकोशलवृत्तान्तः | १५९-१६० |
| नघुषवृत्तान्तः | १६० |
| सोदासवृत्तान्तः | १६०-१६१ |
| रघुपर्यन्ता सिंहरथपरम्परा | १६१ |
| तदनु अनरण्यो राजा अनन्तरथ-दशरथौ पुत्रौ | १६१ |
| सहस्रांशुदीक्षां ज्ञात्वाऽनन्तरथसहितस्याऽनरण्यस्य दीक्षा | १६१ |
| बालस्य दशरथस्य राज्याभिषेकः | १६१ |
| यौवनेऽपराजिता-सुमित्रा-सुप्रभाभिः परिणयः | १६१ |
| जानकीनिमित्तं दशरथपुत्रेण रावणमृत्युरिति ज्ञात्वा बिभीषणस्य दशरथ-जनकमारणाय प्रस्थानम् | १६१ |
| नारदद्वारैतज्ज्ञात्वा मन्त्रिभियुक्त्या तयोस्त्राणम् | १६२ |
| कैकेय्या सह विवाहप्रसङ्गे प्रवृत्ते युद्धे दशरथेन तस्यै वरदानं तया च तन्न्यासः | १६२-१६३ |
| राम-लक्ष्मण-भरत-शत्रुघ्नानां जन्मादि | १६३-१६४ |
| भामण्डल-सीतयोः पूर्वजन्मानि | १६४-१६५ |
| मिथिलायां जनकगृहे विदेहाकुक्षेर्भामण्डल-सीतयोर्युगपज्जन्म | १६५ |
| जातमात्रस्य बालस्य पूर्ववैरिदेवेनाऽपहारः नन्दनवने मोचनं च | १६५ |
| चन्द्रगतिविद्याधरेण तस्य नयनं भामण्डल इति नामस्थापना च | १६५ |
| मिथिलायां हाहाकारो राज्ञा पुत्रशोधनं पुत्र्याश्च सीतेति नाम | १६५ |
| सीताया यौवनप्राप्तिः राज्ञा वरान्वेषणं च | १६५ |
| मिथिलोपरि म्लेच्छाक्रमणं दूतद्वारा दशरथसहाययाचनं च | १६५-१६६ |
| सानुजस्य रामस्य युद्धाय गमनं जयः जनकेन सीतादानं च | १६६ |
| सीतारूपं द्रष्टुमागतस्य नारदस्य भीतया सीतया निष्कासनम् | १६६ |
| रुष्टेन नारदेन तत्प्रतिकाराय युक्त्या भामण्डलप्रेरणम् | १६६-१६७ |
| चन्द्रगतिना जनकात् सीतायाचनं धनुरारोपणपरीक्षा च | १६७ |
| धनुषं सज्यं कृत्वा रामस्य परीक्षापारगमनं सीतया विवाहश्च | १६८ |
| लक्ष्मण-भरतयोर्विविधकन्याभिः सह विवाहः | १६८ |
| वृद्धकञ्चुकिनं दृष्ट्वा दशरथस्य वैराग्यम् | १६८-१६९ |
| सत्यभूतिमुनिना भामण्डल-सीतयोः सम्बन्धकथनं भामण्डलबोधनं च | १६९ |
| चन्द्रगतेर्दीक्षा | १६९ |
| दशरथपृष्टेन मुनिना तत्पूर्वभवकथनम् | १६९-१७० |
| दशरथस्य दीक्षेच्छा तच्छ्रुत्वा भरतस्या प्रविव्रजिषा | १७० |
| कैकेय्या न्यासीकृतस्य वरस्य याचने भरताय राज्यस्य याचनम् | १७० |
| भरतेन राज्यादानाय निषेधनम् | १७०-१७१ |
| रामस्य वनवासार्थं निर्गमनं सीतायाश्चाऽपि पत्यनुयानम् | १७१ |
| लक्ष्मणेनाऽपि तयोरनुसरणम् | १७१-१७२ |
| नृप-सामन्त-नगरजनैर्बहु प्रार्थितस्याऽपि रामस्याऽनिवर्तनम् | १७२ |
| कैकेय्या शोचनम् | १७३ |
| सभरताया कैकेय्या रामानयने वनगमनं तत्र च रामेण सीतानीतजलैस्तस्य राज्याभिषेकः | १७३ |
| सत्यभूतिमुनेः पार्श्वे दशरथस्य दीक्षा | १७३ |

## पञ्चमः सर्गः

| | |
|---|---|
| उद्वसदेशदर्शनेन रामपृच्छायां नरकथितः सिंहोदर-वज्रकर्णवृत्तान्तः | १७४-१७५ |
| रामादेशप्राप्तेन लक्ष्मणेन सिंहोदरसाधनम् | १७५ |
| सिंहोदरस्य वज्रकर्णेन सह सन्धिः | १७६ |
| कूबरपुरे कल्याणमालाख्यातो वालिखिल्यवृत्तान्तः | १७६ |
| स्त्रीवेषधारित्वहेतुकथनं लक्ष्मणेन सह विवाहनिर्णयनं च | १७६ |
| म्लेच्छेभ्यो वालिखिल्यमोचनं म्लेच्छराजस्य वृत्तान्तश्च | १७७ |
| अरुणग्रामे ब्राह्मणवृत्तान्तः | १७७ |
| वर्षाकाले निवासार्थं यक्षेण रामपुरीनिर्माणम् | १७८ |
| ब्राह्मणाय दानं तस्य दीक्षा च | १७८ |
| विजयपुरे वनमालावृत्तान्तः | १७९ |
| अतिवीर्यनृपेण स्त्रीवेषधारिणां रामादीनां युद्धं तत्साधनं च | १७९-१८० |
| वनमालया लक्ष्मणस्य शपथग्राहणम् | १८०-१८१ |
| क्षेमाञ्जलिपुर्यां शत्रुदमनपरीक्षां पारयितुर्लक्ष्मणस्य जितपद्मया विवाहः | १८१ |
| वंशस्थले जनानां भयवारणं मुनिद्वयस्य च कैवल्योत्पत्तिः | १८१ |
| रामपृष्टे उपसर्गकारणे मुनिकथितो निजवृत्तान्तः | १८१-१८३ |
| महालोचनदेवस्य उपकारकरणेच्छा | १८३ |
| दण्डकारण्ये जटायुर्वृत्तान्तस्तत्सम्बन्धे च सुगुप्तर्षिकथितः स्कन्दकमुनिवृत्तान्तः | १८३-१८४ |
| सूर्यहाससाधनाव्यापृते खर-चन्द्रणखापुत्रे शम्बूके लक्ष्मणेनाऽज्ञानात् तद्वधः | १८५ |
| चन्द्रणखाया आगमनं राम-लक्ष्मणयोर्विवाहप्रार्थनं ताभ्यां कृतो निषेधश्च | १८५ |
| रुष्टया तया खरादिभ्यः पुत्रवधकथनं तेषां च युद्धार्थमागमनम् | १८५-१८६ |
| रावणाग्रे चन्द्रणखया कृतं सीतारूपवर्णनम् | १८६ |
| रावणस्य दण्डकारण्यगमनं विद्यया सिंहनादकरणेन सीतापहरणं तन्निवारकजटायुःपक्षच्छेदश्च | १८६ |
| सीताविलापश्रवणेन तत्त्राणायाऽऽगतस्य रत्नजटिनो विद्यानाशनं तस्य कम्बुशैलेऽवस्थानं च | १८७ |
| रावणेन सीताप्रार्थनं सीताया आक्रोशोऽनशनाभिग्रहश्च | १८७ |

## षष्ठः सर्गः

| | |
|---|---|
| सहायार्थमागतस्य रामस्य लक्ष्मणेन पुनः प्रेषणम् | १८८ |
| स्वस्थाने सीताया अदर्शनेन रामस्य मूर्च्छा | १८८ |
| लब्धचेतनेन रामेण मुमूर्षुजटायुर्दर्शनं तस्मै नमस्कारदानं च | १८८ |
| मृतस्य जटायुषो देवत्वम् | १८८ |
| सीताशुद्ध्यै रामस्याऽटव्यामटनम् | १८८ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठम् |
| --- | --- |
| युद्धे लक्ष्मणकृतत्रिशिरसो वधः | १८८ |
| विराधस्य लक्ष्मणसहायार्थमागमनं लक्ष्मणेन च तस्य पातालल‌ङ्काराज्ये स्थापनम् | १८८ |
| युद्धे खर-दूषणयोर्वधः | १८९ |
| विलपतो रामस्य मूर्च्छनं लक्ष्मणागमेन शुद्धिश्च | १८९ |
| विराधसेवकैः सीताशोधनं निष्फलता च | १८९ |
| पातालल‌ङ्कायां सुन्देन सह विराधयुद्धं, रामे आगते सुन्दपलायनं, विराधस्य च राज्याभिषेकः | १८९ |
| साहसगतिना प्रतारणीविद्यासाधनं सुग्रीवरूपं धृत्वा तदन्तःपुरप्रवेशनं च | १८९ |
| सत्य-विटसुग्रीवयोर्युद्धे विटसुग्रीवेण सत्यसुग्रीवस्य कुट्टनम् | १९० |
| सुग्रीवेण रामसाहाय्ययाचनम् | १९०-१९१ |
| रामकृतधनुष्टङ्कारेण रूपान्तरकरीविद्यापलायनं, साहसगतेश्चैकेन बाणेन वधः | १९१ |
| रावणपार्श्वे चन्द्रणखाविलापः रावणदत्तमाश्वासनं च | १९१ |
| रावणप्रेषितया मन्दोदर्या सीतानुनयनं सीताकृतस्तत्तिरस्कारश्च | १९१-१९२ |
| रावणकृतेष्वुपसर्गेष्वपि सीताया निश्चलत्वम् | १९२ |
| बिभीषणपृष्टया सीतया निजपरिचयदानम् | १९२ |
| रावणप्रतिबोधने बिभीषणस्य नैष्फल्यम् | १९२-१९३ |
| मन्त्रिभिर्बिभीषणस्य मन्त्रणा युद्धार्थं प्रगुणना च | १९३ |
| सीताशुद्ध्यर्थं कम्बुद्वीपमागतस्य सुग्रीवस्य रत्नजटिद्वारा सीताशुद्धिः | १९३-१९४ |
| लङ्कां गत्वा रावणेन सह युयुत्सोर्लक्ष्मणस्य सामर्थ्यपरीक्षणं पारगमनं च | १९४ |
| साभिज्ञानदानं हनूमतो दूतत्वेन लङ्काप्रेषणम् | १९४ |
| गच्छता हनूमता महेन्द्रपुरि मातामह-मातुलाभ्यां युद्धं जयश्च | १९५ |
| दधिमुखद्वीपे कन्यात्रयवृत्तान्तः | १९५ |
| हनूमता आशालिकाविद्यापराभवनं लङ्काप्राकारभञ्जनं च | १९५-१९६ |
| वप्ररक्षवज्रमुखस्य नाशनं तत्कन्यया लङ्कासुन्दर्या च युद्धम् | १९६ |
| लङ्कासुन्दर्या कथितो निजवृत्तान्तस्तया च सह हनूमतो विवाहः | १९६ |
| बिभीषणसदनं गत्वा हनूमता तस्मै निजागमनकथनम् | १९७ |
| सीतापार्श्वे गत्वा रामाङ्गुलीयकपातनम् | १९७ |
| प्रसन्नां सीतां दृष्ट्वा रावणेन मन्दोदरीप्रेषणं सीताकृततिरस्कारश्च | १९८ |
| हनूमता सीतायै रामसन्देशकथनमभिज्ञानरूपेण च तच्चूडामणेरादानम् | १९८ |
| हनूमता कृतं देवरमणोद्यानभङ्गादितुमुलम् | १९८-१९९ |
| रावणसुताऽक्षकुमारेण युद्धं तद्वधश्च | १९९ |
| इन्द्रजिता युद्धं हनूमतो बन्धनं च | १९९ |
| रावणपार्श्वे गमनं द्वयोः संवादश्च | १९९ |
| रावणवचसा क्रुद्धेन हनूमता नागपाशत्रोटनं, पादघातेन रावणमुकुटभञ्जनं, पादप्रहारैर्लङ्काभञ्जनं च | २०० |


## सप्तमः सर्गः


| विषयः | पृष्ठम् |
| --- | --- |
| रामादीनां लङ्काविजयाय प्रयाणं मार्गे विविधनृपाणां पराभवश्च | २०१ |
| लङ्कासमीपस्थे हंसद्वीपे तेषामष्टौ दिनानि वासः | २०१ |
| रामागमनं ज्ञात्वा लङ्कायां रावणादीनां युद्धाय सज्जीभवनम् | २०१ |
| बिभीषणेन सीतामोक्षाय रावणस्य बोधनं क्रुद्धेन च रावणेन तस्य निर्वासनम् | २०१-२०२ |
| बिभीषणस्य रामशरणगमनम् | २०२ |
| रावणसैन्यवर्णनम् | २०२ |
| द्वयोः सैन्यानां युद्धम् | २०३ |
| युद्धवर्णनम् | २०३ |
| रावणस्य रणप्रवेशः | २०३ |
| हनूमतो रणकुशलता | २०४ |
| सुग्रीवताडितस्य कुम्भकर्णस्य मूर्च्छनम् | २०५ |
| इन्द्रजिन्मेघवाहनाभ्यां नागपाशेन सुग्रीव-भामण्डलयोर्बन्धनम् | २०५ |
| कुम्भकर्णताडितस्य हनूमतो मूर्च्छा | २०५ |
| बिभीषणस्याऽऽगमनेन "पूज्यैः साकं न योद्धव्य"मिति विचार्य इन्द्रजिन्मेघवाहनयोः पलायनम् | २०६ |
| चिन्तातुराभ्यां राम-लक्ष्मणाभ्यां महालोचनदेवस्मरणम् | २०६ |
| देवदत्तानि विविधायुधानि | २०६ |
| लक्ष्मणस्य वाहनं गरुडं प्रेक्ष्य नागपाशतः पन्नगानां पलायनम् | २०६ |
| सीतामोचनार्थं बिभीषणस्य रावणाय निवेदनं क्रुद्धेन रावणेन कृतस्तत्तिरस्कारश्च | २०६ |
| द्वयोर्भ्रात्रोर्युद्धम् | २०६ |
| लक्ष्मणेनेन्द्रजितो रामेण च कुम्भकर्णस्य नागपाशद्वारा बन्धनं स्वशिबिरे नयनं च | २०७ |
| क्रोध-शोकाकुलेन रावणेन शक्तिप्रक्षेपणं तेन च लक्ष्मणस्य मूर्च्छनम् | २०७ |
| क्रुद्धस्य रामस्य रावणेन सह युद्धं रावणस्य च लङ्कागमनम् | २०७ |
| रामस्य विलापः सुग्रीवादिभिश्च प्रतिबोधनम् | २०७ |
| सौमित्रेः प्रतिजागरणोपायस्य चिन्तनम् | २०७ |
| लक्ष्मणव्यतिकरश्रवणेन सीताया विलापः विद्याधर्या आश्वासनं च | २०८ |
| रावणस्य हर्ष-शोकसमाकुलता | २०८ |
| विद्याधरोक्तो विशल्यास्नपनोदकसेचनरूपो लक्ष्मणत्राणोपायः | २०८-२०९ |
| रामादिष्टैर्भामण्डलाद्यैर्भरतद्वारा विशल्यानयनम् | २०९ |
| विशल्यास्पर्शेन लक्ष्मणदेहतः शक्तिनिर्गमनं द्वयोर्विवाहश्च | २०९-२१० |
| लक्ष्मणोज्जीवनवृत्तं श्रुत्वा रावणेन बन्धुवर्गविमोचनार्थं दूतप्रेषणं रामेण कृता तदवज्ञा च | २१० |
| रावणस्य शान्तिनाथचैत्ये बहुरूपाविद्यासाधनम् | २१०-२११ |
| अङ्गदकृतोपसर्गेऽपि रावणस्य निश्चलत्वम् | २११ |
| रावणेन सीतानुनयनं तया चाऽनशनाभिग्रहणं रावणस्य पश्चात्तापश्च | २११ |
| युद्धे बहुरूपाविद्यायाः सहायेऽपि विधुरतायां रावणेन चक्रमोचनम् | २११-२१२ |
| तेनैव चक्रेण लक्ष्मणकृतो रावणवधः | २१२ |
| रावणस्य चतुर्थनरकगमनम् | २१२ |


## अष्टमः सर्गः


| विषयः | पृष्ठम् |
| --- | --- |
| राक्षसानां रामशरणगमनम् | २१३ |
| बिभीषण-मन्दोदर्यादीनां विलापो रामादिभिश्च तद्बोधनम् | २१३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठम् |
|---|---|
| कुम्भकर्णादीनां मोचनं तैश्च रावणाङ्गसंस्करणम् | २१३ |
| अप्रमेयबलमुनेरिन्द्रजिदादीनां पूर्वभवव्यतिकरश्रवणम् | २१३-२१४ |
| कुम्भकर्णादीनां दीक्षा | २१४ |
| सीतामेलनम् | २१४ |
| बिभीषणस्य राज्याभिषेकः | २१४ |
| राम-लक्ष्मणाभ्यां पूर्वप्रतिपन्नकन्यानां पाणिग्रहणम् | २१४ |
| इन्द्रजिन्मेघवाहनकुम्भकर्णानां मोक्षः | २१४-२१५ |
| दुःखार्त्ताभ्यां राम-लक्ष्मणमातृभ्यां नारदाय स्वदुःखनिवेदनम् | २१५ |
| लङ्कां गतेन नारदेन रामाय मातृदुःखस्य कथनम् | २१५ |
| रामस्याऽयोध्यागमनोत्साहः | २१५ |
| बिभीषणेनाऽयोध्याया नवीकरणम् | २१५ |
| नारदेन राममातृभ्यो रामागमनकथनम् | २१५ |
| रामादीनां पुष्पकद्वाराऽयोध्यागमनं मातृ-भ्रात्रादिभिश्च मेलनम् | २१५-२१६ |
| अयोध्यायां महोत्सवः | २१६ |
| भरतस्य दीक्षेच्छा भुवनालङ्कारहस्तिवृत्तान्तश्च | २१६ |
| मुनिकथितो भरतस्य हस्तिनश्च पूर्ववृत्तान्तः | २१६-२१७ |
| भरतस्य कैकेय्याश्च दीक्षा मोक्षश्च | २१७ |
| राम-लक्ष्मणयोर्बलदेवत्व-वासुदेवत्वाभिषेकः | २१७ |
| रामेण बिभीषणादिभ्यो राज्यवितरणम् | २१७ |
| शत्रुघ्नस्य मथुराराज्येच्छा युक्तिपूर्वं च मथुरेशस्य मधोः पराभवो वधश्च | २१७-२१८ |
| मित्रवधं श्रुत्वा चमरेन्द्रेण शत्रुघ्नप्रजानां पीडनम् | २१८ |
| शत्रुघ्नस्य मथुराया आग्रहित्वे मुनिकथितो पूर्वभववृत्तान्तः | २१८-२१९ |
| जङ्घाचारणमहर्षीणां वृत्तं चमरेन्द्रकृतपीडाशमनोपायश्च | २१९ |
| महर्षीणां प्रभावतो देवकृतरोगादीनां शान्तिः | २१९ |
| राम-लक्ष्मणयोः पट्टमहिष्यादिः परिवारः | २२० |
| सीतायाः स्वप्नदर्शनं गर्भधारणं च | २२० |
| सपत्नीभिरीर्ष्यया सीतावञ्चनपूर्वं सर्वत्र तद्दोषप्रकाशनम् | २२० |
| वसन्तर्तौ सीतादोहदः पूरणं च | २२० |
| दक्षिणचक्षुःस्फुरणमशुभकल्पना च | २२० |
| प्रधाननागरिकै रामाय सीतादूषितत्वनिवेदनं रामस्य स्वीकृतिश्च | २२१ |
| रामस्य निशाभ्रमणं जनवादश्रवणं च | २२१ |
| रामेण कृतान्तवदनसेनान्यै कृता सीतात्यागस्याऽऽज्ञा | २२१ |
| कृतान्तवदनेन यात्राव्याजेन नीतायाः सीताया अरण्ये मोचनम् | २२२ |
| अरण्यमोचनकारणं श्रुत्वा सीताया मूर्च्छा | २२२ |
| कृतान्तवदनाय रामकृते सीताप्रदत्तः सन्देशः | २२२ |


## नवमः सर्गः


| | |
|---|---|
| अरण्ये सीतया महासैन्यदर्शनम् | २२३ |
| वज्रजङ्घनृपाय निजवृत्तान्तकथनम् | २२३ |
| नृपेण तस्याः स्वगृहे नयनम् | २२३ |
| कृतान्तवदनमुखात् सीतासन्देशं श्रुत्वा रामस्य विलापः सीतागवेषणं च | २२३ |
| सीताया अप्राप्तौ तां मृतां मत्वा तत्प्रेतकार्यकरणम् | २२३-२२४ |
| सीताकुक्षेरनङ्गलवण-मदनाङ्कुशयोर्जन्म | २२४ |
| सिद्धार्थसिद्धपुत्रकद्वारा लवणाङ्कुशयोः कलाग्राहणम् | २२४ |
| यौवने लवणस्य विविधकन्याभिः परिणयः | २२४ |
| अङ्कुशविवाहनिमित्तं पृथुनृपेण युद्धं तत्पराभवस्ततपुत्र्या-ऽङ्कुशस्य विवाहश्च | २२४ |
| वज्रजङ्घेन नारदद्वारा लवणाङ्कुशयोर्वंशज्ञापनम् | २२४ |
| लवणाङ्कुशाभ्यां विविधदेशसाधनम् | २२५ |
| लवणाङ्कुशयोरयोध्यां प्रति प्रयाणम् | २२५ |
| सेनाभिरयोध्यापुरीरोधनम् | २२५ |
| रामलक्ष्मणयोः साश्चर्यं युद्धार्थं गमनम् | २२५ |
| ज्ञातसीतावृत्तान्तस्य भामण्डलस्य सीतापार्श्वे गमनम् | २२५ |
| सीतातो यामेयद्वयप्रवृत्तिं ज्ञात्वा ससीतं स्कन्धावारगमनम् | २२६ |
| भामण्डलेन सुग्रीवादिभ्यः सीतावृत्तान्तकथनं तेषां च सीतापार्श्वे आगमनम् | २२६ |
| लवणाङ्कुशाभ्यां रामसैन्यविद्रावणं रामलक्ष्मणयोर्युद्धाया-ऽऽह्वानं च | २२६ |
| युद्धे रामस्य वैधुर्यम् | २२६ |
| अङ्कुशबाणाहतस्य लक्ष्मणस्य मूर्च्छा | २२७ |
| लक्ष्मणेनाऽङ्कुशोपरि चक्रमोचनं चक्रस्य च सप्रदक्षिणं प्रतिनिवर्त्तनम् | २२७ |
| रामलक्ष्मणयोर्विषादो नारदेन च पुत्रद्वयवृत्तान्तकथनम् | २२७ |
| लवणाङ्कुशयो रामलक्ष्मणाभ्यां सङ्गमः प्रणतिश्च | २२७ |
| सीतायाः पुण्डरीकपुरगमनं सपुत्रस्य च रामस्याऽयोध्याप्रवेशः | २२७ |
| सुग्रीवाद्यै रामाय सीताया आनयनार्थं निवेदनम् | २२७ |
| रामस्य सीताशुद्ध्यर्थं दिव्यकरणस्याऽऽग्रहः | २२७ |
| नगराद् बहिर्मण्डपरचना | २२८ |
| सुग्रीवाद्यैः सीतानयनम् | २२८ |
| सीतया दिव्यपञ्चकस्वीकरणं रामस्य चाऽग्निप्रवेशाज्ञा | २२८ |
| अयोध्याबहिर्भागे जयभूषणमुनेः कैवल्योत्पत्तिरिन्द्रादीनां चाऽऽगमनम् | २२८ |
| सीतासान्निध्यार्थं इन्द्रस्य स्वसेनापतये आज्ञा | २२८ |
| रामपश्चात्तापः सत्यापनापूर्वं च सीताया अग्निप्रवेशः | २२८-२२९ |
| सीताशीलप्रभावादग्निविध्यापनं गर्तस्य जलापूर्णवापीत्वम् | २२९ |
| रामेण नगरप्रवेशाय सीतानुनयनं तस्या निषेधः दीक्षेच्छा च | २२९ |
| सीताकृतो स्वकेशलोचः रामस्य च मूर्च्छा | २२९ |
| केवलिहस्तेन सीताया दीक्षा | २२९ |


## दशमः सर्गः


| | |
|---|---|
| रामस्य सीतासम्बन्धिनी विह्वलता लक्ष्मणेनाऽऽश्वासनं च | २३० |
| केवलिनो देशनान्ते रामस्य निजभव्यत्वे प्रश्नः | २३० |
| केवलिना तस्य तद्भवमोक्षगामित्व कथनम् | २३० |
| बिभीषणेन स्वस्य रावणादीनां च पूर्वभववृत्तान्तपृच्छनं केवलिना कथनं च | २३०-२३२ |
| कृतान्तवदनस्य दीक्षा | २३२ |
| रामादीनां सीतायै वन्दनम् | २३२ |
| कृतान्तवदनस्य ब्रह्मलोके उत्पत्तिः सीतायाश्च अच्युतेन्द्रत्वम् | २३२ |
| वैताढ्ये विवाहप्रसङ्गे लक्ष्मणपुत्राणां लवणाङ्कुशयोरुपरि द्वेषः लवणाङ्कुशाभ्यां तद्बोधनं लज्जितानां च तेषां दीक्षा | २३२-२३३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठम् |
| --- | --- |
| भामण्डलस्य मरणं युग्मित्वेन जन्म च | २३३ |
| हनूमतो दीक्षा मोक्षश्च | २३३ |
| सौधर्मेन्द्रेण रामस्याऽध्यवसितस्य भ्रातृस्नेहस्य चाऽऽलोचनम् | २३३ |
| देवद्वयेन स्नेहविषये लक्ष्मणस्य परीक्षणं लक्ष्मणमृतिश्च | २३३ |
| मृते लक्ष्मणे लवणाङ्कुशयोर्दीक्षा मोक्षश्च | २३३-२३४ |
| रामस्याऽसमञ्जसचेष्टितम् | २३४ |
| इन्द्रजित्पुत्राणामयोध्यावस्कन्दो देवानां रामगृह्यत्वं दृष्ट्वा भयं संवेगो दीक्षा च | २३४ |
| जटायुः-कृतान्तवदनदेवाभ्यां रामप्रतिबोधनम् | २३४-२३५ |
| लक्ष्मणदेहस्य मृतकार्यकरणम् | २३५ |
| राम-शत्रुघ्नयोर्दीक्षा | २३५ |
| रामस्यैकाकिविहारित्वेऽवधिज्ञानोत्पत्तिः | २३५ |
| निजस्य लक्ष्मणस्य च पूर्वभवस्य चिन्तनम् | २३५ |
| स्यन्दनस्थलपुरे भिक्षार्थं प्रविष्टेन रामेण पुरक्षोभं दृष्ट्वा वनवासाभिग्रहग्रहणम् | २३५ |
| सीतेन्द्रकृत उपसर्गो रामस्य च निश्चलत्वम् | २३६ |
| रामस्य केवलज्ञानोत्पत्तिः सीतेन्द्रादिभिः कृतो महिमा च | २३६ |
| देशनान्ते सीतेन्द्रेण रावण-लक्ष्मणयोर्गतिविषयके प्रश्ने पृष्टे रामेण तयोः सीतायाश्च मोक्षपर्यन्तानां गतीनां कथनम् | २३६-२३७ |
| सीतेन्द्रेण नरकभूमिं गत्वा रावण-लक्ष्मण-शम्बूकानां प्रतिबोधनं देवकुरौ च गत्वा भामण्डलजीवस्य प्रतिबोधनम् | २३७ |
| रामस्य मोक्षः | २३७ |


## एकादशः सर्गः


| विषयः | पृष्ठम् |
| --- | --- |
| नमिनाथभगवतः पूर्वजन्मसम्बन्धः | २३८ |
| मिथिलाया विजयनृपस्य वप्राराज्ञ्याश्च वर्णनम् | २३८ |
| वप्राकुक्षौ प्रभोरवतरणम् | २३८ |
| प्रभोर्जन्म | २३८ |
| दिक्कुमारीभिः सूतिकर्मकरणम् | २३८ |
| इन्द्रादिकृतो जन्मोत्सवः इन्द्रकृता स्तुतिश्च | २३८-२३९ |
| विजयनृपकृतो जन्मोत्सवः | २३९ |
| नामस्थापनम् | २३९ |
| यौवने पाणिग्रहणं राज्याभिषेकश्च | २३९ |
| लोकान्तिकदेवविज्ञप्तस्य प्रभोर्वार्षिकदानं दीक्षा च | २३९ |
| मनःपर्ययज्ञानोत्पत्तिः पारणं च | २३९ |
| नवमासानन्तरं सहस्राम्रवणे कैवल्योत्पत्तिः | २३९ |
| समवसरणरचना इन्द्रकृता स्तुतिश्च | २३९-२४० |
| प्रभोः प्रथमदेशना गणधरस्थापना च | २४० |
| शासनदेवतयोः प्रभोः परिवारस्य च वर्णनम् | २४१ |
| सम्मेताद्रावनशनं निर्वाणं च | |


## द्वादशः सर्गः


| विषयः | पृष्ठम् |
| --- | --- |
| हरिषेणचक्रिणः पूर्वभवसम्बन्धः | २४२ |
| काम्पील्यनगरे महाहरिनृपगृहे मेराकुक्षेः हरिषेणजन्म | २४२ |
| यौवने राज्यं चक्ररत्नोत्पत्तिः षट्खण्डसाधना च | २४२ |
| वैराग्यं दीक्षा मोक्षश्च | २४२-२४३ |


## त्रयोदशः सर्गः


| विषयः | पृष्ठम् |
| --- | --- |
| जयचक्रिणः पूर्वभवसम्बन्धः | २४४ |
| राजगृहे विजयनृपगृहे वप्राकुक्षेर्जयस्य जन्म | २४४ |
| यौवने राज्यं चक्ररत्नोत्पत्तिः षट्खण्डसाधना च | २४४ |
| वैराग्यं दीक्षा मोक्षश्च | २४४-२४५ |
| अस्मिन् पर्वणि वर्णितानां षट्शलाकापुरुषाणां गणना | २४५ |






Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥अर्हम्[१] ॥

॥ॐ भगवतेऽर्हते शान्तिजिनाय नमो नमः॥

॥नमः प्रथमानुयोगप्रणेतृभ्यः श्रीकालकार्येभ्यः॥

### कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविनिर्मितं

# त्रिषष्टिशलाकापुरुषचरितम्

### ॥श्रीशान्तिनाथचरितप्रतिबद्धं पञ्चमं पर्व ॥

## ॥प्रथमः सर्गः ॥

नमः **श्रीशान्तिनाथाय** कृतविश्वाघशान्तये। षोडशाय जिनेन्द्राय पञ्चमाय च चक्रिणे ॥१॥
मोहान्धकारसन्दोहकर्तनैकविकर्तनम्[२]। कीर्तयिष्यामि तस्याहं चरित्रमतिपावनम् ॥२॥
[३]अस्यैव **जम्बूद्वीप**स्य मण्डलाकारधारिणे। इन्दोरिव सप्तमोंऽशः क्षेत्रं **भरत**मस्त्यदः ॥३॥
अर्धे च दक्षिणे तस्य मध्यखण्डविभूषणम्। अस्ति **रत्नपुरं** नाम पुरं सुरपुरोपमम्[४] ॥४॥
तत्र **श्रीषेण** इत्यासीद्राजा राजीव[५]लोचनः। राजीवमिव वासाय श्रियो देव्या विकस्वरम् ॥५॥
ज्येष्ठं बन्धुमिवाऽजस्रं[६] स धर्मं बहुपूजयत्। अर्थ-कामौ कनीयांसाविवाबाधमपालयत् ॥६॥
प्रार्थनामर्थिलोकस्य पूरयामास सोऽनिशम्। स्मरातुरपरस्त्रीणां न पुनर्धर्मकर्मठः[७] ॥७॥
तथा रूपमभूत्[८] तस्य सर्वौपम्यविलक्षणम्। आ[९]लेख्यस्याऽप्यविषयो यथा ह्या[१०]लेख्यकारिणाम् ॥८॥
दण्डप्रधानं [११]साम्राज्यमपि स प्रतिपालयन्। दयामाराधयामास देवतामिव कामदाम् ॥९॥
¶विशुद्धशीला तद्भार्या नाम्नाऽभूद**भिनन्दिता**। हृदयानन्दिनी वाचा नेत्रकैरव[१२]चन्द्रिका ॥१०॥
मनसाऽपि न सा शीलं खण्डयामास जातुचित्। मण्डयामास तेन[१३] स्वं फल्गु[१४] बाह्यं हि मण्डनम् ॥११॥
भूषणान्यप्यऽभूष्यन्त निवेश्य स्वतनौ तया। तस्या निसर्गसुन्दर्या भारभूतानि तानि तु[१५] ॥१२॥
[१६]तरङ्गायितलावण्यपुण्यावयवशालिनः। तद्रूपस्य [१७]प्रतिच्छन्दो दर्पणेष्वेव नान्यतः ॥१३॥
माता-पितृ-श्वशुराणां युगपत् सा कुलत्रयम्। एकाऽप्यनेकरूपैवाऽभूषयद् गुणभूषणा ॥१४॥
द्वितीयाऽप्यभवत् तस्य राज्ञो [१८]हृच्छिखिनन्दिका। मेघमालेव दयिता नामतः **शिखिनन्दिता** ॥१५॥
सुखं वैषयिकं पत्याऽनुभवन्त्या अखण्डितम्। जज्ञेऽ**भिनन्दिता**देव्या गर्भः कालेन गच्छता ॥१६॥
सूर्या-चन्द्रमसौ स्वप्ने स्वोत्सङ्गस्थौ ददर्श सा। पुत्रद्वयं तवोत्कृष्टं भावीत्याख्यच्च तत्पतिः ॥१७॥
सम्पूर्णे समये सूनुयुग्मं देव्य**भिनन्दिता**। असूत तेजसाऽ[१९]नूनं रवेश्चन्द्रमसोऽपि च ॥१८॥
**इन्दुषेणो बिन्दुषेण**श्चेत्याख्ये पुत्रयोर्द्वयोः। **श्रीषेण**पार्थिवोऽकार्षीदुत्सवेन महीयसा ॥१९॥
धात्रीभिर्लाल्यमानौ तावतियत्नेन पुष्पवत्। ववृधाते क्रमादन्यौ भुजाविव महीभुजः ॥२०॥

---

१. ॐ वा.१-२ ॥ २. सूर्यः ॥ ३. ***तस्यैव*** खंता. ॥ ४. **०त्तमम्** वा. १-२ ॥ ५. राजीवं-कमलम् ॥ ६. निरन्तरम् ॥ ७. धर्मकुशलः ॥ ८. ***०मभूदस्य*** मु.प्र ॥ ९. चित्रस्य ॥ १०. चित्रकाराणाम् ॥ ११. ***०प्रधानसाम्राज्य०*** खंता. पाता.॥ १२. कुमुद ॥ १३. शीलेन ॥ १४. तुच्छम् ॥ १५. ***हि*** खंता. ॥ १६. तरङ्गवदाचरितं लावण्यं तेन पुण्यैः पवित्रैः अवयवैः शालते इत्येवंशीलस्य ॥ १७. प्रतिबिम्बम् ॥ १८. हृदयरूपमयूरस्य आनन्ददायिनी ॥ १९. अन्यूनम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ व्याकरणादीनि शास्त्राणि पृथिवीपतिः । तावध्यजीगपदुपाध्यायेन निजनामवत् ॥२१॥
शास्त्रे शास्त्रे च निष्णातावपरासु[1] कलास्वपि । व्यूहप्रवेशनिष्काश[2]कुशलौ तौ बभूवतुः ॥२२॥
[3]मनोभवविकाराब्ज[4]विकासनदिवामुखम् । उभौ तौ प्रतिपेदाते यौवनं रूपपावनम् ॥२३॥
¶इतश्चास्तीह **भरते मगधेषु** महर्द्धिकः । ग्रामाणां ग्रामणी[5]र्ग्रामोऽ**चलग्राम** इतीरितः[6] ॥२४॥
तत्र साङ्गचतुर्वेदवेदी द्विजशिरोमणिः । **धरणिजट** इत्यभून्नाम्ना धरणिविश्रुतः ॥२५॥
तस्य चाऽसीद् **यशोभद्रा** भद्राभक्तिः[7] कुलोद्भवा । सधर्मचारिणी गेहलक्ष्मीरिव विहारिणी ॥२६॥
तस्यः क्रमेण जज्ञाते द्वौ पुत्रौ कुलदीपकौ । ज्येष्ठो नाम्ना **नन्दिभूतिः श्रीभूति**रिति चाऽपरः ॥२७॥
तस्य च ब्राह्मणस्याऽऽसीत् **कपिला** नाम दासिका । तयाऽपि स चिरं रेमे दुर्जया विषयाः खलु ॥२८॥
स्वच्छन्दं रममाणस्य क्रमयोगेण तस्य च । अजनिष्ट **कपिलायां कपिलो** नाम नन्दनः ॥२९॥
स तु द्विजो यशोभद्राकुक्षिजातावुभौ सुतौ । साङ्गान् वेदान् सरहस्यान् प्रह्वः[8] स्वयमपाठयत् ॥३०॥
**कपिलो**ऽप्यतिमेधावी तूष्णीकोऽप्यवधारयन् । वेदाब्धेः[9] पारगो जज्ञे प्रज्ञायाः किं न गोचरे[10] ?॥३१॥
स प्रादुर्ष्यद्वैदुषीको[11] निर्गत्य पितृवेश्मतः । यज्ञोपवीतद्वितयं कण्ठदेशे निधाय च ॥३२॥
द्विजोत्तमोऽस्मीति गिरा ध्वनयन्निव डिण्डिमम् । देशान्तरेषु बभ्राम विदेशो विदुषां हि कः ? ॥३३॥युग्मम्॥
¶भ्रमन् क्रमेण स प्राप तद्रत्नपुरपत्तनम् । पाण्डित्यं दर्शयंस्तत्र जगर्ज प्रावृडब्दवत्[12] ॥३४॥
तत्र चाऽशेषपौराणामुपाध्यायः कलानिधिः । अवात्सीत् **सत्यकि**र्नाम धीपात्र[13]च्छात्रशोभितः ॥३५॥
**कपिलः सत्यकेः** पाठशालां गत्वा दिने दिने । पृच्छतां खण्डिकानां[14] च संशयानन्तरा[15]ऽच्छिदत् ॥३६॥
विस्मितः **सत्यकि**रपि तं पप्रच्छ कुतूहलात् । दुर्ज्ञानानि रहस्यानि शास्त्राणां मन्त्रजातवित् ॥३७॥
आचख्यौ **कपिल**स्तस्मै सविशेषाणि तानि तु । उपाध्यायधिया छात्रैः श्रद्दधानैर्निरीक्षितः ॥३८॥
शालायां **सत्यकि**श्चक्रे तं स्वकर्मधुरन्धरम् । युवराजमिव राजा क्व नाऽर्घन्त्युज्ज्वला गुणाः ?॥३९॥
व्याख्यां समस्तशिष्याणां चकार **कपिलो**ऽन्वहम् । निश्चिन्तः **सत्यकि**स्तस्थौ तेन स्वेनेव सूनुना ॥४०॥
भक्तिं पितुरिवाऽत्यन्तं **सत्यकेः कपिलो**ऽकरोत् । किमेतस्मै करोमीति प्रीतो दध्यौ च **सत्यकिः** ॥४१॥
¶**सत्यकेर्जम्बुका** नाम तदा भार्येदमब्रवीत् । यद्यप्यवहितो[16]ऽसि त्वं तथापि स्मार्यसे मया ॥४२॥
देवकन्येव निःसीम-रूपलावण्यशालिनी । विनीता ह्रीमती[17] क्षान्ति-मार्दवा-ऽऽर्जवमालिनी[18] ॥४३॥
मत्कुक्षिसम्भवा तेऽसौ **सत्यभामेति** कन्यका । सम्प्राप्ता[19] यौवनं भट्ट! वरं मृगयसे न किम् ?॥४४॥
कन्यका वर्धते यस्य ऋणं वैरं रुजापि च । तस्य निद्रा कथं नामाऽचिन्तः शेते भवान् पुनः ॥४५॥
ऊचे **सत्यकि**रप्येवं सत्यं सत्यमिदं प्रिये! । इयत्कालमहं नाऽऽपं **सत्यभामो**चितं वरम् ॥४६॥
अयं तु रूपसम्पन्नो गुणिनामग्रणीर्युवा । विनीतः **कपिलो** विप्रः **सत्यभामो**चितो वरः ॥४७॥
[20]ओमित्युक्ते **जम्बुकया** शुभे लग्नेऽथ **सत्यकिः** । **सत्यभामा-कपिल**योर्विवाहं विधिवद् व्यधात् ॥४८॥
भोगान्निर्भ्रमया[21] **सत्यभामया** बुभुजेऽन्वहम् । पूज्यमानः **सत्यकि**वत् स पौरैः सकले पुरे ॥४९॥
**सत्यके**रपि पूज्योऽयमिति तस्मै ददौ जनः । विशिष्टं धन-धान्यादि सर्वेष्वपि हि पर्वसु ॥५०॥
एवं च वर्तमानः स वर्तमानद्विजोत्तमः[22] । समृद्धः **कपिलो** जज्ञे गुणैरिव[23] धनैरपि ॥५१॥

---

१. पारङ्गतौ ॥ २. निर्गमन ॥ ३. कामविकार एव कमलं तस्य विकासने प्रातःकालसमानम् ॥ ४. *०राब्जविकाशाय दिवामुखम्* ता.,*०राब्जविकासाय दिवामुखम्* छा. ॥ ५. ***ग्रामणीग्रामोऽचल०*** सं. दे. ला., मुख्य इत्यर्थः ॥ ६. इति संज्ञितः ॥ ७. ***भद्राशक्तिः*** ला. सं. ॥ ८. नम्रः ॥ ९. ***वेदाब्धिपारगो*** दे.मु. ॥ १०. ***गोचरे*** सं. ला. छा.; खंता., पाता. । ***गोचरम्*** दे. ता. मुप्र. ॥ ११. ***प्रादुःष्यद्वै०*** खंता. पाता. वा.१-२ मुप्र. । प्रादुष्यती वैदुषी यस्य सः, प्रकटीभवत्पाण्डित्य इत्यर्थः ॥ १२. अब्दो मेघः,वर्षामेघवत् ॥ १३. धियां पात्रैः स्थानैः धीपात्रैः-छात्रैः शोभितः ॥ १४. छात्राणाम् ॥ १५. मध्ये ॥ १६. सावधानः ॥ १७. लज्जावती ॥ १८. ***शालिनी*** पाता., वा.१-२ विना सर्वत्र ॥ १९. '***सम्प्राप्तयौवनं तस्या***' मुप्र. । ***सम्प्राप्तयौवनं भट्ट!*** खंता., पाता., वा.१-२, ला. ता., सं. विना ॥ २०. तथेत्युक्ते ॥ २१. क्रोधरहितया । *निर्भ्रान्त्या* इति मुप्र.टिप्पण्याम् ॥ २२. कुत्रचित् '***०द्विजोत्तरः०***' इति पाठः ॥ २३. ***धनैरिव गुणैरपि*** खंता. । ***धनैरपि गुणैरपि*** मुप्र. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶अन्यदा प्रावृषि निशि [1]प्रेक्षणीयेक्षणाय सः। बहिर्जगाम सदनाच्चिरं तत्र त्ववास्थित[2] ॥५२॥
निवृत्तस्याऽर्धमार्गेऽपि वेश्मने तस्य गच्छतः। [3]सूचिभेद्यं तमः कुर्वन् ववर्षाऽत्यन्तमम्बुदः ॥५३॥
विजनत्वात् तदानीं स नग्नीभूय स्ववाससी। प्रक्षिप्य कक्षान्तरगाद् वेश्मद्वारे च पर्यधात् ॥५४॥
वृष्ट्या वस्त्राणि मद्भर्तु[4]स्तीमितानीति मानिनी। **सत्यभामा**ऽन्यवस्त्राणि गृहीत्वा समुपस्थिता ॥५५॥
मुग्धे विद्याप्रभावेण [5]स्तीमिते मे न वाससी। कृतं तदन्यैर्वासोभिरित्यूचे **कपिलः** प्रियाम् ॥५६॥
तस्य वासांस्यनार्द्राणि वपुरार्द्रं च सर्वतः। **सत्यभामा** नि[6]र्दध्यौ च दध्यौ चेदं स्वचेतसि ॥५७॥
विद्याशक्त्या स्ववासांसि यद्यरक्षदसौ जलात्। नाऽरक्षत् तत् कथं स्वाङ्गं? नूनं नग्नोऽयमाययौ ॥५८॥
अकुलीनस्ततो मन्ये वृत्तेनाऽनेन मत्पतिः। मेधाबलादध्यगीष्ट कर्णश्रुत्या श्रु[7]तीरपि ॥५९॥
एवं च मन्यमाना सा तदाप्रभृति त[8]त्र च। मन्दानुरागा समभूद् [9]वृन्दानीतेव खेदिनी ॥६०॥
¶तदा च **धरणिजटो** दैवात् क्षीणधनोऽभवत्। [10]आढ्यं च **कपिलं** श्रुत्वा स्वं समुद्धर्तुमाययौ ॥६१॥
पाद्यस्नानादिना तं च सच्चक्रे **कपिलः** स्वयम्। आराध्योऽतिथिमात्रोऽपि किं पुनः स पिताऽतिथिः? ॥६२॥
अथ पित्रा कृते स्नाने निर्मिते नित्यकर्मणि। भोजनावसरे प्राप्ते प्रोवाच **कपिलः** प्रियाम् ॥६३॥
शरीरकारणं मेऽस्ति तत् प्रिये! पितृहेतवे। विभिन्नं भोजनस्[11]थानमुत्तमं प्रगुणीकुरु ॥६४॥
पितुः पुत्रस्य च तयोर्दृष्ट्वाऽऽचरणमन्यथा। आशशङ्केऽधिकं **सत्या** कुलीना सा यतः स्वयम् ॥६५॥
कुलीनं श्वशुरं ज्ञात्वा चरितैरतिनिर्मलैः। आराधयज्जनकवद् गुरुवद्देववच्च सा ॥६६॥
दत्वाऽन्यदा ब्रह्महत्याशपथं रहसि स्वयम्। श्वशुरं परिपप्रच्छ महता विनयेन सा ॥६७॥
युष्माकं किमसौ सूनुः शुद्धपक्षद्वयोद्भवः?। अ[12]वरुद्धोद्भवः किं वा ? सत्यं ब्रूत[13] प्रसीदत ॥६८॥
ततश्च **धरणिजटः** समाचख्यौ यथातथम्। महात्मानः प्रकृत्याऽपि शपथच्छेदकातराः ॥६९॥
विसृष्टः **कपिले**नाऽथ ब्राह्मणो **धरणिजटः**। पुनरेव निजं ग्राम**मचलग्राम**मभ्यगात् ॥७०॥
¶**सत्यभामा**ऽपि गत्वैवं **श्रीश्रीषेणं** व्यजिज्ञपत्। अकुलीनोऽभवद् भर्ता मम दैववशादयम् ॥७१॥
[14]शार्दूलादिव [15]सुरभिं राहोः शशिकलामिव। चटकामिव च श्येनान्मोचयाऽस्मात् तदद्य माम् ॥७२॥
आचरिष्यामि सुकृतं मुक्ताऽने[16]न सती सती। दुष्कर्मणा प्राक्तनेन वञ्चितास्मि कियच्चिरम् ॥७३॥
**श्रीषेणो**ऽप्यभ्यधत्तैवमाहूय **कपिलं** स्वयम्। मुच्यतां **सत्यभामे**यं धर्माचरणहेतवे ॥७४॥
विरक्तायां तवैतस्यां कीदृग् वैषयिकं सुखम्। भविष्यति [17]बलात्कारापहृतान्यस्त्रियामिव? ॥७५॥
**कपिलो**ऽपि जगादैवं क्षणमप्यनया विना। प्राणान् धर्तुं नालमास्मि जी[18]वातुरियमेव मे ॥७६॥
इमां [19]पाणिगृहीतीं स्वां न त्यजामि कथञ्चन। त्यजनं त्याजनं वापि गणिकास्वेव युज्यते ॥७७॥
[20]उद्दामा **सत्यभामो**चे त्यजत्येष न मां यदि। जले वा ज्वलने वाऽपि प्रवेक्ष्यामि तदा[21] न्वहम् ॥७८॥
राजाऽपि व्याजहारैवं मा स्म त्याक्षीद[22]सूनसौ। दिनानि कतिचित् तिष्ठत्वस्मद्वेश्मनि ते प्रिया ॥७९॥
एवमस्त्विति तेनोक्ते राज्ञा रा[23]ज्ञ्योः समर्पिता। समाचरन्ती विविधं तपः सा समवास्थिता ॥८०॥
¶तदा च राजा **कौशाम्ब्यां**[24] **बलो** नाम महाबलः। **श्रीकान्तां श्रीमती**देवीप्रसूतां निजकन्यकाम् ॥८१॥
उद्यौवनां रूपवतीं प्रैषीदृ[25]द्ध्या प्रभूतया। **श्रीषेण**नृपपुत्रस्ये**न्दुषेण**स्य स्वयंवरा[26]म् ॥८२॥
तया सहाऽऽगतां वेश्या**मनन्तमतिका**भिधाम्। **इन्दुषेण-बिन्दुषेणौ** रूपोत्कृष्टामपश्यताम् ॥८३॥

---

१. नाट्यविलोकनाय ॥ २. *त्ववास्थितः* वा.१-२ । *तथा स्थितः* मु. ॥३. गाढम् ॥४. *मद्भर्तुस्तिमितानीति* मुप्र. । आर्द्राणि ॥ ५. *तीमिते* सं. ला. पा., *स्तिमिते* मुप्र. ॥ ६. ददर्श ॥७. वेदान् ॥ ८. कपिले ॥ ९. *वन्दानीतेव०* खंता. पाता. ।*०वन्दानन्तेव०* वा.१-२,समुदायात् पृथक्कृतेव ॥ १०.समृद्धम् ॥ ११. *स्नान०* मुप्र. ॥ १२. विपरीतोद्भवः ॥ १३. ब्रूहि ॥ १४. व्याघ्रात् ॥ १५. धेनुम् ॥ १६ *०तेन०* पाता. ॥ १७. बलात्कारेणाऽपहृतायामन्यस्त्रियामिव ॥ १८. जीवनौषधम् ॥ १९.*पाणिगृहीताम्* ता. ला. दे. मु. ॥ २०. अतिक्रुद्धा ॥ २१. *०तदा ह्यहम्* पा.विना ॥ २२. प्राणान् ॥ २३. *०राज्ञ्यै* दे. ला. मु., *०राज्ञ्योस्तेन समर्पिता* पाता. ॥ २४. *०कौशाम्ब्याः०* खंता. पाता. ॥ २५. समृद्ध्या ॥ २६. *०स्वयंवरे* ता. दे. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषा मम [1]ममैषेति प्रजल्पन्तावुभावपि । सामर्षौ **देवरमणा**भिधानोद्यानमीयतुः ॥८४॥
तत्रोभावपि सन्नद्धावे[2]ककान्तारिरंसया । वृषभाविव दुर्दान्तौ युयुधाते महाभुजौ ॥८५॥
निषेधितुं तयोर्युद्धं नाऽलमासीन्महीपतिः । [3]प्रियंसामा स हि सदा दण्डसाध्यास्तु दुर्मदाः ॥८६॥
तां प्रवृत्तिं तयोर्द्रष्टुं निरोद्धुं चाऽक्षमो नृपः । सहा**ऽभिनन्दिता-शिखिनन्दिता**भ्यां विचार्य च ॥८७॥
प्राप्तकालमिदमिति ब्रुवाणः सरसीरुहम् । [4]आघ्रात् [5]तालपुटाविद्धं विपेदे च[6] क्षणादपि ॥८८॥युग्मम्॥
देव्यावपि तदाघ्राय तमेवाऽध्वानमीयतुः । न मनागपि जीवन्ति [7]कुलनार्यः पतिं विना ॥८९॥
**सत्यभामा**ऽपि **कपिला**दनर्थं चिन्तयन्त्यथ । तत्पद्ममाघ्राय ययौ तत्पथं [8]शरणोज्झिता ॥९०॥
अत्यन्तमार्दवान्मृत्वा ते चत्वारोऽपि जज्ञिरे । **जम्बूद्वीपोत्तरकुरुक्षेत्रे** युगलधर्मिणः ॥९१॥
अभूतां [9]पुं-स्त्रियौ तत्र **श्रीषेणो**ऽथा**भिनन्दिता** । ते **शिखिनन्दिता-सत्यभामे** अपि तथैव हि ॥९२॥
ते च पल्यत्रयायुष्का गव्यूतत्रितयोच्छ्रिताः । अनुभूतसुखाद्वैताः सुखं कालमलङ्घयन् ॥९३॥
तयोश्चे**न्दुषेण-बिन्दुषेण**योर्युध्यमानयोः । आगादेको विमानस्थः कोऽपि विद्याधराग्रणीः ॥९४॥
दैवस्येवाऽनुकूलस्य प्रतीहारो निवारकः । स तयोरन्तरे स्थित्वा निजगादैव[10]मुद्भुजः ॥९५॥
अज्ञात्वा भगिनीमेतां [11]भार्यीयन्तौ कुमारकौ! । किं [12]युध्येथे? विस्तरेण श्रूयतां वचनं मम ॥९६॥
¶**जम्बूद्वीप**स्याऽस्य **महाविदेहे**ऽस्ति [13]सुविस्तृतः । **सीता**नद्युत्तरतटे विजयः **पुष्कलावती** ॥९७॥
[14]अभ्रंलिहोऽस्ति मेदिन्याः किरीट इव [15]राजतः । तत्र विद्याधरावासो **वैताढ्यो** नाम पर्वतः ॥९८॥
तत्रादावुत्तरश्रेण्या**मादित्याभा**भिधे पुरे । राजा **सुकुण्डली**त्यस्ति [16]कुण्डलीन्द्र इव श्रिया ॥९९॥
तस्याऽस्त्य**जितसेने**ति दयिता शीलशालिनी । अहमस्ति तयोः पुत्रो नामतो **मणिकुण्डली** ॥१००॥
अपरेद्युस्ततः स्थानान्नभसा [17]पक्षिराडिव । जिनेन्द्रं वन्दितुमगां नगरीं **पुण्डरीकिणीम्** ॥१०१॥
तत्र चाऽ**[18]मितयशसं** भगवन्तं जिनेश्वरम् । वन्दित्वा साञ्जलिपुटमश्रौषं धर्मदेशनाम् ॥१०२॥
मया च देशनाप्रान्ते 'भगवन्! केन कर्मणा । विद्याधरोऽहमभव'मिति पृष्टोऽब्रवीत् प्रभुः ॥१०३॥
¶पश्चिमे **पुष्करवरद्वीप**स्याऽर्धे महर्द्धिके । **शीतोदाया** महानद्या विशाले दक्षिणे तटे ॥१०४॥
विजये **सलिलावत्यां** वी[19]तशोकजनाकुला । **वीतशोका**भिधाना पूरस्ति स्वस्तिकवद्भुवः ॥१०५॥युग्मम्॥
[20]मीनध्वजो रूपधेयेनौजसा [21]कुलिशध्वजः । तत्र **रत्नध्वजो** नाम चक्रवर्त्यभवत् पुरा ॥१०६॥
प्रधानभार्ये तस्योभे अभूतां शीलभूषणे । एका तत्र **कनकश्री**र्द्वितीया **हेममालिनी** ॥१०७॥
अङ्कस्थकल्पलतिकाद्वितयस्वप्नसूचिते । **कनकश्री**र्दुहितरौ सुषुवे धी-श्रियाविव ॥१०८॥
तयोश्च **कनकलते**त्याख्यां **पद्मलते**ति च । चक्रतुर्माता-पितरौ जन्मोत्सवसमोत्सवम् ॥१०९॥
स्वप्ने पद्मलतालोकसूचितां **हेममालिनी** । **पद्मां** नाम प्रसुषुवे [22]नन्दनां कुलनन्दनीम् ॥११०॥
प्राप्ताः कलाकलापं ता यौवनं चाऽथ पावनम् । विधात्रा श्रिय एकत्र त्रैलोक्यस्याऽऽहृता इव ॥१११॥
**पद्मा**ऽप्य**जितसेना**र्यासान्निध्येन विरागिणी । तत्पादान्ते परिव्रज्यामुपादत्त यथाविधि ॥११२॥
एकदाऽनुज्ञयाऽऽर्यायास्तपःकर्म [23]चतुर्थकम् । चक्रे [24]त्रिरात्रे द्वे षष्टिश्चतुर्थानि स्युरत्र तु ॥११३॥
यथावत् पालयित्वा च दुस्तपं तत्तपोऽन्यदा । बहिः शरीरचिन्तार्थं गच्छन्ती राजवर्त्मनि ॥११४॥
कृते **मदनमञ्जर्या** वेश्यायाः कामलम्पटौ । युध्यमानौ महाबाहू राजपुत्रौ ददर्श सा ॥११५॥युग्मम्॥

---

१. ***ममैवेति*** ता. ॥ २. एकया कान्तया रन्तुमिच्छया ॥ ३. शान्तिप्रियः ॥ ४. ***अघ्रात्०*** खंता ॥ ५. तालपुटविषव्याप्तम् ॥ ६. ***०तत्क्षणा०*** खंता ॥ ७. ***पतिवत्न्यः*** ता. ॥ ८. ***शरणाश्रिता*** दे. । शरणरहिता ॥ ९. ***नृ-स्त्रियौ*** दे. पा. छा. मु. ॥ १०. उद्भुजः-भुजौ ऊर्ध्वीकृत्य स्थितः ॥ ११. आत्मनः भार्यामिच्छन्तौ, भगिनीं भार्यात्वेन इच्छन्तौ ॥ १२. ***युध्येथाम्*** ता. ॥ १३. ***सुविस्तृता*** ला. छा. पा. ॥ १४. अभ्रंलिहः - गगनचुम्बी ॥ १५. रूप्यमयः ॥ १६. शेषनागः, ***कुण्डलेन्द्र*** दे. मु. ॥ १७. गरुडः ॥ १८. तन्नामानम् ॥ १९. वीतः शोको येभ्यस्तादृशजनैराकुला व्याप्ता, ***वीतशोकभयाकुला*** पाता. सं. ला. ॥ २०. रूपेण कामदेवः ॥ २१. इन्द्रः ॥ २२. ***०नन्दिनीं०*** वा.१-२ । ***०नन्दनीं०*** मुप्र. ॥ २३. चतुर्थभक्तम् ॥ २४. त्रिरात्रे (दिनत्रयेण) एकं चतुर्थकं, एतादृशानि द्वाषष्टिश्चतुर्थानि जातानीत्येवमर्थः सम्भाव्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ दृष्ट्वाऽचिन्तयत् **पद्मा**ऽप्यस्याः किमपि सुभ्रुवः । अहो! सौभाग्यमेतौ यद्युध्येते हन्त तत्कृते ॥११६॥
तन्ममाऽप्यस्य तपसः प्रभावेण भवान्तरे । सौभाग्यमीदृशं भूयान्निदानमिति साऽकरोत् ॥११७॥
अन्ते साऽनशनं कृत्वाऽ[1]नालोचितनिदानिका । मृत्वा **सौधर्म**कल्पेऽभूदमरी विपुलर्द्धिका ॥११८॥
**कनकश्री**र्भवं भ्रान्त्वा भवे [2]दानाद्यनन्तरे । कृत्वा विद्याधरेन्द्र[3]! त्वं नाम्नाऽभू**र्मणिकुण्डली** ॥११९॥
भवं भ्रान्त्वा च **कनकलता-पद्मलते** अपि । दानादिधर्मं बहुधा विधाय प्राग्भवेषु च ॥१२०॥
**जम्बूद्वीप**स्य **भरते**ऽभूतां **रत्नपुरे** पुरे । **इन्दुषेण-बिन्दुषेणौ श्रीषेण**नृपतेः सुतौ ॥१२१॥युग्मम्[4]॥
**पद्मा**जीवोऽपि **सौधर्मा**च्च्युत्वा तत्रैव **भारते** । वेश्या बभूव **कौशाम्ब्यामनन्तमतिका**भिधा ॥१२२॥
**इन्दुषेण-बिन्दुषेणावनन्तमतिका**कृते । अधुना युध्यमानौ स्तस्तौ **देवरमणे** वने ॥१२३॥
श्रुतपूर्वभवः सोऽहं स्नेहादिह समागमम् । विनिवारयितुं युद्धात् प्राग्जन्मज्ञापनेन वाम्[5] ॥१२४॥
अहं वां प्राग्भवे माता गणिकेयं पुनः स्वसा । बुध्येथां सर्वमप्येवं संसारे मोह[6]जृम्भितम् ॥१२५॥
न ज्ञायते पिता माता स्वसा भ्राता [7]परोऽपि वा । हहा! [8]जन्मान्तरतिरस्करिण्यन्तरितैर्जनैः ॥१२६॥
यावज्जीवमसौ जीवः [9]स्वं वेष्टयति देहजैः । राग-द्वेषादिभि[10]र्लालाजालकैरिव [11]जालिकः ॥१२७॥
रागं द्वेषं च मोहं च तत्परित्यज्य दूरतः । निर्वाणनगरद्वारं प्रव्रज्यां श्रयतं द्रुतम् ॥१२८॥
अथ तावूचतुर्मोहादस्माभिः श्वापदैरिव । धिग् धिक् किमिदमारब्धं भगिनीभोगहेतवे? ॥१२९॥
त्वं नौ[12] पूर्वभवे माता गुरुरस्मिन् भवे पुनः । आवां येनो[13]त्पथादस्मात् प्रबोध्य विनि[14]वर्तितौ ॥१३०॥
इत्युक्त्वा [15]मुक्तसन्नाहौ गुरो**र्धर्मरुचेः** पुरः । राज्ञां चतुर्भिः सहस्रैः समं जगृहतुर्व्रतम् ॥१३१॥
तौ तपो-ध्यानवह्निभ्यां [16]प्लुष्टकर्माध्वकण्टकौ । लोकाग्रं जग्मतुर्दुर्गं[17] सरलेनैव वर्त्मना ॥१३२॥
[18]**श्रीषेण**प्रमुखास्तेऽपि चत्वारो [19]युग्मधर्मिणः । विपद्य प्रथमे कल्पे देव[20]भूयं प्रपेदिरे ॥१३३॥[21]
¶इतश्चाऽत्रैव **भरते वैताढ्ये**ऽस्ति नगोत्तमे । नगरं **रथनूपुरचक्रवाल**मभिख्यया ॥१३४॥
तत्राऽभू**ज्ज्वलनजटी** नाम विद्याधरेश्वरः । [22]पुरन्दरानुज इव सनाथो विविधर्द्धिभिः ॥१३५॥
तस्याऽ**र्ककीर्ति**स्तनयः प्रौढार्क इव तेजसा । युवराजोऽभवद् वैरिराज्यलक्ष्मीस्वयंवरः ॥१३६॥
[23]अन्व**र्ककीर्ति** समभूत् पुत्री तस्य **स्वयम्प्रभा** । प्रभेव शशिनो विश्वनयनानन्ददायिनी ॥१३७॥
प्रथमो वासुदेवानां [24]प्राजापत्योऽ[25]**चला**नुजः । **त्रिपृष्ठः पोतनपुरे**श्वरः परिणिनाय ताम् ॥१३८॥
तदा च **वह्निजटिने** स हृष्टः प्रथमो [26]**हरिः** । ददौ विद्याधरश्रेणिद्वयराज्यमखण्डितम् ॥१३९॥
**अर्ककीर्ते**रभूत् पत्नी **ज्योतिर्माले**ति नामतः । दुहिता **मेघवन**स्य विद्याधरनरेशितुः ॥१४०॥
च्युत्वा **श्रीषेण**जीवोऽपि तदा **सौधर्म**कल्पतः । **ज्योतिर्मालो**दरे हंस इवाऽब्जे समवातरत् ॥१४१॥
ददर्श च [27]तदा स्वप्ने प्रविशन्तं निजे मुखे । **सहस्ररश्मि**ममिततेजसं द्योतिताम्बरम् ॥१४२॥
समयेऽसूत सा **सूनुं** पुण्यलक्षणलक्षितम् । साम्राज्यभवनाधारसुदृढस्तम्भमुच्चकैः ॥१४३॥
दृष्टस्वप्नानुमानेन पितरौ तस्य चक्रतुः । नामाऽ**मिततेजा** इति मूर्त्याऽप्यमिततेजसः ॥१४४॥
न्यस्याऽ**र्ककीर्तौ** स्वं राज्यं प्राव्राजीद् **वह्निजट्य**थ । चारणर्षि**जगन्नन्दना-ऽभिनन्दनयोः** पुरः ॥१४५॥
¶जीवोऽपि **सत्यभामाया**श्च्युत्वा **सौधर्म**कल्पतः । **ज्योतिर्माला-सूर्यकीर्त्योः** पुत्रीत्वेनोदपद्यत ॥१४६॥
गर्भस्थायामिहाऽपश्यत् सुतारां जननी निशाम् । इति तस्याः **सुतारे**ति पितरौ नाम चक्रतुः ॥१४७॥

---

१. अनालोचितं निदानं यया सा ॥ २. पूर्वस्मिन् भवे दानादि कृत्वा ॥ ३. *विद्याधरेन्द्रस्त्वम्* ता.पा.मु. ॥ ४. खंता. पाता. वा.१-२ प्रतिषु नास्ति ॥ ५. युवाम् ॥ ६. मोहविलसितम् ॥ ७. *परेऽपि* सं. ला.; *०ऽपरो०* खंता.; *०ऽपरे०* पाता. ॥ ८. जन्मान्तरमेव तिरस्करिणी जवनिका तया अन्तरितैः छन्नैः ॥ ९. *संवेष्टयति* मु. ॥ १०. *०दिभिर्लालाजालिकैरिव* पा. ॥ ११. लूता(करोळियो) ॥ १२. आवयोः ॥ १३. उन्मार्गात् ॥ १४. निवारितौ ॥ १५. मुक्तः सन्नाहः-कवचप्रभृति याभ्यां तौ ॥ १६. प्लुष्टाः दग्धाः कर्माणि एव अध्वकण्टका मोक्षमार्गकण्टका याभ्यां तौ ॥ १७. दुर्गं-दुर्गमम् ॥ १८. श्रीषेणाऽभिनन्दिता-शिखिनन्दिता-सत्यभामाः ॥ १९. युगलिकाः ॥ २०. देवत्वम् ॥ २१. खंता.प्रतौ अत्रैवं टिप्पणी '३ भवे' ॥ २२. विविधर्द्धिभिः सहितो विष्णुरिव ॥ २३. अर्ककीर्तेः पश्चात् ॥ २४. प्रजापतेः अपत्यम् ॥ २५. *बलानुजः* छा. दे. ॥ २६. वासुदेवः त्रिपृष्ठः ॥ २७. *महास्वप्ने* ता. ॥

¶स चाऽ**भिनन्दिता**जीवश्च्युत्वा **सौधर्म**कल्पतः । **त्रिपृष्ठ-स्वयम्प्रभ**योः पुत्रत्वेनोदपद्यत ॥१४८॥
यत् स्वप्ने साभिषेका श्रीर्गर्भस्थेऽत्राम्बयेक्षिता । तेन **श्रीविजय** इति तस्य नाम पिता व्यधात् ॥१४९॥
**स्वयम्प्रभा**यास्तनयो द्वैतीयीकोऽप्यजायत । नामतो **विजयभद्रो** जयभद्रनिकेतनम् ॥१५०॥
स [1]**शिखिनन्दिता**जीवश्च्युत्वा प्रथमकल्पतः । **त्रिपृष्ठ-स्वयम्प्रभ**योः पुत्री **ज्योतिष्प्रभे**त्यभूत् ॥१५१॥
¶**सत्यभामा**पतिः पूर्वं **कपिलो** नाम योऽभवत् । संसारं [2]स चिरं भ्रान्त्वा तिर्यगादिषु योनिषु ॥१५२॥
पुर्यां **चमरचञ्चा**यां विद्याधरनरेश्वरः । अजायताऽ**शनिघोष** इति [3]नाम्नेह विश्रुतः ॥१५३॥युग्मम्॥
¶**अर्ककीर्ति**र्दुहितरं **सुतारां** तारलोचनाम् । **त्रैपृष्ठिना श्रीविजय**नाम्ना स्वां पर्यणाययत् ॥१५४॥
**ज्योतिष्प्रभां त्रिपृष्ठो**ऽपि स्वपुत्रीमतिसुन्दरीम् । व्यवाहयद**र्ककीर्ति**पुत्रेणाऽ**मिततेजसा** ॥१५५॥
**सुतारया** [4]**श्रीविजयो** भुङ्क्ते वैषयिकं सुखम् । समं च **ज्योतिष्प्रभया**ऽ**मिततेजा** महाभुजः ॥१५६॥
¶अन्यदा **रथनूपुरचक्रवाला**भिधे पुरे । विशाले बहिरुद्याने श्रिया सौमनसोपमे ॥१५७॥
त्रयोऽ**भिनन्दन-जगन्नन्दनाव**ग्निजट्यपि । ज्ञानादीनीव रत्नानि मूर्त्तानि समवासरत् ॥१५८॥युग्मम्॥
ज्ञात्वाऽ**र्ककीर्ति**रायातं गुरुं [5]गुरुगुरू अपि । एत्याऽवन्दिष्ट नोत्कण्ठा विलम्बं सहते क्वचित् ॥१५९॥
अथा**भिनन्दन**मुनिर्विदधे धर्मदेशनाम् । [6]महामोहहिमस्तोमविद्रावणरविप्रभाम् ॥१६०॥
तया देशनया चाऽ**र्ककीर्ति**र्वैराग्यभाग्भवे । रचिताञ्जलिरित्यूचेऽ**भिनन्दन**महामुनिम् ॥१६१॥
[7]तावदागमयस्वेह यावताऽ**मिततेजस**म् । निजे राज्ये निवेश्याऽहमायामि व्रतहेतवे ॥१६२॥
न प्रमादो विधातव्य इति शिष्टो महर्षिणा । **अर्ककीर्ति**र्ययौ [8]धाम प्रागनुस्यूतमानसः ॥१६३॥
भूयो भूयः [9]सनिर्बन्ध[10]मभ्यर्थ्याऽ**मिततेजसम्** । राज्यमग्राहयदयं क्रमो जनकपुत्रयोः ॥१६४॥
कृतनिष्क्रमणः सोऽथ नृपेणाऽ**मिततेजसा** । परिव्रज्यामुपादत्ताऽ**भिनन्दन**मुनेः पुरः ॥१६५॥
समं [11]गुरुजनेनाऽथ विजहार वसुन्धराम् । [12]**अर्ककीर्ती** राजमुनिः [13]शमराज्यं प्रपालयन् ॥१६६॥
विद्याधरेन्द्रमुकुटोद्धृष्टपादाम्बुजासनः । तेजस्वी सोऽ**मिततेजाः** पित्र्यां राज्यधुरां दधौ ॥१६७॥
इतश्चान्ते **त्रिपृष्ठ**स्य [14]शुचा वैराग्यमुद्वहन् । राज्ये **श्रीविजयं** न्यस्य [15]प्रवव्राजाऽ**चलो** [16]बलः ॥१६८॥
नरेश्वरैरर्च्यमानो विजयश्रीस्वयंवरः । ततः **श्रीविजयो** [17]विश्वं पित्र्यं राज्यमपालयत् ॥१६९॥
¶अन्यदा चाऽ**मिततेजा**स्त**त्पोतनपुरं** पुरम् । **सुतारा-श्रीविजय**योर्दर्शनोत्कण्ठितो ययौ ॥१७०॥
नगरं तदपश्यच्चोत्पताका-मञ्च-तोरणम् । सञ्जातानन्दसाम्राज्यमनुत्तरविमानवत् ॥१७१॥
विशेषतो राजकुलं स हृष्टं वीक्ष्य विस्मितः । व्योमतोऽवातरत् तत्र समुद्र इव भास्करः ॥१७२॥
अभ्युत्तस्थौ दूरतस्तं दृष्ट्वा **श्रीविजयो** नृपः । [18]पूजाऽर्हाऽतिथिमात्रेऽपि किं पुनस्तादृशेऽतिथौ? ॥१७३॥
परस्परं [19]श्वशुर्यौ तौ मिथः स्वसृपती [20]च तौ । सस्वजाते मिथो गाढं [21]प्रौढप्रीतिसुधाह्रदौ ॥१७४॥
महार्घ्यसिंहासनयोर्निषेदतुरुभावपि । पूर्वपश्चिमयोरद्र्योः सूर्या-चन्द्रमसाविव ॥१७५॥
ततश्चाऽ**मिततेजा**स्तं पप्रच्छ स्वच्छमानसः । नाऽधुना कौमुदी नाऽऽग्रहायणी ग्रीष्मको न च ॥१७६॥
वसन्तो नाऽपि नो पुत्रजन्माऽपि तव भूपते! । पुरं केनोत्सवेनेदमुद्यदानन्दमीक्ष्यते ? ॥१७७॥युग्मम्॥
ततः **श्रीविजयो**ऽशंसदितः प्रागष्टमे दिने । एको नैमित्तिकः कश्चि[22]दागामिवेदकः ॥१७८॥
याचितुं किमिहाऽऽयासीः? समाख्यातुं किमप्यथ? । मयैवं सादरं पृष्ट इत्यभाषिष्ट स स्फुटम् ॥१७९॥
जीवामो याचितेनैव वयं यद्यपि पार्थिव! । तथाऽपि याचितुं त्वत्तः [23]साम्प्रतं न हि [24]साम्प्रतम् ॥१८०॥

१. ***सिंहनन्दिताजीवश्च्युत्वा*** खंता. पाता. वा.१-२, सं. पा. ता. ॥ २. ***सुचिरम्*** ला. ॥ ३. ***नाम्ना हि*** मु. ॥ ४. ***श्रीविजयोऽभुङ्क्त*** छा.मु. विना ॥ ५. गुरुं-पितरं, गुरुगुरू-पितुर्गुरू ॥ ६. महामोह एव हिमस्तोमः, तस्य विद्रावणे नाशने सूर्यप्रभासदृशीम् ॥ ७. प्रतीक्षस्व ॥ ८. गृहम् ॥ ९. साग्रहम् ॥ १०. ***०मभ्यर्थ्यामिततेजसा*** पाता. वा.१-२ सं. ता. पा. छा. ॥ ११. ***मुनिजनेनाथ*** पा. ॥ १२. ***अर्ककीर्तिराज०*** रसंपा. ॥ १३. ***शमराज्यमपालयत्*** दे. ॥ १४. शोकेन ॥ १५. ***प्रवव्राजाऽचलोऽचलः*** ला. पा. ॥ १६. बलदेवः ॥ १७. समग्रं पैतृकम् ॥ १८. सामान्यातिथावपि पूजा योग्या ॥ १९. श्यालौ ॥ २०. ***०हि तौ*** खंता. पाता. वा.१-२ ॥ २१. प्रौढा प्रीतिः एव सुधा तस्या ह्रदौ ॥ २२. भविष्यवेत्ता ॥ २३. योग्यम् ॥ २४. अधुना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्यते न यदाख्यातुं तदाख्यातुमिहाऽऽगमम् । आख्याते हि प्रतीकारो भवेद्धर्मादिनाऽपि हि ॥१८१॥
अस्मादह्नः सप्तमेऽह्नि मध्याह्नसमये ध्वनन् । [1]अशनिः **पोतनपुरे**श्वरोपरि पतिष्यति ॥१८२॥
तया कटुकया वाचा [2]विषेणेवाऽतिघूर्णितः । पतिष्यति त्वयि किमित्युवाच सचिवाग्रणीः ॥१८३॥
नैमित्तिकोऽप्यभाषिष्ट मह्यं सचिव! मा कुपः । शास्त्रदृष्टं वचो वच्मि भावदोषो[3]ऽत्र मे न हि ॥१८४॥
तस्मिन् दिने मयि पुनर्वसुधारासहोदरा । वस्त्रा-भरण-माणिक्य-स्वर्णवृष्टिः पतिष्यति ॥१८५॥
मयाऽप्यभिहितो मन्त्री माऽस्मै कुप्य महामते! । उपकारी [4]प्रणिधिवद् यथार्थकथनादयम् ॥१८६॥
नैमित्तिक! परं ब्रूहि निमित्तं शिक्षितं कुतः? । निराम्नायस्य वचसि श्रद्धा न प्रत्ययं विना ॥१८७॥
नैमित्तिकोऽप्यभाषिष्ट क्ष्माधव! श्रूयतां तदा । बलदेवेन देवेन प्रव्रज्यां गृह्णता सह ॥१८८॥
उपादत्त परिव्रज्यां **शाण्डिल्यो** नाम मे पिता । तदनु प्राव्रजमहं पितृवात्सल्यमोहितः ॥१८९॥
निमित्तजातमखिलं [5]तदेदं शिक्षितं मया । ज्ञानम[6]व्यभिचारि स्यान्नान्यतो जिनशासनात् ॥१९०॥
लाभा-ऽलाभौ सुखं दुःखं जीवितं मरणं जयः । पराजयश्चेति वेद्मि निमित्तमहमष्टधा ॥१९१॥
सम्प्राप्तयौवनश्चाऽहं विहरन्नपरेऽहनि । अगमं **पद्मिनीखण्डं** नाम पत्तनमुत्तमम् ॥१९२॥
**हिरण्यलोमिका** नाम तत्र मम पितृष्वसा । वसत्युद्यौवना **चन्द्रयशा**स्तद्दुहिताऽपि च ॥१९३॥
तां [7]दत्तपूर्विणी सा मे बालायाऽपि हि बालिकाम् । दीक्षालक्षणविघ्नेन विवाहस्त्वभवन्न हि ॥१९४॥
तां दृष्ट्वा सानुरागोऽहं हित्वा भारमिव व्रतम् । पर्यणैषं विवेको हि [8]स्मरार्त्तानां कियच्चिरम्? ॥१९५॥
ज्ञात्वा स्वार्थं निमित्तेन महानर्थमिमं च ते । अत्राऽऽगममहं राजन्! यज्जानासि कुरुष्व तत् ॥१९६॥
इत्युदित्वा स्थिते तस्मिंस्तत्क्षणं राजरक्षणे । [9]अभूवन् बुद्धिमन्तोऽपि व्याकुलाः कुलमन्त्रिणः ॥१९७॥
¶तत्रैकः सचिवोऽवोचद्विद्युत्पातो[10]ऽर्णवे न हि । [11]सप्ताहं तत्र तत् स्वामी नावमारुह्य तिष्ठतु ॥१९८॥
द्वितीयोऽप्यब्रवीन्मन्त्री नेदं मे प्रतिभासते । पतन्तीं विद्युतं तत्र हन्त को वारयिष्यति? ॥१९९॥
**वैताढ्ये** नाऽवसर्पिण्यां विद्युत्पातो यतस्ततः । तस्योपरि गुहां गत्वा सप्ताहं वसतु प्रभुः ॥२००॥
मन्त्र्यवोचत् तृतीयोऽपि मह्यं नाऽदोऽपि रोचते । अवश्यभावी यो ह्यर्थो यत्र तत्र स नाऽन्यथा ॥२०१॥
¶तथा ह्यत्रैव **भरते** पुरे **विजयनामनि** । [12]अवात्सीद् ब्राह्मणवरो **रुद्रसोमो**ऽभिधानतः ॥२०२॥
अनपत्यस्य तस्याथ महद्भिरु[13]पयाचितैः । पत्न्यां **ज्वलनशिखायां शिखी** नाम सुतोऽभवत् ॥२०३॥
एकदा राक्षसस्तत्र कश्चिदप्यतिदारुणः । अधिष्ठितः [14]क्रूरदैवेनाऽऽगान्[15]मर्त्यपलप्रियः ॥२०४॥
मानुषाण्यन्वहं तत्र बहूनि प्रणिहन्ति सः । अल्पं तु ग्रसते शेषं [16]फेलामिव समुज्झति ॥२०५॥
राजा जजल्प तं [17]साम्ना किं मुधा हंसि नॄन् बहून्? । घ्नन्ति व्याघ्रादयोऽप्यज्ञा जन्तुमेकं [18]क्षुदौषधम् ॥२०६॥
दिने दिने त्वयाऽप्येकं ग्राह्यं ग्रासाय मानुषम् । मन्निर्णीतेन वारेण तत्तत्र स्वयमेष्यति ॥२०७॥
तेनाऽभ्युपगतेऽर्थेऽस्मिन्नृपः स्वपुरवेश्मसु । मानुषाणां नामगोलांश्चक्रे वारकहेतवे ॥२०८॥
कृष्यमाणः करे गोलो यदा यस्य चटेत् तदा । प्रयाति पुररक्षायै भक्ष्यभूतः स रक्षसे ॥२०९॥
तस्य ब्राह्मणपुत्रस्य निर्ययौ गोलकोऽन्यदा । तन्नाम वाचितं चान्तर[19]न्तकेनेव [20]पत्रकम् ॥२१०॥
तच्छ्रुत्वा तस्य माता तु रोदयन्ती पशूनपि । हा पुत्र! नाऽसि नाऽसीति रुरोद करुणस्वरम् ॥२११॥
आसीच्च तद्गृहासन्नमेकं भूतगृहं महत् । तद्भूतैः क्रन्दितं तस्याः शुश्रुवे कर्णदुःश्रवम् ॥२१२॥
उत्पन्नकरुणैस्तैश्च जगदे ब्राह्मणीति सा । मा रोदीर्भव सुस्था त्वं त्वत् पुत्रो यातु रक्षसे ॥२१३॥

---

१. विद्युत् ॥ २. ***विषेणेव स घूर्णितः*** ता. । अतिभ्रान्तः ॥ ३. ***भाव! द्वेषोऽत्र मे न हि*** मुप्र. ॥ ४. चरवद् ॥ ५. ***तदिदम्*** खंता. पा. ला. ॥ ६. अनन्यथा ॥ ७. ***दत्तपूर्विणीम्*** सं. ला., पूर्वं दत्तवती ॥ ८. कामपीडितानाम् ॥ ९. ***बभूवुर्बुद्धिमन्तोऽपि*** ता. ॥ १०. समुद्रे ॥ ११. ***सप्ताहीं०*** खंता. ॥ १२. अवसत् ॥ १३. 'बाधा-मानता' इति भाषायाम् ॥ १४. ***क्रूरदेव०*** मु. पा. छा. ॥ १५. मर्त्यपलं मनुष्यमांसं प्रियं यस्य सः ॥ १६. उच्छिष्टमिव ॥ १७. सान्त्वनेन ॥ १८. क्षुधाशमनौषधम् ॥ १९. यमेन ॥ २०. नामावली ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राक्षसस्याऽग्रतोऽप्येनमानेष्यामो तवाऽन्तिके । लङ्घिष्यते न व्यवस्था[१] न चाऽप्येष मरिष्यति ॥२१४॥
साधु हे देवताः! साधु यावदेवं जजल्प सा । आरक्षास्ताव[२]दजवन्निन्युराकृष्य तत्सुतम् ॥२१५॥
तद्दत्तं यावदादत्ते राक्षसस्तं द्विजात्मजम् । अपहृत्याऽनयन् भूतास्तावत् तन्मातुरन्तिके ॥२१६॥
भीता भयानि पश्यन्ती ब्राह्मण्यपि तमात्मजम् । [३]अन्तर्गिरिगुहं रक्षाकृते चिक्षेप तत्क्षणम् ॥२१७॥
तत्रस्थेन जग्रसे च जाग्रताऽजगरेण सः । तद्वदन्यदपि भवेन्न भावि क्वचिदन्यथा ॥२१८॥
इदमौ[४]पयिकं तस्मात् सर्वैराचर्यतां तपः । नि[५]काचितानामपि यत् कर्मणां तपसा क्षयः ॥२१९॥
¶मन्त्री तुर्योऽप्यभाषिष्टोपरिष्टात् **पोतन**प्रभोः । [६]ख्यातोऽनेन तडित्पातो न श्री**श्रीविजय**स्य तु ॥२२०॥
तत् सप्ताहं पुरेऽमुष्मिन् कोऽप्यन्यः क्रियतां पतिः । पतिष्यत्य[७]शनिस्तत्र दुरितं [८]तेन यातु वः ॥२२१॥
¶अथ नैमित्तिको हृष्टः [९]प्राशंसदिति मन्त्रिणम् । [१०]मन्निमित्तज्ञानतोऽपि मतिज्ञानं तवाऽधिकम् ॥२२२॥
अनर्थपरिहाराय [११]कुर्वर्थममुमाशु तत् । जिनपूजारतश्चैत्यस्थितो राजाऽपि तिष्ठतु ॥२२३॥
[१२]मयाऽप्यवादि योऽप्यद्य नरो राज्येऽभिषिच्यते । चिन्तयामि कथं तस्य प्राणनाशं निरा[१३]गसः? ॥२२४॥
[१४]आ शक्रादा[१५]कृमेः प्राणाः प्राणिनामतिदुस्त्यजाः । कथं वराकः पुंमात्रः पश्यतो मे विनाश्यते? ॥२२५॥
परेषां प्राणिनां प्राणत्राणैकपुरुषव्रताः । वयं हि घातयामोऽन्यं स्वप्राणितकृते कथम्? ॥२२६॥
¶मन्त्रिणोऽथाऽब्रुवन् देव! [१६]कार्यद्वयमिदं हि नः । यास्यति स्वामिनोऽनर्थः प्राणी च न विपत्स्यते ॥२२७॥
**वै[१७]श्रवण**स्य प्रतिमा देव! राज्येऽभिषिच्यताम् । [१८]तां च त्वामिव सप्ताहं सर्वः सेविष्यते जनः ॥२२८॥
दिव्यशक्त्योपसर्गश्चेन्न भवेत्तदपि सुन्दरम् । स्याच्चेत् तदपि न प्राणिवधपापं भविष्यति ॥२२९॥
युक्तमेतदिति प्रोच्य गतोऽस्मि जिनमन्दिरम् । [१९]दर्भसंस्तारके तस्मिन्नस्थां च [२०]कृतपौषधः ॥२३०॥
नरेन्द्रवदवर्त्तन्त मूर्त्तौ **वैश्रवण**स्य ते । [२१]स्वाम्युदर्काय धीमन्तो यान्ति स्वाम्यन्तरेऽपि हि ॥२३१॥
¶सप्तमे च दिने प्राप्ते मध्याह्नेऽत्यू[२२]र्जिगर्जितः । दिव्युन्ननाम पर्जन्यः प्रलयाम्बुददारुणः ॥२३२॥
तस्मादम्भोधराद् घोराद् ब्रह्माण्डं स्फोटयन्निव । निपपाताऽशनिस्तस्मिन् यक्षे [२३]राज्यधरीकृते[२४] ॥२३३॥
यथा यक्षे तडित्पातस्तत्र नैमित्तिके तथा । रत्नादिवृष्टिरभवद्विहिताऽन्तःपुरादिभिः ॥२३४॥
पत्तनं **पद्मिनीखण्ड**मखण्डितमहर्द्धिकम् । दत्वा नैमित्तिकवरो व्यसृज्यत मयाऽपि हि ॥२३५॥
मूर्त्तिं **वै[२५]श्रवण**स्याऽपि दिव्यरत्नमयीं नवाम् । अकारयमहं सद्यो विपद्बन्धुः स मे यतः ॥२३६॥
मद्विघ्नशान्त्या तदमी पौराऽमात्यादयो मुदा । महोत्सवं विदधते सर्वोत्सवशिरोमणिम् ॥२३७॥
इति श्रुत्वाऽ**मिततेजाः सुतारां** भगिनीं निजाम् । वस्त्रालङ्कारदानेन पूजयामास [२६]सम्मदात् ॥२३८॥
**सुतारा-श्रीविजय**योः पार्श्वे कालं कमप्यथ । [२७]अतिवाह्याऽ**मिततेजाः** [२८]स्वमेव नगरं ययौ ॥२३९॥
¶अथ **श्रीविजयो** राजा देव्या सह **सुतार**या । वनं **ज्योतिर्वनं** नाम ययौ क्रीडाकुतूहलात् ॥२४०॥
तदा च **कपिल**जीवोऽ**शनिघोषो** विहायसा । **विप्रतारणिकां** विद्यां साधयित्वा [२९]समापतन् ॥२४१॥
रममाणां समं पत्या [३०]पतिवत्नीं सुलोचनाम् । देवीं **सुतारा**मैक्षिष्ट [३१]प्राग्जन्मगृहमेधिनीम् ॥२४२॥युग्मम्॥
ततः प्राग्जन्मसंस्कारात् सम्बन्धमविदन्नपि । चक्रेऽनुरागादुत्कण्ठां तस्यां स्वस्यामिव स्त्रियाम् ॥२४३॥
विद्याबलाद्विचक्रे च प्लवमानं तयोः पुरः । दिव्यकन्दुकवद्धै[३२]मं हरिणं नेत्रहारिणम् ॥२४४॥

---

१. ***व्यवस्थां*** पाता. विना सर्वत्र ॥ २. छागवत् ॥ ३. गिरेः गुहा गिरिगुहा, गिरिगुहायां इति अन्तर्गिरिगुहम् ॥ ४. उपायः ॥ ५. अवश्यभोग्यफलानाम् ॥ ६. ***तेनाख्यातस्तडित्पातो*** ता. ॥ ७. विद्युत् ॥ ८. ***यातु तेन वः*** मुप्र. ॥ ९. ***प्रशशंसेति*** ता. ॥ १०. ***यन्निमित्तज्ञानतोऽपि*** खंता. वा.१-२ ता. पा. ॥ ११. ***कुरुध्वममु०*** मु. ॥ १२. ***राजाऽप्युवाच*** ता. ॥ १३. निरपराधिनः ॥ १४. इन्द्रादारभ्य कीटपर्यन्तम् ॥ १५. ***क्रिमेः*** मु.,'क्रिमिर्ना कृमिवत् कीटे' (मेदिनीकोषे) ॥ १६. ***कार्यं द्वय०*** खंता. पाता. वा.१-२ ॥ १७. कुबेरस्य ॥ १८. ***तं च०*** वा.१-२ ॥ १९. कुशासने ॥ २०. ***कृतपोषधः*** खंता. पाता. ॥ २१. स्वामिहिताय ॥ २२. ***स्फूर्जिगर्जितः*** दे. ॥ २३. ***राज्यधुरी०*** खंता. वा.१-२ ॥ २४. अराज्यधरो राज्यधरः कृतः राज्यधरीकृतः, तस्मिन् ॥ २५. ***वैश्रवणस्याऽस्य*** ता. ॥ २६. हर्षात्, ***सन्मुदा*** ता. ॥ २७. उल्लङ्घ्य ॥ २८. स्वकीयम् ॥ २९. आगच्छन् ॥ ३०. पतिरस्ति अस्याः सा, ताम् ॥ ३१. पूर्वजन्मपत्नीम् ॥ ३२. सौवर्णम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खुरैरथ विषाणाभ्यामिन्द्रनीलमयैरिव । नीलोत्पलविलासिभ्यां लोचनाभ्यां विराजितम् ॥२४५॥

पीतधातुमिवोज्झन्तं देहभासाऽतिपीतया । मण्डयन्तं नभः फालैः पादपातैश्च भूतलम् ॥२४६॥

दृष्ट्वा **सुतारा**देवी तमिति भर्तारमब्रवीत् । असौ क्रीडनकं मे स्यात् स्वामिन्नानीयतां मृगः ॥२४७॥त्रिभिर्विशेषकम्॥

इत्युक्तः कान्तया राजाऽन्वधावत [1]तमेणकम् । विश्लिष्टं वाहनमिव वायोर्वा[2]युसमस्यदम् ॥२४८॥

क्वचिद् वक्रः क्वचिदृजुर्मृगः स सरिदोघवत् । मनागप्यस्खलन् दूरं निनाय [3]जगतीपतिम् ॥२४९॥

क्वाऽपि दृश्यः क्वाऽप्यदृश्यः कदाऽप्युर्व्यां कदाऽपि खे[4] । स मायादैवतमिव ग्रहीतुं न ह्यशक्यत ॥२५०॥

¶[5]दूरं गते **श्रीविजये**ऽ**शनिघोषः** शनैस्ततः । अभिसृत्याऽहरद् देवीं वनदे[6]वीमिवैकिकाम् ॥२५१॥

ततः **प्रतारणी** विद्या तेना[7]ऽऽ[8]युक्ता दुरात्मना । [9]**सुतारी**भूय पूच्चक्रे दष्टाऽहं कुक्कुटाहिना ॥२५२॥

तच्छ्रुत्वा हरिणं मुक्त्वा ववले स इलापतिः । [10]अभियोगो हि योगाय क्षेमे सति वि[11]पश्चिताम् ॥२५३॥

भूमौ च लुठितां दृष्ट्वा तां निः[12]सहंशरीरिकाम् । मणि-मन्त्रौषधिवरै[13]रुपाचारीन्नरेश्वरः ॥२५४॥

प्राग्दृष्टप्रत्ययमपि सर्वमप्य[14]गदादिकम् । [15]उपकारः खल इव तस्यामफलतां ययौ ॥२५५॥

निमी[16]लन्नेत्रनलिना वि[17]च्छायवदनच्छविः । [18]कम्पमानोरुयुगला वे[19]पमानपयोधरा ॥२५६॥

शिथि[20]लीभूतसर्वाङ्गोपाङ्गसन्ध्यस्थिबन्धना । नृपतेः पश्यतोऽप्याशु [21]कालधर्ममियाय सा ॥२५७॥युग्मम्॥

[22]परासुरिव निःसञ्ज्ञः [23]परासुमवलोक्य **ताम्** । पपात मूर्च्छितः पृथ्व्यां स पृथिवीपतिपुङ्गवः ॥२५८॥

पुनर्व्यावृत्तचैतन्योऽभिषिक्तश्चन्दनद्रवैः । [24]मूर्धाभिषिक्तमूर्धन्यो विललापैवमुच्चकैः ॥२५९॥

हहा! दैवेन मुषितो नयता त्वां मनोरमे! । [25]त्वद्रूपैरेव हि प्राणैः प्राणितव्यं ममाऽभवत् ॥२६०॥

त्वां विनैष जनः कान्ते! शोकसम्भारभारतः । जीर्णं गृहमिवाऽऽधारस्तम्भहीनं पतिष्यति ॥२६१॥

मद्वल्लभां लोभयता वल्लभादेशतत्परः । काञ्चनेन कुरङ्गेण वञ्चितोऽस्मि हहा! जडः ॥२६२॥

प्रत्यक्षं मे प्रियां [26]दंष्टुं [27]तक्षकोऽपि हि न क्षमः । कुक्कुटाहिस्तु दूरेऽस्तु दैवं हि बलवत् परम् ॥२६३॥

ततोऽनुगन्तुं दयितां त्यजन् प्राणान् हुताशने । ऊनं प्रपूरयाम्यद्य दुर्दैवस्या[28]ऽभिसर्पतः ॥२६४॥

तया सह महीनाथः सद्यो विरचितां चिताम् । अलञ्चक्रे स्वयं धीरो रतिमन्दिर[29]तल्पवत् ॥२६५॥

यावज्ज्वलितुमारेभे क्षणाद[30]प्याशु[31]शुक्षणिः । तावदाजग्मतुस्तत्र द्वौ विद्याधरपूरुषौ ॥२६६॥

अभिमन्त्र्य तयोरेकः सिषेच पयसा चिताम् । **प्रतारण्य**पि तत्कालं पलायिष्टाऽट्टहासकृत् ॥२६७॥

क्व स [32]ज्वलनः [33]उज्ज्वालः? परासुः प्रेयसी क्व मे? । कृताट्टहासा केयं च? किमिदं दैवनाटकम्? ॥२६८॥

इति सञ्चिन्तयन् स्वस्थः पुरःस्थौ तौ च पूरुषौ । सौम्याकृती किमिदमित्यपृच्छत् पृथिवीपतिः ॥२६९॥

तौ च प्रणम्य राजानमूचतुर्विनयोचितम् । विद्याधरपतेरावां पत्ती **अमिततेजसः** ॥२७०॥

पिता-पुत्रौ च **सम्भिन्नश्रोतो-दीपशिखा**भिधौ । निर्गतौ स्वेच्छया तीर्थजिनबिम्बानि वन्दितुम् ॥२७१॥

अत्राऽऽ[34]पतद्भ्यामावाभ्यामश्रावि [35]श्रुतिदुःश्रवा । पशूनप्यु[36]त्कर्णयन्ती वागियं करुणाक्षरा ॥२७२॥

हा! **श्रीविजय**! मत्प्राणनाथ! [37]भूनाथसेवित! । हा! बान्धवा**ऽमिततेज**स्तेजस्तुलितभास्कर! ॥२७३॥

हा! वत्स! **विजयभद्र**! बलभद्रसमौजसा । हा! सर्वदा सन्निहिता**त्रिपृष्ठ**कुलदेवताः! ॥२७४॥

दुष्टविद्याधरादस्माद् वृकादिव कुरङ्गिकाम् । इमां **सुतारां** त्रायध्वं त्रायध्वमविलम्बितम् ॥२७५॥त्रिभिर्विशेषकम्॥

१. मृगम् ॥ २. वायुतुल्यवेगम् ॥ ३. नृपतिम् ॥ ४. आकाशे ॥ ५. ***दूरे गते*** मु.॥ ६. ***०वीमिवैककाम्*** वा.१-२ ॥ ७. ***तेन युक्ता*** दे. ॥ ८. प्रयुक्ता ॥ ९. सुताराऊपं कृत्वा ॥ १०. परपराभवः ॥ ११. विदुषाम् ॥ १२. निर्बलशरीरां निस्तेजःशरीरां वा ॥ १३. उपचारमकरोत् ॥ १४. औषधादिकम् ॥ १५. ***उपचारः*** ता. मु.॥ १६. निमीलन्ती नेत्रे नलिने इव यस्याः सा ॥ १७. विगता छाया यस्याः विच्छाया, तादृशी वदनच्छविर्यस्याः सा ॥ १८. कम्पमानं ऊर्वोर्युगलं यस्याः सा ॥ १९. वेपमानौ-पयोधरौ यस्याः सा ॥ २०. शिथिलीभूतानि सर्वाङ्गोपाङ्गसन्ध्यस्थिबन्धनानि यस्याः सा ॥ २१. मृत्युमगच्छत् ॥ २२. मृत इव ॥ २३. गतप्राणाम् ॥ २४. मूर्धाभिषिक्तानां राज्ञां मूर्धन्यः मुख्यः ॥ २५. त्वमेव मम प्राणाः, तैरेव प्राणैश्च मम जीवनमभवत् ॥ २६. ***द्रष्टुं०*** खंता. पाता. ॥ २७. सर्पविशेषः, 'तक्षकस्तु लोहिताङ्गः स्वस्तिकाङ्कितमस्तकः' अभि.चिं. तिर्यक्काण्ड - श्लो.१३०९ ॥ २८. वृद्धिं गच्छतः ॥ २९. तल्पं शय्या ॥ ३०. ***क्षणादेरा०*** खंता. ॥ ३१-३२. अग्निः ॥ ३३. प्रज्वलितः ॥ ३४. आगच्छद्भ्याम् ॥ ३५. कर्णदुःश्रवा ॥ ३६. उत्कर्णान् कुर्वन्ती ॥ ३७. भूपतिसेवितः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वसारं स्वामिनो ज्ञात्वा ह्रियमाणां दुरात्मना । तां वाचमन्वगच्छाव [1]शब्दपातिशराविव ॥२७६॥
अचिरादप्यपश्याव **सुतारां** तरलेक्षणाम् । आत्ता**मशनिघोषे**ण पद्मिनीमिव [2]दन्तिना ॥२७७॥
ह्रियमाणां [3]स्वामिजामिं तामुपेक्षितुमक्षमौ । [4]आबद्धभ्रकुटी वाचमवोचाव च वैरिणम् ॥२७८॥
रे [5]विद्याधरहतकाऽ**शनिघोष!** क्व यास्यसि? । हत्वा **सुतारां** [6]चण्डालो देवताप्रतिमामिव ॥२७९॥
अरे! रे! न भवस्येष हन्वस्त्वामुद्वहायुधम् । आवां विद्याधरपतेः पत्ती ह्य**मिततेजसः** ॥२८०॥
एवमाक्षिप्य कृष्टासी कृष्णाही इव [7]वार्त्तिकौ । आवां [8]नरजघन्यं तं [9]जिघांसन्तावुपस्थितौ ॥२८१॥
ततः **सुतारा**देव्योक्तं युद्धेन युवयोरलम् । वनं **ज्योतिर्वनं** यातं तत्र **श्रीविजयः** प्रभुः ॥२८२॥
**प्रतारण्या** वञ्चयित्वा त्याज्यमानमसूनपि । निषेधतं **श्रीविजयं** तस्मिन् जीवामि जीवति ॥२८३॥
द्रुतमावां तदादेशादिह त्वां समुपस्थितौ । विध्यापितश्चितावह्निरावाभ्यां मन्त्रितोदकैः ॥२८४॥
इयं **प्रतारणी** विद्या **सुतारा**रूपधारिणी । वेतालवत् [10]समुत्ताला साट्टहासा [11]पलायत ॥२८५॥
हतां **सुतारां** विज्ञाय विषसाद महीपतिः । चितानलादप्यधिकं [12]प्रज्वलद्विरहानलः ॥२८६॥
तं तावित्यूचतुः स्वामिन्! मा ताम्य कुशली न सः । यतो न दूरे भवतः दैवस्येव क्व यास्यति? ॥२८७॥
तौ प्रणम्याऽथ राजानं [13]जानुस्पृष्टमहीतलौ । गाढमभ्यर्थ्य **वैताढ्य**मात्मना सह निन्यतुः ॥२८८॥
¶ततः [14]सर्वाभिसारेणाऽ**मिततेजाः** क्षणादपि । अभ्युत्तस्थौ **श्रीविजयं** विजयो मूर्त्तिमानिव ॥२८९॥
महत्या [15]प्रतिपत्त्या तमासयित्वोचितासने । ससम्भ्रमोऽ**मिततेजाः** पप्रच्छाऽऽगमकारणम् ॥२९०॥
तौ च विद्याधरवरौ तस्मै [16]**श्रीविजये**रितौ । **सुतारा**हरणोदन्तमाचख्यतुरशेषतः ॥२९१॥
अथाऽ**र्ककीर्ति**तनयो [17]भ्रुकुटीकुटिलालिकः । [18]रुषाऽरुणकपोलाक्षो[19] निजगादेति भूपतिम् ॥२९२॥
कण्डूयित्वा [20]तुण्डमिव तक्षकस्य फणाभृतः । [21]सटामुष्टिमिवोत्पाट्य शयानस्य [22]मृगद्विषः ॥२९३॥
तव भार्यां स्वसारं मे **सुतारा**मपहृत्य सः । जीविष्यति कियन्नामाऽ**शनिघोषो** नराधमः? ॥२९४॥युग्मम्॥
¶ततश्च **शस्त्रावरणीं बन्धनीं मोचनी**मपि । विद्यां **श्रीविजया**याऽदाद**र्ककीर्ति**सुतः स्वयम् ॥२९५॥
**रश्मिवेगा-ऽमितवेग-रविवेगा-ऽर्ककीर्तयः । भानुवेगा-ऽऽदित्ययशो-भानु-चित्ररथा** अपि ॥२९६॥
**अर्कप्रभो**ऽथाऽ**र्करथो रवितेजाः प्रभाकरः** । तथा **किरणवेगो**ऽपि **सहस्रकिरणो**ऽपि च ॥२९७॥
इत्यादीनां स्वपुत्राणां [23]स नु पञ्चशतीमथ । समं **त्रैपृष्ठि**ना वीर[24]प्रष्ठेन [25]पृतनावृताम् ॥२९८॥
पुर्यां **चमरचञ्चा**यां तस्माद**शनिघोषतः** । सद्यः **सुतारा**माहर्तुं प्राहिणो[26]दहितान्तकः ॥२९९॥[27]चतुर्भिः कलापकम्॥
ततो [28]विद्याधरबलच्छन्नाशेषनभस्तलः । दिवि केतुशतानीवोद्भावयन् सुभटायुधैः ॥३००॥
प्रभूतहयहेषाभिर्हेषयन् भास्वतो हयान् । वितन्वानो गजैर्व्योम्नि मेघमालामिवाऽपराम् ॥३०१॥
विमानैर्दर्शयन् दीप्रैरर्कानौ[29]त्पातिकानिव । जगाम **चमरचञ्चां त्रि[30]पृष्ठ**तनयः क्षणात् ॥३०२॥त्रिभिर्विशेषकम्॥
तं चा[31]ऽधिविद्यम**शनिघोषं** ज्ञात्वाऽ**र्ककीर्ति**सूः । **सहस्ररश्मि**ना सार्धं सुनूनाऽनूनशक्तिना ॥३०३॥
परविद्याच्छेदकरीं **महाज्वाला**[32]भिधायिकाम् । विद्यां स्वयं साधयितुं **हिमवन्तं** गिरिं ययौ ॥३०४॥युग्मम्॥
¶स तत्र च **जयन्तस्य** महर्षेः प्रतिमाजुषः । तथैव **धरणेन्द्र**स्य पादमूलेऽतिपावने ॥३०५॥
स्थितो मासिकभक्तेन प्रतिमां [33]साप्तरात्रिकीम् । समुद्वहन् प्रववृते विद्यासाधनकर्मणि ॥३०६॥युग्मम्॥

---

१. शब्दानुसारिणौ शरौ इव ॥ २. गजेन ॥ ३. स्वामिभगिनीम् ॥ ४. ***आबद्धभ्रकुटीवावां तमवोचाव वैरिणम्*** सं. ता. दे. ला. । ***आबद्धभ्रकुटी वाचं तमवोचाव वैरिणम्*** खंता. पाता. वा.१-२ ॥ ५. हे दुष्टविद्याधर! ॥ ६. ***चाण्डालो*** पा. ॥ ७. गारुडिकौ ॥ ८. नराधमम् ॥ ९. हन्तुमिच्छन्तौ ॥ १०. उन्मत्ता ॥ ११. ***पलायिता*** पाता. वा. १-२ सं. ला. ॥ १२. प्रज्वलन् विरह एव अनलः यस्य सः ॥ १३. जानुभ्यां स्पृष्टं महीतलं याभ्यां तौ ॥ १४. सर्वसामग्र्या ॥ १५. सत्कारेण ॥ १६. श्रीविजयेन प्रेरितौ ॥ १७. भृकुटीवत् कुटिलं अलिकं ललाटं यस्य सः ॥ १८. रुषा अरुणे कपोलौ अक्षिणी च यस्य सः ॥ १९. ***कपोलाक्षिर्निज०*** खंता. पाता. वा.१-२ सं. छा. ला. दे. पा. ॥ २०. मस्तकम् ॥ २१. केसराणां मुष्टिम् ॥ २२. सिंहस्य ॥ २३. ***चतुपञ्चाशती०*** खंता., ***शतपञ्चशती०*** मु. ॥ २४. वीराग्रसरेण ॥ २५. सेनान्विताम् ॥ २६. शत्रुनाशकः ॥ २७. खंता. पाता. वा.१-२ प्रतिषु नास्ति ॥ २८. विद्याधराणां बलेन छन्नमशेषं नभस्तलं येन सः ॥ २९. उत्पातजनितान् ॥ ३०. ***त्रिपृष्ठितनयः*** दे. मु. ॥ ३१. अधिकविद्यावन्तम् ॥ ३२. ***लाभिधानिकाम्*** सं. मु. विना, खंता. पाता. वा.१-२ ॥ ३३. सप्तसु रात्रिषु भवा ताम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सहस्ररश्मिः** पितरं ररक्ष च तथास्थितम् । एवं च तिष्ठतोर्मासः किञ्चिदूनस्तयोरभूत् ॥३०७॥

¶इतश्च **चमरचञ्चा**बहिर्देशे कृतस्थितिः । प्रैषीद**शनिघोषा**य दूतं **श्रीविजयो** नृपः ॥३०८॥

दूतो गत्वाऽथ निःशङ्कोऽ**शनिघोष**मभाषत । धिग् [1]ह्रीकरमिदं कर्म काकेनेव त्वया कृतम् ॥३०९॥

धैर्य-वीर्यविहीनानां छलमेव हि पौरुषम् । [2]तद्वतामद्य धुर्योऽसि देवीमपहरंस्तथा ॥३१०॥

[3]**प्रतारणीं श्रीविजये** विद्यां स्फोरयतस्तदा । प्रेक्षापूर्वककारित्वमहो ते श्मश्रुधारिणः ॥३११॥

ज्ञातस्त्वया **श्रीविजयः** प्रतापतपनो न किम्? । निष्प्रतापे त्वादृशानां छलानि प्रभवन्ति हि ॥३१२॥

स [4]मोघीकृत्य तां विद्यामिहाऽऽयासीद् यथा तथा । **सुतारां** नेष्यति बलात् तद्धीमन्! स्वयमर्पय ॥३१३॥

स्वयमर्पयतो देवीं प्रणिपातपुरःसरम् । त्वज्जीवितस्य कुशलं [5]कीनाशः प्रगुणोऽन्यथा ॥३१४॥

बभाषेऽ**शनिघोषो**ऽपि घननिर्घोषघोरगीः । साध्वहो! दूत! [6]धृष्टोऽसि दृष्टो नेदृक् क्वचिन्मया ॥३१५॥

यद्यत्राऽगा**च्छ्रीविजय**स्तत् किं तेन तपस्विना? । सुमेरुमपि गच्छन्ति खगाः किं तेषु पौरुषम्? ॥३१६॥

ममैकयत्नलेशेन नष्टशक्तिः स यास्यति । न वालुकादेवकुलं सहते सरितो [7]रयम् ॥३१७॥

पथा यथागतेनैव स प्रयातु निजौकसि । **सुतारां** याचमानस्तु प्रयास्यति यमौकसि ॥३१८॥

इति द्वयं समालोच्य यातु तिष्ठतु वाऽद्य सः । गच्छ त्वमपि मद्वाचं समाख्याहि तदग्रतः ॥३१९॥

एवमुक्तस्तेन दूतो द्रुतं निर्गत्य तत्पुरात् । आख्य**त्त्रैपृष्ठये** तस्य [8]वाचिकं वञ्चकात्मनः ॥३२०॥

[9]कोपानलानिलप्रायं श्रुत्वा तत् तस्य वाचिकम् । राजा **श्रीविजयः** सेनां सज्जितामप्यसज्जयत् ॥३२१॥

ज्ञात्वा **श्रीविजया**नीका[10]न्यनीकोत्कण्ठितान्यथ । आदिदेशाऽ**शनिघोषो** [11]युद्धातिथ्यकृते सुतान् ॥३२२॥

**अश्वघोषः शतघोषः सहस्रघोष** एव च । **महोघोषो भीमघोषो घनघोष**स्तथाऽपरे ॥३२३॥

तत्पुत्रा **मेघघोषाद्याः** सर्वे सर्वाभिसारतः । युद्धाय **चमरचञ्चा**पुर्या द्वारे विनिर्ययुः ॥३२४॥[12]युग्मम्॥

रणतूर्याण्यवाद्यन्त सैन्ययोरुभयोरपि । ध्वनिना शरदम्भोदसोदराणि गरीयसा ॥३२५॥

शरच्छिन्नोच्छलच्छत्रैः [13]शतेन्दूभवदम्बरम् । [14]कुन्तोत्पतच्छिरोभिश्च [15]संमूर्च्छद्बहुराह्विव ॥३२६॥

पतद्भिस्तेजितैः[16] शल्यैः पतदुल्कामिवोच्चकैः । आस्फलत्पर्वतमिवाऽऽस्फलद्भिर्गन्धसिन्धुरैः ॥३२७॥

भुवि विश्रान्तसन्ध्याभ्रमिव [17]कीलालकर्दमैः । मद्यस्येवाऽसृजः पानान्माद्यद्वेताल[18]पेटकम् ॥३२८॥

महाभटैर्जप्यमानमन्त्रास्त्रमिव हुङ्कृतैः । [19]शल्याहतेभकुम्भोत्थमुक्तातारकिताम्बरम् ॥३२९॥

सैन्यरेणुभिरुद्भूतप्रदोषमिव सर्वतः । महत् प्रववृते युद्धमुभयोरपि सैन्ययोः ॥३३०॥पञ्चभिः कुलकम्॥

घोरैर्गदाप्रहरणप्रहारैरतिमूर्च्छिताः । अञ्चलान् व्यजनीकृत्य केऽप्यवीज्यन्त बन्धुभिः ॥३३१॥

वल्लभाभिः पयस्कुम्भहारिणीभिः [20]पिपासिताः । केऽप्यम्भोऽ[21]नुपदिनीभिरपाय्यन्त मुहुर्मुहुः ॥३३२॥

पश्यन्तीनां प्रेयसीनामपि केऽप्यमरीजनैः । अयं मेऽयं ममेशस्तान् सोत्कण्ठमिति वव्रिरे ॥३३३॥

आदाय कोऽप्यरेर्मौलिं नृत्यति स्म महाभुजः । तत्स्पर्धयेव तद्वैरि[22]कबन्धोऽपि ननर्त च ॥३३४॥

प्रथमस्यन्दनाद् भग्नात् कोऽपि च स्यन्दनान्तरम् । समुत्पत्य ययौ वृक्षादिव वृक्षान्तरं कपिः ॥३३५॥

कोऽपि युद्ध्वा चिरतरं [23]निष्ठितास्त्रो महाभटः । स्वकेनैव [24]शिरस्त्रेण प्रहृत्याऽमारयत् परम् ॥३३६॥

परिक्षीणेषु शस्त्रेषु निखिलेष्वपि केचन । दोर्दण्डाभ्यां युयुधिरे दन्ताभ्यामिव दन्तिनः ॥३३७॥

अस्त्रैः शस्त्रैर्मायया च सैन्ययोर्युध्यमानयोः । किञ्चिदूना व्यतीयाय मास एको द्वयोरपि ॥३३८॥

---

१. *धिग् ध्रीकर०* मु. ॥ २. छलवताम् ॥ ३. *प्रतारिणीं* मु. ॥ ४. निष्फलीकृत्य ॥ ५. यमः ॥ ६. *दृष्टोऽसि धृष्टो०* मु. ॥ ७. वेगम् ॥ ८. सन्देशम् ॥ ९. कोपाग्निवायुसदृशम् ॥ १०. युद्धोत्कण्ठितानि ॥ ११. युद्धसत्काराय ॥ १२. खंता. पाता. वा.१-२ न ॥ १३. शतचन्द्रीभवत् अम्बरं यत्र तत् ॥ १४. कुन्तानि उत्पतन्ति च तानि शिरांसि च तैः ; *कुन्तोत्पतच्छिरोभिश्च* ता. दे. पा. छा., *कृत्वोत्पतच्छिरोभिश्च* ला. ॥ १५. संमूर्च्छन्तो बहवो राहवो यत्र ॥ १६. तीक्ष्णैः ॥ १७. शोणितकर्दमैः ॥ १८. समूहः ॥ १९. शस्त्रैराहता ये गजास्तेषां कुम्भेभ्य उत्थिताभिर्मुक्ताभिस्तारकितमाकाशं यत्र तत् ॥ २०. तृषिताः ॥ २१. पदानुसारं गच्छन्तीभिः ॥ २२. शिरोरहितो देहः ॥ २३. शस्त्रविहीनः ॥ २४. शिरस्त्राणेनेत्यर्थः; *शिरस्केन* दे. छा. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सैन्यैः **श्रीविजय**स्याऽथ पवनैरिव पादपाः । अभज्यन्ताऽ**शनिघोष**कुमारा मारपीडिताः ॥३३९॥

¶अथाऽशनिमिवोद्यम्याऽ**शनिघोषो** महागदाम् । कुमारांस्तर्जयन् भग्नान् भञ्जन्नपि च विद्विषः ॥३४०॥

वराहः पल्वलमिव समुद्रमिव मन्दरः । विशिष्टविद्यादोर्वीर्योऽगाहिष्ट द्विषतां बलम् ॥३४१॥

मङ्क्षु तेनाऽप्यभज्यन्त सूनवोऽ**मिततेजसः** । कृते [1]प्रतिकृतं सद्यो कुर्वन्ति हि मनस्विनः ॥३४२॥

**सुताराभ्रातृजान्** भग्नान् वीक्ष्य **श्रीविजयो** नृपः । [2]युद्धे स्वयमढौकिष्ट तिष्ठ तिष्ठेत्यरिं ब्रुवन् ॥३४३॥

अथ द्वावपि गर्जन्तौ तर्जन्तौ च परस्परम् । शस्त्रशक्तिं दर्शयन्तौ विद्याशक्तिं च तादृशीम् ॥३४४॥

प्रहारान् वञ्चयमानावन्योन्यस्याऽतिलाघवात् । सुरा-ऽसुरैर्वीक्ष्यमाणौ युयुधाते महाभुजौ ॥३४५॥युग्मम्॥

¶अथ **श्रीविजयः** क्रुद्धः खड्गेनाऽऽहत्य विक्रमी । व्यधाद् द्विधाऽ**शनिघोषं** कदलीकाण्डलीलया ॥३४६॥

[3]वटपादाविव वटौ ते च खण्डे उभे अपि । अभूताम**शनिघोषौ** [4]घोषभेषितसैनिकौ ॥३४७॥

तावप्य**शनिघोषौ** स यावच्चक्रे द्विधा द्विधा । संजज्ञिरेऽ**शनिघोषा**श्चत्वारस्तावदुद्धताः ॥३४८॥

चतुरोऽपि द्विधा चक्रे तान् यावदवनीपतिः । तावदष्टाऽ**शनिघोषा** जज्ञिरे [5]समराजिरे ॥३४९॥

खण्डितैर**शनिघोषै**रेवं तेन मुहुर्मुहुः । सहस्रशोऽ**शनिघोषाः** शालिस्तम्बा इवाऽभवन् ॥३५०॥

बहुशोऽ**शनिघोषै**स्तैर्युगपत् **पोतनेश्वरः** । अलक्षि वेष्ट्यमानः सन् **विन्ध्याद्रि**रिव वारिदैः ॥३५१॥

[6]छेदं छेदं च तान् श्रान्तो यावच्छ्**रीविजयो**ऽभवत् । तावत् सिद्ध**महाज्वालो**ऽ**मिततेजाः** समाययौ ॥३५२॥

आगच्छतः [7]प्रतापोष्णतेजसोऽ**मिततेजसः** । प्रणेशुर**शनिघोष**सैन्याः सिंहान्मृगा इव ॥३५३॥

न नंष्टुमपि दातव्यं द्विषामेषां दुरात्मनाम् । इति विद्यां **महाज्वालां** विन्ययुङ्क्ताऽ**र्ककीर्ति**सूः ॥३५४॥

[8]अहिता मोहिताः सद्यस्ते महाविद्यया तया । शरण्यं शरणायेयुस्तमेवाऽ**मिततेजसम्** ॥३५५॥

गन्धेभगन्धमाघ्राय करीवाऽ**मिततेजसम्** । अवलोक्याऽ**शनिघोषः** पलायिष्ट [9]निरर्गलम् ॥३५६॥

दूरादपि दुरात्माऽयमानेतव्यस्त्वयेति सा । **महाज्वाला** महाविद्याऽभिदधेऽ**मिततेजसा** ॥३५७॥

ततश्चाऽ**शनिघोष**स्य पृष्ठतो रुष्टकालवत् । पर्यधाविष्ट सा विद्या सर्वविद्यान्तकारिणी ॥३५८॥

तस्याः पलायमानः सोऽनाप्नुवन् शरणं क्वचित् । [10]अपाग्**भरत**वर्षार्धं प्राविशच्छरणेच्छया ॥३५९॥

¶ततश्च तत्र **सीमाद्रौ** चैत्ये श्री**ऋषभ**प्रभोः । समवसरणस्थाने स्थापितोऽस्ति गजध्वजः ॥३६०॥

बलदेवमुनिस्तत्राऽ**चलः** [11]पूर्वाब्धिपारगः । शुक्लध्यानी प्रत्यपादि प्रतिमामेकरात्रिकीम् ॥३६१॥

कर्मणां घातिनां छेदात् तदा तस्य महामुनेः । उत्पेदे केवलज्ञानं विश्वसङ्क्रान्तिदर्पणः ॥३६२॥

तस्याऽथ केवलज्ञानमहिमानं [12]विधित्सवः । सुरा-ऽसुराः समाजग्मु[13]रायुक्ता इव सत्वरम् ॥३६३॥

तौ चाऽ**भिनन्दन-जगन्नन्दनौ वह्निजट्य**पि । [13]**विजंटी** चाऽ**र्ककीर्ति**श्च **पुष्पकेतु**रथाऽपरे ॥३६४॥

**विमलमत्यादयो**ऽपि समेयुश्चारणर्षयः । [14]**बलं** प्रदक्षिणीकृत्य नत्वा च समुपाविशन् ॥३६५॥युग्मम्॥

**महाज्वालापातभीतो**ऽ**शनिघोषो**ऽपि तत्क्षणम् । ययौ शरण**मचलं** प्रशमैकसुधाह्रदम् ॥३६६॥

साऽपि मुक्त्वाऽ**शनिघोषं महाज्वाला** न्यवर्तत । न ही[15]न्द्रकुलिशस्याऽपि [17]स्फूर्त्तिः केवलिपर्षदि ॥३६७॥

अशेषं तं च वृत्तान्तमुपेत्याऽ**मिततेजसे** । कथयामास सा विद्या [18]निर्जमोघत्वलज्जिता ॥३६८॥

तं च वृत्तान्तमाकर्ण्य [19]कलापीव घनध्वनिम् । अमोदताऽ**मिततेजा** राजा **श्रीविजयो**ऽपि च ॥३६९॥

इतः पुर्याः समादाय **सुतारां** द्रुत[20]मापतेः । एवं **मारीचि**मादिश्योत्कण्ठापूरितमानसः ॥३७०॥

ससैन्योऽप्य**मिततेजाः** [21]स च **श्रीविजयो** नृपः । वायुवद्व्योमयानेन **सीमाद्रिं** द्रुतमीयतुः ॥३७१॥

१. प्रतीकारम् ॥ २. *युधि* सं. ला. ॥ ३. *वटपादादिव* दे. छा. मु. ॥ ४. घोषेण भेषिताः सैनिकाः याभ्यां तौ, गर्जनाक्षोभितसैनिकौ ॥ ५. रणाङ्गणे ॥ ६. छित्त्वा छित्त्वा ॥ ७. प्रतापेन सूर्यसमानस्य ॥ ८. शत्रवः ॥ ९. अयन्त्रितम् ॥ १०. दक्षिणभरतक्षेत्रार्धम् ॥ ११. चतुर्दश पूर्वाणि एव अब्धयः तेषां पारगः ॥ १२. कर्तुमिच्छुकाः ॥ १३. सेवका इव ॥ १४. *त्रिजटी* मु. ॥ १५. अचलमुनिम् ॥ १६. इन्द्रवज्रस्य ॥ १७. प्रभावः ॥ १८. स्ववैफल्येन लज्जिता ॥ १९. मयूरः ॥ २०. *आनये:* मु. ॥ २१. *राजा* पा. दे. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र चर्**षभनाथ**स्य वन्दित्वा बिम्बमादितः । **बलदेवं** ववन्दाते तदग्रे च निषेदतुः ॥३७२॥

¶इतश्च **चमरचञ्चां** [1]मारीचिरविशत् पुरीम् । गृहे चाऽ**शनिघोष**स्य मातुः पार्श्वमुपाययौ ॥३७३॥

हिमार्त्तामिव नलिनीं पङ्कमग्नामिवा[2]ऽर्जुनीम् । दवप्राप्तामिव लतां [3]वागुरास्थां मृगीमिव ॥३७४॥

इन्दुलेखामिवा[4]ऽहःस्थां तटस्थां [5]शफरीमिव । [6]वारीबद्धामिव वशां हंसीं [7]मरुगतामिव[8] ॥३७५॥

**सुतारा**मुपवासस्थां तत्र चाऽत्यन्तदुःखिताम् । मन्त्रवत् पतिनामैव स्मरन्तीं स उदैक्षत ॥३७६॥त्रिभिर्विशेषकम्॥

ततः स आख्यद**शनिघोष**मातुरशेषतः । यत् **सुतारा**ऽऽनयनायाऽऽदिष्टोऽस्म्य**मिततेजसा** ॥३७७॥

**सुतारां** समुपादायाऽ**शनिघोष**जनन्यपि । आययाव**चल**स्वामिसभायां यत्र तत्पतिः ॥३७८॥

सा तत्कालमपि हि **श्रीविजया-ऽमिततेजसोः । सुतारा**मर्पयामासा[9]ऽनघां [10]न्यासीकृतामिव ॥३७९॥

बलदेवं भगवन्तं केवलज्ञानिनं ततः । सा वन्दित्वा यथास्थानं निषसाद प्रसादभाक् ॥३८०॥

तदा चाऽ**शनिघोषो**ऽपि क्षमयामास सामवाक् । नरविद्याधरेन्द्रौ **श्रीविजया-ऽमिततेजसौ** ॥३८१॥

शान्तवैरास्ततः सर्वेऽप्यभवंस्तत्र पर्षदि । देशनां चाऽ**चल**स्वामी विदधे शुद्धिदायिनीम् ॥३८२॥

¶देशनान्तेऽ**शनिघोषो बलभद्र**महामुनिम् । इति विज्ञपयामास [11]ललाटघटिताञ्जलिः ॥३८३॥

[12]स्वस्थाने तस्थुषी सेयं दन्तिनेवाऽरविन्दिनी । न हि दुष्टेन मनसा **सुतारा**ऽपहृता मया ॥३८४॥

किन्त्वहं **चमरचञ्चा**नगर्यां गतवान् पुरा । आयतने भगवतो **जयन्त**स्य महामुनेः ॥३८५॥

तत्र च **भ्रामरीं** विद्यां किञ्चिद् भ्रमरवद् गृणन् । असाधयमहं स्वामिन्! सप्तरात्र[13]मुपोषितः ॥३८६॥

ततः प्रतिनिवृत्तः सन् वने **ज्योतिर्वना**भिधे । इमां **सुतारा**मद्राक्षं स्थितां **श्रीविजया**न्तिके ॥३८७॥

केनापि हेतुनाऽमुष्यां कोऽपि वाचामगोचरः । ममाऽऽ[14]लोकितमात्रायां स्नेहः समुदपद्यत ॥३८८॥

ततश्चाऽचिन्तयमहं नाऽलं गन्तुं विनाऽनया । मनो मम प्रोत्सहते [15]सन्दानितमिवोच्चकैः ॥३८९॥

राज्ञः **श्रीविजय**स्याऽस्य दोष्मतः पार्श्ववर्तिनी । न चैषा शक्यते हर्तुं [16]शेषस्येव शिरोमणिः ॥३९०॥

**प्रतारण्या** विद्यया तन्मोहयित्वा महीपतिम् । एतामहमपाहार्षं चिल्ली[17] हारलतामिव ॥३९१॥

स्वजनन्याः समीपे [18]चाऽमुञ्चमेतामनिन्दिताम् । चन्द्रस्याऽपि कलङ्कोऽस्ति न त्वेतस्या मनागपि ॥३९२॥

न चोक्तं वचसाऽप्यस्यां मया किञ्चिदशोभनम् । परमाख्याहि भगवन्! किं मेऽस्यां स्नेहकारणम्? ॥३९३॥

¶अथाऽऽख्यद् भगवान् **सत्यभामा-कपिल**योः कथाम् । **श्रीषेणस्य शिखि[19]नन्दिता-ऽभिनन्दित**योरपि॥३९४॥

स मुनिः पुनरप्याख्यच्छ्**रीषेणो**ऽथाऽ**भिनन्दिता** । सा **शिखि[20]नन्दिता सत्या** [21]मृत्वा युगलिनोऽभवत् ॥३९५॥

ततोऽपि मृत्वा **सौधर्मे** चत्वारोऽप्यभवन् सुराः । ततोऽपि च्युत्वा **श्रीषेणो**ऽ**मिततेजा** अभूदयम् ॥३९६॥

**शिखि[22]नन्दिता**जीवस्तत्पत्नी **ज्योतिःप्रभे**त्यभूत् । तथाऽ**भिनन्दिता**जीवः सोऽयं **श्रीविजयो**ऽभवत् ॥३९७॥

जीवस्तु **सत्यभामायाः सुतारे**यमजायत । मृत्वाऽऽर्त्तध्यानी **कपिलो** बभ्रामाऽनेकयोनिषु ॥३९८॥

आर्त्तध्यानोद्भवं कर्माऽकामनिर्जरया तु सः । [23]उत्पद्योत्पद्याऽक्षपयत् तिर्यग्-नरकवासिषु ॥३९९॥

**भूतरत्ना**भिधाटव्या**मैरावत्या**श्च रोधसि । तापसाग्र्यस्य **जटिलकौशिक**स्य तपस्विनः ॥४००॥

पत्न्यां **पवनवेगायां** [24]**धर्मिलो** नाम दारकः । उत्पेदे **कपिल**जीवः [25]शमिलायुगयोगवत् ॥४०१॥

लाल्यमानस्तापसीभिराश्रमाङ्गणवृक्षवत् । क्रमादासादयामास वृद्धिं [26]**धर्मिल**दारकः ॥४०२॥

दीक्षां निजपितुः पार्श्वे गृहीत्वा स जटाधरः । समारेभे बालतपः [27]प्रकर्तुं पैतृकं हि तत् ॥४०३॥

---

१. *मरीचिरवि०* दे. ला. ॥ २. धेनुम् ॥ ३. पाशबद्धाम् ॥ ४. दिवसस्थाम् ॥ ५. मीनम् ॥ ६. वारी गजबन्धनी तस्यां बद्धां वशां हस्तिनीम् ॥ ७. मरुधरदेशगतां हंसीम् ॥ ८. *०मपि* खंता. ॥ ९. निर्दोषाम् ॥ १०. प्रत्यर्पणाय स्थापितामिव ॥ ११. ललाटे घटितोऽञ्जलिः येन सः ॥ १२. *तत्स्थाने* मु. ॥ १३. उपवासकारी ॥ १४. *लोकितमात्रायाः* ला. पा. छा. ॥ १५. बद्धम् ॥ १६. शेषनागस्य ॥ १७. शकुनिः ॥ १८. *चामुचमेता०* ता. ॥ १९. *सिंहनन्दिता* खंता. पाता. वा.१-२, सं. ता. ला. ॥ २०. *सिंहनन्दिता* खंता. पाता. वा.१-२ सं. ता. ला. ॥ २१. *मृता०* वा.१-२ ॥ २२. *सिंहनन्दिता* खंता. पाता. वा.१-२ सं. ता. ला. ॥ २३. *उत्पाद्योत्पाद्या०* खंता. ॥ २४. *धर्मिल्लो०* पाता. ॥ २५. शमिला(*शमिल्ला* पाता.) भाषायां 'समोल' इत्युच्यते; युगं च भाषायां 'धूंसरी'; तयोर्योगस्तद्वत् ॥ २६. *धर्मिल्ल०* पाता. ॥ २७. *पैतृकं मातृकं* खंता. पाता. वा.१-२ ला. छा. विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधिसेहे स हेमन्ते हिमभीमासु रात्रिषु । गलन्त्या वारिसम्पातं शैलाश्मा निर्झरादिव ॥४०४॥
मार्त्तण्डो मूर्ध्नि पार्श्वेषु ज्वलन्त्यश्च [१]हंसन्तिकाः । सहते स्मेति पञ्चाग्नीन् ग्रीष्ममध्यन्दिनेषु सः ॥४०५॥
[२]पयोदवृष्टिपूर्णेषु स्वयं खातसरस्सु च । **अघोरमन्त्रा**द्यजपदाकण्ठं पयसि स्थितः ॥४०६॥
वापीः कूपान् सरसीश्च चखानाऽखनयच्च सः । अप्कायपृथिवीकायजीवबाधानिरर्गलः ॥४०७॥
आदाय [३]दात्र-परशू कृषीवल इव स्वयम् । चिच्छेद समिधो दर्भान् सो[४]ऽर्भवद् [५]दभ्रबुद्धिकः ॥४०८॥
स चक्रे [६]धर्मशकटीमर्गिदीपानदत्त च । [७]घुणदाह-पतङ्गादिपातपातकनिर्भयः ॥४०९॥
अतिथीनामिव सदा काकादीनां दुरात्मनाम् । पिण्डदानं स विदधे भोजनस्याऽऽदितोऽपि हि ॥४१०॥
आनर्च च ववन्दे च देववद् गाः[८] स गोनि[९]भः । न्यग्रोध-पिप्पला-[१०]ऽरिष्टप्रभृतीनंह्रिपानपि ॥४११॥
[११]संपूतरैश्च पानीयैः सिषेच स महीरुहान् । पानीयशाला बिभराञ्चकार स पदे पदे ॥४१२॥
इत्यादिकं धर्मबुद्ध्या विदधान स मुग्धधीः । कालं ललङ्के भूयांसमायासफलजीवितः ॥४१३॥
अपरेद्युर्विमानस्थं स गच्छन्तं विहायसा । विद्याधरं ददर्शैकं महर्द्धिकं[१२]मिवाऽमरम् ॥४१४॥
फलेन तपसोऽमुष्येदृग् भूयासं भवान्तरे । इत्यकार्षीन्निदानं स क्रमेणाऽऽप च [१३]पञ्चताम् ॥४१५॥
ततश्च**मरचञ्चा**यां पुर्यां विद्याधरप्रभोः । **इन्द्राशनेः** स **आसुर्यां** पत्न्यां त्वमुदभूः सुतः ॥४१६॥
ततः [१४]प्राग्जन्मसम्बन्धात् **सुतारायां** तवाऽभवत् । स्नेहोऽयं पूर्वसंस्कारो याति जन्मशतान्यपि ॥४१७॥
**सुतारा-ऽमिततेजाश्च** तथा **श्रीविजयोऽशनिः** । संवेगं[१५] विस्मयं[१६] चेयुः प्राग्भवाकर्णनात् ततः ॥४१८॥
¶भव्यः किमस्मि यदि वा नाऽस्मीत्य**मिततेजसा** । पृष्टोऽभाषिष्ट भगवान् **बलभद्र**महामुनिः ॥४१९॥
अतो भवात् त्वं नवमे भवे क्षेत्रेऽत्र **भारते** । [१७]द्वात्रिंशद्बद्धमुकुटनृपसहस्रसेवितः ॥४२०॥
चतुर्दशमहारत्ननाथो नवनिधीश्वरः । समुद्र-**क्षुद्रहिमवन्**मेखलायाः पतिर्भुवः ॥४२१॥
सेव्यमानो **मागधाद्यै**रपि देवकुमारकैः । पञ्चमश्चक्रवर्ती त्वं महाभुज! भविष्यसि ॥४२२॥
भवे तत्र [१८]चतुःषष्टिसुरेन्द्रप्रणतक्रमः । **शान्तिनाथ** इति ख्यातः षोडशोऽर्हन् भविष्यसि ॥४२३॥
राजा **श्रीविजयो**ऽयं तु तस्मिन्नेव भवे तव । प्रथमस्तनयो भावी प्रथमो गणभृत् तथा ॥४२४॥
ततो मुनिं प्रणम्य **श्रीविजया-ऽमिततेजसौ** । नरेन्द्रौ द्वादशविधं भेजतुः श्रावकव्रतम् ॥४२५॥
¶प्रणम्याऽ**शनिघोष**स्तु **बलभद्रं** महामुनिम् । एवं विज्ञपयामास सुमना [१९]भक्तिवामनः ॥४२६॥
सर्वज्ञ! त्वन्मुखाच्छ्रुत्वा स्वदुःखं प्राग्भवोद्भवम् । मनो मम तदावेशादिदानीमपि कम्पते ॥४२७॥
भगवन्! भवदाख्याते पुरा **कपिल**जन्मनि । आर्त्तध्यानं चकाराऽहं यत् प्रियाविप्रयोगतः ॥४२८॥
[२०]नानाविधवध-च्छेद-भेदभीमासु योनिषु । उत्पद्योत्पद्य बहुशः प्राप्तवानस्मि तत्फलम् ॥४२९॥
अकामया निर्जरया जीर्णदुष्कर्मकस्ततः । कथञ्चित् प्राप्तवानस्मि मानुष्यं पूर्वजन्मनि ॥४३०॥
तत्राऽप्यभाग्यादप्राप्तजिनधर्मस्तपस्व्यहम् । बहुकष्टं स्वल्पफलं हहा! बालतपो व्यधाम् ॥४३१॥
कृत्वा निदानं तस्याऽपि तपसोऽहमिहाऽभवम् । पुर्यां **चमरचञ्चा**यां विद्याधरपतिः प्रभो! ॥४३२॥
निदानिनोऽपि तपसः परस्त्रीहरणस्य च । **महाज्वाला**महाविद्याप्रभवस्य भयस्य च ॥४३३॥
परिणामः [२१]शुभोदर्को ममाऽजनि जगद्गुरो! । शरणं यदवाप्तोऽसि सर्वदुःखविमो[२२]चन! ॥४३४॥युग्मम्॥

---

१. अङ्गारशकटिका ॥ २. ***पयोदवृष्टिपूर्तेषु*** दे. छा. मु. ॥ ३. ***दात्रपरशून्*** पाता. वा.१-२ ॥ ४. शिशुवत् ॥ ५. ***स्वल्पबुद्धिकः*** ला. मु. ॥ ६. ***धर्मशकटी-मार्गदीपा०*** ला. दे. छा. । मृतानां जन्मान्तरे तत्तल्लाभार्थं शकटी दीयते तथा तन्निमित्तं दीपदानं कुर्वन्ति ॥ ७. काष्ठकीटः ॥ ८. धेनूः ॥ ९. वृषभसदृशः ॥ १०. अरिष्टेति भाषायां 'अरीठो' ॥ ११. पूतरा जलजन्तवः 'पोरा' इति भाषायाम् । ***सपूतरैः स पानीयैः*** मु. ॥ १२. ***कमिवापरम्*** ला. छा. मु. ॥ १३. मृत्युम् ॥ १४. ***प्राग्भव०*** मु. ॥ १५. वैराग्यम् ॥ १६. ***विस्मितम्*** दे. मु. ॥ १७. ***०नृपसहस्रैश्च सेवितः*** मु. । द्वात्रिंशतः बद्धमुकुटानां नृपाणां सहस्रेण सेवितः ॥ १८. चतुःषष्ट्या सुरेन्द्रैः प्रणतौ क्रमौ चरणौ यस्य ॥ १९. भक्त्या नम्रः ॥ २०. नानाविधैः वधच्छेदभेदैर्भीमाः तासु ॥ २१. शुभ उत्तरकालो यस्य सः ॥ २२. ***विमोचनः*** मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्त्विवान्धः पुरोवर्ति जिनधर्ममसंविदन् । इयतोऽहं भवान् भ्रान्तो रक्ष रक्षाऽधुनाऽपि माम् ॥४३५॥
अतः परं क्षणोऽप्येको [1]यतिधर्मोज्झितस्य मे । मा गादिति विभोऽद्यैव दीक्षां [2]शैक्षाय देहि मे ॥४३६॥
युक्तमेतदिति प्रोच्याऽनुगृहीतोऽ**चले**न सः । [3]प्रश्रयं संश्रयन्नेवमुवाचाऽ**मिततेजसम्** ॥४३७॥
ज्वलनः [4]कर्मकक्षाणां पूज्यो **ज्वलनजट्य**यम् । धर्मः साक्षादिव जयी तव यस्य पितामहः ॥४३८॥
अयं च भगवान् धन्यस्तृणवत् त्यक्तवैभवः । तपस्तेजोभिरर्कोऽ**र्ककीर्ति**र्यस्य च ते पिता ॥४३९॥
भाविनश्चक्रिणस्तस्य भाविनश्चाऽर्हतस्तव । प्रणिपातं कुर्वतो मे न लज्जा मानिनोऽपि हि ॥४४०॥
इदं **चमरचञ्चा**यां मम राज्यममी सुताः । **अश्वघोषा**दयोऽन्यच्च त्वदीयं विद्धि [5]माऽन्यथा ॥४४१॥
इत्युदित्वा सोऽ**श्वघोषं** ज्यायांसं निजमात्मजम् । [6]क्षीरकण्ठमिवाऽक्षैप्सीदुत्सङ्गेऽ**मिततेजसः** ॥४४२॥
ततो नरेन्द्रैर्भूयोभिः सहे[7]**न्द्राशनि**नन्दनः । उपादत्त परिव्रज्याम**चलस्वामि**सन्निधौ ॥४४३॥
माता [8]**श्रीविजय**स्याऽपि तत्राऽऽगत्य **स्वयम्प्रभा** । **अचलस्वामि**पादान्ते परिव्रज्यामुपाददे ॥४४४॥
बलं नत्वाऽ**मिततेजा** राजा **श्रीविजयो**ऽपि च । **अश्वघोषा**दयश्चेयुः स्थानं निजनिजं ततः ॥४४५॥
¶आयतनेष्वार्हतेषु प्रकृष्टाष्टाहिकोत्सवान् । कुर्वाणाव[9]नणुश्रीकौ **शक्रेशाना**विवाऽनिशम् ॥४४६॥
एषणीयकल्पनीयप्रासुकैर्वस्तुभिः सदा । कृतार्थयन्तौ स्वामृद्धिं साधूनामुपढौकितैः ॥४४७॥
[10]अनेकचिन्तासन्तानग्रीष्मसन्तापितात्मनाम् । अर्तिं हरन्तावार्त्तानां [11]पूर्वानिलघनाविव ॥४४८॥
श्रुतस्कन्धरहस्यानि श्रुतानि गुरुसन्निधौ । भावयन्तौ [12]सुधीप्रष्ठावात्मगोष्ठ्या दिवानिशम् ॥४४९॥
कुतीर्थिगोष्ठीमुज्झन्तौ छायां बैभी[13]तकीमिव । कुपथ्यवत् त्यजन्तौ च व्यसनान्यखिलान्यपि ॥४५०॥
सुखान्यनुभवन्तौ च [14]क्षणे वैषयिकाण्यपि । राज्यचि[15]न्तामप्यनघां विदधानौ यथाक्षणम् ॥४५१॥
स्वे स्वे पुरेऽवतिष्ठन्तावेकत्र मनसा पुनः । कालं व्यतीयतुस्तौ **श्रीविजया-ऽमिततेजसौ** ॥४५२॥सप्तभिः कुलकम्॥
अन्येद्युर**मिततेजा**श्चैत्यान्ते [16]पौषधौकसि । [17]पौषधी विद्याधराणामाचख्यौ धर्ममार्हतम् ॥४५३॥
तदा च चारणमुनी धर्मस्येव भुजावुभौ । आजग्मतुस्तत्र चैत्ये जिनबिम्बं विवन्दिषू ॥४५४॥
[18]तावापतन्तावालोक्याऽ**मिततेजा** महीपतिः । अभ्युत्थायाऽवन्दिष्ट हृष्टोऽभीष्टावलोकनात् ॥४५५॥
तौ त्रिःप्रदक्षिणीकृत्य जिनेन्द्रं मुनिपुङ्गवौ । ववन्दाते बभाषाते इति चाऽ**मिततेजस**म् ॥४५६॥
'मराविवाऽम्भः संसारे मानुष्यमतिदुर्लभम् । तत्प्राप्तं न मुधा नेयमविवेकेन जातुचित् ॥४५७॥
जैने धर्मे विधातव्यो न प्रमादो मनागपि । जिनधर्मं विना नाऽन्यदुत्तरोत्तरकामदम्'॥४५८॥
इत्युदित्वा जग्मतुस्तौ पुनरेव विहायसा । विश्वेष्टदर्शनौ वृष्ट्वा [19]प्रावृषेण्याविवाऽम्बुदौ ॥४५९॥
¶वर्षे वर्षे चक्रतुः **श्रीविजया-ऽमिततेजसौ** । श्रीमतामर्हतां चैत्येषूच्चकैर्महिमत्रयम् ॥४६०॥
तत्र चैत्रे चाऽऽश्विने [20]चाऽष्टाहिकामहिमोत्सवौ । देवा **नन्दीश्वरे**ऽन्ये [21]तु स्वस्वचैत्येषु कुर्वते ॥४६१॥
ततश्चैत्रा-ऽऽश्विनयोस्तौ **[22]त्रैपृष्ठ्यमिततेजसौ** । स्वस्वचैत्येषु चक्राते परमष्टाहिकोत्सवम् ॥४६२॥
महिमानं तृतीयं तु [23]**सीमाद्रौ** तावशाश्वतम् । **नाभेय**चैत्ये चाऽ[24]**चल**-ज्ञानभूमौ च चक्रतुः ॥४६३॥
¶अन्येद्युर**मिततेजाः** सुमेरौ भानुमानिव । स्थितः स्वहर्म्ये [25]प्रकृतिपुरुषैः परिवारितः ॥४६४॥
तपसा शोषिताशेषमांस-शोणितसञ्चयम् । ग्रीष्मर्तुनेव संशुष्कपङ्कवारिसरोवरम् ॥४६५॥

---

१. ***जिनधर्मो०*** ता. ॥ २. शिष्याय ॥ ३. प्रणयम् ॥ ४. कर्माणि एव कक्षाणि -तृणानि तेषाम् ॥ ५. ***नाऽन्यथा*** खंता. वा.१-२ ॥ ६. क्षीरं कण्ठे यस्य क्षीरकण्ठो बालः तमिव ॥ ७. अशनिघोषः ॥ ८. ***श्रीविजयस्याऽस्य*** पा. ॥ ९. अनल्पलक्ष्मीकौ ॥ १०. अनेकासां चिन्तानां सन्तानः एव ग्रीष्मः, तेन सन्तापितः आत्मा येषां तेषाम् ॥ ११. पूर्वस्या दिशाया अनिलो-वायुः, घनो-मेघः, तत्सदृशौ तौ द्वौ ॥ १२. सुधीश्रेष्ठौ ॥ १३. बिभीतकवृक्षसम्बन्धिनीम् ॥ १४. अवसरे ॥ १५. ***चिन्तामप्यनवद्याम्*** पा., ***चिन्तामप्यनर्थाम्*** छा., ***चिन्तामप्यनर्घाम्*** ला. ॥ १६. ***पोषधौकसि*** खंता. पाता. ॥ १७. ***पोषधी*** खंता. पाता. । पौषधवान् ॥ १८. आगच्छन्तौ ॥ १९. वर्षाकालसम्बन्धिनौ ॥ २०. ***चाष्टाहिकौ महि०*** मु. ॥ २१. ***न्येद्युः*** पाता. ॥ २२. श्रीविजयः ॥ २३. वैताढ्यपर्वते ॥ २४. ***च बलज्ञानभूमौ*** खंता. पाता. वा.१-२, सं. ला. विना ॥ २५. प्रधानपुरुषैः ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

दृश्यमान[1]शिराजालमुद्वेलमिव सागरम् । [2]जीर्णवंशकटमिव [3]किटत्किटितसन्धिकम् ॥४६६॥
व्यक्तपर्शुमपि क्षामकुक्षिमप्यबिभीषणम् । दीप्यमानं तपस्तेज:-सम्पदा निरवद्यया ॥४६७॥
मासक्षपणकं कञ्चिन्मुनिं भिक्षार्थमागतम् । धर्मादर्शं ददर्शैकं [4]प्रियैकजिनदर्शन: ॥४६८॥पञ्चभि: कुलकम्॥
अभ्युत्थायाऽ**मिततेजा:** कृत्वा च त्रि:प्रदक्षिणम् । वन्दित्वा शुद्धैरन्नाद्यैस्तं मुनिं प्रत्यलाभयत् ॥४६९॥
तदा च तत्र सत्पात्रान्नादिदानप्रभावत: । वसुधाराप्रभृतीनि पञ्च दिव्यानि जज्ञिरे ॥४७०॥
धर्म्यया चेष्टयैवं **श्रीविजया-ऽमिततेजसो:** । जग्मुर्वर्षसहस्राणि भूयांसि सुखमग्नयो: ॥४७१॥
¶अन्यदा **नन्दनवने** वन्दितुं शाश्वतार्हत: । सम्भूयाऽ**मिततेज:-श्रीविजया**वीयतुर्नृपौ ॥४७२॥
शाश्वतार्हद्वन्दनां तौ कृत्वा यावत् कुतूहलात् । भ्रान्त्वा निरीक्षाञ्चक्राते **नन्दनोद्यान**भूमिकाम् ॥४७३॥
तावद् ददृशतु: स्वर्णशिलास्थौ चारणोत्तमौ । महर्षी **विपुलमति-महामत्य**भिधानकौ ॥४७४॥
मुनी प्रदक्षिणीकृत्य वन्दित्वा च नृपोत्तमौ । श्राद्धौ शुश्रुवतुर्धर्मदेशनां पुरतस्तयो: ॥४७५॥
‘सदा [5]संविधवर्त्येव मृत्युस्तेनेह देहिनाम् । पशूनां [6]सौनिकगृहेष्विव स्याज्जीवितं कियत्? ॥४७६॥
क्षणिकं [7]क्षणिकावत् तज्जानन्तोऽपि न कुर्वते । धर्मोद्यमं मानवा यत् तदहो! मोहजृम्भितम् ॥४७७॥
मोह: खलु महाशत्रुर्जन्मतो मरणावधि । [8]आत्मनीनं नृणां धर्मं मूलादपि [9]निकृन्तति ॥४७८॥
हित्वा मोहं सर्वथा तन्मर्त्यजन्मफलेच्छया । कार्यो धर्म: कथञ्चिद्धि भूय: स्याज्जन्म मानुषम्’ ॥४७९॥
इत्याकर्ण्य स्वमायुस्तावदवशिष्टमपृच्छताम् । षड्विंशतिं दिनान्यायु: शेषं चाऽऽचख्यतुर्मुनी ॥४८०॥
¶अमोघं तद्वचो ज्ञात्वा नर-विद्याधरेश्वरौ । महानुतापनिर्वेदगर्भमेवमथोचतु: ॥४८१॥
सदा निद्रालुभिरिव सदाऽऽपीतमदैरिव । सदा बाल्यवद्भिरिव सदा [10]मूर्च्छां गतैरिव ॥४८२॥
सदाऽपस्मारिभिरिव हहाऽस्माभि: प्रमादिभि: । विफलं क्षपितं जन्मा[11]ऽरण्यजातीप्रसूनवत् ॥४८३॥युग्मम्॥
¶अथ तौ चारणमुनी प्रत्यबोधयतामिति । विषादेनाऽलमद्याऽपि प्रव्रज्या युज्यते हि वाम् ॥४८४॥
अन्तेऽप्यात्ता परिव्रज्या [12]शुभप्रव्रज्यानिबन्धनम् । कौमुदी हि निशान्तेऽपि कुमुदामोदकारणम् ॥४८५॥
एवं ताभ्यां बोधितौ **श्रीविजया-ऽमिततेजसौ** । उपेयतु[13]र्निजंनिजं हर्म्यं धर्म्यक्रियोत्सुकौ ॥४८६॥
तत्र चैत्येषु चक्राते परमष्टाहिकोत्सवम् । दीना-ऽनाथादिजन्तूनां [14]ददतुश्च यथारुचि ॥४८७॥
राज्यं स्वपुत्रयोर्न्यस्योपाददाते नरेश्वरौ । ततोऽ**भिनन्दन-**[15]**जगन्नन्दन**र्ष्यो: पुरो व्रतम् ॥४८८॥
**पादपोपगमं** नामाऽनशनं तौ च चक्रतु: । तदानीं च **श्रीविजय:** सस्मार पितरं निजम् ॥४८९॥
[16]तदृद्धिमधिकां स्वां तु ऋद्धिं हीनां [17]विचिन्त्य च । भूयासं तादृगेवाऽहं निदानमिति [18]सोऽकरोत् ॥४९०॥
कृता-ऽकृतनिदानौ **श्रीविजया-ऽमिततेजसौ** । विपद्य **प्राणते** कल्पे बभूवतुरथाऽमरौ ॥४९१॥
विमाने **सुस्थितावर्ते नन्दितावर्तके** च तौ । **[19]मणिचूल-दिव्यचूल**नामानौ तस्थतु: सुखम् ॥४९२॥

अमरौ रतिसागरावगाढावायुर्विंशतिसागरो[20]पमीं तौ ।
अतिवाहयत: स्म सौख्यमग्नौ मनसा सिद्धसमीहितार्थलाभौ ॥४९३॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये पञ्चमे पर्वणि
श्री**शान्तिनाथ**देवस्य **श्रीषेणा**दि[21]भवपञ्चकवर्णनो नाम प्रथम: सर्ग: ॥

१. स्नायुसमूह: ॥ २. जीर्णवंशसमूह इव ॥ ३. किटत् किटिता एवं ध्वनिं कुर्वन्त: सन्धयो यस्य तम् ॥ ४. ***प्रिये च निजदर्शनात्*** दे. ॥ ५. समीपवर्ती ॥ ६. चाण्डालगृहेषु ॥ ७. विद्युत् ॥ ८. आत्महितम् ॥ ९. छिनत्ति ॥ १०. ***मूर्च्छांगमैरिव*** दे., ***मूर्च्छांगतैरिव*** ला. विना, खंता. पाता. वा.१-२ ॥ ११. अरण्ये उद्गतजाति(जाइ)पुष्पवत् ॥ १२. शुभगतिकारणम् ॥ १३. ***निंजं निजं*** खंता. ॥ १४. ***ददतश्च*** मु. ॥ १५. ***जगन्नन्दनयो:*** दे. पा. मु. खंता. पाता. वा.१-२ ॥ १६. तस्य पितुर्ऋद्धिम् ॥ १७. ***विचिन्तयन्*** दे. ॥ १८. ***चाऽकरोत्*** मु.; ***कारयेत्*** दे. ॥ १९. ***मणीचूल०*** खंता. पाता. वा.१-२ ॥ २०. ***सागरीपमं तौ*** मुप्र. ॥ २१. ***श्रीषेणादिकभववर्णनो नाम*** ता. छा. दे. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# द्वितीयः सर्गः ॥

इतश्च **जम्बूद्वीपे**ऽस्मिन् **प्राग्विदेह**विभूषणे । विजये **रमणीया**ख्ये [१]**सीता**या दक्षिणे तटे ॥१॥
शुभव्यूहकरी भूमेः शुभा च परमर्द्धिभिः । **शुभा**भिधाऽस्ति नगरी शुभलक्ष्मीनिकेतनम् ॥२॥
स्थैर्येणा[२]ऽत्यमरगिरिर्गाम्भीर्येणा[३]ऽतिसागरः । तस्यामासीन्नरपतिर्नाम्ना **स्तिमितसागरः** ॥३॥
तस्याऽभूतामभिभूताप्सरःसौभाग्यसम्पदौ । **वसुन्धराऽनुद्धरा** च पत्न्यौ शीलधुरन्धरे ॥४॥
च्युत्वा च **नन्दितावर्त्ता**त् स जीवोऽ**मिततेजसः** । श्रीम**द्वसुन्धरा**देव्या उदरे समवातरत् ॥५॥
चतुरश्च महास्वप्नान् सुखसुप्ता **वसुन्धरा** । स्वमुखे विशतोऽद्राक्षीद् बलजन्माभिसूचकान् ॥६॥
तदैव परमानन्दजनिताभिभवादिव । दूरं गतायां निद्रायां राज्ञी राज्ञे व्यजिज्ञपत् ॥७॥
[1]दन्ताव[४]लश्चतुर्दन्तः स्फटिकाद्रिनिभो मया । दृष्टो विशन् स्ववक्त्रान्तर[५]भ्रान्तरिव चन्द्रमाः ॥८॥
शरदभ्रमिवावर्त्य निर्मितो निर्मलद्युतिः । [2]क[६]कुद्मानुच्चककुदोऽथ गर्जन्नृजु[७]वालधिः ॥९॥
नि[3]शाकरः कराङ्कुरैर्दूर[८]दूरं प्रसारिभिः । कर्णावतंसरचनां चिन्वन्निव दिशामथ ॥१०॥
ततश्च पद्मैरुन्निद्रैर्मञ्जुगुञ्जन्मधुव्रतैः । [4][९]पूर्णं सरः शतमुखीभूय गायदिवोच्चकैः ॥११॥
स्वामिन्नमीषां स्वप्नानां फलं किमिति शंस मे । प्रष्टुमर्हो न सामान्यजनो हि स्वप्नमुत्तमम् ॥१२॥
राजाऽपि व्याजहाराथ [१०]**देवि! देव इव श्रिया** । लोकोत्तरबलो भावी बलभद्रस्तवाऽऽत्मजः ॥१३॥
निधानं रत्नगर्भेव मुक्तां वंशलतेव च । तं गर्भं धारयामास ततो देवी **वसुन्धरा** ॥१४॥
श्रीव[११]त्साङ्कं श्वेतवर्णं पूर्णावयवलक्षणम् । समये सुषुवे सूनुं महादेवी **वसुन्धरा** ॥१५॥
पुत्रस्य जन्मना तेन राजा **स्तिमितसागरः** । मुमुदे पार्व[१२]णस्येन्दोरुदयेनेव सागरः ॥१६॥
दिवसे द्वादशे प्राप्ते [१३]द्वादशादित्यतेजसः । **अपराजित** इत्याख्या तस्य सूनोर्व्यधात् पिता ॥१७॥
पश्यंश्चुम्बन् समाश्लिष्यन्नङ्के[१४] चाऽऽरोपयन् सुतम् । न व्यरंसीन्नृपो जातु प्राप्तं धनमिवाऽधनः ॥१८॥
¶इतश्च **सुस्थितावर्त्ता**ज्जीवः **श्रीविजय**स्य तु । प्रच्युत्याऽ**नुद्धरा**देव्याः कुक्षाववततार सः ॥१९॥
शयानया निशाशेषे विशन्तो वदने निजे । देव्याऽ**नुद्धर**या सप्त स्वप्ना ददृशिरे तदा ॥२०॥
तत्राऽऽदौ के[१५]श[1]रियुवा कुङ्कुमारुणकेसरः । इन्दुलेखानिभनखश्चमरोपमवा[१६]लधिः ॥२१॥
कुञ्जराभ्यां पूर्णकुम्भहस्ताभ्यां क्षीरवारिभिः । क्रियमाणाभिषेका च [2]पद्मा पद्मासनस्थिता ॥२२॥
ध्वंसमानो महाध्वान्तं दो[१७]षाऽपि जनयन्नहः । उद्दण्डतेजःप्रसरस्त्विषा[3]मधि[१८]पतिस्ततः ॥२३॥
स्वच्छस्वादुपयःपूर्णः पुण्डरीकार्चिताननः । सुवर्ण[१९]घटितः पुष्प[२०]माली [4]कुम्भस्ततोऽपि च ॥२४॥
नानाजलचराकीर्णो रत्नसम्भारभासुरः । गगनोदञ्चिकल्लोलस्ततः [5]कल्लोलिनी[२१]पतिः ॥२५॥
पञ्चवर्णमणिज्योतिःप्रसरैर्गगनाङ्गणे । वि[२२]पञ्चितेन्द्रचापश्री [6]रत्नानां सञ्चयस्ततः ॥२६॥
[7][२३]धूमध्वजश्च निर्धूमो ज्वाला[२४]पल्लविताम्बरः । दृशोः सुखकरालोकः सप्तमश्चेति सप्त ते ॥२७॥
सुप्तोत्थिता च सा देवी स्वप्नान् पत्ये शशंस तान् । विष्णुस्ते तनयो भा[२५]वीत्याख्यत् स्वप्नफलं च सः ॥२८॥
समये सुषुवे साऽथ तनयं नयनोत्सवम् । नीलोत्पलदलश्यामं देवी द्यौरिव वारिदम् ॥२९॥
**अनन्तवीर्य** इत्याख्यां महा[२६]वीर्यस्य भूपतिः । महोत्सवेन विदधेऽ**नुद्धरा**तनुजन्मनः ॥३०॥

---

१. ***शीताया*** सुप्र. ॥ २. अमरगिरिं मेरुमतिक्रान्तः ॥ ३. सागरमतिक्रान्तः; ***०र्येणाथ सागरः*** दे. मु. ॥ ४. गजः ॥ ५. मेघान्तः ॥ ६. वृषभः ॥ ७. सरलपुच्छः ॥ ८. ***दूरं दूरं*** खंता. पाता. वा. १-२ ॥ ९. ***पूर्णसरः*** खंता. ॥ १०. ***दिवि*** पाता. वा. १-२ ॥ ११. चिह्नम् ॥ १२. पूर्णिमासम्बन्धिनश्चन्द्रस्य ॥ १३. द्वादशानां आदित्यानां तेजो यस्मिन् सः - तस्य ॥ १४. उत्सङ्गे ॥ १५. ***०केसरियुवा*** खंता. ॥ १६. वालधिः पुच्छम् ॥ १७. रात्रिमपि ॥ १८. सूर्यः ॥ १९. ***सुवर्णघण्टिकः*** छा. दे. ॥ २०. पुष्पाणां मालाः सन्ति अस्य सः ॥ २१. समुद्रः ॥ २२. विस्तारिता इन्द्रधनुषः शोभा येन सः ॥ २३. अग्निः ॥ २४. ज्वालाभिः पल्लवितमङ्कुरितमम्बरं येन सः ॥ २५. ***भावीत्याख्यात्*** मु. ॥ २६. ***महावीर्यश्च*** ला. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पद्मात् पद्मे हंस इव [१]सोऽङ्कादङ्के दिवानिशम् । धात्रीणां सञ्चरन् वृद्धिमाससाद शनैः शनैः ॥३१॥
स वर्धिष्णुः क्रमाद् भ्रात्रा ज्यायसा सवया इव । रमणीयाकृती रेमे रमणीजनवीक्षितः ॥३२॥
श्वेतश्यामशरीरौ तौ भ्रेजाते भ्रातरावुभौ । एकत्र मिलितौ [२]दैवात् शरत्प्रावृड्घनाविव ॥३३॥
लीलयैव हि शास्त्राणि तौ सर्वाण्य[३]धिजग्मतुः । विद्या हि प्राग्भवाभ्यस्ता स्वयमायान्ति तादृशाम् ॥३४॥
अभ्यस्यतः स्म श[४]स्त्राणि तथा तौ गुरुसन्निधौ । यथो[५]पजीव्यविज्ञानौ गुरोरपि बभूवतुः ॥३५॥
मन्त्र-तन्त्रादिरहितं कामिनीजनकार्मणम् । प्रपेदाते यौवनं तौ श्रियो वासगृहोपमौ ॥३६॥
¶अन्येद्युश्चाऽऽययौ तत्र मुनि[६]र्नाम्ना **स्वयम्प्रभः** । [७]नानातिशयसम्पन्नस्तस्थौ चोपवने क्वचित् ॥३७॥
इतश्च निर्ययौ पुर्या राजा **स्तिमितसागरः** । [८]वाहान् वाहयितुं वाहकेल्यां तत्केलिकोविदः ॥३८॥
अशूकलान् शू[९]कलांश्च वाहयित्वा तुरङ्गमान् । स [१०]वाहकेलिरेवन्तः श्रान्तस्तद्वनमभ्यगात् ॥३९॥
[११]विश्रान्तजीमूतमिव [१२]बहुलैस्तरुणांह्रिपैः । कुल्याभिर्नि[१३]र्झरोद्गारिगिरिप्रस्थानुहारकम् ॥४०॥
[१४]तालवृन्तधरमिवाऽध्वगानां कदलीदलैः । सर्वत्र [१५]शाद्वलोर्वीकं बद्धं मरकतैरिव ॥४१॥
एला-लवङ्ग-कक्कोल-[१६]लवलीगन्धवाहिभिः । मरुद्भिः [१७]कृतसैरन्ध्रीकर्मकं शर्महारिभिः ॥४२॥
प्रविवेश तदुद्यानं भूमि[१८]ष्ठमिव नन्दनम् । राजा [१९]प्रमोदस्तिमितेक्षणः **स्तिमितसागरः** ।४३॥ [२०]चतुर्भिः कलापकम्॥
स व्यश्राम्यत् क्षणं यावदपश्यत् तावदग्रतः । अशोकमूले ध्यानस्थं तं मुनिं प्रतिमाधरम् ॥४४॥
भक्तचोल्लसितरोमाञ्चोऽतिशैत्यादिव तत्क्षणम् । तं प्रदक्षिणयामास ववन्दे च मुनिं नृपः ॥४५॥
पारयित्वा मुनिर्ध्यानं धर्मलाभाशिषं ददौ । स्वकार्यमारब्धमपि सन्तोऽन्यार्थे त्यजन्ति हि ॥४६॥
ततः **स्वयम्प्रभ**मुनिर्विदधे धर्मदेशनाम् । तैस्तैर्निदर्शनैः श्रोतुः प्रत्यक्षानुभवामिव ॥४७॥
श्रुत्वा तां देशनां राजा प्रतिबुद्धः क्षणादपि । धाम्नि गत्वाऽ**नन्तवीर्यं** निजराज्ये न्यवीविशत् ॥४८॥
कृतनिष्क्रमणोऽन**न्तवीर्ये**ण च [२१]बलेन च । उप**स्वयम्प्रभं** [२२]पर्यव्राजीत् **स्तिमितसागरः** ॥४९॥
परीषहान् [२३]सहमानो महात्मा दुःसहानपि । स सम्यक् पालयामास मूलोत्तरगुणांश्चिरम् ॥५०॥
पर्यन्तकाले मनसा [२४]श्रामण्यं स विराद्धवान् । विपद्य च समुत्पेदे **चमरेन्द्रो**ऽसुराधिपः ॥५१॥
¶**अनन्तवीर्यो**ऽप्यशिषन् मेदिनीं [२५]स**ापराजितः** । निःसीमपौरुषधनः सुरैरप्यपराजितः ॥५२॥
अन्येद्युः केनचिद् विद्याधरेण समभूत् तयोः । मैत्री पवित्रा संसर्गः सद्भिरेव सतां यतः ॥५३॥
ताभ्यां सोऽथ **महाविद्यां** विद्याधरवरो ददौ । साधयेथामिति चोपदिश्य **वैताढ्य**मभ्यगात् ॥५४॥
**बर्बरी**ति **किराती**ति नाम्नोभे चेटिके तयोः । अभूतां गीतनाट्यादिकलाकौशलशोभिते ॥५५॥
गायन्त्यावथ नृत्यन्त्यौ रम्भादिभ्योऽपि शोभनम् । रञ्जयामासतुश्चित्तं ते [२६]विष्णु-बलभद्रयोः ॥५६॥
¶आस्थानीमन्यदाऽऽस्थाय [२७]तौ लाङ्ग-गरुडध्वजौ । प्रावर्तेतां कारयितुं ताभ्यां नाटकमुत्तमम् ॥५७॥
तदानीं च च[२८]लच्चूलो [२९]वृषीपाणि-स्त्रिदण्डभृत् । [३०]साक्षसूत्र-ब्रह्मसूत्रः [३१]कौपीनी पीनकुक्षिकः ॥५८॥
श्वे[३२]तवर्णो राजहंस इव यायी विहायसा । सौवर्णपादुकान्यस्तपादो धृतकमण्डलुः ॥५९॥
सञ्चरन्नखिले लोके कलहालोककौतुकी । [३३]आस्थान्यामाययौ [३४]तस्यां **नारदो**[३५]ऽस्थैर्यपारदः ॥६०॥त्रिभिर्विशेषकम्॥

---

१. ***सोऽह्वादङ्के०*** खंता. वा.१-२॥ २. ***शरद्घन-प्रावृड्घना०*** छा. दे. मु. ॥ ३. प्रापतुः ॥ ४. ***शास्त्राणि*** पा. विना॥ ५. गुरोरपि उपजीव्यं ज्ञानं ययोस्तौ ॥ ६. ***मुनिर्नाम*** मु.॥ ७. ***ज्ञानातिशयस०*** सं.॥ ८. अश्वान्॥ ९. विपरीतान्॥ १०. अश्वक्रीडायां रेवन्तः सूर्यपुत्र इव॥ ११. विश्रान्ता जीमूता मेघा यस्मिंस्तदिव॥ १२. ***बहलैस्तरु०*** खंता.पाता. सं. ता. पा. ॥ १३. निर्झरोद्गारवद् गिरिप्रस्थं गिरिशिखरमनुहरति इति॥ १४. व्यजनम्॥ १५. शाद्वला हरिततृणवती उर्वी यस्य तत्॥ १६. ***०लवलीक्षोदवाहिभिः*** सं. ता. ला. पा. ॥ १७. कृतं सैरन्ध्र्याः दास्याः कर्म यस्य तत्॥ १८. ***श्रियो वासगृहोपमम्*** पा. ॥ १९. प्रमोदेन स्तिमिते निश्चले ईक्षणे नेत्रे यस्य सः ॥ २०. '***पञ्चभिः कुलकम्***' खंता. पाता. वा.१-२॥ २१. अपराजितेन ॥ २२. ***गत्वा पर्यव्राजीन्नरेश्वरः*** छा. दे. मु. ॥ २३. ***सहमानोऽति-महादुःस०*** मु.॥ २४. चारित्रम् ॥ २५. अपराजितेन भ्रात्रा सहितः॥ २६. अनन्तवीर्यापराजितयोः, ***बलाऽनन्तवीर्ययोः*** छा. दे. मु. ॥ २७. अपराजिता-ऽनन्तवीर्यौ ॥ २८. चलच्छिखः ॥ २९. ऋषीणामासनं वृषी॥ ३०. जपमालोपवीतसहितः ॥ ३१. गुह्याच्छादनवस्त्रखण्डवान्॥ ३२. ***श्वेतवस्त्रो*** पा. ॥ ३३. सभायाम् ॥ ३४. ***तस्य*** खंता. ता. ला. पा. ॥ ३५. अस्थिरतायां पारद इव चञ्चल इति यावत्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]राम-विष्णू **बर्बरिका-किराती**नाटकेक्षणे। व्याक्षिप्तमनसौ तं च ना[२]ऽसभाजयतामृषिम् ॥६१॥
¶कुपितो **नारदो**ऽप्येवं चिन्तयामास चेतसि। मामप्यभ्यागतं ना[३]ऽभ्युदस्थातां दुर्मदाविमौ ॥६२॥
नाटकं बह्वमंसातामाश्चेटीमात्रयोरिमे। [४]आयातमितरजनवन् मां पुनः पश्यतोऽपि न ॥६३॥
प्रे[५]ष्ठचेटिकयोश्चे[६]टप्रष्ठयोरिव तद् द्रुतम्। अवज्ञायाः फलमहं दर्शयिष्यामि सम्प्रति ॥६४॥
चिन्तयित्वेति सहसा **नारदः** [७]पवमानवत्॥ जगाम **वैताढ्य**गिरौ **दमितारि**नृपान्तिके ॥६५॥
विद्याधरेन्द्रो **दमितारि**रपीन्द्र इव श्रि[८]या। विद्याधरधराधीशैः शतशः परिवारितः ॥६६॥
सिंहासनं पादुके च त्यक्त्वा सद्यः ससम्भ्रमः। अभ्युत्तस्थौ समायाते **नारदे** दूरतोऽपि हि ॥६७॥[युग्मम्]
[९]तत्तु सिंहासनं तस्मै **दमितारि**रदापयत्। प्रतिपत्तिस्तादृशानामृषीणां कियतीयती ? ॥६८॥
[१०]तत्तु सिंहासनं त्यक्त्वा स्वबृष्यां स उपाविशत्। भक्तिमेव हि काङ्क्षन्ति न हि वस्तूनि तादृशाः ॥६९॥
तं **नारदो** जगादैवं त्रिखण्डविजयेश्वर!। विद्याधराधिनाथाय स्वस्ति तुभ्यं महौजसे ॥७०॥
राज्ये राष्ट्रे पुरे गोत्रे सम्बन्धिषु परिग्रहे। अन्यत्रापि [११]भवद्गृह्ये सर्वत्र कुशलं नृप! ? ॥७१॥
**दमितारि**रदोऽवादीत् सर्वत्र कुशलं मम। विशेषतोऽतः परं तु मुने! भवदनुग्रहात् ॥७२॥
भवन्तं किं तु पृच्छामि स्वच्छन्दं व्योमयायिना। अदृष्टपूर्वं किं दृष्टमाश्चर्यं भवता क्वचित्? ॥७३॥
सिद्धो मनोरथो मेऽसौ चिन्तयन्निति **नारदः**। [१२]हर्षोत्फुल्लकपोलाक्षो **दमितारि**मदोऽवदत् ॥७४॥
अद्यैव दृष्टमस्माभिः सुरलोकेऽप्यसम्भवि। आश्चर्यमेकं धरणीपरिभ्रमणजं फलम् ॥७५॥
¶**शुभा**ऽऽख्यायां महापुर्यां क्रीडयाऽद्य गतोऽस्म्यहम्। आस्थानस्थमपश्यं चाऽ**नन्तवीर्यं** महीपतिम् ॥७६॥
तस्याऽग्रतो **बर्बरिका-किराती**भ्यां च नाटकम्। तत्राऽभिनीयमानं स्म पश्याम्याश्चर्यकारणम् ॥७७॥
उभौ लोकौ सञ्चरामि द्यां [१३]भुवं च कुतूहलात्। न च क्वचिन् मया दृष्टमीदृग्नाटकमद्भुतम् ॥ ७८॥
**शक्रो** यथा हि **सौधर्मे** विजयार्धेऽत्र भूपते!। आश्चर्यभूतवस्तूनां तथा त्वमसि भाजनम् ॥७९॥
किं विद्याभिः? किमोजोभिः? किं तेजोभिः? किमाज्ञया?। किं राज्येन? न यद्यत्र तदानयसि नाटकम् ॥॥८०॥
[१४]इत्युक्त्वा **नारद**मुनिरु[१५]प्तबीज इवाऽवनौ। तत्र स्वार्थं सङ्क्रमय्य नभसा रभसा ययौ ॥८१॥
¶त्रिखण्डविजयैश्वर्यगर्वितः प्राहिणोदथ। **दमितारि**नृपो दूतम**पराजित**बन्धवे ॥८२॥
**शुभा**ख्यां स पुरीं गत्वाऽ**नन्तवीर्यं** सहाग्रजम्। [१६]नमस्कृत्येत्यभाषिष्ट विशिष्टवचनक्रमः ॥८३॥
विजयार्धेऽत्र यत्किञ्चिदद्भुतं वस्तु जायते। तत्सर्वं राजराजस्य **दमितारे**[१७]रसंशयम् ॥८४॥
उभे नाटककारिण्यौ प्रसिद्धे तव चेटिके। **बर्बरी** च **किराती** च प्रेष्येतां **दमितार**ये ॥८५॥
स्वाधीनं तस्य चेट्यादि सर्वराज्यस्य यः पतिः। दीयमाने हि सदने किं भवत्यश्वकः पृथक्? ॥८६॥
जगादाऽ**नन्तवीर्यो**ऽपि गच्छ त्वं दूत! सम्प्रति। आलोच्य किञ्चिदचिरात् प्रेषयिष्यामि चेटिके ॥८७॥
इत्युक्तो विष्णुना दूतो मुदितोऽभ्येत्य सत्वरम्। प्रयोजनं कृतप्रायं शशंस **दमितार**ये ॥८८॥
कुण्डाविव च्छन्नवह्नी गूढामर्षावितश्च तौ। मन्त्रयामासतु[१८]रुभाव**पराजित-शार्ङ्गिणौ** ॥८९॥
अस्मानाकाशयानेन विद्यासिद्धिबलेन च। एवमाज्ञापयति स नाऽस्मत् तस्याऽधिकं परम् ॥९०॥
विद्याधरेण सुहृदा विद्या दत्ताः पुरा हि याः। साम्प्रतं साधयावस्तास्ततः को नौ तपस्व्यसौ? ॥९१॥
इत्यचिन्तयतां यावदुभौ तौ भ्रातरौ [१९]रहः। **प्रज्ञप्त्याद्यास्तावदागुर्विद्याः** [२०]सङ्केतिता इव ॥९२॥

---

१. अपराजिताऽनन्तवीर्यौ ॥ २. सत्कारं नाऽकुरुताम् ; *नाऽसम्भावयतामृषिम्* खंता. ॥ ३. *नैवाभ्युदस्थातां मदादिमौ* दे. छा. मु. ॥ ४. *आयातं हीनजनवत्* ला. छा. मु. ॥ ५. प्रेष्ठे अतिप्रिये चेट्यौ दास्यौ ययोः ॥ ६. दासाग्रेसरयोः ॥ ७. पवन इव ॥ ८. *स्वश्रिया* मु. ॥ ९. *तत्र* ता. विना ॥ १०. *तत्र* ता. छा. दे. मु. ॥ ११. भवत्पक्षे ॥ १२. हर्षेण उत्फुल्लौ कपोलौ अक्षिणी च यस्य ॥ १३. *भूमिं* सं. मु. ॥ १४. *इत्युदित्वा* मु. ॥ १५. उप्तं बीजं कलिरूपं येन ॥ १६. *नमश्चक्रे चाभाषिष्ट* ता. दे. मु. ॥ १७. *प्रेष्यतां* खंता. पाता. वा.१-२ विना ॥ १८. *०तुरपराजितानन्तशक्तिकौ* सं. ता. पा. ला. खंता. पाता. वा.१-२ ॥ १९. रहसि-एकान्ते ॥ २०. कृतसङ्केता इव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तडित्तेज:समोद्योता नानालङ्कारभूषिता: । विचित्रदिव्यवसना जजल्पु: प्राञ्जलीति ता: ॥९३॥
ता एता: स्मो वयं विद्या या: सिषाधयिषू[१] युवाम् । पूर्वजन्मनि सिद्धत्वा[२]दिदानीमप्युपस्थिता: ॥९४॥
युष्मद्वपुषि सङ्क्रान्तिं मन्त्रास्त्र[३] इव देवता: । करिष्यामो महाभागौ! समादिशतमद्य न: ॥९५॥
एवमस्त्विति तद्वाचा तदात्मत्वं तदङ्गयो: । विद्या: प्रपेदिरे पूर्वापराब्ध्योरिव निम्नगा:[४] ॥९६॥
निसर्गतोऽपि बलिनौ विद्यासिद्ध्या तया पुन: । तावभूतामभ्यधिकं सिंहौ संवर्मिता[५]विव ॥९७॥
पूजां तासां च विद्यानां गन्धैर्माल्यैर्मनोरमै: । चक्रतुस्तौ न लङ्घन्ते पूज्यपूजां विवेकिन: ॥९८॥
अत्राऽन्तरे पुनर्दूतो निर्दिष्टो **दमितारि**णा । वेगादुपेत्य साक्षेपं[६] पर्यभाषिष्ट ताविति ॥९९॥
भो भो! युवाभ्यां युवभ्यां[७] खड्गिभ्यामिव सम्प्रति । अज्ञानत्वात् समारब्ध: कोऽयं स्वामिनि विप्लव:?[८] ॥१००॥
चेटिके प्रेषयिष्याव इत्युक्त्वा प्रेषिते न यत् । मुमूर्षू किं युवां मूर्खौ! ? ज्ञात: सो[९]ऽमर्षणो[१०] न किम्? ॥१०१॥
कृत्या[११]द्वयमिदं वां हि चेटिव्याजादुपस्थितम् । समूलौ वामनुन्मूल्य मन्ये न खलु यास्यति ॥१०२॥
मा युवां बहुदौ भूतं[१२] दत्तमद्यैव चेटिके । ग्रहीष्यत्यन्यथा स्वामी ते[१३] च राज्यश्रियं च वाम् ॥१०३॥
गूढकोप: प्रभविष्णुरपि[१४] विष्णुस्तत: सुधी: । स्मितज्योत्स्नास्तबकिताधर: साम्नेत्यु[१५]वाच तम् ॥१०४॥
रत्नैर्महार्घैर्द्रविणै:[१६] प्रचुरै: कुञ्जरैर्हयै: । प्राभृतीकृत्य सन्तोष्यो **दमितारि**नरेश्वर: ॥१०५॥
**दमितारि:** स चेदाभ्यां चेटीभ्यामपि तुष्यति । ते गृहीत्वा तदद्यैव गच्छ त्वमपरेऽहनि ॥१०६॥
इत्युक्तो विष्णुना दत्तावासे[१७] दूतो जगाम स: । मन्यमानो दूत्यकलां[१८] कृतकृत्यामिवाऽऽत्मन: ॥१०७॥
¶गृहभारमिव स्तम्भेष्वनोभारमिवोक्षसु[१९] । आरोपयामासतुस्तौ राज्यभारं स्वमन्त्रिषु[२०] ॥१०८॥
कीदृक्षो **दमितारि:**? स द्रष्टव्य इति कौतुकात् । तौ विद्यया **बर्बरिका-किरात्य**[२१]भवतां तत: ॥१०९॥
अद्याऽ**पराजिता-ऽनन्तवीर्याभ्यां दमितारये** । प्रहिते स्व[२२] इति गत्वा पुंश्चेट्यौ दूतमूचतु: ॥११०॥
चेटिकाभ्यां समं ताभ्यां दूत: प्रमुदितो ययौ । उपेत्य **वैताढ्य**गिरौ **दमितारिं** व्यजिज्ञपत् ॥१११॥
असुराश्चमरस्येव **शक्र**स्येव दिवौकस: । पन्नगा **धरण**[२३]स्येव गरुडस्येव पक्षिण: ॥११२॥
**रमणीय**स्य विजयस्याऽर्धेऽत्र वसुधाभुज: । न लङ्घयन्ति भवत: शासनं दुष्टशासन! ॥११३॥युग्मम्[२४]॥
विशेषतोऽ**पराजिता-ऽनन्तवीर्यौ** नतौ त्वयि । सदा धत्तस्तवैवाज्ञां किरीटमिव मूर्धनि ॥११४॥
इमे च ते **बर्बरिका-किरात्यौ** नाम चेटिके । नटीरत्ने प्राभृते ते ताभ्यां सद्यो ममाऽर्पिते ॥११५॥
**दमितारि**श्च ते चेट्यावपश्यत् सौम्यया दृशा । गुण: श्रुतो जनश्रुत्याऽप्यनुरागाय तद्विदाम् ॥११६॥
**दमितारि**रथाऽऽदिक्षन्नाटकाभिनयाय ते । अपूर्वस्य दिदृक्षा हि कालक्षेपं क्षमेत न ॥११७॥
¶ततश्च ते नटीपात्रे रङ्गे[२५] विविशतु: क्षणात् । प्रत्याहारादिकैरङ्गै: पूर्वरङ्गं च चक्रतु: ॥११८॥
रङ्गाचार्यो रङ्गपूजां कुसुमाञ्जलिभिर्व्यधात् । यथादिशं न्यषीदच्च गायन्यादिपरिच्छद:[२६] ॥११९॥
नान्दीपाठं नटश्चक्रे नान्दीवादनपूर्वकम् । प्रस्तावनामङ्गयुक्तां नान्द्यन्तेऽभिनिनाय च ॥१२०॥
विचित्रनेपथ्यधरो नेपथ्ये गायनीजन: । जगौ च **जातिरागा**[२७]ढ्यां पात्रप्रावेशिकीं **ध्रुवा**[२८]म् ॥१२१॥
प्रकृत्यवस्था-सन्ध्यङ्गसन्धिसम्बन्धबन्धुरम् । प्रचक्रमेऽथाऽभिनेतुं नाटकं रससागरम् ॥१२२॥
सम्प्रयोगैरथैकान्तसुखपीयूषसिन्धुभि: । विप्रयोगैरपि तत्तद्दु:खावस्थानिबन्धनै: ॥१२३॥
तत्तत्सङ्घट्टनो[२९]पायैरपायपरिहारत: । क्वाऽप्यभूत् स्मरसाम्राज्यसन्धिविग्रहकल्पनम् ॥१२४॥युग्मम् ॥

१. साधयितुमिच्छू ॥ २. ***सिद्धास्तदिदानी०*** मु. ॥ ३. यथा मन्त्रास्त्रे देवता: सङ्क्रमणं कुर्वन्ति तथा ॥ ४. नद्य: ॥ ५. वर्मणा-कवचेन सम्बद्धौ ॥ ६. सतिरस्कारं यथा तथा ॥ ७. ***युवभ्यां युवाभ्यां*** पाता., ***खड्गिभ्यां खड्गिभ्यामिव*** दे. ॥ ८. गण्डक: 'गेण्डो' इति भाषायाम् ॥ ९. अवमान: ॥ १०. रुष्ट: ॥ ११. राक्षसी ॥ १२. ***०भूतां०*** खंता. पाता. वा.१-२ ॥ १३. चेट्यौ ॥ १४. समर्थोऽपि ॥ १५. सामवाक्येन ॥ १६. धनै: ॥ १७. ***दत्तावासो*** दे. ॥ १८. ***दूतकलां*** दे. मु. ॥ १९. वृषभेषु शकटभारमिव ॥ २०. ***सुमन्त्रिषु*** दे. मु. ॥ २१. बर्बरिका च किराती च बर्बरिकाकिरात्यौ अबर्बरिकाकिरात्यौ बर्बरिका-किरात्यौ अभवतामिति बर्बरिकाकिरात्यभवताम् ॥ २२. ***स्त इति*** मुं. ॥ २३. धरणेन्द्रस्य ॥ २४. खंता. पाता. वा.१-२ प्रतिषु नास्ति ॥ २५. रङ्गभूमौ ॥ २६. गायिकादिपरिवार: ॥ २७. ***जातिरागाद्यां पात्रप्रावेशिकां*** दे. ता. छा. मु. ॥ २८. गीतिम् ॥ २९. ***सङ्घटनोपायै०*** खंता. पाता. वा.१-२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]तुन्दिलैर्दन्तुरैः खञ्जैः कुब्जैश्चिपिटनासिकैः । विकीर्णकेशैः [2]खल्वाटैः काणै[3]र्व्यङ्गैरथाऽपरैः ॥१२५॥

अपानघण्टैर्भस्माङ्गैः कक्षा-नासिकवादकैः । कर्ण-भ्रूनर्तकैरन्यजनभाषानुवादकैः ॥१२६॥

विदूषक-विटप्रायैः सद्यः कपटमुग्धकैः । ग्रामीणवदहास्यन्त छेकाः[4] पौरा अपि क्वचित् ॥१२७॥त्रिभिर्विशेषकम्॥

आकाशभाषणैर्दैवोपालम्भैरश्रुमोक्षणैः । अस्थानयाचनैर्भूमिलुठनै रोदनैरपि ॥१२८॥

[5]भृगुपात-[6]तरूद्बन्ध-जल-वह्निप्रवेशनैः । विषादिभक्षणैः शस्त्रघातैर्हृत्ताडनैरपि ॥१२९॥

ऋद्धिप्रणाशेष्टवधादिजन्मभिरनेकशः । आर्द्रीकृता नृशंसा अप्यमुञ्चन्ताऽश्रु कुत्रचित् ॥१३०॥त्रिभिर्विशेषकम्॥

[7]दन्तौष्ठपीडनैर्नेत्ररागैर्भृकुटिबन्धनैः । गण्डस्फुरण-[8]हस्ताग्रनिष्पेषैर्भूमिपाटनैः ॥१३१॥

आयुधाकर्षणै [9]रक्ताकर्षणैर्वेगधावनैः । [10]संप्रहारैः प्रहारैश्च गात्रकम्पा-ऽश्रुमोक्षणैः ॥१३२॥

दारापहार-भृत्या[11]ऽधिक्षेपप्रभृतिजन्मभिः । क्वाऽपि कम्पमवाप्यन्त नरा धीरतरा अपि ॥१३३॥त्रिभिर्विशेषकम्॥

गाम्भीर्य-[12]धैर्य-शौ[13]ण्डीर्य-वै[14]शारद्यैस्तथाऽपरैः । अवदाततरैस्तैस्तैस्त्यागप्रभृतिभिर्गुणैः ॥१३४॥

[15]द्विड्वर्तिविक्रम-नयाध्यवसायादिजन्मभिः । निसर्गभीरवोऽप्यासन् सद्यः सञ्जातपौरुषाः ॥१३५॥युग्मम्॥

[16]तालुकण्ठोष्ठशोषेण चलनेत्रनिरीक्षणैः । करकम्पैः [17]स्वरभेदैर्वै[18]वर्ण्यैर्ऋजुलेक्षणैः ॥१३६॥

प्रेतादिविकृतालोक-तत्स्वरश्रवणादिजैः । अनीयत त्रासदशां क्षणं क्वाऽपि सभाजनः ॥१३७॥युग्मम्॥

अङ्गसङ्कोच-[19]हृल्लास-नासा-मुखविकूणनैः । निष्ठीवनैरोष्ठदलमोटनप्रमुखैरपि ॥१३८॥

[20]पूति-वान्ति-व्रण-कृमिप्रेक्षणश्रवणादिजैः । नि[21]तान्तमहृणीयन्त क्षणं सामाजिका अपि ॥१३९॥युग्मम्॥

विस्तारणैर्लोचनानां निर्निमेषनिरीक्षणैः । स्वेदा-ऽश्रु-पुलकोद्भेदैः साधुवादादिकैरपि ॥१४०॥

दिव्यालोकेप्सितप्राप्तीन्द्रजालप्रेक्षणादिजैः । विस्माय्यन्ते स्म सहसा क्वचनाऽपि सभासदः ॥१४१॥युग्मम्॥

मूलोत्तर[22]गुर्णैर्ध्यानैरध्यात्मग्रन्थचिन्तनैः । सद्गुरूपासनैर्देवपूजाद्यैरितरैरपि ॥१४२॥

वैराग्य-संसारभय-तत्त्वज्ञानादिजन्मभिः । शममीयुः क्वचिदपि वि[23]षयास्वादगृध्नवः ॥१४३॥युग्मम्॥

यथा यथाऽभ्यनीयन्त रसाः सर्वे [24]कुशीलवैः । सामाजिकजनः सर्वस्तन्मयोऽभूत् तथा तथा ॥१४४॥

वाचिकाद्यैरभिनयैर्यथाव[25]दुपपादितैः । अलक्ष्यन्ताऽभिनेतारोऽप्यभिनेया इवाऽऽगताः ॥१४५॥

तं नाटकविधिं प्रेक्ष्य नृपः प्रे[26]क्षावदग्रणीः । संसाररत्नभूतं तच्चेटीद्वयममन्यत ॥१४६॥

¶अथ नाटकशिक्षायै [27]मायानट्योस्तयोर्नृपः । पुत्रीं समर्पयामास नामतः **कनकश्रियम्** ॥१४७॥

राकाशशाङ्कवदनां [28]त्रस्यदेणीविलोचनाम् । पक्वबिम्बाधरां कम्बुकण्ठीं बिसलताभुजाम् ॥१४८॥

स्वर्णकुम्भोपमकुचां वज्रमध्यकृशोदरीम् । वापीगम्भीरनाभीकां पुलिनाभकटीतटाम् ॥१४९॥

करभोरूं मृगीजङ्घां पद्मोपमकरक्रमाम् । लावण्यजलमग्नाङ्गीं मधुरालापशालिनीम् ॥१५०॥

[29]शिरीषसुकुमाराङ्गीं कुमारीं प्राप्तयौवनाम् । दृष्ट्वा कपटचेट्यौ ते मधुरालापपूर्वकम् ॥१५१॥

भूयो भूयो दर्शयित्वा शिक्षयामासतुर्भृशम् । तन्नाटकं साभिनयं सर्वं निर्व[30]हणावधि ॥१५२॥पञ्चभिः कुलकम् ॥

मध्ये मध्ये नाटकस्या**ऽनन्तवीर्यं** महाभुजम् । ते चेट्यौ जगतुः कामं रूप-शौर्यादिभिर्गुणैः ॥१५३॥

**कनकश्री**रथाऽपृच्छत् क एष पुरुषोत्तमः? । हे युवत्यौ! युवाभ्यां यो गीयतेऽत्र क्षणे क्षणे ॥१५४॥

¶अथा**ऽपराजितो** मायाचेटी स्मित्वेदमब्रवीत् । शुभानने! **शुभे**त्यस्ति विजयेऽस्मिन् महापुरी ॥१५५॥

---

१. बृहत्कुक्षिभिः ॥ २. अकेशमस्तकैः ॥ ३. विकलाङ्गैः ॥ ४. चतुराः ॥ ५. गिरिशिखरात् पतनम् ॥ ६. पाशबन्धः ॥ ७. ***दन्तोष्ठपीडनैर्नेत्र०*** ता. दे. छा. पा. ॥ ८. करतलपेषणैः ॥ ९. शोणितकर्षणैः ॥ १०. युद्धैः ॥ ११. तिरस्कार ॥ १२. ***स्थैर्य०*** खंता. पाता. वा.१-२ ॥ १३. शौर्यम् ॥ १४. पाण्डित्यैः ॥ १५. शत्रुवर्तिपराक्रमनयाध्यवसायादिजन्मभिः ॥ १६. ***तालुकण्ठोष्ठशोषेण*** पा. छा. सं. दे. पाता. ॥ १७. ***स्वरभेदैर्वैवर्ण्यैर्ध्वजलोक्षणैः*** ता. छा. मु.; ***०वैवर्ण्यैर्नृजुलोक्षणैः*** खंता.; ***०वैवर्ण्यैर्नृजलोक्षणैः*** पाता. वा.१-२ ॥ १८. निस्तेजोभिः ॥ १९. हृदयस्य खेदः ॥ २०. दुर्गन्धिः ॥ २१. ***नितान्तमघृणीयन्त*** मु.; ***नितान्तमगर्हणीयन्त*** ला.; घृणामन्वभूवन् ॥ २२. ***गुणध्यानै०*** मु. ॥ २३. विषयास्वादलोलुपाः ॥ २४. नटैः ॥ २५. ***०दुपपालितैः*** मु. ॥ २६. बुद्धिमत्सु अग्रणीः ॥ २७. ***मायाचेट्योस्त०*** पा. दे. मु. ॥ २८. त्रस्यन्ती या मृगी तत्सदृशे लोचने यस्याः सा ॥ २९. ***शिरीषसुकुमारां तां*** खंता. पाता. वा.१-२, दे. मु. विना च ॥ ३०. निर्वहणः नाटकस्य सन्धिः स अवधिर्यस्मिन् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यां च नाम्ना **स्तिमितसागरो** गुणसागरः। दिवाकरः प्रतापेन बभूव वसुधाधवः ॥१५६॥
जज्ञे महात्मनस्तस्य तनयो विनयैकभूः। ज्येष्ठोऽ**पराजितो** नाम [1]विपक्षैरपराजितः ॥१५७॥
कनिष्ठोऽ**नन्तवीर्यो**ऽभूदकनिष्ठोऽमलैर्गुणैः। रूपेण जितकन्दर्पो द्विड्दर्पग्रन्थिदारणः ॥१५८॥
स [2]वदान्यः [3]सत्यसन्धः शरणागतवत्सलः। नागराजायतभुजः शिलापृथुभुजान्तरः ॥१५९॥
वासागारं श्रिय इव भुवोऽप्याधारभूरिव। आश्रिताम्भोजमार्तण्डो दाक्षिण्यक्षीरसागरः ॥१६०॥
कियद्वा वर्ण्यतेऽस्माभिः स महात्माऽल्पबुद्धिभिः। तत्तुल्यो नाऽपरः कोऽपि सुरासुरनरेष्वपि ॥१६१॥त्रिभिर्विशेषकम्॥
**कनकश्री**स्तमाकर्ण्य दृष्ट्वेव पुरतः स्थितम्। वाताहतेव सरसी बभूवो[4]त्कलिकावती ॥१६२॥
रोमाञ्चव्याजतो भिन्ना साक्षात् स्मरशरैरिव। [5]पाञ्चालिकेव निःस्पन्दा सा दध्याविति चेतसि ॥१६३॥
धन्यः स [6]विषयो धन्या सा [7]पूर्धन्या च सा प्रजा। धन्यः स स्त्रीजनोऽ**नन्तवीर्यो** येषां स नायकः ॥१६४॥
[8]कुमुद्वतीर्मोदयते दूरस्थोऽपि करैः शशी। [9]शिखण्डिनीस्ताण्डवयत्यम्बरस्थोऽपि वारिदः ॥१६५॥
उपपन्नमिदं तेषां [10]हन्त दैवानुकूल्यतः। **अनन्तवीर्ये** मयि च कीदृग् दैवं भविष्यति? ॥१६६॥
दूरे तस्य [11]पतीभावो द्रष्टव्योऽपि कथं नु सः?। सिद्धौ मनोरथस्याऽस्य सखाऽपि खलु दुर्लभः ॥१६७॥
[12]चिन्ताप्रपन्नां तामेवं विलोक्य **कनकश्रियम्**। इङ्गिताकारविदुर एवमूचेऽ**पराजितः** ॥१६८॥
श्रुत्वाऽ**पराजित**स्याऽनुजन्मानं मन्मुखादपि। किं ताम्यसि सशल्येव? मुग्धे! किं त्वं(तं) दिदृक्षसे? ॥१६९॥
**कनकश्री**रश्रुमुखी पद्मिनीव तुषारिणी। दीनदीनैवमवदत् स्वरभेदक्षताक्षरम् ॥१७०॥
[13]आदित्सेयं [14]करेणेन्दौ पद्व्यां जिगमिषा दिवि। दोर्भ्यां तितीर्षा जलधौ दिदृक्षा तत्र मे खलु ॥१७१॥
**शुभा**धिनाथः सुभगः स मया मन्दभाग्यया। कथं दृग्गोचरीकार्यः कष्टं को मे मनोरथः? ॥१७२॥
ज्येष्ठा [15]पुनर्न्युवाचैवं भद्रे! तं चेद्दिदृक्षसे। तन्मुग्धेऽलं विषादेन दर्शयाम्यद्य तं तव ॥१७३॥
विद्याशक्त्याऽ**नन्तवीर्यं** तं च तं चाऽ**पराजितम्**। अत्राऽऽनये वन इव वसन्त-मलयानिलौ ॥१७४॥
**कनकश्री**र्बभाषेऽथ सर्वं सम्भवति त्वयि। [16]पारिपार्श्विक्यसि यतस्तयोर्गुणसमुद्रयोः ॥१७५॥
मन्येऽनुकूलं मे दैवमेवं यदभिभाषसे। त्वन्मुखेऽवातरन्नूनं काऽपि मे कुलदेवता ॥१७६॥
[17]अनुतिष्ठाऽऽत्मनो वाचमधुनैव कलावति!। तादृशां परिवारोऽपि मिथ्या न खलु भाषते ॥१७७॥
¶अथाऽऽविश्चक्रतुः स्वं स्वं रूपं [18]रूपमनोभवौ। सद्योऽ**पराजिता**ऽ**नन्तवीर्यौ** तुष्टाविवाऽमरौ ॥१७८॥
ऊचेऽ**पराजितो** भद्रे! कीर्तितो यो मयाऽद्य सः। मद्भ्राताऽ**नन्तवीर्यो**ऽयं [19]संवदत्येष वा न हि? ॥१७९॥
स्तोकमेव मयाऽऽख्यातमस्य रूपादिवैभवम्। वाचामगोचरस्तत्तु गोचरीकुरु चक्षुषोः ॥१८०॥
आवेग-विस्मय-व्रीडा-प्रमोद-मद-चापलैः। तद्दर्शनाद् **दमितारि**कन्या युगपदानशे ॥१८१॥
**अपराजित**पादानां सद्यः श्वशुरमानिनी। उत्तरीयेण [20]नीरङ्गीं तन्वङ्गी विदधेऽथ सा ॥१८२॥
¶आसीद**नन्तवीर्यो**ऽपि स्मरमेघमहोदयात्। रोमाञ्चदन्तुरवपुः कदम्ब इव पुष्पितः ॥१८३॥
उत्सृज्य सहजं मानं [21]मन्दाक्षं च मृगेक्षणा। स्वयं [22]दूतित्वमालम्ब्याऽ**नन्तवीर्य**मदोऽवदत् ॥१८४॥
**वैताढ्य**पर्वतः [23]क्वाऽयं? सा **शुभा**ख्या पुरी क्व च?। **नारदा**च्च क्व तातस्य तच्चेटीनाटकश्रुतिः? ॥१८५॥
युष्मत्पार्श्वे च तातेन तच्चेटीयाचनं क्व च?। चेटिकारूपधरयोर्युवयोः क्वेह वा[24]ऽऽगतिः? ॥१८६॥
क्व वा नाटकशिक्षायै युवयोरर्पिताऽस्म्यहम्?। आर्यपुत्र! तवाऽऽर्येण क्व वा त्वद्[25]गुणकीर्तनम्? ॥१८७॥

१. शत्रुभिः ॥ २. दानशीलः ॥ ३. सत्यप्रतिज्ञः ॥ ४. उत्कण्ठिता ॥ ५. पुत्तलिका(पूतलीति भाषायाम्) ॥ ६. देशः ॥ ७. पुरी ॥ ८. *कुमुद्वतीं मोद०* मु. ॥ ९. मयूरीः ताण्डववती करोति, नर्तयतीत्यर्थः ॥ १०. *हितदैवा०* पाता. वा.१-२ ॥ ११. *पतिभावो* मु. ॥ १२. *चिन्तां प्रपन्नां* मु. ॥ १३. आदातुमिच्छा ॥ १४. *करेणेन्दोः* छा. ॥ १५. *ज्येष्ठा तु नत्यु०* पाता. ॥ १६. सेविका ॥ १७. पालय ॥ १८. रूपेण कामदेवौ ॥ १९. *संवदत्यथवा* ता. पा. खंता., *संवदत्यन्यथा* छा. दे. । मिलति ॥ २०. 'लाज' इति भाषायाम् ॥ २१. लज्जाम् ॥ २२. *दूतीत्व०* खंता. पाता. वा.१-२ ॥ २३. *काऽऽर्य!* दे. मु. ॥ २४. आगमनम् ॥ २५. वर्णनम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्व वा युवाभ्यां सद्योऽपि साक्षात्करणमात्मनः? । एतत्सर्वमसम्भाव्यं [1]मद्भाग्योपचयादभूत् ॥१८८॥
नाट्याचार्यो यथा त्वं मे त्वमेव हि पतिस्तथा । अतः परं ते [2]मद्धत्या न चेत् पासि मनोभवात् ॥१८९॥
गृहीतं श्रुतमात्रेण त्वया मे हृदयं पुरा । गृहाण पाणिमधुना प्रसीदाऽनुगृहाण माम् ॥१९०॥
**वैताढ्य**पर्वतेऽमुष्मिन् दक्षिणोत्तरयोरपि । श्रेण्योर्विद्याधरेन्द्राणां कुमारेषु युवस्वपि ॥१९१॥
भवादृशवराभावादभावो मे [3]भवेद् ध्रुवम् । दि[4]ष्ट्या प्राप्तोऽसि [5]जीवातुर्जीवलोकैकचन्द्रमाः ॥१९२॥युग्मम्॥
**अनन्तवीर्यो** व्याहार्षीत् सुभ्रु! यद्येवमिच्छसि । उत्तिष्ठ तर्हि गच्छामः सुभगे! नगरीं **शुभाम्** ॥१९३॥
**कनकश्री**रप्यवोचत् त्वं प्राणानामपीशिषे । मम किं तु पिता दुष्टो विद्यासामर्थ्यदुर्मदः ॥१९४॥
करिष्यति महानर्थमनर्थनिलयो ह्ययम् । एकाकिनौ भवन्तौ तु निरस्त्रौ बलिनावपि ॥१९५॥युग्मम्॥
स्मित्वोचेऽ**नन्तवीर्यो**ऽपि मा भैषीर[6]यि कातरे! । कतरस्ते पिता [7]सर्वाभिसार्यप्याऽऽर्यसङ्गरे? ॥१९६॥
अन्यो वा पृष्ठतः कोऽपि युयुत्सुर्यः समेष्यति । तं मृत्युं [8]प्रापयिष्यामः प्रिये! निःशङ्कमेहि तत् ॥१९७॥
¶इत्युक्ताऽ**नन्तवीर्ये**ण निजदोर्वीर्यशालिना । प्रतस्थे **कनकश्रीः** श्रीरिव साक्षात् स्वयंवरा ॥१९८॥
**अनन्तवीर्यो**ऽप्यु[9]द्बाहुः प्रासाद इव सध्वजः । इत्यूचेऽ[10]त्युच्चकैर्मेघघोषगम्भीरया गिरा ॥१९९॥
भो! भोः सर्वे पुराध्यक्षाः! सेनाधिपतयश्च भोः! । भो! मन्त्रिणः! कुमारा भो! भोः [11]सामन्ता! भटाश्च भोः! ॥२००॥
अपरेऽपि **दमितारे**र्ये केचित् पक्षपातिनः । ते सर्वेऽ[12]वहितीभूय शृण्वन्तु वचनं मम ॥२०१॥[युग्मम्]
असाव**नन्तवीर्यो**ऽहम**पराजित**[13]राजितः । **दमितारे**र्दुहितरं स्ववेश्मनि नयाम्यमूम् ॥२०२॥
अपवादो न दातव्यो नीता चौरिकयेत्यहो! नोपेक्षध्वं निरीक्षध्वं स्वशक्तिं शस्त्रधारिणः ॥२०३॥
एवमुद्घोषणां कृत्वा सप्रियः **सापराजितः** । वैक्रियेण विमानेनाऽ**नन्तवीर्य**श्चचाल खे ॥२०४॥
¶**दमितारि**स्तु तच्छ्रुत्वा कोऽसाववनिगोचरः । मर्तुकामस्त[14]पस्वीति वदन्नित्यादिशद्भटान् ॥२०५॥
सभ्रातरममुं क्षुद्रं हत्वा धृत्वाऽथवा द्रुतम् । समानयध्वं तनयामस्मिन् फलतु दुर्नयः ॥२०६॥
तेनैवमुक्ताः सुभटाः स्फुटमु[15]द्भटवृत्तयः । अधावन्तो[16]दस्तशस्त्रा उद्दन्ता इव दन्तिनः ॥२०७॥
तदाऽ**पराजिता**-ऽ**नन्तवीर्य**योर्वीर्यशालिनोः । **सीर-शार्ङ्ग**प्रभृतीनि दिव्यरत्नानि जज्ञिरे ॥२०८॥
**दमितारिभटास्ते** प्रा[17]ग् नैकशो दमितारयः । प्र[18]जह्रुर्युगपच्छस्त्रैर्धाराभिरिव वारिदाः ॥२०९॥
[19]ततोऽचलितयोः क्रोधात् पुरुषव्याघ्रयोस्तयोः । अनायासरणेनापि त्रेसुस्ते हरिणा इव ॥२१०॥
श्रुत्वा पलायितांस्तांस्तु **दमितारि**रमर्षणः । अचालीद् गगनं कुर्वन् शस्त्रैर्वनमिवो[20]द्द्रुमम् ॥२११॥
अरे! युध्यस्व युध्यस्व तिष्ठ तिष्ठाऽ[21]ऽपताऽऽपत । मुञ्च मुञ्चाऽऽयुधमिदं मरिष्यसि मरिष्यसि ॥२१२॥
एष रक्षामि ते प्राणान् मुञ्चेमां स्वामिकन्यकाम् । इत्यादि सुभटालापान् विकटाटोपभीषणान् ॥२१३॥
आकर्ण्य कर्णकटुकान् **कनकश्री**रजायत । आर्यपुत्राऽऽर्यपुत्रेति जल्पन्ती मोहविह्वला ॥२१४॥त्रिभिर्विशेषकम्॥
[22]स्माऽऽहेत्य**नन्तवीर्य**स्तामम्बरे पि[23]तृडम्बरात् । किं मुह्यसि मुधा मुग्धे! मण्डू[24]करटितादिव? ॥२१५॥
**दमितारिं** ससैन्यं त्वं मैना[25]कमिव वज्रिणा । त्रास्यमानं मया पश्य हन्यमानमथाऽपि वा ॥२१६॥
एवमाश्वास्य **कनकश्रियं शार्ङ्गधरो** यु[26]धि । पञ्चा[27]स्यस्तर्जित इव ववले **सापराजितः** ॥२१७॥
¶कोटिशो वैरिकु[28]ट्टाका **दमितारे**र्महाभटाः । **शार्ङ्गिणं** वेष्टया[29]मासुः प्रदीपं शलभा इव ॥२१८॥
ततश्चाऽ**नन्तवीर्यो**ऽपि स्थैर्यमेरुरमर्षणः । ससर्ज विद्यया सद्यस्तच्चमूद्विगुणां चमूम् ॥२१९॥

१. वृद्धेः ॥ २. मम हत्यापापम् ॥ ३. ***भवे ध्रुवम्*** मु. ॥ ४. भाग्येन ॥ ५. जीवनौषधम् ॥ ६. अयि इति कोमलामन्त्रणे ॥ ७. सर्वसैन्यसमेतोऽपि अपराजितयुद्धे ॥ ८. ***प्रापयिष्यामि*** पा. ॥ ९. बाहू ऊर्ध्वीकृत्य ॥ १०. ***०ऽनुच्चकै०*** खंता. ॥ ११. ***सामन्तभटाश्च भो!*** मु. ॥ १२. सावधानीभूय ॥ १३. अपराजितेन राजितः सहितः ॥ १४. रङ्कः ॥ १५. उद्भटा उद्धता वृत्तिर्येषां ते ॥ १६. शस्त्राण्युदस्यन्तः-उच्छालयन्तः ॥ १७. ***प्रागनेकशो*** ता. मु. विना ॥ १८. प्रहारं चक्रुः ॥ १९. ***ततो वलितयोः*** सं. छा. पा. ला. ॥ २०. उदधिका उच्चा वा द्रुमा यस्मिन् तत्, द्रुमविहीनमित्यर्थः ॥ २१. आगच्छाऽऽगच्छ ॥ २२. आह स्म इत्यन्वयः ॥ २३. पितुराडम्बरात् ॥ २४. भेकरुदनमिव ॥ २५. मैनाकनामानं पर्वतम् ॥ २६. ***युधे*** खंता., ला. मु. विना ॥ २७. सिंहः ॥ २८. वैरिनाशकाः ॥ २९. ***०मासुरनन्ता शलभा इव*** सं. ता. पा. ला. खंता. पाता. वा.१-२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रावर्त्तन्त तया योद्धुं **दमितारे**स्ततो भटाः। असृक्पङ्कार्द्रवपुषः सधातव इवाऽद्रयः ॥२२०॥
मम प्रेयानयं भूयात् कबन्धो यस्य ताण्डवी[1]। कुन्तप्रोतः[2] सरति यस्तस्मै पत्येऽहमुत्सुका ॥२२१॥
योऽयं वर्णयति घ्नन्तं स कदा रंस्यते मया। मुखे विशन्तं यः कुन्तं दन्तैर्धत्ते पतिः स मे ॥२२२॥
य एष करिणः स्कन्धमारोहति स मे धवः। भग्नास्त्रो यः शिरस्केन[3] योद्धा तस्याऽस्मि किङ्करी ॥२२३॥
उत्खातदन्तिदन्तेन यः शस्त्री सोऽस्तु मे प्रियः। इत्यम्बरे सुरस्त्रीणामनुरागोक्तयोऽभवन् ॥२२४॥चतुर्भिः कलापकम्[4]॥
**दमितारे**रपि सैन्या विद्याशक्त्याऽतिदुर्मदाः[5]। न मनागप्यभज्यन्त समरे भद्रदन्तिवत् ॥२२५॥
पाञ्चजन्यं ततो जन्य[6]नाटकाभिनये नटः। वादयामास नादेन रोदः[7]कुक्षिम्भरिं हरिः[8] ॥२२६॥
तेन विष्णोर्जगज्जिष्णोः शङ्खनादेन मूर्च्छिताः। फेनायमाना[9] न्यपतन् सापस्मारा इव द्विषः ॥२२७॥
¶ततश्च रथमारुह्य **दमितारि**नृपः स्वयम्। युयुधेऽ**नन्तवीर्येण** शस्त्रैरस्त्रैश्च दैवतैः ॥२२८॥
शार्ङ्गिणं दुर्जयं ज्ञात्वा जनकः **कनकश्रियः**। सस्मार चक्रं विधुरे[10] प्रियमित्रमिवोद्धुरम्[11] ॥२२९॥
**दमितारेः** करे तच्च ज्वालाशतसमाकुलम्। समापपात रभसादौर्वानल[12] इवाऽर्णवे ॥२३०॥
**दमितारि**रथाऽवादीदरे! तिष्ठन् मरिष्यसि। अद्यापि गच्छ मत्पुत्रीं मुक्त्वा मुक्तोऽसि दुर्मते! ॥२३१॥
**अनन्तवीर्यो**ऽपीत्यूचे त्वच्चक्रं त्वदसूनपि। त्वत्कन्यकामिवाऽऽदाय व्रजिष्याम्यन्यथा न तु ॥२३२॥
एवमुक्तो **दमितारि**र्ज्वलन् ज्वलन[13]वद्रुषा। भ्रमयित्वाऽमुचच्चक्रम**पराजित**बन्धवे ॥२३३॥
चक्रतुम्बाग्रघातेन न्यपतन्मूर्च्छितो हरिः। द्राक्[14] सुप्त इव चोत्तस्थाव**पराजित**वीजितः ॥२३४॥
तदेव चक्रं पार्श्वस्थमाददे शार्ङ्ग[15]पाणिना। शतारमपि तत्पाणौ सहस्रारमभूच्च तत् ॥२३५॥
सोऽर्धचक्र[16]धरः स्मित्वेत्यूचे प्रत्यर्धचक्रिणम्[17]। **कनकश्री**पितेति त्वं मुक्तोऽस्यद्याऽपि गच्छ भोः! ॥२३६॥
अवदद् **दमितारि**[18]स्तं मदस्त्रेण किमस्त्र्यसि[19]?। उत्तमर्ण[20]धनेनेवाऽधमर्णो[21] धनवानरे! ॥२३७॥
चक्रं तन्मुञ्च मुञ्चेदं मुञ्च चाऽद्याऽपि पौरुषम्। **अनन्तवीर्य**! मद्वीर्यवार्धौ वा लोष्टुतां[22] व्रज ॥२३८॥
इत्युक्तोऽ**नन्तवीर्य**स्तं चक्रं क्रुद्धान्तकोपमः[23]। मुमोच **दमितारे**श्च चकर्ता[24]ऽम्बुजवच्छिरः ॥२३९॥
उपर्य**नन्तवीर्य**स्य तद्वीर्यमुदिताः सुराः। पञ्चवर्णानि कुसुमान्यवर्षन्निति चोचिरे ॥२४०॥
¶भो भो विद्याधरनृपाः! सर्वे शृण्वन्तु तत्पराः। विष्णुरेषोऽ**नन्तवीर्यो** बलोऽयम**पराजितः** ॥२४१॥
एतत्पादानुपाध्वं[25] तन्निवर्त्तध्वं रणाजिरात्[26]। यस्योदयः स वन्द्यो हि यथा हीन्दुर्यथा रविः ॥२४२॥
ततो विद्याधरेन्द्रास्ते सर्वे नमितमौलयः। बलदेव-वासुदेवौ शरण्यौ[27] शरणं ययुः ॥२४३॥
सह विद्याधरेन्द्रैस्तैः साग्रजः सप्रियो हरिः[28]। प्रचचाल विमानस्थः **शुभां** वरपुरीं प्रति ॥२४४॥
गच्छन्नुप[29]**कनकगिरि**र्यूचे विद्याधरैर्हरिः[30]। आशातनां मा स्म कार्षीः श्रीमतामर्हतामिह ॥२४५॥
सन्त्यत्र **कनकगिरौ** जिनचैत्यान्यनेकशः। यथावत् तानि वन्दित्वा वन्द्यपादा व्रजन्त्वितः ॥२४६॥
विमानादवतीर्याऽथ शार्ङ्गभृत् सपरिच्छदः। दृशां जनितशैत्यानि तानि चैत्यान्यवन्दत ॥२४७॥
कौतुकात् तं गिरिं पश्यन् सोऽपश्यदथ चैकतः। वर्षोपवासप्रतिमास्थितं **कीर्तिधरं** मुनिम् ॥२४८॥
कर्मणां[31] घातिनां घातात् तदैवोत्पन्नकेवलम्। देवारब्धमहिमानं तं दृष्ट्वा मुमुदे हरिः[32] ॥२४९॥
त्रिश्च प्रदक्षिणीकृत्य वन्दित्वाऽग्रे निषद्य च। शुश्राव देशनां तस्मात् प्राञ्जलिः सपरिच्छदः ॥२५०॥

---

१. नृत्यवान् ॥ २. कुन्तप्रोतः 'भाला' इत्यभिधे शस्त्रे प्रोतः ॥ ३. *०शिरष्केण* खंता. पाता. वा.१-२ ॥ ४. खंता. पाता. वा.१-२ प्रतिषु न ॥ ५. ***विद्याशक्त्याऽपि*** मु. ॥ ६. जन्यं युद्धं तदेव नाटकं तस्याभिनये ॥ ७. रोदसोः स्वर्ग-पृथ्व्योः कुक्षिं मध्यभागं बिभर्त्ति तम् ॥ ८. अनन्तवीर्यः ॥ ९. फेनं(फीण) निष्कासयन्तः ॥ १०. दुःखे ॥ ११. सहायकम् ॥ १२. वडवानलः ॥ १३. अग्निवत् ॥ १४. ***द्राक् च सुप्त इवोत्तस्था०*** खंता. पाता. वा.१-२ ॥ १५. अनन्तवीर्येण ॥ १६. वासुदेवानन्तवीर्यः ॥ १७. प्रतिवासुदेवदमितारिम् ॥ १८. ***दमितारिस्त्वम्*** सं. ला. पा. ॥ १९. अस्त्री-अस्त्रवान् असि ॥ २०. उत्तमर्णः 'लेणदार' इति ॥ २१. अधमर्णः 'देवादार' इति ॥ २२. ***लोष्टताम्*** ला. मु. । 'ढेफुं' इति भाषा ॥ २३. क्रुद्धयमोपमः ॥ २४. चिच्छेद ॥ २५. सेवध्वम् ॥ २६. रणाङ्गणात् ॥ २७. ***शरण्यं शरणं*** मु. ॥२८. अनन्तवीर्यः ॥ २९. मेरुसमीपे ॥ ३०. अनन्तवीर्यः ॥ ३१. ज्ञानावरणीय-दर्शनावरणीय-मोहनीयान्तराय-कर्मणाम्-आत्मनो ज्ञानादि-मूलगुणघातकानाम् ॥ ३२. अनन्तवीर्यः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशनान्ते **कनकश्री**र्नत्वा प्रपच्छ तं मुनिम् । कुतः पितृवधो बन्धुविरहश्च ममेदृशः? ॥२५१॥

¶आख्यन् मुनिरिति द्वीपे **धातकीखण्ड**नामनि । अस्ति [१]प्राग्**भरते शङ्खपुर**ग्रामो महर्द्धिकः ॥२५२॥

**श्रीदत्ता**नाम तत्राऽऽसीन्नारी दारिद्र्यविद्रुता । [२]परौकःकर्मकरणजीविकाधृतजीविता ॥२५३॥

[३]कण्डनं पेषणं वारिवहनं गृहमार्जनम् । गृहलेपनमित्यादि सकलं दिवसं व्यधात् ॥२५४॥

लङ्घिते सकलेऽप्यह्नि समपद्यत भोजनम् । आलोकनमिवोलूक्यास्तस्या ही मन्दभाग्यता ॥२५५॥

अपरेद्युर्भ्रमन्ती साऽऽसादयामास पर्वतम् । [४]सुपर्वपर्वतमिव श्रिया **श्रीपर्वता**भिधम् ॥२५६॥

तत्राऽमलशिलासीनं गुप्तित्रयपवित्रितम् । दुःसहैरपराभूतं भूतैरिव परीषहैः ॥२५७॥

अखण्डपञ्चसमितिं [५]मितेतरतपःश्रियम् । निःसङ्गं निर्ममं शान्तं [६]समकाञ्चनले[७]ष्टुकम् ॥२५८॥

शुक्लध्याने वर्तमानं शैलशृङ्गमिव स्थिरम् । नामतः **सत्ययशसं** से[८]क्षाञ्चक्रे महामुनिम् ॥२५९॥त्रिभिर्विशेषकम्॥

कल्पद्रुममिव प्रेक्ष्य सा प्रीता प्रणनाम तम् । धर्मलाभं ददौ तस्यै सोऽपि श्रे[९]योद्रुदोहदम् ॥२६०॥

**श्रीदत्ता**ऽप्यभ्यधत्तैवमीदृग्दौःस्थ्यानुमानतः । पूर्वजन्मन्यहं धर्मं न ह्यकार्षं मनागपि ॥२६१॥

नित्यं दुष्कर्मदग्धाया मम त्वद्धर्मलाभगीः । मेघवृष्टिरिव ग्रीष्मतप्तायाः [१०]सानुमद्भुवः ॥२६२॥

यद्यप्यस्मिन्नयोग्याऽहं मन्दभाग्या तथाऽपि हि । अमोघं ते वच इति श्रेयसे किञ्चिदादिश ॥२६३॥

यथा भवान्तरे भूयो नेदृशी स्यां तथा कुरु । त्वादृशे त्रातरि [११]त्रातः! किं किं न स्यान् [१२]मनीषितम्? ॥२६४॥

¶इत्याकर्ण्य वचस्तस्या योग्यतां च विचार्य सः । **धर्मचक्रवालं** नाम [१३]तपोऽनुष्ठानमादिशत् ॥२६५॥

द्वे त्रिरात्रे चतुर्थानि सप्तत्रिंशदिह त्वया । विधातव्यानि गुर्वर्हदाराधननिलीनया ॥२६६॥

प्रभावात् तपसोऽमुष्य न हि भूयो भविष्यति । अपत्यमिव वायस्यास्तवेदृक्षं भवान्तरम् ॥२६७॥

तदाऽऽदृत्य वचो [१४]वाचंयमाग्र्यं तं प्रणम्य च । सा जगाम निजं ग्रामं तपस्तच्चोपचक्रमे ॥२६८॥

तत्प्रभावात् पारणके स्वप्नेऽप्यप्राप्तपूर्वकम् । सा प्राप भोजनं स्वादु [१५]सुदशानाटकामुखम् ॥२६९॥

ततः प्रभृति सा [१६]कर्मवेतनं चाऽढ्यवेश्मसु । द्विगुणं त्रिगुणं चा[१७]ऽऽप वस्त्राणि प्रवराणि च ॥२७०॥

एवं [१८]सकिञ्चना किञ्चिच्छ्**रीदत्ता** समजायत । पूजां देव-गुरूणां च यथाशक्ति ततोऽकृत ॥२७१॥

तत्सद्मनोऽपरेद्युश्च जीर्णो वातादिताडितः । [१९]कुड्यैकदेशो न्यपतल्लेभे स्वर्णादिकं च सा ॥२७२॥

तपःसमाप्तौ च तयोद्यापनं विदधे महत् । चैत्यपूजा-साधु-साध्वीप्रतिलाभादिपूर्वकम् ॥२७३॥

तपोऽन्तपारणदिने यावद्दिग्वीक्षणं व्यधात् । [२०]मासक्षपणकं तावत् **सुव्रतर्षिं** ददर्श सा ॥२७४॥

धन्यंमन्या ततः सा च [२१]प्रासुकान्नादिना स्वयम् । तं प्रत्यलाभयन्नत्वा धर्मं प्रपच्छ चाऽऽर्हतम् ॥२७५॥

¶मुनिरप्यब्रवीदेवमेष [२२]कल्पो न नः शुभे! । यद्भिक्षार्थं गतैः क्वाऽपि क्रियते धर्मदेशना ॥२७६॥

यदि ते [२३]धर्मशुश्रूषा [२४]तद्वसतौ गतस्य मे । आगच्छेः समये भद्रे! जल्पित्वेति जगाम सा ॥२७७॥

कृत्वा च पारणं तस्य स्वाध्यायं कुर्वतो मुनेः । वन्दनार्थं पौरलोकः **श्रीदत्ता** च समाययौ ॥२७८॥

वन्दित्वा च यथास्थानमुपविष्टेषु तेषु सः । एवं प्रसन्नया वाचा विदधे धर्मदेशनाम् ॥२७९॥

'संसारे चतुरशीतियोनि[२५]लक्षमटन् [२६]भवी । दैवादाप्नोति मानुष्यमन्धः स्थानमिवेप्सितम् ॥२८०॥

तत्राऽपि सर्वधर्मेषु ज्योतिष्केष्विव चन्द्रमाः । [२७]प्रधानः खलु सर्वज्ञोपज्ञ[२८]धर्मः सुदुर्लभः ॥२८१॥

तस्मात् तत्रैव कर्तव्यो यत्नः सम्यक्त्वपूर्वकम् । संसारी येन संसारवार्धिं तरति लीलया ' ॥२८२॥

---

१. पूर्वभरते ॥ २. परगृहस्य कर्मकरणेन या आजीविका, तया धृतं जीवितं यया सा ॥ ३. खण्डनम् ॥ ४. देवपर्वतं मेरुमिव ॥ ५. अमिता तपःश्रीर्यस्य तम् ॥ ६. समौ काञ्चनलेष्टुकौ यस्य तम् ॥ ७. ***लोष्टुकम्*** ला. दे. मु. ॥ ८. ***वीक्षाञ्चक्रे*** खंता. पाता. वा.१-२ सं. ला. पा. ॥ ९. श्रेय एव द्रुर्वृक्षस्तस्य दोहदम् ॥ १०. पर्वतभुवः ॥ ११. हे रक्षक! ॥ १२. इष्टम् ॥ १३. ***तपोऽनुष्ठातुमा०*** मु. ॥ १४. मुनिश्रेष्ठम् ॥ १५. ***सुदशानाटिकामुखम्*** खंता.; सुदशा शोभनावस्था एव नाटकं तस्य आमुखं प्रस्तावनाम् ॥ १६. कर्माणि कृत्वा याऽवाप्यते वृत्तिः 'पगार' इति भाषायाम् ॥ १७. ***चापद्*** खंता. ला. पा. दे. छा., ***चापि*** पाता. ॥ १८. किञ्चन-द्रव्यसहिता ॥ १९. भित्तिभागः ॥ २०. मासोपवासिनम् ॥ २१. निर्दोषान्नादिना ॥ २२. आचारः ॥ २३. धर्मश्रवणेच्छा ॥ २४. उपाश्रये ॥ २५. ***०लक्षामटन्*** मु. ॥ २६. संसारिजीवः; ***भवान्*** मु. ॥ २७. ***प्रधानम्*** ला. पा. छा. ॥ २८. ***धर्मं सुदुर्लभम्*** ता. ला. पा. छा.; सर्वज्ञप्रवर्तितो धर्मः ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**श्रीदत्ता**ऽ[१]पि नमस्कृत्य पुरः **सुव्रत**पादयोः। सर्वज्ञोक्तं प्रत्यपादि धर्मं सम्यक्त्वपूर्वकम् ॥२८३॥
वन्दित्वा **सुव्रतमुनिं** पौरलोकोऽखिलोऽपि सः। **श्रीदत्ता** च प्रमुदिता ययौ निजनिकेतनम् ॥२८४॥
कियन्तमपि कालं सा तं धर्मं प्रत्यपालयत्। तस्याः [२]कर्मपरीणामाद्विकल्पश्चेत्यजायत ॥२८५॥
यदिदं जिनधर्मस्य परमं कीर्त्यते फलम्। तत् किं भविष्यति न वा ममेति न हि वेद्म्यहम् ॥२८६॥
तादृग्गुरूपदेशेऽपि वि[३]चिकित्सां यदीदृशीम्। **श्री**[४]**दत्ता**ऽकल्पयत तद् दुर्वारा भवितव्यता ॥२८७॥
अन्यदा **सत्ययशसं** वन्दितुं प्र[५]स्थिताऽन्तरे। सा विद्याधरयुगलं विमानस्थितमैक्षत ॥२८८॥
तद्रूपमोहिता सा तु समेत्य निजवेश्मनि। विचिकित्सामनालोच्याऽप्रतिक्रम्य व्यपद्यत ॥२८९॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् **प्राग्विदेह**स्य मण्डने। विजये **रमणीये**ऽस्ति **वैताढ्यो** नाम पर्वतः ॥२९०॥
तत्राऽस्ति नगरं शक्रनगर्या इव सोदरम्। शि[६]वानां मन्दिरीभूतं नामतः **शिवमन्दिरम्** ॥२९१॥
तत्र चाऽऽसीन्महर्द्धीनां विद्याधरमहीभुजाम्। पू[७]ज्यांह्रिः **कनकपूज्य** इति नाम्ना महीपतिः ॥२९२॥
**वायुवेगा**भिधानायां तस्य पत्न्यामसावहम्। अभूवं तनयः **कीर्तिधर** इत्यभिधानतः ॥२९३॥
अभूद**निलवेगे**ति पत्नी मेऽन्तःपुराग्रणीः। तयैकदा सुप्तया तु त्रिस्वप्नी ददृशे निशि ॥२९४॥
कैलासधवलो हस्ती गर्जन् मेघ इवो[८]क्षराट्। निधिकुम्भोपमः कुम्भः स्वप्नास्तेऽमी त्रयः क्रमात् ॥२९५॥
तत्कालोत्फुल्लवदना पद्मिनीव निशात्यये। महादेवी महास्वप्नानाख्याति स्म ममाऽग्रतः ॥२९६॥
त्रिखण्डविजयस्वामी चक्रवर्त्यर्द्धवैभवः। भावी भवत्यास्तनय इति [९]व्याख्यातवानहम् ॥२९७॥
काले च सुषुवे सूनुं सा देवी देवसन्निभम्। सर्वलक्षणसम्पूर्णं रत्नमा[१०]करभूरिव ॥२९८॥
गर्भस्थेऽस्मिन् विशेषेण दमिता विद्विषो मया। तेन तस्य **दमितारि**रित्यभिख्यामहं व्यधात् ॥२९९॥
क्रमेण ववृधे सोऽथ जग्राह च कलाः क्रमात्। क्रमेण च प्रत्यपादि यौवनं रूपपावनम् ॥३००॥
¶अन्यदाऽन्यत्र विजये विजयी विहरन् विभुः। [११]महात्मा समवासार्षीच्**छान्तिः** शान्तिकरो जिनः ॥३०१॥
तं वन्दित्वा निषण्णोऽहमश्रौषं धर्मदेशनाम्। सद्यो विरक्तो राज्ये च **दमितारिं** न्यवीविशम् ॥३०२॥
**श्रीशान्ति**पादमूले च प्राव्राजिषमहं ततः। ग्रहणाऽऽसेवनारूपे शिक्षे चाऽग्राहिषं तदा ॥३०३॥
अकार्षं वार्षिकीमत्र पर्वते प्रतिमामहम्। घातिकर्मक्षयादस्मि चाऽद्यैवोत्पन्नकेवलः ॥३०४॥
उत्पन्नचक्रो विजितत्रिखण्डविजयः स च। **दमितारि**रभूद्राजा प्रतिविष्णुर्महाबलः ॥३०५॥
प्रियायां **मदिरा**नाम्न्यां **दमितारे**र्महीभुजः। **श्रीदत्ता**जीव [१२]एव त्वं **कनक**[१३]**श्रीः** सुताऽभवः ॥३०६॥
विचिकित्सामनालोच्याऽप्रतिक्रम्य च यन्मृता। तद्दोषाद्बन्धुविरहः ईदृक् पितृवधश्च ते ॥३०७॥
कलङ्कः खलु धर्मस्य स्तोकोऽप्यत्यन्तदुःखदः। विषमल्पमपि [१४]प्सातं प्राणनाशाय [१५]जायते ॥३०८॥
ईदृग्भूयो न तत्कार्यमीदृग्भूयो यथा भवेत्। किन्तु सम्यक्त्वमादेयं [१६]पञ्चदोषीविवर्जितम् ॥३०९॥
**कनकश्री**स्ततः सद्यो वैराग्यावेगधारिणी। इत्थं विज्ञपयामास [१७]चक्रि-लाङ्गलधारिणौ ॥३१०॥
दुष्कृतेनाऽल्पकेनाऽपि यद्येवं दुःखमाप्यते। तदलं कामभोगैर्मे दुष्कृतोत्पत्तिखानिभिः ॥३११॥
स्तोकेनाऽपि हि रन्ध्रेण यथा मज्जति नौर्जले। दुष्कर्मणाऽल्पकेनाऽपि तथा दुःखेषु ही जनः ॥३१२॥
तदा दारिद्र्यभीतायाः कुर्वत्यास्तादृशं तपः। विचिकित्सा कुतोऽप्यासीदहो! मे मन्दभाग्यता! ॥३१३॥
[१८]सम्प्रत्यैश्वर्यमत्ताया मम [१९]भोगजुषः खलु। कियती विचिकित्सैका यत् स्युर्दोषान्तराण्यपि ॥३१४॥

१. ***श्रीदत्ताऽथ*** खंता. पाता. वा.१-२ ॥ २. ***कर्मपरिणामाद् विकल्पः स्वमनस्यभूत्*** मु. ॥ ३. सन्देहम् ॥ ४. ***श्रीदत्ताकल्पयत् तदा दुर्वारा*** ता. दे. मु. ॥ ५. ***प्रस्थिताम्बरे*** दे. छा. मु. ॥ ६. कल्याणानाम् ॥ ७. ***पूज्याङ्घ्रिपद्मः कनकपूज्य इति महीपतिः*** पा. ॥ ८. वृषभः ॥ ९. ***चाऽऽख्यातवानहम्*** मु. ॥ १०. खनेर्भूमिरिव। ११. ***महार्यः*** पा. ॥ १२. ***एष त्वं०*** वा.१-२ ॥ १३. ***कनकश्रीसुताऽभवः*** खंता. विना ॥ १४. भक्षितम् ॥ १५. ***कल्पते*** वा.१-२ ॥ १६. ***पञ्चदोषैर्वि०*** पा. वा.१-२। शङ्का-काङ्क्षा-विचिकित्सा-कुलिङ्गप्रशंसा-मिथ्यादृष्टिसंस्तवरूपदोषपञ्चकविवर्जितम् ॥ १७. अनन्तवीर्या-ऽपराजितौ ॥ १८. ***सम्प्रत्यैश्वर्यमग्नाया*** ला. ॥ १९.भोगान् सेवमानायाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् प्रसद्याऽनुमन्येथां प्रव्रज्याग्रहणाय माम् । [1]ईदक्छलपरादस्माद्भीताऽस्मि भवराक्षसात् ॥३१५॥
विस्मयस्मेरनयनौ ततस्तावित्यवोचताम् । भवत्विदमविघ्नं ते गुरुपादप्रसादतः ॥३१६॥
[2]किन्त्विदानीं **शुभां** यामो नगरीं [3]धीगरीयसि! । यथा तत्र महद्धर्या ते कुर्मो निष्क्रमणोत्सवम् ॥३१७॥
**स्वयम्प्रभ**जिनेद्रान्ते गृह्णीयास्तत्र चाऽनघे! । संसारवारितरणे [4]तरकाण्डोपमं व्रतम् ॥३१८॥
तथेति [5]प्रतिपेदानां तामादायाऽथ भक्तितः । तं च नत्वा महर्षिं तौ जग्मतुर्नगरीं **शुभाम्** ॥३१९॥
¶तत्राऽऽदौ प्रेषितैर्वीरै[6] [7]रणाय **दमितारिणा** । **अनन्तसेनं** पुत्रं तं [8]युध्यमानमपश्यताम् ॥३२०॥
**अनन्तवीर्य**पुत्रं तं [9]क्रोडं श्वभिरिवाऽऽवृतम् । निरीक्ष्य भ्रमयन् सीरं [10]सीरी कोपादधावत ॥३२१॥
**दमितारि**भटास्तेऽपि [11]बलवातासहिष्णवः । [12]तूलपूला इव ययुः कान्दिशीका दिशोदिशम् ॥३२२॥
प्राविशत् सपरीवारः स्वपुरीं तां [13]**जनार्दनः** । शुभेऽहन्य[14]र्धचक्रित्वेऽभ्यषिच्यत नरेश्वरैः ॥३२३॥
¶इमां धरित्रीं विहरन् स्वामी तत्राऽपरे दिने । उपेत्य समवासार्षीत् **स्वयम्प्रभ**जिनेश्वरः ॥३२४॥
श्री**स्वयम्प्रभ**नाथस्याऽऽ[15]गत्या [16]दिष्ट्याऽद्य वर्धसे । इत्यूचिरे**ऽनन्तवीर्यं** ततश्च द्वारपालकाः ॥३२५॥
[17]सार्धां द्वादश [18]रूप्यस्य कोटीस्तेभ्यः प्रदाय सः । साग्रजः स**कनकश्रीः** स्वामिनं वन्दितुं ययौ ॥३२६॥
**स्वयम्प्रभो**ऽपि भगवान् भव्यानुग्रहकाम्यया । सर्वभाषानुगामिन्या विदधे देशनां गिरा ॥३२७॥
**कनकश्री**र्जगादैवं वेश्मन्याऽऽपृच्छ्य शार्ङ्गिणम् । आगमिष्यामि दीक्षार्थं कृपां कुरु जगद्गुरो! ॥३२८॥
न प्रमादो विधातव्य इति तीर्थकृतोदिता । **कनकश्री**र्हरिः सीरी जग्मुर्निजनिकेतनम् ॥३२९॥
साऽनुज्ञाप्य हरिं [19]तेन कृतनिष्क्रमणोत्सवा । ऋद्ध्या महत्या तत्रैत्य प्राव्राजीदन्तिके प्रभोः ॥३३०॥
तप **एकावलिं मुक्तावलिं** च **कनकावलिम्** । **भद्रं** च **सर्वतोभद्र**मित्याद्याचरति स्म सा ॥३३१॥
[20]शुक्लध्यानाग्निनिर्दग्धघातिकर्मैधसोऽन्यदा । अम्लानं केवलज्ञानं तस्याः समुदपद्यत ॥३३२॥
[21]भवोपग्राहिकर्माणि क्षपयित्वा क्रमेण च । **कनकश्री**राससाद पदं [22]तदपुनर्भवम् ॥३३३॥
¶भुञ्जानौ विविधान् भोगान् शार्ङ्गसीरधरावपि । गमयामासतुः कालं सुखमग्नौ सुराविव ॥३३४॥
आसीच्च [23]बलदेवस्य दयिता **विरता**ऽऽह्वया । तस्याः कुक्षौ समुत्पेदे **सुमति**र्नाम कन्यका ॥३३५॥
बाल्यतोऽपि हि सर्वज्ञोपज्ञधर्मानुरागिणी । जीवा-ऽजीवादितत्त्वज्ञा तपोनुष्ठानशालिनी ॥३३६॥
अखण्डद्वादशविधश्रावकव्रतधारिणी । अर्हत्पूजा-गुरूपास्तितत्परा सा सदाऽप्यभूत् ॥३३७॥युग्मम्॥
¶[24]अन्यदा तूपवासान्ते पारणाय निषेदुषी । सा यावद् द्वारमैक्षिष्ट को[25]ऽप्यृषिस्तावदागमत् ॥३३८॥
त्रिगुप्तिं पञ्चसमितिं धर्मं साक्षादिवाऽऽगतम् । तं स्थालस्थापितान्नेन प्रतिलाभयति स्म सा ॥३३९॥
तत्राऽभूच्च तदा दिव्यं वसुधारादिपञ्चकम् । महात्मभ्यः प्रदत्तं हि कोटिकोटिगुणं भवेत् ॥३४०॥
ततः स्थानादृषिरपि विहरन्नन्यतो ययौ । स्थानं नैकत्र साधूनां निःसङ्गानां [26]समीरवत् ॥३४१॥
आकर्ण्य रत्नवृष्टिं तामे[27]यतुर्बल-शार्ङ्गिणौ । दृष्ट्वा च विस्मयोत्कर्णौ बभूवतुरुभावपि ॥३४२॥
आश्चर्यभूतमेतस्याश्चरित्रमिति वादिनौ । कोऽनुरूपो वरोऽमुष्या? इत्यचिन्तयतां च तौ ॥३४३॥
ततश्च मन्त्रयित्वा तावी**हानन्दे**न मन्त्रिणा । द्रढयामासतुस्तस्याः स्वयंवरमहोत्सवम् ॥३४४॥
¶वासुदेवाज्ञया विद्याधरेन्द्रा भूभुजोऽपि च । तत्र स्वयंवरायेयुर्विजयार्धनिवासिनः ॥३४५॥

---

१. ***इदक्खलपराद०*** ला. पा. ॥ २. ***किन्त्वद्य सुभगाम्*** खंता. ता. पा. ॥ ३. धिया-बुद्ध्या गरीयसि! । ***०धीगरीयसीम्*** खंता. ॥ ४. नौसदृशम् ॥ ५. स्वीकुर्वन्तीम् ॥ ६. ***धीरै*** खंता. पाता. ॥ ७.***रणादौ*** ता. ॥ ८.***योध्यमान०*** खंता. पाता. वा.१-२ ॥ ८. शूकरम् ॥ १०. अपराजितः ॥ ११. बलः अपराजित एव वातः, तस्य असहिष्णवः; ***बलवातोऽसहिष्णवः*** पा. ॥ १२. ***तूलपुञ्जा इव*** ता. दे. ॥ १३. अनन्तवीर्यः ॥ १४. वासुदेवत्वे ॥ १५. आगत्या-आगमनेन ॥ १६. भाग्येन ॥ १७. ***सार्धद्वादश*** मु. ॥ १८. ***रौप्यस्य*** सं. ला. ॥ १९. अनन्तवीर्येण ॥ २०. शुक्लध्यानाग्निना निर्दग्धानि घातिकर्माणि - ज्ञानावरणीय-दर्शनावरणीय-मोहनीया-ऽन्तरायकर्माणि एव एधांसि काष्ठानि यया तस्याः ॥२१. नाम-गोत्र-वेदनीया-ऽऽयुष्यकर्माणि ॥ २२. मोक्षम् ॥ २३. अपराजितस्य ॥ २४. ***अन्येद्युरुपवासान्ते*** ला. ॥ २५. कोऽपि ऋषिरित्यर्थः ॥ २६.वायुवत् ॥ २७. आजग्मतुः ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

सभागृहमिवेन्द्रस्योपेन्द्रा[१]युक्तास्ततो व्यधात् । रत्नस्तम्भसहस्राङ्कं मण्डपं क्षितिमण्डनम् ॥३४६॥
फणीन्द्रफणमाणिक्यश्रेणिभ्रान्तिप्रदान्यथ । तत्र [२]प्रकल्पयामा[३]सू रत्नसिंहासनानि ते ॥३४७॥
वासुदेवाज्ञया तेषूपाविक्षन्नवनीभुजः । विद्याधरकुमाराश्च [४]मारतुल्या वपुःश्रिया ॥३४८॥
[५]संवीतदिव्यवसना रत्नालङ्कारधारिणी । [६]विचित्रकल्पिताकल्पाऽनल्पामोदविलेपना ॥३४९॥
मूर्ध्नि श्वेतातपत्रेण शशिबिम्बानुकारिणा । शोभमाना सवयोभिः सखीभिः परिवारिता ॥३५०॥
प्रतीहार्या दर्श्यमानपथा काञ्चनदण्डया । वरमालामुद्वहन्ती बलभद्रस्य कन्यका ॥३५१॥
सुरेष्विवोपस्थितेषु विद्याधरनृपेष्वथ । तं मण्डपमलञ्चक्रे **सुमतिः** श्रीरिवोदधिम् ॥३५२॥ [७]चतुर्भिः कलापकम्॥
नीलोत्पलस्रजमिव सृजन्ती मुग्धया दृशा । ईक्षाञ्चक्रे कुरङ्गाक्षी सा स्वयंवरमण्डपम् ॥३५३॥
¶अत्रान्तरे [८]रत्नमयं माणिक्यस्तम्भशोभितम् । लम्बमानं नभोमध्ये मार्तण्डस्येव मण्डलम् ॥३५४॥
अधिष्ठितं देवतया रत्नसिंहासनस्थया । अकस्मादावि[९]र्भवद्विमानमधिमण्डपम् ॥३५५॥युग्मम्॥
सा कन्या ते च राजानस्ते च विद्याधरेश्वराः । तदीक्षाञ्चक्रिरेऽत्यन्तविस्मयस्मेरचक्षुषः ॥३५६॥
तेषां [१०]सम्पश्यमानानां विमानादवतीर्य सा । अधिसिंहासनं देवी मण्डपान्तरुपाविशत् ॥३५७॥
सोत्क्षिप्य दक्षिणं पाणिमूचे **सुमति**कन्यकाम् । मुग्धे! **धनश्री**र्बुध्यस्व बुध्यस्व प्राग्भवं स्मर ॥३५८॥
¶**पुष्करवर**द्वीपार्धेऽस्ति पूर्व**भरत**स्य च । मध्यखण्डे विशालर्द्धि **श्रीनन्दनपुरं** पुरम् ॥३५९॥
शरणार्थिजनत्राणेष्वतन्द्रालुर्दिवानिशम् । महेन्द्र इव तत्राऽऽसीन् **महेन्द्र** इति भूपतिः ॥३६०॥
राज्ञस्तस्य महादेवी प्राणेभ्योऽप्यतिवल्लभा । **अनन्तमति**रित्यासीदनन्तगुणभाजनम् ॥३६१॥
एकदा सा निशाशेषे सुषुप्ता स्वप्नमैक्षत । निजोत्सङ्गस्थिते पुष्पमाले सुरभिनिर्मले ॥३६२॥
आख्याते च तया स्वप्ने राजा व्याख्यातवानिति । भविष्यत्यनवद्यं ते निश्चितं दुहितृद्वयम् ॥३६३॥
जज्ञाते समये तस्याः पुत्र्यौ तत्राऽहमादिमा । **कनकश्री**रिति त्वं तु **धनश्री**रिति नामतः ॥३६४॥
समं परस्परप्रीत्या ववृधाते उभे अपि । समं कलाकलापेन प्रापतुर्यौवनं च ते ॥३६५॥
¶इतस्ततश्च क्रीडन्त्यौ स्वेच्छयाऽन्येद्युरीयतुः । [११]सुपर्वविश्रामभुवं पर्वतं **गिरिपर्वतम्** ॥३६६॥
फलानि तत्र स्वादूनि पुष्पाणि सुरभीणि च । विचिन्वन्त्यौ भ्रेमतुस्ते [१२]वनाद्र्योरिव देवते ॥३६७॥
रहःप्रदेशे चैकस्मिन्नेकान्तशमशालिनम् । ते **नन्दनगिरिं** नामाऽऽलोकयामासतुर्मुनिम् ॥३६८॥
विलोक्य मुदिते ते च तं मुनिं त्रिः प्रदक्षिणम् । कृत्वा भक्त्या ववन्दाते [१३]अवदाते उभे अपि ॥३६९॥
धर्मलाभाशिषं दत्वा स **नन्दन**महामुनिः । हृदयानन्दनीं(नां) धर्मदेशनां विदधे तयोः ॥३७०॥
तां धर्मदेशनां श्रुत्वेत्यूचतुः प्राञ्जली उभे । यदि नौ योग्यता काचिद्धर्मादिशं प्रयच्छ तत् ॥३७१॥
विचार्य योग्यतां सोऽपि भगवानुभयोरपि । दिदेश द्वादशविधं धर्मं जगृहतुश्च ते ॥३७२॥
तं वन्दित्वा मुनीन्द्रं ते जग्मतुर्निजवेश्मनि । सदाऽप्यवहिते धर्मं पर्यपालयतां च तम् ॥३७३॥
¶क्रीडागिरि-सरिद्वापी-विविधद्रुमसङ्कुलाम् । एकदा[१४]ऽशोकवनिकां जग्मतुस्ते[१५] कुतूहलात् ॥३७४॥
विविधक्रीडया तत्र क्रीडन्त्यौ ते नदीतटे । अहार्षीत् खेचरयुवा **वीराङ्गस्त्रिपुरा**धिपः ॥३७५॥
**वज्रश्यामलिका** नाम तस्य भार्या शुभाशया । त्याजयामास ते तस्मान्मृग्याविव [१६]मृगाधिपात् ॥३७६॥
भीमाटव्यां नदीतीरे वंशजालोपरि क्षणात् । व्योम्नस्ते पेततुर्बाले शापभ्रष्टामरीनिभे ॥३७७॥
आपदं मरणान्तां तां ज्ञात्वा[१७] ते शुभभावने । विदधाते अनशनं नमस्कारपरायणे ॥३७८॥

---

१. वासुदेवसेवकाः ॥ २. रचयामासुः ॥ ३. *०मास रत्न०* मु. ॥ ४. कामसदृशाः ॥ ५. संवीतानि धृतानि दिव्यवस्त्राणि यया सा ॥ ६. विचित्राणि कल्पितानि आकल्पानि भूषणानि यया सा ॥ ७. खंता. पाता. न ॥ ८. *०रत्नमयमाणिक्य०* मुप्र. ॥ ९. *अकस्मादाविरभूद्०* खंता. पाता. वा.१-२ ॥१०. 'समो गमृच्छिप्रच्छिश्रुवित्स्वरत्यर्तिदृशः' (सि.हे. ३/३/८४) इति आत्मनेपदम् ॥ ११. देवानां विश्रान्तिस्थानम् ॥ १२. *वनान्योरिव* खंता., खंता.प्रतौ अत्र स्थाने टिप्पितमेवं 'तत्र वनदेवतेव' ॥ १३. श्वेतवर्णे ॥ १४. अशोकवाटिकाम् ॥ १५. धनश्री-कनकप्रियौ ॥ १६. *मनोरमे* ता. ॥ १७. *ज्ञात्वा* च मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कनकश्री**र्विपद्याऽहं [1]**सौधर्म**स्वर्गशासितुः । अभूवमग्रमहिषी नाम्ना **नवमिका** स्वसः! ॥३७९॥

विपद्य च **धनश्री**स्त्वं **धनद**स्य महिष्यभूः । च्युत्वा ततोऽत्र **सुमतिः सीरिण**स्त्वं सुताऽभवः ॥३८०॥

आसीत् तदा नौ सङ्केतश्च्यवते प्रथमं हि या । साऽर्हद्धर्मं बोधनीया समुपेत्य द्वितीयया ॥३८१॥

त्वां बोधयितुमेषाऽहमागताऽस्मि तव स्वसा । जैनं [2]बुध्यस्व धर्मं त्वं संसारोदधितारणम् ॥३८२॥

**नन्दीश्वर**महाद्वीपेऽष्टाहिकाः शाश्वतार्हताम् । यथास्थानं जन्म-स्नात्राद्युत्सवान् जङ्गमार्हताम् ॥३८३॥

[3]तांश्च तद्देशनावाचः स्वानुभूताः पुरा भवे । स्मराऽनया विस्मरसि किं जन्मान्तरनिद्रया? ॥३८४॥[4]युग्मम्॥

देवानामप्यसुलभां मर्त्यजन्मतरोः फलम् । तदा[5]दत्स्व परिव्रज्यां सिद्धेः प्रियसखीमिव ॥३८५॥

इत्युक्त्वा **शक्र**महिषी विमानमधिरुह्य सा । द्युतिभिर्द्योतयन्ती द्यां ययौ विद्युदिवोपरि ॥३८६॥

¶सञ्जातजातिस्मरणा तद्गिरा **सुमति**स्ततः । पपात मूर्च्छिता भूमौ सद्यो भवभयादिव ॥३८७॥

संसिक्ता चन्दनाम्भोभिर्वीजिता व्यजनानिलैः । लब्धसञ्ज्ञा समुत्तस्थौ निशात्यय इवाऽथ सा ॥३८८॥

सा कृताञ्जलिरित्यूचे भो भोः सर्वे कुलोद्भवाः! । प्रार्थये पृथिवीनाथा! जातिस्मरणवत्यहम् ॥३८९॥

मदर्थं यूयमाहूता अनुजानीत तेन माम् । उपादास्ये परिव्रज्यां [6]भवभ्रमिरुगोषधिम् ॥३९०॥युग्मम्॥

अभ्यधुर्भूभुजोऽप्येवमेवमस्तु तवाऽनघे! । अनुज्ञाता त्वमस्माभिर्निर्विघ्नं स्तात्तवेप्सितम् ॥३९१॥

सर्वोत्सवशिरोरत्नं तस्या निष्क्रमणोत्सवम् । चक्रतुः परया ऋद्ध्या मुदितौ सीरि-शार्ङ्गिणौ ॥३९२॥

महिष्यो दे[7]वराजस्य यक्ष[8]राजस्य चैत्य ताम् । [9]आनर्चुः पूजनीया हि वासवस्याऽपि तादृशः ॥३९३॥

**सुव्रतार्यां**हिपद्यान्ते कन्यानां **सप्तभिः** शतैः । सहाऽऽददे [10]सा प्रव्रज्यां मो[11]क्षपादपसारणिम् ॥३९४॥

साऽग्रहीद् द्विविधां शिक्षां तेपे च विविधं तपः । **संवे[12]गभाविता तस्थावा[13]त्माब्जध्यानषट्पदी** ॥३९५॥

कालान्तरेण क्षपकश्रेणिमारूढवत्यसौ । के[14]वलज्ञानमुत्पेदे मोक्षश्रीदूतसन्निभम् ॥३९६॥

प्रबोध्य भव्यभविनो भवोपग्राहिकर्मणाम् । क्षयं कृत्वा च **सुमतिः** प्रपेदे पदमव्ययम् ॥३९७॥

¶तौ चाऽ**पराजिता**-ऽ**नन्तवीर्यौ** सम्यक्त्वशालिनौ । पर्यपालयतां राज्यं [15]सम्पृक्तावश्विनाविव ॥३९८॥

पूर्वलक्षचतुरशीत्यायुरन्ते **जनार्दनः** । निकाचितैः कर्मभि[16]स्तैर्ययौ नरकमादिमम् ॥३९९॥

द्विचत्वारिंशत्सहस्रवर्षायुस्तत्र नारकः । विविधा वेदना लेभे नाशो नार्जितकर्मणाम् ॥४००॥

आगत्य **चमर**स्तत्र पि[17]ता प्राग्विष्णुजन्मनि । वेदनोपशमं चक्रेऽपत्यस्नेहो बली खलु ॥४०१॥

**अनन्तवीर्य**जीवोऽपि संविग्नः सम्यगेव ताः । वेदनाः समधिसेहे स्वं कर्माऽवधिना स्मरन् ॥४०२॥

भ्रातृशोकाद्बलभद्रोऽप्यात्मजे न्यस्य मेदिनीम् । **जय[18]न्धर**गणधरपादान्ते व्रतमाददे ॥४०३॥

[19]तमनुप्राव्रजन् राज्ञां सहस्राणि च षोडश । महतामनुलग्नैर्हि महदासाद्यते फलम् ॥४०४॥

सुचिरं स तपस्तेपे सहमानः परीषहान् । अन्ते चाऽनशनं कृत्वा विपद्येन्द्रोऽ**च्युते**ऽभवत् ॥४०५॥

¶**अनन्तवीर्य**जीवोऽपि भुक्त्वा दुषकर्मणां फलम् । निर्ययौ नरकाच्छुद्धः स्वर्णधातुरिवाऽनलात् ॥४०६॥

सोऽस्यैव **जम्बूद्वीप**स्य क्षेत्रे **भरत**नामनि । **वैताढ्य**स्योत्तरश्रेण्यां पुरे **गगनवल्लभे** ॥४०७॥

विद्याधरपते**र्मेघवाहन**स्य महात्मनः । जायायां **मेघमालिन्यां मेघनादः** सुतोऽभवत् ॥४०८॥[20]युग्मम्॥

क्रमेण यौवनं[21] प्राप्तं तं राज्ये **मेघवाहनः** । निवेश्य परलोकाय निजकार्यमसाधयत् ॥४०९॥

उभयोरपि **वैताढ्य**श्रेण्योरधिपतिः क्रमात् । स बभूवैकतेजस्वी [22]द्यावाभूम्योरिवाऽर्यमा ॥४१०॥

---

१. इन्द्रस्य ॥ २. ***जैनं बुध्यस्व बुध्यस्व धर्मं संसारतारणम्*** ता. पा. छा. खंता. वा.१-२ ॥ ३. ***तांश्च तद्देशना०*** मु. ॥ ४. न खंता. पाता. वा.१-२ प्रतिषु ॥ ५. गृहाण ॥ ६. भवे संसारे भ्रमिः भ्रमणं तदेव रुग् रोगः, तस्यौषधम् ॥ ७. इन्द्रस्य ॥ ८. कुबेरस्य ॥ ९. ***आनर्च*** मु. ॥ १०. ***०परिव्रज्याम्०*** पा. ॥ ११. मोक्षवृक्षस्य कुल्यातुल्याम् ॥ १२. संवेगेन वैराग्येण भाविता युक्ता ॥ १३. आत्मा एव अब्जं कमलं तस्य ध्याने षट्पदी भ्रमरी तया तुल्या; ***०वात्माब्जाध्यान०*** खंता.; ***०वात्माब्जव्योमषट्पदी०*** ता. ॥ १४. ***केवलज्ञानमापेदे*** दे. विना ॥ १५. मिलितौ अश्विनीकुमारौ ॥ १६. ***कर्मभिः स्वैर्ययौ*** पा. ॥ १७. स्तिमितसागरः ॥ १८. ***जयधर०*** खंता. पाता. ॥ १९. ***तदनु०*** खंता. ॥ २०. खंता. पाता. वा.१-२ प्रतिषु नास्ति ॥ २१. ***यौवनप्राप्तं०*** खंता. पाता. ॥ २२. आकाश-पृथिव्योः सूर्य इव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दशोत्तरं [1]देशशतं विभज्य [2]तनुजन्मनां । दत्त्वाऽन्येद्युर्**मन्दराद्रिं** सोऽगात् **प्रज्ञप्ति**विद्यया ॥४११॥
तत्राऽन्त**र्नन्दनवनं** सिद्धचैत्येऽर्चनं व्यधात् । तदा तत्राऽवतेरुश्च त्रिदशाः कल्पवासिनः ॥४१२॥
प्राग्भवभ्रातृसौहार्दादच्**युतेन्द्रो** विलोक्य तम् । प्राबोधयद्गुरुरिव संसारस्त्यज्यतामिति ॥४१३॥
तदाऽ**मरगुरु**र्नाम मुनीन्द्रः समुपाययौ । विद्याधरपतेस्तस्य स्वार्थसिद्धिरि[3]वाऽङ्गभाक् ॥४१४॥
तत्पादमूले जग्राह **मेघनाद**स्ततो व्रतम् । अपालयच्चाऽप्रमत्तस्तपो-नियमपूर्वकम् ॥४१५॥
सोऽपरेद्युरथाऽऽरुह्य गिरिं **नन्दनपर्वतम्** । ध्यानी तस्थौ समालम्ब्य प्रतिमामेकरात्रिकीम् ॥४१६॥
तथास्थितं च [4]प्राग्जन्मवैर्य**श्वग्रीव**नन्दनः । भवं भ्रान्त्वा चिरं दैत्यजन्म प्राप्तो ददर्श तम् ॥४१७॥
प्राग्वैरादुपसर्गान् स क्रुद्धस्तस्य महामुनेः । चक्रे निसर्गधीरस्य महाद्रोरिव का[5]सरः ॥४१८॥
तं च चालयितुं ध्यानान्नाऽशकत् स मनागपि । किं कम्पते क्वचिच्छैलो दन्तघातेन दन्तिनः? ॥४१९॥
वी[6]क्षापन्नो जगामाऽथ सोऽसुरो मलिनाननः । ध्यानं च पारयामास **मेघनाद**महामुनिः ॥४२०॥

उपसर्गपरीषहैरप्रकम्प्रः स तपस्तीव्रतरं चिरं चरित्वा ।
अन्तेऽनशनं विधाय मृत्वाऽ**च्युत**सामानिकदेव[7]भूयमाप ॥४२१॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये पञ्चमे[8] पर्वणि श्री**शान्तिनाथ**देवीय-
षष्ठसप्तमभव[9]वर्णनो नाम
द्वितीयः सर्गः[10] ॥

१. *पुरशतं* पा. ॥ २. पुत्राणाम् ॥ ३. *०रिवाङ्गवान्* मु. ॥ ४. पूर्वजन्मशत्रुः ॥ ५. महावृक्षस्येव महिषः ॥ ६. विलक्षः ॥ ७. देवत्वम् ॥ ८. *पञ्चमपर्वणि* खंता. पाता. वा.१-२ ॥ ९. *०देवीयषष्ठसप्तमभवः समाप्तः* इति वा.१-२ ॥ १०. *सर्गः सम्पूर्णः* मु. ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

# ।।[१]तृतीयः सर्गः।।

अस्यैव **जम्बूद्वीपस्य प्राग्विदेहेषु** विद्यते । **सीता**या दक्षिणतटे विजयो **मङ्गलावती** ।।१।।
तत्राऽस्ति नगरी **रत्नसञ्चया** नाम विस्तृता । रत्नसञ्चयवत्त्वेन [२]रत्नाकरवधूरिव ।।२।।
तत्र **क्षेमङ्करो** नाम योग-क्षेमकरः श्रियः । [३]समीरण इवौजस्वी बभूव [४]वसुधाधवः ।।३।।
निर्मला रत्नमालेव **रत्नमाले**ति नामतः । पुष्पमालेव [५]मृद्वङ्गी तस्याऽभूत् सहचारिणी ।।४।।
**अपराजित**जीवः सोऽ**च्युतेन्द्रः** प्रच्युतोऽ**च्युतात्**। [६]शौक्तिकेयमिव शुक्तौ तत्कुक्षावुदपद्यत ।।५।।
चतुर्दश महास्वप्नान् वज्रं पञ्चदशं तथा । सुखसुप्ता महादेवी निशाशेषे ददर्श सा ।।६।।
पत्ये प्रबुद्धा साऽऽचख्यौ व्याचख्यौ सोऽपि यत् तव । [७]वज्रीव वीर[८]स्तनयश्चक्रवर्ती भविष्यति ।।७।।
काले सा सुषुवे पुत्रं पवित्रं मधुराकृतिम् । षष्ठमिव लोकपालं लोकोत्तरपराक्रमम् ।।८।।
गर्भस्थितेऽस्मिन् [९]यं स्वप्ने देवी वज्रं व्यलोकयत् । तेन **वज्रायुध** इति तस्य नाम ददौ पिता ।।९।।
लोकोत्तरवपुर्लोकचक्षुर्दोषाद् दिने दिने । [१०]स्फुटल्ललन्तिकारिष्टो व्यवर्धिष्ट क्रमेण सः ।।१०।।
सुरा-ऽसुर-नरस्त्रीणामेकं हृदयमोहनम् । स प्राप यौवनं सर्वकलाजलधिपारगः ।।११।।
सोऽथ **लक्ष्मीवतीं** नाम लक्ष्मीमिव वपुष्मतीम् । राजपुत्रीमुपायंस्त हस्तविन्यस्तकङ्कणः ।।१२।।
¶**अनन्तवीर्य**जीवोऽपि प्रच्युत्याऽ**च्युत**कल्पतः । आगा[११]**ल्लक्ष्मीवती**कुक्षिं [१२]खादिवाऽब्दजलं महीम् ।।१३।।
सुस्वप्नसूचितं सूनुमसूत समयेऽथ सा । सर्वलक्षणसम्पूर्णमादित्यमिव तेजसा ।।१४।।
जन्मोत्सवादप्यधिकेनोत्सवेन शुभेऽहनि । **सहस्रायुध** इत्याख्यां पितरौ तस्य चक्रतुः ।।१५।।
[१३]पीयूषदीधितिरिव सोऽपि चाऽवर्धत क्रमात् । [१४]कलाकलापसम्पूर्णः प्रतिपेदे च यौवनम् ।।१६।।
स राजकन्यां **कनकश्रियं** नाम वपुःश्रिया । [१५]अतिश्रियं पर्यणैषीद् रूपश्रीमकरध्वजः ।।१७।।
तस्याऽपि तस्यां सञ्जज्ञे सम्पूर्णनरलक्षणः । सूनुः **शतबलि**र्नाम महाबल इवौजसा ।।१८।।
¶अथैकदा पुत्र-पौत्र-प्रपौत्रैर्मित्र-मन्त्रिभिः । सामन्तैश्च सहाऽध्यास्त राजा **क्षेमङ्करः** सभाम् ।।१९।।
तदा चै**शानकल्पे**ऽभूदिति चर्चा दिवौकसाम् । [१६]अनु**वज्रायुधं** धात्र्यां [१७]दृढसम्यक्त्वधारिणः ।।२०।।
अश्रद्दधानस्तां वाचं **चित्रचूला**भिधः सुरः । विचित्ररत्नमुकुटश्चलत्कुण्डलमण्डलः ।।२१।।
मिथ्यात्वमोहितमना नास्तिकीभूय दुर्मतिः । समाययौ विव[१८]दिषुस्तां **क्षेमङ्कर**पर्षदम् ।।२२।।[युग्मम्]
तत्राऽऽलापेषु चित्रेषु जायमानेषु सोऽमरः । [१९]आस्तिक्योद्घातमाक्षिप्य सावष्टम्भमदोऽवदत् ।।२३।।
नाऽस्ति पुण्यं न पापं न जीवो[२०] लोकः परो न च । आस्तिक्यबुद्ध्या [२१]त्वेतेषां मुधा क्लिश्यन्ति देहिनः ।।२४।।
[२२]निर्व्याजसम्यक्त्वधरस्ततो **वज्रायुधो**ऽभ्यधात् । भोः! प्रत्यक्षविरुद्धं ते [२३]वचस्विन्! किमिदं वचः ? ।।२५।।
त्वं प्रयुज्याऽ[२४]वधिं तावत् सम्यक् पश्याऽऽत्मनोऽपि हि । प्राग्जन्मधर्मानुष्ठानफलमेतद्धि वैभवम् ।।२६।।
पूर्वजन्मनि मर्त्यस्त्वम[२५]मर्त्यस्त्वधुनाऽभवः । न चेद् भवति जीवस्तद् ब्रूहीदं घटते कथम् ? ।।२७।।
इह मर्त्यत्वमाप्तस्य देवत्वं च परत्र ते । प्रत्यक्षः परलोकोऽपि तद्धीमन्निहलोकवत् ।।२८।।
**क्षेमङ्कर**कुमारेणेत्थंकारं [२६]स प्रबोधितः । **चित्रचूलो**ऽप्युवाचैवं साधु साधु कृतं त्वया ।।२९।।

---

१. ***अथ तृतीयः*** मु.।। २. सागरपत्नीव ।। ३. पवनः ।। ४. नृपतिः । ***वसुधाधरः*** मु. ।। ५. सुकोमलाङ्गी ।। ६. मौक्तिकम् ।। ७. इन्द्र इव ।। ८. ***वीरतनय०*** मु. ।। ९. ***सा*** मु., ***यत्*** खंता. वा.१-२, छा. ।। १०. स्फुटन्ती विकसन्ती ललन्तिका माला तयाऽरिष्टः शुभः ।। अयमर्थः श्रीरमणीकविजयैः कृतः । किन्तु , स्फुटत्- नश्यत् ललन्तिकारूपं रिष्टं यस्य सः , अथवा स्फुटन्ती-भिन्दन्ती या ललन्तिका तयाऽरिष्टं शुभं यस्य सः- इत्यर्थः स्यात् ।। ११. ***लक्ष्मीवतीकुक्षौ*** सं. ता. पा. ला. ।। १२. आकाशाद् इव मेघजलम् ।। १३. चन्द्रः ।। १४. ***कलाकलापसम्पूर्णम्*** ला. दे. ।। १५. लक्ष्मीमतिक्रान्ताम् ।। १६. वज्रायुधाद् हीनाः ।। १७. ***दृढसम्यक्त्वशालिनः*** मु. ।। १८. विवादं कर्तुमिच्छुः ।। १९. आस्तिक्यस्य उपरि प्रहारो यथा स्यात् तथा आक्षिप्य; ***आस्तिक्योद्योतमाक्षिप्य*** मु. दे. ता. पा. सं. छा. ।। २०. ***जीवलोकः*** ता. पा. ।। २१. पुण्यादीनाम् ।। २२. शुद्धसम्यक्त्वधरः ।। २३. प्रशस्तवचनवान् ।। २४. अवधिज्ञानम् ।। २५. देवः ।। २६. ***प्रतिबोधितः*** ला. मु. ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारे निपतन्नेष उद्धृतोऽस्मि कृपालुना। किमुच्यतेऽथवा यस्य साक्षात् तीर्थकरः पिता ॥३०॥
चिरं मिथ्यात्ववानस्मि दृष्टो [1]दिष्ट्येर्ष्ययाऽप्यसि। सम्यक्त्वरत्नं मे देहि न [2]वन्ध्यं दर्शनं सताम् ॥३१॥
**वज्रायुधो**ऽपि तद्भावं ज्ञात्वा मतिमतां वरः। दिदेश तस्मै सम्यक्त्वं [3]सवीर्यस्य सुतः स हि ॥३२॥
भूयोऽप्यूचे **चित्रचूलः** कुमाराऽद्यप्रभृत्यहम्। [4]आदेशकार्यस्मि तव याचस्वाऽद्यैव किञ्चन ॥३३॥
कुमारोऽपि जगादैवं त्वत्तोऽदो याचितं मया। अतः परं त्वया भाव्यं दृढसम्यक्त्वशालिना ॥३४॥
देवोऽप्यवोचत् केयं ते प्रार्थना ? स्वार्थ एष मे। तद् ब्रूहि किञ्चित् कार्यं त्वं यथा स्यामनृणस्तव ॥३५॥
मत्कार्यमिदमेवेति [5]वक्त्रे **वज्रायुधाय** सः। देवायेव निरीहाय दिव्यालङ्करणान्यदात् ॥३६॥
**ईशानेन्द्र**सभां गत्वा **चित्रचूलो**ऽभ्यधादिति। स्थाने **वज्रायुधो**ऽश्लाघि दृढसम्यक्त्ववांस्त्वया ॥३७॥
अयं महात्मा भगवानर्हन् भावीति [6]संगृणन्। **ईशान**पतिरस्तावीद् **वज्रायुध**मनायुधः ॥३८॥
एवं विचित्रगोष्ठीभिः क्रीडाभिरपि चारुभिः। **वज्रायुधः** सौख्यमग्नस्तस्थौ सुर इवर्द्धिमान् ॥३९॥
¶वसन्तसमयेऽन्येद्युस्तत्[7]पुष्पपटलीधरा। वेश्या **सुदर्शना** [8]**वज्रायुध**मेवं व्यजिज्ञपत् ॥४०॥
यूनां क्रीडासखो मी[9]नकेतोर्जयसखः परः। स्वामिन्नद्य वसन्तोऽयमेकच्छत्रो विजृम्भते ॥४१॥
दोलान्दोलनसंसक्ता योषितोऽत्रा[10]ऽऽर्द्रयौवनाः। पतिनामानि पृच्छ्यन्ते सखीभिर्यष्टिपाणिभिः ॥४२॥
स्वयं चिन्वन्ति पुष्पाणि [11]ग्रथ्नन्ति स्वयमेव च। स्वयमर्चन्ति [12]पुष्पास्त्रं स्वयं मानं त्यजन्ति च ॥४३॥
स्वयं दूतीभवन्तीह मनस्विन्योऽपि सम्प्रति। [13]अनुभावो विजयते [14]ऋतुराजस्य कोऽप्ययम् ॥४४॥युग्मम्॥
पिकी[15]नां कूजितैरत्र भृङ्गीणां विरुतैरपि। [16]सुप्तस्मरनृपोद्बोधबन्दिकोलाहलायितम् ॥४५॥
पुष्पोत्तंसाः पुष्पहाराः पुष्पकेयूरकङ्कणाः। पाखण्डमिव [17]पुष्पेषोर्युवान इह बिभ्रति ॥४६॥
[18]वसन्तसखसङ्काशवसन्तेऽस्मिन्नुपस्थिते। विज्ञापयति देव! त्वां देवी **लक्ष्मीवती** मया ॥४७॥
अद्य **सूरनिपाता**ख्यमुद्यानं नन्दनोपमम्। गत्वा मधुश्रियं नव्यां द्रष्टुं नः कौतुकं प्रभो! ॥४८॥
[19]अस्तुङ्कारस्तद्वचसः कुमारः सपरिच्छदः। तदैव हि तदुद्यानं जगामाऽनङ्गधाम सः ॥४९॥
**लक्ष्मीवती**प्रभृतीनि सप्त देवीशतानि च। कुमारमनुयान्ति स्म तारा इव निशाकरम् ॥५०॥
एकच्छत्रमिव च्छायापादपैरतिविस्तृतैः। [20]अद्वैतामोदसाम्राज्यमिव पुष्पितशाखिभिः ॥५१॥
[21]गलत्परागकणिकापङ्किलाबालमण्डलम्। फलभारनमच्छाखिशाखानुस्पृष्टभूतलम् ॥५२॥
क्वाऽप्यु[22]न्नमन्नमन् क्वाऽपि योगीव विवरं विशन्। सान्तःपुरस्तदुद्यानं कुमारो विजहार सः ॥५३॥त्रिभिर्विशेषकम्[23]॥
¶तेनोद्यानविहारेण श्रान्तः श्रान्तवधूजनः। जलक्रीडाकृते वापीं स ययौ **प्रिय[24]दर्शनाम्** ॥५४॥
**नन्दीश्वर**द्वीपवापीमिव वापीं मनोरमाम्। कुमारः श्रमनाशाय सप्रियः [25]प्रविवेश ताम् ॥५५॥
प्रेयसीभिः समं तत्र गिरि[26]ण्यामिव द्विपः। प्रावर्तिष्ट जलक्रीडां कर्तुं **वज्रायुध**स्ततः ॥५६॥
जलक्रीडाकराघातैरुत्क्षिप्तानामलक्ष्यत। हारमुक्ताकणानां च शी[27]कराणां च नाऽन्तरम् ॥५७॥
अन्तःपुरस्त्री[28]मुखानां हैमानां चाऽ[29]म्बुजन्मनाम्। वयस्यानामिव चिरादभूदन्योन्यसङ्गमः ॥५८॥
अञ्जलिभिः [30]शृङ्गिकाभिर्ग[31]ण्डूषैश्च मृगीदृशाम्। [32]वारिप्रहरणो जज्ञे मन्ये[33]पुष्पायुधस्तदा ॥५९॥

१. ***दिष्ट्येर्ष्ययापि हि*** सं. ता. पा. ला. ॥ २. निष्फलम् ॥ ३. जिनस्य 'सवीर्य इत्यपि जिने' [हैम. शिलोञ्छ. प्र. का. श्लो. २] ॥ ४. आदेशवर्ती ॥ ५. वदते, वक्तृशब्दस्य चतुर्थ्येकवचनम् ॥ ६. ***स गृणन्*** मु., कथयन् ॥ ७. वसन्तपुष्पगुच्छधरा ॥ ८. ***नाम वज्रायुधमज्ञिज्ञपत्*** दे. मु. ॥ ९. मीनकेतोः कामस्य ॥ १०. ***ऽत्राऽऽर्द्रयौवनाः*** इति मु. पाठः। अन्यास्वप्युपयुक्तासु प्रतिष्वयं पाठः सम्भाव्यते। तत्र 'आर्द्र - नवीनं यौवनं यासां ताः' इत्यर्थः ॥ ११. ***जिघ्रन्ति*** ला. ॥ १२. कामदेवम् ॥ १३. प्रभावः ॥ १४. वसन्तस्य ॥ १५. ***पिकानाम्*** ला. पा. ॥ १६. सुप्तो यः कामनृपस्तस्योद्बोधे कोलाहलमिवाऽऽचरितम् ॥ १७. कामदेवस्य ॥ १८. कामदेवसदृशवसन्ते ॥ १९. 'अस्तु' इति कारकः - तद्वचसोऽनुमोदकः ॥ २०. आमोदाद्वैतस्य साम्राज्यमिव, आमोदः सुरभिगन्धः ॥ २१. गलन्त्यो याः परागकणिकास्ताभिः पङ्किलानि अबालानि-महान्ति मण्डलानि ॥ २२. उच्चैर्नीचैर्भवन् ॥ २३. खंता. पाता. वा.१-२ प्रतिषु न ॥ २४. ***प्रियदर्शनः*** छा. ला. ॥ २५. ***स विवेश ताम्*** मु. ॥ २६. ***गिरिनद्यामिव*** छा. मु. ॥ २७. ***सीकराणां*** मु.। जलकणानाम् ॥ २८. ***स्त्रीमुखाणां*** खंता. पाता. वा.१-२ ॥ २९. कमलानाम् ॥ ३०. वारियन्त्रैः, 'पिचकारी' इति भाषायाम् ॥ ३१. 'कोगळो' इति भाषायाम् ॥ ३२. वार्येव प्रहरणमायुधं यस्य सः ॥ ३३. कामदेवः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लुलन्त्यः समलक्ष्यन्त [1]कबर्यो वरयोषिताम्। मीना [2]मीनध्वजेनेव ध्वजार्थं प्रगुणीकृताः ॥६०॥
जलकेलिपरिश्रान्ता विश्राम्यन्त्यः पयस्तटे। गौराङ्ग्यः समलक्ष्यन्त जलदेव्य इव स्थिताः ॥६१॥
[3]सपत्नाम्भोजसङ्घर्षेणेव नेत्राणि सुभ्रुवाम्। वारिच्छटाच्छोटनेन ताम्रतां प्रतिपेदिरे ॥६२॥
मृगीदृशामङ्गरागैर्मार्ग[4]नाभैरभूत् पयः। सुगन्धि गन्धेभमदैरिव वन्यनदीजलम् ॥६३॥
इत्थं च निर्भरं वारिक्रीडया व्यग्रमानसः। **वज्रायुध**कुमारोऽस्थादस्थान[5]मसुहृद्भियाम् ॥६४॥
¶प्राग्जन्मारे**र्दमितारे**र्जीवो भ्रान्त्वा भवे चिरम्। देवत्वं प्राप्तवानागाद् **विद्युद्दंष्ट्रा**भिधस्तदा ॥६५॥
दृष्ट्वा **वज्रायुधं विद्युद्दंष्ट्रो** दंष्ट्राः कषन् मिथः। आः क्व यास्यत्यसौ जीवन्निति सञ्चिन्तयन् [6]रुषा ॥६६॥
कुमारं सपरिवारं पेष्टुं चणकमुष्टिवत्। वाप्यास्तस्या उपरिष्टाच्चिक्षेपोत्क्षिप्य पर्वतम् ॥६७॥[युग्मम्]
[7]पाशिपाशोपमैर्नागपाशैः सो[8]ऽसुरपांसनः। **वज्रायुधं** बबन्धाऽधः [9]पदोर्मे[10]ण्ठ इव द्विपम् ॥६८॥
गिरिं वज्रीव वज्रेण मुष्ट्या **वज्रायुधो**ऽपि तम्। पिपेषाऽत्रो[11]टयच्चाऽथ तान् पाशान् बिसतन्तुवत् ॥६९॥
शेषाहिरिव पातालादक्षताङ्गो महाभुजः। तस्याः सान्तःपुरो वाप्याः कुमारो निर्ययौ ततः ॥७०॥
तदा **नन्दीश्वरे** यात्रां कर्तुं **शक्रो** विदे[12]हजान्। जिनान् नत्वा व्रजन् वाप्या निर्गच्छन्तं ददर्श तम् ॥७१॥
भवेऽत्र चक्र्यसौ भाविन्यर्हन्निति पुरन्दरः। तमानर्चोपचारः स्याद् भाविन्यपि हि भूतवत् ॥७२॥
धन्योऽसि **जम्बूद्वीप**स्य क्षेत्रे **भरत**सञ्ज्ञके। तीर्थकृत् षोडशः **शान्ति**र्भावीत्युक्त्वा ययौ [13]हरिः ॥७३॥
**वज्रायुधो**ऽपि विविधाः क्रीडाः कृत्वा यदृच्छया। सान्तःपुरपरीवारः प्रविवेश निजं पुरम् ॥७४॥
¶अथ **क्षेमङ्करो** लोकान्तिकदेवैः प्रबोधितः। [14]प्रविव्रजिषुरात्मीये राज्ये **वज्रायुधं** न्यधात् ॥७५॥
प्रदाय वार्षिकं दानं प्रव्रज्यामाददे प्रभुः। विविधाभिग्रहपरस्तपस्तेपे च दुस्तपम् ॥७६॥
कर्मणां घातिनां घाताद् भर्तुर्जज्ञे च केवलम्। केवलज्ञानमहिमा विदधे चाऽमरेश्वरैः ॥७७॥
यथास्थानं नि[15]षण्णेषु वज्रि-**वज्रायुधा**दिषु। स्थितः समवसरणे सर्वज्ञो देशनां व्यधात् ॥७८॥
श्रुत्वा तां देशनां लोकाः [16]प्राज्याः पर्यव्रजन्नथ। स्वं स्वं स्थानं ययुर्वज्र[17]धर-**वज्रायुधा**दयः ॥७९॥
¶अस्त्रागारे चक्ररत्नमुत्पन्नमिति [18]तारवाक्। तदाऽस्त्रागारिको **वज्रायुध**स्याऽकथयन् मुदा ॥८०॥
**वज्रायुध**स्ततश्चक्रे चक्रपूजां महीयसीम्। अन्यान्यपि महारत्नान्यस्याऽभूवंस्त्रयोदश ॥८१॥
चक्ररत्नानुगः सोऽथ स**वैताढ्य**महीधरम्। अपि व्यजेष्ट षट्खण्डं विजयं **मङ्गलावती**म् ॥८२॥
**सहस्रायुध**कुमारं यौवराज्ये न्यधत्त च। धरित्रीधरणसहं मूर्त्यन्तरमिवाऽऽत्मनः ॥८३॥
¶एकदा राज-सामन्ता-ऽमात्य-सेनाधिपैर्वृतः। सामानिकैरिव [19]हरिः सोऽध्यास्ताऽऽ[20]स्थानमण्डपम् ॥८४॥
तदानीं चाऽम्बरतलादापतन्नवनीतलम्। वेपमानाखिलवपुर्द्विपाहत इव द्रुमः ॥८५॥
एको विद्याधरयुवा **वज्रायुध**महीभुजम्। शरण्यं शरणायाऽऽगान् **मैना[21]क** इव सागरम् ॥८६॥युग्मम्॥
तत्पृष्ठे खड्ग-फलकधरा विद्याधराङ्गना। आगात् **सुरेखा** चार्वङ्गी विद्यादेवीव मूर्तिभाक् ॥८७॥
साऽप्यूचे चक्रिणं देव! दुरात्माऽयं विसृज्यताम्। यथाऽस्य दुर्नयफलं दर्शयाम्यचिरादहम् ॥८८॥
तत्पृष्ठतश्चो[22]रुगदापाणिर्भृकुटिभीषणः। यमदूत इवैकः कोऽप्यागाद् विद्याधरः क्रुधा ॥८९॥
[23]**वज्रायुधं** सोऽप्यवोचत् श्रूयतामस्य दुर्नयः। येनेहेयमहं चाऽऽगामेतद्वधविधि[24]त्सया ॥९०॥
¶अस्त्यस्य **जम्बूद्वी[25]प**स्य विदेहक्षेत्रभूषणे। **सुकच्छ**नाम्नि विजये **वैताढ्यो** नाम पर्वतः ॥९१॥
तस्योपरि पुरश्रेणिशिरोमणितया स्थितम्। पुरं **शुल्कपुरं** नाम [26]शुल्कं [27]कल्पश्रिया इव ॥९२॥

---

१. केशपाशाः ॥ २. कन्दर्पेणेव ॥ ३. ***सापत्नाम्भोजसं०*** सं. छा. दे. मु.; ***सपत्न्याम्भोजसं०*** ला., ***सापत्न्याम्भोजसं०*** पा.; शत्रुभूतानां पङ्कजानां स्पर्धया ॥ ४. कस्तूरीसम्बन्धिभिः ॥ ५. शत्रुभयानामस्थानम् ॥ ६. क्रोधेन ॥ ७. वरुणपाशोपमैः ॥ ८. असुराधमः ॥ ९. ***पदोर्मेण्ड इव*** ला. मु. ॥ १०. हस्तिपकः ॥ ११. ***त्रोटयित्वा*** ला. दे. ॥ १२. महाविदेहजातान् ॥ १३. इन्द्रः ॥ १४. प्रव्रज्यामादित्सुः ॥ १५. ***०स्थाननि०*** खंता. पाता. ॥ १६. प्रभूताः ॥ १७. इन्द्रः ॥ १८. उच्चैर्वाक् ॥ १९. इन्द्रः ॥ २०. सभामण्डपम् ॥ २१. पर्वतः ॥ २२. महती गदा पाणौ यस्य सः ॥ २३. ***विद्याधरं*** मु. ॥ २४. विधातुमिच्छया ॥ २५. ***जम्बूद्वीपेऽस्य*** मु. ॥ २६. मूल्यम् ॥ २७. देवलोकश्रियाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शुक्लदन्तो**ऽभवत् तत्र विद्याधरनरेश्वरः। पत्नी **यशोधरा** [1]तस्य कुलद्वययशोधरा ॥९३॥
तयोरभूवं **पवनवेगो** नामाऽहमात्मजः। क्रमात् कलाकलापं च यौवनं च प्रपन्नवान् ॥९४॥
तत्रैव **वैताढ्य**गिरावुत्तरश्रेणिमण्डने। पुरे **किन्नरपुरे**ऽभूद् **दीप्तचूलो** महीपतिः ॥९५॥
तस्य पत्न्यां **चन्द्रकीर्तौ सुकान्ता** नाम पुत्र्यभूत्। सर्वलक्षणसम्पूर्णा सा मया पर्यणीयत ॥९६॥
अथाऽऽवयोः समभवद् रूपशीलविराजिनी। पुत्री **शान्तिमती** नाम पुरस्तादस्ति या तव ॥९७॥
इयं हि साधयन्त्यासीन्महाविद्यां यथाविधि। **प्रज्ञप्तिकां** भगवतीं पर्वते **मणिसागरे** ॥९८॥
विद्याधरेणाऽमुनेयं विद्यासाधनतत्परा। व्योमन्युत्क्षिप्तेऽथाऽस्या वि[2]द्याऽसिध्यत् तदैव च ॥९९॥
अस्याः पलायितः सद्यः शरणं क्वाऽप्यनाप्नुवन्। त्वत्पादमूलं प्राप्तोऽयं दुरात्मा खे[3]चराधमः ॥१००॥
**प्रज्ञप्ति**विद्यापूजार्थं गृहीत्वा बलिमागमम्। न चाऽपश्यमहं तत्र गिरौ दुहितरं निजम् ॥१०१॥
[4]**आभोगिन्या** ततो ज्ञात्वा स्वामिन्नहमिहा[5]ऽऽगतः। दोषाणामाकरः सोऽयं त्यज्यतां दु[6]ष्टशासक! ॥१०२॥
नालिकेरीफलमिव यथैनं गदयाऽनया। दलयित्वा प्रापयामि प्रे[7]तराजनिकेतनम् ॥१०३॥
अथ ज्ञात्वाऽवधिज्ञानाच्चक्री **वज्रायुधो**ऽवदत्। भो! भोः! प्राग्भवसम्बन्ध एतेषां श्रूयतामयम् ॥१०४॥
¶अस्यैव **जम्बूद्वीप**स्य क्षेत्र **ऐरावता**[8]भिधे। पुरे **विन्ध्यपुरे विन्ध्यदत्तो** नामाऽभवन्नृपः ॥१०५॥
पत्न्यां **सुलक्षणा**ख्यायां सम्पूर्णनरलक्षणः। बभूव तस्य **नलिनकेतु**रित्याख्यया सुतः ॥१०६॥
आसीत् तत्रैव नगरे सार्थवाहशिरोमणिः। मि[9]त्राब्जानां मित्र इव **धर्ममित्रो**ऽभिधानतः ॥१०७॥
**श्रीदत्ता**यां तस्य पत्न्यां **दत्तो** नामाऽभवत् सुतः। **दत्त**स्याऽप्यभवत् पत्नी दिव्यरूपा **प्रभङ्करा** ॥१०८॥
एकदा स वसन्तर्तौ समं दयितया तया। जगाम रन्तुमुद्याने रत्येव मकरध्वजः ॥१०९॥
राज्ञश्च सूनुर्**नलिनकेतुः** सोऽपि तदाऽऽगतः। **प्रभङ्करा**मपश्यत् तां जघ्ने च [10]स्मरपत्रिभिः ॥११०॥
श्लाघ्यमस्या अहो! रूपं श्लाघ्यः सोऽपि च योऽनया। रमेतेति विचिन्त्याऽन्तस्तां सोऽहार्षीत् स्मरातुरः ॥१११॥
क्रीडोद्यान-सरिद्वाप्यादिषु नित्यं तया सह। स्वच्छन्दं **नलिनकेतु**रक्रीडन् मी[11]नकेतुवत् ॥११२॥
¶उन्मत्त इव **दत्तो**ऽपि तद्वियोगानलार्दितः। उद्याने तत्र बभ्राम ध्यायन् विष्वक् **प्रभङ्कराम्** ॥११३॥
तत्र पर्यटता तेन [12]दृक्सुधाञ्जनदर्शनः। ईक्षाञ्चक्रे वरमुनिः **सुमना** इति नामतः ॥११४॥
मुनेः **सुमनस**स्तस्य घातिकर्मक्षयात्तदा। उत्पेदे केवलज्ञान[13]मज्ञानध्वान्तवासरः ॥११५॥
चक्रिरे केवलज्ञानमहिमानं दिवौकसः। मुनेस्तस्य पदाम्भोजद्वन्द्वं **दत्तो**ऽप्यवन्दत ॥११६॥
पीत्वा तस्मान्मुनेर्धर्मदे[14]शनारूपिणीं सुधाम्। **दत्तः** प्राक्तापवैधुर्यमुज्झति स्म क्षणादपि ॥११७॥
उपशान्तो दानधर्मरतोऽनारतमेव सः। अतिवाह्य शुभध्यानी प्रकृष्टं पुरुषायुषम् ॥११८॥
**जम्बूद्वीपे प्राग्विदेहे सुकच्छे** विजयोत्तमे। **वैताढ्य**पर्वते **स्वर्णतिलके** प्रवरे पुरे ॥११९॥
**महेन्द्रविक्रमा**[15]ख्यस्य विद्याधरमहीपतेः। पत्न्या**मनिलवेगा**यां सुतत्वेनोदपद्यत ॥१२०॥त्रिभिर्विशेषकम्॥
तस्याऽ**जितसेन** इति नामधेयं पिता व्यधात्। ददौ विद्याश्च विधिवत् तेषां मूलधनं हि ताः ॥१२१॥
उद्यौवनः पर्यणैषीत् स विद्याधरकन्यकाः। रेमे च ताभिर्विहरन् व्योम्ना गिरि-वनादिषु ॥ १२२॥
¶**विन्ध्यदत्ते** विपन्ने तु पुरे **विन्ध्यपुरे**ऽभवत्। राजा **नलिनकेतुः** सः [16]तार्क्ष्यकेतुरिवोद्भटः ॥१२३॥
स **प्रभङ्कर**या सार्धं [17]**दत्त**पत्न्याऽ[18]पनीतया। [19]कान्दर्पिकः सुर [20]इवाऽभुङ्क्त वैषयिकं सुखम् ॥१२४॥
प्रासादमन्यदाऽऽरोहत् स **प्रभङ्कर**या समम्। वैमानिकः [21]समं देव्या विमानमिव भासुरम् ॥१२५॥

---

१. *चाऽस्य* ता. पा. ला. ॥ २. *विद्या सिद्धा तदैव च* सं. पा. ता. ला. छा. ॥ ३. *खेचरोऽधुना* पा. ॥ ४. तन्नाम्न्या विद्यया ॥ ५. *०हमिहागमः* ता. ॥ ६. *दुष्टशासकः* मु. विना। दुष्टान् शास्तीति दुष्टशासकः, तस्य सम्बोधनम् ॥ ७. यमराजगृहम् ॥ ८. *ऐरवताभिधे* ता. खंता. ॥ ९. मित्राण्येव कमलानि, तेषां विकाशे मित्रः सूर्य इव ॥ १०. कामबाणैः ॥ ११. कामदेववत् ॥ १२. दृशोः नेत्रयोः सुधाञ्जनमिव दर्शनं यस्य सः ॥ १३. अज्ञानमेव ध्वान्तं तमस्तस्य नाशने दिवसतुल्यम् ॥ १४. *०देशनां रूपिणीं* मु.; रूपिणीं मूर्तिमतीं सुधामित्यत्राऽर्थः ॥ १५. *०विक्रमार्कस्य* मु. ॥ १६. विष्णुरिव ॥ १७. *दत्तपत्न्योपनीतया* ता. ॥ १८. अपहृतया ॥ १९. व्यन्तरनिकायिकः ॥ २०. *इवाऽभुक्त* सं. ला. पा. खंता. पाता. वा.१-२ ॥ २१. *सदेवीको* सं. ता. ला. पा. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गिरीन्द्रशिखराकारानञ्जन[1]द्युतितस्करान् । गर्जितर्जितदिक्चक्रानुद्भ्रान्तानिव दिग्गजान् ॥१२६॥
विद्युदुद्योतित[2]व्योम्न [3]ऋजुरोहितधारिणः । अकस्मादुन्नतान् मेघान् ददर्श मुमुदे च सः ॥१२७॥**युग्मम्**॥
तांश्च प्रचण्डवातेन [4]पोतानिव दिशोदिशम् । अद्राक्षीन्नीयमानांश्च [5]कुहकोत्पादितानिव ॥१२८॥
इत्युत्पत्तिं वि[6]पत्तिं च क्षणार्धेऽपि [7]पयोमुचाम् । निरीक्ष्य **नलिनकेतु**र्वैराग्यादित्यचिन्तयत् ॥१२९॥
यथाऽमी वारिदा व्योम्नि क्षणादुदयमासदन् । क्षणादस्तमपि तथा संसारे [8]सर्वमीदृशम् ॥१३०॥
युवा वृद्धो धनी रोरः[9] पतिः पत्तिर्विरुक् सरुक् । एकजन्मन्यपि जनो धिक् सर्वं क्षणिकं भवे ॥१३१॥
एवं विमृश्य पुत्रं स्वं राज्ये न्यस्य च तत्क्षणात् । प्रव्रज्यामाददे **क्षेमङ्कर**तीर्थङ्करान्तिके ॥१३२॥
उग्रैस्तपोभिर्ध्यानेन [10]घातितो घातिकर्मणाम् । केवलज्ञानमुत्पेदे तस्य कालक्रमेण तु ॥१३३॥
भवोपग्राहिकर्माणि हत्वा चत्वार्यपि [11]क्षणात् । जगाम **नलिनकेतु**र्महर्षिः पदमव्ययम् ॥१३४॥
¶ऋजु-भद्रस्वभावा च साऽपि राज्ञी **प्रभङ्करा** । **सुव्रता**गणिनीपार्श्वेऽचरच्**चान्द्रायणं** तपः ॥१३५॥
फलेन तपसस्तस्य सम्यक्त्वादि विनाऽपि हि । विपद्य दुहिता जज्ञे सेयं **शान्तिमती** तव ॥१३६॥
**दत्त**जीवोऽ**जितसेन**स्त्वेष विद्याधरोऽभवत् । पूर्वस्नेहादनेनेयमुत्क्षिप्ता तेन मा कुपः ॥१३७॥
[12]एनं क्षमयतं त्यक्त्वा[13]ऽनुबन्धं बन्धुवत् परम् । कषाया नरकायैव यतोऽनन्तानुबन्धिनः ॥१३८॥
एवं **वज्रायुध**गिरा मुक्तवैरास्त्रयोऽपि हि । अन्योन्यं क्षमयामासुः [14]संवेगावेगभाजिनः ॥१३९॥
चक्रभृत् पुनराचख्यौ **क्षेमङ्कर**जिनान्तिके । त्रयोऽपि यूयमचिरात् परिव्रज्यां ग्रहीष्यथ ॥१४०॥
करिष्यति तपो **रत्नावलीं शान्तिमती** पुनः । मृत्वा चाऽनशनेनाऽसावी**शानेन्द्रो** भविष्यति ॥१४१॥
तदैव केवलज्ञानं घातिकर्मपरिक्षयात् । युवयोः **पवनवेगाऽजितसेनौ!** भविष्यति ॥१४२॥
युवयोः केवलज्ञानमहिमानं महोत्सवात् । एत्य [15]स्वदेहपूजां च स **ईशानः** करिष्यति ॥१४३॥
कालेन च ततश्च्युत्वे**शानेन्द्रः** प्राप्य मर्त्यताम् । उत्पन्नकेवलज्ञानः सिद्धिमासादयिष्यति ॥१४४॥
त्रिकालज्ञानविषयं तच्छ्रुत्वा चक्रिणो वचः । व्यस्मयन्त [16]स्मेरदृशः सर्वे तत्र सभासदः ॥१४५॥
¶राजा **पवनवेग**स्तत्सुता **शान्तिमती** च सा । विद्याधरोऽ**जितसेन**स्तं प्रणम्यैवमूचिरे ॥१४६॥
पिता स्वामी गुरुर्देवस्त्वमस्माकं जगत्पते! । मिथोऽ[17]पायप्रसक्तानां को नस्त्राताऽपरो भवेत्? ॥१४७॥
आहत्याऽन्योन्यमद्यैवाऽयास्याम नरके वयम् । अस्माकं नाऽभविष्यच्चे[18]त्तद्द्वारे त्वद्वचोऽर्गला ॥१४८॥
तत् स्वामिन्ननुमन्यस्वाऽद्यैव संसारभीरवः । शरणाय व्रजिष्यामः **क्षेमङ्कर**जिनेश्वरम् ॥१४९॥
इति विज्ञपयन्तस्तेऽनुज्ञाताश्चक्रवर्तिना । उपेत्य प्राव्रजन् **क्षेमङ्कर**तीर्थङ्करान्तिके ॥१५०॥
ते तपस्तेपिरेऽत्युग्र[19]मनुग्रमनसश्चिरम् । कृशीभवद्भिः शरीरैः [20]परिहारभयादिव ॥१५१॥
तत्र **शान्तिमती** मृत्वे**शानकल्पा**धिपोऽभवत् । तदैव केवलज्ञानमभूददितरयोः पुनः ॥१५२॥
तयोश्च केवलज्ञानमहिमानमुपेत्य सः । **ईशानेन्द्रो**ऽकरोत् तस्य निजदेहस्य चाऽर्चनम् ॥१५३॥
ततश्च्युत्वा स **ईशानो** जन्मन्यन्यत्र सिद्धवान् । आयुःक्षयेऽपरौ तौ च तद्भवेऽपीयतुः शिवम् ॥१५४॥
¶स तु **वज्रायुध**श्चक्री स**सहस्रायुधो** भुवम् । [21]सहस्राक्षः स**जयन्त** इव द्यां पर्यपालयत् ॥१५५॥
**सहस्रायुध**पत्नी तु **जयना**त्यन्यदा निशि । स्वप्ने ददर्श [22]कनकशक्तिं किरणदन्तुराम् ॥१५६॥
तया च प्रातराख्याते पतिर्व्याख्यातवानिति । तव पुत्रो महाशक्तिर्नूनं देवि! भविष्यति ॥१५७॥
तदैव देवी सा गर्भमुदुवाह सुदुर्वहम् । कालेऽजनिष्ट तनयरत्नं सस्यमिवो[23]र्वरा ॥१५८॥

१. ***द्युतिभास्करान्*** पा. ॥ २. ***व्योम्नि*** पाता. वा.१-२ ॥ ३. इन्द्रधनुः ॥ ४. नाव इव ॥ ५. माययोत्पादितानिव ॥ ६. नाशम् ॥ ७. मेघानाम् ॥ ८. ***सुखमीदृशम्*** दे. मु. ॥ ९. निर्धनः ॥ १०. नाशात् ॥ ११. ***क्रमात्*** सं. दे. ला. छा. ॥ १२. ***एतं*** खंता. पाता. वा.१-२ ॥ १३. आग्रहम् ॥ १४. वैराग्यावेशवन्तः ॥ १५. स्वमृतदेहसंस्कारम् ॥ १६. प्रफुल्लदृष्टयः ॥ १७. घातकरणे आसक्तानाम् ॥ १८. नरकद्वारे ॥ १९. अनुग्रं कोमलं मनो येषां ते ॥ २०. नाशभयात् ॥ २१. जयन्ताभिधनिजपुत्रसहित इन्द्रः ॥ २२. कनकवर्णां किरणैर्भासुरां शक्तिम् ॥ २३. पृथ्वी धान्यमिव ॥

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

पिता च **जयना**देवीदृष्टस्वप्नानुसारतः । तस्य बालस्य **कनकशक्ति**रित्यभिधां व्यधात् ॥१५९॥
स क्रमात् समतिक्रान्तशैशवो नवयौवनः । [१]**सुमन्दिरपुरे**शस्य तनयां **मेरुमालिनः** ॥१६०॥
**मल्लादेवी**कुक्षिभवां रूपलावण्यशालिनीम् । नामतः **कनकमाला**मुपयेमे यथाविधि ॥१६१॥युग्मम्॥
¶इतश्च [२]मशक्यसारे **श्रीसारे** प्रवरे पुरे । समभूद**जितसेन** इति नाम्ना महीपतिः ॥१६२॥
तस्य चाऽसीत् **प्रियसेना**देवीकुक्षिभवा सुता । **वसन्तसेना कनकमाला**याः सा सखी वरा ॥१६३॥
पिता **वसन्तसेना**या अपश्यन्नुचितं वरम् । [३]प्रैषीत् स्वयंवरां तां तु पुत्रीं **कनकशक्त**ये ॥१६४॥
ततः **कनकशक्ति**स्तामुपायंस्त यथाविधि । तस्याश्च [४]पैतृष्वस्रीयो रुरोषोद्वाहतस्ततः ॥१६५॥
उद्याने **कनकशक्ति**र्विहरन्नेकदैककम् । उत्पतन्तं पतन्तं चाऽपश्यत् [५]कुर्कुटवन्नरम् ॥१६६॥
ऊचे **कनकशक्ति**स्तं किं त्वमुत्पात-पातकृत् ? । [६]पतङ्ग इव भोः! शंस रहस्यं भवतो न चेत् ॥१६७॥
सोऽप्युवाच पुमानेवं त्वादृशानां महात्मनाम् । रहस्यमप्याख्यातव्यं तदाख्यातं गुणाय हि ॥१६८॥
विद्याधरोऽस्मि **वैताढ्य**शैलादर्थेन केनचित् । [७]अग्रतोऽगां [८]वलितः सन्निहोद्याने [९]समापतम् ॥१६९॥
क्षणमस्थामहमिह पश्यन्नुद्यानरम्यताम् । अस्मार्षं याव[१०]दुत्पित्सुर्विद्यामाकाशगामिनीम् ॥१७०॥
विद्यायाः पदमेकं मे विस्मृतं तावदेव मे । [११]आबद्धपक्षः पक्षीवोत्पतामि निपतामि च ॥१७१॥युग्मम्॥
व्याजहार कुमारोऽपि पुरस्तादपरस्य चेत् । युज्यते पठितुं विद्या महापुरुष! तत् पठ ॥१७२॥
सोऽप्यूचे सामान्यपुंसां पुरो विद्या न पठ्यते । महात्मनां त्वादृशां सा देया पाठे तु का कथा? ॥१७३॥
सोऽथ विद्याधरो विद्यां पदहीनां पपाठ ताम् । [१२]पदानुसारिधीराख्यत् कुमारोऽपि हि तत्पदम् ॥१७४॥
विद्याधरः पुनर्भूतविद्याशक्तिस्ततश्च सः । कुमाराय ददौ विद्याः कृतज्ञा हि विवेकिनः ॥१७५॥
ययौ विद्याधरः सोऽथ कुमारोऽपि यथाविधि । विद्यास्ताः साधयित्वा च महाविद्याधरोऽभवत् ॥१७६॥
¶[१३]पैतृष्वसेयो [१४]**वसन्तसेना**याः स च रोषभाक् । अक्षमः **कनकशक्ते**रपकर्तुं मनागपि ॥१७७॥
लज्जया भक्तपानादि परिहृत्य विपद्य च । **हिमचूल** इति नाम्ना त्रिदशः समजायत ॥१७८॥युग्मम्॥
**वसन्तसेना-कनकमाला**भ्यां सहितो महीम् । बभ्राम **कनकशक्ति**र्विद्याशक्त्या समीरवत् ॥१७९॥
स जगामैकदा स्वैरी **हिमवन्तं** महागिरिम् । तत्राऽपश्यच्च **विपुलमत्या**ख्यं चारणं मुनिम् ॥१८०॥
उत्तप्तस्वर्णवर्णं तं तपस्तेज इवाऽ[१५]ङ्गवत् । कृशाङ्गं विजिता[१६]नङ्गमवन्दिष्ट स भक्तितः ॥१८१॥
धर्मलाभं ततः प्राप्य देवीभ्यां सममेव सः । अश्रौषीद् भवदावाग्निप्रावृषं धर्मदेशनाम् ॥१८२॥
ततः प्रबुद्धः **कनकशक्ति**र्देव्यावुभे अपि । राज्यश्रीवद् गृहे मुक्त्वा प्रवव्राज महामतिः ॥१८३॥
देव्यौ ते अपि संविग्ने विवेकिन्यौ शुभाशये । आर्याया **विमलमतेः** पार्श्वे जगृहतुर्व्रतम् ॥१८४॥
¶विहरन् **कनकशक्ति**र्गत्वा **सिद्धिपदे** गिरौ । शिलायामेकरात्रिक्या तस्थौ प्रतिमया स्थिरः ॥१८५॥
तथा च तं स्तम्भमिव स्थिरं दृष्ट्वा दुराशयः । **हिमचूल**सुरः कर्तुमुपसर्गान् प्रचक्रमे ॥१८६॥
तस्योपसर्गान् कुर्वाणं तं च [१७]गीर्वाणपांसनम् । क्रुधा न्यत्रासयन् विद्याधराः पक्षे सतां जनः ॥१८७॥
प्रतिमां पारयित्वा तां विहरन्नगमत् ततः । स [१८]तपःसञ्चयगिरिर्नगरीं **रत्नसञ्चयाम्** ॥१८८॥
अथ **सूरनिपाता**ख्ये तत्रैवोपवने मुनिः । चक्रे गिरिरिवाऽकम्प्रः प्रतिमामेकरात्रिकीम् ॥१८९॥
तस्य च क्षपकश्रेणिमारूढस्य क्षणादपि । घातिकर्मक्षयाज्जज्ञे केवलज्ञानमुज्ज्वलम् ॥१९०॥

---

१. *सुमन्दिरपुरे तस्य* मु. ॥ २. *मशकासारे* मु.; मशक्यसार इति विशेषनाम (नगरस्य) स्यात् । यद्वा मशकिन् - उदुम्बरवृक्षः तद्वदसारे - मशक्यसारे ॥ ३. *प्रौषीत्* मु. ॥ ४. पितुः स्वसा ('फोई' इति भाषायाम्) तस्या अपत्यम् ॥ ५. *कुक्कुटवन्नरम्* ता. दे. पा. खंता. वा.१-२ ॥ ६. पक्षी ॥ ७. *अग्रतोऽगा* मु. ॥ ८. *चलितः* ला. ॥ ९. *समापदम्* मु. ॥ १०. उत्पतितुमिच्छुः ॥ ११. ईषद्बद्धौ पक्षौ यस्य सः ॥ १२. पदस्याऽनुसारिणी बुद्धिर्यस्य सः ॥ १३. *पैतृष्वस्रेयो* दे. मु. ला. छा. पा. ॥ १४. *वसन्तसेनायां* मु. ॥ १५. मूर्तिमत् ॥ १६. विजितः अनङ्गः कामो येन ॥ १७. अधमदेवम् ॥ १८. तपसां सञ्चयस्य समूहस्य गिरिरिव गिरिः स मुनिरित्यर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य केवलमहिमामुपेत्य विदधु: सुरा: । **हिमचूल**स्तु तद्दृष्ट्वा भीतस्तं शरणं ययौ ॥१९१॥

**वज्रायुधो**ऽपि तस्यर्षेर्यथावन्[1]महिमां व्यधात् । श्रुत्वा च देशनां तस्माज्जगाम स्वपुरीं पुन: ॥१९२॥

¶अन्यदा समवासार्षीत् तत्र **क्षेमङ्कर:** प्रभु: । कोटिसङ्ख्यै: सेव्यमान: सुरा-ऽसुर-नरेश्वरै: ॥१९३॥

**वज्रायुधा**य चाऽऽचख्युरुपेत्याऽऽयुक्तपूरुषा: । स्वामिनं समवसृतं **क्षेमङ्कर**जिनेश्वरम् ॥१९४॥

स्वर्णस्य द्वादश सार्धा: कोटीस्तेभ्य: प्रदाय स: । **क्षेमङ्करं** तीर्थकरं जगाम सपरिच्छद: ॥१९५॥

तं त्रि: प्रदक्षिणीकृत्य नमस्कृत्य च भक्तित: । उपविश्याऽनु**शक्रं** च सोऽश्रौषीद् धर्मदेशनाम् ॥१९६॥

देशनान्ते प्रभुं नत्वा चक्री **वज्रायुधो**ऽवदत् । स्वामिन् ! भीतोऽस्मि संसारार्णवादस्माद् दुरुत्तरात् ॥१९७॥

स्वे **सहस्रायुधं** राज्ये यावन्यस्याऽऽ[2]पताम्यहम् । तावदा[3]गमयस्वेह दीक्षां दातुं मम प्रभो! ॥१९८॥

न प्रमादो विधातव्य इत्युक्त: स्वामिना नृप: । गत्वा पुरीं निजे राज्ये **सहस्रायुध**मादधौ ॥१९९॥

स **सहस्रायुधे**नाऽथ कृतनिष्क्रमणोत्सव: । आरुह्य शिबिकां गत्वा **क्षेमङ्कर**जिनान्तिके ॥२००॥

चतु:सहस्र्या राज्ञीनां भूभुजां च [4]किरीटिनाम् । सुतानां सप्तशत्या च सहितो व्रतमाददे ॥२०१॥युग्मम्॥

विविधाभिग्रहपर: सहमान: परीषहान् । **वज्रायुध**र्षिर्विहरन्नगमत् **सिद्धिपर्वत**म् ॥२०२॥

उपसर्गान् सहिष्येऽहमिति बुद्ध्या स शुद्धधी: । स्तम्भे [5]**वैरोचने** तत्र प्रतिमां वार्षिकीं दधौ ॥२०३॥

¶इतश्चाऽ**श्वग्रीव**सुतौ चिरं भ्रान्त्वा भवाटवीम् । **मणिकुम्भो मणिकेतु:** कृत्वा बालतपोऽन्यदा ॥२०४॥

उत्पन्नावसुरत्वेन [6]प्रारब्धस्वैरचर्यया । तदा तत्र समायातौ तं महर्षिमपश्यताम् ॥२०५॥

ततस्ताव**मिततेजो**भववैरेण तं मुनिम् । प्रारेभाते उपद्रोतुं महाद्रुं महिषाविव ॥२०६॥

सिंहीभूयोभयोस्तस्य पार्श्वयोस्तावुभावपि । नखैश्चक्षतुर्देहं खरैर्वज्राङ्कुरैरिव ॥२०७॥

अथ तं कुञ्जरीभूयाऽन्तर्वेदिमिव जघ्नतु: । करघातैर्दन्तघातै: पादघातैश्च दु:सहै: ॥२०८॥

भूयश्च भुजगीभूय तस्यर्षे: पार्श्वयोर्द्वयो: । दृढबन्धं ललम्बाते [7]योक्त्रपाशाविवा[8]ऽनस: ॥२०९॥

[9]दधानौ [10]कर्तिकां तीक्ष्णां निजदंष्ट्रासहोदराम् । उपदुद्रुवतुरथ राक्षसीभूय तं मुनिम् ॥२१०॥

इत्थं च [11]नाना तौ यावत् तमुपाद्रवतां मुनिम् । तावद् वन्दितुमर्हन्तं [12]चेलु: पत्न्यौ बिडौ[13]जस: ॥२११॥

**रम्भा-तिलोत्तमा**द्यास्तास्ततस्त्रिदशयोषित: । मुनौ तत्रोपसर्गांस्तौ कुर्वाणौ ददृशु: सुरौ ॥२१२॥

आ:! पापौ! किमिहाऽऽरब्धं युवाभ्यां मुनिपुङ्गवे ? । इति ब्रुवाणा वेगात् ता अवतेरुर्नभस्तलात् ॥२१३॥

तत्र चाऽवतरन्तीस्ता: प्रेक्ष्य तौ क्षुभितौ सुरौ । त्रेसतु: सूर्यभालोके कियत् तिष्ठन्ति कौशि[14]का: ? ॥२१४॥

इन्द्रस्येव मुनीन्द्रस्य पुरस्तात् तस्य भक्तित: । नाट्यं प्रपञ्चयामासू **रम्भा**द्या: सुरयोषित: ॥२१५॥

तत: [15]पवित्रमानिन्यस्तं वन्दित्वा महामुनिम् । देव्यस्ता: सपरीवारा: स्वं स्वं स्थानं पुनर्ययु: ॥२१६॥

प्रतिमां पारयित्वा तां महर्षि: सोऽपि वार्षिकीम् । अतुल्ययम-नियमो विजहार वसुन्धराम् ॥२१७॥

**सहस्रायुध**राजोऽपि राजश्रेणिविराजित: । राजपुत्रीमिवो[16]ढां [17]राज्यश्रियमभुक्त स: ॥२१८॥

एकदा समवासार्षीन्नानामुनिगणावृत: । तस्य पुर्यां गणधरो नामत: **पिहितास्रव:** ॥२१९॥

तं **सहस्रायुधो**ऽभ्येत्य ववन्दे भक्तिभावित: । अश्रौषीत् कर्णपीयूषवृष्टिं तस्य च देशनाम् ॥२२०॥

इन्द्रजालमिवाऽसारं संसारं तत्क्षणाद्विदन् । सद्य: स राजा स्वे राज्ये पुत्रं **शतबलिं** [18]न्यधात् ॥२२१॥

**पिहितास्रव**पादान्ते प्रव्रज्यां स्वयमाददे । आदाय द्विविधां शिक्षां विजहार वसुन्धराम् ॥२२२॥

विहरन्नपरेद्युश्च स **सहस्रायुधो** मुनि: । **वज्रायुध**स्य राजर्षे: [19]सोमस्येव बुधोऽमिलत् ॥२२३॥

१. *०महिम* खंता. पाता. ॥ २. आगच्छामि ॥ ३. प्रतीक्षस्व ॥ ४. मुकुटबद्धानाम् ॥ ५. ***विरोचने*** पा. ला. मु. । वैरोचननामके शिखरे ॥ ६. प्रारब्धा या स्वैरचर्या स्वेच्छागमनं तया ॥ ७. योक्त्रम् 'जोतर' इति भाषायाम् ॥ ८. शकटस्य ॥ ९. ***तन्वानौ*** ला. ॥ १०. ***कर्त्रिकाम्*** मु. ॥ ११. विविधप्रकारेण ॥ १२. ***चेयु:*** खंता. ॥ १३. इन्द्रस्य ॥ १४. घूका: ॥ १५. आत्मानं पवित्रं मन्यन्ते ता: ॥ १६. परिणीताम् ॥ १७. ***राजश्रिय:*** खंता. पाता. वा.१-२ ॥ १८. ***व्यधात्*** दे. मु. विना ॥ १९. चन्द्रस्येव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयुक्तौ तौ पिता-पुत्रौ तपो-ध्यानपरौ सदा। परीषहसहौ स्वाङ्गेऽप्यनपेक्षौ क्षमाधवौ ॥२२४॥
विहरन्तौ पुर-ग्रामा-ऽरण्यादिष्वनवस्थितौ। गमयामासतुः प्राज्यं कालमेकाहवत्[१] सुखम् ॥२२५॥
तत **ईषत्प्राग्भाराख्यं** गिरिमारुह्य तौ मुनी। प्रपेदाते अनशनं पादपोपगमाभिधम् ॥२२६॥

आयुःक्षये वपुरपास्य महामुनीन्द्रौ
**ग्रैवेयके**ऽथ परमर्द्धिपदे तृतीये।
सद्योऽहमिन्द्रपदमद्भुतमाप्य पञ्च-[२]
विंशत्यपांपतिमितस्थिति तस्थतुस्तौ[३] ॥२२७॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये पञ्चमे[४] पर्वणि श्री**शान्तिनाथ**-
देवीयाष्टम-नवमभववर्णनो नाम
तृतीयः सर्गः[५] ॥

१. एकदिनवत् ॥ २. २५ सागरोपममिता स्थितिस्तयोस्तत्रेत्याशयः। *पञ्चविंश्यर्णवोपममितस्थिति* छा. मु., *पञ्चविंशार्णवोपममितस्थिति* दे. ॥ ३. *जग्मतुस्तौ* सं. ता. ला. पा. खंता. पाता. वा.१-२ ॥ ४. *पञ्चमपर्वणि* पाता. वा.१-२ ॥ ५. *०सर्गः समाप्तः* खंता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥चतुर्थः सर्गः॥

अथाऽस्य **जम्बूद्वीपस्य प्राग्विदेहे**षु विस्तृते । विजये **पुष्कलावत्यां सीतायाः** सरितोऽन्तिके ॥१॥
मध्यखण्डस्य मध्येऽस्ति नगरी **पुण्डरीकिणी** । [1]श्रियो निधानमद्वैतं सरो[2]ऽन्तःपुण्डरीकवत् ॥२॥[3]युग्मम्॥
तस्यां **घनरथो** राजा खण्डितारिमनोरथः । अभून् महारथ[4]प्रष्ठो भूमिष्ठ इव वासवः ॥३॥
तस्याऽभूतामुभे पत्न्यौ **गङ्गा-सिन्धू** इवाऽम्बुधेः । एका **प्रियमति**र्नाम द्वितीया तु **मनोरमा** ॥४॥
¶**वज्रायुध**स्य जीवोऽपि च्युत्वा **ग्रैवेयका**दथ । **प्रियमत्या** महादेव्या उदरे समवातरत् ॥५॥
तदा च रजनीशेषे स्वप्नान्तर्ददर्श[5] तया । वर्षन् गर्जं[6]स्तडिन्माली मेघोऽन्तर्वदनं विशन् ॥६॥
तया तं प्रातराख्यातं स्वप्नं व्याख्यन् महीपतिः । पृथ्वीसन्तापहृन् मेघ इव भावी तवाऽऽत्मजः ॥७॥
¶**सहस्रायुध**जीवोऽपि च्युत्वा **ग्रैवेयका**त् ततः । **मनोरमा**महादेव्याः कुक्षौ समवतीर्णवान् ॥८॥
तयाऽपि ददृशे स्वप्ने स्वमुखान्तर्विशन् रथः । सौवर्णकिङ्किणीमाली [7]पताकी [8]लौहनेमिकः ॥९॥
तयाऽपि स्वप्नमाख्यातं व्याचख्याविति भूपतिः । सूनुर्महारथप्रष्ठस्तव देवि! भविष्यति ॥१०॥
समये सुषुवाते ते क्रमेण तनयावुभौ । मूर्त्यन्तरमिव प्राप्तौ दिवाकर-निशाकरौ ॥११॥
¶अथ **प्रियमति**सूनोः शुभेऽहनि महीपतिः । स्वप्नानुसारतो **मेघरथ** इत्यभिधां व्यधात् ॥१२॥
राज्ञीस्वप्नानुसारेण द्वितीयस्याऽपि भूपतिः । सूनो**र्दृढरथ** इति नामधेयमकल्पयत् ॥१३॥
**मेघरथ-दृढरथौ** दृढ[9]सौभ्रात्रशालिनौ । क्रमेण ववृधाते तौ [10]सीरि-शार्ङ्गधराविव ॥१४॥
राज्यस्थानमनङ्गस्य कामिनीजनकार्मणम् । तौ रूपोत्कर्षजनकं यौवनं प्रापतुः क्षणात् ॥१५॥
¶राज्ञोऽथ **निहतशत्रोः सुमन्दिरपुरे**शितुः । एत्याऽमात्यो **घनरथं** प्रणम्यैवं व्यजिज्ञपत् ॥१६॥
[11]तैस्तैर्गुणैरुद्यता वः कीर्तिः [12]कुन्दोज्ज्वला प्रभो! । प्रभेव [13]हरिणाङ्कस्य प्रमोदयति कं नहि? ॥१७॥
दूरस्थितोऽपि **निहतशत्रु**र्युष्मासु [14]सौहृदी । सम्बन्धात् सन्निधीभूय विशेषस्नेहमिच्छति ॥१८॥
तिष्ठन्ति कन्या **निहतशत्रो**स्तस्य महीपतेः । पृथग् जगत्त्रयस्त्रीणां स्वामितायामिव स्थिताः ॥१९॥
तत्र **मेघरथ**स्य द्वे एका **दृढरथ**स्य च । दि[15]त्सते **निहतशत्रु**र्भूयास्तं सुहृदौ युवाम् ॥२०॥
राजा **घनरथो**ऽप्यूचे [16]घनध्वनितधीरवाक् । घनीभवतु नौ स्नेहः सम्बन्धेनाऽमुनाऽधुना ॥२१॥
प्रवाहैरिव सम्बन्धै[17]रापतद्भिः पुरः पुरः । सतां स्नेहाः प्रवर्धन्ते नद्यः [18]सानुमतामिव ॥२२॥
सोऽप्यमात्यो जगादैवं देव! दै[19]वज्ञपुङ्गवम् । आहूयाऽऽदिश लग्नं मे [20]कल्यं [21]कल्याणकर्मसु ॥२३॥
प्रस्थापय कुमारौ त[22]न्मारतुल्यौ वपुःश्रिया । कन्योद्वाहमिषात् स्वामिन्नस्मत्स्वाम्यनुगृह्यताम् ॥२४॥
ज्ञानिना लग्नमासूत्र्याऽऽगमनं च कुमारयोः । प्रतिपद्य नरेन्द्रोऽथ सचिवं विससर्ज तम् ॥२५॥
[23]स हृष्टः सचिवः शीघ्रं **सुमन्दिरपुरं** ययौ । नृपं **निहतशत्रुं** च तदाख्यानादहर्षयत् ॥२६॥
प्रैषीद् **घनरथो मेघरथं दृढरथान्वितम्** । [24]सवसन्तं स्मरमिव **सुमन्दिरपुरं** प्रति ॥२७॥
सामन्ता-ऽमात्य-सेनानी-सेनापरिवृतौ ततः । सरिदोघाविवाऽविघ्नं कुमारौ तौ प्रचेलतुः ॥२८॥
गत्वा प्रयाणै[25]रव्यग्रैर्मर्यादापालनार्णवौ । **सुरेन्द्रदत्त**नृपतेर्देशसीमन्यथोषतुः ॥२९॥

---

१. ***श्रेयो०*** पाता. वा.१-२ ॥ २. अन्तः-मध्ये पुण्डरीकाणि यस्य तत् , तस्येव ॥ ३. खंता. पाता. वा.१-२ प्रतिषु न ॥ ४. अग्रणी ॥ ५. ***०दृशेऽनया*** ता. खंता. ॥६. विद्युतां माला सन्त्यस्य ॥७. ध्वजयुक्तः ॥८. ***लोह०*** मु. खंता. पाता. वा.१-२ । नेमिः-चक्रधारा ॥ ९. सुभ्रातुर्भावः सौभ्रात्रम् ॥ १०. बलदेव-वासुदेवाविव ॥ ११. ***तैस्तैर्गुणैरुच्यता वः*** दे.; ***तैस्तैर्गुणैरुपेता*** मु. ॥ १२. ***कीर्तिर्लोकम्पृणा*** सं. ता. ला. पा. खंता. पाता. वा.१-२ ॥ १३. चन्द्रस्य ॥ १४. सुहृदो भावः सौहृदं, तदस्ति यस्य सः; ***सम्प्रति*** ता. खंता. ॥१५. दातुमिच्छति ॥१६. मेघगर्जितगम्भीरवाक् ॥ १७. आगच्छद्भिः ॥ १८. पर्वतानाम् ॥ १९. ज्यौतिषिकम् ॥ २०. शुभम् । ***कल्यकल्याण०*** खंता.पाता. वा.१-२ ॥ २१. मङ्गलकार्येषु ॥ २२. कामदेवसमानौ ॥ २३. ***सुहृष्टः*** दे. मु. ॥ २४. ***सवसन्तस्मर०*** खंता. वा.१ ॥ २५. ***०रव्यग्रं०*** पाता. वा.१-२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶राज्ञा **सुरेन्द्रदत्तेन** दत्तशिक्षोऽभ्युपेत्य तम्। ऊचे **मेघरथं** दूतः [1]सावष्टम्भमिदं वचः ॥३०॥

**सुरेन्द्रदत्तो** नः स्वामी सुरेन्द्र इव विक्रमी। अस्मद्देशस्य मध्येन मा गास्त्वमिति वक्ति सः ॥३१॥

अस्मत्सीमानमुत्सृज्य गच्छ त्वमन्येन वर्त्मना। [2]समृगेन्द्रे गतिर्मार्गे मृगस्य कुशलाय न ॥३२॥

स्मित्वा **मेघरथो**ऽप्येव[3]मवादीद् वदतां वरः। अस्माकमयमेवाऽध्वा ऋजुः [4]स त्यज्यतां कथम्? ॥३३॥

पूरयन्त्य[5]वटान् वृक्षानुत्खनन्ति खनन्ति च। स्थलीस्तुङ्गा न चाऽध्वानं त्यजन्ति सरितोऽपि हि ॥३४॥

एते वयमनेनैव यास्यामो [6]वर्त्मनर्जुना। [7]अनृजुः स तु ते स्वामी स्वशक्तिं दर्शयत्वहो! ॥३५॥

इति **मेघरथे**नोक्तमशेषमपि तत्क्षणात्। गत्वा **सुरेन्द्रदत्ताय** राज्ञे दूतो न्यवेदयत् ॥३६॥

¶श्रुत्वा **सुरेन्द्रदत्त**स्तच्छ्रुत[8]हक्क इव द्विपः। [9]आध्मातताम्रताम्रास्यो रणभम्भामवीवदत् ॥३७॥

[10]निषादिनां [11]सादिनां च पत्तीनां रथिनामपि। तस्याऽऽपेतुः [12]समीकार्थीन्यथाऽनीकान्यनेकशः ॥३८॥

भटोद्भटकरास्फोटैर्धनुष्टङ्कारडम्बरैः। [13]अश्व-स्यन्दन-मातङ्ग-हेषा-चीत्कार-बृंहितैः ॥३९॥

[14]उष्ट्रग्राङ्काररावैश्च [15]वेसराणां [16]खुरस्वनैः। नादैश्च रणतूर्याणां जगद्बधिरयन् क्षणात् ॥४०॥

**सुरेन्द्रदत्त**नृपतिः सद्यः सर्वाभिसारतः। उपतस्थे **मेघरथं** रणातिथ्यविधित्सया ॥४१॥त्रिभिर्विशेषकम्॥

जैत्रं रथं **मेघरथो**ऽप्यथो **दृढरथश्च** सः। आरुरोह [17]युधे ध्वान्तध्वंसायेव दिवाकरः ॥४२॥

[18]शङ्कून् शल्यानि चक्राणि प्रासान् दण्डान् गदा अपि। तीरी-तद्वल-नाराचप्रभृतीन् विशिखानपि ॥४३॥

पाषाण-लोहगोलांश्च करैर्यन्त्रैश्च सैनिकाः[19]। [20]अस्त्रमेघा इवोन्नम्य सैन्ययोर्ववृषुर्द्वयोः ॥४४॥

नीरन्ध्रः शस्त्रसम्पातः सैन्ययोरुभयोरपि। तदाऽभूत् खेचरस्त्रीणां युद्धदर्शनविघ्नकृत् ॥४५॥

अस्त्रैरस्त्राण्यखण्ड्यन्ताऽभज्यन्त च रथै रथाः। समरे तत्र [21]यादांसि यादोभिरिव वारिधौ ॥४६॥

अस्खल्यमान[22]प्रसरैः क्षणादपि [23]परैरथ। [24]प्रभञ्जनैर्वनमिवाऽभञ्जि सैन्यं कुमारयोः ॥४७॥

क्रुद्धावथ कुमारौ तावद्वैतभुजविक्रमौ। परसैन्यं जगाहाते महासर इव द्विपौ ॥४८॥

[25]उद्भ्रान्तयोरिवाऽम्भोध्योस्तयोरस्त्रोर्मिमालिनोः। स्खलनाय न केऽप्यग्रे तस्थुः [26]प्रत्यर्थिसैनिकाः ॥४९॥

मथ्यमाने बले ताभ्यां [27]किरिभ्यामिक्षुवाटवत्। **सुरेन्द्रदत्तो**ऽधाविष्ट युवराजान्वितो [28]युधे ॥५०॥

**सुरेन्द्रदत्तः श्रीमेघरथेन** युयुधे समम्। युवराजो युवा तस्य समं **दृढरथेन** तु ॥५१॥

अन्योऽन्यं चिच्छिदुः शस्त्राण्यस्त्राणि च बबाधिरे। [29]रणाजिरे रेजिरे ते चत्वारो लोकपालवत् ॥५२॥

ते कुर्वाणाः करास्फोटं तर्जयन्तः परस्परम्। दोर्युद्धेनाऽभ्ययुध्यन्त बन्धज्ञा इव पन्नगाः ॥५३॥

ते चत्वारः क्षणं रेजुर्युद्धे तस्मिन् महौजसः। [30]तिर्यगुत्क्षिप्तदोःशृङ्गा **गजदन्ता** इवाऽद्रयः ॥५४॥

**मेघरथ-दृढरथ**कुमाराभ्यामथ क्षणात्। खेदयित्वा बबन्धाते वन्येभाविव तावुभौ ॥५५॥

देशे तस्मिन्निजामाज्ञां भ्रमयित्वा स्वदेशवत्। कुमारावीयतुः प्रीतौ **सुमन्दिरपुरं** ततः॥५६॥

¶अभ्याजगाम **नि[31]हतशत्रू** राजकुमारयोः। अन्यत्राऽप्यतिथावभ्युत्थेयं तादृक्षुः किं पुनः ? ॥५७॥

तावालिलिङ्ग नृपतिश्चुचुम्ब च शिरस्तले। सुखाद्वैतमनुभवन्नहमिन्द्र इवाऽमरः ॥५८॥

सुलग्ने **मेघरथेन प्रियमित्रा-मनोरमे**। ज्यायस्यौ कन्यके राजा विधिना पर्यणाययत् ॥५९॥

कन्यां **सुमति**नामानं तृतीयां तु कनीयसीम्। उपयेमे **दृढरथो** राज्ञा धौत[32]पदाम्बुजः ॥६०॥

---

१. सगर्वम् ॥ २. सिंहसहिते मार्गे ॥ ३. ***प्येवमवदद्*** पा. दे. छा. मु., खंता. पाता. वा.१-२ ॥ ४. ***संत्यज्यताम्*** दे. छा. ॥ ५. गर्तान् ॥ ६. वर्त्मना ऋजुना-सरलमार्गेण ॥ ७. कुटिलः ॥ ८. गजाह्वानशब्दः ॥ ९. तप्तताम्रवद् रक्तमुखः ॥ १०. हस्त्यारोहिणाम् ॥ ११. अश्वारोहिणाम् ॥ १२. युद्धार्थीनि ॥ १३. अश्वानां हेषारवः, स्यन्दनानां(रथानां) चीत्कारः, गजानां बृंहितम् ॥ १४. ग्राङ्कारः उष्ट्राणां शब्दः ॥ १५. अश्वतराणां 'खच्चर' इति भाषायाम् ॥ १६. ***खरस्वनैः*** मु. ॥ १७. ***युधि*** सं. छा. ला. पाता. । युद्धाय ॥ १८. सर्वाणि शस्त्रविशेषाणि, शङ्कुः-बाणविशेषः, शल्यं-बाणप्रकारः, प्रासः-कुन्तः (भालो), तीरी-बाणप्रकारः, तद्वलं-मूषकपुच्छाकारो बाणविशेषः, नाराचः-बाणः ॥ १९. ***सैन्यकाः*** दे. मु. ॥ २०. ***अस्त्रं मेघा*** छा. ॥ २१. जलजन्तवः ॥ २२. वेगैः ॥ २३. शत्रुभिः ॥ २४. पवनैः ॥ २५. क्षुब्धयोरिव ॥ २६. शत्रुसैनिकाः । ***०र्थिसैन्यकाः*** दे. मु. ॥ २७. ***करिभ्या०*** मु. ॥ २८. ***०युधि*** पाता. वा.१-२ ॥ २९. रणाङ्गणे ॥ ३०. तिर्यक् उत्क्षिप्ता दोषो-बाहव एव शृङ्गाणि यैस्तैः ॥ ३१. ***निहतशत्रुराज०*** ता. छा. ला., ***निहतशत्रुराजा*** पा. दे. ॥ ३२. ***राजधौतपदाम्बुजः*** दे. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋद्ध्या महत्या [1]वीवाहे यथावद्विहितेऽथ तौ । विसृष्टौ गौरवाद् राज्ञा चेलतुः स्वां पुरीं प्रति ॥६१॥
¶**सुरेन्द्रदत्तं** स्वे राज्ये युवराजसमन्वितम् । तथैव स्थापयित्वा तौ जग्मतुर्नगरीं निजाम् ॥६२॥
सह प्रियाभिस्तौ भोगान् बुभुजाते महाभुजौ । [2]इन्द्रोपेन्द्राविवैकत्र मिलितौ प्रीतियोगतः ॥६३॥
**प्रियमित्रा नन्दिषेणं मेघसेनं मनोरमा** । सुषुवाते **मेघरथ**पत्न्यौ पुत्रद्वयं क्रमात् ॥६४॥
पत्नी **दृढरथ**स्याऽपि प्रासूत **सुमतिः** सुतम् । **रथसेना**भिधं [3]चारुगुणरत्नैकरोहणम् ॥६५॥
राजा **घनरथो**ऽन्येद्यु[4]रन्तरन्तःपुरं सुखम् । कलत्रैः पुत्र-पौत्रैश्च यूथद्विप इवाऽऽवृतः ॥६६॥
विनोदैर्विविधैरस्थाद् यावत् तावत् **सुसेनया** । व्यज्ञप्येवं गणिकया [5]चरणायुधहस्तया ॥६७॥युग्मम्॥
देवाऽयं [6]ताम्रचूडो मे चूडारत्नं स्वजातिषु । कस्याऽपि ताम्रचूडेन जीयते जातुचिन्न हि ॥६८॥
जीयते यदि कस्याऽपि कुक्कुटेनैष कुक्कुटः । दीनाराणां [7]तदा लक्षं पणे तस्य ददाम्यहम् ॥६९॥
अपरस्याऽपि कस्याऽपि यद्यस्ति [8]चरणायुधः । मत्प्रतिज्ञापणममुं स उत्क्षिपतु तत् प्रभो! ॥७०॥
देवी **मनोरमा**ऽथोचे पणितेनाऽमुनैव मे । ताम्रचूडस्ताम्रचूडेनाऽमुना युध्यतामिह ॥७१॥
एवमस्त्विति राज्ञोक्ते राज्ञी सद्यो **मनोरमा** । आनाययच्चेटिकया **वज्रतुण्डा**ख्यकुक्कुटम् ॥७२॥
द्वावप्युत्तारितौ भूमाव[9]ङ्कपत्ती इवाऽथ तौ । विचित्रपादगतिकौ प्रनृत्यन्तौ प्रजह्रतुः ॥७३॥
उत्पेततुः पेततुश्च सम्रतुश्चाऽपसम्रतुः । ददतुः [10]प्रतीषतुश्च तौ प्रहारान् परस्परम् ॥७४॥
प्रचण्डचञ्चु-चरणप्रहारोद्भूतशोणितैः । [11]ताम्राऽपि ताम्राऽभूच्चूडा [12]ताम्रचूडाग्र्ययोस्तयोः ॥७५॥
पक्षिरूपाविव [13]नरौ सायुधौ चरणायुधौ । नखान् परस्परस्याऽङ्गे तीक्ष्णांश्चिक्षिपतुर्मुहुः ॥७६॥
जयत्ययं महादेव्याः **सुसेना**या जयत्ययम् । इति क्षणं जयभ्रान्तिरभून्नो कस्यचिज्जयः ॥७७॥
आयुध्यमानयोरित्थं तयोर्**घनरथो**ऽवदत् । द्वयोरप्यनयोर्मध्यान्नैकोऽप्येके[14]न जे[15]ष्यते ॥७८॥
ऊचे **मेघरथो**ऽप्येवमनयोर्युध्यमानयोः । किमित्येकस्य न जयो नैकस्य च पराजयः? ॥७९॥
ततो ज्ञानत्रयधरो राजा **घनरथो**ऽब्रवीत् । श्रूयतामनयोः पूर्वभववृत्तमशेषतः ॥८०॥
अस्मिन्नेव **जम्बूद्वीपे** क्षेत्रे[16] **ऐरावता**भिधे । अस्ति **रत्नपुरं** नाम नानारत्नोत्करं पुरम् ॥८१॥
अभूतां वणिजौ तत्र द्वौ मिथो मैत्र्यशालिनौ । एको [17]**धनवसु**र्नाम **दत्तो** नामाऽपरः पुनः ॥८२॥
[18]अनिवृत्तधनाशौ तौ तृषितौ चातकाविव । भाण्डैर्नानाविधैर्भृत्वा शकटी-शकटादिकम् ॥८३॥
ग्रामा-ऽऽकर-पुर-द्रो[19]णमुखादिषु सदा युतौ । भ्रेमतुर्व्यवहाराय दारिद्र्यपितराविव ॥[20]८४॥[युग्मम्]॥
तृषितान् क्षुधितान् श्रान्तान् [21]मन्दान् [22]व्यङ्गान् कृशानपि । [23]शीता[24]लूष्णालु-तृष्णालूनतिभाराधिरोपणैः ॥८५॥
[25]प्रतोदैर्यष्टिघातैश्च लाङ्गूलोन्मोटनैरपि । वाहयामासतु[26]र्गास्तौ परमाधार्मिकाविव ॥८६॥[युग्मम्]
[27]क्षुरैस्तं[28]तक्षतुः पृष्ठान्युच्छूनानि च तौ गवाम् । [29]प्राग्वेधे त्रुटिते नासात्वचं विवि[30]धतुः पुनः ॥८७॥
कालेऽप्यमुञ्चतां नोक्ष्[31]णो [32]मङ्क्ष्वीप्सितयियासया । बुभुजाते च गच्छन्तौ विलम्बस्याऽसहौ स्वयम् ॥८८॥
कूटतुला-कूटमान-कूटनाणककर्मभिः । [33]कूटार्घकथनैश्चाऽपि तावमोहयतां जनम् ॥८९॥
अवञ्चयेतां तौ विश्वं गो[34]मायू इव मायिनौ । एकद्रव्याभिलाषाच्च युध्येते स्म परस्परम् ॥९०॥
मिथ्यात्वमोहितमती निर्दयौ [35]परुषौ सदा । लोभाघ्रातौ न धर्मस्य तौ वार्त्तामपि चक्रतुः ॥९१॥

---

१. *०विवाहे* मु. ॥ २. इन्द्र-कृष्णाविव ॥ ३. चारुगुणा एव रत्नानि तेषामेकरोहणाचलम् ॥ ४. अन्तःपुरस्य मध्ये ॥ ५. कुक्कुटः हस्ते यस्याः सा, तया ॥ ६. कुक्कुटः ॥ ७. *लक्षमेकम्* ता. ॥ ८. कुक्कुटः ॥ ९. अङ्कश्चित्रयुद्धं तस्मिन् पत्तिसमौ ॥ १०. *०प्रभीषतु०* खंता. वा.१-२, जगृहतुः ॥ ११. *नाम्नाऽपि* खंता. ॥ १२. श्रेष्ठकुर्कुटयोः ॥ १३. *नखायुधौ तौ* सं. ता. दे. पा. खंता. पाता. वा.१-२ ॥ १४. अन्येन ॥ १५. *जेष्यति* खंता. ॥ १६. *क्षेत्र ऐरवताभिधे* सं. ॥ १७. *धनुवसुर्नाम* ला. पा. ॥ १८. *अनिर्वृत्तधनाशौ* ला. । न निवृत्ता धनाशा ययोस्तौ ॥ १९. जल-स्थलपथौ ॥ २०. अयं श्लोकः वा. १-२ प्रत्योर्न विद्यते ॥२१. रोगिणः ॥ २२. विकलाङ्गान् ॥ २३. शीतोष्णतृष्णार्त्तान् ॥ २४.*०लूष्णालुतृप्रालूनतिभारा०* सं. ता. ला. छा. खंता.; *०तृप्तालू०* पाता. वा.१-२ ॥ २५. 'चाबूक' ॥ २६. वृषभान् ॥ २७. तनूचक्रतुः ॥ २८. सशोफानि ॥२९. पहेलांनो वींध ॥३०. चिच्छिदतुः ॥ ३१. वृषभान् ॥ ३२. मङ्क्षु-शीघ्रं ईप्सिते-अभीष्टे (स्थाने) यियासया-गन्तुमिच्छया ॥ ३३. *कूटार्थ०* वा.१-२ मु. ॥ ३४. शृगालौ ॥ ३५. *पुरुषौ* दे. छा.; निष्ठुरौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं प्रपन्नार्त्तध्यानौ तौ गजायुर्बबन्धतुः । आर्त्तध्यानस्य हि फलं तिर्यग्योनिषु सम्भवः ॥९२॥

¶अन्यदा **श्रीनदीतीर्थे** राग-द्वेषवशंवदौ । तौ मिथो जातकलहौ युद्ध्वा पञ्चत्वमापतुः ॥९३॥

तत्रैव**ैरवते** [1]**स्वर्णकूला**कूले बभूवतुः । तौ गजौ **ताम्रकलश-काञ्चनकलशा**भिधौ ॥९४॥

क्रमादुद्यौवनौ तौ च सप्तधा प्रक्षरन्मदौ । तटीद्रुमांश्च निघ्नन्तौ नदीतीरे विजह्रतुः ॥९५॥

एकदा पर्यटन्तौ तौ पृथग्यूथेन यूथपौ । अन्योऽन्यदर्शनं [2]बिम्ब-प्रतिबिम्बे इवेयतुः ॥९६॥

प्राग्जन्मरोषा[3]दुद्रोषा[4]वुद्धवाग्नी इवा[5]ऽचलौ । परस्परवधायोभौ सवेगावभ्यधावताम् ॥९७॥

चिरं तौ दन्तिनौ कृत्वा दन्तादन्ति कराकरि । जन्मान्तरेऽपि युद्धार्थमिवोभौ युगपन्मृतौ ॥९८॥

¶अथाऽस्य **जम्बूद्वीप**स्य क्षेत्रे **भरत**नामनि । **अयोध्यायां नन्दिमित्रो**ऽभूद् भूरिमहिषीधनः ॥९९॥

तस्याऽतिवल्लभे यूथेऽभूतां तौ महिषौ वरौ । यौवनं च प्रपेदाते पीनाङ्गौ [6]कलभाविव ॥१००॥

**देवानन्दा**कुक्षिभवौ **शत्रुञ्जय**नृपात्मजौ । [7]**धनसेन-नन्दिषेणौ** महिषौ तावपश्यताम् ॥१०१॥

**अयोध्या**राजपुत्राभ्यामयोध्येतां कुतूहलात् । उभौ तौ महिषौ दृप्तौ [8]कृतान्तमहिषोपमौ ॥१०२॥

चिरं युद्ध्वा विपेदाते पुर्यां तौ तत्र [9]मेण्ढकौ । नाम्ना **काल-महाकाला**वुत्पेदाते दृढाङ्गकौ ॥१०३॥

दैवादेकत्र मिलितौ प्राग्वैरादभियुध्य तौ । विपद्य कुक्कुटावेतावुत्पन्नौ [10]समविक्रमौ ॥१०४॥

नैकोऽप्येकेन विजितः पुराऽप्येतौ [11]समौजसौ । इदानीमपि प्राग्वदेको नैकेन जेष्यते ॥१०५॥

ऊचे **मेघरथः** पूर्ववैराविष्टौ न केवलम् । विद्याधराधिष्ठितौ च युध्येते कुक्कुटाविमौ ॥१०६॥

राज्ञा **घनरथे**नाऽथो[12]न्नमितैकभ्रुवेरितः । कृताञ्जलि**र्मेघरथः** सविस्तरमदोऽवदत् ॥१०७॥

¶अस्यैव **जम्बूद्वीप**स्य क्षेत्रे **भरत**नामनि । **वैताढ्य**स्योत्तरश्रेण्यां **स्वर्णनाभा**भिधे पुरे ॥१०८॥

नाम्ना **गरुडवेगो**ऽभूद् राजा गरुडविक्रमः । सधर्मचारिणी तस्य [13]**धृतिषेणे**ति चाऽनघा ॥१०९॥

स्वोत्सङ्गस्थितचन्द्रार्क-स्वप्नदर्शनसूचितौ । सा **चन्द्रतिलक-**[14]**सूर्यतिलकौ** सुषुवे सुतौ ॥११०॥

उद्यौवनावेकदा तौ जग्मतु**र्मेरु**मूर्धनि । प्रतिमाश्च ववन्दाते श्रीमतां शाश्वतार्हताम् ॥१११॥

भ्रमन्तौ कौतुकात् तौ तु तत्र स्वर्णशिलास्थितम् । **नन्दने सागरचन्द्रं** चारणर्षिमपश्यताम् ॥११२॥

प्रदक्षिणापूर्वकं तौ तं नमश्चक्रतुर्मुनिम् । कृताञ्जली शुश्रुवतुः पुरोभूय च देशनाम् ॥११३॥

देशनान्ते नमस्कृत्य मुनिं तावेवमूचतुः । अज्ञानतिमिरार्त्ताभ्यां [15]दिष्ट्या प्राप्तोऽसि दीपवत् ॥११४॥

आवयोः प्राक्तनान् सम्यगाख्याहि भगवन्! भवान् । सूर्योदय इवाऽ[16]न्योपकृत्यै ज्ञानं भवादृशाम् ॥११५॥

¶आख्यन् मुनिरपि द्वीपे **धातकीखण्ड**नामनि । [17]वर्षे **पूर्वैरवते**ऽस्ति नाम्ना **वज्रपुरं** पुरम् ॥११६॥

तस्मिन्ना[18]र्त्ताभयघोषो**ऽभयघोषो**ऽभवन्नृपः । **सुवर्णतिलका** नाम प्रेयसी तस्य चाऽभवत् ॥११७॥

**विजयो वैजयन्त**श्च [19]सञ्जज्ञाते तयोः सुतौ । क्रमात् कलाकलापं च प्रापतुर्यौवनं च तौ ॥११८॥

¶इतश्च तत्रै**रवते** पुरे **स्वर्णद्रुमे**ऽभवत् । शङ्खोज्ज्वलगुणः **शङ्ख** इति नाम्ना महीपतिः ॥११९॥

उत्सङ्गस्थितपुष्पस्रक्स्वप्नदर्शनसूचिता । **पृथ्वीदेव्यां** तस्य पुत्री **पृथ्वीसेने**त्यजायत ॥१२०॥

रूपप्रकर्ष-वैदग्ध्यविशेषपरिपोषकौ । क्रमेण यौवन-कलाकलापावाससाद सा ॥१२१॥

अनुरूपो वरोऽमुष्या अयमेवेति चिन्तयन् । कन्याम**भयघोषाय शङ्ख**राजोऽथ तां ददौ ॥१२२॥

**पृथिवीसेन**या सार्धं स पृथ्वीनाथपुङ्गवः । नवोढया तया रेमे [20]रमयेव [21]रमापतिः॥१२३॥

---

१. स्वर्णकूलानदीतीरे ॥ २. ***बिम्ब-प्रतिबिम्बे*** पाता. वा.१-२ ॥ ३. अधिकक्रोधौ ॥ ४. उद्धतवनाग्नी । ***०वुद्वान्ताग्नी०*** पाता., ***०वुद्धताग्नी०*** वा.१-२ ॥ ५. पर्वतौ ॥ ६. गजडिम्भाविव ॥ ७. ***धरसेन०*** खंता. पाता. वा.१-२ ॥ ८. यममहिषोपमौ ॥ ९. मेषौ ॥ १०. तुल्यबलौ ॥ ११. तुल्यबलौ ॥ १२. वक्रीकृतैकभ्रुकुट्या प्रेरितः ॥ १३. ***धृतिसेनेति०*** खंता. पाता. वा.१-२ ॥ १४. ***सूर०*** खंता. पाता. वा.१-२ ॥ १५. भाग्येन ॥ १६. अन्येषामुपकाराय ॥ १७. क्षेत्रे ॥ १८. दीनानां प्राणिनामभयं घोषयतीति तथा ॥ १९. ***सञ्जज्ञातेऽनयोः*** दे. मु. ॥ २०. लक्ष्म्या ॥ २१. कृष्णः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶अपरेद्युर्वसन्तर्तौ [1]वसन्तसुमनोधरा । काऽप्यागाच्चेटिका राज्ञोऽ**भयघोष**स्य सन्निधौ ॥१२४॥
तां प्रेक्ष्य **स्वर्णतिलका** देव्येवं नृपमभ्यधात् । अमण्ड्यत वसन्तेनोद्यानं **षड्ऋतुका**भिधम् ॥१२५॥
इदानीमनुभवितुं [2]मधुलक्ष्मीं नवागमाम् । यथोचितपरीवारा गच्छामः प्राणवल्लभ! ॥१२६॥
अत्रान्तरे च **पृथिवीसेना** नृपमुपास्थित । दधाना कोटिमूल्यानि [3]युक्तिपुष्पाणि पाणिना ॥१२७॥
वीक्ष्याऽऽदाय च तान्याशु स्मेराक्षः स क्षितीश्वरः । यथोचितपरीवारो ययौ चिक्रीड तत्र च ॥१२८॥युग्मम्॥
¶**पृथ्वीसेना** त्वनुज्ञाता भ्रमन्ती तत्र चैकतः । ददर्श **दन्तमथनं** विशिष्टज्ञानिनं मुनिम् ॥१२९॥
ववन्दे मुदिता तं च मुनिं निर्भरभक्तिभाक् । भवनिर्वेदजननीं देशनां चाऽश्रृणोत् ततः ॥१३०॥
तत्कालमपि राजानमापृच्छ्य भवकातरा । प्रव्रज्यां साऽऽददे **दन्तमथन**स्य मुनेः पुरः ॥१३१॥
प्रशंसन् **पृथिवीसेना**देव्याश्चारित्रमद्भुतम् । स्वं धामाऽ**भयघोषो**ऽपि जगाम जगतीपतिः ॥१३२॥
¶अन्येद्युर**भयघोषः** स्वमन्दिरशिरोभुवि । रत्नसिंहासनासीनो विश्रान्त इव भास्करः ॥१३३॥
ददर्श तीर्थकृल्लिङ्गं छद्मस्थत्वविहारिणम् । द्वारदेशे प्रविशन्त**मनन्तं** जिनपुङ्गवम् ॥१३४॥युग्मम्॥
[4]ससम्भ्रमं समुत्थाय भोज्यमादाय चोचितम् । उपतस्थे भगवन्तं स प्रणामपुरःसरम् ॥१३५॥
पारयामास भगवानपि तद्दत्तभिक्षया । देवैश्च विदधे तत्र वसुधारादिपञ्चकम् ॥१३६॥
कृतपारणकोऽन्यत्र जगाम भगवानपि । छद्मस्था हि जिना नाऽन्यमुनिवत् क्वचिदासते ॥१३७॥
¶विहरन्नन्यदोत्पन्नकेवलोऽ**नन्त**तीर्थकृत् । एत्य **वज्रपुरे** तत्र नगरे समवासरत् ॥१३८॥
एत्य भक्त्याऽ**भयघोषः** कृत्वा त्रिश्च प्रदक्षिणाम् । तं ववन्देऽश्रृणोद् धर्मदेशनां च भवच्छिदम् ॥१३९॥
देशनान्ते भगवन्तं नत्वा राजैवमब्रवीत् । त्वमत्र भविनां पुण्यैः कल्पद्रुम इवाऽऽगमः ॥१४०॥
प्रवृत्तिस्ते परार्थैव स्वामिन्! विज्ञप्यसे ततः । प्रतीक्षस्व क्षणं [5]विश्वप्रतीक्ष्य! करुणानिधे! ॥१४१॥
[6]विश्वं [7]विश्वम्भराभारं निधाय तनये निजे । यावदायामि दीक्षायै त्वत्पादकमलान्तिके ॥१४२॥युग्मम्॥
नैव प्रमादिना भाव्यमित्युक्तः स्वामिना नृपः । गृहे गत्वा सुतावेवमभाषिष्ट पृथक् पृथक् ॥१४३॥
¶हे वत्स! **विजया**ऽऽदत्स्व राज्यमेतत् क्रमागतम् ॥ यौवराज्यं **वैजयन्त**! त्वमस्य परिपालय ॥१४४॥
अहं तु प्रव्रजिष्यामि व्रजिष्यामि जिनान्तिके । [8]आव्रजेयं न हि यथा भूयोऽपि भवगह्वरे ॥१४५॥
तावपीत्यूचतुस्तात! भवभीतो यथा भवान् । भवभीतौ तथैवाऽऽवां त्वदीयौ ननु नन्दनौ ॥१४६॥
अप्यावां प्रव्रजिष्यावः [9]प्रव्रज्याया ह्युभे फले । इह त्वत्पादशुश्रूषा मोक्षप्राप्तिः परत्र च ॥१४७॥
साधु वत्साविति वदन् वदान्यो मेदिनीपतिः । ददौ कस्मैचिदन्यस्मै राज्यं प्राज्यमपि स्वयम् ॥१४८॥
ताभ्यां सह तनूजाभ्यां गत्वाऽ**नन्त**जिनान्तिके । प्राव्राजीद**भयघोषः** श्रीमत्सङ्घस्य पश्यतः ॥१४९॥
त्रयोऽपि तेपिरेऽत्युग्रं ते तपो भूपतिस्तु सः । विंशत्या स्थानकैरर्हन्नामगोत्रमुपाजर्यत् ॥१५०॥
त्रयोऽपि काले ते कालं कृत्वा प्रययु**रच्युते** । देवा बभूवु[10]र्द्वाविंशत्यर्णवोपमजीविताः ॥१५१॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् **प्रागिविदेह**विभूषणे । विजये **पुष्कलावत्या**मस्ति [11]पूः **पुण्डरीकिणी** ॥१५२॥
तस्यां **हेमाङ्गदो** नाम बभूव वसुधाधवः । [12]शचीव [13]वज्रिणो **वज्रमालिनी** तस्य च प्रिया ॥१५३॥
च्युत्वा ततोऽ**भयघोष**स्तस्याः कुक्षाववातरत् । चतुर्दशमहास्वप्नसूचितार्हतवैभवः ॥१५४॥
पूर्णे च समये सूनुं सुषुवे **वज्रमालिनी** । [14]वज्रिप्रभृतयो जन्माभिषेकं तस्य च व्यधुः ॥१५५॥

१.वसन्तपुष्पधरा ॥ २. वसन्तलक्ष्मीम् ॥ ३. कृत्रिमपुष्पाणि, यतस्तान्येव रत्नादिघटितत्वादिकारणैः कोटिमूल्यानि स्युरिति ज्ञायते । 'यूथिपुष्पाणि' वा स्यात् ॥ ४. ***ससम्भ्रमः*** खंता. पाता. वा.१-२, मु. विना ॥ ५. विश्वपूज्य! ॥ ६. समग्रम् ॥ ७. पृथ्वीभारम् ॥ ८. आगच्छेयम् ॥ ९. ***प्रव्रज्यायाम्*** मु. विना, पाता. ॥ १०. द्वाविंशतिसागरोपमायुषः ॥ ११. नगरी ॥ १२. इन्द्राणीव ॥ १३. इन्द्रस्य ॥ १४. इन्द्रादयः ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

नाम्ना **घनरथः** सोऽद्याऽप्यवनीं पाति तीर्थकृत् । **विजय-वैजयन्तौ** तु जातौ विद्याधरौ युवाम् ॥१५६॥
इति पूर्वभवान् श्रुत्वा प्रीतौ नत्वा च तं मुनिम् । प्राग्जन्मपितरं भक्त्या त्वां द्रष्टुं ताविहाऽऽगतौ ॥१५७॥
प्रचक्रतुः सङ्क्रमणमनयोस्ताम्रचूडयोः । तौ तु [1]त्वद्दर्शनोपायभूतं स्वामिन्! कुतूहलात् ॥१५८॥
[2]इतश्च गत्वैतौ **भोगवर्धनस्या**न्तिके गुरोः । प्रव्रज्य क्षीणकर्माणौ प्राप्स्यतः पदमव्ययम् ॥१५९॥
श्रुत्वेति प्रकटीभूय पूर्ववत् सुतमानिनौ । विद्याधरौ **घनरथं** तौ नत्वा जग्मतुर्गृहम् ॥१६०॥
¶एतत् तु कुक्कुटौ श्रुत्वा तावचिन्तयतामिति । अहो! ईदृगसारोऽयं संसारः क्लेशकारणम् ॥१६१॥
नृजन्मनि वणिग्भ्यामप्यावाभ्यां किमुपार्जितम् ? । दूरेऽस्त्वन्यद् येन भूयो नृजन्माऽपि हि दुर्लभम् ॥१६२॥
[3]तदानीं ग्रासलुब्धाभ्यां [4]लुब्धकाभ्यामिवाऽन्वहम् । तैस्तैरुपायैरावाभ्यां वञ्चिताः प्राणिनो हहा! ॥१६३॥
वञ्चयित्वा चिरं लोकं कूटमान-तुलादिभिः । असन्तुष्टौ मिथोऽप्यावां धिक् तदा [5]कलहायितौ ॥१६४॥
आर्त्तध्यानं प्रपन्नौ च निहत्याऽऽवां मिथो मृतौ । प्राप्तवन्तौ तत्फलं च तिर्यग्योनिमनेकशः ॥१६५॥
विमृश्यैवं नृपं नत्वा प्रोचतुस्तौ स्वभाषया । देवाऽऽदिश किमद्याऽऽवां कुर्वहे हितमात्मनः ? ॥१६६॥
विज्ञाय चाऽवधिज्ञानाद् राजा **घनरथो**ऽवदत् । अर्हन् देवो गुरुः साधुर्धर्मो जीवदयाऽस्तु वाम् ॥१६७॥
एवं **घनरथे**[6]नोक्ते [7]कुक्कुटौ तौ शुभाशयौ । प्रपेदाते अनशनं विपे[8]दाते उभावपि ॥१६८॥
¶मृत्वाऽभूतां **भूतरत्ना**महाटव्यां महर्द्धिकौ । **ताम्रचूल-स्वर्णचूल**सञ्ज्ञौ तौ भूतनायकौ ॥१६९॥
प्राग्जन्माऽवधिना ज्ञात्वा तौ विमानं विकृत्य च । उपेयतु**र्मेघरथं** पूर्वजन्मोपकारिणम् ॥१७०॥
भक्तिभाजौ **मेघरथं** तौ प्रणम्यैवमूचतुः । अद्यैवाऽऽवां त्वत्प्रसादादभूव व्यन्तरेश्वरौ ॥१७१॥
मर्त्यावि[9]भौ सैरि[10]भौ च मेषौ तदनु कुक्कुटौ । [11]एतत्प्रकर्षजन्मानावभूवाऽऽवां स्वकर्मभिः ॥१७२॥
कुक्कुटत्वे त्वहरहर्निःसञ्चकृमिभोजनौ । आप्स्यावः कां गतिं नाथाऽभविष्यः शरणं न चेत् ? ॥१७३॥
प्रसीदाऽनुगृहाणैतद्विमानमधिरुह्य [12]च । [13]विश्वां [14]विश्वम्भरां पश्य ज्ञानेन [15]ज्ञातपूर्व्यपि ॥१७४॥
इत्थमभ्यर्थितस्ताभ्यां दाक्षिण्यक्षीरसागरः । तदाऽऽरोहन् **मेघरथो** विमानं [16]सपरिच्छदः ॥१७५॥
उत्पपात विमानं तच्चचाल च [17]मनोगति । अङ्गुल्या दर्शयन्तौ तौ [18]दृश्यान्येनमशंसताम् ॥१७६॥
वैडूर्यमय्यसौ [19]भाभिर्दूर्वाङ्कुरितदिङ्मुखाः । चत्वारिंशद्योजनोच्चा चूला **मेरु**महागिरेः ॥१७७॥
अस्याः प्रतिदिशं चाऽर्धचन्द्राकाराः शिला इमाः । अर्हज्जन्माभिषेकाम्भःपुण्याः सिंहासनाङ्किताः ॥१७८॥
इमान्यायतनान्युच्चैः स्वामिनां शाश्वतार्हताम् । तदर्चाचरितार्थद्रुपुष्पमेतच्च **पाण्डकम्** ॥१७९॥
अमी **वर्षधराः** शैलाः षडेषु षडमी ह्रदाः । चतुर्दशमहासिन्धुसीमन्तितमहीतलाः ॥१८०॥
अद्रयोऽमी च **वैताढ्या** आढ्या विद्याधरर्द्धिभिः । स्वस्वक्षेत्रार्धमर्यादाशिलाभित्तिसहोदराः ॥१८१॥
अमीषामपि कूटेषु सिद्धचैत्यान्यमूनि च । प्रतिमाभिः [20]सनाथानि श्रीमतां शाश्वतार्हताम् ॥१८२॥
इयं च [21]जगती **जम्बूद्वीपस्य** वलयाकृतिः । [22]उत्तुङ्गजालकटकैर्विद्याधरविलासभूः ॥१८३॥
उदधि**र्लवणोदो**ऽयं [23]नक्रचक्रनिकेतनम् । अयं च **धातकीखण्डः** द्वीपः **कालोद**वेष्टितः ॥१८४॥
**क्षुद्रमेरु**गिरी चैतावर्हत्स्नात्रशिलाङ्कितौ । [24]**इष्वाकारौ** गिरी चैतौ शाश्वतार्हत्पवित्रितौ ॥१८५॥
अदोऽ**र्धपुष्करद्वीपं धातकीखण्ड**सन्निभम् । **मानुषोत्तर**शैलोऽयं मर्त्यभूर्न ह्यतः परम् ॥१८६॥
इत्थमाख्यानपूर्वं तौ दर्शयित्वा वसुन्धराम् । आनिन्यतु**र्मेघरथं** नगरीं **पुण्डरीकिणी**म् ॥१८७॥

---

१. तव दर्शने उपायभूतमिति सङ्क्रमणविशेषणम् ॥ २. ***इतस्तु*** खंता. पाता. वा. १-२ ॥ ३. ***इदानीं*** मु. ॥ ४. मृगवधाजीवी लुब्धकः ॥ ५. कलिं कृतवन्तौ ॥ ६. ***०घनरथेनोक्तं*** मु. ॥ ७. ***कुर्कुटौ प्रतिपद्य तौ*** मु. ॥ ८. म्रियेते स्म ॥ ९. गजौ ॥ १०. महिषौ ॥ ११. एतद् व्यन्तरेश्वररूपं प्रकृष्टं जन्म ययोस्तौ ॥ १२. ***नौ*** ता. ला. छा. ॥ १३. समग्रम् ॥ १४. पृथ्वीम् ॥ १५. पूर्वं ज्ञातं येन स ज्ञातपूर्वी ॥ १६. सपरिवारः ॥ १७. मनोवद् गमनं यस्य तत् ॥ १८. ***दृश्यान्येवमशं०*** सं. ला. खंता. पाता. वा. १-२ ॥ १९. कान्तिभिः ॥ २०. सहितानि ॥ २१. दुर्गः ॥ २२. उत्तुङ्गगवाक्षवलयैः । परिकरितेति शेषः ॥ २३. नक्राणां मकराणां चक्रं समूहस्तस्य स्थानम् ॥ २४. धनुर्वदाकारौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजौकसि कुमारं [१]तं मुक्त्वा च प्रणिपत्य च । विधाय रत्नवृष्टिं च जग्मतुर्निजमाश्रयम् ॥१८८॥

¶अथैकदा **घनरथो**ऽभ्येत्य लोकान्तिकामरैः । तीर्थं प्रवर्तयेत्युच्चैः [२]स्वयंबुद्धोऽप्यबोध्यत ॥१८९॥

राज्ये **मेघरथं** यौवराज्ये **दृढरथं** तथा । न्यस्य दत्त्वाऽऽ[३]ब्दिकं दानं दीक्षां **घनरथो**ऽग्रहीत् ॥१९०॥

उत्पन्नकेवलज्ञानो भविकान् [४]प्रतिबोधयन् । [५]तीर्थङ्करो **घनरथो** विजहार वसुन्धराम् ॥१९१॥

¶नरेन्द्रवृन्दमुकुटोद्घृष्टपादाम्बुजासनः । राजा **मेघरथ**स्तूर्वीमशाद् **दृढरथा**न्वितः ॥१९२॥

अन्यदा **देवरमण**नाम्न्युद्याने [६]रिरंसया । ययौ [७]जनोपरोधेन राजा **मेघरथः** स्वयम् ॥१९३॥

तत्राऽशोकतले सार्धं प्रियया **प्रियमित्र**या । स कारयितुमारेभे सङ्गीतमवि[८]गीतकम् ॥१९४॥

¶अत्रान्तरे तस्य पुरः प्रादुरासन् महीपतेः । भूताः सहस्रशोऽपूर्वसङ्गीतकचिकीर्षया ॥१९५॥

विशालैरुदरैः केऽपि [९]लम्बोदरसहोदराः । [१०]क्षामैस्तैरेव केचिच्च पातालानीव बिभ्रतः ॥१९६॥

प्रलम्बैः कर्कशैः पादैस्[११]तालारूढा इवाऽपरे । केचिदप्यायतैर्दोर्भिर्द्रुमाः साजगरा इव ॥१९७॥

भुजङ्गभूषणाः केचित् केचिन्नकुलभूषणाः । [१२]द्वीपित्वग्वसना केऽपि व्याघ्रत्वग्वाससोऽपरे ॥१९८॥

भस्माङ्गरागाः केचिच्च केचिद् [१३]रक्तविलेपनाः । उलूकोत्तंसिनः केचित् केचिद् गृध्रावतंसिनः ॥१९९॥

आखुस्रग्मालिनः केचित् केचित् [१४]सरटमालिनः । मुण्डमालाधराः केऽपि केऽपि [१५]कङ्कालपाणयः ॥२००॥

कृताट्टहासाः केचिच्च केचित्तुमुलकारिणः । हेषाविधायिनः केचित् केचिद् बृंहि[१६]तकारिणः ॥२०१॥

करास्फोटकराः केऽपि केऽपि तालप्रदायिनः । [१७]मुखातोद्यपराः केऽपि कक्षावाद्यकृतोऽपरे ॥२०२॥

दलयन्त इव क्षोणिं स्फोटयन्त इवाऽम्बरम् । [१८]चारीप्रचारैरुद्दण्डं प्रारभन्ताऽथ ताण्डवम् ॥२०३॥अष्टभिः कुलकम्॥

एवं नरेन्द्रतोषाय यावत् ते ताण्डवं व्यधुः । प्रादुरासीत् तावदेकं विमानवरमम्बरे ॥२०४॥

रत्या मनोभव इव युवत्या युत एकया । अन्तस्तस्य पुमानेको ददृशे सुन्दराकृतिः ॥२०५॥

**प्रियमित्रा** ततो देवी जगादैवं महीपतिम् । कोऽयं ? केयं ? कुतो हेतोरिह चाऽऽपततः प्रभो! ? ॥२०६॥

¶अथ **मेघरथो**ऽशंसज्**जम्बूद्वीपे**ऽत्र **भारते** । **वैताढ्य**स्योत्तरश्रेण्या**मलके**त्यस्ति पूर्वरा ॥२०७॥

तत्र **विद्युद्रथो** नाम विद्याधरनरेश्वरः । तस्य **मानसवेगे**ति प्रिया चाऽसीत् प्रियंवदा ॥२०८॥

सिं[१९]हरथ्यरथस्वप्नात् कृत**सिंहरथा**भिधः । तस्यां तस्याऽभवत् सूनुर्विक्रमोत्फुल्लदोर्द्रुमः ॥२०९॥

कन्यां **वेगवतीं** नाम प्रकृष्टकुलसम्भवाम् । स्वानुरूपामुपायंस्त स चन्द्र इव रोहिणीम् ॥२१०॥

यौवराज्ये निजे राजा तं च **विद्युद्रथो** व्यधात् । पुत्रे हि कवचहरे युक्तमेतत् महीभुजाम् ॥२११॥

लीलोपवन-वाप्यादिस्थानेषु [२०]ललनासखः । वने सिंह इव स्वैरं रेमे **सिंहरथः** सुखम् ॥२१२॥

**विद्युद्रथो**ऽपरेद्युश्च विद्युल्लोलस्वभावकम् । संसारे सकलं ज्ञात्वा परं वैराग्यमासदत् ॥२१३॥

राज्ये **सिंहरथं** न्यस्य सद्यो **विद्युद्रथो** नृपः । सर्वसावद्यविरतिं गुरुपादान्तिकेऽग्रहीत् ॥२१४॥

संवेगातिशयापन्नः संयमैर्नियमैरपि । ध्यानेन च विधायाऽष्टकर्मक्षयमगाच्छिवम् ॥२१५॥

¶राजा **सिंहरथो**ऽप्युद्यत्प्रतापत[२१]पनोपमः । स विद्याधरचक्रित्वमाससाद दुरासदम् ॥२१६॥

निशायां सोऽन्यदा दध्यौ विनिद्र इव योगवित् । अरण्ये मालतीपुष्पस्येव जन्म मुधा मम ॥२१७॥

अर्हतः समवसृतान् केवलज्ञानिनः प्रभून् । भवाम्भोधिमहापोतान्नाऽपश्यं [२२]नाऽनमं च यत् ॥२१८॥

---

१. *तौ* सं. ला. ॥ २. *स्वयंबुद्धोऽपि बोधितः* दे. छा. मु. ॥ ३. वार्षिकं दानम् ॥ ४. *स प्रबोध्य च* ता., *प्रतिबोध्य च* सं. पा. ला., खंता. पाता. वा.१-२ ॥ ५. *क्षीणाष्टकर्मा कालेन मोक्षं घनरथो ययौ* दे. मु. विना, खंता. पाता. वा.१-२ ॥ ६. रन्तुमिच्छया ॥ ७. लोकस्याऽऽग्रहेण ॥ ८. सुन्दरम् ॥ ९. गणपतिसदृशाः ॥ १०. कृशैः ॥ ११. तालवृक्षारूढाः ॥ १२. चित्रकचर्मवस्त्राः ॥ १३. रुधिरविलेपनाः ॥ १४. कृकलास(सरडो)मालावन्तः ॥ १५. कङ्कालमस्थिपञ्जरः ॥ १६. *०बृंहितमानसः(साः)* खंता. वा.१-२ ॥ १७. मुखमेव वादित्रं तस्य कराः ॥ १८. चारी-नृत्यप्रकारः ॥ १९. सिंहा एव रथ्यास्तद्युक्तो रथस्तस्य स्वप्नात् ॥ २०. ललनासहचरः ॥ २१. सूर्योपमः ॥ २२. *०तान्न चाऽर्चयम्* मु., *नाननर्च यत्* पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पावयामि तदात्मानं दृष्ट्वा साक्षाज्जिनेश्वरम् । तद्दर्शनं ह्येकदाऽपि सुस्वप्न इव कामधुक् ॥२१९॥
इत्थं विचिन्त्य स द्वीपे **धातकीखण्ड**नामनि । पश्चिमेषु **विदेहेषु सीतोदो**त्तररोधसि ॥२२०॥
**सूत्रा**भिधाने विजये पुरे **खड्गपुरा**भिधे । गत्वाऽर्हन्तं समं पत्न्या ददर्शाऽ**मितवाहनम्** ॥२२१॥[१]युग्मम्॥
प्रणम्य भगवन्तं तं सोऽश्रौषीन् मेदिनीपतिः । [२]भवाम्भोधितरीकल्पामनल्पां धर्मदेशनाम् ॥२२२॥
आकर्ण्य देशनां तां च दुःखानलजलच्छटाम् । नत्वा चाऽर्हन्तमचलत् स निजां नगरीं प्रति ॥२२३॥
अत्रोदूर्ध्वं गच्छतश्चाऽस्य बभूव स्खलनं गतेः । दृढवेत्रवनाकीर्णे पोतस्येव पयोनिधौ ॥२२४॥
गतिर्मे स्खलिता केनेत्यथ ज्ञातुमधो दृशम् । न्यधाद् यावदसौ तावदद्राक्षीन् मामिह स्थितम् ॥२२५॥
सकोपाटोपमेषोऽथ मामुत्क्षेप्तुमुपासरत् । [३]आक्रम्यत मया चाऽयं [४]वामो वामेन पाणिना ॥२२६॥
[५]रराास विरसं चैष सिंहाक्रान्त इव द्विपः । तद्भार्या सपरीवारा [६]प्रपन्ना शरणं च माम् ॥२२७॥
ततो [७]मयाऽमुच्यताऽयं मुक्तश्च पुरतो मम । विकृत्य नाना रूपाणि सङ्गी[८]तमकरोदिदम् ॥२२८॥
भूयोऽपि **प्रियमित्रो**चे प्रिय! पूर्वभवेऽमुना । किं कृतं कर्म येनैषा ऋद्धिरस्य महीयसी ? ॥२२९॥
¶आख्यन् **मेघरथो**ऽप्येवं **पुष्करार्धस्य भारते** । पूर्वस्मिन् विद्यते **सङ्घपुरं** नाम महापुरम् ॥२३०॥
**राज्यगुप्तो**ऽभिधानेन तत्राऽऽसीत् कुलपुत्रकः । [९]दुःस्थः सदा परकर्मकरणोत्पन्नभोजनः ॥२३१॥
**शङ्खिका** नाम तस्याऽनुरक्ता भक्ता च पत्न्यभूत् । उभावपि हि चक्राते कर्माणि परवेश्मसु ॥२३२॥
अन्येद्युश्च फलार्थं द्वावपि नानाद्रुमाकुलम् । सम्भूय जग्मतुः **सङ्घगिरिं** नाम महागिरिम् ॥२३३॥
तस्मिन् वनफलार्थं तौ पर्यटन्तावपश्यताम् । कुर्वाणं देशनां **सर्वगुप्तं** नाम महामुनिम् ॥२३४॥
विद्याधरसभामध्यमध्यासीनमुपेत्य तम् । तौ नमश्चक्रतुर्भक्त्या पुरतश्च निषेदतुः ॥२३५॥
तयोर्विशेषतो धर्मं दिदेश स मुनीश्वरः । दुःस्थितेषु हि महतां वात्सल्यमतिरिच्यते ॥२३६॥
देशनान्ते महर्षिं तं तौ प्रणम्यैवमूचतुः । पापयोरपि नौ पुण्यमेतद् दृष्टोऽसि यत्प्रभो! ॥२३७॥
स्वयं [१०]विश्वंजनीनोऽसि तथाऽ[११]प्यार्त्तैस्त्वमर्थ्यसे । अस्मदर्थं तपः किञ्चिज्ज[१२]गदर्ह! समादिश ॥२३८॥
तद्योग्यतानुसारेण **सर्वगुप्तो** महामुनिः । **द्वात्रिंशत्कल्याणका**ख्यमादिदेश तपस्तयोः ॥२३९॥
¶तथेति प्रतिपद्योभौ गत्वा स्वौकसि चक्रतुः । द्वे[१३] त्रिरात्रे चतुर्थानि द्वात्रिंशदिति तत्तपः ॥२४०॥
पारणस्य च समये द्वारे प्रक्षिप्य चक्षुषि । [१४]गवेषयामासतुस्तौ कञ्चिदप्यतिथिं मुनिम् ॥२४१॥
साधुं **धृतिधरं** नाम प्रविशन्तमपश्यताम् । प्रत्यलाभयतां चोभौ भक्त्या भक्तोदकादिना ॥२४२॥
¶अन्यदा विहरंस्तत्र **सर्वगुप्त**मुनिः पुनः । स आजगाम तत्पार्श्वे धर्मं शुश्रुवतुश्च तौ ॥२४३॥
आददाते परिव्रज्यां **सर्वगुप्त**मुनेः पुरः । फलं [१५]मानुषजन्मद्रोस्तौ विवेकपरायणौ ॥२४४॥
ततश्च **राज्यगुप्त**र्षिर्विदधे गुर्वनुज्ञया । **आचामाम्लवर्धमाना**भिधानं दुस्तपं तपः ॥२४५॥
अन्ते चाऽनशनं चक्रे चतुःशरणमाश्रितः । विपद्य **ब्रह्मलोके**ऽभूद् [१६]दशसागरजीवितः ॥२४६॥
**ब्रह्मलोकात्** परिच्युत्य **विद्युद्रथ**नृपात्मजः । अयं **सिंहरथो** नाम जज्ञे विद्याधरेश्वरः ॥२४७॥
**शङ्खिका** साऽपि तद्भार्या विधाय विविधं तपः । **ब्रह्मलोके** सुरो जज्ञे च्युत्वाऽसावस्य पत्न्यभूत् ॥२४८॥
इतः स्वनगरं गत्वा पुत्रं राज्ये नि[१७]धाय च । पादान्ते मत्पितुर्दीक्षामयमादास्यते सुधीः ॥२४९॥
तपो-ध्यानादिभिः कृत्वा कर्माष्टकपरिक्षयम् । उत्पन्नकेवलज्ञानः सिद्धिमेष व्रजिष्यति ॥२५०॥
श्रुत्वा तद्वचनं **मेघरथं** च नत्वा भक्तितः । गत्वा च स्वपुरे पुत्रं राज्ये **सिंहरथो** [१८]न्यधात् ॥२५१॥

१. खंता. पाता. वा.१-२ प्रतिषु नास्ति॥ २. भवसागरे नौसदृशीम्॥ ३. ***आचक्रमे*** सं. पा. ता. ला. खंता. पाता. वा.१-२॥ ४. अधमः॥ ५. ***अरसत्*** दे. छा.॥ ६. ***प्रपेदे*** सं. पा. ता. ला.॥ ७. ***मयाऽयं मुमुचे*** सं. पा. ता. ला.॥ ८. ***०तमुपचक्रमे*** सं. पा. ता. ला. खंता. पाता. वा.१-२॥ ९. दुरवस्थः॥ १०. विश्वहितः॥ ११. दुःखितैः॥ १२. जगत्पूज्य!॥ १३. द्वे अष्टमतपसी द्वात्रिंशच्च चतुर्थभक्तानीति ज्ञायते॥ १४. ***अन्वेषयामासतुः*** सं. ता. ला. पा. खंता. पाता. वा.१-२॥ १५. मानुषजन्मवृक्षस्य। ***०मानुषकल्पद्रो०*** मु.॥ १६. दशसागरोपमायुः॥ १७. ***विधाय*** दे. मु.॥ १८. ***न्यधात्*** दे. छा.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीमद्**घनरथ**स्वामिपादान्ते [१]दान्तमानसः । परिव्रज्य चरित्वा च तपः सिद्धिमियाय सः ॥२५२॥
¶राजा **मेघरथो देवरमणो**द्यानतस्ततः । प्राविशत् सपरीवारो नगरीं **पुण्डरीकिणीम्** ॥२५३॥
अपरेद्यु**र्मेघरथः** [२]पौषधौकसि पौषधी । धर्ममाख्यातुमारेभे जिनाख्यातं [३]विपश्चिताम् ॥२५४॥
तस्योत्सङ्गे तदानीं च सञ्जातभय[४]वेपथुः । पारापतः पपातैको [५]मुमूर्षुरिव दीनदृक् ॥२५५॥
अभयं याचमानं तं खगं मानुषभाषया । मा स्म भैषीर्मा स्म भैषीरित्यभाषिष्ट भूपतिः ॥२५६॥
एवमाभाषितस्तस्थौ सुस्थः पारापतस्ततः । बालः पितुरिवोत्सङ्गे राज्ञः कारुण्यवारिधेः ॥२५७॥
¶भक्ष्यं ममेदं मुञ्चाऽऽशु राजन्निति वदन्नथ । तस्याऽनुमार्गमेवाऽऽगाच्छ्[६]येनोऽहेरिव [७]पक्षिराट् ॥२५८॥
श्येनमूचे नृपोऽप्येवं नाऽर्पयिष्याम्यमुं तव । क्षत्रियाणां न धर्मोऽयं शरणार्थी यदर्प्यते ॥२५९॥
अपरं च तवाऽपीदं युज्यते न हि धीमतः । परप्राणापहारेण स्वप्राणपरिपोषणम् ॥२६०॥
उत्खन्यमाने पिच्छेऽपि यथा ते भवति व्यथा । अन्यस्याऽपि भवत्येवं मार्यमाणस्य का कथा ? ॥२६१॥
[८]जग्धेनाऽप्यमुना तृप्तिर्भाविनी क्षणमेव ते । [९]सर्वजन्मापहारस्तु पक्षिणोऽस्य भविष्यति ॥२६२॥
पञ्चेन्द्रियप्राणवधात् तन्मांसस्य च भक्षणात् । नरके जन्तवो यान्ति सहन्ते [१०]दुःसहा व्यथाः ॥२६३॥
[११]परत्राऽनन्तदुःखाय क्षणमत्र सुखाय च । विवेकवान् कथं हन्यात् प्राणिनं क्षुधितोऽपि हि ॥२६४॥
अपरेणाऽपि भोज्येन क्षुत्पीडा हन्त शाम्यति । [१२]पित्ताग्निः शर्कराशम्यः पयसा किं न शाम्यति ? ॥२६५॥
न च प्राणिवधप्राप्तनरकप्रभवा व्यथाः । केनाऽपि हि प्रकारेण शाम्यन्ति सहनं विना ॥२६६॥
ततः प्राणिवधं मुञ्च धर्ममेव समाचर । भवे भवे येन सुखं प्राप्नोषि विमृश स्वयम् ॥२६७॥
¶मनुष्यभाषया श्येनोऽप्यभाषत महीपतिम् । भवन्तं मद्भयादेष कपोतः शरणं ययौ ॥॥२६८॥
क्षुत्पीडयाऽर्दितोऽहं तु कं यामि शरणं ? वद । सर्वेष्वप्यनुकूला हि महान्तः करुणाधनाः ॥२६९॥
यथैनं त्रायसे राजंस्तथा त्रायस्व मामपि । इमे गच्छन्ति ही प्राणा बुभुक्षाबाधितस्य मे ॥२७०॥
[१३]धर्माधर्मविमर्शो हि सुस्थितानां शरीरिणाम् । धर्मप्रियोऽपि किं पापं न करोति बुभुक्षितः ? ॥२७१॥
तद्धर्मवार्तयाऽलं मे [१४]भक्ष्यभूतोऽयमर्प्यताम् । क एष धर्मस्त्रातव्य एको मार्यस्तथाऽपरः ? ॥२७२॥
तृप्तिर्भवेन् महीपाल! न च भोज्यान्तरैर्मम । सद्यः स्वयंहतप्राणिस्फुरन्मांसाशनो ह्यहम् ॥२७३॥
राजाऽप्येवमवोचत् तं स्वमांसं ते ददाम्यहम् । तुलयित्वा कपोतेन [१५]सुहितीभव मा मृथाः ॥२७४॥
आमेत्युक्तवति श्येने तुलायामेकतो नृपः । कपोतं निदधेऽन्यत्र छित्त्वा छित्त्वा [१६]स्वमामिषम् ॥२७५॥
उत्कृत्योत्कृत्य मांसं स्वं राजाऽक्षैप्सीद् यथा यथा । तथा तथा कपोतः स भारेण ववृधेतराम् ॥२७६॥
भारेण वर्धमानं तं कपोतं प्रेक्ष्य भूपतिः । स्वयमेवाऽध्यारुरोह तुलामतुलसाहसः ॥२७७॥
तुलाधिरूढं राजानं प्रेक्ष्य हाहारवाकुलः । सर्वोऽपि संशयतुलामारुरोह परिच्छदः ॥२७८॥
¶सामन्तामात्यमुख्याश्चाऽभ्यधुरेवं महीपतिम् । एतदस्मदभाग्येन किमारब्धं त्वया प्रभो! ? ॥२७९॥
अनेन हि शरीरेण त्रातव्या सकला मही । एकस्य पक्षिमात्रस्य त्राणे त्यजसि तत् कथम् ? ॥२८०॥
किञ्च कोऽप्येष मायावी त्रिदशो दानवोऽथवा । न हीदृक् पक्षिमात्रस्य भारः सम्भवति क्वचित् ॥२८१॥
जगदुर्यावदेवं ते तावदाविरभवत् पुरः । किरीटी कुण्डली स्रग्वी तेजोराशिरिवाऽमरः ॥२८२॥
¶[१७]नृदेवं देव इत्यूचे त्वमेकः पुरुषेष्वसि । न चाल्यसे पौरुषाद्यत् स्वस्थानादिव मन्दरः ॥२८३॥

१. शुद्धमानसः ॥ २. ०*पोषधौकसि पोषधी* खंता. पाता. वा.१-२ ॥ ३. विदुषाम् ॥ ४. कम्पमानः ॥ ५. मर्तुमिच्छुः ॥ ६. पक्षिविशेषः, 'बाज' इति भाषायाम् ॥ ७. गरुडः ॥ ८. खादितेन ॥ ९. मरणम् ॥ १०. *दुःसहां व्यथाम्* मु. ॥ ११. परलोके । *परत्रात्यन्त०* मु. ॥ १२. शर्करया शम्यते यः पित्ताग्निः स दुग्धेनाऽपि शम्यते ॥ १३. ०*धर्मविचिन्ता* सं. पा. ता. ला. खंता. पाता. वा.१-२ ॥ १४. भोज्यरूपः ॥ १५. तृप्तो भव ॥ १६. स्वमांसम् ॥ १७. नरेषु देवः, तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सभायां वर्णयामास त्वामी[1]**शान**दिवस्पतिः । अहं त्वसहमानस्तत् त्वत्परीक्षार्थमागमम् ॥२८४॥
प्राग्जन्मवैराद् युद्धायोपस्थितौ पक्षिणाविमौ । अपश्यं चाऽध्यतिष्ठं चा[2]ऽकार्षं चैतत् सहस्व तत् ॥२८५॥
इत्युदित्वा नृपं कृत्वा सज्जं देवो दिवं ययौ । सामन्ताद्याश्च राजानं पप्रच्छुरिति विस्मयात् ॥२८६॥
श्येन-पारापतावेतौ कीदृशौ पूर्वजन्मनि ? । किं[3]हेतु वाऽनयोर्वैरं ? देवोऽयं प्राग्भवे च कः ? ॥२८७॥
¶राजाऽप्याख्यज्**जम्बूद्वीपैरवत**क्षेत्रमण्डनम् । **पद्मिनीखण्ड**मित्यस्ति पुरं श्री[4]पद्मखण्डवत् ॥२८८॥
तत्र **सागरदत्तो**ऽभूत् सम्पदा सागरोपमः । भार्या **विजयसेने**ति तस्य चाऽसी[5]दनिन्दिता ॥२८९॥
सञ्जज्ञाते तयोः पुत्रौ नामतो **धन-नन्दनौ** । यौवनं च प्रपेदाते वर्धमानौ क्रमेण तौ ॥२९०॥
क्रीडाभिर्विविधाभिस्तौ विहरन्तावुभावपि । गमयामासतुः कालं पितृऋद्धि[6]समुन्नतौ ॥२९१॥
¶अन्यदा **सागरदत्तं** तौ प्रणम्यैवमूचतुः । देशान्तरे वणिज्यार्थमावां तात! समादिश ॥२९२॥
पि[7]त्रा समनुजज्ञाते मुदितेन तदैव तौ । सूनोः पुरुषकारो हि हर्षाय प्रथमं पितुः ॥२९३॥
आदाय विविधं भाण्डं तौ सार्थेन प्रचेलतुः । प्रापतुश्च क्रमा**न्नागपुरं** नाम महापुरम् ॥२९४॥
तत्र व्यवहरन्तौ तौ श्वानौ भक्ष्यमिवैककम् । किञ्चिदेकं महामूल्यं महारत्नमवापतुः ॥२९५॥
तौ च **शङ्ख**नदीतीरे तस्य रत्नस्य हेतुना । युयुधाते मिथो[8] क्रुद्धौ दुर्दान्तौ वृषभाविव ॥२९६॥
युध्यमानौ पेततुस्तावगाधे तन्महाह्रदे । विपेदाते च सद्योऽपि लोभः कस्य न मृत्यवे ? ॥२९७॥
विपद्य तावुभौ बन्धू उत्पेदाते इमौ [9]खगौ । प्राग्जन्मवैरादेवं च वैरायेते इहाऽपि हि ॥२९८॥
¶अन्यच्च **जम्बूद्वीपे**ऽस्मिन् **प्राग्विदेह**विभूषणे । **सीता**या दक्षिणतटे विजये **रमणीयके** ॥२९९॥
[10]**शुभा**ख्यायां पुरि नृपोऽभवत् **स्तिमितसागरः** । तस्येतः[11] पञ्चमभवेऽभूवं पुत्रोऽ**पराजितः** ॥३००॥[युग्मम्]
तदा हि बलदेवोऽहं वासुदेवोऽपि मेऽनुजः । **अनन्तवीर्य** इत्यासीदयं **दृढरथो**ऽस्ति यः ॥३०१॥
प्रतिविष्णुस्तदानीं च **दमितारि**र्महाभुजः । **कनकश्री**कन्यकार्थेऽस्माभिर्युधि नि[12]पातितः ॥३०२॥
स भ्रान्त्वा [13]भवकान्तारे **जम्बूद्वीपस्य भारते** । **अष्टापद**गिरेर्मूले **निकृ[14]त्याः** सरितस्तटे ॥३०३॥
**सोमप्रभा**भिधानस्य तापसस्य सुतोऽभवत् । बालं तपश्चरित्वाऽभूत् **सुरूपो** नामतः सुरः ॥३०४॥युग्मम्॥
सोऽयं सुरोऽस्मत्प्रशंसामी**शानेन्द्रेण** निर्मिताम् । असहिष्णुः समा[15]गच्छच्चक्रे चैतत् परीक्षणम् ॥३०५॥
¶तच्छ्रुत्वा वचनं राज्ञो जातजातिस्मृती उभौ । श्येन-पारापतौ सद्यो मूर्च्छया पेततुर्भुवि ॥३०६॥
राजलोककृतैस्तालवृन्तानिल-[16]जलोक्षणैः । भूयोऽपि सञ्ज्ञां लेभाते तौ प्रसुप्तोत्थिताविव ॥३०७॥
तौ स्ववाचोचतुर्भूपं साध्वावां ज्ञापितौ त्वया । प्राग्जन्मदुष्कृतं स्वामिन्नीदृग्योनिनिब[17]न्धनम् ॥३०८॥
स्वामिन्! युद्‍ध्वा तदाऽऽवाभ्यां रत्नं नाम न केवलम् । अतिलोभाभिभूताभ्यां मर्त्यजन्माऽपि हारितम् ॥३०९॥
इदानीं नारकं जन्माऽभवन्निकटमावयोः । निषिद्धावन्धवत् कूपात् परमावां [18]ततस्त्वया ॥३१०॥
अतः परमपि स्वामिन्नुन्मार्गाद् रक्ष रक्ष नौ । सन्मार्गमादिश [19]शुभं स्थानं येन लभामहे ॥३११॥
तयोश्च योग्यतां ज्ञात्वाऽवधिज्ञानोर्मिवारिधिः । समादिदेशाऽनशनं [20]प्राप्तकालं महीपतिः ॥३१२॥
प्रपद्य तावनशनं शुभचित्तौ विपद्य च । उत्पेदाते सुरवरौ मध्ये [21]भवनवासिनाम् ॥३१३॥

१. ईशानेन्द्रः । ***ईशानस्य दिवस्पतिः*** खंता. ॥ २. व्यधाम् ॥ ३. को हेतुर्यस्य तद्, वैरविशेषणम् ॥ ४. लक्ष्मीसरोवत् ॥ ५. शुद्धा ॥ ६. ***०समुद्धतौ*** मु. ॥ ७. ***पित्राऽपि समनुज्ञाते*** मु. ॥ ८. ***०महाक्रुद्धौ*** वा. १-२ ॥ ९. श्येन-पारापतौ ॥ १०. ***सुभगायाम्*** सं. ता. पा. खंता. पाता. ॥ ११. इतोऽस्माद् भवात् पूर्वं पञ्चमे भवे ॥ १२. हतः ॥ १३. ***भवकान्तारम्*** दे. मु. विना । संसारारण्ये ॥ १४. निकृतीनाम्नी नदी, तस्यास्तटे ॥ १५. ***समागच्छद् व्यधाच्चैतत्०*** मु. ॥ १६. जलसेचनैः ॥ १७. कारणम् ॥ १८. नारकात् ॥ १९. ***०शुभस्थानम्०*** मु. ॥ २०. ***कालप्राप्तं*** खंता. पाता. वा.१-२ मु. ॥ २१. ***भुवन०*** मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶[1]पौषधं पारयित्वा तं राजा **मेघरथो**ऽपि हि । यथावत् पालयन्नुर्वीं तस्थौ न्याय इवाऽङ्गवान् ॥३१४॥
कपोत-श्येनवृत्तान्तमन्यदाऽ[2]नुस्मरन्नृपः । परं वैराग्यमापेदे बीजं प्रशमशाखिनः ॥३१५॥
कृत्वाऽष्टमतपः सोढुमपसर्ग-परीषहान् । तस्थौ प्रतिमया शैल इव सर्वाङ्गनिश्चलः ॥३१६॥
¶**ईशानेन्द्र**स्तदानीं च [3]मध्येशुद्धान्तमासितः । 'नमो भगवते तुभ्यं' इति जल्पन्नमोऽकरोत् ॥३१७॥
महिष्यस्तस्य पप्रच्छुः कस्मै स्वामिन्नमस्क्रिया । त्वया जगन्नमस्येन विदधेऽत्यन्तभक्तितः ? ॥३१८॥
**ईशानेन्द्रः** शशंसैवमर्हद्**घनरथा**त्मजः । नगर्यां **पुण्डरीकिण्यां** सरस्यां पुण्डरीकवत् ॥३१९॥
अयं **मेघरथो** नाम कृताष्टमतपो नृपः । विशुद्धध्यानमापन्नो महाप्रतिमया स्थितः ॥३२०॥
भावी तीर्थकरश्चैष **भरत**क्षेत्रमण्डनम् । दृष्ट्वा तदेनमेतस्मै नमोऽकार्षमिह स्थितः ॥३२१॥त्रिभिर्विशेषकम्॥
ध्यानादस्मादमुं धीरं न हि चालयितुं क्षमाः । सुरा-ऽसुरगणाः सेन्द्रा अपि मर्त्यादयस्तु के? ॥३२२॥
**ईशानेन्द्र**महिष्यौ च **सुरूपा** चाऽ**तिरूपिका** । असहिष्णू प्रशंसां तां राज्ञः क्षोभार्थमीयतुः ॥३२३॥
¶युवतीस्ते विचक्राते लावण्याम्भस्तरङ्गिणी । दुर्गं [5]वा जङ्गमं [6]जैत्रमस्त्रं वा [7]मीनलक्ष्मणः ॥३२४॥
विकारैर्विविधैस्तैस्तैः स्मरोज्जीवनभेषजैः । अनुकूलानुपसर्गानुपचक्रमिरेऽथ ताः ॥३२५॥
काऽपि मिथ्यापरिक्षिप्त[8]धम्मिल्लोद्बन्धनच्छलात् । आविश्चक्रे भुजामूलं स्मरमूलनिकेतनम् ॥३२६॥
अर्धस्रंसित[9]संव्यानं जघनं काऽप्यदर्शयत् । पिधानपटनिर्यातमिव दर्पणमण्डलम् ॥३२७॥
काचि[10]दालीजनालापव्यपदेशान् मुहुर्मुहुः । भ्रूलतोत्क्षेपमकरोत् स्मरास्त्रोत्क्षेपसन्निभम् ॥३२८॥
[11]स्मरेतिवृत्तं सन्दब्धं गान्धारग्रामबन्धुरम् । मुखदृष्टिविकाराढ्यं जगौ काऽप्यनुरागिणी ॥३२९॥
कामशास्त्रकथालापं काऽपि लीलावती मुहुः । स्वानुभूतरतक्रीडाप्रस्तावनपराऽकरोत् ॥३३०॥
पित्तादीनां प्रकृतीनामनुरूपाणि धातुना । [12]रतोपज्ञानि करणान्यालिलेखाऽपरा पुनः ॥३३१॥
ययाचे काचिदालापं करस्पर्शं च काचन । दृष्टिप्रसादं काचिच्च काचिदालिङ्गनं पुनः ॥३३२॥
कलाप्रकारान् विविधान् व्यधुरेवं महीपतेः । वि[13]भावर्या[14]माविभातं [15]विकृत्य सुरयोषितः ॥३३३॥
टङ्कप्रहारवद् वज्रे मोघीभूतानि भूभुजः । तानि वैक्रियरूपाणि देव्यौ सञ्जहतुस्ततः ॥३३४॥
क्षमयित्वा **मेघरथं** [16]नत्वा चाऽ[17]नुशयान्विते । **ईशानेन्द्र**महिष्यौ ते निजधामनि जग्मतुः ॥३३५॥
¶राजाऽप्यपारयत् प्रीतः प्रतिमामथ पौ[18]षधम् । स्मारं स्मारं निशावृत्तं परं संवेगमासदत् ॥३३६॥
महादेवी **प्रियमित्रा** प्रियमालोक्य तादृशम् । साऽपि संवेगमापेदे सत्यो हि [19]पतिवर्त्मगाः ॥३३७॥
अथाऽपरेद्युर्विहरन्नर्हन् **घनरथः** स्वयम् । तत्रैत्य समवासार्षीत् [20]पूर्वोत्तरदिशि प्रभुः ॥३३८॥
स्वाम्यागमनमाचख्यू राज्ञे चाऽऽयुक्तपूरुषाः । स पारितोषिकं तेभ्यो दत्वाऽगात् सानुजः प्रभुम् ॥३३९॥
आयोजनविसर्पिण्या सर्वभाषानुयातया । सग्रामरागया वाचा देशनां विदधे प्रभुः ॥३४०॥
¶देशनान्ते जिनपतिं नत्वा भूपतिरब्रवीत् । विश्वत्राणोद्यतोऽसि त्वं नाथ! त्रायस्व मामपि ॥३४१॥
सर्वं जानासि सर्वस्य हितोऽसि च जगत्पते! । तथाऽपि प्रार्थये स्वामिन्! स्वार्थे क इव नोत्सुकः ? ॥३४२॥
यावत् कुमारं स्वे राज्ये निधायेहाऽऽ[21]पताम्यहम् । दीक्षादानाय मे तावत् त्वया नाथ! प्रतीक्ष्यताम् ॥३४३॥
न प्रमादो विधातव्य इति शिष्टो[22]ऽर्हता स्वयम् । ययौ **मेघरथो** वेश्मा[23]ऽवरजं चेत्यवोचत ॥३४४॥

---

१. *पोषधं०* खंता. पाता. वा.१-२ ॥ २. *०मन्यदा तु स्मरन्नृपः* खंता. पाता. वा.१-२ ॥ ३. अन्तःपुरमध्ये ॥ ४. खंता. पाता. वा.१-२ मु. न ॥ ५. इवार्थे वा शब्दः ॥ ६. जयनशीलम् ॥ ७. कामदेवस्य ॥ ८. केशपाशः ॥ ९. वस्त्रम् ॥ १०. सखीजनालाप ॥ ११. कामदेववृत्तान्तग्रथितम् । *स्मरेतिवृत्तसन्दब्धं* पा. मु. ॥ १२. रतस्य कामक्रीडाया उपज्ञा प्राथम्यमीदृशानि करणानि चित्राणि ॥ १३. *विभावरीमावि०* सं. ता. पा. ला. खंता. पाता. वा.१-२ ॥ १४. प्रातःकालपर्यन्तम् ॥ १५. *वैकृत्य* खंता. पाता. वा.१-२ ॥ १६. *नुत्वा* छा. ॥ १७. पश्चात्तापान्विते ॥ १८. *०पोषधम्* खंता. पाता. वा.१-२ ॥ १९. पतिमार्गानुसारिण्यः ॥ २०. ईशानकोणे ॥ २१. आगच्छामि ॥ २२. *महर्षिणा* ता. ॥ २३. अनुजं दृढरथम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदत्स्व वत्स! भूभारं यथा हि प्रव्रज्याम्यहम् । भवभ्रमणतोऽमुष्मान्निर्विण्णोऽस्म्येष पान्थवत् ॥३४५॥

¶ततो **दृढरथो**ऽप्येवं जगाद रचिताञ्जलिः । दुः[1]खः खल्वेष संसारस्त्याज्य एव विवेकिभिः ॥३४६॥

अस्मिन्नेवंविधेऽपारेऽकूपार[2] इव दुस्तरे । आरोप्य धरणीभारं कथं मुञ्चसि मां प्रभो! ? ॥३४७॥

[3]आत्माऽभेदेन मामद्य यावद् दृष्ट्वाऽधुना पृथक् । किं करोषि ? प्रसीदेश! मामप्यात्मवदुद्धर ॥३४८॥

अद्यैव तातपादान्ते भवत्पादैः सहैव हि । प्रव्रजिष्याम्यहं स्वामिन्नन्यस्मै दीयतां मही ॥३४९॥

ततो **मेघरथो** राज्यं **मेघसेने** निजात्मजे । यौवराज्यं **रथसेने** न्यधाद् **दृढरथा**त्मजे ॥३५०॥

¶ततश्च **मेघसेने**न कृतनिष्क्रमणोत्सवः । समं **दृढरथे**नाऽऽ[4]त्मजन्मनां सप्तभिः शतैः ॥३५१॥

राज्ञां चतुःसहस्र्या च गत्वा भगवतोऽन्तिके । सर्वसावद्यविरतिं राजा **मेघरथो**ऽग्रहीत् ॥३५२॥युग्मम्॥

परीषहानुपसर्गान् सहमानोऽतिदुःसहान् । त्रिगुप्तिः पञ्चसमितिर्निराकाङ्क्षो वपु[5]ष्यपि ॥३५३॥

विविधाभिग्रहतपःपरो **दृढरथा**न्वितः । एकादशाङ्गीधरणो धरणीं विजहार सः ॥३५४॥युग्मम्॥

विंशत्या स्थानकैरर्हद्भक्तिप्रभृतिभिः शुभैः । कर्माऽर्हन्नामगोत्रं स दुरुपार्जमुपार्जयत् ॥३५५॥

**सिंहनिष्क्रीडितं** नाम स कृत्वा दुस्तपं तपः । श्रामण्यं पालयित्वा च पूर्वलक्षमखण्डितम् ॥३५६॥

आरुह्याऽ**म्बरतिलकं** गिरिं गिरिरिव स्थिरः । [6]भ्रात्रा सहैवाऽनशनं चक्रे **मेघरथो** मुनिः ॥३५७॥[युग्मम्[7]]

पूर्णायुरापदथ **मेघरथो** विमानं
[8]**सर्वार्थसिद्ध**मनुजेन समन्वितोऽपि ।
तत्राऽ[9]मितान्यनुबभूवतरां त्रयस्त्रिं-
[10]शाब्ध्यायुरव्ययपदोपपदे सुखानि ॥३५८॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये पञ्चमे[11] पर्वणि श्री**शान्तिनाथ**-
देवीयदशमैकादशभववर्णनो
नाम चतुर्थः सर्गः[12]॥

---

१. दुःखरूपः ॥ २. समुद्रः ॥ ३. आत्मसदृशेन ॥ ४. पुत्राणाम् ॥ ५. *०वपुष्यति* पाता. वा.१-२ ॥ ६. *महात्मा विधिवत् प्रायं* मु. ॥ ७. खंता. पाता. वा.१-२ प्रतिषु न ॥ ८. *सर्वार्थसिद्धमथ तस्य सहोदरोऽपि। काले कियत्यपि गतेऽनशनं प्रपद्य, शुद्धाशयोऽव्ययपदोपपदं तदेव ॥* इति र. स्वीकृतपाठः ॥ ९. *तत्राऽमितामनु०* ला. मु. ॥ १०. *०श्यद्यायु०* ता. पा. सं., *शद्यायु०* ला. मु., *शच्चायु०* वा. १-२ ॥ ११. *पञ्चमपर्वणि* खंता. पाता. वा.१-२ ॥ १२. *सर्गः समाप्तः* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥पञ्चमः सर्गः॥

अथाऽस्य **जम्बूद्वीप**स्य वर्षे **भरत**नामनि । महर्द्धि **कुरु**देशेऽस्ति नगरं **हस्तिनापुरम्** ॥१॥

[१]शातकुम्भमयाः कुम्भास्तत्र प्रासादमूर्धसु । कलयन्ति सदो[२]द्भूतस्थलाम्भोजवनश्रियम् ॥२॥

तस्मिंश्च परितो भाति [३]दीर्घिका वलयाकृतिः । विमलस्वच्छसलिला प्राकारस्येव दर्पणः ॥३॥

तत्रोद्यानेषु राजन्ते [४]सारणीनां तटे तटे । [५]स्निग्धद्रुमा जलादानावतीर्णा इव वारिदाः ॥४॥

निशि तत्रौकसां [६]रत्नवलभीषु निशाकरः । लिह्यते प्रतिबिम्बस्थो दधिपिण्डधियौ[७]तुभिः ॥५॥

तच्चैत्येषु [८]प्लुष्यमाणागरुधूमलतास्[९]तताः । खेचरीणां प्रयच्छन्ति पटवासमयत्नजम् ॥६॥

तत्राऽ[१०]ट्टपङ्क्तौ लक्ष्यन्ते रत्नमालाः प्रलम्बिताः । रत्नसर्वस्वमानीतं [११]सर्वं रत्नाकरादिव ॥७॥

तत्र चैत्येषु भूमिष्ठा ध्वजच्छायाश्चलाचलाः । भान्ति धर्मनिधानस्य [१२]रक्षाविषधरा इव ॥८॥

[१३]इन्द्रनीलावनीकानि वासवेश्मानि तत्र च । दर्शयन्ति पयःपूर्णक्रीडावापीसमानताम् ॥९॥

तस्मिन्नि**क्ष्वाकु**वंशाब्धि[१४]सुधांशुर्नयनोत्सवः । यशोज्योत्स्नाधौतविश्वो **विश्वसेनो**ऽभवन्नृपः ॥१०॥

वज्रागारं शरण्यानामर्थिनां कल्पपादपः । सख्यसङ्केतभूः [१५]श्री-वाग्देव्योरपि बभूव सः ॥११॥

तस्याऽपारो यशोराशिः पयोराशिरिवाऽपरः । जग्रसे वि[१६]द्विषां कीर्तीर्गुर्वीरपि नदीरिव ॥१२॥

प्रभावसाधिताशेषद्विषस्तस्यैकभूपतेः । अस्त्राण्य[१७]व्यापृतान्यासन्निधानीकृतवित्तवत् ॥१३॥

गलेषु युध्यमानानां पृष्ठेषु शरणार्थिनाम् । [१८]पादं पाणिं च स ददौ निर्विशे[१९]ष इव द्वयोः ॥१४॥

तेन कोशादपाकृष्टस्त[२०]रवारी रणाङ्गणे । कोशीबभूव स्वयमप्यागताया जयश्रियः ॥१५॥

बन्धुर्न्यायः प्रिया कीर्तिः सुहृदो विमला गुणाः । पत्तिः प्रताप इत्यासीत् तस्याऽङ्गोत्थः [२१]परिच्छदः ॥१६॥

समुन्नतिजुषस्तस्य जगदानन्ददायिनः । जीमू[२२]तस्येवाऽचिरांशुर**चिरा** नाम पत्न्यभूत् ॥१७॥

¶यथा बभूव सा देवी स्त्रीजनेषु शिरोमणिः । तस्याः शीलमपि तथा गुणेषु विनयादिषु ॥१८॥

[२३]सतीमतल्लिका साऽधाद्धृदयस्य विभूषणम् । [२४]बहिर्मुक्ताहारमिव मध्ये पतिमहर्निशम् ॥१९॥

तन्निर्माणबहिर्भूतैः [२५]परमाणूत्करैरिव । सृष्टाः सुरस्त्रियोऽप्याभांस्तद्रूपालोकने सति ॥२०॥

विचरन्ती जगद्वन्द्या पादचङ्क्रमणेन सा । पृथिवीं पावयामास प्रवाहेणेव **जाह्नवी** ॥२१॥

ह्री[२६]नमत्कन्धरा नित्यमपश्यद् भुवमेव सा । मत्पतेरपि पाल्येयमिति प्रीतिवशादिव ॥२२॥

सर्वेऽपि स्त्रीगुणास्तस्यामव[२७]दाताश्चकाशिरे । यथा सौ[२८]मनसोद्यानवीथ्यां कुसुमजातयः ॥२३॥

**विश्वसेना**-ऽ**चिरा**देव्योः साम्राज्यसुखलीनयोः । कालः कियानपि ययाविन्द्रेन्द्राण्योरिवोन्मुदोः ॥२४॥

¶इतश्च **सर्वार्थसिद्धे** विमानेऽनुत्तरोत्तमे । सुखमग्नो **मेघरथ**जीवः स्वायुरपूरयत् ॥२५॥

[२९]नभस्यकृष्णसप्तम्यां भरणीस्थे निशाकरे । ततश्च्युत्वाऽ**चिरा**देव्याः स कुक्षौ समवातरत् ॥२६॥

सुखप्रसुप्तया देव्या निशाशेषे क्रमादमी । मुखे विशन्तोऽदृश्यन्त महास्वप्नाश्चतुर्दश ॥२७॥

---

१. सुवर्णमयाः ॥ २. सदा उद्भूतानि-उद्गतानि स्थलकमलानि, तेषां वनं, तस्य श्रीः, ताम् ॥ ३. परिखा ॥ ४. नीकानाम् 'नीका तु सारणी' (शेषना. श्लो. १६९) ॥ ५. ***स्निग्धा द्रुमाः*** खंता. पाता. वा. १-२ ॥ ६. रत्नखचितछदिराधारेषु 'वलभी छदिराधारः' (अभि. चिन्ता. कां. ४, श्लो. १०११) 'छत' इति भाषायाम् ॥ ७. बिडालैः ॥ ८. दह्यमानागरु । ***०पुष्पमालागरुधूम०*** पाता. ॥ ९. व्याप्ताः ॥ १०. हट्टपङ्क्तौ ॥ ११. ***सर्वरत्नाकरादिव*** सं. ला. छा. मु. ॥ १२. रक्षाकारिणः सर्पा इव ॥ १३. इन्द्रनीलखचिता अवनी-भूमिः येषु तानि ॥ १४. चन्द्रः ॥ १५. लक्ष्मी-सरस्वत्योः ॥ १६. शत्रूणाम् ॥ १७. अप्रयुक्तानि ॥ १८. युध्यमानानां गलेषु पादं, शरणार्थिनां पृष्ठेषु हस्तमिति क्रमात् ॥ १९. समदर्शी ॥ २०. असिः ॥ २१. परिवारः ॥ २२. मेघस्य विद्युदिव ॥ २३. सतीषु श्रेष्ठा ॥ २४. ***बहिर्मुक्ताहार इव*** ला. पा. छा. दे. खंता. पाता. वा. १-२ ॥ २५. ***परमाणुकणैरिव*** पा. छा. दे. मु. ॥ २६. लज्जावनतग्रीवा ॥ २७. विशदाः ॥ २८. देवोद्यानमार्गे ॥ २९. भाद्रपदमासे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]क्षरन्मदजलामोदमाद्यन्मधुलिहां स्वनैः । [२]मुखप्रवेशनानुज्ञां याचमान इव द्विपः[1] ॥२८॥
[३]त्रसत्वमाप्तः कैलासगण्डशैल इवाऽमलः । [४]उद्दण्डपुं[५]डरीकर्द्धिलुण्टाकोऽङ्गत्विषा वृषः[2] ॥२९॥
[६]उन्नालमुकुलीभूतरक्तराजीवबन्धुना । [७]उत्क्षिप्तवालहस्तेन शोभमानश्च केश[3][८]री ॥३०॥
क्रियमाणाभिषेका च करिभ्यां पार्श्वयोर्द्वयोः । [4]महालक्ष्मीर्दिव्यरूपा [९]रूपान्तरमिवाऽऽत्मनः ॥३१॥
पञ्चवर्णैर्दिव्यपुष्पैर्दा[5][१०]मग्रथितमायतम् । [११]ऋजुरोहितसङ्काशमाकाशश्रीविभूषणम् ॥३२॥
अखण्डमण्डलोद्योती [१२]पार्वणो [6]रजनीपतिः । नैर्मल्यभूमिः [१३]ककुभामादर्श इव [१४]राजतः ॥३३॥
सत्यामपि विभावर्यां दर्शयन् वासरश्रियम् । [१५]कराङ्कुरप्ररोहैकमहाकन्दो दिने[7]श्वरः ॥३४॥
[१६]पताकाया लासिकाया इव [१७]लास्यैकमन्दिरम् । दृशां विश्रामसदनमायतश्च [8]महाध्वजः ॥३५॥
[१८]आमोदमेदुरस्मेरसरोजपिहिताननः । वि[१९]शालः [9]पूर्णकुम्भश्च श्रीदेव्या इव वि[२०]ष्टरः ॥३६॥
विकस्वरैः सुरभिभिः सुन्दरं [२१]सरसीरुहैः । [10]सरोवरं पयःपूर्णं पद्महृद इवाऽपरः ॥३७॥
समालिलिङ्गिषुरिवाऽ[२२]भ्रमालामम्बरस्थिताम् । [२३]उदञ्चयन्वीचिहस्तानपारो [11]मकराकरः ॥३८॥
विचित्ररत्नकलशं [२४]पताकामालभारि च । वि[12]मानं चाऽप्रतिमानं [२५]व्योम्नः प्रासादसन्निभम् ॥३९॥
सूर्यादिज्योतिषां सृष्टिपुद्गलानामिवोच्चयः । [13]रत्नपुञ्जोऽम्बरतलं लिम्पन्नू[२६]रुमरीचिभिः ॥४०॥
अभ्रंलिहाभिः की[२७]लाभिर्जिह्वाभिरिव भूरिभिः । तमःपूरं [२८]कवलयन्निर्धूमश्च वि[14]भाव[२९]सुः ॥४१॥
सुप्तोत्थिता तु सा देवी **विश्वसेनाय** भूभुजे । तान् स्वप्नान् कथयामास व्याचख्याविति सोऽपि हि ॥४२॥
'लोकोत्तरगुणः श्रीमांस्त्रैलोक्यत्राण[३०]कर्मठः । एभिः स्वप्नैर्महादेवि! तव सूनुर्भविष्यति ॥४३॥
नैमित्तिकैरपि प्रातः पृष्टैरूचे तवाऽऽत्मजः । चक्री वा धर्मचक्री वा स्वप्नैरेभिर्भविष्यति ॥४४॥
स्वप्नार्थवेदकान् राजा सत्कृत्य विससर्ज तान् । देवी च [३१]रत्नगर्भेव गर्भरत्नं बभार सा ॥४५॥
प्रागुत्पन्नान्य[३२]शिवानि तदा चाऽऽसन्ननेकशः । उद्वेग-रोग-मार्यादिकारीणि [३३]**कुरु**मण्डले ॥४६॥
तत्प्रशान्त्यै जनश्चक्रे नानोपायानुपायवित् । तानीषदपि नाऽशाम्यन्नम्भोभिर्वाडवाग्निवत् ॥४७॥
भगवत्य**चिरा**देव्याः प्राप्तमात्रेऽपि गर्भताम् । अशाम्यन्नशिवान्यर्हत्प्रभावस्याऽ[३४]वधिर्न हि ॥४८॥
¶ततो नवसु मासेषु दिनेष्वर्धाष्टमेषु च । ज्येष्ठकृष्णत्रयोदश्यां भरणीस्थे निशाकरे ॥४९॥
ग्रहेषु चोच्चसंस्थेषु मृगाङ्कमिव पूर्वदिक् । [३५]मृगाङ्कं [३६]काञ्चनरुचिम**चिरा** सुषुवे सुतम् ॥५०॥[युग्मम्]
तदा च क्षणमुद्योतस्त्रिजगत्यप्यजायत । अपि नारकजन्तूनां सुखं चाऽभूतपूर्व्यभूत् ॥५१॥
¶ततश्च दिक्कुमारीणामासनानि चकम्पिरे । अर्हज्जन्माऽवधिज्ञानादजानन् जहृषुश्च ताः ॥५२॥
अधोलोकादथा[३७]ऽष्टैयुर्दिक्कुमार्योऽर्हदोकसि । नेमुर्जिनेन्द्रं विधिवज्जिनेन्द्रजननीं च [३८]ताः ॥५३॥
देव्यै स्वं ज्ञापयित्वा ता मा भैषीरित्युदीर्य च । **संवर्त्तकानिले**नाऽपनिन्युरायोजनं रजः ॥५४॥

---

१. क्षरन्मदजलस्याऽऽमोदेन मत्तानां भ्रमराणाम् ॥ २. ***मुखे प्रवेश*** मु. ॥ ३. जङ्गमत्वं प्राप्तः ॥ ४. उच्चदण्डवत् कमलसमृद्धिचौरः ॥ ५. ***पुण्डरीकर्द्धिलुम्पाको०*** ला. ॥ ६. ऊर्ध्वनालेन मुकुलीभूतेन रक्तकमलेन सदृशेन । ***उत्ताल*** खंता. पाता. वा.१-२ ॥ ७. ऊर्ध्वीकृतपुच्छेन ॥ ८. ***केसरी*** मु. ॥ ९. अचिरादेव्याः प्रतिकृतिरिव ॥ १०. ***ग्रन्थित०*** पाता. वा.१-२ ॥ ११. इन्द्रधनुःसदृशम् ॥ १२. पूर्णिमायाः ॥ १३. दिशां दर्पणः ॥ १४. रूप्यमयः ॥ १५. कराः किरणा एव अङ्कुराः तेषां प्ररोहेऽद्वितीयो महाकन्दसमानः ॥ १६. ***पताकाभिर्लासि०*** पा. ॥ १७. पताकारूपनर्तक्या नृत्यैकमन्दिरम् ॥ १८. आमोदेन व्याप्तानि यानि प्रफुल्लकमलानि तैश्छन्नमुखः ॥ १९. ***विशालपूर्ण०*** मु.आदिषु ॥ २०. आसनम् ॥ २१. कमलैः ॥ २२. ***०रिवाऽभ्रमाला मन्दरस्थिताः*** पा. । मेघमालाम् ॥ २३. कल्लोला एव हस्ताः तान् उदञ्चयन् ऊर्ध्वीकुर्वन् ॥ २४. पताकानां मालाः-श्रेणयः, ता बिभर्तीति पताकामालभारि ॥ २५. ***व्योम्नि*** दे. मु. खंता.पाता. वा.१-२ विना ॥ २६. विस्तीर्णकिरणैः ॥ २७. ज्वालाभिः ॥ २८. ग्रसन् ॥ २९. अग्निः ॥ ३०. कुशलः ॥ ३१. वसुन्धरा ॥ ३२. अशुभानि, उपद्रवाः ॥ ३३. कुरुदेशे ॥ ३४. मर्यादा ॥ ३५. हरिणः चिह्नं यस्य सः तम् ॥ ३६. सुवर्णस्य इव कान्तिः यस्य सः तम् ॥ ३७. ***अधोलोकादथोऽष्टैयु०*** वा. १-२, ***०दथाऽष्टैयु०*** मु. ॥ ३८. ***ताम्*** सं. ला.छा. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनेन्द्र-जिनजनन्योरनत्यासन्नदूरतः । गायन्त्यस्तद्गुणांस्तस्थु[1]र्गायन्य इव तास्ततः ॥५५॥

अष्टोर्ध्वलोकादी(दे)युर्दिग्देव्यः प्राग्विधिपूर्वकम् । विकृत्याऽब्दान्[2] सिषिचुः क्ष्मां[3] गायन्त्योऽस्थुस्तथैव ताः ॥५६॥

अष्टे(ष्टै)युः **पूर्वरुचकाद्** देव्यो दर्पणपाणयः । जिनं जिनाम्बां नत्वाऽस्थुर्गायन्त्यः पूर्वदिश्यथ ॥५७॥

देव्योऽ[4]**पाग्रुचका**देयुरष्टौ भृङ्गारपाणयः । नत्वाऽर्हन्तं तदम्बां च गायन्त्योऽस्थुरपाग्दिशि ॥५८॥

**प्रे[5]त्यग्रुचक**तोऽष्टे(ष्टै)युर्देव्यो नत्वा जिना[6]ऽ**चिरे** । गायन्त्यस्तद्गुणांस्तस्थुः प्रतीच्यां व्यजनाञ्चिताः ॥५९॥

**उ[7]दग्रुचक**तोऽप्येत्य देव्योऽष्टौ तौ प्रणम्य च । उ[8]दीच्यां चामरभृतस्तस्थुस्तद्गुणगायिकाः ॥६०॥

**विदिग्रुचक**तोऽप्येत्य चतस्रो दिक्कुमारिकाः । प्राग्वन्नत्वा विदिक्ष्वस्थुर्गायन्त्यो दीपपाणयः ॥६१॥

चतस्रो **रुचकद्वीपा**न्तःस्था एत्य प्रणम्य तौ । नालं जिनेन्द्रस्य चतुरङ्गुलोत्कर्षमच्छिदन् ॥६२॥

खनित्वा वि[9]वरं द्र[10]व्यंनिधायं तत्र तं न्यधुः । रत्नैर्वज्रैस्तदाऽऽपूर्याऽऽबध्नन् पीठं च दूर्वया ॥६३॥

सूतिकावेश्मनस्तस्य पूर्वोदग्दक्षिणासु ताः । सचतुःशालानि रम्भासदनानि विचक्रिरे ॥६४॥

नीत्वाऽर्हद**चिरा**देव्यौ दक्षिणे कदलीगृहे । रत्नसिंहासने मध्येचतुःशालं निवेश्य च ॥६५॥

दिव्यैः सुरभिभिस्तैलैरभ्यं[11]ग्यानङ्गुरुभावपि । ततश्चोद्वर्तयामासुर्गन्धद्रव्यैः सुगन्धिभिः ॥६६॥ [युग्मम्]

प्राग्रम्भासदने नीत्वा न्यस्य सिंहासने च तौ । ता देव्योऽस्नपयन् गन्ध-पुष्प-शुद्धोदकैस्ततः ॥६७॥

द्वावप्यामो[12]च्य दिव्यानि वस्त्रालङ्करणानि ताः । उदग्रम्भागृहे नीत्वा रत्नसिंहासने न्यधुः ॥६८॥

गोशीर्षचन्दनं **क्षुद्रहिमाद्रे**राभियोगिकैः । आनाय्याऽऽ[13]प्लुष्य चाऽबध्नन् रक्षाग्रन्थिं द्वयोरपि ॥६९॥

पर्वतायुर्भवेत्युच्चैर्वदन्त्यो जिनकर्णयोः । ताः समास्फालयामासू रत्नपाषाणगोलकौ ॥७०॥

जिनेन्द्र-जिनजनन्यौ निन्युस्ताः सूतिकागृहे । पर्यङ्के न्यस्य तस्थुश्च गायन्त्यो भगवद्गुणान् ॥७१॥

¶तदा चाऽऽसनकम्पेन ज्ञात्वाऽर्हज्जन्म वज्रभृत् । **पालके**न विमानेन तत्राऽऽगात् सपरिच्छदः ॥७२॥

नमस्तुभ्यं रत्नकुक्षिधारिणीति वदन्नथधात् । **शक्रो**ऽ**वस्वापनीं** देव्या रूपान्तरमथाऽर्हतः ॥७३॥

पञ्चरूपस्ततो भूत्वा चतुर्भिरिव दर्पणैः । तत्र चैकेन रूपेण पाणिभ्यां प्रभुमुद्दधे ॥७४॥

दधानश्चामरे द्वाभ्यां छत्रमेकेन चोज्ज्वलम् । एकेन च पुरो व[14]ल्गन् वज्रमुल्लालयन् ययौ ॥७५॥

क्षणाद् गत्वा **मेरुशैले**ऽ**तिपाण्डुकम्बलां** शिलाम् । सिंहासने निषसाद **शक्रो**[15]ऽङ्कारोपितप्रभुः ॥७६॥

तदैवाऽऽसनकम्पेनाऽ**च्युता**द्या अपि वासवाः । त्रिषष्टिरपि तत्राऽद्रौ ससङ्केता इवाऽऽययुः ॥७७॥

[16]ह्रदिनीनाथ-[17]ह्रदिनी-ह्रदादिभ्यःसमाहृतैः । पयोभिः पूरितैः कुम्भैर**च्युतो**ऽस्नपयत् प्रभुम् ॥७८॥

तं षोडशं तीर्थकरं ती[18]र्थाम्भस्कुम्भपाणयः । अन्येऽपि स्नपयामासुर्द्वाषष्टिरपि वासवाः ॥७९॥

पञ्चमूर्तिरथे**शानो** दधौ मूर्त्यैकया प्रभुम् । तिसृभिश्चामरा[19]द्यग्रे तस्थौ शू[20]लभृदन्यया ॥८०॥

भर्तुश्चतुर्षु पार्श्वेषु स्फाटिकांश्चतुरो वृषान् । **शक्रो** विचक्रे सपदि क[21]कुब्भासानिवाऽमलान् ॥८१॥

तद्विषाणाग्रनिर्यातैर्वारिभिः स्वामिनं ह[22]रिः । स्नपयामास विमलैर्धारायन्त्रोत्थितैरिव ॥८२॥

ममार्ज देवदूष्येण गोशीर्षैर्विलिलेप च । दिव्यालङ्कारमालाभिरानर्च च हरिः प्रभुम् ॥८३॥

आरात्रिकमथोत्तार्य स्वामिनो विधिपूर्वकम् । पवित्रं स्तोत्रमारेभे हर्षगद्गदया गिरा ॥८४॥

"भगवन्! भवते वि[23]श्वजनीनायाऽद्भुतर्द्धये । संसारमरुमार्गैकच्छायावि[24]टपिने नमः ॥८५॥

[25]सञ्चितैनस्तमस्विन्याः प्रभातसमयो मया । त्वदीयं दर्शनं दि[26]ष्ट्याऽधिगतं परमेश्वर! ॥८६॥

लोचनान्यपि धन्यानि यैर्दृष्टोऽसि जगत्पते! । तेभ्योऽपि पाणयो धन्यास्त्वत्संस्पर्शोऽन्वभावि यैः ॥८७॥

---

१. गानकारिण्यः ॥ २. मेघान् ॥ ३. भूमिम् ॥ ४. दक्षिणरुचकात् ॥ ५. पश्चिमरुचकात् ॥ ६. जिनं च अचिरां च नत्वा ॥ ७. उत्तररुचकात् ॥ ८. उत्तरदिशि ॥ ९. गर्तम् ॥ १०. द्रव्य(धन)वत् निहित्वा । ***द्रव्यं निधाय*** मु. ॥ ११. अभ्यङ्गं चक्रुः ॥ १२. परिधाप्य ॥ १३. दग्ध्वा ॥ १४. ***वल्गु*** मु. । प्लवमानः ॥ १५. ***शक्राङ्कारोपितः*** मु. ॥ १६. समुद्रः ॥ १७. नदी ॥ १८. ***तीर्थाम्भं कुम्भपाणयः*** मु. ॥ १९. आदिशब्देन छत्रम् ॥ २०. ईशानेन्द्रः ॥ २१. दिक्प्रकाशानिव ॥ २२. इन्द्रः ॥ २३. विश्वजनहिताय ॥ २४. वृक्षाय ॥ २५. सञ्चितपापान्येव रात्रिस्तस्याः ॥ २६. भाग्येन ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

विद्याधराणां महर्द्धिश्चक्र[१]वर्त्येकदाऽप्यसि। प्रकृष्टोऽस्येकदा देवो बलदेवोऽसि चैकदा ॥८८॥
एकदाऽप्य**च्युते**न्द्रोऽसि ज्ञानी चक्रभृदेकदा। एकदा [२]त्वहमिन्द्रोऽसि **ग्रैवेयक**विभूषणम् ॥८९॥
महासत्त्वोऽवधिज्ञानधरो राजाऽसि चैकदा। **सर्वार्थसिद्धा**लङ्कारोऽहमिन्द्रः पुनरेकदा ॥९०॥
क्व क्व जन्मनि नाऽभूस्त्वमुत्कृष्टः परमेश्वर!?। तीर्थकृज्जन्मना त्वद्य पर्याप्ता वर्णना गिरः ॥९१॥
नेशोऽस्मि त्वद्गुणान् वक्तुं स्वमर्थं किन्तु वच्म्यहम्। भवे भवे भवतु मे भक्तिस्त्वत्पादपद्मयोः" ॥९२॥
इति स्तुत्वेशमी[३]**शानात्** पुनरादाय वज्रभृत्। आशु गत्वाऽ**चिरा**देव्याः पार्श्वेऽमुञ्चद् यथा[४]स्थिति ॥९३॥
स्वामिनो दृग्विनोदायोपरि श्रीदाम-गण्डकम्। देवदूष्ये कुण्डले चोच्छीर्षके तु न्यधाद्धरिः ॥९४॥
अथेत्थं घो[५]षयामासाऽमोघवाग् [६]मघवाऽमरैः। अमरेष्वथ दैत्येषु मानवेष्वपि दुर्मतिः ॥९५॥
अर्हतोऽर्हज्जनन्याश्च योऽशुभं चिन्तयिष्यति। तस्या[७]ऽर्जकमञ्जरीव भेत्स्यते सप्तधा शिरः ॥९६॥ युग्मम् ॥
रत्न-स्वर्णमहावृष्टिं नगरे **हस्तिनापुरे**। तत्राऽकरोद् **वै[८]श्रवणः** [९]पाकशासनशासनात् ॥९७॥
तां चाऽ**वस्वापनीं** देव्याः पद्मिन्या इव भास्करः। हरिर्जहार तच्चाऽर्हत्प्रतिबिम्बं क्षणादपि ॥९८॥
अथाऽर्हतः पञ्चधात्रीरादिश्याऽप्सरसो हरिः। ततो **नन्दीश्वरे**ऽगच्छन् **मेरो**रन्ये तु वासवाः ॥९९॥
शाश्वतार्हत्प्रतिमानां तत्र चाऽष्टाहिकोत्सवम्। विधाय विधिवत् प्रीताः सर्वे [१०]स्वं स्वं पदं ययुः ॥१००॥
¶[११]अपनिद्रा ततो देवी दिव्यालङ्कार-वाससम्। दिव्याङ्गरागमुत्तेजःप्रसरं सूनुमैक्षत ॥१०१॥
आनन्दरभसोद्भ्रान्तो गत्वा देव्याः परिच्छदः। राज्ञेऽशंसत् सूनुजन्म दिक्कुमार्यादिकर्म च ॥१०२॥
ततश्च मुदितो राजाऽदात् तस्मै पारितोषिकम्। ऋद्ध्या चक्रे महत्या च सूनुजन्ममहोत्सवम् ॥१०३॥
अशाम्यन्नशिवान्यस्मिन् गर्भस्थ [१२]इति भूपतिः। तस्य [१३]नामाऽकरोत् प्रीतः **शान्ति**रित्यात्मजन्मनः ॥१०४॥
**शक्र**सङ्क्रमितसुधं निजाङ्गुष्ठं क्षुधा पिबन्। धात्रीभिर्लाल्यमानश्च क्रमेण ववृधे प्रभुः ॥१०५॥
आजन्म ज्ञानवृद्धोऽपि बाललीलायितानि सः। विविधानि व्यधात् सर्वं शोभते समयोचितम् ॥१०६॥
आशातनाभीतभीता द्युसदोऽरमयन् प्रभुम्। स्वामिना पां[१४]शुखेलाभिः स्वं [१५]महार्घं चिकीर्षवः ॥१०७॥
निःशङ्कं तांश्च पादादि क्रीडायां न [१६]न्यहन् प्रभुः। दयावीरा महात्मानः [१७]प्रसृतेऽन्यरसेऽपि हि ॥१०८॥
एवं च नानाक्रीडाभिः क्रीडन् क्रीडागृहं श्रियः। चत्वारिंशद्धनुस्तुङ्गः प्रपेदे यौवनं प्रभुः ॥१०९॥
राजकन्या नरपतिः **शान्ति**ना पर्यणाययत्। पुत्रोद्वाहोत्सवानां हि न तृप्यन्ति महर्द्धयः ॥११०॥
पञ्चविंशत्यब्दसहस्रान्ते **शान्तिं** महीपतिः। राज्ये न्यधान्निजं कार्यमन्वतिष्ठत् स्वयं पुनः ॥१११॥
यथावत् पालयामास वसुधां **विश्व[१८]सेनसूः**। महतामवतारो हि विश्वपालनहेतवे ॥११२॥
रेमे [१९]पाणिगृहीतीभि**रचिरानन्दनो**ऽपि हि। निकाचितं भोगफलं भोग्यं कर्माऽर्हतामपि ॥११३॥
¶सर्वान्तःपुरमूर्धन्या तस्य पत्नी **यशोमती**। स्वप्नेऽपश्यन् मुखे चक्रं वि[२०]शदभ्रान्तरर्कवत् ॥११४॥
तदा विमानात् **सर्वार्थात्** पूरयित्वाऽऽयुरात्मनः। जीवो **दृढरथ**स्यर्षेस्तस्याः कुक्षाववातरत् ॥११५॥
तदानीमेव सा सुप्तोत्थिता देवी **यशोमती**। नाथाय **शान्तिनाथा**य तमाख्यत् स्वप्नमात्मनः ॥११६॥
ज्ञानत्रयधरः **शान्तिस्वामी** व्याख्यादिदं ततः। आसीद् **दृढरथो** नाम मम जन्मान्तरे[२१]ऽनुजः ॥११७॥
च्युत्वा विमानात् **सर्वार्था**त् स इदानीं तवोदरे। अवातारीत् [२२]तनूजं तं समये प्रसविष्यसे ॥११८॥
तद[२३]मोघं वचः पत्युः [२४]प्रगेऽब्दस्येव गर्जितम्। श्रुत्वा प्रमुदिता देवी सद्यो गर्भं बभार तम् ॥११९॥

---

१. ०*वर्त्ती कदाप्यसि* मु. ॥ २. *त्वं महेन्द्रोऽसि* मु. ॥ ३. ईशानेन्द्रात् ॥ ४. ०*स्थितिः* मु. ॥ ५. *घोषयामास मोघ०* मु. ॥ ६. इन्द्रः ॥ ७. अर्जको वृक्षविशेषः ॥ ८. धनदः ॥ ९. इन्द्राज्ञया ॥ १०. *स्वस्वपदं* मु. ॥ ११. अपगता निद्रा यस्याः सा ॥ १२. *एव* मु. ॥ १३. ०*नामाऽकरोच्छान्तिनाथ इत्या०* खंता. पाता. वा. १-२, छा. दे. मु. विना ॥ १४. धूलिक्रीडाभिः ॥ १५. मूल्यवन्तम् ॥ १६. *व्यहन्* मु. ॥ १७. *प्रस्तुते* खंता. पाता. वा. १-२ ता. मु. विना ॥ १८. *विश्वसेनभूः* ला. ॥ १९. भार्याभिः ॥ २०. मेघान्तः सूर्यवत् प्रविशत् ॥ २१. लघुभ्राता ॥ २२. पुत्रम् ॥ २३. सत्यम् ॥ २४. प्रातःकाले ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काले च सुषुवे पुत्रं पवित्रं पूर्णलक्षणम् । देवा **यशोमती** पत्युः प्रतिबिम्बमिवाऽद्भुतम् ॥१२०॥

गर्भस्थेऽस्मिन् **यशोमत्या** स्वप्ने यच्चक्रमीक्षितम् । तेन **चक्रायुध** इति तस्य नामाऽकरोत् पिता ॥१२१॥

**चक्रायुधो**ऽपि ववृधे करिपोत इव क्रमात् । धात्रीभिर्लाल्यमानः सन् [१]नृलोकतिलकोपमः ॥१२२॥

यौवनं युवतीवर्गविलोचनविमोहनम् । अनङ्गलीलोपवनं प्राप **चक्रायुधः** क्रमात् ॥१२३॥

स्वयंवराः श्रिय इव रूप-लावण्यशालिनीः । अनेकशो राजपुत्रीः पिता तेनोदवाहयत् ॥१२४॥

¶श्रीमतः **शान्तिनाथ**स्य राज्यं पालयतः सतः । व्यतियान्ति स्म वर्षाणां सहस्राः पञ्चविंशतिः ॥१२५॥

**शान्ते**रथाऽस्त्रशालायां विशाल[२]ज्योतिराचितम् । अभूच्चक्रमुपपादशय्यायामिव [३]निर्जरः ॥१२६॥

तस्य चाऽकारयत् स्वामी चक्रस्याऽष्टाहिकोत्सवम् । पूजामाचारपूज्यस्य पूज्या अपि हि कुर्वते ॥१२७॥

¶तच्चक्रमस्त्रशालायाः पयोराशेरिवाऽ[४]र्यमा । चचाल पूर्वाभिमुखं मुखं दिग्विजयश्रियः ॥१२८॥

अरैरिव सहस्रेण यक्षैस्तत्समधिष्ठितम् । अन्वचालीन् महीपालः सैन्यच्छन्नमहीतलः ॥१२९॥

दिने दिने योजनं तद् गत्वा चक्रमवास्थित । द्वादशयोजनायामं कृत्वा च शिबिरं प्रभुः ॥१३०॥

एवं दिने दिने गच्छ[५]न्नच्छिन्नं [६]**विश्वसेन**सूः । आसदन् **मागधं** तीर्थं पूर्वाब्धिमुखमण्डनम् ॥१३१॥

स्कन्धावारं दृढस्कन्धः श्री**शान्ति**स्तस्य रोधसि । अलब्धमध्यमम्भोधिमिव सद्यो न्यवीविशत् ॥१३२॥

ततो **मागध**तीर्थाभिमुखं सिंहासनोत्तमे । जिगीषुरप्य[७]नाबद्धविकारो न्यषदत् प्रभुः ॥१३३॥

ततो द्वादशयोजन्यां तस्थुषो **मागधे**शितुः । सिंहासनं तदा सद्यः खञ्जपादमिवाऽचलत् ॥१३४॥

अथ सञ्चिन्तयामास मनसा **मागधे**श्वरः । किमपूर्वमिदमहो! चलितं यन्ममाऽऽसनम् ? ॥१३५॥

किं नु च्यवनकालो मे सम्प्रत्ययमुपस्थितः? । ऋद्धिं ममाऽसहिष्णुः किं कोऽप्यचालयदासनम् ? ॥१३६॥

एवमुत्पन्नसन्देहः प्रयुक्तावधिनाऽथ सः । अज्ञासीदागतं **शान्तिं** चक्रिणं धर्मचक्रिणम् ॥१३७॥

भूयो **मागध**तीर्थाधिपतिरेवमचिन्तयत् । अज्ञानचिन्तितमिदं धिगहो! मे शिशोरिव ॥१३८॥

अयं हि षोडशस्तीर्थकरश्चक्री च पञ्चमः । मां प्रत्यस्त्येव[८]मासीनोऽनुकम्पार्गलितः प्रभुः ॥१३९॥

[९]त्रिजगत्त्राण-संहारक्षमदोष्णो जगत्पतेः । पुरस्तादस्य कोऽस्म्येष खद्योत इव [१०]भास्वतः ? ॥१४०॥

**अच्युते**न्द्रादयो यं च पदातिवदुपासते । तस्मिन् भक्तिं करिष्यामि कीदृशीमहमीदृशः ? ॥१४१॥

तथाऽपि हि जगन्नाथममुं स्वयमिहाऽऽगतम् । वाससो [११]दशयेवेन्दुमर्चयामि स्वसम्पदा ॥१४२॥

इति निश्चित्य मनसा गृहीत्वोपायनं महत् । नाथो **मागध**तीर्थस्य **शान्तिनाथ**[१२]मुपस्थितः ॥१४३॥

सोऽन्तरिक्षस्थितो [१३]नाथं प्रणम्यैवमवोचत । [१४]दिष्ट्या मां त्रिजगन्नाथाऽन्वग्रहीः पत्तिमात्रकम् ॥१४४॥

एषोऽस्मि शासनधरः पूर्वदिक्पालकस्तव । दुर्गपाल इवाऽऽदेश्यस्त्वया स्वामिन्नहर्निशम् ॥१४५॥

एवमुक्त्वा नमस्कृत्य सोऽर्पयामास भक्तितः । दिव्यालङ्कार-वस्त्राणि शय्यापाल इव प्रभोः ॥१४६॥

श्री**शान्ति**रपि सत्कृत्य गीर्वाणं विससर्ज तम् । प्रतस्थे चक्ररत्नं च दक्षिणाभिमुखं ततः ॥१४७॥

¶दक्षिणाम्भोनिधे रोधस्य[१५]रुद्धप्रसरः प्रभुः । चक्रमार्गानुगोऽथाऽगादगाधभुजविक्रमः ॥१४८॥

उद्दिश्य **वरदामा**नम[१६]नाक्षेपो जगत्पतिः । तीरे नीरनिधे रत्नसिंहासन उपाविशत् ॥१४९॥

ज्ञात्वा चाऽवधिनाऽऽयातं **वरदाम**पतिः प्रभुम् । [१७]गृहीतोपायनोपायोऽपायरक्षार्थमाययौ ॥१५०॥

सोऽपि नाथं नमस्कृत्य [१८]तस्य सेवां [१९]प्रतीष्य च । उपायनमुप[२०]नैषीद् दिव्यालङ्करणादिकम् ॥१५१॥

---

१. ***त्रिलोकति०*** छा. ॥ २. ज्योतिषा-तेजसा अन्वितम् । ***विशालज्योतिरोचितम्*** ला., ***विशालज्योतिराजितम्*** मु. ॥ ३. देवः ॥ ४. सूर्यः ॥ ५. सतत-प्रयाणेनेत्यर्थः ॥ ६. ***विश्वसेनभूः*** ला. दे. ॥ ७. निर्विकारः ॥ ८. ***०मासीनोऽनुकम्पागलितः*** मु. । दयारुद्धः-अनर्गलदयावान् ॥ ९. त्रिजगतां रक्षणे नाशे च समर्थबाहोः ॥ १०. सूर्यस्य ॥ ११. वस्त्रस्योभयप्रान्ततन्तुर्दशेत्युच्यते ॥ १२. ***०मुपास्थित*** मु. ॥ १३. शान्तिनाथम् ॥ १४. भाग्येन ॥ १५. अस्खलितगमनः ॥ १६. अनाकुलः ॥ १७. अपायात् नाशाद् रक्षायै स्वस्येति यावत् , गृहीतमुपायनं तद्रूप उपायो येन सः ॥ १८. ***तस्यासेवां*** मु. ॥ १९. ***प्रतीक्ष्य*** ता. पा. विना । स्वीकृत्य ॥ २०. अदात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्रसादं [१]तमालम्ब्य विससर्ज जगत्पतिः । चक्ररत्नमचालीच्च प्रति [२]प्राचेतसीं दिशम् ॥१५२॥

¶नागवल्लीवनाबद्धपूगद्रुमसमाकुले । [३]कूले प्रतीच्यजलधेः स्कन्धावारं न्यधाद् विभुः ॥१५३॥

चलितासनः **प्रभास**पतिः सिंहासनस्थितम् । एत्य श्री**शान्ति**मानर्च [४]प्रतीयेष च शासनम् ॥१५४॥

¶**सिन्धु**देवीमथोद्दिश्य [५]पश्चिमोत्तरवर्त्मना । चक्रं प्रतस्थे तन्मार्गानुगः **शान्ति**रपि प्रभुः ॥१५५॥

[६]निकषा **सिन्धु**[७]सदनं दक्षिणे सिन्धुरोधसि । स्वामी न्यधत्त शिबिरं चलन्नगरसन्निभम् ॥१५६॥

सिंहासनमथाऽध्यास्य **सिन्धुं** मनसिकृत्य च । तस्थौ तत्सन्मुखः स्वामी योगीवाऽऽ[८]कृष्टितत्परः ॥१५७॥

आयातं स्वामिनं ज्ञात्वाऽवधिना **सिन्धु**देव्यपि । उपात्तोपायना सद्यो भक्तितस्तमुपाययौ ॥१५८॥

सा **शान्ति**स्वामिनं नत्वा जगादैवं कृताञ्जलिः । आदेशकारिणी देशेऽस्मिन्नस्मि [९]पृतनेव ते ॥१५९॥

इत्युक्त्वा साऽर्पयामास [१०]भक्तिप्रह्वा जगत्पतेः । [११]रत्नस्वर्णस्नानपीठ-कलशान् भूषणादि च ॥१६०॥

¶ततश्चचाल तच्चक्रं [१२]सानीकः **शान्ति**चक्र्यपि। दिशो[१३]दक्पूर्वयाऽऽपच्च **वैताढ्यो**पत्यकाभुवम् ॥१६१॥

श्री**शान्ति**स्वामिनस्तत्र **वैताढ्याद्रि**कुमारकः । प्राभृतान्यर्पयामास बभूव च वशंवदः ॥१६२॥

चक्रमार्गानुगः स्वामी **तमिस्रां** निकषा गुहाम् । जगाम विदधे चाऽऽशु [१४]**कृतमाला**मरं वशे ॥१६३॥

¶श्री**शान्ति**शासनात् **सिन्धु**नदीमुत्तीर्य [१५]चर्मणा । सेनानीः साधयामास **सिन्धो**र्दक्षिण[१६]निष्कुटम् ॥१६४॥

ततश्चोद्घाटयामास **तमिस्रां** [१७]पृतनापतिः । कपाटौ ताडयन् **दण्डरत्ने**नाऽमोघशक्तिना ॥१६५॥

**गजरत्नं** समारूढः प्ररूढप्रौढविक्रमः । तस्यां गुहायां [१८]सबलः स्वामी सिंह इवाऽविशत् ॥१६६॥

दक्षिणे [१९]कुम्भिनः कुम्भे **मणिरत्नं** [२०]तमश्छिदे । उदयाद्राविवाऽऽदित्यं [२१]विदधे **विश्वसेनसूः** ॥१६७॥

[२२]**काकिणीरत्न**मादाय पाणिनोभयतः प्रभुः । क्रमादेकोनपञ्चाशन्मण्डलान्यालिखन् ययौ ॥१६८॥

ततो **वर्धकिरत्ने**न [२३]गुहारथ्यान्तरस्थयोः । स्वाम्यु**न्मग्ना-निमग्ना**ख्यनद्योः [२४]पद्यामबन्धयत् ॥१६९॥

उत्ततार तरङ्गिण्यौ दुस्तरे अपि पद्यया । **शान्तिनाथः** ससैन्योऽपि सर्वम[२५]प्यृजु दोष्मताम् ॥१७०॥

गुहाया उत्तरद्वारं स्वयमुज्जघटे क्षणात् । [२६]प्रभावात् स्वामिनः प्रातः पद्मिनीकोशवद् रवेः ॥१७१॥

तस्या गुहाया द्वारेण ससैन्यस्तेन निर्ययौ । सर्वत्राऽस्खलितो मार्गः प्रभूणां स्रोतसामिव ॥१७२॥

गुहाया निःसृतं तस्याः ससैन्यं प्रेक्ष्य चक्रिणम् । म्लेच्छाः सम्भूय सम्भूय सोपहासमदोऽवदन् ॥१७३॥

अरे रे! कोऽयमायातोऽ[२७]प्रार्थितप्रार्थकोऽधुना । अस्मद्देशे सिंहयूथाक्रान्तारण्य इव द्विपः ? ॥१७४॥

यथेष्ट[२८]मुट्टीकमाना भटंमन्या पदातयः । धूलीधूसरसर्वाङ्गाः के [२९]त्वमी रासभा इव ? ॥१७५॥

आरूढकरिणः केऽमी वृक्षस्थाः [३०]प्लवगा इव ? । केऽमी च तुरगारूढास्तरङ्गस्था इवा[३१]ऽऽटयः ? ॥[३२]१७६॥

अमी किं पन्नग इवाऽधिरूढाः स्यन्दनेषु च ? । अङ्गारशकटीप्रायमयःखण्डमिदं च किम् ? ॥१७७॥

अहो! एषामनालोच्यकारित्वम[३३]सुमेधसाम् । सम्भूयैभिर्यदारेभे शृगालैरिव जागरः ॥१७८॥

अथवैतानुपेक्ष्याऽलं विषं वैरी ह्युपेक्षितः । वयमेतान् हनिष्यामः [३४]काकोलाः शलभानिव ॥१७९॥

एवमन्योन्यमुक्त्वा ते विविधायुधपाणयः । प्रावर्तन्ताऽग्रसैन्येन योद्धुं श्री**शान्ति**चक्रिणः ॥१८०॥

---

१. *०तमालप्य०* मु. खंता. इत्यादिषु ॥ २. पश्चिमाम् ॥ ३. तीरे । *प्रतीच्यजलधेः स्कन्धे स्कन्धा०* मु. ॥ ४. अङ्गीचकार ॥ ५. वायव्यदिक्मार्गेण ॥ ६. समीपे ॥ ७. *सिन्धुं सदनं* मु. ॥ ८. आकर्षणतत्परः ॥ ९. सेना ॥ १०. भक्तिनम्रा ॥ ११. *रत्न-स्वर्णस्नानपीठं कलशान्* ला. ॥ १२. ससैन्यः ॥ १३. ईशानदिशा ॥ १४. *कृतमालं वशंवदम्* पा. ॥ १५. चर्मरत्नेन ॥ १६. देशविशेषम् ॥ १७. सेनापतिः ॥ १८. *सबलस्वामी* मु. ॥ १९. गजस्य ॥ २०. तमसश्छेदार्थम् ॥ २१. *निदधे* ता. पा. ॥ २२. *काकणी०* खंता. पाता. वा.१-२ ॥ २३. गुहामार्गमध्यस्थितयोः ॥ २४. सेतुम् ॥ २५. सरलम् ॥ २६. *स्वामिनो वासरमुखे* दे. मु. विना, खंता. पाता. वा.१-२ ॥ २७. अप्रार्थितस्य मृत्योः प्रार्थयिता ॥ २८. उत्प्लुत्यमानाः ॥ २९. *के त्वमी* मु. ॥ ३०. वानराः ॥ ३१. *इवातयः* ता. पा. ला. खंता. वा. १-२; आटयः मत्स्याः, आतयः शरारिपक्षिविशेषाः, "आटिरातिः शरारिः स्यात्" [अभि. चिं. का. ४.श्लो.१३३८] ॥ ३२. श्लोकोऽयं पाता. प्रतौ नास्ति ॥ ३३. *मणुमेधसाम्* पा. । अशोभना बुद्धिर्येषां ते 'मूर्खा' इत्यर्थः ॥ ३४. वायसविशेषाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निजघ्नुः परिघैः केऽपि वल्मीकानिव कुञ्जरान् । गदाभिः [1]स्यन्दनानेकेऽपिषन् घटकपालवत् ॥१८१॥

शर-शूलैः केऽपि विद्ध्वाऽश्वान् [2]श्वाविध इव व्यधुः । शल्यैरकीलयन् पत्तीन् केऽपि मन्त्रैः [3]परेतवत् ॥१८२॥

इत्थं विचित्रं निघ्नन्तस्तन्वन्तस्तुमुलं महत् । वारं वारं करास्फोटं कुर्वाणाः सिंहनादिनः ॥१८३॥

उल्ललन्तो दुर्ललिता किराताः प्लवगा इव । अग्रसैन्यं वनमिवाऽभाङ्क्षुस्ते चक्रवर्तिनः ॥१८४॥

सैन्यानां जातभङ्गेन श्री**शान्तेः** पृतनापतिः । हुताशन इवाऽऽहुत्या दीप्यमानोऽति[4]भीषणः ॥१८५॥

कृतान्त इव सन्नद्धः **खड्गरत्नं** करेऽदधत् । **अश्वरत्नं** समारुह्य किरातान् प्रत्यधावत ॥१८६॥युग्मम्॥

**सेनानी-वाजि-निस्त्रिंशा**स्त्रीणि रत्नानि तानि तु । संयुक्ता [5]समलक्ष्यन्त [6]त्रयोऽग्नय इवैकतः ॥१८७॥

गरुडः पादचारीव पाटयन्निव भूतलम् । सेनान्यो मनसा तुल्यं प्रससार स वाजिराट् ॥१८८॥

सादिनः पत्तयो वाऽपि किराताः स्थातुमग्रतः । न ह्यलम्भूष्णवोऽभूवन्नद्यो[7]घस्येव शाखिनः ॥१८९॥

रन्ध्रेषु केऽप्यदुर्झम्पां केऽपि कुञ्जेषु [8]लिल्यिरे । गिरिषु प्राविशन् केऽपि [9]बुब्रुडुः केऽपि वारिषु ॥१९०॥

तत्यजुः केचिदस्त्राणि स्ववस्त्राण्यपरे जहुः । मृतीभूयेव केऽप्यस्थुर्निश्चेष्टं लुठिता भुवि ॥१९१॥

केषाञ्चिद् बाहवः पेतुः शाखा इव महीरुहाम् । शिरांसि च फलानीव दलानीव करा अपि ॥१९२॥

दन्ता निपेतुः केषाञ्चित् केषाञ्चिच्चरणा पुनः । केषाञ्चित् पुस्फु[10]टुस्तुम्बपात्रवच्च [11]करोटयः ॥१९३॥

सेनान्यामश्वरत्नेन गाहमाने रणार्णवम् । किं किं विपत्तये नाऽऽसीद् विद्विषां यादसामिव ? ॥१९४॥

[12]एवमालोडितास्तेन ते किराताः क्षणादपि । जग्मुर्दिशो दिशं सर्वे पवनोद्धूततूलवत् ॥१९५॥

ते योजनानि भूयांसि गत्वैकत्राऽमिलन्नथ । मन्त्रयाञ्चक्रिरे चैव[13]ममर्ष-व्रीडपीडिताः ॥१९६॥

अहो! किमिदमस्माकमाकस्मिकमुपस्थितम् ? । यत् कश्चिदेष **वैताढ्यं** लङ्घित्वेह समाययौ ॥१९७॥

तत्राऽपि चाऽतिमात्रेण सैन्येनाऽनन्यसन्निभः । छादयामास नः पृथ्वीमुद्वेल इव वारिधिः ॥१९८॥

पदातिमात्रं तस्याऽपि कोऽप्येकाङ्गोऽयमुद्भटः । भटोऽस्मान् कुट्टयामास चिरं सुभटमानिनः ॥१९९॥

अन्योऽन्यस्याऽपि जिह्रीमः प्राक्शौर्यो[14]च्छूनबाहवः । अतः परं मुखमपि न स्वं दर्शयितुं क्षमाः ॥२००॥

अधुना प्रविशामः किं दीप्यमानं हुताशनम् ? । झम्पां दद्मोऽथवा मर्तुं गिरिशृङ्गाद् गरीयसः ? ॥२०१॥

स्वयं [15]कवलयामः किं कालकूटं समुत्कटम् ? । दोलावलम्बयामः किं बद्ध्वा स्वं शाखिमूर्धसु ? ॥२०२॥

स्वोदरं दारयामः किं [16]शस्त्रीभिर्जीर्णची[17]रवत् ? । दशनैः खण्डयामः किं जिह्वामे[18]र्वारुखण्डवत् ? ॥२०३॥

येन तेन प्रकारेण मरणं शरणं हि नः । एवं पराभवाक्रान्तः को मानी जीवितुं क्षमः ? ॥२०४॥

यदि वैक उपायोऽस्ति परेषां साधनाय नः । आह्वयामो वयं **मेघमुखान्** स्वकुलदेवताः ॥२०५॥

क्षीणोपायविशेषाणां क्षीणपौरुषसम्पदाम् । परैराक्रम्यमाणानां शरणं कुलदेवताः ॥२०६॥

इति निश्चित्य सर्वेऽपि **सिन्धो** रोधसि ते ययुः । चक्रिप्रतापसन्तप्ता [19]मिमङ्क्षव इवाऽम्भसि ॥२०७॥

दीना दि[20]ग्वाससः सर्वे ते तत्रोत्तानशायिनः । तस्थुर्हारितसर्वस्वा द्यूतकारनरा इव ॥२०८॥

एवं स्थितास्ते सम्भूय प्रसादाय **पयोमुचाम्** । अकार्षुरष्टमतपो भक्तिग्राह्या हि देवताः ॥२०९॥

तपोऽन्तेऽ**ब्दमुखा** देवाः प्रादुर्भूता दिवि स्थिताः । ऊचुर्मा भैष्ट मा भैष्ट वत्साः! का वोऽर्त्तिरुच्यताम् ॥२१०॥

म्लेच्छा अभ्यूचिरे चक्री कश्चिदेष निहन्ति नः । तद्भयादिह नष्टाः स्मः काकनाशमिमे वयम् ॥२११॥

त्रायध्वं भगवन्तोऽ**ब्दा**स्त्रातारो यूयमेव नः । [21]उन्मूढे हि क्षुते प्रायेणैकः शरणमर्यमा ॥२१२॥

---

१. ***स्यन्दनानेकेऽपिंषन्*** छा. दे. मु., ***स्यन्दनान् केऽप्यपिंषन्*** ला. ता., ***स्यन्दनान् केऽप्यपिषन्*** पा. सं. ॥ २. भाषायां 'शाहुडी' इति ॥ ३. प्रेतवत् ॥ ४. ***बिभीषणं*** सं. दे. ला. ॥ ५. ***०समलक्ष्यन्ते*** पाता. वा. १-२ ॥ ६. 'दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः' [अमरकोश ब्रह्मवर्ग श्लो. १९] दक्षिणाग्निः गार्हपत्याग्निः आहवनीयाग्निः एते त्रयोऽग्नयः स्युः ॥ ७. नदीपूरस्येव ॥ ८. लीना बभूवुः ॥ ९. **दुद्रुवुः** ता. पा. मु. ॥ १०. ***०टुस्तुच्छपात्र०*** मु. ॥ ११. शिरोस्थि ॥ १२. ***एवमालोकितास्तेन*** दे. मु. ॥ १३. क्रोध-लज्जापीडिताः ॥ १४. शौर्येण ऊर्ध्वबाहवः ॥ १५. अद्मः ॥ १६. छुरिकाभिः ॥ १७. जीर्णवस्त्रवत् ॥ १८. एर्वारुः भाषायां 'काकडी' इति ख्यातः; ***०मैर्वारु०*** मु. ॥ १९. मङ्क्तुमिच्छवः, टुमस्जोंत् शुद्धौ (सि. १३५२) ॥ २०. नग्नाः ॥ २१. क्षुतं छिक्का, क्षुते रुद्धे सूर्यः शरणम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

म्लेच्छा[1]नथाऽऽदिशन् देवा [2]**मेघास्या** अद्य वो रिपून् । आप्लाव्याऽद्भिर्हनिष्यामः शीतलेनाऽपि मृत्युना ॥२१३॥
**शान्ति**सैन्येऽम्बुधाराभिरा[3]यसैर्मुसलैरिव । कर्तुमारेभिरेऽथाऽ**ब्दा** महीमेकार्णवामिव ॥२१४॥
¶आप्लाव्यमानं सलिलेनाऽऽलोक्य शिबिरं निजम् । चक्रभृत् पञ्चमश्च**र्मरत्नं** पस्पर्श पाणिना ॥२१५॥
तच्च**र्मरत्नं** ववृधे सद्यो द्वादशयोजनीम् । सेवालजाल-डि[4]ण्डीरपि[5]ण्डवच्चाऽतरत्तराम् ॥२१६॥
श्री**शान्ति**शासनात् तत्र **चर्मरत्ने**ऽखिलं बलम् । आरुरोहोडु[6]प इव निष्कीलित इव स्थिरे ॥२१७॥
**चर्म**वत् पाणिना स्पृष्ट्वा कृत्वा द्वादशयोजनीम् । सैन्योपरि **छत्ररत्न**मतनोच्**छान्ति**चक्रभृत् ॥२१८॥
छत्रस्य दण्डमूले च गवाक्ष इव दीपकम् । **मणिरत्नं** न्यधाद् ध्वान्तध्वंसाय नृशिरोमणिः ॥२१९॥
उप्ताः प्रभाते मध्याह्ने निष्पन्नास्तत्र शालयः । सैन्यैर्बुभुजिरे **गेहिरत्न**स्य महिमा ह्ययम् ॥२२०॥
तस्थावहानि सप्तैवं ससैन्यः **शान्ति**चक्रभृत् । सांयात्रिक इवाऽम्भोधौ तस्मिन्नेकजलेऽपि हि ॥२२१॥
तस्याऽथ किङ्करसुराः कुपिताः श[7]स्त्रपाणयः । इत्यूचिरे **मेघमुख**कुमारांस्त्रिदिवौकसः ॥२२२॥
अरे! किमेतदारब्धमविमृश्यविधायिनः! ? । स्वशक्तिं परशक्तिं च न जानीथ हताशयाः! ? ॥२२३॥
अभ्रंलिहाग्रशिखरः सु[8]वर्णशिखरी क्व च । जानुदघ्ना वा[9]मलूराः क्व च मृद्वालुकामयाः ? ॥२२४॥
जगद्द्योती क्व मार्तण्डः ? क्व च खद्योतपोतकाः ? । क्व स्थामधाम गरुडो? निःसाराः शलभाः क्व च? ॥२२५॥
क्व नागराजो भूधर्ता ? वराकाः क्व च रा[10]जिलाः ? । स्वयम्भूरमणः क्वाऽब्धिः ? क्व च स्रोतांसि वेश्मनाम् ? ॥२२६॥
क्वैष चक्रधरस्तीर्थकृच्च त्रैलोक्यवन्दितः? । वराकाः क्व भवन्तश्च जय्या अस्मादृशामपि? ॥२२७॥ चतुर्भिः कलापकम् ॥
यात यात द्रुतं तस्मादपराधमतः परम् । न सहिष्यामहे हन्त व[11]यं श्री**शान्ति**किङ्कराः ॥२२८॥
इति साटोपमुक्तास्तैर्ययुर्**मेघमुखाः** सुराः । म्लेच्छानबोधयंस्तांश्च शरणं **शान्ति**रेव वः ॥२२९॥
शिष्टा **मेघमुखै**स्तेऽपि म्लेच्छा निःश्वस्य किञ्चन । पर्यशाम्यन् गतामर्षा द्विपा गतमदा इव ॥२३०॥
वाहनानि विचित्राणि चित्राण्याभरणानि च । वासांसि च म[12]हार्घाणि रूप्य-स्वर्णोत्करानपि ॥२३१॥
प्रभोरुपायनीकृत्य किराताः शरणार्थिनः । सर्वाङ्गलुठनैर्भूमिं मृजन्तस्ते समाययुः ॥२३२॥ युग्मम् ॥
समर्प्योपायनं **शान्ते**स्ते प्रणम्यैवमब्रुवन् । सदाऽप्यदा[13]न्ताः स्मः स्वामिन्नरण्यवृषभा इव ॥२३३॥
ततोऽस्माभिरजानद्भिस्त्वां स्वामिनमिहाऽऽगतम् । रभसादपराद्धं यत् तत्सहस्व प्रसीद नः ॥२३४॥
स्वाम्यस्यतः परं त्वं नः शाधि सा[14]धितभूतल! । स्थास्यामस्तावकीभूय भूयः किं ब्रूमहे वयम् ? ॥२३५॥
एवमुक्त्वा स्थितान् म्लेच्छान् स्वीकृत्याऽन्वग्रहीत् प्रभुः । असाधयच्च सेनान्या **सिन्धो**रुत्तरनिष्कुटम् ॥२३६॥
छादयन्नन्तरं **गङ्गा-सिन्ध्वोः** सैन्यैर्नि[15]रन्तरैः । सोऽक्षु[16]द्रपृतनः **क्षुद्रहिमा**द्रिमगमत्ततः ॥२३७॥
गोशीर्षचन्दनैः **पद्म**हृदाम्भोभिरथाऽपरैः । रत्नैरानर्च **हिमवत्कुमारः शान्ति**चक्रिणम् ॥२३८॥
गत्वा **ऋषभकूटा**द्रौ समादाय च का[17]किणीम् ।**शान्तिश्चक्री**त्यक्षराणि क[18]ल्प इत्यलिखत् प्रभुः ॥२३९॥
¶ततो रथस्थो ववले **शान्तिः** शान्तारिपौरुषः । प्राप क्रमेण **वैताढ्य**पर्वतोपत्यकाभुवम् ॥२४०॥
विद्याधरनृपैस्तत्र श्रेणिद्वितयवर्तिभिः । सच्चक्रे चक्रवर्ती स इहाऽमुत्र च शर्मणे ॥२४१॥
¶अथ **गङ्गा**तटे गत्वा **गङ्गां** स्वयमसाधयत् । सेनान्या साधयामास गाङ्गं चोत्तरनिष्कुटम् ॥२४२॥
गुहां **खण्डप्रपाता**ख्यामापपात ततः प्रभुः । **नाट्यमाला**मरं तत्र चकार च वशंवदम् ॥२४३॥
सेनानीर्**दण्डरत्ने**नोद्घाटयामास तां गुहाम् । **चक्ररत्नानुगः शान्ति**चक्रभृत् प्रविवेश च ॥२४४॥

१. ***म्लेच्छानप्या०*** मु.प्रभृतिषु ॥ २. मेघमुखाः ॥ ३. लोहमयैः ॥ ४. समुद्रफेनवत् ॥ ५. ***०पिण्डवच्चान्तरम्भसाम्*** पा., ***०पिण्डवच्चान्तरन्तरम्*** सं. छा. ला. ॥ ६. निष्कीलित(नांगरेली) नौकायाम् ॥ ७. ***०शस्त्रधारिणः*** मु.प्रभृतिषु, पाता. वा. १-२ ॥ ८. मेरुः ॥ ९. वल्मीकाः ॥ १०. निर्विषसर्पाः ॥ ११. ***श्रीशान्तिनाथकिङ्कराः*** खंता. ॥ १२. ***०महार्घ्याणि*** खंता. पाता. वा. १-२ ॥ १३. उद्धताः ॥ १४. ***०साधितभूतलः*** मु.प्रभृतिषु, पाता. वा. १-२ ॥ १५. अन्तररहितैः ॥ १६. बृहत्सैन्यः ॥ १७. ***काकणीम्*** खंता. पाता. वा. १-२ ॥ १८. आचारः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्ववन्**मणिरत्नेन** **काकिणी**[1]मण्डलैरपि । गुहागृहे ध्वान्तशान्तिं **शान्ति**र्दीपैरिव व्यधात् ॥२४५॥
लीलयोन्**मग्न-निमग्न**जले नद्यौ स पद्यया । उत्ततार ससैन्योऽपि दुष्करं नास्ति दोष्मताम् ॥२४६॥
स्वयमुद्घाटितेनाऽपाग्द्वारेण[2] पृतनान्वितः । गुहाया निरगात् तस्याः पञ्चानन इव प्रभुः ॥२४७॥
न्यधत्त विपुले **गङ्गा**पुलिने शिबिरं प्रभुः[3] । **गङ्गा**तरङ्गतरलैस्तुरङ्गैः समलङ्कृतम् ॥२४८॥
**नैसर्प**[4]प्रमुखास्तत्र **गङ्गा**मुखनिवासिनः । नवाऽपि निधयः **शान्ते**रेत्याऽभूवन् वशंवदाः ॥२४९॥
स्वच्छन्दं म्लेच्छभूमिष्ठं गाङ्गं दक्षिणनिष्कुटम् । साधयामास सेनान्या पल्लिमात्रमिव प्रभुः ॥२५०॥
इत्थं **भरत**षट्खण्डमरिषड्वर्गवत् प्रभुः । साधयित्वाऽष्टभिर्वर्षशतैर्निववृते ततः[5] ॥२५१॥
प्रयाणैरनवच्छिन्नैश्छिन्दन् मार्गं दिने दिने । आजगाम श्रियां धाम नृहस्ती **हस्तिनापुरम्** ॥२५२॥
पौरैर्ग्राम्यैश्च सोत्कण्ठैर्निर्निमेषैः सुरैरिव । वीक्ष्यमाणो **शान्तिनाथो** ययौ निजनिकेतनम् ॥२५३॥
¶अमरैर्बद्धमुकुटैर्नरेन्द्रैरपरैरपि । विदधे चक्रवर्तित्वाभिषेकः **शान्ति**चक्रिणः ॥२५४॥
अभिषेकोत्सवश्चाऽभून्नगरे **हस्तिनापुरे** । अपदण्ड-शुल्क-भटप्रवेशो[6] द्वादशाब्दिकः[7] ॥२५५॥
ततः पृथक् पृथग् यक्षसहस्राधिष्ठितात्मभिः । स चतुर्दशभी[8] रत्नैर्निधिभिर्नवभिः श्रितः ॥२५६॥
चतुःषष्ट्या सहस्रैश्चा[9]ऽऽवृतोऽन्तःपुरयोषिताम्[10] । लक्षैश्चतुरशीत्येभै[11]-रथाश्वस्य[12] च भूषितः ॥२५७॥
ग्रामाणां[13] पदिकानां[14] च कोटिषण्णवतेः प्रभुः । द्वात्रिंशतः सहस्राणां भूभुजां[15] नीवृतामिव[16] ॥२५८॥
सेवितः सूपकाराणां[17] त्रिषष्ट्यग्रैस्त्रिभिः शतैः । श्रेणि-प्रश्रेणिभिश्चाऽष्टादशभिः शोभमानभूः ॥२५९॥
महापुरसहस्राणां[18] पाता[19] द्वासप्ततेस्तथा । एकसहस्रोनद्रोणमुखलक्षस्य[20] शासिता ॥२६०॥
पत्तनाष्टाचत्वारिंशत्सहस्राणामधीश्वरः[21] । चतुर्विंशसहस्राणां[22] कर्बटानां[23] मडम्बवत्[24] ॥२६१॥
रत्नाद्याकरसहस्रविंशतेरप्यधीशिता[25] । षोडशानां तथा खेटसहस्राणां[26] च शासकः ॥२६२॥
चतुर्दशानां सम्बाधसहस्राणामपि[27] प्रभुः । पञ्चाशतं षडधिकांस्त्रायमाणो[28]ऽन्तरोदकान्[29] ॥२६३॥
पञ्चाशतः कुराज्यानामेकोनायाश्च[30] नायकः । किमन्यदुपभुञ्जानः षट्खण्डमपि **भारतम्** ॥२६४॥
गीतैर्लास्यैस्ताण्डवैश्च[31] नाटकाभिनयैरपि । पुष्पोच्चय-जलक्रीडादिभिश्चाऽनुभवन् सुखम् ॥२६५॥
आरभ्य चक्रवर्तित्वाच्चक्रवर्ती[32] स पञ्चमः । गमयामास वर्षाणां[33] सहस्रान् पञ्चविंशतिम् ॥२६६॥
¶**ब्रह्मलोके** तदानीं च **लोकान्तिक**दिवौकसाम् । आसनानि स्म कम्पन्ते[34] दोलितानीव केनचित् ॥२६७॥
किमेतदिति सम्भ्रान्ता देवाः **सारस्वता**दयः । प्रायुञ्जताऽवधिं सम्यग् ज्ञात्वा चैवं मिथोऽवदन् ॥२६८॥
अयि![35] द्वीपे **जम्बूद्वीपे भरतार्धे** च दक्षिणे । अर्हतः **शान्तिनाथ**स्य दीक्षाकालोऽयमागतः ॥२६९॥

---

१. ***काकणी०*** खंता. पाता. वा.१-२ ॥२. दक्षिणद्वारेण ॥ ३. ***विभुः*** सं. ता. दे. छा. ॥ ४. 1.नैसर्पः, 2.पाण्डुकः, 3.पिङ्गलः, 4.सर्वरत्नकः, 5.महापद्मः, 6.कालः, 7.महाकालः, 8.माणवः, 9.शङ्खः ॥ ५. ***जित्वा ततो निववृते भित्त्वा मेघमिव द्विपः*** सं. ता. ला. पा. खंता. पाता. वा.१-२ ॥६. दण्डकर-भटप्रवेशै रहितः ॥ ७. द्वादशवार्षिकः ॥ ८. 1.चक्ररत्न, 2.दण्डरत्न, 3.वाजिरत्न, 4.सेनानीरत्न, 5.पुरोधोरत्न, 6.गृहिरत्न, 7.वर्धकिरत्न, 8.चर्मरत्न, 9.छत्ररत्न, 10.मणिरत्न, 11.काकिणीरत्न, 12.खड्गरत्न, 13.गजरत्न, 14.स्त्रीरत्न एतानि चतुर्दशरत्नानि ॥ ९. ***०सहस्रैश्चाऽन्तःपुरीभिरावृतः*** सं. ता. ला. पा. खंता. पाता. वा.१-२ ॥१०. अन्तःपुरस्त्रीणां सङ्ख्या ६४सहस्रमिता ॥ ११. ***लक्षैश्चतुरशीत्येभै रथैरश्वैश्च*** सं. ता. ला. पा. खंता. पाता. वा.१-२ ॥१२. हस्तिनां सङ्ख्या ८४लक्षमिता, रथानां सङ्ख्या ८४लक्षमिता, अश्वानां सङ्ख्या ८४लक्षमिता ॥ १३. ग्रामाणां सङ्ख्या ९६कोटिमिता ॥ १४.पदातीनां सङ्ख्या ९६कोटिमिता ॥१५.नृपाणां सङ्ख्या ३२सहस्रमिता ॥१६. देशानां सङ्ख्या ३२सहस्रमिता ॥१७. सूपकाराणां सङ्ख्या ३६३मिता ॥ १८. महानगराणां सङ्ख्या ७२सहस्रमिता ॥१९. रक्षकः ॥ २०. द्रोणमुखानां सङ्ख्या ९९सहस्रमिता, द्रोणमुखानि यत्र जल-स्थलपथावुभावपि भवतः ॥ २१. पत्तनानां सङ्ख्या ४८सहस्रमिता, पत्तनानि जल-स्थलमार्गयोरन्यतरेण मार्गेण युक्तानि ॥ २२. ***चत्वारिंशत्सहस्राणां*** ता. ला. ॥ २३. कर्बटानां सङ्ख्या २४सहस्रमिता, कर्बटानि कुनगराणि । ***कर्पटानां*** मु. ॥ २४. मडम्बानां सङ्ख्या २४सहस्रमिता, मडम्बानि सर्वतोऽर्धयोजनात् परतोऽवस्थितग्रामाणि ॥ २५. रत्नाद्याकराणां सङ्ख्या २०सहस्रमिता ॥ २६. खेटानां सङ्ख्या १६सहस्रमिता, खेटानि धूलिप्राकारोपेतानि ॥ २७. सम्बाधानां सङ्ख्या १४सहस्रमिता, सम्बाधाः समभूमौ कृषिं कृत्वा कृषीवला यत्र धान्यं रक्षार्थं स्थापयन्ति ॥ २८. ***षडधिकं त्राय०*** पाता. वा.१-२ ॥ २९. द्वीपानां सङ्ख्या ५६मिता ॥ ३०. कुराज्यानां सङ्ख्या ४९मिता ॥ ३१. नृत्यैः ॥ ३२. ***०त्वादष्टवर्षशतोनिताम्*** छा. मु. ॥ ३३. ***सोऽब्दानां*** दे. मु. ॥ ३४. ***कम्पन्तेऽन्दोलितानीव०*** खंता. ॥ ३५. अयि सम्बोधने ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तत्प्रभावेण सञ्जातचेतनानीव सम्प्रति। ज्ञापयन्त्यासनान्यस्मान् दीक्षाकालोचितां क्रियाम् ॥२७०॥
ज्ञानत्रयेण जानाति भगवान् यद्यपि स्वयम्। तथाऽपि कल्प[1] इति तं स्मारयामो व्रतक्षणम्[2] ॥२७१॥
एवमन्योऽन्यमालप्य[3] विमानान्यधिरुह्य च। **शान्तिनाथ**मुपाजग्मुर्देवाः **सारस्वता**दयः ॥२७२॥
ते त्रिः प्रदक्षिणीकृत्य **शान्तिनाथं** प्रणम्य च। "तीर्थं प्रवर्तय" स्वामिन्निति प्राञ्जलयोऽवदन् ॥२७३॥
इत्युदित्वा नमस्कृत्य ययु**र्लोकान्तिका**[4] दिवम्। पूर्णार्थो जृम्भिकैः स्वामी ददौ दानं च वार्षिकम् ॥२७४॥
आत्मानुरूपे तनये राज्यं **चक्रायुधे** न्यधात्। स्वयं संयमसाम्राज्यमुपादित्सुर्जगत्पतिः ॥२७५॥
अथेन्द्रप्रमुखैर्देवैर्नृपैश्च**चक्रायुधा**दिभिः। चक्रे[5]ऽभिषेको दीक्षायां चक्रितायामिव प्रभोः ॥२७६॥ [युग्मम्]
**सर्वार्थां** नाम शिबिकां रत्नसिंहासनान्विताम्। आरुरोह जगन्नाथस्तामूहुः प्रथमं नराः ॥२७७॥
ततोऽप्युदूहुः पूर्वत्र सुरा दक्षिणतोऽसुराः। **सौपर्णेया**[6]श्चाऽपरतो[7] **नागा**[8] उत्तरतश्च ताम् ॥२७८॥
सन्ध्याभ्रवत् पाटलाभिः पाटलीकृतदिङ्मुखम्। शिरीषैः शोभितं ग्रीष्मश्रीसङ्गात् पुलकैरिव ॥२७९॥
घर्मोदबिन्दुभिरिव मल्लिकाभिः समाकुलम्। सुवर्णकेतकीकोशैः स्मरेष्वासै[9]रिवाऽङ्कितम् ॥२८०॥
प्रत्यग्रमुकुलोद्भ्रान्तगुञ्जन्मधुकरालिभिः। धातकीभिर्ग्रीष्मलक्ष्म्या गायनीभिरिवाऽऽञ्चितम्[10] ॥२८१॥
वनश्रीस्तनसङ्काशपुष्पस्तबकसम्पदा। खर्जूरैर्जजरीभूतां मधोर्[11]हसदिव श्रियम् ॥२८२॥
पचेलिमफलोद्भ्रान्तकीरपिच्छैर्निरन्तरैः। द्विगुणीभूतमाकन्ददलत्रद्धया़ऽतिबन्धुरम् ॥२८३॥
[12]अधिवापि जलक्रीडारसव्याकुलनागरम्। ययौ **सहस्राम्रवण**मचिरानन्दनः[13] प्रभुः ॥२८४॥ [14]षड्भिः कुलकम्॥
शिबिकायास्ततस्तस्याः समुत्तीर्य जगत्पतिः। उज्झाञ्चकार रत्नालङ्कार-माल्यादि राज्यवत् ॥२८५॥
ज्येष्ठकृष्णचतुर्दश्यां **भरण्यां**[15] पश्चिमेऽहनि। कृतसिद्धनमस्कारः कृतषष्ठतपाः प्रभुः ॥२८६॥
समं नृपसहस्रेण परिव्रज्यामुपाददे। तदैव चाऽऽसदज्ज्ञानं **मनःपर्यय**[16]सञ्ज्ञकम् ॥२८७॥
ततश्च **मन्दिरपुरे सुमित्र**नृपमन्दिरे। पारणं परमान्नेन द्वितीयेऽह्नि व्यधाद्विभुः ॥२८८॥
विदधे विबुधैस्तत्र वसुधारादिपञ्चकम्। रत्नपीठं **सुमित्रे**ण स्वामिपादपदे पुनः ॥२८९॥
अनासीनोऽशयानश्च निःसङ्गो निर्ममः प्रभुः। मूलोत्तरगुणाधारो विजहार वसुन्धराम् ॥२९०॥
¶अथ द्वादशमासान्ते विहरन् परमेश्वरः। आगात् **सहस्राम्रवणं** नगरे **हस्तिनापुरे** ॥२९१॥
**नन्दि**वृक्षतले तत्र षष्ठेन तपसा प्रभोः। शुक्लध्यानान्तरस्थस्य घाति[17]कर्माणि तुत्रुटुः ॥२९२॥
पौषस्य शुद्धनवम्यां चन्द्रे च भरणीस्थिते। उत्पेदे **शान्तिनाथस्य** केवलज्ञानमुज्ज्वलम् ॥२९३॥
ज्ञात्वा चाऽऽसनकम्पेन केवलज्ञानमीशितुः। एयुरिन्द्रादयो देवास्तं देशं स्वामिपावितम् ॥२९४॥
**सम्मार्जनीभृत इव देवाः संवर्तकानिलैः**। आयोजनमपानैषू रजः-काष्ठ-तृणादिकम् ॥२९५॥
गन्धोदकं च ववृषू रजःशमनहेतवे। पञ्चवर्णा जानुदघ्नीर्दिव्याः सुमनस[18]श्च ते ॥२९६॥
भुवं स्वर्णशिलाभिस्तां बबन्धुः सन्धिबन्धुरम्। तोरणानि च रम्याणि चक्रुः पूर्वादिदिक्षु ते ॥२९७॥
मध्येकृत्वा मणीपीठं चतुर्गोपुरसुन्दरान्। प्राकारांस्त्रीन् क्रमाद्रूप्य-स्वर्ण-रत्नैर्विचक्रिरे ॥२९८॥
तत्रोपरितने रत्नवप्रे मध्यावनौ व्यधुः। तेऽशीत्यग्रचतुर्धन्वशतोच्चं चैत्यपादपम् ॥२९९॥
तस्याऽधश्छन्दकं चक्रुरप्रतिच्छन्दकं सुराः। छन्दकान्तः पूर्वदिशि रत्नसिंहासनं च ते ॥३००॥
चतुस्त्रिंशदतिशयैर्भ्राजिष्णुर्भगवानपि। पूर्वद्वारेण समवसरणं प्रविवेश तत् ॥३०१॥
तत्र प्रदक्षिणीकृत्य चैत्यवृक्षं जगद्गुरुः। "तीर्थाय नम" इत्यूचे जिनेन्द्राणां स्थितिर्ह्यसौ ॥३०२॥

१. आचारः॥ २. दीक्षावसरम्॥ ३. *०मालम्ब्य०* वा.१-२॥ ४. *०लौकान्तिका०* मु.॥ ५. ***दीक्षाभिषेको विदधे*** ला. पा. ता. छा. खंता. पाता. वा.१-२॥ ६. सुपर्णकुमारदेवाः॥ ७. पश्चिमतः॥ ८. नागकुमारदेवाः॥ ९. कामबाणैः॥ १०. *गायनीभिरिवाऽऽश्रितम्* मु.प्रभृतिषु॥ ११. वसन्तस्य॥ १२. वाप्याम्॥ १३. *०नन्दनप्रभुः* मु.॥ १४. खंता. पाता. वा.१-२ प्रतिषु नास्ति॥ १५. भरणीनक्षत्रे॥ १६. *मनःपर्यव०* मु.॥ १७. ज्ञानावरणीयकर्म, दर्शनावरणीयकर्म, मोहनीयकर्म, अन्तरायकर्म-एतानि घातिकर्माणि॥ १८. पुष्पाणि॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वसिंहासने तत्र प्राङ्मुखो न्यषदत् प्रभुः । दिक्ष्वन्यासु विचक्रुश्च तद्रूपत्रितयं सुराः ॥३०३॥
यथाद्वारं प्रविश्याऽथ श्रीमान्[1] सङ्घश्चतुर्विधः । अवतस्थे यथास्थानं स्वाम्यास्यमवलोकयन् ॥३०४॥
विरोधिनोऽपि तिर्यञ्चो मध्यवप्रेऽवतस्थिरे । प्राकारेऽधस्तने त्वस्थुर्[2]वाहनान्यखिलान्यपि ॥३०५॥
तदा **चक्रायुध**नृपं हर्षोत्फुल्लविलोचनाः । **सहस्राम्रवणो**द्यानपाला एत्य व्यजिज्ञपत् ॥३०६॥
दिष्ट्याऽद्य वर्धसे देव! य**च्छान्ति**स्वामिनोऽधुना । उत्पेदे केवलज्ञानं **सहस्राम्रवण**स्थितेः ॥३०७॥
इत्याकर्ण्य गिरं हृष्टः सद्य**श्चक्रायुधो** नृपः । पारितोषिकमेतेभ्यो दत्त्वा स्वामिनमाययौ ॥३०८॥
तत्र प्रदक्षिणीकृत्य **शान्तिनाथं** प्रणम्य च । विनयी निषसादाऽनुशक्रं **चक्रायुधो** नृपः ॥३०९॥
भूयश्च स्वामिनं नत्वा शक्र**श्चक्रायुधो**ऽपि च । प्रचक्रमे स्तोतुमेवं हर्षगद्गदया गिरा ॥३१०॥
"श्रेयो[3]दशाप्रवेशोऽद्य जगतोऽपि जगत्पते! । ज्ञानादित्येन भवता सुदिनोत्सवकारिणा ॥३११॥
पुण्यैरस्मादृशामेते तव कल्याणकोत्सवाः । कल्याणचिन्तामणयः प्रभवन्ति जगद्गुरो! ॥३१२॥
कषायादिमलालीढं मनः सर्वशरीरिणाम् । क्षालयन्ति जगन्नाथ! त्वद्दर्शनजलोर्मयः ॥३१३॥
कर्मच्छिदे बद्धयत्नस्तीर्थकृत्कर्म यत् पुरा । आर्जयस्तत् तव स्वार्थानपेक्षान्योपकारिता ॥३१४॥
घोरसंसारभीतानां महादुर्गमिव प्रभो! । [4]जगत्यदस्ते समवसरणं शरणं नृणाम् ॥३१५॥
जानासि सर्वं सर्वेषां भावं सर्वहितोऽसि च । प्रार्थनीयं न तत् किञ्चित् तथाऽपि प्रार्थ्यसे मया ॥३१६॥
यथा हि विहरन्नुर्व्यां ग्रामाकर-पुरादिकम् । [5]क्षणे क्षणे त्वं त्यजसि मा त्याक्षीर्मन्मनस्तथा ॥३१७॥
त्वत्पादपङ्कजध्यानषट्पदीभूतचेतसः । व्यतिक्रामतु मे कालो भगवंस्त्वत्प्रसादतः" ॥३१८॥
स्तुत्वेति सति तूष्णीके शक्रे **चक्रायुधे**ऽपि च । श्री**शान्तिनाथो** भगवानारेभे देशनामिति ॥३१९॥
¶"अनेकदुःखसन्ताननिदानं दववह्निवत् । अहो! खल्वेष संसारश्चतुर्गत्यात्मकः सदा ॥३२०॥
क्रोध-मान-माया-लोभाः कषायास्तस्य चोच्चकैः । आधारभूताश्चत्वारः स्तम्भा इव महौकसः ॥३२१॥
तत्क्षीणेषु कषायेषु संसारः क्षीयते स्वयम् । मूलेषु हि विशुष्केषु शुष्क एव महीरुहः ॥३२२॥
विनेन्द्रियजयं नैव कषायान् जेतुमीश्वरः । हन्यते हैमनं[6] जाड्यं न विना ज्वलितानलम् ॥३२३॥
[7]अदान्तैरिन्द्रियहयैश्चलैरपथगामिभिः । आकृष्य नरकारण्ये जन्तुः सपदि नीयते ॥३२४॥
इन्द्रियैर्विजितो जन्तुः कषायैरभिभूयते । वीरैः[8] [9]कृष्टेष्टकः पूर्वं वप्रः कैः कैर्न खण्ड्यते ? ॥३२५॥
कुलघाताय पाताय बन्धाय च वधाय च । अनिर्जितानि जायन्ते [10]करणानि शरीरिणाम् ॥३२६॥
इन्द्रियैः स्वार्थविवशैः कस्को नैव विडम्ब्यते ? । अपि विज्ञातशास्त्रार्थाश्चेष्टन्ते बालका इव ॥३२७॥
किमतोऽपि [11]घृणास्थानमिन्द्रियाणां प्रकाश्यते ? । यद् बन्धौ **बाहुबलिनि भरतो**ऽप्यस्त्रमक्षिपत् ॥३२८॥
जयो य**द्बाहुबलि**नि **भरते** च पराजयः । जिताजितानां तत्सर्वमिन्द्रियाणां विजृम्भितम्[12] ॥३२९॥
यच्छस्त्राशस्त्रि युध्यन्ते चरमेऽपि भवे स्थिताः । दुरन्तानामिन्द्रियाणां [13]महिमाऽनेन लक्ष्यते ॥३३०॥
दण्ड्यन्तां चण्डचरितैरिन्द्रियैः पशवो जनाः । [14]शान्तमोहाः पूर्वविदो दण्ड्यन्ते यत् तदद्भुतम् ॥३३१॥
जिता [15]हृषीकैरत्यन्तं देव-दानव-मानवाः । जुगुप्सितानि कर्माणि [16]ही तन्वन्ति तपस्विनः ॥३३२॥
अखाद्यमपि खादन्ति चाऽप्यपेयं पिबन्ति च । अगम्यं चाऽपि गच्छन्ति [17]हृषीकवशगा नराः ॥३३३॥
वेश्यानां नीचकर्माणि दास्यान्यपि च कुर्वते । [18]कुल-शीलोज्झितास्त्यक्तकरुणैः करणैर्हताः ॥३३४॥
परद्रव्ये परस्त्रीषु मोहान्धमनसां नृणाम् । या प्रवृत्तिः सेन्द्रियाणामतन्द्राणां[19] विजृम्भितम् ॥३३५॥

१. ***सुरासुर-नृणां गणः*** छा. दे. मु. ॥ २. ***तस्थुः*** ला. ॥ ३. कल्याणदशायां प्रवेशः ॥ ४. ***जयत्यदस्ते*** ला. पा. ता. सं. ॥ ५. ***यथा क्षणे०*** पाता. ॥ ६. सुवर्णसम्बन्धि जाड्यं मलम् ॥ ७. अदमितैः ॥ ८. ***धीरैः*** ता. ॥ ९. कृष्टा इष्टका यस्य वप्रस्य ॥ १०. इन्द्रियाणि ॥ ११. लज्जास्थानम् ॥ १२. विलासः ॥ १३. ***महिमाऽनेन लभ्यते*** मु.; ***महिम्नाऽनेन लभ्यते*** ला.प्रभृतिषु ॥ १४. उपशान्तमोहनाम्नि गुणस्थाने वर्तमानाः ॥ १५. इन्द्रियैः ॥ १६. ही इति खेदे ॥ १७. इन्द्रियवशगाः ॥ १८. कुलाचारबाह्याः ॥ १९. जागरूकाणाम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाणि-पादेन्द्रियच्छेद-मरणानि शरीरिभिः। प्राप्यन्ते यद्वशात् तेषां करणानां किमुच्यते ? ॥३३६॥
विनयं ग्राहयन्त्यन्यैर्ये स्वयं करणैर्जिताः। पिधाय पाणिना वक्त्रं तान् हसन्ति विवेकिनः ॥३३७॥
आ देवेन्द्रादा च कीटाद्ये केचिदिह जन्तवः। विमुच्यैकं वीतरागं ते सर्वेऽपीन्द्रियैर्जिताः ॥३३८॥
[1]वशास्पर्शसुखास्वादप्रसारितकरः करी। आलानबन्धनक्लेशमासादयति तत्क्षणम् ॥३३९॥
पयस्यगाधे विचरन् गिलन् गलगतामिषम्। मैनिक[2]स्य करे दीनो मीनः पतति निश्चितम् ॥३४०॥
निपतन्मत्तमातङ्गकपोले गन्धलोलुपः। [3]कर्णतालतलाघातान्मृत्युमाप्नोति षट्पदः ॥३४१॥
कनकच्छेदसङ्काशशिखालोकविमोहितः। रभसेन पतन् दीपे शलभो लभते मृतिम् ॥३४२॥
हरिणो [4]हारिणीं गीतिमाकर्णयितुमुद्धुरः। आकर्णाकृष्टचापस्य याति व्याधस्य वेध्यताम् ॥३४३॥
एवं विषय एकैकः [5]पञ्चत्वाय निषेवितः। कथं हि युगपत् पञ्च पञ्चत्वाय भवन्ति न ? ॥३४४॥
तदिन्द्रियजयं कुर्यात् मनःशुद्ध्या महामतिः। [6]यां विना यम-नियमैः कायक्लेशो वृथा नृणाम् ॥३४५॥
अनिर्जितेन्द्रियग्रामो यतो दुःखैः प्रबाध्यते। तस्माज्जयेदिन्द्रियाणि सर्वदुःखविमुक्तये ॥३४६॥
न चेन्द्रियाणां विजयः सर्वथैवाऽप्रवर्तनम्। राग-द्वेषविमुक्तानां प्रवृत्तिरपि तज्जयः ॥३४७॥
अशक्यो विषयोऽ[7]स्प्रष्टुमिन्द्रियैः स्वसमीपगः। राग-द्वेषौ पुनस्तत्र मतिमान् परिवर्जयेत् ॥३४८॥
हताहतानीन्द्रियाणि [8]सदासंयमयोगिनाम्। अहतानि हितार्थेषु हतान्यहितवस्तुषु ॥३४९॥
जिता[9]न्यक्षाणि मोक्षाय संसारायाऽजितानि तु। तदेतदन्तरं ज्ञात्वा यद्युक्तं तत् समाचरेत् ॥३५०॥
स्पर्शे मृदौ च [10]तूल्यादेरुपलादेश्च कर्कशे। भवेद्रत्यरती हित्वा जेता स्पर्शनमिन्द्रियम् ॥३५१॥
रसे [11]स्वादौ च भक्ष्यादेरितरस्मिन्नथाऽपि वा। प्रीत्यप्रीती विमुच्योच्चैर्जिह्वेन्द्रियजयी भवेत् ॥३५२॥
घ्राणदेशमनुप्राप्ते शुभे गन्धे [12]परत्र वा। ज्ञात्वा वस्तुपरीणामं जेतव्यं घ्राणमिन्द्रियम् ॥३५३॥
मनोज्ञं [13]रूपमालोक्य यदि वा तद्विलक्षणम्। त्यजन् हर्षं जुगुप्सां च निर्जयेच्चक्षुरिन्द्रियम् ॥३५४॥
स्वरे श्रव्ये च वीणादेः खरोष्ट्रादेश्च दुःश्रवे। रतिं जुगुप्सां च जयन् श्रोत्रेन्द्रियजयी भवेत् ॥३५५॥
कोऽपि नास्तीह विषयो मनोज्ञ [14]इतरोऽपि वा। य इन्द्रियैर्नोपभुक्तस्तत् स्वास्थ्यं किं न सेव्यते ? ॥३५६॥
शुभा अप्यशुभायन्ते शुभायन्तेऽशुभा अपि। विषयास्तत् क्व रज्येत विरज्येत क्व चेन्द्रियैः ॥३५७॥
स एव रुच्यो द्वेष्यो वा विषयो यदि हेतुतः। शुभाशुभत्वं भावानां तन्न तत्त्वेन जातुचित् ॥३५८॥
जितेन्द्रियो मनःशुद्ध्या ततः क्षीणकषायकः। अचिरान्मोक्षमाप्नोति जन्तुरक्षीणशर्मकम् "॥३५९॥
आकर्ण्य कर्णपीयूषवृष्टिमेवं च देशनाम्। **चक्रायुधः** [15]ससंवेगो भगवन्तं व्यजिज्ञपत् ॥३६०॥
¶"स्वामिन्! भीतोऽस्मि संसारादस्मात् क्लेशैकवेश्मनः। न पौरुषाभिमानोऽत्र दोष्मतोऽपि विवेकिनः ॥३६१॥
दीप्यमाने यथा गेहे पोते[16] स्फुटति वा यथा। तन्नेता किञ्चिदादाय सारवस्त्वन्यतो व्रजेत् ॥३६२॥
तथा भवे जन्म-जरा-मरणादिकरालिते। एकमात्मानमादाय त्वां [17]शरण्याऽऽश्रितोऽस्म्यहम् ॥३६३॥
स्वामिन्! मा मामुपेक्षस्व निपतन्तं भवार्णवे। तस्योत्तरणनावं मे दीक्षामद्यैव देहि तत् ॥३६४॥
युक्तं विवेकिनस्तेऽद इत्युक्तः स्वामिना ततः। तनये कवचहरे राज्यं **चक्रायुधो** न्यधात् ॥३६५॥
सहितो राजभिः पञ्चत्रिंशता स्वामिनोऽन्तिके। स्वामिसूनुरुपादत्त प्रव्रज्यां सङ्घसाक्षिकम् ॥३६६॥
**चक्रायुधा**दिगणभृत्षट्त्रिंशत उपादिशत्। उत्पाद-विगम-ध्रौव्यलक्षणां त्रिपदीं प्रभुः ॥३६७॥

---

१. करिणी ॥ २. धीवरस्य ॥ ३. ***कर्णतालतलापातान्*** ला. ॥ ४. मनोहराम् ॥ ५. मृत्यवे ॥ ६. मनःशुद्धिम् ॥ ७. ***०योऽस्पर्ष्टुमि०*** सं. ता. ला. पा. ॥ ८. सदा संयमधारिणां योगिनाम् ॥ ९. इन्द्रियाणि ॥ १०. ***तूलादे०*** मु. ॥ ११. ***स्वादे*** मु. ॥ १२. अशुभगन्धे ॥ १३. ***रूप-लावण्यमालोक्य*** पा. ॥ १४. अमनोज्ञः ॥ १५. वैराग्यसहितः ॥ १६. नावि त्रुटन्त्यां सति ॥ १७. ***०शरण्यं श्रितो०*** मु. प्रभृतिषु ॥ ८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्रिपद्यनुसारात् ते द्वादशाङ्गीमसूत्रयन्। [१]अनुयोग-गणानुज्ञे स्वामी तेषामदत्त च ॥३६८॥
नरा नार्यश्च भूयांसः स्वाम्यन्ते प्राव्रजंस्तदा। जगृहुः श्रावकत्वं च [२]सम्यक् सम्यक्त्वपूर्वकम् ॥३६९॥
पूर्णायामादिपौरुष्यामुत्थाय परमेश्वरः। देवच्छन्दे विशश्राम मध्यप्राकारमण्डने ॥३७०॥
स्वाम्यंह्रिपीठाध्यासीनः सङ्घे तत्रैव तस्थुषि। विदधे देशनां **चक्रायुधो** गणधराग्रणीः ॥३७१॥
पूर्णद्वितीयपौरुष्यां व्यसृजत् सोऽपि देशनाम्। नत्वाऽथ स्वामिनं जग्मुः स्वं स्वं स्थानं सुरादयः ॥३७२॥
¶तत्तीर्थजन्मा **गरुड**यक्षो गजरथोऽसितः[३]। [४]क्रोडास्यो बीजपूराब्जभृद्दक्षिणकरद्वयः ॥३७३॥
वामौ दधानो नकुलाक्षसूत्रसहितो करौ। श्री**शान्तिस्वामि**पादानां जज्ञे शासनदेवता ॥३७४॥
तत्तीर्थजन्मा **निर्वाणी** गौराङ्गी कमलासना। पुस्तकोत्पलसंयुक्तौ बिभ्रती दक्षिणौ [५]भुजौ ॥३७५॥
सकमण्डलु-कमलौ वामौ च दधती करौ। अजायत जगद्भर्तुस्तथा शासनदेवता ॥३७६॥
अमुक्तसन्निधिस्ताभ्यां भगवान[६]न्यतस्ततः। बोधाय भव्यभविनां विजहार वसुन्धराम् ॥३७७॥
¶विहरन्नन्यदा तत्र नगरे **हस्तिनापुरे**। उपेत्य समवासार्षीद् भगवान् करुणानिधिः ॥३७८॥
पौरजानपदोपेतः स्वामिनं तत्पुरेश्वरः। उपतस्थे **कुरुचन्द्र**श्चन्द्रोऽर्कमिव [७]पर्वणि ॥३७९॥
[८]यथास्थानमथाऽऽसीने श्रीमत्सङ्घे चतुर्विधे। संसारवैराग्यकरीं विदधे देशनां [९]विभुः ॥३८०॥
देशनान्ते [१०]प्रभुं नत्वा **कुरुचन्द्रो**ऽब्रवीदिदम्। प्राग्जन्मकर्मणा केन स्वामिन्! राज्यमिहाऽऽसदम्? ॥३८१॥
[११]ढौकने मम ढौक(क्य?)न्तेऽद्भुतानि प्रतिवासरम्। [१२]पञ्चवस्तु-फलादीनि केन प्राग्जन्मकर्मणा? ॥३८२॥
इष्टेभ्यस्तानि दास्यामीत्युपभुञ्जे न हि स्वयम्। न चाऽन्यस्मै प्रयच्छामि भगवन्! केन कर्मणा? ॥३८३॥
¶प्रभुरप्याख्यदेतद्धि साधवे दानतस्तव। राज्यश्रीरन्वहं चेदं ढौकनं पञ्चवस्तुनः ॥३८४॥
[१३]अदानाभोग्यते चैषां पुण्यसाधारणत्वतः। वस्त्वधीनं बहूनां हि न खल्वेकेन भुज्यते ॥३८५॥
अभीष्टेभ्यः प्रदास्येऽहमिति चिन्ताऽपि ते ततः। [१४]पूर्वकर्मानुसारेण जायते जन्मिनां हि धीः ॥३८६॥
¶अस्यैव **जम्बूद्वीप**स्य क्षेत्रे चाऽत्रैव **भारते**। **कोसला**ख्ये जनपदे नगरे **श्रीपुरे**ऽभवत् ॥३८७॥
**सुधनो धनपति**श्च **धनद**श्च **धनेश्वरः**। वणिक्पुत्राः सवयसश्चत्वारः सोदरा इव ॥३८८॥
अन्यदाऽर्थोपार्जनार्थं ते चत्वारोऽपि संहिताः[१५]। **रत्नद्वीपं** प्रत्यचलन् [१६]**द्रोणको** दूढशम्बलाः ॥३८९॥
महाटवीं प्राविशंस्ते [१७]तीर्णप्राया कृता च सा। क्षीणप्रायं च पाथेयं तेषामजनि बह्वपि ॥३९०॥
तदा चैकं ददृशुस्ते मुनिं प्रतिमया स्थितम्। अस्मै किञ्चित् प्रयच्छाम इति चाऽचिन्तयन् क्षणम् ॥३९१॥
तं च **द्रोणक**नामानमूचुः शम्बलवाहिनम्। भो! भद्र! किञ्चिदप्यस्मै **द्रोण!** देहि महर्षये ॥३९२॥
तेभ्योऽधिकश्रद्धया स तं मुनिं प्रत्यलाभयत्। महाभोगफलं कर्म तेन [१८]निर्वर्तितं तदा ॥३९३॥
**रत्नद्वीपं** च तेऽपीयुर्व्यवहारं च चक्रिरे। उपार्ज्याऽर्थं समाजग्मुर्भूयोऽपि नगरं निजम् ॥३९४॥
तेनैव पुण्यबीजेन ननन्दुः सर्वदाऽपि ते। जीवन्त्यप्येकदाऽऽम्रेन धान्यानि स्वातिवारिणा ॥३९५॥
**धनेश्वर-धनपती** किन्तु मायापरौ मनाक्। अधिकं शुद्धवृत्तिस्तु तेषु च **द्रोणको**ऽभवत् ॥३९६॥
आयुःक्षये च प्रथमं विपद्य **द्रोणकः** स तु। दानप्रभावात् पुत्रोऽभूस्त्वं [१९]**हास्तिनपुरे**शितुः ॥३९७॥
जनन्या च [२०]मुखविशच्चन्द्रस्वप्नावलोकनात्। पितृभ्यां नामधेयं ते **कुरुचन्द्र** इतीरितम् ॥३९८॥
¶**सुधनो धनद**श्चोभौ मृत्वाऽभूतां वणिक्सुतौ। **काम्पील्य**नगरे पूर्वो द्वितीयः **कृत्तिकापुरे** ॥३९९॥

---

१. अनुयोगानुज्ञां गणानुज्ञां च ॥ २. *केचित् सम्यक्त्व०* मु.प्रभृतिषु ॥ ३. कृष्णवर्णः ॥ ४. वराहमुखः ॥ ५. *करौ* दे. मु. ॥ ६. *०नन्यतत्परः* दे. मु. ॥ ७. अमावास्यायाम् ॥ ८. *यथास्थानं स्थिते चाऽथ* मु. ॥ ९. *प्रभुः* मु. ॥ १०. *विभुम्* मु. ॥ ११. उपहारे ॥ १२. *पञ्चवस्त्र-फलादीनि* ता. ला. छा. सं. खंता. पाता. वा.१-२ ॥ १३. अदानत्वमभोग्यतां च ॥ १४. *पूर्वकामानुसारेण* ता. ॥ १५. *संहताः* मु. ॥ १६. द्रोणकनामकेन पुरुषेण उदूढं पाथेयं येषां ते ॥ १७. *तीर्णप्रायीकृता* सं. ता. पा. छा. ॥ १८. अर्जितम् ॥ १९. *हस्तिनापुरेशितुः* पाता. वा.१-२ ॥ २०. *जनन्या च मुखे विश०* मु.प्रभृतिषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वसन्तदेवो** [१]नाम्नाऽऽद्यः **कामपालो**ऽपरः पुनः । विपेदाते **धनपतिः** कालात् स च **धनेश्वरः** ॥४००॥
**मदिरा-केसरा**नाम्न्यौ वणिक्पुत्र्यौ बभूवतुः । एका **शङ्खपुरे**ऽन्या तु **जयन्त्यां** तावुभावपि ॥४०१॥ [त्रिभिर्विशेषकम्]
क्रमेण वर्धमानास्ते समतिक्रम्य शैशवम् । नव्यमासादयामासुश्चत्वारोऽपि हि यौवनम् ॥४०२॥
¶**वसन्तदेवः काम्पील्याद्** व्यवहारेण सोऽन्यदा । **जयन्त्यां** प्रययौ पुर्यामर्थं च समुपार्जयत् ॥४०३॥
अन्यदा सोऽष्टमीचन्द्रोत्सवेऽगच्छद् यदृच्छया । **रतिनन्दन**मुद्यानं तत्राऽद्राक्षीच्च **केसराम्** ॥४०४॥
तया **वसन्तदेवो**ऽपि ददृशे स्निग्धया दृशा । तयोः प्राग्जन्मभूः स्नेहः प्रादुरासीत् परस्परम् ॥४०५॥
**जयन्ती**वासिनं तत्र वणिक्पुत्रं **प्रियङ्करम्** । **वसन्तदेवः** पप्रच्छ केयं ? कस्य सुताऽपि वा ? ॥४०६॥
सोऽप्याख्यदेषा दुहिता श्रेष्ठिनः **पञ्चनन्दिनः** । स्वसा **जयन्तिदेवस्य केसरा** नाम कन्यका ॥४०७॥
**वसन्तदेवो जयन्तिदेवे**न सह सौहृदम् । समारेभे मिथो वेश्मगतागतनिबन्धनम् ॥४०८॥
**वसन्तदेवो जयन्तिदेवे**न स्वगृहेऽन्यदा । [२]न्यमन्त्र्यत प्रकारो हि मैत्र्यद्रोरेष दोहदः ॥४०९॥
अर्चन्तीं **केसरां** तत्र कुसुमैः [३]कुसुमायुधम् । **वसन्तदेवः** प्रैक्षिष्ट नेत्रकैरवकौमुदीम् ॥४१०॥
**जयन्तिदेव**हस्ताब्जात् [४]प्रतीच्छन् कुसुमस्रजम् । तया **वसन्तदेवो**ऽपि ददृशे सानुरागया ॥४११॥
[५]अदोऽनुकूलं शकुनमिति हर्षोऽत्यभूत् तयोः । अन्योऽन्यशुभचेष्टा हि [६]शुभोदर्का द्वयोरपि ॥४१२॥
द्वयोश्चाऽलक्षयद् भावं धात्रीपुत्री **प्रियङ्करा** । [७]सुलक्षं हि परस्वान्तमिङ्गिताकारवेदिभिः ॥४१३॥
वसन्त इव [८]वसन्तसखस्य सुहृदोऽकरोत् । पूजां **वसन्तदेवस्य केसरा**सोदरोऽथ सः ॥४१४॥
ऊचे **प्रियङ्करा** तां च **केसरे!** तव सोदरः । करोत्यर्चामसावस्य त्वमप्युचितकृद्भव ॥४१५॥
**केसरा** युगपदपि व्रीडा-भी-हर्षधारिणी । ऊचे त्वमेव जानासि कुरुष्वाऽस्य यथोचितम् ॥४१६॥
**प्रियङ्करा**ऽप्यङ्गणस्थप्रियङ्गुतरुमञ्जरीम् । कक्कोलादीनि चाऽऽदाय **वसन्त**मिदमब्रवीत् ॥४१७॥
स्वामिनी मे स्वहस्ताग्रोच्चितान्येतानि सुन्दर! । इष्टदेयानि ते दत्ते पुष्पाणि च फलानि च ॥४१८॥
अभीष्टोऽस्म्यहमेतस्या इति हृष्टः स्वपाणिना । **वसन्तदेवो** जग्राह पुष्पाणि च फलानि च ॥४१९॥
नाममुद्रां स [९]दत्त्वोचे त्वयेदं **शोभनं** कृतम् । वर्तितव्यं सदाऽपीष्टानुरूपमिति तां [१०]वदेः ॥४२०॥
गत्वा च तद्वचोऽशंसत् **केसरायै प्रियङ्करा** । दृढानुरागकन्दस्योद्भेदने [११]वारिसेकवत् ॥४२१॥
¶पश्चिमे यामिनीयामे सुप्ता स्वप्नेऽथ **केसरा** । **वसन्तदेवे**[१२]नाऽऽत्मानं व्युह्यमानमुदैक्षत ॥४२२॥
तदा **वसन्तदेवो**ऽपि स्वप्ने परिणिनाय ताम् । स्वप्नदर्शनमप्यासीद् विवाहादधिकं तयोः ॥४२३॥
**प्रियङ्करायै** तं स्वप्नं कथयामास **केसरा** । सद्यो रोमाञ्चितवपुः [१३]पतीयन्ती तमेव हि ॥४२४॥
भविष्यत्येवमेवेदमिति स्वार्थप्रसाधकम् । पुरोधसा निजगदे तदाऽनति[१४]दवीयसा ॥४२५॥
**वसन्तदेव**स्ते भर्ता स्वप्नेन शकुनेन च । बध्यतां शकुनग्रन्थिरित्यूचे तां **प्रियङ्करा** ॥४२६॥
गत्वा **वसन्तदेव**स्याऽप्याख्यत् स्वप्नं **प्रियङ्करा** । सोऽपि स्वस्वप्नसंवादात् सिद्धमर्थममन्यत ॥४२७॥
**प्रियङ्करो**चे स्वामिन्या तुभ्यमात्मा प्रकल्पितः । कल्प्यतां निर्विकल्पं तत्सर्वं वैवाहिकं त्वया ॥४२८॥
**वसन्तदेवो**ऽप्यवदद् व्यधायि विधिनैव तत् । प्रायो [१५]मनुष्यघटितं कार्यं विघटते क्वचित् ॥४२९॥
एवं **वसन्तदेव**स्तां [१६]नियतिं रूपिणीमिव । आलप्य च सत्कृत्य च व्यसृजत् कृत्यकोविदः ॥४३०॥
इत्थं प्रत्यहमन्योऽन्योदन्तपीयूषपायिनः । कियानप्यगमत् कालस्तयोः वर्षशतोपमः ॥४३१॥

---

१. ***नामाद्यः*** मु. ॥ २. ***न्यमन्त्रि तत्प्रकारो०*** मु.प्रभृतिषु ॥ ३. कामदेवम् ॥ ४. गृह्णन् ॥ ५. ***अहोऽनुकूलम्*** पा. ॥ ६. शुभपरिणामा ॥ ७. ***सुलक्ष्यम्*** दे. मु.; सुज्ञेयम् ॥ ८. कामदेवस्य ॥ ९. ***०दत्त्वोच्चैस्त्वयेदं०*** मु. खंता. पाता. वा.१-२ ॥ १०. ***०ददे*** मु. ॥ ११. ***वारिदोदकम्*** छा. दे. ॥ १२. ***०नात्मानमुह्यमानमु०*** दे.मु. ॥ १३. ***प्रतीयन्ती*** मु.प्रभृतिषु । तं पतित्वेनेच्छन्ती ॥ १४. समीपस्थेनेत्यर्थः ॥ १५. परं दैवघटितं कार्यं कदापि न विघटत इति तात्पर्यम् ॥ १६. साक्षात् भवितव्यताम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वसन्तदेवे**नाऽन्येद्युः स्वगृहे तस्थुषा सता । मङ्गल्यतूर्यमश्रावि सदने **पञ्चनन्दिनः** ॥४३२॥

**सुदत्त**श्रेष्ठिपुत्राय **कन्यकुब्ज**निवासिने । प्रदत्ता **वरदत्ताय केसरा पञ्चनन्दिना** ॥४३३॥

वर्धापनकृते तेन तूर्यमेतद्धि वाद्यते । इति [१]प्रवृत्तिं स प्राप प्रेषितैः [२]पुरुषैर्निजैः ॥४३४॥युग्मम्॥

एवमाकर्ण्य सोऽमूर्च्छन् मुद्गरेणेव ताडितः । एवमाश्वासयाञ्चक्रे द्राक् **प्रियङ्करया** ततः ॥४३५॥

त्वां **केसरा** संदिशति खेदः कार्यस्त्वया न हि । [३]गुरूपक्रान्तमाकर्ण्य [४]विवाहमिममप्रियम् ॥४३६॥

गुरवो मदभिप्रायानभिज्ञा किञ्चिदीदृशम् । [५]विधित्सन्ति विधित्सन्तु न विधास्याम्यहं त्विदम् ॥४३७॥

त्वमेव भर्ता भावी मे भावि वा मरणं ध्रुवम् । बोद्धव्यं नाऽन्यथा नाथ! न हि मिथ्या कुलीनवाक् ॥४३८॥

प्रीतो **वसन्तो**ऽपीत्यूचे तादृशं स्वप्नदर्शनम् । प्रतिज्ञा च कुलीनानां न मुधा जातु जायते ॥४३९॥

प्रतिज्ञाऽस्माकमप्येषा **केसरा**मुद्वहामि वा । येन केनाऽप्युपायेन यामि वा यममन्दिरम् ॥४४०॥

[६]एवमुक्त्वा विसृष्टा सा प्रययावुप**केसरम्** । तदुक्तदयितोदन्तान् मुमुदे **केसरा**ऽप्यथ ॥४४१॥

तयोरन्योऽन्यसम्बन्धोपायचिन्ताजुषोर्ययौ । कालः कियानप्यसुखं रजनीव [७]रथाङ्गयोः ॥४४२॥

[८]अर्थे तयोरसम्पन्न एवोपायकृतोरपि । [९]जन्ययात्राऽऽययौ प्रातः **केसरो**द्वाहहेतवे ॥४४३॥

¶**वसन्तदेव**स्तच्छ्रुत्वा निर्गत्य नगराद्बहिः । उद्यानमेकमगमत् त्वरमाणः समीरवत् ॥४४४॥

**वसन्तदेवो** दध्यौ च साऽन्योद्वाहेन निश्चितम् । अङ्गुलीदर्शनेनेव कूष्माण्डं हा [१०]विपत्स्यते ॥४४५॥

[११]यथार्हयोगाविज्ञाभ्यां पितृभ्यां खेदिता चिरम् । मदुद्वाहनिराशा साऽनूढाऽपि हि मरिष्यति ॥४४६॥

तस्याः पुरस्तात् तन्मृत्वा शान्तदुःखो भवाम्यहम् । कः श्रोष्यति प्रियामृत्युं दग्धे [१२]पिटकसन्निभम् ? ॥४४७॥

**वसन्त**श्चिन्तयित्वैवमशोकतरुमूर्धनि । पाशग्रन्थिं गले दत्त्वोद्बबन्ध स्वं [१३]निषङ्गवत् ॥४४८॥

ईषद्बद्धे च तत्पाशे निकुञ्जात् कोऽपि पूरुषः । मा मा भोः! साहसं कार्षीरिति जल्पन् समाययौ ॥४४९॥

आरुह्याऽशोकवृक्षं स तत्पाशग्रन्थिमच्छिदत् । विरुद्धमाकृतेरस्याः कृतं किमिति ? चाऽब्रवीत् ॥४५०॥

**वसन्तो**ऽपि जगादैवं दैवदग्धस्य मेऽनया । किमि[१४]न्द्रवारुणस्यैवाऽऽकृत्या भ्रान्तोऽसि सुन्दर! ॥४५१॥

प्रियाविरहदुःखान्तहेतुं [१५]मृत्युं ममेप्सतः । किं त्वया [१६]विहितो विघ्नः पाशग्रन्थिं निकृन्तता ? ॥४५२॥

ततश्च दयितोदन्तं **वसन्त**स्तस्य पृच्छतः । शशंस शस्यमानं हि दुःखं प्रायः प्रशाम्यति ॥४५३॥

¶स पुमानप्युवाचैवं यद्यप्येवमुपस्थितम् । तथाऽपि युज्यते नेत्थं प्राणत्यागो विवेकिनः ॥४५४॥

उपाया एव युज्यन्तेऽभी[१७]ष्टार्थप्राप्तिहेतवः । [१८]उपेये त्वत्र ते सन्ति पशुवन् मा मृथास्ततः ॥४५५॥

यस्मिन्नुपेये [१९]नोपायो मर्तुं तत्राऽपि नोचितम् । मृतो न तदवाप्नोति याति कर्मोचितां गतिम् ॥४५६॥

उपायाभावतोऽप्राप्येऽभीष्टे वस्तुनि पर्यटन् । एष जीवामि जीवन् हि नरो भद्राणि पश्यति ॥४५७॥

**कृत्तिकापुर**वास्तव्यः **कामपालो**ऽस्मि नामतः । निरगां यौवनोन्मत्तो देशान्तरदिदृक्षया ॥४५८॥

पर्यटंश्चाऽऽसदं **शङ्खपुरं** नाम महापुरम् । तत्रेक्षितुं **शङ्खपाल**यक्षोत्सवमगामहम् ॥४५९॥

तत्र चूतनिकुञ्जान्तः स्मरान्तःपुरिकोपमाम् । अपश्यं कन्यकामेकामेकान्तशुभदर्शनाम् ॥४६०॥

सानुरागः सानुरागं तयाऽप्यहमुदीक्षितः । [२०]तद्दृक्पाशैर्बद्ध इव चिरं तत्र स्थितोऽस्मि च ॥४६१॥

सखीहस्तेन मेऽदत्त सा ताम्बूलमनिन्दिता । ओष्ठरागस्येव मनोरागस्याऽपि निबन्धनम् ॥४६२॥

ताम्बूलमाददानस्तद्युज्यते मम कि[२१]न्त्विह । [२२]कृतप्रतिकृतिचिकीरिति यावदचिन्तयम् ॥४६३॥

---

१. वार्ताम् ॥ २. ०*पूरुषैर्निजैः* खंता. पाता. वा.१-२ विना ॥ ३. गुरुणा पित्रादिनोपक्रान्तमारब्धम् ॥ ४. *विवाहमेवमप्रियम्* ता., *विवाहामि मम प्रियम्* मु. ॥ ५. विधातुं-कर्तुमिच्छन्ति ॥ ६. *एवमुक्ता०* मु. ॥ ७. चक्रवाकयोः ॥ ८. *अर्थस्तयोरसम्पन्न०* मु.प्रभृतिषु। अर्थे-प्रयोजने ॥ ९. लग्नयात्रा 'जान' इति भाषायाम् ॥ १०. विनङ्क्ष्यति ॥ ११. यथायोग्यसम्बन्धकरणेऽज्ञाभ्याम् ॥ १२. 'गुमडुं' इति भाषायाम् ॥ १३. तूणीरवत् ॥ १४. इन्द्रधनुष इव भङ्गुरया आकृत्या-कायेन ॥ १५. ०*हेतु मृत्युं* मु. ॥ १६. *विदधे* ता. पा. ला. सं. ॥ १७. ०*र्थप्राप्तिहेतवे* पा. दे. ॥ १८. प्राप्ये वस्तुनि ॥ १९. *नोपाया मर्तुम्* पा.छा. ता. सं. ॥ २०. *तादृक्पाशै०* मु. ॥ २१. *किं न्विह* खंता. ॥ २२. कृतस्य प्रत्युपकर्तुमिच्छन् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावदालानमुन्मूल्य परितस्त्रोटितान्दुकः[1] । प्रससार महासारः कोऽप्येको [2]व्यालकुञ्जरः ॥४६४॥युग्मम्॥
प्रतीकारासहैर्दूरात् प्रतिकारैः समुज्झितः । [3]अतिमात्राकुलैर्धावन् [4]महामात्रैरुदीक्षितः ॥४६५॥
[5]आराहस्तान् हस्तिपकान् [6]विहस्तानपहस्तयन् । हस्ती चूतनिकुञ्जं तं क्षणादप्याससाद सः ॥४६६॥युग्मम्॥
तस्याः सर्वः पलायिष्ट कन्यकायाः परिच्छदः । आत्मैवोपरि [7]सर्वस्य प्रायेणोपस्थिते भये ॥४६७॥
आपतत्यपि तत्रेभे सा पलायितुमक्षमा । [8]हरिणारौ हरिणीव तस्थौ तत्रैव वेपिनी ॥४६८॥
[9]यावदादत्त हस्तेन तां कन्यां [10]सामि [11]सामजः । लकुटेन मया तावत् [12]पेचके स न्यहन्यत ॥४६९॥
कन्यां मुक्त्वा [13]स ववले पुच्छस्पृष्ट इवोरगः । तं गजं वञ्चयित्वा च तां चाऽऽदाया[14]ऽन्यतोऽगमम् ॥४७०॥
[15]मुमुचे सा मयैकस्मिन् प्रदेशे निरुपद्रवे । सा तु [16]वारितवामेव हृदयान्न मुमोच माम् ॥४७१॥
तस्याः परिजनस्तत्र भूयोऽपि हि समाययौ । त्रातां च **मदिरां** ज्ञात्वा [17]बन्दीव प्रशशंस माम् ॥४७२॥
पुनश्चूतवने तस्मिन् सा सखीभिरनीयत । [18]दैवादापेतुरनिलाकृष्टाश्च करिशी[19]त्कराः ॥४७३॥
भीता दिशो दिशं [20]जग्मुस्ततः सर्वेऽपि सा पुनः । गता क्वाऽपीत्यजानानः [21]पर्याटं तद्दिदृक्षया ॥४७४॥
तामदृष्ट्वा चिरेणाऽपि शून्यस्वान्त इहाऽऽगमम् । न म्रिये निरुपायोऽपि किन्तु जीवामि पश्य माम् ॥४७५॥
**केसरा**यास्तु सम्प्राप्तावुपाया अपि सन्त्यहो! । [22]तत्तुल्यदुःखं मित्रं त्वां वच्म्यज्ञानेन मा मृथाः ॥४७६॥
¶प्रातर्विवाह इत्यद्य स्मरं रतिसमन्वितम् । कल्पोऽयमिति सैकैव पूजयिष्यति **केसरा** ॥४७७॥
ततोऽनागतमेवाऽऽवां स्मरदेवकुलान्तरे । सखे! प्रविश्य तिष्ठावो [23]निभृतं साधकाविव ॥४७८॥
तस्यां तत्र प्रविष्टायां तद्वेषग्रहणादहम् । [24]सेवं यास्यामि तद्गेहं मोहयंस्तत्परिच्छदम् ॥४७९॥
मयि दूरमपक्रान्ते तामादाय त्वमन्यतः । गच्छेः स्वच्छन्दमिच्छा ते सेत्स्यत्येवमखण्डिता ॥४८०॥
वचसा मुदितस्तेन **वसन्तो**ऽप्येवमब्रवीत् । ममाऽत्र योगः क्षेमं च पश्यामि व्यसनं [25]तु ते ॥४८१॥
तदा च वृद्धब्राह्मण्येष्टदेव्येव कृतं क्षुतम् । ऊचे च **कामपाले**न ममेह व्यसनं न हि ॥४८२॥
त्वत्कार्येऽस्मिन् प्रसक्तस्य प्रत्युताऽभ्युदयो मम । प्रयाति सात्त्विकानां हि दैवमप्यनुकूलताम् ॥४८३॥
अत्राऽन्तरे ब्राह्मणेन वृद्धेन स्वार्थसङ्गतम् । एवमेतन्न सन्देह इत्यूचे हृष्टचेतसा ॥४८४॥
निबध्य शकुनग्रन्थिं प्रतिपद्य च तद्वचः । **वसन्तदेवः** सुहृदा सह तेनाऽविशत् पुरीम् ॥४८५॥
तत्राऽशनादि कृत्वा तौ सायं निर्गत्य [26]वेश्मनः । स्मरदेवकुलं गत्वा तस्थतुः स्मरपृष्ठतः ॥४८६॥
¶तत्र स्थिताभ्यां ताभ्यां तु मङ्गल्यस्तूर्यनिःस्वनः । आयाति **केसरा** नूनमिति हर्षेण शुश्रुवे ॥४८७॥
साऽपि स्मरणमात्रेण [27]साध्यं मन्त्रं मुहुर्मुहुः । प्रेयःसमागमं नाम स्मरन्ती तत्र चाऽऽययौ ॥४८८॥
याप्ययानात् समुत्तीर्य विमानादिव नाकिनी । **प्रियङ्करा**करात् स्वर्णमयीं पूजामुपाददे ॥४८९॥
एकाकिनी प्राविशत् सा स्मरदेवकुलं ततः । आचार इत्यपि[28]दधे तद्द्वारं निजपाणिना ॥४९०॥
भूतले [29]पुष्पपत्रार्घं प्रक्षिप्योद्दिश्य मन्मथम् । मन्मथाक्रान्तहृदया प्राञ्जलिः सैवमब्रवीत् ॥४९१॥
चित्ते भवसि सर्वेषां सदा वससि तत्र च । तेन जानासि [30]तद्भावं भगवन्! मकरध्वज! ॥४९२॥
सर्वभावविदस्तत्किमेतद्युक्तं तव प्रभो! । अनभीष्टेन यत् पत्या नियोजयसि मां बलात् ॥४९३॥

---

१. अन्दुकः-पादशृङ्खला ॥ २. मत्तो गजः ॥ ३. अत्यन्ताकुलैः ॥ ४. हस्तिपकैः ॥ ५. आरा शस्त्रविशेषो करे येषां तान् ॥ ६. विहस्तान् व्याकुलान् हस्तिपकान् अपसारणार्थे हस्तं शुण्डादण्डं ऊर्ध्वीकुर्वन् ॥ ७. सर्वस्योपरि-सर्वस्मादधिकः सर्वस्याऽऽत्मैव ॥ ८. हरिणानां शत्रु सिंहस्तस्मिन् आगच्छति सतीत्यर्थः ॥ ९. *यावज्जग्राह* सं.ता.पा.ला. ॥ १०. अर्धाम् ॥ ११. गजः ॥ १२. पुच्छाग्रभागे ॥ १३. *सोऽवलिष्ट* मु.प्रभृतिषु ॥ १४. *०याऽन्यतो ययौ* वा.१-२ ॥ १५. *विमुक्ता* मु.प्रभृतिषु ॥ १६. वारितानि वामानि दूषणानि यया सा ॥ १७. *बन्दीवाऽवर्णयच्च* सं.ता.पा.ला.; खंता. पाता. वा.१-२ विना ॥ १८. *दैवादापतन्ननिला०* दे.मु. ॥ १९. करिणश्शीत्काराः 'चिंघाड' इति ॥ २०. *यातास्ततः* मु.प्रभृतिषु ॥ २१. *पर्यटं* मु. ॥ २२. *तत्तुल्यदुःखमित्रं०* खंता. पाता. वा.१-२ ॥ २३. गुप्तं यथा तथा ॥ २४. *सेवयिष्यामि* खंता. पाता. वा.१-२ ॥ २५. *तव* मु.प्रभृतिषु ॥ २६. *वेश्मतः* छा. ॥ २७. *साध्यमन्त्रं* मु.प्रभृतिषु, पाता. ॥ २८. पिनद्धवती ॥ २९. *पुष्पपत्रार्थं* मु.प्रभृतिषु ॥ ३०. *तत्सर्वं* ता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विना **वसन्तदेवं** मे नाऽन्यत्र रमते मनः । विषकन्या पत्युरिवाऽन्यः पतिर्मरणाय मे ॥४९४॥
**वसन्तदेवो** मे भर्ता भूयाज्जन्मान्तरेऽपि हि । नमस्कृतोऽसि सुचिरं नमस्कारोऽयमन्तिमः ॥४९५॥
इत्युक्त्वा यावदात्मानं तोरणे प्रोद्बबन्ध सा । तावद् **वसन्तो** धावित्वा पाशग्रन्थिं व्यसूत्रयत् ॥४९६॥
कुतोऽयमिति साश्चर्या सव्रीडा सभया च सा । एवं **वसन्तदेवेन** जगदे कुमुदेक्षणा ॥४९७॥
असौ **वसन्तदेवो**ऽस्मि प्रिये! प्राणप्रियस्तव । मनोभवाद् याचसे यं परलोकेऽप्यधीश्वरम् ॥४९८॥
निष्कारणवयस्यस्याऽमुष्य बुद्ध्या महात्मनः । अनागतां प्रविष्टोऽस्मि त्वां जिहीर्षुः कृशोदरि! ॥४९९॥
तदर्पयस्व नेपथ्यं[1] येन त्वद्वेषधार्यसौ । मोहयंस्ते परिजनं त्वद्वत् त्वद्वेश्म गच्छति ॥५००॥
समं त्वत्परिवारेण किञ्चिदस्मिन्नुपेयुषि । देशान्तरमभिप्रेतं यास्यामः[2] श्यामकुन्तले! ॥५०१॥
इत्युक्ता निजनेपथ्यं **कामपालाय** साऽपर्यत् । पृष्ठे च कामदेवस्य स **वसन्तो**ऽप्यवास्थित ॥५०२॥
कामदेवं **कामपालो**ऽप्यर्चित्वा कुसुमादिना । चकार **केसरा**वेषं नीरङ्गीपिहिताननः ॥५०३॥
स्वयमुद्घाट्य तद्द्वारमवलम्ब्य **प्रियङ्कराम्** । याप्ययानं[3] समारोहद्वाहीकैस्तदुदौह्यत ॥५०४॥
सोऽलक्षितः परिजनैः **पञ्चनन्दि**गृहं ययौ । सुप्रयुक्तस्य दम्भस्य ब्रह्माऽप्यन्तं न गच्छति ॥५०५॥
स **प्रियङ्कर**या यानादवतार्य वधूगृहम् । अनाय्युपावेशयत च स्वर्णवेत्रासने तया ॥५०६॥
स्मरन्ती **केसरे!** तिष्ठ मन्त्रं प्रियसमागमम् । इत्युदित्वा निर्जगाम सा प्रियाकृत् **प्रियङ्करा** ॥५०७॥
सोऽथ तद्वाक्यभावार्थमुपादायाऽस्मरन्मुहुः । मन्त्रं काम-रतिसमागमं नाम महामतिः ॥५०८॥
¶**केसरा**मातुलसुता जन्ययात्रानिमन्त्रिता । सा **शङ्खपुर**वास्तव्या **मदिरा** तत्र चाऽऽययौ ॥५०९॥
तस्योपविश्य पुरतः किञ्चिन्निःश्वस्य चाऽब्रवीत् । **केसरे!** किं सखेदाऽसि विध्यधीनासु सिद्धिषु? ॥५१०॥
समं **वसन्तदेवे**न सङ्गमं ते वराङ्गने![4] । अभीष्टमहमश्रौषमपि **शङ्खपुरे** स्थिता ॥५११॥
अहमात्मानुभूतत्वात् प्रेयोविरहवेदनाम् । जानामि तेन वच्मि त्वां समाश्वासयितुं सखि! ॥५१२॥
अनभीष्टं करोत्येष प्रतिकूलो यथा विधिः । दशावशेनाऽनुकूलोऽभीष्टं कर्ता तथैव सः ॥५१३॥
सखि! किञ्चाऽसि धन्या त्वं यस्यास्ते प्रेयसा समम् । अभूवन् दर्शनालापप्रभृतीनि मुहुर्मुहुः ॥५१४॥
¶वृत्तान्तो दारुणो मे तु दुःश्रवः श्रूयतां सखि! । **शङ्खपालो**त्सवेऽहं हि समं परिजनैरगाम् ॥५१५॥
तत्राऽशोकद्रुमस्याऽधो मनःसर्वस्वतस्करम् । युवानमेकमद्राक्षं प्रत्यक्षमिव मन्मथम् ॥५१६॥
सखीहस्तेन ताम्बूलं तस्मै च प्रेषितं मया । रक्षिताऽस्मि च तेनाऽहं व्यालेभादन्तकादिव ॥५१७॥
पुनश्च हस्तिशङ्कायां त्रस्ताऽहं ससखीजना । भूयोऽपि चाऽन्वेषयन्ती[5] नाऽपश्यं तं क्वचिद्गतम् ॥५१८॥
अलिदष्टा[6] मर्कटीव सर्वत्राऽरतिभाजनम् । तदाप्रभृति जीवामि वराक्येषा कथञ्चन ॥५१९॥
अद्ययावत्तमद्राक्षं स्वप्न एव मनोरमम् । यदि दैवप्रसादेन स प्रत्यक्षो भविष्यति ॥५२०॥
तव[7] दुःखं लघूकर्तुं रहस्यं शस्यते मया । अन्यं हि दुःखितं दृष्ट्वा समाश्वसन्ति[8] दुःखिनः ॥५२१॥
तदलं सखि! खेदेनाऽनुकूले हि विधौ स्वयम् । प्रेयःसमागमो भावी कातरे! धैर्यभाग् भव ॥५२२॥
¶अथाऽपसार्य नीरङ्गीं **कामपालो**ऽब्रवीदिदम् । त्वया यक्षोत्सवे दृष्टपूर्वोऽस्म्येष स ते प्रियः ॥५२३॥
दैवानुकूल्यादधुनैवाऽऽवयोरिव सङ्गमः । अभवत्[9] कान्ते! **वसन्तदेव-केसर**योरपि ॥५२४॥
अलमालापविघ्नेन विमुञ्च भयनिघ्नताम्[10] । किञ्चिन्निर्गमनद्वारं दर्शयाऽनिन्द्यदर्शने! ॥५२५॥
एवमुक्त्वा गृहोद्याने पश्चिमद्वारवर्त्मना । **मदिरा**दर्शितेनाऽगात् समं **मदिर**यैव सः ॥५२६॥
पूर्वं पुरेऽस्मिन् **वसन्तदेव-केसर**योस्तयोः । आयातयोः संयुयुजे **कामपालो**ऽथ सप्रियः ॥५२७॥

---

१. वेषम् ॥ २. ***यास्यावः*** छा. मु. ॥ ३. 'पालखी' ॥ ४. ***वरानने*** पा. ॥ ५. ***च विमार्गन्ती*** मु.प्रभृतिषु ॥ ६. वृश्चिकदष्टा ॥ ७. ***तं च*** मु. ॥ ८. ***समाश्वसिति दुःखितः*** मु. ॥ ९. ***बभूव*** ता. पा. ला. सं. ॥ १०. भयाधीनत्वम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वस्नेहेन ते नित्यं ढौकनं पञ्चवस्तुकम्। अद्भुतं विदधाते तौ राजन्! जानीहि ते त्वमी ॥५२८॥
**अमीभिः** सह तद्भोक्तुं त्वमिष्टैरीशिषे नृप!। नेयत्कालमभुङ्क्थास्त्वमभीष्टानविदन्नमून् ॥५२९॥
[१]श्रुते प्रभोर्वचस्येवं राज्ञस्तेषां च तत्क्षणम्। जातिस्मरणमुत्पेदे प्राक्स्नेहोद्योतदीपकः ॥५३०॥
भगवन्तं ततो नत्वा **कुरुचन्द्र**महीपतिः। तान् सोदर्यानिव स्नेहादनैषीन्निजवेश्मनि ॥५३१॥
¶देवा अपि प्रभुं नत्वा स्थानं निजनिजं ययुः। भगवानप्य[२]न्यतोऽगादनुगृह्णन् महीतलम् ॥५३२॥
[३]श्रमणानां सहस्राणि द्वाषष्टिर्नैष्ठि[४]कात्मनाम्। [५]साध्वीनामेकषष्टिस्तु सहस्राः षट् शतानि च ॥५३३॥
[६]चतुर्दशपूर्वभृतां शतान्यष्टौ महात्मनाम्। तथा सहस्रत्रितयम[७]वधिज्ञानधारिणाम् ॥५३४॥
चत्वारि च सहस्राणि [८]मनःपर्ययशालिनाम्। के[९]वलज्ञानभाजां त्रिचत्वारिंशच्छतानि [१०]तु ॥५३५॥
[११]जातवैक्रियलब्धीनां सहस्राणि षडेव हि। [१२]वादलब्धिमतां द्वे तु सहस्रे सचतुःशते ॥५३६॥
[१३]श्रावकाणामुभे लक्षे सहस्रा नवतिस्तथा। सहस्रत्रिनवत्यग्रा [१४]श्राविकाणां त्रिलक्ष्यपि ॥५३७॥
आरभ्य केवलाद्वर्षसहस्रान् पञ्चविंशतिम्। एकाब्दोनां विहरतः परिवारोऽभवत् प्रभोः ॥५३८॥
निर्वाणकालं ज्ञात्वा च **सम्मेता**द्रिं प्रभुर्ययौ। प्रपेदेऽनशनं सार्धं मुनीनां नवभिः शतैः ॥५३९॥
मासान्ते च ज्येष्ठकृष्णत्रयोदश्यां निशाकरे। भरणीस्थे ययौ स्वामी मोक्षं तैर्मुनिभिः सह ॥५४०॥
[१५]कौमारे [१६]मण्डलीकत्वे [१७]चक्रभृत्त्वे [१८]व्रतेऽपि च। प्रत्येकं लक्षतुर्यांशो[१९]ऽब्दलक्षायुरिति प्रभुः ॥५४१॥
श्री**धर्मनाथ**निर्वाणाच्छ्री**शान्ति**स्वामिनिर्वृतिः। पादोनपल्यन्यूनेषु सागरेष्वभवत्त्रिषु ॥५४२॥

चक्रे **शान्ति**जिनस्य मोक्षमहिमा तत्रेन्द्रमुख्यैः सुरैः
कालेनाऽर्जितकेवलो गणधर**श्चक्रायुधः** सोऽपि च।
भव्योद्बोधकृते विहृत्य सुचिरं सं[२०]न्यस्य चाऽऽयुःक्षये
तीर्थे **कोटिशिला**भिधे शिवमगात् प्राज्यैः समं साधुभिः ॥५४३॥

षट्खण्डोर्वीतलजयविधावप्यनायासभाज-
स्त्यक्त्वा लक्ष्मीं तृणमिव च तामप्युपात्तव्रतस्य।
चक्रित्वेन प्रथितयशसस्तीर्थकृत्त्वेन चोच्चै-
र्धीरोदात्तं जयति चरितं धीरशान्तं च **शान्तेः** ॥५४४॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये पञ्चमे पर्वणि श्री**शान्तिनाथ**चरम-
भववर्णनो नाम पञ्चमः सर्गः[२१] ॥

॥ इति श्री**शान्तिनाथ**चरितप्रतिबद्धं पञ्चमं पर्व समाप्तम् ॥

१. ***श्रुत्वा प्रभोर्वचांस्येवं*** मु. ॥ २. ***०नप्यतोऽथागादनु०*** मु. ॥ ३. श्रमणानां सङ्ख्या ६२सहस्रमिता ॥ ४. व्रतनिष्ठात्मनाम् ॥ ५. साध्वीनां सङ्ख्या ६१६००मिता ॥ ६. चतुर्दशपूर्विणां सङ्ख्या ८००मिता ॥ ७. अवधिज्ञानधारिणां सङ्ख्या ३सहस्रमिता ॥ ८. मनःपर्ययज्ञानिनां सङ्ख्या ४सहस्रमिता। ***मनःपर्याय०*** वा.१-२, ***मनःपर्यव०*** मु. ॥ ९. केवलज्ञानिनां सङ्ख्या ४३००मिता ॥ १०. **च** मु. ॥ ११. वैक्रियलब्धीनां सङ्ख्या ६सहस्रमिता ॥ १२. वादलब्धीनां सङ्ख्या २४००मिता ॥ १३. श्रावकाणां सङ्ख्या २लक्ष-९०सहस्रमिता ॥ १४. श्राविकाणां सङ्ख्या ३लक्ष-९३सहस्रमिता ॥ १५. कौमारे वर्षसङ्ख्या २५सहस्रमिता ॥ १६. मण्डलीकत्वे वर्षसङ्ख्या २५सहस्रमिता ॥ १७. चक्रित्वे वर्षसङ्ख्या २५सहस्रमिता ॥ १८. दीक्षायां वर्षसङ्ख्या २५ सहस्रमिता ॥ १९. आयुर्वर्ष १लक्षमितमासीत् ॥ २०. दीक्षां पालयित्वा ॥ २१. ***सर्गः समाप्तः*** वा.१-२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥अर्हम्॥

॥श्रीकुन्थुनाथाय नमः॥

॥कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविनिर्मितं

# त्रिषष्टिशलाकापुरुषचरितम् ॥

## ॥श्रीकुन्थुनाथ-अरनाथादिचरितप्रतिबद्धं षष्ठं पर्व ॥

## ॥प्रथमः सर्गः॥

### ॥श्रीकुन्थुनाथचरितम्॥

जयन्ति जयिनः[1] **कुन्थु**स्वामिनो देशनागिरः । महामोहदृषद्भेदसरित्पूरसहोदराः[2] ॥१॥
त्रैलोक्यस्वामिनः **कुन्थो**श्चरित्रं वच्मि पावनम्[3] । संसाराम्भोधिमथने मन्थानाचलसन्निभम्[4] ॥२॥
अस्यैव **जम्बूद्वीप**स्य **प्राग्विदेहे**षु सुन्दरे । **आवर्त**नाम्नि विजये कृतस्वर्विजये[5] श्रिया[6] ॥३॥
महापुर्यां **खड्गि**नाम्न्यां निःसीमगुणभाजनम् । सीमा धर्मधुरीणानां राजा **सिंहावहो**ऽभवत् ॥४॥
आधार इव धर्मस्य कुठार इव पाप्मनः । न्यायस्य कुलवेश्मेव सुधियां[7] जन्मभूरिव ॥५॥
तस्य मन्त्रो[8] मन इव दुर्लक्षो विदुषामपि । शक्रस्येव प्रभुत्वं[9] चोत्साहश्चा[10]ऽभूद्धरेरिव[11] ॥६॥
अनुल्लङ्घितमर्यादः[12] समुद्र इव स स्वयम् । मर्यादायां जगदपि धारयामास शक्तिमान् ॥७॥
कृष्टिमन्त्र[13] इव श्रीणां भेदमन्त्र इव द्विषाम् । रक्षामन्त्र इवाऽवन्यास्तस्य रेजे धनुर्ध्वनिः ॥८॥
धर्मायैव शशासोर्वी न पुनर्द्रविणाय सः । सर्वदा धर्मनिष्ठानां फलं तद्ध्या[14]नुषङ्गिकम्[15] ॥९॥
अनासक्त्योपभुञ्जानो[16] भोगान् योगीव भोजनम् । कञ्चिदप्यतिचक्राम[17] कालं तत्त्वविदग्रणीः ॥१०॥
वेलामब्धिरिवाऽन्येद्युर्वैराग्यमधिकं दधन् । **संवरा**चार्यपादान्ते गत्वा दीक्षां स आददे ॥११॥
व्रतं[18] प्रपालयंस्तीव्रमर्हदाराधनादिभिः । स्थानकैरर्जयामास तीर्थकृन्नामकर्म सः ॥१२॥
स मृत्वा[19] कालयोगेन समदृष्टिः[20] समाहितः । देवो विमाने **सर्वार्थसिद्ध**नामन्यजायत ॥१३॥
¶इतश्च **जम्बूद्वीप**स्य द्वीपस्याऽत्रैव **भारते** । क्षेत्रेऽस्ति **हास्तिनपुर**मिति ख्यातं महापुरम् ॥१४॥
तत्र चैत्येषु विशदपताकाव्यपदेशतः[21] । नित्यं प्रमुदितो धर्म इव नृत्यति निर्भरम् ॥१५॥
तद्गृहेष्वभितो रत्नबद्धप्राङ्गणभूमिषु । नामाऽप्यभूत् कर्दमस्य केवलं यक्षकर्दमे[22] ॥१६॥
तद्वप्रे रत्नघटिते स्वैरेव प्रतिबिम्बितैः । परेभबुद्ध्या[23] गन्धेभा दन्तघातान् वितन्वते ॥१७॥
नृपौकस्सु जनौकस्सु गोपुरेष्वपरत्र[24] च । तत्सर्वमार्हतैर्बिम्बैर्व्याप्तं व्योम ग्रहैरिव ॥१८॥
तेजसाऽभिनवः शूरः[25] **शूरो** नाम महीपतिः । बभूव तस्मि**न्नलका**पुर्यामिव धनेश्वरः[26] ॥१९॥

---

१. जयशीलस्य ॥ २. महामोह एव दृषत्-पाषाणस्तस्य भेदे नदीपूरसमानाः ॥ ३. पवित्रम् ॥ ४. ***मन्थनाचलस०*** मु. । मन्दराचलसदृशम् ॥ ५. कृतः स्वर्गस्य जयो येन तस्मिन् ॥ ६. ***श्रियः*** खंता. ॥ ७. ***०स धियां*** खंता. ॥ ८. मन्त्रशक्तिः ॥ ९. प्रभुत्वशक्तिः ॥ १०. उत्साहशक्तिः ॥ ११. कृष्णस्य इव ॥ १२. ***अनुल्लङ्घितमर्यादसमुद्र इव*** ला. पा. ॥ १३. वशीकरणमन्त्रः ॥ १४. द्रविणम् ॥ १५. अवान्तरफलम् ॥ १६. ***अनाशक्त्योप०*** ला. पा. छा. हे. ॥ १७. ***किञ्चिद०*** मु.प्रभृतिषु, पाता. वा.१-२ ॥ १८. ***व्रतं स पालयं०*** हे., ***व्रतं च पालयं०*** ला. छा. ॥ १९. ***विपद्य*** हे. ॥ २०. ***सम्यग्दृष्टिः*** मु. खंता. ॥ २१. उज्ज्वलपताकाव्याजात् ॥ २२. "कर्पूरागरु-कक्कोल-कस्तूरी-चन्दनद्रवैः। स्याद् यक्षकर्दमो"(अभि.चिं.तृ.का.श्लो.६३८-६३९) ॥ २३. अन्यगजशङ्कया ॥ २४. ***०रेष्वपरेषु*** छा. पा. ॥ २५. सूर्यरूप इत्यर्थः ॥ २६. कुबेरः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वैतीयीकोऽन्तरात्मेव हृदि तस्याऽवसत् सदा । धर्म एवाऽर्थ-कामौ तु बहि:स्थौ [१]बहिरात्मवत् ॥२०॥
प्रतापाक्रान्तदिक्कस्य [२]तस्य शस्त्राणि जज्ञिरे । दोष्णोर्विभूषणायैव केयूर-कटकादिवत् ॥२१॥
न चुकोप [३]स कस्मैचिज्जुगोप च महीमिमाम् । विनाऽपि तीव्रतां विश्वं प्रकाशयति चन्द्रमा: ॥२२॥
रूप-लावण्यपुण्याङ्गी शीलनैर्मल्यशालिनी । श्रीदेवीव हरेस्तस्य नाम्ना **श्री**रिति पत्न्यभूत् ॥२३॥
किं सुधासारणि: ? किं वा सुधांशोरधिदेवता ? । सुधां क्षरन्ती वचसा शुशुभे सा शुभानना ॥२४॥
मन्दमेवाऽनवद्याङ्गी जगाम च जगाद च । हंसीव राजहंसस्य तस्य सा प्राणवल्लभा ॥२५॥
तया देव्या समं भोगान् बुभुजे **सूर**पार्थिव: । निर्विघ्नसुखनिर्मग्नो वैमानिक इवाऽमर: ॥२६॥
¶इतश्च **सर्वार्थसिद्धे** विमानेऽपूरयन्निजम् । जीव: **सिंहावह**स्याऽऽयुस्त्र[४]यस्त्रिंशार्णवप्रमम् ॥२७॥
[५]श्रावणासितनवम्यां **कृत्तिका**स्थे निशाकरे । च्युत्वा ततस्तस्य जीव: **श्रिय:** कुक्षाववातरत् ॥२८॥[युग्मम्]
चतुर्दन्तो [1]गज: श्वेत: [६][2]ककुद्मान् कुमुदद्युति: । [3]केसर्युत्केसरो [4]लक्ष्मीरभिषेकमनोरमा ॥२९॥
पञ्चवर्णं [5]पुष्पदाम [७]पार्वणो [6]रजनीकर: । [८][7]प्रद्योतन: कृतद्योत: सपताको [8]महाध्वज: ॥३०॥
[९]शातकौम्भ: [9]पूर्णकुम्भ: पद्मपूर्णं [10]सरोवरम् । [१०]सरितां [11]पतिरुद्वीचिर्[12]विमानं रत्ननिर्मितम् ॥३१॥
[13]रत्नपुञ्जोऽभ्रंलिहरुग् निर्धूमश्च [14][११]विभावसु: । एते चतुर्दश स्वप्नास्तदा ददृशिरे तया ॥३२॥
देव्या च कथितान् स्वप्नान् व्याचख्यौ नृपति: [१२]प्रगे । [१३]स्वप्नैरेभि: सुतो भावी चक्रभृत् तीर्थकृच्च ते ॥३३॥
ततो नवसु मासेषु दिनेष्वर्धाष्टमेषु च । [१४]राधकृष्णचतुर्दश्यां **कृत्तिका**स्थे निशाकरे ॥३४॥
ग्रहेषु चोच्चसंस्थेषु [१५]छागाङ्कं [१६]काञ्चनच्छविम् । [१७]सर्वलक्षणसम्पूर्णं **श्री**देवी सुषुवे सुतम् ॥३५॥
नारकाणां क्षणं सौख्यमुद्योतश्च जगत्त्रये । अभूत्तदा चाऽऽसनानि शक्रादीनां चकम्पिरे ॥३६॥
उपेत्याऽऽसनकम्पेन [१८]कर्मकर्य इव क्षणात् । षट्पञ्चाशद्दिक्कुमार्य: सूतिकर्माणि चक्रिरे ॥३७॥
¶शक्र: पञ्चवपुर्भूत्वा **मेरु**शैलेऽनयत् प्रभुम् । इन्द्राश्च स्नपयामासुस्त्रिषष्टिस्तीर्थवारिभि: ॥३८॥
**ईशाना**ङ्के निवेश्येशं शक्रोऽप्यस्नपयत् तत: । कृत्वा पूजादिकं चोच्चैरिति स्तोतुं प्रचक्रमे ॥३९॥
"अद्य नीराणि **क्षीरोद**प्रभृतीना[१९]मुदन्वताम् । **पद्म**प्रभृतिह्रदानां पद्मानि च पयांसि च ॥४०॥
[२०]औषध्य: **क्षुद्रहिमवत्**प्रभृतीनां [२१]महीभृताम् । **भद्रशाल**प्रभृतीनां वनानां कुसुमान्यपि ॥४१॥
**मलया**धि[२२]त्यकादीनां भूमीनां चन्दनानि च । युष्मत्स्नात्रोपयोगेन कृतार्थानि जगत्पते! ॥४२॥त्रिभिर्विशेषकम्॥
कृतार्थमिदमैश्वर्यमखिलानां दिवौकसाम् । देव! त्वज्जन्मकल्याणमहोत्सवविधानत: ॥४३॥
उत्कृष्टो [२३]भूभृतामद्य तीर्थभूतोऽयमद्य च । प्रासाद इव बिम्बेन त्वया **मेरु**रलङ्कृत: ॥४४॥
अद्य चक्षूंषि चक्षूंषि पाणयश्चाऽद्य पाणय: । दर्शनेन स्पर्शनेन भवतो भुवनेश्वर! ॥४५॥
अद्य न: सफलं नाथाऽवधिज्ञानं निसर्गजम् । [२४]येन ते जन्म विज्ञाय जन्मोत्सवमकृष्महि ॥४६॥
यथाऽद्य हृदयद्वारे स्नात्रकाले ममाऽभव: । तथैव हृदयस्याऽन्तरपि भूयाश्चिरं प्रभो!" ॥४७॥
जगन्नाथमिति स्तुत्वा [२५]गृहीत्वा च पुरन्दर: । गत्वा च **हास्तिनपुरं श्री**देव्या: पार्श्वतोऽमुचत् ॥४८॥
¶चक्रे जन्मोत्सव: सूनो: **शूरे**णाऽपि महीभुजा । यद्वोत्पन्ने तीर्थनाथे सदोत्सवमयं जगत् ॥४९॥
दृष्टो देव्या गर्भगेऽस्मिन् कुन्थ्वाख्यो रत्नसञ्चय: । **कुन्थु**रित्यभिधां तेन स्वामिनो विदधे पिता ॥५०॥

---

१. ०*बहिरात्मकृत्* खंता. ॥ २. *सर्वशस्त्राणि* छा. पा. ॥ ३. *च स काऽपि जु०* हे. ॥ ४. *त्रयस्त्रिंश्यर्णवप्रमम्* खंता. । त्रयस्त्रिंशत्सागरप्रमाणम् ॥ ५. श्रावणकृष्णनवम्याम् ॥ ६. वृषभ: ॥ ७. पूर्णिमासम्बन्धी ॥८. सूर्य: ॥ ९. सौवर्ण: ॥ १०. समुद्र: ॥ ११. अग्नि: ॥१२. प्रात:काले ॥ १३. *स्वप्नैरेभिर्जगद्वन्द्यो भावी ते तीर्थकृत् सुत:* हे. ॥ १४. वैशाखकृष्णचतुर्दश्याम् ॥ १५. अज: लाञ्छनं यस्य स:, तम् ॥ १६. काञ्चनस्य सुवर्णस्य इव छवि: कान्तिर्यस्य स:, तम् ॥ १७. *पञ्चत्रिंशद्धनुस्तुङ्गम्* हे. ॥ १८. किङ्कर्य:; *कर्मकार्य इव* ला. ॥१९. सागराणाम् ॥ २०. *ओषध्य:* मु. ॥ २१. पर्वतानाम् ॥ २२. पर्वतस्योपरितनो भूभाग: ॥ २३. पर्वतानाम् ॥ २४. *जिन!* मु. ॥ २५. *गृहीत्वाऽऽशु* छा. पा. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शक्र**सङ्क्रमिताङ्गुष्ठपीयूषं भगवान् पिबन् । क्रमेण [१]वर्धमानोऽभूत् पञ्चत्रिंशद्धनून्नतः ॥५१॥
पित्राज्ञया पर्यणैषीत् स काले राजकन्यकाः । कर्म भोगफलं छेत्तुं चाऽन्यथा शक्यते न हि ॥५२॥
त्रयोविंश्यब्दसहस्रेष्वर्धाष्टमशतेषु च । गतेषु जन्मतो राज्यं प्रभुः पित्राज्ञयाऽग्रहीत् ॥५३॥
गतेष्वब्देषु तावत्सु भर्तुर्मण्डलिकस्थितौ । मध्येऽ[२]स्त्रसदने **चक्ररत्नं** समुदपद्यत ॥५४॥
चक्रेऽर्चा **चक्ररत्नस्य** जगदर्च्योऽपि [३]**सूरसूः** । महात्मानो हि कुर्वन्ति सेवकेष्वपि सत्कृतिम् ॥५५॥
**मागधेशं वरदाम-प्रभासा**धिपती अपि । क्रमेण साधयामास **चक्ररत्ना**नुगः प्रभुः ॥५६॥
**सिन्धुदेवीं वैताढ्या**द्रिकुमारं **कृतमालक**म् । स्वयं सोऽसाधयदथ सेनान्या **सिन्धु**निष्कुटम् ॥५७॥
से[४]नान्योद्घाटितद्वारा प्रविश्य च **तमिस्र**या । निर्गत्य चाऽऽ[५]**पात**नाम्नो म्लेच्छान् प्रभुरसाधयत् ॥५८॥
सेनान्या च वशीचक्रे द्वितीयं **सिन्धु**निष्कुटम् । गत्वा च **क्षुद्रहिमवत्**कुमारं स्वाम्यसाधयत् ॥५९॥
[६]कल्प इत्यृ**षभकूटे** निजं नाम लिलेख च । ववले च ततः स्थानाच्**चक्ररत्ना**नुगः प्रभुः ॥६०॥
आगतश्चो[७]प**वैताढ्यं** तच्छ्रेणिद्वयवर्तिभिः । विद्या[८]धरेन्द्रैरानर्चे विविधोपायनैः प्रभुः ॥६१॥
**गङ्गा**देवीं **नाट्यमालं** स्वयं प्रभुरसाधयत् । गाङ्गं तु निष्कुटं सैन्यपतिना म्लेच्छसङ्कुलम् ॥६२॥
सेनान्योद्घाटित**खण्डप्रपात**गुहया प्रभुः । प्रविश्य **वैताढ्य**गिरेर्निर्ययौ सपरिच्छदः ॥६३॥
**नैसर्प**प्रमुखास्तत्र नवाऽपि निधयः प्रभोः । सि[९]ध्यन्ति स्म स्वयमपि **गङ्गा**मुखनिवासिनः ॥६४॥
द्वितीयं निष्कुटं गाङ्गं से[१०]नान्याऽसाधयत् प्रभुः । विजिग्ये **भरत**क्षेत्रं षड्भिर्वर्ष[११]शतैरिति ॥६५॥
सम्पूर्णचक्रभृत्सम्पन् नरामरनिषेवितः । ततो निवृत्तः श्री**कुन्थु**राययौ **हस्तिनापुरम्** ॥६६॥
चक्रे चक्रित्वाभिषेकः प्रभोर्देवैर्नरैरपि । उत्सवश्च द्वादशाब्दीं पुरे तस्मिन्नजायत ॥६७॥
त्रयोविंश्यब्दसहस्राः सार्धाष्टमशता ययुः । श्री**कुन्थुस्वामि**नश्चक्र[१२]वर्तिवैभवधारिणः ॥६८॥
¶तीर्थं प्रवर्तय स्वामिन्निति लो[१३]कान्तिकैः प्रभुः । विज्ञप्तो वार्षिकदानं [१४]ददौ राज्यं च सूनवे ॥६९॥
स्वामी नृपैश्च देवैश्च कृतनिष्क्रमणोत्सवः । **विजया**शिबिकारूढः **सहस्राम्रवणं** ययौ ॥७०॥
चुम्बता चम्पकलताश्चू[१५]तयष्टीर्विधुन्वता । वासन्तिका नर्तयता निर्गु[१६]ण्डीरभिमृद्नता ॥७१॥
आलिङ्गता च लवलीः स्पृशता नवमालिकाः । पाटलीश्च पाटयता पद्मिनीश्चाऽभिसर्पता ॥७२॥
आक्रमताऽशोकलताः कदलीरनुगृह्णता । यूनेव [१७]पवमानेन दक्षिणेन मनोरमम् ॥७३॥
दो[१८]लान्दोलनसंसक्तललनालटभीकृतम् । कुसुमावचयक्रीडाव्यग्रपौरेभ्यदारकम् ॥७४॥
उन्मत्तकोकिलालापैर्मधुरैश्चाऽलकूजितैः । विहितस्वागतमिवोद्यानं तत् प्राविशत् प्रभुः ॥७५॥पञ्चभिः कुलकम्॥
शिबिकायाः समुत्तीर्य त्यक्त्वाऽलङ्करणादिकम् । वैशाखकृष्णपञ्चम्यां [१९]**कृत्तिका**स्वह्नि पश्चिमे ॥७६॥
समं राजसहस्रेण षष्ठेन प्राव्रजत् प्रभुः । चतुर्थं प्राप च ज्ञानं मनःपर्ययसञ्ज्ञकम् ॥७७॥[युग्मम्]
पुरे **चक्रपुरे व्याघ्रसिंह**पार्थिववेश्मनि । द्वितीयेऽह्नि व्यधात् स्वामी परमान्नेन पारणम् ॥७८॥
विदधे वसुधारादिपञ्चकं तत्र [२०]नाकिभिः । रत्नपीठं **व्याघ्रसिंहे**नाऽह्निस्थाने पुनः प्रभोः ॥७९॥
निःसङ्गोऽप्रतिबद्धश्च समीरण इव प्रभुः । छद्मस्थः षोडशाब्दानि विजहार वसुन्धराम् ॥८०॥
¶अन्येद्युर्विहरन्नागात् **सहस्राम्रवणं** प्रभुः । कृतषष्ठ**स्ति**[२१]**लक**द्रौ तस्थौ च प्रतिमाधरः ॥८१॥

---

१. ***वृद्धिमापेदे कल्पद्रुम इवाऽवनौ*** हे. ॥ २. शस्त्रागारे ॥ ३. सूरस्य राज्ञः सुतः-कुन्थुरित्यर्थः ॥ ४. सेनान्या-सेनापतिना उद्घाटितं द्वारं यस्याः सा, तया ॥ ५. ***चापातन्नाम्नो*** मु.प्रभृतिषु ॥ ६. आचार इति हेतोः ॥ ७. वैताढ्यसमीपम् ॥ ८. ***०धरेन्द्रैरानर्चि*** ला. ॥ ९. ***असिध्यन्त*** हे. ॥ १०. ***सेनान्याऽसाधयत् ततः । इत्थं भरतषट्खण्डीमखण्डाज्ञोऽजयत् प्रभुः ॥*** हे. ॥ ११. ***०वर्षशतैरपि*** खंता. ॥ १२. ***०वर्तिवैभवशालिनः*** खंता. मु. ॥ १३. ***लोकान्तिकामरैः*** हे. ॥ १४. ***ददौ दीक्षोत्सुकः प्रभुः*** हे. ॥ १५. आम्रलताः ॥ १६. सिन्दुवारान्, भाषायां 'नगोडवृक्ष' ॥ १७. वायुना ॥ १८. दोलान्दोलने संसक्ताश्च ता ललनाश्च, ताभिः लटभीकृतं सुन्दरीकृतम् । कुसुमावचयो वसन्तः, तस्य क्रीडायां व्यग्राः पौरा इभ्या दारकाश्च यत्र तत् ॥ १९. कृत्तिकानक्षत्रे ॥ २०. देवैः ॥ २१. तिलकवृक्षतले ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैत्रशुद्धतृतीयायां **कृत्तिका**स्थे निशाकरे । घातिकर्मक्षयात्तत्र सञ्जज्ञे केवलं प्रभोः ॥८२॥
सेन्द्रैश्चतुर्विधैर्देवनिकायैरेत्य तत्क्षणम् । चक्रे समवसरणं प्राकारत्रयमण्डितम् ॥८३॥
सुरैः सञ्चार्यमाणेषु स्वर्णाब्जेषु ददत् क्रमौ । पूर्वद्वारेण समवसरणं प्राविशद्विभुः ॥८४॥
विंशत्यग्रचतुर्धन्वशतोच्चं चैत्यपादपम् । तत्र प्रदक्षिणीचक्रे धर्मचक्री जगद्गुरुः ॥८५॥
तस्याऽधश्छन्दके जल्पन् "तीर्थाय नम" इत्यथ । पूर्वसिंहासने पूर्वाभिमुखः स्वाम्युपाविशत् ॥८६॥
स्वामिनः प्रतिरूपाणि दिक्ष्वन्यास्वपि तत्क्षणम् । तादृशि तत्प्रभावेण विचक्रुर्व्यन्तरामराः ॥८७॥
अवतस्थे यथास्थानं श्रीमान् सङ्घश्चतुर्विधः । मध्यवप्रे तु तिर्यञ्चोऽधस्तने वाहनानि तु ॥८८॥
ज्ञात्वा च समवसृतं प्रभुमागात् [१]**कुरूद्वहः** । नमस्कृत्या[२]ऽनुशक्रं च निषसाद कृताञ्जलिः ॥८९॥
[३]भूयोऽपि स्वामिनं नत्वा **सौधर्मेन्द्र-कुरूद्वहौ** । उद्वहन्तौ हृदि मुदं प्रारेभाते इति स्तुतिम् ॥९०॥
"चतुर्धा धर्मदेष्टारं चतुर्गात्रं चतुर्मुखम् । [४]चतुर्थपुरुषार्थेशं [५]त्वां स्तुमः परमेश्वरम् ॥९१॥
[६]चतुर्दशमहारत्नीं निःसङ्गत्वात् त्वमत्यजः । [७]रत्नत्रयीं त्वनवद्यां दधासि जगदीश्वर! ॥९२॥
मनो हरसि विश्वस्य निर्मनस्कस्तथाऽप्यसि । उत्तप्तस्वर्णवर्णस्त्वं ध्यायसे चेन्दुसन्निभः ॥९३॥
निःसङ्गोऽपि महर्द्धिस्त्वं ध्येयोऽपि [८]ध्यातृतास्पदम् । कोटिशोऽप्यावृतो देवादिभिः [९]कैवल्यभागसि ॥९४॥
[१०]विश्वस्य रागं तनुषे वीतरागोऽसि च स्वयम् । अकिञ्चनोऽपि भवसि जगतः परमर्द्धये ॥९५॥
अविज्ञेयप्रभावायाऽज्ञेयरूपाय [११]तायिने । नमो भगवते सप्तदशाय भवतेऽर्हते ॥९६॥
प्रणामोऽपि त्वयि विभोऽचिन्त्यचिन्तामणिर्नृणाम् । किं पुनर्मनसा ध्यानं स्तवनं वचसाऽपि वा ? ॥९७॥
प्रणामे स्तवने ध्याने प्रभो! त्वद्विषये मम । प्रवृत्तिः सर्वदाऽप्यस्तु कृतमन्यैर्मनोरथैः" ॥९८॥
स्तुत्वैवं दिवि[१२]षन्नाथे **कुरुराजे** च तस्थुषि । श्री**कुन्थुनाथो** भगवान् विदधे धर्मदेशनाम् ॥९९॥
¶"योनिलक्षचतुरशीत्यावर्तापातभीषणः । अयं खलु भवाम्भोधिर्महादुःखनिबन्धनम् ॥१००॥
तरणे च भवाम्भोधेर[१३]लम्भूष्णुर्विवेकिनाम् । यानपात्रं मनःशुद्धिरिन्द्रियोर्मि[१४]जयोर्जिता ॥१०१॥
दीपिका ख[१५]ल्वनिर्वाणा [१६]निर्वाणपथदर्शिनी । एकैव मनसः शुद्धिः [१७]समाम्नाता मनीषिभिः ॥१०२॥
सत्यां हि मनसः शुद्धौ सन्त्यसन्तोऽपि [१८]यद्गुणाः । सन्तोऽप्यसत्यां नो सन्ति, सैव कार्या बुधैस्ततः ॥१०३॥
मनःशुद्धिमबिभ्राणा ये तपस्यन्ति मुक्तये । त्यक्त्वा नावं भुजाभ्यां ते तितीर्षन्ति महार्णवम् ॥१०४॥
तपस्विनो मनःशुद्धिं विनाभूतस्य सर्वथा । ध्यानं खलु मुधा चक्षुर्विकलस्येव दर्पणः ॥१०५॥
तप्यमानांस्तपो मुक्तौ गन्तुकामान् शरीरिणः । [१९]वात्येव तरलं चेतः क्षिपत्यन्यत्र कुत्रचित् ॥१०६॥
[२०]मनःक्षपाचरो भ्राम्यन्न[२१]पशङ्कं निरङ्कुशः । प्रपातयन्ति संसारावर्तगर्ते जगत्त्रयीम् ॥१०७॥
अनिरुद्धमनस्कः सन् योगश्रद्धां दधाति यः । पद्भ्यां जिगमिषुर्ग्रामं स पङ्गुरिव हस्यते ॥१०८॥
मनोरोधे निरुध्यन्ते कर्माण्यपि समन्ततः । अनिरुद्धमनस्कस्य प्रसरन्ति हि तान्यपि ॥१०९॥
मनःकपिरयं विश्वपरिभ्रमणलम्पटः । नियन्त्रणीयो यत्नेन मुक्तिमिच्छुभिरात्मनः ॥११०॥
तदवश्यं मनःशुद्धिः कर्तव्या सिद्धिमिच्छता । तपः-श्रुत-[२२]यमप्रायैः किमन्यैः कायदण्डनैः ? ॥१११॥
मनःशुद्ध्यैव कर्तव्यो राग-द्वेषविनिर्जयः । कालुष्यं येन हित्वाऽऽत्मा स्वस्वरूपेऽवतिष्ठते " ॥११२॥
श्रुत्वेति देशनां भर्तुर्बहवः प्राव्रजन् जनाः । **स्वयम्भू**प्रमुखाः पञ्चत्रिंशद्गणभृतोऽभवन् ॥११३॥

१. कुरुदेशस्य राजा ॥ २. शक्रस्य पश्चात् ॥ ३. *भूयो भूयोऽपि तं* हे. ॥४. मोक्षस्वामिनम् ॥५. *त्वां नुमः* खंता. ॥ ६. चतुर्दशानां महारत्नानां समाहारः ॥ ७. ज्ञानदर्शनचारित्ररूपां रत्नत्रयीम् ॥ ८. ध्याता ॥ ९. कैवल्यं एकाकित्वमिति विरोधः केवलज्ञानमिति तत्परिहारः ॥ १०. विश्वानुरागम् ॥ ११. रक्षित्रे ॥ १२. इन्द्रे ॥ १३. समर्था ॥ १४. इन्द्रियोर्मिजयेन ऊर्जिता-तेजस्विनी ॥ १५. अनपायिनी ॥ १६. मोक्षमार्गप्रकाशिनी ॥ १७. कथिता ॥ १८. यद्-यस्मात् कारणात् मनसः शुद्धौ सत्यामविद्यमाना अपि गुणा भवन्ति, मनःशुद्धौ चाऽसत्यां विद्यमाना अपि गुणा न भवन्ति ॥ १९. महावायुः ॥ २०. मन एव क्षपाचरो राक्षसः ॥ २१. निःशङ्कम् ॥ २२. पञ्चमहाव्रतप्रधानैः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्णायामादिपौरुष्यां देशनाविरते प्रभौ । **स्वयम्भू**र्देशनां स्वामिपादपीठस्थितोऽकरोत् ॥११४॥
पूर्णद्वितीयपौरुष्यां [1]व्यस्राक्षीत् सोऽपि देशनाम् । नत्वा श्री**कुन्थु**मीयुश्च स्वं स्वं स्थानं सुरादयः ॥११५॥
¶तत्तीर्थभूश्च **गन्धर्व**यक्षो हंसरथो[2]ऽसितः । दधानो दक्षिणौ बाहुदण्डौ वरद-पाशिनौ ॥११६॥
मातुलिङ्गाङ्कुशधरौ धारयन् [3]दक्षिणेतरौ । श्रीमतः **कुन्थुनाथ**स्य जज्ञे शासनदेवता ॥११७॥
तत्तीर्थभू**र्बलादेवी** गौराङ्गी केकिवाहना । बिभ्राणा दक्षिणौ बाहू बीजपूरक-शूलिनौ ॥११८॥
[4]मुष(षु)ण्ढी-पङ्कजभृतौ बिभ्रती दक्षिणेतरौ । सदा सन्निहिता जज्ञे प्रभोः शासनदेवता ॥११९॥
ताभ्याममुक्तसान्निध्यस्ततः स्थानादथाऽन्यतः । भव्यजन्तूपकाराय विजहार जगद्गुरुः ॥१२०॥
¶षष्टिसहस्री [5]साधूनां सा [6]साध्वीनां सषट्शता । [7]चतुर्दशपूर्वभृतां सप्तत्यधिकषट्शती ॥१२१॥
सहस्रद्वितयं सार्ध[8]मवधिज्ञानशालिनाम् । चत्वारिंशत्त्रयस्त्रिंशच्छती चाऽपि [9]मनोविदाम् ॥१२२॥
[10]केवलज्ञानिनां त्रीणि सहस्राणि शतद्वयम् । शतानि चैकपञ्चाशद्वैक्रि[11]यलब्धिशालिनाम् ॥१२३॥
[12]सञ्जातवादलब्धीनां सहस्रद्वितयं पुनः । [13]श्रावकाणां [14]लक्षमेकन्यूनाशीतिसहस्रयुक् ॥१२४॥
[15]श्राविकाणां त्रीणि लक्षाण्येकाशीतिसहस्र्यपि । आकेवलाद्विहरतः परिवारोऽभवत् प्रभोः ॥१२५॥
गतेष्व[16]ब्दसहस्रेषु त्रयोविंशेषु केवलात् । चतुस्त्रिंशत्सहितेषु शतेष्वपि च सप्तसु ॥१२६॥
निर्वाणसमयं ज्ञात्वा **सम्मेता**द्रिं ययौ प्रभुः । समं मुनिसहस्रेण शिश्रियेऽनशनं [17]ततः ॥१२७॥[युग्मम्]
मासान्ते [18]राधकृष्णादितिथौ [19]भे **कृत्तिका**सु च । समं तैर्मुनिभिः स्वामी प्रपेदे पदमव्ययम् ॥१२८॥
[20]कौमार-राज्य-चक्रित्व-व्रतेषु समभागकम् । [21]आयुः पञ्चनवत्यब्दसहस्रमभवत् प्रभोः ॥१२९॥
श्री**शान्तिनाथ**निर्वाणादर्धपल्योपमे गते । **कुन्थुनाथ**जिनेन्द्रस्य निर्वाणं समजायत ॥१३०॥

निर्वाणपर्वमहिमा विदधे सुपर्व-
नाथैः सुपर्वसहितैः परमेश्वरस्य ।
दंष्ट्रा-रदादि परिपूजयितुं यथावन्
निन्ये च तैर्निजनिजेषु निकेतनेषु ॥१३१॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे पर्वणि श्री**कुन्थुनाथ**चरित-
वर्णनो नाम प्रथमः सर्गः॥

१. विसर्जितवान् ॥ २. कृष्णवर्णः ॥ ३. वामहस्तौ ॥ ४. मुषुण्ढी स्याद् दारुमयी वृत्ताय:कीलसञ्चिता (शेषनाममाला श्लो.१५१) ॥ ५. साधूनां सङ्ख्या ६० सहस्रमिता ॥ ६. साध्वीनां सङ्ख्या ६०६००मिता ॥ ७. चतुर्दशपूर्विणां सङ्ख्या ६७०मिता ॥ ८. अवधिज्ञानिनां सङ्ख्या २५००मिता ॥ ९. मनःपर्ययज्ञानिनां सङ्ख्या ३३४०मिता ॥ १०. केवलज्ञानिनां सङ्ख्या ३२००मिता ॥ ११. वैक्रियलब्धीनां सङ्ख्या ५१००मिता ॥ १२. वादलब्धीनां सङ्ख्या २सहस्रमिता ॥ १३. श्रावकाणां सङ्ख्या १लक्ष-७९सहस्रमिता ॥ १४. ***लक्षमेकं न्यूना*** खंता. पा. हे. छा. मु. ॥ १५. श्राविकाणां सङ्ख्या ३लक्ष-८१सहस्रमिता ॥ १६. गतेषु २३७३४वर्षेषु ॥ १७. ***पुनः*** मु. ॥ १८. वैशाखकृष्णप्रतिपदि ॥ १९. नक्षत्रे ॥ २०. कौमारे २३७५०वर्षाणि, राज्ये २३७५०वर्षाणि, चक्रित्वे २३७५०वर्षाणि, व्रते २३७५०वर्षाणि ॥ २१. आयुर्वर्षाणि ९५सहस्रमितानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥द्वितीयः सर्गः॥

## ॥श्रीअरनाथचरितम्॥

इक्ष्वाकुवंशतिलकश्[1]चारुगोरो[2]चनारुचिः । [3]चतुर्थारसरोहंसः पायादरजिनेश्वरः ॥१॥

त्रिजगत्कुमुदानन्दचन्द्रस्य परमेष्ठिनः । श्रीमतोऽरजिनेन्द्रस्य वक्ष्ये चरितमुज्ज्वलम् ॥२॥

अस्यैव **जम्बूद्वीप**स्य **प्राग्विदेहे**षु विस्तृते । **सीता**नद्युत्तरतटे विजये **वत्स**नामनि ॥३॥

**सुसीमा**यां महापुर्यां नि[4]:सीमा शौर्यसम्पदाम् । नृपो **धनपति**र्नामाऽभवद् धर्म-यशोधनः ॥४॥

बन्धनं ताडनं चाऽङ्गखण्डनं दण्डनादि च । नाऽभूत् कस्याऽपि तत्रा[5]ऽऽज्ञासारे शासति मेदिनीम् ॥५॥

मिथोऽसञ्जातकलहैर्वत्सलैश्च मिथो जनैः । सकलाऽपि मही तस्मिन् यत्याश्रम इवाऽभवत् ॥६॥

मनःसरोवरे तस्य दयावारितरङ्गिते । चिक्रीड निर्भरं हंस इव धर्मो जिनोदितः ॥७॥

विरक्तः सोऽथ संसारादसाराद् वि[6]श्वसारधीः । अन्तिके **संवर**मुनेः प्राव्राजीदा[7]त्तसंवरः ॥८॥

स व्रतं पालयंस्तीव्रं तप्यमानस्तपांसि च । विजहार महीमात्तविविधाभिग्रहः सुधीः ॥९॥

चतुर्मासोपवासान्तपारणे प्रत्यलाभयत् । श्रेष्ठिपुत्रो **जिनदासः** श्रद्धया तं महामुनिम् ॥१०॥

अर्हदाराधनाद्यैश्च **स्थानैर्धनपति**र्मुनिः । आजर्यत् तीर्थकृन्नामकर्म [8]कर्मद्विषन्नपि ॥११॥

विपद्य कालयोगेन समाहितमनाः स तु । [9]**नवमग्रैवेयके**ऽभूदमरः परमर्द्धिकः ॥१२॥

¶इतश्च **जम्बूद्वीप**स्याऽस्यैव क्षेत्रे च **भारते** । समस्ति **हास्तिनपुरं** पुरं परमऋद्धिकम् ॥१३॥

राजानोऽपि [10]प्रजायन्ते तत्र सेवार्थमागताः । दिव्यवाहन-नेपथ्या [11]राजायन्ते प्रजाः पुनः ॥१४॥

विभाति तत्र परिखा परितो वलयाकृतिः । श्रियः स्थैर्यकृते दत्ता स्वाज्ञालेखेव वेधसा ॥१५॥

हैम-[12]स्फाटिक-नै[13]लानि तत्र चैत्यान्यनेकशः । शृङ्गाणि **मेरु[14]-कैलासाञ्जना**द्रीणामिवाऽऽबभुः ॥१६॥

[15]सुदर्शनश्चन्द्र इव तत्र नाम्ना **सुदर्शनः** । अभूद्भूमिभुजां [16]प्रष्ठः सुराणामिव [17]वृत्रहा ॥१७॥

तस्याऽऽसने वा [18]तल्पे वा गृहे वा बहिरेव वा । धर्मोऽनुज्झितसान्निध्यः प्रियमित्रमिवाऽभवत् ॥१८॥

सिद्धमन्त्रोपमे तस्य प्रतापे परिसर्पति । [19]प्रक्रियामात्रमेवाऽऽसीच्चतुर्धा सैन्यसङ्ग्रहः ॥१९॥

गृहाङ्गणरजस्तस्य शमयामासुरन्वहम् । घनैर्म[20]दजलासारैर्नृपोपायनदन्तिनः ॥२०॥

**देवी** नाम महादेवी काऽपि देवीव [21]गां गता । अन्तःपुरशिरोरत्नमभवत् तस्य वल्लभा ॥२१॥

न कोपं प्रणयेनाऽपि पत्यौ जातु चकार सा । सपत्नीष्वपि मात्सर्यं प्रकृत्याऽऽर्या दधार न ॥२२॥

पतिप्रसाद-सौभाग्यादीनि तस्या मदाय न । सा तथाऽपि हि सञ्जज्ञे [22]प्रमदासु शिरोमणिः ॥२३॥

तस्याश्च निरवद्याङ्गया लावण्यसरितः खलु । अदृश्यत [23]प्रतिच्छन्दो दर्पणेष्वेव नाऽन्यतः ॥२४॥

तया च भोगान् भुञ्जानः [24]सुभुजो भूभुजां वरः । **सुदर्शनो** व्यतीयाय कालं कमपि [25]नाकिवत् ॥२५॥

¶इतश्च **ग्रैवेयक**स्थो जीवो **धनपतेः** स तु । एकान्तसुखनिर्मग्नो निजमायुरपूरयत् ॥२६॥

---

१. चारुः सुन्दरा गोरोचनाया इव पीतवर्णा कान्तिर्यस्य सः ॥ २. *०गोरोचनाद्युतिः* मु. ॥ ३. चतुर्थार एव सरस्तस्मिन् हंससदृशः ॥ ४. नितरां सीमारूपः ॥ ५. आज्ञैव सारो यस्य तस्मिन् तत्र राज्ञि ॥ ६. विश्वस्य सारभूता धीर्बुद्धिर्यस्य सः ॥ ७. गृहीतसंवरः ॥ ८. कर्मशत्रुरपि ॥ ९. *नवमे ग्रैवे०* हे. पा. ला. ॥ १०. प्रजा इव आचरन्ति ॥ ११. राजान इव आचरन्ति ॥ १२. *०स्फाटिकनीलानि* छा. पा. ला. ॥ १३. नीलमणिमयानि ॥ १४. मेरुशृङ्गसादृश्यं हैमचैत्यानामेवमनुक्रमेण ज्ञेयम् ॥ १५. शोभनं दर्शनं यस्य सः ॥ १६. अग्रेसरः ॥ १७. इन्द्रः ॥ १८. शय्यायाम् ॥ १९. आचारमात्रम् ॥ २०. मदजलस्य आसारो धारावर्षणं तैः ॥ २१. पृथ्वीं अवतीर्णा; *चागता* मु. ॥ २२. प्रकृष्टो मदो यासां तासु शिरोमणिरिति विरोधः, युवतिष्विति तत्परिहारः ॥ २३. प्रतिकृतिः ॥ २४. शोभनपाणिः ॥ २५. देववत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स च्युत्वा फाल्गुनशुक्लद्वितीयायां निशाकरे । **रेवती**[1]स्थे महादेव्याः **देव्याः** कुक्षाववातरत् ॥२७॥

चतुर्दश महास्वप्नांस्तीर्थकृज्जन्मसूचकान् । सुखसुप्ता निशाशेषे महादेवी ददर्श सा ॥२८॥

तस्याः पीडामतन्वानस्तन्वानश्च [2]तनुश्रियम् । ज्ञानत्रितयसंयुक्तो गर्भो गूढमवर्धत ॥२९॥

सा [3]मार्गशुद्धदशम्यां **रेवत्यां** कनकद्युतिम् । [4]सम्पूर्णलक्षणं [5]**नन्द्यावर्ताङ्कं** सुषुवे सुतम् ॥३०॥

षट्पञ्चाशद्दिक्कुमार्यः [6]सूतिकर्माणि चक्रिरे । अभिषेकश्चतुःषष्ट्या **मेरौ** चक्रे च वासवैः ॥३१॥

विलिप्य पूजयित्वा च कृत्वा चाऽऽरात्रिकादिकम् । स्वामिनं तमिति स्तोतुं **सौधर्मेन्द्रः** प्रचक्रमे ॥३२॥

"[7]नष्टाष्टादशदोषायाऽष्टादशायाऽर्हते प्रभो! । अष्टादशविधब्रह्मभृतां ध्येयाय ते नमः ॥३३॥

ज्ञानत्रयं गर्भतोऽपि यथैवाऽऽ[8]यतने तव । तथैवाऽखिलमप्येतत् तीर्थनाथ! जगत्त्रयम् ॥३४॥

मोहावस्वापिनीं दत्वा राग-द्वेषादिदस्युभिः । चिरं जगद[9]वस्कन्नं स्वामिंस्त्रायस्व सम्प्रति ॥३५॥

पथि श्रान्तैरिव रथस्तृष्णाक्रान्तैरिवाऽऽपगा । तप्तैरिव तरुच्छाया [10]निमज्जद्भिरिवो[11]डुपः ॥३६॥

[12]रोगिलैरिव भैषज्यं [13]ध्वान्तान्धैरिव दीपकः । हिमार्त्तैरिव मार्तण्डो मार्गमूढैरिवाऽ[14]ग्रगः ॥३७॥

व्याघ्रभीतैरिवाऽर्चिष्मा[15]न्नैर्नाथ्य[16]विधुरैश्चिरात् । तीर्थनाथ! त्वमस्माभिर्नाथ! प्राप्तोऽसि सम्प्रति ॥३८॥त्रिभिर्विशेषकम्॥

भवन्तं नाथमासाद्य सुरासुर-नरा अमी । स्वस्वस्थानेभ्य आगच्छन्त्य[17]मान्त इव हर्षतः ॥३९॥

भवतो नाथ! [18]नाथामि न खल्वन्यत् किमप्यहम् । नाथामि किन्त्विदं मे [19]त्वं नाथो भूया भवे भवे" ॥४०॥

स्तुत्वेतीशं गृहीत्वा च गत्वा चे[20]**भपुरे** पुरे । **सौधर्म**वासवो **देवी**स्वामिन्याः पार्श्वतोऽमुचत् ॥४१॥

¶राजा **सुदर्शनो**ऽकार्षीत् सूनोर्जन्ममहोत्सवम् । **अर** इत्यभिधानं च **देव्याः** स्वप्नेऽ[21]रदर्शनात् ॥४२॥

सुराङ्गनाभिर्धात्रीभिः [22]संवयोभूय चाऽमरैः । क्रीड्यमानः [23]क्रीडनकैः क्रमेण ववृधे प्रभुः ॥४३॥

समये राजकन्याश्च [24]त्रिंशद्धन्वसमुन्नतः । **अरनाथ** उपायंस्त पितृशासनगौरवात् ॥४४॥

जन्मतोऽब्दसहस्राणां गतायामेकविंशतौ । पित्राज्ञया राज्यधुरां दधार परमेश्वरः ॥४५॥

प्रभोर्मण्डलिकत्वेऽपि काले [25]तावत्यतीयुषि । [26]अस्त्रागारे समुत्पेदे चक्ररत्नं नभश्चरम् ॥४६॥

त्रयोदशभिरन्यैश्च [27]युतो रत्नैररप्रभुः । चक्रानुगश्चतुर्वर्षशत्या **भरत**मन्वशात् ॥४७॥

तावत्येव गते काले स्वामिनश्चक्रिणः सतः । तीर्थं प्रवर्तयेत्यूचेऽभ्येत्य लोकान्तिकामरैः ॥४८॥

दानं दत्वाऽऽ[28]ब्दिकं [29]राज्यं त्व**रविन्द**सुताय सः । **वैजयन्त्या** शिबिकया **सहस्राम्रवणं** ययौ ॥४९॥

[30]वाचंयमैरिव पिकैस्तूष्णीकैराश्रितद्रुमम् । [31]कृष्णेक्षुवाटगोपीनां गीतिभिः [32]स्खलिताध्वगम् ॥५०॥

क्रीडन्नागरनारीणां केशपाशावलोकनात् । [33]ह्रीतैरिवोन्मुक्तबर्हैर्बर्हिणैः शरणीकृतम् ॥५१॥

पुन्नागकुसुमामोदप्रमोदित[34]मधुव्रतम् । [35]कर्कन्धू-नागरङ्गीणां फलैः पिञ्जरिताम्बरम् ॥५२॥

लवली-फलिनी-कुन्द-मुचुकुन्दाग्रकुड्मलैः । समन्ततः शोभमानं [36]हेमन्तहसितैरिव ॥५३॥

रजोभी रो[37]ध्रपुष्पा[38]णां निर्मलीकृतदिङ्मुखम् । प्रविवेश तदुद्यानं [39]**नन्द्यावर्तध्वजो** [40]**जिनः** ॥५४॥पञ्चभिः कुलकम्॥

---

१. रेवतीनक्षत्रस्थे ॥ २. शरीरशोभां विस्तारयन् ॥ ३. मार्गशीर्ष ॥ ४. ***त्रिंशद्धनून्नतं*** हे. ॥५. नन्द्यावर्तस्य-स्वस्तिकस्य लाञ्छनं यस्य सः, तम् ॥ ६. ***सूतिकर्मास्य*** हे. ला. ॥७. नष्टा अष्टादश दोषा यस्य सः, तस्मै ॥८. हृदयरूपे भवने ॥ ९. आक्रान्तम् ॥ १०. ब्रुडद्भिः समुद्रे इति शेषः ॥११. तरण्डः -'तरापो'॥ १२. ***रोगिभिरिव*** मु. ॥ १३. ध्वान्तेन-अन्धकारेण अन्धैः ॥ १४. मार्गदर्शकः ॥ १५. अग्निं दृष्ट्वा व्याघ्रः पलायत इति प्रसिद्धिः ॥ १६. नाथराहित्येन विधुरैः ॥ १७. हर्षोद्रेकादित्यर्थः ॥१८. याचे ॥१९. ***त्वं मे*** खंता. ॥ २०. हास्तिनपुरे ॥ २१. अरश्चक्रधारा, तस्य दर्शनात् ॥ २२. मित्रीभूय ॥ २३. क्रीडासाधनैः खेलनकैः ॥ २४. ***रूपलावण्यशालिनीः*** हे. ॥ २५. २१०००वर्षेषु गतेषु सत्सु; ***०तावत्यपीयुषि०*** मु. ॥ २६. आयुधशालायाम् ॥ २७. ***महारत्नैः समन्वितः । षट्खण्डं भरतं चक्रानुगोऽरस्वाम्यसाधयत् ॥*** हे. ॥ २८. वार्षिकम् ॥ २९. ***स्वामी सुरासुरनराढ्यया*** हे. ॥ ३०. मुनिभिरिव ॥ ३१. कृष्णा या इक्षुवाटाः (शेरडीना काळा वाढ) तेषु या गोप्यस्तासाम् ॥ ३२. स्खलिता अध्वगाः-पान्था यस्मिंस्तत् ॥ ३३. लज्जितैरिव ईदृशैर्मुक्तपिच्छैर्मयूरैः शरणीकृतं वनं, हेमन्तर्तौ मयूराः पिच्छानि त्यजन्तीति स्वभावोक्तिः ॥ ३४. मधुव्रताः-भ्रमराः ॥ ३५. बदरी ॥ ३६. हेमन्तर्तोर्हास्यैरिव ॥ ३७. लोध्र ॥ ३८. ***०णामधिवासितदिङ्मुखम्*** हे. ॥ ३९. नन्द्यावर्तः ध्वजः लाञ्छनं यस्य सः ॥ ४०. अरनाथः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वैजयन्त्याः** समुत्तीर्य [१]मार्गस्यैकादशीदिने । शुक्ले [२]**पौष्ण**गते चेन्दावह्नो भागे च पश्चिमे ॥५५॥
समं राजसहस्रेण षष्ठेन प्राव्रजत् प्रभुः । मनःपर्ययसञ्ज्ञं च [३]तदैव ज्ञानमासदत् ॥५६॥[युग्मम्]
पुरे **राजपुरे** सद्मन्य**पराजित**भूपतेः । चक्रे स्वामी द्वितीयेऽह्नि परमान्नेन पारणम् ॥५७॥
अमरैर्विदधे तत्र वसुधारादिपञ्चकम् । रत्नपीठं तेन राज्ञा स्वामिपादपदे पुनः ॥५८॥
अनासीनोऽशयानश्च विविधाभिग्रहः प्रभुः । छद्मस्थस्त्रीणि वर्षाणि विजहार वसुन्धराम् ॥५९॥
¶अन्येद्युर्विहरन्नाऽऽगात् **सहस्राम्रवणं** पुनः । सहकारतरोर्मूले चाऽस्थात् प्रतिमया प्रभुः ॥६०॥
कार्तिकशुक्लद्वादश्यां [४]शशाङ्के **रेवती**गते । उत्पेदे केवलं तत्र घातिकर्मक्षयात् प्रभोः ॥६१॥
सद्यश्च देवैः समवसरणं तत्र निर्ममे । तत्र द्वारेण पूर्वेण प्रविवेश जगद्गुरुः ॥६२॥
चैत्यद्रुं तत्र [५]षष्ट्यग्रकार्मुकत्रिशतोन्नतम् । प्रदक्षिणीकृत्य "नमस्तीर्थाये"त्यवदद् विभुः ॥६३॥
पूर्वसिंहासने तत्रोपाविशत् प्राङ्मुखः प्रभुः । व्यन्तरास्तत्प्रतिच्छन्दान् दिक्ष्वन्यास्वपि चक्रिरे ॥६४॥
अवास्थित यथास्थानं सङ्घोऽपि [६]भगवानथ । ज्ञात्वेशं समवसृतं तत्राऽऽगाच्च [७]**कुरूद्वहः** ॥६५॥
भगवन्तं नमस्कृत्य सो[८]ऽनुशक्रमुपाविशत् । प्रारेभाते इति स्तोतुमथ **शक्र-कुरूद्वहौ** ॥६६॥
"जय त्रिभुवनाधीश! जय विश्वैकवत्सल! । जय कारुण्यजलधे! जयाऽतिशयशोभित! ॥६७॥
विश्वप्रकाशनं भानोरमोघै[९]र्भानुभिः सदा । विश्वसन्तापहरणं ज्योत्स्नया च हि[१०]मद्युतेः ॥६८॥
जगज्जीवनमम्भोभिः प्रावृडम्भोधरस्य च । जगदाश्वासनं वायोर्गत्या सन्ततयाऽपि च ॥६९॥
यथा निष्कारणमिह तथा ते परमेश्वर! । जगत्त्रयोपकाराय प्रवृत्तिर्जयति प्रभो! ॥७०॥
अन्धकारमयं चाऽऽसीदन्धं वा जगदप्यदः । सप्रकाशं [११]सेक्षणं वा त्वया जज्ञेऽधुना पुनः ॥७१॥
नरकाणां [१२]खिलैः पन्था भविताऽतः परं प्रभो! । तिर्यग्योनावपि गतिः स्तोकस्तोका भविष्यति ॥७२॥
सीमग्रामान्तराणीव स्वर्गाश्च प्राणिनाममी । प्रत्यासन्ना भविष्यन्ति मुक्तिरप्य[१३]दवीयसी ॥७३॥
त्वयि विश्वोपकाराय विहरत्यवनीमिमाम् । भावि किं किं न कल्याणमसम्भाव्यमपि प्रभो! ?" ॥७४॥
इति स्तुत्वा **सौधर्मेन्द्रे कुरुराजे** च तस्थुषि । **अरनाथः** स भगवान् विदधे धर्मदेशनाम् ॥७५॥
¶"[१४]चतुर्वर्गाग्रणीर्मोक्ष एकान्तसुखसागरः । तत्साधकतमं ध्यानमधीनं मनसश्च तत् ॥७६॥
आत्मायत्तमपि [१५]स्वान्तं कुर्वतामत्र योगिनाम् । रागादिभिः समाक्रम्य परायत्तं विधीयते ॥७७॥
रक्ष्यमाणमपि स्वान्तं समादाय मना[१६]ग्मिषम् । पिशाचा इव रागाद्याश्छलयन्ति मुहुर्मुहुः ॥७८॥
[१७]रागादितिमिरध्वस्तज्ञानेन मनसा जनः । [१८]अन्धेनाऽन्ध इवाऽऽकृष्टः पात्यते [१९]नरकावटे ॥७९॥
द्रव्यादिषु रति-प्रीती राग इत्यभिधीयते । तेष्वेवाऽरतिमप्रीतिं चाऽऽहुर्द्वेषं मनीषिणः ॥८०॥
उभावेतौ दृढतरौ बन्धनं सर्वजन्मिनाम् । [२०]सर्वदुःखानो[२१]कहानां मूल-कन्दौ प्रकीर्तितौ ॥८१॥
कः सुखे विस्मयस्मेरो ? दुःखे कः कृपणो भवेत् ? । मोक्षं को नाऽऽप्नुयाद् ? राग-द्वेषौ स्यातां न चेदिह ॥८२॥
[२२]रागेण ह्यविनाभावी द्वेषो द्वेषेण चेतरः । तयोरेकतरत्यागे परित्यक्तावुभावपि ॥८३॥
दोषाः स्मरप्रभृतयो रागस्य [२३]परिचारकाः । मिथ्याभिमानप्रमुखा द्वेषस्य तु [२४]परिच्छदः ॥८४॥
तयोर्मोहः पिता बीजं नायकः परमेश्वरः । [२५]ताभ्यामभिन्नस्त[२६]द्रक्ष्यः [२७]सर्वदोषपितामहः ॥८५॥
एवमेते त्रयो दोषा नाऽतो दोषान्तरं क्वचित् । तैरमी जन्तवः सर्वे [२८]भ्राम्यन्ते भववारिधौ ॥८६॥

१. मार्गशीर्षस्य ॥ २. रेवतीं गते ॥ ३. ***ज्ञानं तदैवमासदत्*** हे. ॥ ४. चन्द्रे ॥ ५. ३६०धनुरुन्नतमित्यर्थः ॥ ६. पूज्यः ॥ ७. कुरुदेशस्य राजा ॥ ८. इन्द्रस्य पश्चात् ॥ ९. किरणैः ॥ १०. चन्द्रस्य ॥ ११. नेत्रसहितम् ॥ १२. शून्यः ॥ १३. नातिदूरा ॥ १४. ***चतुर्वर्गेऽग्रणी०*** खंता ॥ १५. मनः ॥ १६. छिद्रं, 'बहानुं' इति भाषायाम् ॥ १७. रागादय एवाऽन्धकारस्तेन ध्वस्तं ज्ञानं यस्य तत्, तेन ॥ १८. यथाऽन्धेनाऽऽकृष्टोऽन्धोऽवटे कूपे पात्यते तद्वत् ॥ १९. नरककूपे ॥ २०. ***सर्वदोषानोकहानां*** हे. ॥ २१. वृक्षाणाम् ॥ २२. रागं विना द्वेषो न भवेत्, द्वेषं च विना रागोऽपि न भवेदित्यर्थः ॥ २३. सेवकाः; ***परिचारिकाः*** ला. मु. ॥ २४. परिवारः ॥ २५. राग-द्वेषाभ्याम् ॥ २६. ***स्तद्रक्षः*** खंता.; ताभ्यां रक्ष्यः-रक्षणीयः ॥ २७. सर्वदोषाणां पितरौ राग-द्वेषौ, तयोरपि पिता मोह इत्यर्थः ॥ २८. ***भ्रम्यन्ते*** हे. मु. ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

स्वभावेन हि जीवोऽयं स्फटिकोपलनिर्मलः । उपाधिभूतैरेतैस्तु [१]तादात्म्येनाऽवभासते ॥८७॥
अराजकमहो विश्वं यदेभिः [२]पश्यतोहरैः । ह्रियते ज्ञानसर्वस्वं स्वरूपमपि जन्मिनाम् ॥८८॥
ये जन्तवो निगोदेषु येऽपि चाऽऽसन्नमुक्तयः । सर्वत्राऽ[३]स्पृष्टकरुणा पतत्येषां [४]पताकिनी ॥८९॥
मुक्त्या वैरं किमेतेषां ? [५]मुक्तिकामैः सहाऽथवा ? । येनोभयसमायोगस्तैर्भवन् प्रतिषिध्यते ॥९०॥
व्याघ्र-व्याल-जलाग्निभ्यो न बिभेति तथा मुनिः । लोकद्वयापकारिभ्यो रागादिभ्यो भृशं यथा ॥९१॥
वर्त्माऽति[६]सङ्कटमहो! योगिभिः समुपाश्रितम् । राग-द्वेषौ व्याघ्र-सिंहौ पार्श्वतो यस्य तिष्ठतः ॥९२॥
[७]अस्ततन्द्रैरतः पुंभिर्निर्वाणपदकाङ्क्षिभिः । विधातव्यः समत्वेन राग-द्वेषद्विषज्जयः"॥९३॥
भूयांसः [८]प्राव्रजन् भव्याः प्रभोर्दे[९]शनयाऽनया । **कुम्भा**दयो गणभृतस्त्रयस्त्रिंशच्च जज्ञिरे ॥९४॥
पूर्णायामादिपौरुष्यां [१०]व्यस्राक्षीद्देशनां प्रभुः । **कुम्भ**स्तत्पादपीठस्थो गणभृद्देशनां व्यधात् ॥९५॥
[११]द्वितीयस्यां तु पौरुष्यां [१२]व्यसृजत् सोऽपि देशनाम् । शक्राद्याश्च प्रभुं नत्वा जग्मुर्निजनिजं [१३]पदम् ॥९६॥
**यक्षेन्द्रः** षण्मुखस्त्र्य[१४]क्षः श्यामः [१५]शङ्खरथो भुजैः । [१६]मातुलिङ्गि-बाणि-खड्गि-मुद्गरि-पाशयभी[१७]प्रदैः ॥९७॥
दक्षिणैः षड्भिरन्यैश्च नकुली[१८]ष्वासि-चर्मि[१९]भिः । शूलाङ्कुशाक्षसूत्रा[२०]क्षैर्युक्तस्तत्तीर्थभूस्तथा ॥९८॥
देवी च **धारिणी** नाम नीलाङ्गी कमलासना । मातुलिङ्गोत्पलधरदक्षिणोभयबाहुका ॥९९॥
पद्माक्षसूत्रभृद् वामोभयबाहुररप्रभोः । सन्निधिस्थे सदाऽभूतामुभे शासनदेवते ॥१००॥
ताभ्यामधिष्ठि[२१]ताभ्यर्णो भगवान् विहरन् महीम् । अन्येद्युः समवासार्षीत् **पद्मिनीखण्ड**पत्तने ॥१०१॥
तत्राऽपि देशनां कृत्वा विरते सत्य**रे** प्रभौ । स्वामीव विदधे **कुम्भो** देशनां संशयच्छि[२२]दम् ॥१०२॥
¶तत्रैको वामनोऽभ्येत्य धर्मं श्रोतुमुपाविशत् । श्रेष्ठी **सागरदत्तो**ऽथ **कुम्भं** नत्वैवमब्रवीत् ॥१०३॥
[२३]भवप्रकृत्या भगवन्! दुःखिनो [२४]भविनोऽखिलाः । विशेषदुःखितश्चाऽस्मि सुखलेशोऽपि नाऽस्ति यत् ॥१०४॥
भार्यायां **जिनमत्यां** मे नामतः **प्रियदर्शना** । [२५]उत्पन्ना दुहिता रूपाधरीकृतसुराङ्गना ॥१०५॥
प्राप चाऽनन्यसामान्यं सा कलास्वतिकौशलम् । द्वि[२६]तीयं च वयो [२७]रूप-वैदग्ध्य-श्रीविशेषकम् ॥१०६॥
अनुरूपं वरं तस्या अपश्यन् दुःखितोऽभवम् । उक्तोऽस्मि **जिनमत्या** च चिन्तामाप्तोऽसि नाथ! किम् ? ॥१०७॥
अनुरूपं त्वद्दुहितुर्वरमन्वेषयन्नपि । न प्राप्नोमि क्वचिदपि तेन [२८]ताम्यामि सुन्दरि! ॥१०८॥
[२९]इत्युक्तं **जिनमत्या**ऽपि श्रेष्ठिन्! श्रेष्ठस्त्वया वरः । ग्राह्यः स कोऽपि येन स्यान्नाऽनुतापः प्रियाऽऽवयोः ॥१०९॥
अवोचमहमप्येवं प्रमाणं दैवमत्र हि । [३०]आत्मनीनो हि सर्वोऽपि स्तोकेच्छुः कोऽपि नात्मनः ॥११०॥
इत्युक्त्वा वि[३१]पणौ गच्छंस्**ताम्रलिप्त्याः** समागतम् । अद्राक्ष**मृषभदत्तं** सार्थवाहं महर्द्धिकम् ॥१११॥
साधर्मिकत्वात् सस्नेहा वाणिज्योदन्तगर्भिताः । अभूवन् [३२]पूर्वसुहृदेवाऽऽलापाः सह तेन मे ॥११२॥
अन्यदा स ममाऽगारमागात् केनाऽपि हेतुना । ई[३३]क्षते स्म च सुचिरं मत्पुत्रीं **प्रियदर्शनाम्** ॥११३॥
कस्य कन्येयमिति तु तेन पृष्टोऽहमब्रुवम् । ममेयं हेतुना केन सुचिरं वीक्ष्यते त्वया ? ॥११४॥
आह **स्मर्षभदत्तो**ऽपि **वीरभद्रो**ऽभिधानतः । सम्प्राप्तयौवनः श्रेष्ठिन्नस्ति मे तनयो नयी ॥११५॥
स रूपेणाऽति[३४]कन्दर्पोऽति[३५]कविः काव्यशक्तितः । [३६]अतिवाचस्पतिर्वाचा विज्ञानेनाऽति[३७]वर्धकिः ॥११७॥
अति[३८]हूहूश्च गीतेन वीणाया चाऽति[३९]तुम्बरुः । नाट्येषु चाऽतिभरतो विनोदेष्वतिनारदः ॥११८॥

१. तद्रूपेण ॥ २. चौरैः ॥ ३. निर्दया ॥ ४. सेनाः ॥ ५. मुमुक्षुभिः ॥ ६. अतिसङ्कीर्णो मार्गः ॥ ७. अप्रमादैः ॥ ८. ***प्राव्रजन् जनाः*** मु.प्रभृतिषु ॥ ९. ***०र्देशनया तया*** खंता. ॥ १०. विसर्जितवान् ॥ ११. ***द्वितीयायाम्*** हे. ला. ॥ १२. समापयत् ॥ १३. स्थानम् ॥ १४. त्रिनेत्रः ॥ १५. ***शिखिरथो*** मु. हे. विना ॥ १६. मातुलिङ्गमस्याऽस्तीत्येवं सर्वत्रास्त्यर्थे इन् ॥ १७. अभयप्रदैः ॥ १८. नकुलवत्-इष्वासवत्-चर्मवत् ॥ १९. फलकवद्भिः ॥ २०. ***०सूत्राह्वै०*** खंता. पाता. ॥ २१. अधिष्ठितं अभ्यर्णं-समीपं यस्य सः ॥ २२. ***०च्छिदाम्*** मु.प्र. ॥ २३. संसारस्वभावेन ॥ २४. जीवाः ॥ २५. ***उत्पेदे*** हे. ॥ २६. यौवनाख्यम् ॥ २७. रूपचातुर्यशोभाविशेषकम् ॥ २८. खिन्नो भवामि ॥ २९. ***इत्यूचे*** हे. ॥ ३०. आत्मने हित आत्मनीनः, आत्महितेच्छुरित्यर्थः ॥ ३१. विपणिः पण्यवीथिका 'बजार'इति ॥ ३२. पूर्वमित्रेण सह यथाऽऽलापा भवन्ति तथेत्यर्थः ॥ ३३. ***ईक्षाञ्चक्रे*** हे. ॥ ३४. कन्दर्पं-काममतिक्रान्तः ॥ ३५. कविं शुक्राचार्यमतिक्रान्तः ॥ ३६. वाचस्पतिमतिक्रान्तः ॥ ३७. वर्धकिरत्नमतिक्रान्तः ॥ ३८. हूहूः-गन्धर्वविशेषः ॥ ३९. तुम्बरुः-देवगायकः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कामरूपः सुर इव गुटिकादिप्रयोगतः। किं चाऽन्यत्? सा कला नाऽस्ति यां [1]ब्रह्मेव न वेत्ति सः ॥११८॥
कन्यां तस्याऽनुरूपां तु नाऽपश्यं क्वचिदप्यहम्। इयं तु कन्यका दृष्टा चिरात् तदुचिता मया ॥११९॥
[2]मयाऽप्युक्तं ममाऽप्येषा कलाकौशलशालिनी। अनुरूपवरार्थेऽस्याश्चिरं ग्रस्तोऽस्मि चिन्तया ॥१२०॥
दैवानुकूल्यात् तदयं सङ्गमः साधुरावयोः। चिराद् वधू-वरत्वेन घटेतां तनयौ द्वयोः ॥१२१॥
अनुरूप[3]स्नुषालाभाद् गत्वा हृष्टो निजां पुरीम्। स प्राहिणोद् **वीरभद्रं** महत्या [4]जन्ययात्रया ॥१२२॥
**वीरभद्रं** वरं प्रेक्ष्याऽमन्दमानन्दमासदम्। तत्पित्राख्याततद्रूप-गुणसंवाददर्शनात् ॥१२३॥
शुभे दिने [5]पर्यणैषीत् कन्यां मे **प्रियदर्शनाम्**। **वीरभद्रः** [6]कुलस्त्रैणभद्रमङ्गलपूर्वकम् ॥१२४॥
कत्यप्यहानि स स्थित्वा [7]सदारः स्वां पुरीं ययौ। तिष्ठन्ति न चिरं जातु मानिनः श्वशुरौकसि ॥१२५॥
अश्रौषं चाऽन्यदा **वीरभद्रो** यामे निशान्तिमे। मुक्त्वा [8]मे तनयां सुप्तामेकाकी क्वचिदप्यगात् ॥१२६॥
आनैषीत् तत्[9]प्रवृत्तिं च वामनः कोऽपि सम्प्रति। परं न व्यक्तमाख्याति स्फुटमाख्याहि तत्प्रभो! ॥१२७॥
इति **सागरदत्ते**न विज्ञप्तो भगवानपि। **कुम्भो** गणधरश्रेष्ठो जगादैवं कृपानिधिः ॥१२८॥
¶तस्यां निशायां जामाता स [10]तत्रैवमचिन्तयत्। कलानां [11]पारदृश्वाऽस्मि मन्त्राः सिद्धाश्च भूरिशः ॥१२९॥
ज्ञाताश्च दिव्यगुटिकाप्रयोगा विस्मयास्पदम्। विज्ञानेषु च सर्वेषु भृशं प्राप्तं च [12]पाटवम् ॥१३०॥
सर्वं निरर्थकं [13]तच्च मनागप्यप्रकाशनात्। नियन्त्रितोऽस्मि यदिह गुरुसान्निध्यलज्जया ॥१३१॥
कूपमण्डूकवत् तिष्ठन्नहो! [14]कापुरुषोऽस्म्यहम्। प्रकाशयामि तद्गत्वाऽन्यदेशेषु निजान् गुणान् ॥१३२॥
विचिन्त्येति [15]समुत्थाय भूयोऽप्येवमचिन्तयत्। प्रिया [16]कृतकसुप्ता चे[17]द्गतेर्विघ्नाय तद्भवेत् ॥१३३॥
ततः क्रीडाकृते तां स [18]समुदस्थापयत् प्रियाम्। साऽप्युवाच शिरोऽर्तिर्मे किं कदर्थयसि प्रिय! ? ॥१३४॥
शिरोऽर्तिः कस्य दोषेण तवेति [19]तदुदीरिता। त्वद्दोषेणेति साऽवादीत् कीदृशेनेति सोऽवदत् ॥१३५॥
साऽप्यूचे समयेऽत्राऽपि यत्ते वैदग्ध्यवागियम्। सोऽवोचन् मा कुपः कान्ते! करिष्ये नेदृशं पुनः ॥१३६॥
तां साभिप्रायमित्युक्त्वा रमयामास सोऽधिकम्। साऽप्यस्वाप्सीद् रतिश्रान्ता तां वक्रोक्तिमजानती ॥१३७॥
सत्यसुप्तेति तां मुक्त्वा [20]दृढामुक्तान्तरीयकः। वीरवद् **वीरभद्रो**ऽथ निर्जगाम निजाद् गृहात् ॥१३८॥
स्वं श्यामवर्णं गुटिकाप्रयोगेण चकार सः। याति [21]वर्णपरावृत्त्या रूपं काव्यवदन्यताम् ॥१३९॥
कलाकलाप-विज्ञानातिशयं [22]दर्शयंश्च सः। विद्याधर इवाऽभ्राम्यत् स्वैरं ग्राम-पुरादिषु ॥१४०॥
साऽऽपृच्छ्य श्वसुरौ तातगृहेऽगात् **प्रियदर्शना**। विना पतिं कुलस्त्रीणां वासो ह्यन्यत्र नोचितः ॥१४१॥
¶एकदा **सिंहलद्वीपे** [23]**रत्नाकर**नृपास्थितम्। पुरं **रत्नपुरं** नाम **वीरभद्रो** यथावटन् ॥१४२॥
स हट्टे श्रेष्ठि**शङ्खस्य** [24]शङ्खोज्ज्वलगुणश्रियः। न्यषीदत् तेन पृष्टश्च कुतो भद्र! त्वमागमः? ॥१४३॥
बभाषे **वीरभद्रो**ऽपि **ताम्रलिप्त्याः** स्ववेश्मतः। रुषित्वा निःसृतो भ्राम्यन्निह ताताऽहमागमम् ॥१४४॥
**शङ्ख**श्रेष्ठ्यप्यभाषिष्ट न सुष्ठु भवता कृता। कुमार! सुकुमारेण विदेशगतिरीदृशी ॥१४५॥
कर्मेदं वक्रमपि ते दैवेन सरलीकृतम्। अक्षताङ्गो यदत्राऽऽगास्त्वं वत्स! मम सन्निधौ ॥१४६॥
इत्युक्त्वा तं गृहे नीत्वा **शङ्ख**श्रेष्ठी स्वपुत्रवत्। स्नपयित्वा भोजयित्वा सस्नेहमिदमभ्यधात् ॥१४७॥
ममाऽनुत्पन्नपुत्रस्य पुत्र! पुत्रस्त्वमेव हि। स्वामी भूत्वा मद्विभवमुपभुङ्क्ष्व च [25]देहि च ॥१४८॥
कुरुष्व [26]मदृशोः प्रीतिं वि[27]लसन्न[28]मरर्द्धिकः। धनं हि सुलभं वत्स! तद्वोक्ता दुर्लभः सुतः ॥१४९॥

---

१. ब्रह्मेव ॥ २. ***मयाऽप्यूचे*** हे. ॥ ३. स्नुषा-पुत्रवधूः ॥ ४. भाषायां 'जान' ॥ ५. ***चोपयेमे*** हे. ॥ ६. कुलस्त्रीणां भद्रमङ्गल(गीत)पूर्वकम् ॥ ७. पत्नीसहितः ॥ ८. ***स*** हे. खंता. मु. ॥ ९. प्रवृत्तिः-वृत्तान्तः ॥ १०. ***तथैवमचि०*** हे. ॥ ११. पारगामी ॥ १२. चातुर्यम् ॥ १३. ***तत्तु*** खंता. मु. ॥ १४. कुपुरुषः ॥ १५. ***समुत्थाप्य*** मु. ॥ १६. कृत्रिमतया सुप्ता ॥ १७. ***चेद्गतिर्वि०*** ला. हे. ॥ १८. उत्थापितवान् ॥ १९. तेन प्रेरिता ॥ २०. दृढं आमुक्तं बद्धमान्तरीयं अधोंऽशुकं वस्त्रं येन सः ॥ २१. काव्यपक्षे वर्णानामकारादीनां परावर्तनेन अन्यार्थतां प्राप्नोति ॥ २२. ***दर्शयन्नसौ*** हे. ॥ २३. रत्नाकरनाम्ना नृपेणाऽऽश्रितम् ॥ २४. शङ्ख इवोज्ज्वला गुणाः श्रीश्च यस्य सः ॥ २५. दानं देहि ॥ २६. मन्नेत्रयोः ॥ २७. ***विलसन्नसमर्द्धिकः*** हे. पा. ला. ॥ २८. अमरस्येव ऋद्धिर्यस्य सः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आश्रयन् [1]प्रश्रयं **वीरभद्रो**ऽप्येवमवोचत । निष्क्रान्तोऽपि पितुर्गेहात् पितुर्गेहेऽहमागमम् ॥१५०॥
तवाऽऽज्ञावशवर्त्यस्मि शिष्योऽस्मि तव सर्वदा । औरसो हि [2]पापपुत्रो धर्मपुत्रोऽस्म्यहं पुनः ॥१५१॥
ततः स सुखमेवाऽस्थाच्छ**ङ्खस्य** श्रेष्ठिनो गृहे । पौरान् विस्मापयन्ना[3]विःकलाविज्ञानकौशलैः ॥१५२॥
¶तत्र **रत्नाकर**नृपस्याऽऽसीद्विश्वैकसुन्दरी । **अनङ्गसुन्दरी** नाम पुरुषद्वेषिणी सुता ॥१५३॥
तस्याः पार्श्वे प्रतिदिनं श्रेष्ठि**शङ्ख**सुता ययौ । नामतो **विनयवती** विनयैकनिकेतनम् ॥१५४॥
स्वसः! क्व यासीति पृष्टा **वीरभद्रेण** साऽन्यदा । भ्रातृस्नेहाद् **विनयवत्**याचचक्षे यथातथम् ॥१५५॥
सा सखी ते विनोदैः कैः कालं गमयति स्वसः! ? । इत्युक्ता **वीरभद्रेण** वीणाद्यैरिति साऽवदत् ॥१५६॥
तर्ह्यायास्याम्यहमपीत्युक्ता तेन तु साऽवदत् । न पुंसो बालकस्याऽपि प्रवेशस्तत्र ते कुतः ? ॥१५७॥
विधास्यामि वधूरूपं सम्यगित्यभिधाय सः । [4]तत्सम्मतो नट इव सद्यः स्त्रीवेषमा[5]ददे ॥१५८॥
सोऽगात् तया समं तत्र सखि! केयं त्वया सह ? । पृष्टेत्य**नङ्गसुन्दर्या मत्स्वसेति** जगाद सा ॥१५९॥
तदा चा**ऽनङ्गसुन्दर्या** सुन्दरै[6]र्वर्णकैर्नवैः । फलके लिखितुं हंसी विरहार्तोपचक्रमे ॥१६०॥
तां **वीरभद्र** इत्यूचे त्वया विरहपीडिता । इयं लिखितुमारेभे परं दृष्ट्यादि नेदृशम् ॥१६१॥
तर्हि त्वमालिखेत्युक्त्वा फलकं वर्णकैः सह । **अनङ्गसुन्दरी वीरभद्रा**याऽर्पयति स्म सा ॥१६२॥
लिखित्वा तादृशीं हंसीं **वीरभद्रो**ऽपि तत्क्षणम् । तस्यै समर्पयामास सा निरूप्यैवमब्रवीत् ॥१६३॥
अहो! [7]आलेख्यनैपुण्यमन्तर्भा[8]वप्रकाशकम् । तथाहि दृष्टिरेतस्या [9]बाष्पाम्बुकणवर्षिणी ॥१६४॥
प्रम्लानं वदनं चञ्चूः [10]श्लथोपात्तमृणालिका । ग्रीवा च शिथिला पक्षावु[11]त्पतनासहाविमौ ॥१६५॥
शून्यं चेदमवस्थानमवस्थां विरहाकुलाम् । आख्याति व्यक्तमेतस्या अनाख्यातामपि स्वयम् ॥१६६॥
कलाविदीदृशी कस्मादियत्कालं सखि! त्वया । नाऽऽनीतेयं गृहे क्षिप्त्वा रहस्यमिव किं धृता ? ॥१६७॥
**वीरभद्रो**ऽप्युवाचैवं गुरूणामभिशङ्कया । नाऽऽनीताऽहमिह स्वस्रा नाऽन्यत् किमपि कारणम् ॥१६८॥
**अनङ्गसुन्दरी**त्यूचेऽतः परं प्रत्यहं त्वया । आगन्तव्यं सह स्वस्रा किं चाऽस्या नाम सुन्दरि! ? ॥१६९॥
**वीरभद्रो** झगित्यूचे नाम **वीरमती**ति मे । भूयोऽप्यूचे राजपुत्र्या वेत्स्यन्या अपि किं कलाः ? ॥१७०॥
ऊचे **विनयवत्यै**वमचिराज्ज्ञास्यसि स्वयम् । न प्रत्ययः पराख्यातेष्वत्यद्भुतगुणेष्वपि ॥१७१॥
एवमस्त्वित्युदित्वाऽथ मुदिता**ऽनङ्गसुन्दरी** । सत्कृत्य **विनयवतीं** विससर्ज तदन्विताम् ॥१७२॥
¶**वीरभद्रो** वधूवेषं गृहे मुक्त्वा ययौ पुनः । आपणे श्रेष्ठिनः पार्श्वे पितृभक्तिनियन्त्रितः ॥१७३॥
श्रेष्ठी तमूचे सस्नेहं वत्स! क्वाऽऽस्था इयच्चिरम् ? । इह त्वां पृच्छतां नृणां नि[12]र्विण्णोऽस्म्युत्तरं ददत् ॥१७४॥
बभाषे **वीरभद्रो**ऽपि तातोद्याने गतोऽस्म्यहम् । श्रेष्ठ्यप्यभाषतैवं च यद्येवं शोभनं कृतम् ॥१७५॥
तथैवाऽह्नि द्वितीयेऽपि तत्र सोऽगात् कलानिधिः । **अनङ्गसुन्दरीं** वीणां वादयन्तीं ददर्श च ॥१७६॥
इत्यूचे **वीरभद्र**स्तां [13]तन्त्रीरेषा न सुस्वरा । मनुष्यवालोऽमुष्यां यदनु[14]स्यूतोऽस्ति सुन्दरि! ॥१७७॥
कथं नु ज्ञायत ? इति तयोक्तः सोऽब्रवीदिदम् । ज्ञायते [15]त्वदुपक्रान्तरागनिर्वाहदर्शनात् ॥१७८॥
ततश्च साऽर्पयामास **वीरभद्र**स्य [16]वल्लकीम् । तद्विदु[17]त्कीलयामास तत्तन्त्रीं सोऽपि तत्क्षणात् ॥१७९॥
मनुष्यवालं तन्मध्यात् स शल्यं हृदयादिव । आकृष्य दर्शयामास तस्या [18]विस्मयमादधत् ॥१८०॥
तत्तन्त्रीं [19]संज्जयित्वा स भूयो दण्डे निबध्य च । वादयामास तां वीणां प्रावीण्यजिततुम्बरुः ॥१८१॥
स्वरानुत्पादयामास सारण्या सुस्फुटश्रुतीन् । तानांश्च कूटतानांश्च व्यक्तव्यञ्जनधातुकान् ॥१८२॥

१. प्रणयम् ॥ २. स्वपुत्रः ॥ ३. आविः प्रकटं यथा स्यात् तथा ॥ ४. तया सम्मतः ॥ ५. *०माददौ* खंता. ॥ ६. वर्णकैः-वर्णैः (रंगो वडे) ॥ ७. चित्रकौशल्यम् ॥ ८. *०र्भावप्रकाशनम्* ला. ॥ ९. *बाष्पाश्रुकण०* हे. ॥ १०. मृणालिका-कमलदण्डः, शिथिलं उपात्ता-गृहीता मृणालिका यया सा ॥ ११. उड्डयनेऽक्षमौ ॥ १२. श्रमितः ॥ १३. *तन्त्र्येषा सुस्वरा न हि* हे. ॥ १४. संलग्नः ॥ १५. त्वया आरब्धस्य रागस्य निर्वाहदर्शनात् ॥ १६. वीणाम् ॥ १७. त्रोटितवान् ॥ १८. *विस्माययन् मनः* हे. ॥ १९. *सज्जयित्वाऽथ* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाद्यप्रकारमाश्रित्य सकलं निष्कलं च सः । रागं प्रपञ्चयामास विपञ्च्यां[1] श्रवणामृतम् ॥१८३॥
साऽ**नङ्गसुन्दरी** सा च पर्षदुत्कर्षहर्षभाक् । [2]आलेख्यलिखितेवाऽस्थाद् गीतहार्या मृगा अपि ॥१८४॥
तद्वीणागीतमाकर्ण्य दध्यौ सा राजकन्यका । ईदृशं गुणवत् पात्रं देवानामपि दुर्लभम् ॥१८५॥
निरर्थकं किं च मम जन्माऽपि ह्यनया विना । शोभते पुष्पदाम्नैव प्रतिमा सकलाऽपि हि ॥१८६॥
तस्या अवसरप्राप्तमन्यास्वपि कलासु सः । प्रावीण्यं दर्शयामास तन्मनोवित्ततस्करः ॥१८७॥
**वीरभद्रः** स्वानुरक्तां विज्ञायाऽ**नङ्गसुन्दरीम्** । अन्यदा श्रेष्ठिनं **शङ्खं** रहस्येवमवोचत ॥१८८॥
पृष्ठतो **विनयवत्या**स्तात! प्रत्यहमप्यहम् । गच्छाम्य**नङ्गसुन्दर्याः** पार्श्वे युवतिवेषभृत् ॥१८९॥
तद्युष्माभिर्न भेतव्यं करिष्येऽहं यथा तथा । न कोऽप्यनर्थो भावी वो भावि प्रत्युत गौरवम् ॥१९०॥
मह्यं दातुं निजां [3]कन्यां चेद्वः प्रार्थयते नृपः । तदादौ नाऽनुमन्तव्यं मान्यमत्याग्रहे सति ॥१९१॥
श्रेष्ठ्यपि व्याजहारैवं त्वं वेत्स्यभ्यधिको धिया । एकं तु ब्रूमहे वत्स! कार्यं कुशलमात्मनः ॥१९२॥
**वीरभद्रः** प्रत्युवाच विमनास्तात! मा स्म भूः । पश्याऽचिरा[4]च्छुभोदर्कं स्वसूनोः [5]कर्म शोभनम् ॥१९३॥
वत्स!वेत्सि त्वमित्युक्त्वा स श्रेष्ठी मौनमाश्रयत् । **रत्नाकर**[6]नृपास्थाने वार्तेति च तदाऽभवत् ॥१९४॥
¶**ताम्रलिप्त्याः** कश्चिदागाच्छ**ङ्ख**श्रेष्ठिगृहे युवा । पुरे कलाभिश्चित्राभिर[7]चित्रीयत सोऽन्वहम् ॥१९५॥
तस्य वैदेशिकत्वाच्च ज्ञातिर्विज्ञायते न हि । महाकुलोत्पन्न इति व्याचष्टे तु तदाकृतिः ॥१९६॥
अथेत्थं नृपतिर्दध्यौ युवाऽयं रूपमन्मथः । सदाचारः सदाकारः कलारत्नाकरः सुधीः ॥१९७॥
अनुरूपो मद्दुहित्रे यद्ययं रोचते वरः । न [8]ह्यवद्यं तदा [9]धातुर्युक्तसम्बन्धकारिणः ॥१९८॥
¶**वीरभद्र**स्तदाऽवोचद् विजनेऽ**नङ्गसुन्दरीम्** । इयत्यामपि सामग्र्यां किं भोगविमुखा सखि! ? ॥१९९॥
**अनङ्गसुन्दरी**त्यूचे भोगाः कस्य न वल्लभाः ? । वल्लभो दुर्लभः किन्तु स्वानुरूपः कुलोद्भवः ॥२००॥
वरं मणिः केवलैव न तु [10]काचाङ्गुलीयगा । वरं [11]सरिज्जलरिक्ता न तु [12]यादःसमाकुला ॥२०१॥
शून्यैव वरं शाला न तु तस्करपूरिता । अद्रुमैव वरं [13]वाटी विषद्रुममयी न तु ॥२०२॥
[14]अनुदूढा वरं नारी रूपयौवनवत्यपि । [15]निष्कलेनाऽकुलीनेन न तु पत्या विडम्बिता ॥२०३॥त्रिभिर्विशेषकम्॥
न हीयत्कालमद्राक्षमनुरूपं वरं सखि! । वरमल्पगुणं [16]वृत्वा कथं स्यां हास्यभाजनम् ? ॥२०४॥
**वीरभद्रो**ऽब्रवीदेवमनुरूपो वरो [17]वरः । मम नाऽस्तीति [18]मा वादी'र्बहुरत्ना हि [19]'भू'रियम् ॥२०५॥
अनुरूपं वरं किं तेऽद्यैव सम्पादयाम्यहम् ? । [20]अरोचकिनि! भोगास्ते रोचिष्यन्ते परं न हि ॥२०६॥
जगदेऽ**नङ्गसुन्दर्या**ऽप्येवमाशाप्रदानतः । किं कर्षयसि मे जिह्वामथ मिथ्या वदस्यदः ? ॥२०७॥
[21]यद्यमिथ्या दर्शय त्वमनुरूपं वरं ततः । कला-यौवन-रूपादि कृतार्थं मे यथा भवेत् ॥२०८॥
**वीरभद्र**स्तयेत्युक्तो निजरूपमदीदृशत् । साऽप्यूचे त्वदधीनाऽस्मि तर्ह्यहं त्वं पतिर्मम ॥२०९॥
अथ सोऽवोचदस्त्वेवं माऽपवादः स्म भूदिति । एष्याम्यतः परं नेह विज्ञप्यस्तत्त्वया नृपः ॥२१०॥
यथा[22]ऽयं श्रेष्ठिनं **शङ्खं** सो[23]परोधं वदत्यदः । **अनङ्गसुन्दरी वीरभद्राय** प्रतिगृह्यताम् ॥२११॥
आमित्युक्ते तया **वीरभद्रो** निजगृहं ययौ । आहूय जननीं सद्यः साऽपि चैवमवोचत ॥२१२॥
¶अनुरूपवराभावात् पित्रोः खेदाय केवलम् । अभूवमहमम्बेयत्कालं शल्यमिवोरसि ॥२१३॥
कला-रूपादिभिः स्वस्याऽनुरूपोऽस्ति निरूपितः । **वीरभद्राभिधः शङ्खश्रेष्ठि**सूनुर्मया वरः ॥२१४॥
अद्यैव देहि मां तस्मै ततो विज्ञप्यतां स्वयम् । [24]तत् तातः श्रेष्ठिनं **शङ्खं** मदर्थेऽर्थयते यथा ॥२१५॥

१. वीणायाम् ॥ २. चित्रस्था इव ॥ ३. ***चेद्वः सुतां*** ला. ॥ ४. शुभपरिणामम् ॥ ५. कार्यम् ॥ ६. नृपसभायाम् ॥ ७. आश्चर्यमकरोत् ॥ ८. दोषः ॥ ९. ब्रह्मणः ॥ १०. काचस्याऽङ्गुलीये वर्तिनीति मणिविशेषणम् ॥ ११. *सरित् रिक्तजला* हे. ॥ १२. जलजन्तुव्याप्ता ॥ १३. उपवनम् ॥ १४. अपरिणीता ॥ १५. कलारहितेन ॥ १६. *वृत्ता* ला. ॥ १७. श्रेष्ठः ॥ १८. *नाऽवादी* हे. ला. विना सर्वत्र ॥ १९. *वसुन्धरा* ला. ॥ २०. हे अरुचिमति! 'अरोचक'रोगग्रस्ते! ॥ २१. सत्यम् ॥ २२. नृपः ॥ २३. साग्रहम् ॥ २४. *तं* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा मुदिता राज्ञी नृपं गत्वैवमभ्यधात् । दिष्ट्याऽद्य वर्धसे वत्सानुरूपवरलाभतः ॥२१६॥
स्वयं ह्यन**ङ्गसुन्दर्या** स्वानुरूपः परीक्षितः । **शङ्ख**श्रेष्ठिसुतो **वीरभद्रो** नाम वरो युवा ॥२१७॥
राजाऽप्यूचे चिन्तयतो ममेदमिति वादिनी । चिन्तामणिरि[1]वाऽऽगास्त्वं कामधेनुरिवाऽथवा ॥२१८॥
स्थैर्यं दाक्ष्यं च वत्साया अहो! वरपरीक्षणे । इयत्कालमपि स्थित्वा यद् वव्रे वर ईदृशः ॥२१९॥
सद्योऽप्याह्वायितो राज्ञा ब[2]ह्वीश्वरवणिग्वृतः । **शङ्ख**श्रेष्ठ्यायया‍ौ तत्र राजानं प्रणनाम च ॥२२०॥
¶ततश्च श्रेष्ठिनं **शङ्ख**मित्यभाषिष्ट भूपतिः । कोऽप्यायात**स्ताम्रलिप्त्या** युवाऽस्ति तव वेश्मनि ॥२२१॥
स श्रूयते च सकलकलाजलधिपारगः । अद्वैतरूपसौन्दर्यो वर्यो गुणगणेन च ॥२२२॥
**शङ्खो**ऽप्युवाच देवैवं गुणान् वेत्ति जनः पुनः । राजाऽपि व्याजहाराऽथ स त्वदाज्ञावशे न वा ? ॥२२३॥
**शङ्ख**श्रेष्ठ्यप्यभाषिष्ट स्वामिन्! किमिदमुच्यते ? । तस्यैव हि गुणक्रीतो वशवर्ती जनोऽखिलः ॥२२४॥
अभ्यधाद् भूपतिर्भूयस्तत्कृते**ऽनङ्गसुन्दरी** । अद्यैव गृह्यतां श्रेष्ठिंश्चिराद्योगोऽस्तु योग्ययोः ॥२२५॥
श्रेष्ठ्यूचे त्वं हि नः स्वामी पाल्यास्तव वयं प्रजाः । सम्बन्धश्च सखित्वं च समयोरेव शोभते ॥२२६॥
राजाऽपीत्यादिशत् किं मां प्रत्यादिशसि भ[3]ङ्गितः ? । कुर्वाज्ञां मे निर्विचारं गत्वा सज्जीभव द्रुतम् ॥२२७॥
[4]आदृत्य **शङ्खो** राजाज्ञामुपेत्य च निजे गृहे । आचख्यौ **वीरभद्राय** तत्सर्वं राजशासनम् ॥२२८॥
**अनङ्गसुन्दरी-वीरभद्र**योर्ववृते ततः । महाविभूत्या वी[5]वाहः शुभे लग्ने शुभे दिने ॥२२९॥
परस्परं तयो प्रीतिरवर्धत दिने दिने । [6]सा स्यात् स्वयंवरवधू-वरयोर्ह्युत्तरोत्तरा ॥२३०॥
जैनं धर्मं दिशन् **वीरभद्र**स्तां श्राविकां व्यधात् । आस्तामत्र सतां सङ्गः परलोकेऽपि शर्मणे ॥२३१॥
पटेऽर्हत्प्रतिमां सङ्घं चतुर्विधमपि स्वयम् । स लिखित्वाऽऽपर्यत् तस्यै सम्यग[7]ज्ञापयच्च ताम् ॥२३२॥
¶**वीरभद्रो**ऽन्यदा दध्यौ मयि स्निग्धेयमीक्ष्यते । स्त्रीणां प्रकृतिलोलानां परं स्थैर्ये न निश्चयः ॥२३३॥
भवत्वाशयमेतस्या ज्ञास्यामीति विमृश्य सः । वै[8]दग्ध्यसुन्दरोऽऽ**नङ्गसुन्दरी**मित्यभाषत ॥२३४॥
त्वत्तः प्रियतमे! किञ्चिदन्यत् प्रियतमं न मे । स्वदेशगमनायाऽहं त्वामापृच्छे तथाऽपि हि ॥२३५॥
यतश्चिरं मत्पितरौ मद्वियोगकदर्थितौ । अतीव दुःखमासाते तद्गत्वाऽऽश्वासयामि तौ ॥२३६॥
इहैव तिष्ठेः सुभ्रु! त्वं भूयोऽप्येष्याम्यहं द्रुतम् । न खलु त्वां विनाऽन्यत्राऽहमपि स्थातुमीश्वरः ॥२३७॥
साऽप्युवाच म्लानमुखी त्वयेदं साधु जल्पितम् । यत्राऽऽकर्णितमात्रेऽपि यि[9]यासन्तीव मे[10]ऽसवः ॥२३८॥
ज्ञातं कठिनचित्तोऽसि य एवं वक्तुमीश्वरः । त्वादृशी यद्यहमपि तदा स्यां श्रोतुमीश्वरा ॥२३९॥
**वीरभद्र**स्तयेत्युक्तोऽब्रवीन्मा स्म कुपः प्रिये! । सहैव नयनोपायश्चिन्तितोऽयं मया तव ॥२४०॥
आपप्रच्छे सनिर्बन्धं **वीरभद्र**स्ततो नृपम् । सहैवाऽऽ**नङ्गसुन्दर्या** स्वदेशगमनं प्रति ॥२४१॥
कथञ्चिद् व्यसृजद् राजा **वीरभद्रं** प्रियान्वितम् । पुत्री-जामातृविरहः प्रायः कस्य न दुःसहः ? ॥२४२॥
पोतारूढौ ततस्तौ तु चेलतुर्जलवर्त्मना । गतिः साहसिकानां हि समा स्थल-जलाध्वनोः ॥२४३॥
[11]पत्रीव कार्मुकोन्मुक्तो नीडोत्थित इवाऽ[12]ण्डजः । प्रससार ततः पोतोऽनु[13]कूलमरुदीरितः ॥२४४॥
कियन्तमपि चाऽध्वानं स पोतो यावदभ्यगात् । तावद्ववौ महावायुः कल्पान्तानिलसन्निभः ॥२४५॥
कल्पान्त इव पाथोधिरुद्भ्रमन्नतिभीषणः । पोतमुच्छालयामास तृणपूलमिव द्विपः ॥२४६॥
मुहुरुच्छाल्यमानः सन् भ्रामं भ्रामं त्रि[14]वासरीम् । [15]ग्रावोपरि [16]परिभ्रष्टाण्डजाण्डमिव चाऽस्फुटत् ॥२४७॥
पोते स्फुटितमात्रेऽपि **सम्प्रापाऽनङ्गसुन्दरी** । एकं तदीयफलकं मृत्युर्नाऽत्रुटितायुषः ॥२४८॥

१. ०*मणिरिवासि त्वं* ला. ॥ २. बहुभिरीश्वरैः-समृद्धैर्वणिग्भिर्वृतः ॥ ३. वचनरचनया ॥ ४. अङ्गीकृत्य ॥ ५. *विवाहः* मु. ॥ ६. प्रीतिः ॥ ७. बोधयामास ॥ ८. वैदग्ध्यं-पाण्डित्यं तेन सुन्दरः ॥ ९. यातुमिच्छन्ति ॥ १०. प्राणाः ॥ ११. बाण इव ॥ १२. पक्षी ॥ १३. अनुकूलवायुप्रेरितः ॥ १४. त्रयाणां वासराणां दिनानां समाहारस्ताम् ॥ १५. दृषदुपरि ॥ १६. परिभ्रष्टं यदण्डजस्य-पक्षिणोऽण्डं तदिव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उल्लाल्यमाना कल्लोलैर्हंसीवाऽ**नङ्गसुन्दरी** । प्रपेदे पञ्चरात्रेण तटमेकं वनाकुलम् ॥२४९॥
स्वबान्धववियोगेन विदेशगमनेन च । प्रियस्य विप्रयोगेण भङ्गेन वहनस्य[२] च ॥२५०॥
धनक्षयेण कल्लोलास्फालनेन क्षुधाऽपि च । तृषा च विधुरा वारिमानुषीव[२] जलाद्बहिः ॥२५१॥
अपसञ्ज्ञेव[३] पतिता निसर्गकरुणाजुषा । सा तापसकुमारेण ददृशेऽत्यार्द्रया दृशा ॥२५२॥त्रिभिर्विशेषकम्॥
तामुत्थाप्याऽऽश्रमपदे सोऽनैषीद्भगिनीमिव । विश्रब्धा पुत्रि! तिष्ठेहेत्यूचे कुलपतिश्च ताम् ॥२५३॥
पाल्यमाना तापसीभिर्दिनैः कतिपयैरपि । समजायत सा स्वस्था स्थिता पितुरिवौकसि ॥२५४॥
तस्याः कुलपती रूपातिशयादित्यचिन्तयत् । अत्रस्थेयं तापसानां स्यात् समाधिच्छिदे ध्रुवम् ॥२५५॥
ततस्तापसवृद्धस्तामित्यूचेऽ**नङ्गसुन्दरीम्** । इतोऽस्त्यदूरतो वत्से! **पद्मिनीखण्ड**पत्तनम् ॥२५६॥
वसन्ति सन्तः प्रायेण जनास्तत्र महाधनाः । भवत्यास्तत्र तिष्ठन्त्याः स्वास्थ्यमुत्पत्स्यतेतमाम् ॥२५७॥
अवश्यं तत्र भावी ते भर्त्रा च सह सङ्गमः । तत् तत्र गच्छ वत्से! त्वं जरद्भिस्तापसैः[४] समम् ॥२५८॥
इत्याज्ञया कुलपतेः सा जरत्तापसैर्वृता । हंसीव पद्मिनीखण्डं **पद्मिनीखण्ड**मभ्यगात् ॥२५९॥
पुरे प्रवेशो नाऽस्माकमर्ह इत्यभिधाय ताम् । पुराद्बहिरपि त्यक्त्वा जग्मुर्व्यावृत्य तापसाः ॥२६०॥
विदधाना दिवं दृष्टिपातैः सकुमुदामिव । वीक्षमाणा दिशो यूथपरिभ्रष्टैणिकेव[५] सा ॥२६१॥
कायचिन्तार्थमायान्तीं[६] व्रतिनीभिः समावृताम् । गणिनीं **सुव्रता**[७]नाम्नीं ददर्शाऽम्बां निजामिव ॥२६२॥युग्मम्॥
सस्मार च यदेतास्ताः पत्या मे निजपाणिना । अनवद्या[८] जगद्वन्द्या लिखित्वा दर्शिताः पटे ॥२६३॥
इति संस्मृत्य सा पूर्वाभ्यस्तेन विधिना द्रुतम् । उपेत्य **सुव्रता**पादान् ववन्दे व्रतिनीश्च ताः ॥२६४॥
**सिंहलद्वीप**चैत्यानि मातर्वन्दस्व मद्गिरा । रचिताञ्जलिरित्यूचे **सुव्रतां** तां महाव्रताम् ॥२६५॥
**सुव्रता**ऽप्यभ्यधत्तैवं **सिंहला**दागताऽसि किम् ? । कथमेकाकिनी ? नैषा ह्याकृतिर्निष्परिच्छदा[९] ॥२६६॥
सर्वं सुस्था कथयिष्याम्येवमुक्त्वा तया सह । **सुव्रता**गणिनी शीघ्रं जगाम स्वं प्रतिश्रयम्[१०] ॥२६७॥
वन्दमाना साऽथ साध्वीरसाधारणभक्तितः । **प्रियदर्शन**या तत्र दृष्टा च सुतया तव ॥२६८॥
पृष्टा च सा **सुव्रत**या **प्रियदर्शन**याऽपि च । **सुव्रता**[११]दर्शनप्रान्तमाख्यद् वृत्तान्तमात्मनः ॥२६९॥
**प्रियदर्शन**या सोचे **वीरभद्र**स्य सुन्दरि! । सर्वं कलादि संवादि[१२] वर्णेन स तु कीदृशः ? ॥२७०॥
तया चोक्ते श्याम इति जगाद **प्रियदर्शना** । विसंवदति मद्भर्तुरेको वर्णस्तु वर्णिनि![१३] ॥२७१॥
गणिन्युवाच ते धर्मस्वसेयं **प्रियदर्शना** । वत्से! सहाऽनया तिष्ठ धर्मानुष्ठानतत्परा ॥२७२॥
एवं **सुव्रत**या चोक्ता **प्रियदर्शनया**ऽपि च । दर्शितात्यन्तवात्सल्या[१४]ऽस्थात् तत्राऽ**नङ्गसुन्दरी** ॥२७३॥
¶इतश्च **वीरभद्रो**ऽपि भग्ने प्रवहणे तदा । एकस्मिन् फलके लग्नस्ताड्यमानो महोर्मिभिः ॥२७४॥
**रतिवल्लभ**सञ्ज्ञेन विद्याधरवरेण सः । सप्तमे दिवसेऽदर्शि निन्ये **वैताढ्य**मूर्ध्नि च ॥२७५॥
स्ववल्लभाया **मदनमञ्जुका**याश्च सोऽर्पितः । पुत्रत्वेन स्वयं तेनाऽपुत्रेण परया मुदा ॥२७६॥
ताभ्यां पृष्टश्च सोऽम्भोधिपातवृत्तान्तमादितः । आत्मनः सकलत्रस्य कथयित्वैवमब्रवीत् ॥२७७॥
अहं तात! त्वयाऽऽकृष्टो यमास्यादिव[१५] सागरात् । कथं सा वर्ततेऽ**नङ्गसुन्दरी**ति न वेद्मि तु ॥२७८॥
**आभोगिन्या** विद्यया च ज्ञात्वाऽऽख्यद् **रतिवल्लभः** । वल्लभे भवतोऽ**नङ्गसुन्दरी-प्रियदर्शने** ॥२७९॥
पत्तने **पद्मिनीखण्डे सुव्रता**याः प्रतिश्रये । धर्मानुष्ठाननिरते भगिन्याविव तिष्ठतः ॥२८०॥युग्मम्॥
उभयोरपि पत्न्योस्तु तया कल्याणवार्तया । सर्वाङ्गीणं सिक्त इव सुधया श्वसिति स्म सः ॥२८१॥

१. यानपात्रस्य ॥ २. जलसुन्दरीव ॥ ३. मूर्च्छिता ॥ ४. वृद्धैः ॥ ५. मृगीव ॥ ६. स्थण्डिलार्थम् ॥ ७. ***सुव्रतां नाम*** ला. हे. ॥ ८. निर्दोषाः ॥ ९. एषा परिवाररहिता न स्यादित्येवं तव आकृतिः सूचयति ॥ १०. उपाश्रयम् ॥ ११. सुव्रतादर्शनपर्यन्तम् ॥ १२. यथार्थम् ॥ १३. हे रूपवति! ॥ १४. ***दर्शनात्यन्त०*** मु. ॥ १५. यममुखात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्धेरुत्तीर्णमात्रोऽपि गुटिकां श्यामकारिणीम् । सोऽपनीयाऽऽददे वर्णं सहजं **गौर**लक्षणम् ॥२८२॥
**वज्रवेगवती**कुक्षिभवां दुहितरं निजाम् । **रत्नप्रभा**ख्यां तेनोदवाहयद् **रतिवल्लभः** ॥२८३॥
[1]**बुद्धदास** इति नामाऽऽत्मीयं तत्र[2] शशंस सः । समं च **रत्नप्रभ**याऽन्वभूद्वैषयिकं सुखम् ॥२८४॥
¶सम्भूय गच्छतो विद्याधरान् सोऽन्येद्युरैक्षत । क्वैते वेगेन गच्छन्तीत्यपृच्छच्च निजां प्रियाम् ॥२८५॥
आख्यद् **रत्नप्रभा**ऽप्येवमत्राऽद्रौ शाश्वतार्हताम् । यात्रां कर्तुं प्रयान्त्येते वेगाद्विद्याधराः प्रिय! ॥२८६॥
एवमाकर्ण्य स श्राद्धो **बुद्धदासा**भिधः सुधीः । **वैताढ्य**शैलशिखरमारुरोह तया सह ॥२८७॥
ववन्दे तत्र चैत्यानि[3] स भक्त्या शाश्वतार्हताम्[4] । देवाग्रे गीत-नृत्तादि चक्रे **रत्नप्रभा**ऽपि च ॥२८८॥
सोऽथाऽब्रवीदपूर्वोऽयं देवो मम यतः प्रिये! । **सिंहलद्वीप**वास्यस्मि **बुद्धो**ऽस्मत्कुलदेवता ॥२८९॥
साऽप्यूचे नाथ! तेनैव हेतुना निगदस्यदः । अपूर्वो मम देवोऽयं देवदेवो ह्ययं प्रभुः ॥२९०॥
सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥२९१॥
देवा न **बुद्ध-ब्रह्मा**द्याः संसारावर्तपातिनः । स्वस्य मोहादि[5]पिशुनमक्षसूत्रादि बिभ्रतः ॥२९२॥
ततो विचित्रक्रीडाभिः क्रीडतोरन्वहं तयोः । कियानपि ययौ कालः रतिसागरमग्नयोः ॥२९३॥
¶सोऽन्यदोचे निशाशेषे प्रिये! **रत्नप्रभे**ऽचिरात् । दक्षिणे **भरतार्धे**ऽद्य गच्छामः क्रीडितुं सुखम् ॥२९४॥
आमेत्युक्तवती सा च स च द्वावपि विद्यया । जग्मतुः **पद्मिनीखण्डे सुव्रता**याः प्रतिश्रयम् ॥२९५॥
स्थित्वा प्रतिश्रयद्वारे **वीरभद्रो** जगाद ताम् । [6]आचम्य यावदायामि तिष्ठेस्तावदिहैव हि ॥२९६॥
इत्युक्त्वाऽल्पां भुवं गत्वा तद्रक्षणकृते पुनः । तस्थौ निलीय तत्रैव राजकीय इव स्पशः[7] ॥२९७॥
साऽप्येकिका[8] क्षणादूर्ध्वं चक्रवाकीव निष्प्रिया । तारं रोदितुमारेभे स्त्रीस्वभावोऽयमीदृशः ॥२९८॥
श्रुत्वा च करुणं शब्दं गणिनी करुणासरित् । स्वयमुद्घाटयामास कपाटौ तां ददर्श च ॥२९९॥
इत्यभ्यधाच्च गणिनी वत्से! का त्वं ? कुतोऽभ्यगाः ? । कथमेकाकिनी चाऽसि ? कुतो हेतोश्च रोदिषि ? ॥३००॥
नत्वा सोवाच **वैताढ्या**त् पत्या सममिहाऽऽगमम् । [10]आचान्त्यै सो गतोऽद्याऽपि चिरयत्येव[11] मे पतिः ॥३०१॥
मुहूर्तमपि स स्थातुं सहते मां विना न हि । आशङ्के कारणं तेन सुमहन् मातरातुरा[12] ॥३०२॥
मन्मानसमवतप्ते[13]नकुलस्थितवत् ततः । अस्मि धारयितुं प्राणानपि सम्प्रत्यलं न हि ॥३०३॥
सानुकम्पं **सुव्रतो**चे मा स्म भैषीः पतिव्रते! । स्वस्था प्रतिश्रये तिष्ठ यावदायाति ते पतिः ॥३०४॥
गणिन्या बोधिता सैवं प्रविवेश प्रतिश्रयम् । जायां स्थाने गतां दृष्ट्वा **वीरभद्रो**ऽप्यपासरत् ॥३०५॥
स्वेच्छावामनरूपः स क्रीडया पर्यटन् पुरे । मनो जहार पौराणां विचित्रा दर्शयन् कलाः ॥३०६॥
¶सोऽथ राजान**मीशानचन्द्र**मप्यत्यरञ्जयत् । एकाऽपि हि हरेच्चित्तं किं पुनः सकलाः कलाः ? ॥३०७॥
साऽपि चाऽ**नङ्गसुन्दर्या प्रियदर्शन**याऽपि च । **रत्नप्रभै**वं जगदे कीदृशः कश्च ते पतिः ? ॥३०८॥
[14]साऽऽख्यत् **सिंहल**वास्तव्यो गौरोऽखिलकलानिधिः । **बुद्धदासा**भिधानश्च भर्ता रूपस्मरो[15] मम ॥३०९॥
**प्रियदर्शन**याऽथोचे संवदत्येव मे पतिः । न तु **सिंहल**वासित्वं **बुद्धदासा**भिधा न च ॥३१०॥
ऊचे चाऽ**नङ्गसुन्दर्या** वर्णः **सिंहल**वासिता । **बुद्धदासा**भिधा चेति विसंवदति[16] मत्पतेः ॥३११॥
भगिन्य इव तिस्रोऽपि तपःस्वाध्यायतत्पराः । पुंवार्तामप्यकुर्वन्त्यः सन्ति तास्तत्प्रतिश्रये ॥३१२॥
तिस्रोऽपि प्रेयसीस्तत्र स मायावामनो[17]ऽन्वहम् । निरीक्षते मोदते च तासां शीलेन हारिणा[18] ॥३१३॥
¶अन्यदेशानचन्द्रस्य राज्ञः पर्षद्यभूत् कथा । पुरे यदस्मिन्नार्यायाः **सुव्रता**याः प्रतिश्रये ॥३१४॥

१. ***बुद्धिदास इति*** हे. ला. ॥ २. ***तत्राऽऽशशंस*** मु. ॥ ३. ***चैत्यान्तः*** मु. पा. खंता. विना ॥ ४. ***शाश्वतार्हतः*** मु. खंता. विना ॥ ५. मोहादिसूचकम् ॥ ६. जलपानं कृत्वा प्रक्षाल्य वा ॥ ७. गूढचरः ॥ ८. एकैव एकिका ॥ ९. क्षणानन्तरम् ॥ १०. आचमनाय ॥ ११. विलम्बं करोति ॥ १२. चिन्तिता ॥ १३. अवतप्ते अत्युष्णे भाजने नकुलस्य स्थितं-स्थितिः इव ॥ १४. ***साऽऽख्यात्*** खंता. ॥ १५. रूपेण कामदेवः ॥ १६. एतावद्भिन्नत्वमन्यत् सर्वं कलादिकं समानमित्यर्थः ॥ १७. मायया वामनरूपधरः इत्यर्थः ॥ १८. मनोहारिणा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपवत्यो युवतयस्तिस्रः सन्ति महात्मिकाः। तस्यास्त्रीणीव रत्नानि [1]धात्रीपावित्र्यकारणम् ॥३१५॥ [युग्मम्]
[2]सतीमतल्लिकास्ताश्च [3]सतीः पथि कुलोचिते। न हि कश्चिदलम्भूष्णुरपि भाषयितुं पुमान् ॥३१६॥
स मायावामनोऽथोचे भाषयिष्याम्यहं क्रमात्। मम पश्यत सामर्थ्यं कर्मण्यत्राऽपि दुष्करे ॥३१७॥
प्रधानै राजपुरुषैर्वृतः कतिपयैरपि। पौरैरन्वीयमानोऽगात् स गणिन्याः प्रतिश्रयम् ॥३१८॥
स्थित्वा प्रतिश्रयद्वारे सोऽ[4]शात् सहचरानिति। प्रष्टव्यं तत्र युष्माभिः कथां कथय कामपि ॥३१९॥
स [5]विविक्तपरीवारः प्राविशत् तं प्रतिश्रयम्। ववन्दे **सुव्रता**मन्या व्रतिनीश्चाऽमलव्रताः ॥३२०॥
निर्गत्योपाविशद् द्वारमण्डपे कूटवामनः। तिस्रोऽप्येयुः [6]सव्रतिन्यस्तास्तद्दर्शनकौतुकात् ॥३२१॥
अथोचे वामनो या[7]वद् राज्ञोऽनवसरः किल। स्थास्यामस्तावदत्रैव विनोदाक्षिप्तचेतसः ॥३२२॥
स्माऽऽह राजपुमान् कश्चित् कथां शंस सकौतुकाम्। किं कथां वृत्तकमथ वच्मीत्यूचे च वामनः ॥३२३॥
कथा-वृत्तकभेदं तु पृष्टः प्रोवाच वामनः। वृत्तकं स्यादनुभूतं प्राक्पुंसां चरितं कथा ॥३२४॥
¶वृत्तकं कथ्यतां तर्हीत्युक्ते वामनकोऽवदत्। अस्तीह **भरते** नाम्ना **ताम्रलिप्ती** महापुरी ॥३२५॥
तस्या**मृषभदत्तो**ऽस्ति श्रेष्ठी श्रेष्ठतरो गुणैः। वाणिज्यया सोऽन्यदाऽगात् **पद्मिनीखण्ड**पत्तनम् ॥३२६॥
तत्र **सागरदत्तस्य** कन्यकां **प्रियदर्शनाम्**। दृष्ट्वोदवाहयत् स्वेन **वीरभद्रे**ण सूनुना ॥३२७॥
सार्धं तया **वीरभद्रो**ऽन्वभूद्वैषयिकं सुखम्। निशीथेऽलीकसुप्तां तामुदस्थापयदन्यदा ॥३२८॥
मा कदर्थय मां जातशिरोऽर्तिमिति साऽवदत्। किं[8]दोषेणेति तेनोक्ते त्वद्दोषेणेति साऽवदत् ॥३२९॥
स्वं दोषं तेन सा पृष्टा जगाद **प्रियदर्शना**। किमीदृशेऽपि समये विदग्धोक्तिस्तव प्रिय! ? ॥३३०॥
भूयो नैव करिष्यामीत्युक्त्वा सोऽरमयच्च ताम्। सद्भावसुप्तां मुक्त्वाऽथ विदेशं तत्पतिर्ययौ ॥३३१॥
आख्यायैवं वामनस्तु मम राजकुलेऽधुना। सेवाक्षणोऽतियातीति समुत्तस्थौ ससंभ्रमः ॥३३२॥
**प्रियदर्शन**योत्तिष्ठन् स भूयोऽभाषि सादरम्। क्व गतो **वीरभद्रो**ऽस्ति ? ब्रूहि वेत्स्येव वामन! ॥३३३॥
व्याहरद् वामनोऽप्येवं नाऽहं [9]परमहेलया। सहाऽऽलपामि स्वकुलकलङ्कचकितः सदा ॥३३४॥
साऽप्युवाच कुलार्हं हि तव शीलं किमुच्यते ?। दाक्षिण्याच्छं[10]सतस्तद्धि कुलीनस्याऽऽदिमो गुणः ॥३३५॥
तर्हि श्वः शंसिताऽस्मीति गदित्वा वामनो ययौ। [11]स्वैराख्याते तदुदन्ते नरेन्द्रोऽपि विसिष्मिये ॥३३६॥
¶द्वितीयेऽह्नि तथैवाऽगात् स गणिन्याः प्रतिश्रयम्। अत्यादृतानां तासां च भूयोऽप्याख्यत् कथामिति ॥३३७॥
पुर्या निर्याय भूत्वा च कृष्णो गुटिकयाऽथ सः। पर्यटन् विविधान् देशान् **सिंहलद्वीप**मासदत् ॥३३८॥
तत्र **रत्नपुरे** श्रेष्ठि**शङ्खह**ट्टे निषेदिवान्। श्रेष्ठिना ज्ञातवृत्तान्तो निन्ये च निजवेश्मनि ॥३३९॥
पुत्रत्वेन प्रत्यपादि श्रेष्ठिश्रेष्ठेन तेन सः। सुखं चाऽस्थात् पुरे तत्र कलाभिः कृतविस्मयः ॥३४०॥
समं **विनयवत्या** च श्रेष्ठिपुत्र्या जगाम सः। स्त्रीवेषोऽ**नङ्गसुन्दर्या** राजपुत्र्या निकेतने ॥३४१॥
कलाभिर्हृतचित्तां तां ज्ञापितात्मा क्रमेण सः। पितृदत्तामुपायंस्त चिरं भोगानभुङ्क्त च ॥३४२॥
तां गृहीत्वा गच्छतश्च **ताम्रलिप्तीं** पुरीं प्रति। भग्नं प्रवहणं तस्य दै[12]वादाशेव वारिधौ ॥३४३॥
सम्प्रत्यहं व्रजिष्यामि राजसेवाक्षणो ह्ययम्। सेवकानां विना सेवां भज्यते खलु जीविका ॥३४४॥
ततश्चाऽ**नङ्गसुन्दर्या** सोपरोधमभाणि सः। भद्र! क्व **वीरभद्रो**ऽस्ति सोऽधुनाऽऽख्याहि सर्वथा ॥३४५॥
आख्याताऽस्मि श्व इत्युक्त्वा राजवेश्म जगाम सः। राज्ञे तमपि वृत्तान्तं शशंसू राजपूरुषाः ॥३४६॥
¶तृतीयेऽप्यह्नि तत्रैत्य शशंसेति स वामनः। **वीरभद्र**स्तत्र दैवादेकं फलकमासदत् ॥३४७॥

१. धात्री-पृथ्वी ॥ २. पतिव्रतासु श्रेष्ठाः ॥ ३. वर्तमानाः ॥ ४. उपादिशत् ॥ ५. अल्पपरिवारः ॥ ६. ***ससाध्वीकास्तास्त०*** हे. ॥ ७. ***यावद्राज्ञो नावसरं*** मु., ***यावद्राज्ञोऽनवसरं*** पाता. ला. हे. प्रभृतिषु ॥ ८. कस्य दोषः किंदोषस्तेन ॥ ९. परस्त्रिया; ***परमहिलया*** मु. ॥ १०. कथयतः ॥ ११. आप्तपुरुषैः ॥ १२. ***दैवादत्रैव*** पा. छा., ***दैवात्तत्रैव*** मु. प्रभृतिषु ॥

ततो विद्याधरश्चाऽऽगान्नामतो **रतिवल्लभः**। तं ददर्श च निन्येऽथ **वैताढ्या**द्रौ स्ववेश्मनि ॥३४८॥
अब्धेरुद्वृत्तमात्रोऽपि गुटिकां **श्यामिकाकरीम्**। अपकृष्याऽभवद् गौरस्**ताम्रलिप्त्या**मिव स्थितः ॥३४९॥
स्वं च **सिंहल**वास्तव्यं **बुद्धदासं** च नामतः। पृष्टः शशंस स **रतिवल्लभ**स्याऽतिवल्लभः ॥३५०॥
पुत्रीं **रत्नप्रभा**ख्यां स तेनोक्तः परिणीतवान्। रमयंश्च सुखं तस्थौ विलासोपवनादिषु ॥३५१॥
तया सह क्रीडितुं च सोऽन्यदाऽत्र समाययौ। मुक्त्वेह तामाचमनव्याजाच्चाऽगमदन्यतः ॥३५२॥
यास्याम्यहमपीदानीमित्युक्त्वा स समुत्थितः। ऊचे च **रत्नप्रभया बुद्धदासः** क्व सोऽधुना ? ॥३५३॥
आख्यास्याम्यपरं प्रातरित्युत्थाय जगाम सः। ताश्चैकपतिसंवादात् तिस्रोऽप्युच्चैरुदश्वसन् ॥३५४॥
¶स एष तव जामाता वामनः श्रेष्ठि**सागर**! । रमणस्तिसृणां तासां क्रीडया विरहं ददौ ॥३५५॥
वामनोऽपि जगादैवं वन्दित्वा गणभृद्वरम्। युष्मज्ज्ञानदृशा दृष्टमेवमेतद्धि नाऽन्यथा ॥३५६॥
पूर्णद्वितीयपौरुष्यां **कुम्भो** गणधराग्रणीः। व्यसृजद्देशनां तेषां तावत्कालैव देशना ॥३५७॥
नत्वा गणधरं **कुम्भं** वामनेन सहैव सः। श्रेष्ठी **सागरदत्तो**ऽगान् मुदितस्तं प्रतिश्रयम् ॥३५८॥
¶तास्तं वामनमायान्तं तिस्रोऽपि प्रेक्ष्य तत्क्षणम्। उपाजग्मुः प्रियोदन्ताहरः[१] कस्य न वल्लभः ? ॥३५९॥
ऊचे **सागरदत्तो**ऽपि पतिर्वस्तिसृणामसौ। ताभिश्च कथमित्युक्तस्तदाख्यदखिलं च सः ॥३६०॥
तिस्रोऽपि विस्मयं प्रापुर्गणिन्या सममेव ताः। प्रविश्याऽन्तर्वामनोऽपि वामनत्वं मुमोच तत् ॥३६१॥
यादृशोऽ**नङ्गसुन्दर्या** दृष्टस्तादृगभूत् पुरः। पुनः श्यामत्वमुत्सृज्य गौरत्वं प्रत्यपद्यत ॥३६२॥
सर्वाभिः [२]प्रत्यभिज्ञातः सोत्कण्ठाभिः समादृतः। गणिन्याऽभिदधे चैवं किमेतद्भवता कृतम् ? ॥३६३॥
सोऽप्यभ्यधाद् भगवति! क्रीडया निरगां गृहात्। क्रीडयोपेक्षितस्तासामिहाऽपि विरहो मया ॥३६४॥
**सुव्रता**गणिनी चैवमवोचत् तात्त्विकं वचः। दूरे देशान्तरेऽरण्ये पर्वते वारिधावपि ॥३६५॥
अन्यत्र वा दुःखपदे यान्ति यत्राऽपि धर्मिणः। तत्राऽपि सौख्यमतुलं लभन्ते निजवेश्मवत् ॥३६६॥[युग्मम्]॥
भोगाः सत्पात्रदानानुभावादित्यार्हतं वचः। कस्मै दत्तमनेनेति पृच्छामोऽरजिनेश्वरम् ॥३६७॥
गणिनी **सागरदत्तो वीरभद्रः** प्रियान्वितः। **अर**स्वामिनमभ्येयुः प्रणेमुश्च यथाविधि ॥३६८॥
कर्म भोगफलं **वीरभद्रः** किं प्राग्भवे व्यधात् ? । इति **सुव्रत**या पृष्टो जगाद परमेश्वरः ॥३६९॥
¶इतो भवे तृतीये मे **प्राग्विदेहे**षु पुष्कलम्। राज्यं त्यक्त्वा [३]व्रतभृतः पृथ्व्यां विहरतः सतः ॥३७०॥
चतुर्मासोपवासान्ते पुरे **रत्नपुरा**भिधे। श्रेष्ठिसूर्**जिनदासा**ख्यो भक्त्या भिक्षां ददावसौ ॥३७१॥[युग्मम्]॥
तेन पुण्येन देवोऽभूद् **ब्रह्मलोके** ततश्च्युतः। **जम्बूद्वीप**स्यैर**वते काम्पील्ये**ऽभून् [४]महेभ्यतुक् ॥३७२॥
तत्राऽपि परमर्द्धिः सन् श्रावकत्वं प्रपाल्य च। मृत्वाऽ**च्युते**ऽभवद्देवस्ततश्च्युत्वा त्वभूदसौ ॥३७३॥
पुण्यानुबन्धिना तेन पुण्येनेह भवेऽप्ययम्। भुङ्क्ते भोगान् यत्र तत्र पुण्यं ह्यनुचरं नृणाम् ॥३७४॥
भगवानेवमाख्याय प्रतिबोध्य बहून् जनान्। जगन्मोहमपहरन् विहरन्नन्यतो ययौ ॥३७५॥
भुक्त्वा भोगांश्चिरं **वीरभद्रः** प्रव्रज्य च क्रमात्। दृढपुण्यरथारूढो देवलोकं जगाम सः ॥३७६॥
¶[५]सहस्राण्यथ पञ्चाशच्छ्रमणानां महात्मनाम्। तीव्रव्रतानां [६]साध्वीनां पुनः षष्टिसहस्र्यपि ॥३७७॥
[७]चतुर्दशपूर्वभृतां दशाग्राणि शतानि षट्। [८]अवधिज्ञानभाजां तु द्वे सहस्रे सषट्शते ॥३७८॥
सार्धे सहस्रे द्वे एकपञ्चाशच्च [९]मनोविदाम्। द्वे सहस्रे साष्टशते [१०]केवलज्ञानधारिणाम् ॥३७९॥
[११]जातवैक्रियलब्धीनां त्रिसप्ततिशती पुनः। [१२]सञ्जातवादलब्धीनां सहस्रं षट् शतानि च ॥३८०॥

---

१. प्रियस्य उदन्तं-वृत्तान्तं आहरति-आनयति ॥ २. अवलक्षितः, स एवाऽयमिति ज्ञातः ॥ ३. व्रतं बिभर्ति, तस्य ॥ ४. ***महेभ्यभुक्*** मु.; महेभ्यस्य पुत्रः ॥ ५. श्रमणानां सङ्ख्या ५०सहस्रमिता ॥ ६. साध्वीनां सङ्ख्या ६०सहस्रमिता ॥ ७. चतुर्दशपूर्विणां सङ्ख्या ६१०मिता ॥ ८. अवधिज्ञानिनां सङ्ख्या २६०० मिता ॥ ९. मनःपर्ययज्ञानिनां सङ्ख्या २५५१मिता ॥ १०. केवलज्ञानिनां सङ्ख्या २८००मिता ॥ ११. वैक्रियलब्धीनां सङ्ख्या ७३००मिता ॥ १२. वादलब्धीनां सङ्ख्या १६००मिता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]श्रावकलक्षे षोडशसहस्रोने उभे पुनः । तिस्रो लक्षाः [२]श्राविकाणां द्वासप्ततिसहस्र्यपि ॥३८१॥
आ केवलात्त्रिवर्षोनाब्दसहस्रैकविंशतिम् । वसुन्धरां विहरतः परिवारोऽभवत् प्रभोः ॥३८२॥
निर्वाणकालं ज्ञात्वा च स्वामी **सम्मेत**मभ्यगात् । समं मुनिसहस्रेणाऽनशनं प्रत्यपादि च ॥३८३॥
मासान्ते च मार्गशुद्धदशम्यां **पौ[३]ष्णगे** विधौ । समं तैर्मुनिभिः स्वामी जगाम पदमव्ययम् ॥३८४॥
[४]कौमार-राज्य-चक्रित्व-व्रतेषु समभागकम् । [५]आयुश्चतुरशीत्यब्दसहस्राण्यभवत् प्रभोः ॥३८५॥
[५]वर्षकोटिसहस्रोने [६]पल्यतुर्यांशके गते । श्री**कुन्थु**मोक्षान् मोक्षोऽभूच्छ्रीमतोऽ**र**जिनेशितुः ॥३८६॥

तत्राऽ**रनाथ**स्य मुनीश्वरैस्तैः शिवं सहोपेयुँष एत्य भक्त्या ।
शरीरसंस्कारपुरस्सरं ते निर्वाणकल्याणमकार्षुरिन्द्राः ॥३८७॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे पर्वणि श्री**अरनाथ**[९]चरित-
कीर्तनो नाम द्वितीयः सर्गः॥

१. श्रावकाणां सङ्ख्या १लक्ष८४सहस्रमिता ॥ २. श्राविकाणां सङ्ख्या ३लक्ष७२सहस्रमिता ॥ ३. रेवतीं गते ॥ ४. कौमारे २१सहस्रमितानि वर्षाणि, राज्ये २१सहस्रमितानि वर्षाणि, चक्रित्वे २१सहस्रमितानि वर्षाणि, व्रते २१सहस्रमितानि वर्षाणि ॥ ५. आयुर्वर्षाणि ८४सहस्रमितानि ॥ ६. ***पल्योपमचतुर्भागे वर्षकोट्यूनिते गते ।*** हे. ॥ ७. पल्योपमस्य चतुर्थांशे गते सति ॥ ८. प्राप्तस्य ॥ ९. ***श्रीअरनाथवर्णनो*** मु.प्रभृतिषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥तृतीयः सर्गः॥

## ॥आनन्द-पुरुषपुण्डरीक-बलिचरित्रम्॥

अथ तीर्थेऽ**रनाथस्य** [1]षष्ठयोर्बल-शार्ङ्गिणोः । प्रतिविष्णो**र्बले**श्चाऽभूद्यच्चरित्रं तदुच्यते ॥१॥
पुरेऽभूद् **विजयपुरे** नृपो नाम्ना **सुदर्शनः** । [2]सुदर्शनश्चन्द्र इव जगदानन्ददायकः ॥२॥
मुने**र्दमधरा**ज्जैनं श्रुत्वा धर्मं विरक्तधीः । स प्रव्रज्य तपस्तप्त्वा **सहस्रारे**ऽभवत् सुरः ॥३॥
¶तथेह **भरत**क्षेत्रे **पोतने** नगरे नृपः । **प्रियमित्रो**ऽभवन् [3]मित्राब्जेषु [4]मित्रोदयोपमः ॥४॥
**सुकेतु**स्तत्प्रियां जह्रे विरक्तस्तत्पराभवात् । **वसुभूति**मुनेः पार्श्वे स प्रव्रज्यामुपाददे ॥५॥
प्रियाहरणदुःखार्तः स तेपे दुस्तपं तपः । निदानं चाऽकरोत् पत्नीहारकस्य वधं प्रति ॥६॥
स निदानमनालोच्य विहितानशनो मृतः । समजायत **माहेन्द्रे** कल्पे देवो महर्द्धिकः ॥७॥
[5]इतश्च **वैताढ्य**गिरौ [6]पुरेऽ**रिञ्जय**नामनि । [7]स **सुकेतु**र्भवं भ्रान्त्वा प्रतिविष्णुरभूद् **बलिः** ॥८॥
स पञ्चाशद्वर्षसहस्रायुः [8]श्वेतेतरद्युतिः । षड्विंशतिधनूत्तुङ्गस्त्रिखण्डक्ष्माधरोऽभवत् ॥९॥
¶अथाऽस्य **जम्बूद्वीपस्य भरतार्धे**ऽत्र दक्षिणे । पुरमस्ति **चक्रपुरं** महीमण्डलमण्डनम् ॥१०॥
नाम्ना **महाशिरा** [9]नम्रीकृतराजमहाशिराः । तत्राऽभूदवनीपालो लोकपाल इवाऽपरः ॥११॥
तस्याऽद्भुतचरित्रस्य धात्रीपतिशिरोमणेः । [10]धिषणा विक्रमेणेव श्रीर्विवेकेन भूषिता ॥१२॥
सा काऽपि हि कला नाऽस्ति या तस्मिन्न ह्यदृश्यत । जीवजातिरिवाऽम्भोधौ **स्वयम्भूरमणा**भिधे ॥१३॥
नाऽभूद्वार्ताऽपि चौराणां तस्मिन् शासति मेदिनीम् । केवलं चोरयामास स स्वयं तु सतां मनः ॥१४॥
एकेषां जनयन् प्रीतिमपरेषां पुनर्भयम् । न ह्युत्ततार हृदयात् स सतामसतामपि ॥१५॥
**वैजयन्ती**त्यभूद् रूपाज्जयन्ती स्वर्वधूरपि । तस्य पत्न्यपरा लक्ष्मीरिव **लक्ष्मीवती**ति च ॥१६॥
**सहस्रारा**त् परिच्युत्य **सुदर्शन**वरः सुरः । **वैजयन्त्या** महादेव्या उदरे समवातरत् ॥१७॥
महास्वप्नचतुष्केण बलजन्माभिसूचिना । हृष्टा देवी **वैजयन्ती** दधौ गर्भमनुत्तरम् ॥१८॥
काले च सुषुवे पूर्णे पूर्णचन्द्र इवाऽमलम् । [11]सर्वलक्षणसम्पूर्ण**मानन्द** इति नन्दनम् ॥१९॥
जीवोऽथ **प्रियमित्रस्य** तुर्यकल्पात् परिच्युतः । **लक्ष्मीवत्या** महादेव्याः कुक्षौ समवतीर्णवान् ॥२०॥
सप्तभिश्च महास्वप्नैः [12]सूचितोपेन्द्रजन्मभिः । हृष्टा **लक्ष्मीवती** गर्भं धारयामास देव्यथ ॥२१॥
कालेऽसूत सुतं सा च [13]दैवी [14]देवसमाकृतिम् । अभिधानेन **पुरुषपुण्डरीकं** [15]शितिद्युतिम् ॥२२॥
भ्रातरौ ववृधाते तौ पित्रोः सह मनोरथैः । ताक्ष्यं-[16]तालध्वजौ नील-पीताम्बरधरौ सदा ॥२३॥
कम्पयन्ताविव महीं चेलतुर्लीलयाऽपि तौ । बालावपि न चोद्वोढुमलं तौ [17]बालधारकाः ॥२४॥

---

१. बलदेव-वासुदेवयोः ॥ २. सुष्ठु दर्शनं यस्य सः ॥ ३. मित्राण्येव अब्जानि-कमलानि तेषु ॥ ४. सूर्यः ॥ ५. *इतश्च वैताढ्यगिरौ पुरेऽरिञ्जयनामनि । सूभूमचक्रिणा दत्तश्रेणिद्वितयवैभवः ॥* हे. मु. ॥ *तस्यैव चक्रभृत्पत्न्या नाम्ना पद्मश्रियः पिता । मेघनाद इति ख्यातो विद्याधरनृपोऽभवत् ॥* मु., *तस्यैव च चक्रभृतः पत्न्या पद्मश्रियः पिता । मेघनाद इति ख्यातो विद्याधरनृपोऽभवत् ॥* हे. ॥ ६. *पुरे विजयनामनि* ला., *पुरेऽरिजयनामनि* खंता. ॥ ७. *स सुकेतुर्भवं भ्रान्त्वा जीवस्तत्रैव पत्तने । अन्वये मेघनादस्य प्रतिविष्णुरभूद् बलिः ॥* मु., *सुकेतुजीवोऽपि भवं भ्रान्त्वा तत्रैव पत्तने । अन्वये मेघनादस्य प्रतिविष्णुरभूद् बलिः ॥* हे. ॥ ८. श्यामकान्तिः ॥ ९. नम्रीकृतानि नामितानि राज्ञां महान्ति शिरांसि येन सः ॥ १०. बुद्धिः ॥ ११. *एकोनत्रिंशधन्वोच्चमानन्द इति०* ला. खंता. विना ॥ १२. सूचितवासुदेवजन्मभिः ॥ १३. *०चैकोनत्रिंशद्धनून्नतम्* ला. खंता. विना ॥ १४. *०त्रिंशद्धनून्नतिम्* खंता. ला. मु. विना ॥ १५. श्वेतकान्तिः ॥ १६. *०ताडध्वजौ* खंता.; ताक्ष्यध्वजो वासुदेवः, तालध्वजो बलदेवः ॥ १७. बालरक्षकाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]एकोनत्रिंशि[२]धन्वोच्चौ प्रापतुर्यौवनं क्रमात्। तावशेषकलाम्भोधिपारगौ च बभूवतुः ॥२५॥
**उपेन्द्रसेनो राजेन्द्रपुरे**शोऽथ स्वकन्यकाम्। ददौ **पद्मावतीं** नाम **पुण्डरीका**य विष्णवे ॥२६॥
¶श्रुत्वा रूपश्रिया [३]दासीकृतानङ्गाङ्गनां च ताम्। प्रतिविष्णु**र्बलि**र्नाम हर्तुं तत्र समाययौ ॥२७॥
**बलिं** [४]भुजबलाध्मातम[५]वज्ञातजगद्बलम्। **आनन्द-पुण्डरीका**वप्य[६]भ्यषेणयतां ततः ॥२८॥
शार्ङ्ग-लाङ्गलमुख्यानि तयोः शस्त्राणि नाकिभिः। अर्पयाञ्चक्रिरे [७]शस्त्रागारायुक्तैरिव क्षणात् ॥२९॥
**बले**र्बलैर्बलीयोभिरभज्यत तयोर्बलम्। चक्रिरे सिंहनादांश्च स्वस्वामिजयशंसिनः ॥३०॥
**आनन्दः पुण्डरीक**श्च रथस्थौ रणकर्मणे। डुढौकाते प्रमुदितौ वीराणां हि [९]रणो मुदे ॥३१॥
पाञ्चजन्यं **पुण्डरीक**स्तारमापूरयत् ततः। [१०]यादश्चक्रमिवाऽम्भोधे रणान्नष्टं द्विषद्बलम् ॥३२॥
शार्ङ्गं चाऽऽस्फालयच्छार्ङ्गी शङ्खस्येवाऽनुवादकम्। हतशेषद्विषोऽनश्यंस्तन्निनादेन भूयसा ॥३३॥
उपतस्थे **बलि**र्योद्धुं स्वयमु[११]ल्बणविक्रमः। निरन्तरैः शरैर्वर्षन् धारासारमिवाऽम्बुदैः ॥३४॥
चिच्छेद तदिषून् विष्णुर्विष्णोः सोऽपि तथाऽच्छिदत्। एवं भूयः [१२]शरच्छेदक्रुद्धश्चक्रं **बलि**र्दधौ ॥३५॥
[१३]अरे! न हि भवस्येष इति जल्पन् **बलि**र्ब[१४]ली। भ्रमयित्वाऽमुचच्चक्रं **पुण्डरीका**य विष्णवे ॥३६॥
चपेटालग्नतत्तुम्बप्रहारान् मूर्च्छितः क्षणम्। लब्धसञ्ज्ञः क्षणाद्वि[१५]ष्णुस्तच्चक्रं स्वयमाददे ॥३७॥
अरे! न हि भवस्येष इति जल्प[१६]ञ्जनार्दनः। भ्रमयित्वाऽमुचच्चक्रं चिच्छेद च **बलेः** शिरः ॥३८॥
¶ततश्चाऽ**नन्द**सहितो मथ्नन्नहितभूभुजः। विष्णुश्चकार दिग्यात्रामर्धचक्री बभूव च ॥३९॥
विष्णुरुत्पाटयामास **मगधा**न्तरवस्थिताम्। महाशिलां **कोटिशिलां** तां [१७]तुलाकोटिलीलया ॥४०॥
पञ्चषष्टिसहस्राणि वर्षाणामायुरात्मनः। सोऽतिवाह्य ययौ षष्ठं नरकं स्वोग्रकर्मभिः ॥४१॥
**पुण्डरीक**स्य कौ[१८]मारे सार्धं वर्षशतद्वयम्। तदेव [१९]मण्डलित्वेऽपि दि[२०]ग्जये षष्टिवत्सरी ॥४२॥
[२१]राज्ये संवत्सराणां च चतुःषष्टिसहस्र्यगात्। शतान्यपि च चत्वारि चत्वारिंशच्च वत्सराः ॥४३॥
[२२]पञ्चाशीतिवर्षसहस्रायुरेकोऽ[२३]नुजं विना। **आनन्दो**ऽथ निरानन्दः कथञ्चित् कालमत्यगात् ॥४४॥

सोऽथ स्वस्य भ्रातुरुच्चैर्वियोगात्
वैराग्येणोपात्तदीक्षः **सुमित्रा**त्।
आत्मारामः केवलज्ञानमाप्य
प्राप स्थानं शाश्वतं शर्मधाम ॥४५॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे पर्वणि श्री**आनन्द-पुरुषपुण्डरीक-**
**बलि**चरितकीर्तनो नाम तृतीयः सर्गः॥

१. ***क्रमेण च प्रपेदाते यौवनं नेत्रपावनम्।*** खंता.ला. विना॥ २. ***एकोनत्रिंश०*** ला.; 'डिन्'(सि.७/१/१४७)इति सूत्रेण सिद्धोऽयं प्रयोगः ॥ ३. दासीकृतानङ्गस्य कामस्य अङ्गना रतिर्यया ताम्॥४. भुजबलोद्धतम् ॥ ५. तिरस्कृतं जगतो बलं येन तम्॥ ६. युद्धाय अभ्यगमताम् ॥ ७. शस्त्रशालाधिकारिभिः॥ ८. बलवद्भिः सैन्यैः ॥ ९. युद्धम् ॥ १०. जलचरसमूहः ॥ ११. प्रबलपराक्रमः ॥ १२. स्वशराणां छेदेन क्रुद्धः ॥ १३. ***अरेरे न भवस्येष*** खंता. हे. मु. विना॥ १४. बलवान्॥ १५. पुण्डरीकः ॥ १६. पुण्डरीकः ॥ १७. नुपूरलीलया॥ १८. कौमारे वर्षाणि २५०मितानि॥ १९. मण्डलिकत्वे वर्षाणि २५०मितानि॥ २०. दिग्विजये वर्षाणि ६०मितानि॥ २१. राज्ये वर्षाणि ६४४४०मितानि॥ २२. आयुर्वर्षाणि ८५०००मितानि॥ २३. पुण्डरीकम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥चतुर्थः सर्गः॥

## ॥सुभूमचक्रवर्तिचरित्रम्॥

**अर**तीर्थकृतस्तीर्थे **सुभूम**स्याऽथ चक्रिणः । अष्टमस्य क्रमायातं चरितं कीर्तयिष्यते ॥१॥
इहैव **भरत**क्षेत्रे **विशाल**नगरेऽभवत् । **भूपालो** नाम [१]भूपालः पालयन् क्षत्रियव्रतम् ॥२॥
सोऽन्यदैकत्र सङ्ग्रामे बहुभिः [२]परिपन्थिभिः । एकीभूय पराजिग्ये वृन्दं हि बलवत्तरम् ॥३॥
स वैरिभिः पराभूतोऽपमानमलिनाननः । **सम्भूत**मुनिपादान्ते परिव्रज्यामुपाददे ॥४॥
प्रभुत्वभोगविषयं निदानं तपसोऽथ सः । कृत्वाऽवसानं चाऽऽसाद्य **महाशुक्रे** सुरोऽभवत् ॥५॥
¶[३]इतश्च**र्षभनाथ**स्य **कुरु**रित्यभवत् सुतः । यस्य नाम्ना **कुरुदेशो** [४]**हस्ती** नाम्ना [५]च तत्सुतः ॥६॥
यन्नाम्ना **हास्तिनपुरं** तीर्थकृच्चक्रिजन्मभूः । तद्वंश्यो**ऽनन्तवीर्यो**ऽभूत् तत्र राजा महाभुजः ॥७॥
¶इतश्च **भरत**क्षेत्रे **वसन्तपुर**पत्तने । [६]उच्छिन्नवंश एकोऽभू**दग्निको** नाम दारकः ॥८॥
सोऽन्यदा चलितस्तस्मात् स्थानाद्देशान्तरं प्रति । [७]सार्थाद्धीनः परिभ्राम्यन्नगमत् तापसाश्रमम् ॥९॥
**तमग्निं** तनयत्वेनाऽग्रहीत् [८]कुलपति**र्जमः** । **जमदग्नि**रिति ख्यातिं स लोकेषु ततोऽगमत् ॥१०॥
[९]तप्यमानस्तपस्तीव्रं प्रत्यक्ष इव [१०]पावकः । तेजसा दुःसहेनाऽसौ पप्रथे पृथिवीतले ॥११॥
¶तदा च श्राद्धः [११]प्राग्जन्मनाम्ना **वैश्वानरः** सुरः । **धन्वन्तरि**श्च तापसभक्तो [१२]व्यवदतामिति ॥१२॥
एक आहाऽर्हतां धर्मः प्रमाणमितरः पुनः । तापसानां; विवादेऽस्मिन् व्यधातामिति निर्णयः ॥१३॥
आर्हतेषु जघन्यो यः प्रकृष्टस्तापसेषु यः । परीक्षणीयावावाभ्यां को गुणै[१३]रतिरिच्यते ? ॥१४॥
¶तदानीं **मिथिला**पुर्या [१४]नवधर्मपरिष्कृतः । श्रीमान् **पद्मरथो** नाम प्रस्थितो [१५]पृथिवीतले ॥१५॥
दीक्षां [१६]स **वासुपूज्यान्ते** ग्रहीतुं भावतो यतिः । गच्छंश्च**म्पापुरीं** ताभ्यां देवाभ्यां ददृशे पथि ॥१६॥
परीक्षाकाङ्क्षया ताभ्यां पानान्ने ढौकिते नृपः । तृषितः क्षुधितो[१७]ऽप्यौज्झद्धीराः सत्त्वाच्चलन्ति न ॥१७॥
[१८]क्रकचैरिव चक्राते क्रूरैः [१९]कर्कर-कण्टकैः । पीडां देवौ नृदेवस्य मृदुनोः पादपद्मयोः ॥१८॥
पादाभ्यां प्रक्षरद्रक्तधाराभ्यां तादृशेऽध्वनि । [२०]तूलिकातलवच्चा[२१]रु [२२]सञ्चचार तथाऽपि सः ॥१९॥
निर्ममे गीत-नृत्तादि ताभ्यां क्षोभाय भूपतेः । तन्मोघमभवत् तत्र [२३]दिव्यास्त्रमिव गोत्रजे ॥२०॥
तौ सिद्धपुत्ररूपेण पुरोभूयेदमूचतुः । तवाऽद्याऽपि महाभाग! महदायुर्युवाऽसि च ॥२१॥
स्वच्छन्दं भुङ्क्ष्व तद्भोगान् का [२४]धीर्यद्यौवने तपः ? । [२५]निशीथकृत्यं कः प्रातः कुर्यादुद्योगवानपि ? ॥२२॥
यौवने तदतिक्रान्ते देहदौर्बल्यकारणम् । गृह्णीयास्त्वं तपस्तात! द्वितीयमिव वार्धकम् ॥२३॥
राजोचे यदि बह्वायुर्बहु पुण्यं भविष्यति । [२६]जलमानेन नलिनीनालं हि परिवर्धते ॥२४॥
लोलेन्द्रिये यौवने हि यत् तपस्तत् तपो ननु । दारुणास्त्रे रणे यो हि शूरः शूरः स उच्यते ॥२५॥
¶तस्मिन्नचलिते सत्त्वात् साधु साध्विति वादिनौ । तौ गतौ तापसोत्कृष्टं **जमदग्निं** परीक्षितुम् ॥२६॥

---

१. पृथ्वीपालः ॥ २. शत्रुभिः ॥ ३. 'ध्-७' इमौ द्वौ श्लोकौ लासञ्ज्ञक-हेसञ्ज्ञकप्रत्योर्न स्तः ॥ ४. ***हस्तिनाम्ना*** मु. ॥ ५. ***तु*** खंता. ॥ ६. ***उच्छन्न०*** खंता. ॥ ७. सार्थरहितः ॥ ८. ***कुलपतिर्जनः*** खंता. हे.विना ॥ ९. ***०मानस्तपस्तीक्ष्णं*** मु.विना, खंता. ॥ १०. अग्निः ॥ ११. पूर्वजन्मनोऽभिधानेन ॥ १२. विवादमकुरुताम् ॥ १३. अधिको भवति ॥ १४. नूतनधर्मेण संस्कृतः ॥ १५. ***पृथिवीपतिः*** ला. हे. ॥ १६. ***०श्रीवासु०*** खंता. ॥ १७. ***०प्यौज्झद्धीरा*** मु.; औज्झत्-त्यक्तवान् ॥ १८. करपत्रैः,'करवत' ॥ १९. कर्कराश्च(कांकरा) कण्टकाश्च तैः ॥ २०. ***०तलसञ्चारं*** हे. । तूलिका-'तळाई' इति भाषायाम् ॥ २१. क्रियाविशेषणमेतत् ॥ २२. 'समस्तृतीयया'(सि.३/३/३२) इति प्राप्तेऽप्यात्मनेपदे 'आत्मनेपदमनित्यम्'(न्यायसं० २/३७) इति न्यायमाहात्म्यादत्र परस्मैपदम् ॥ २३. गोत्रीये जने यथा दिव्यमस्त्रं प्रयुक्तमपि न प्रभवति तद्वन्निष्फलम् ॥ २४. बुद्धिः ॥ २५. अर्धरात्रकृत्यम् ॥ २६. वारिणः प्रमाणेन यावज्जलं तावन्नलिन्या नालं वर्धते इत्यर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]न्यग्रोधमिव विस्तारिजटासंस्पृष्टभूतलम्। [२]वल्मीकाकीर्णपादान्तं दान्तं तौ तमपश्यताम्॥२७॥
तस्य श्मश्रुलताजाले नीडं निर्माय मायया। तदैव देवौ [३]चटकमिथुनीभूय तस्थतुः॥२८॥
चटकश्चटकामूचे यास्यामि **हिमवद्गिरौ**। [४]अन्यासक्तो नैष्यसि त्वमिति तं ना[५]ऽन्वमंस्त सा॥२९॥
गोघातपातकेनाऽहं गृह्ये नाऽऽयामि चेत् प्रिये!। [६]इत्युक्तशपथं भूयश्चटकं चटकाऽब्रवीत्॥३०॥
ऋषेरस्यै[७]नसा गृह्ये शपेथा इति चेत् प्रिय!। विसृजामि तदैव त्वां "पन्थानः सन्तु ते शिवाः"॥३१॥
इत्याकर्ण्य वचः क्रुद्धो **जमदग्नि**मुनिस्ततः। उभाभ्यामपि हस्ताभ्यामुभौ जग्राह पक्षिणौ॥३२॥
आचचक्षे ततः सोऽपि कुर्वाणे दुष्करं तपः। उष्णरश्माविव [८]ध्वान्तमाः पापं मयि कीदृशम्?॥३३॥
अथर्षिं चटकोवाच मा कुपस्ते मुधा तपः। "अपुत्रस्य गतिर्नाऽस्ती"त्यश्रौषीस्त्वं न किं श्रुतिम्?॥३४॥
तथेति मन्यमानस्तु मुनिरेवमचिन्तयत्। ममाऽकलत्रपुत्रस्य प्रवाहे[९]मूत्रितं तपः॥३५॥
[१०]तं दृष्ट्वा क्षुभितं ध्यायन् "[११]भ्रमितस्तापसै"रिति। जज्ञे **धन्वन्तरिः** श्राद्धः प्रत्येति प्रत्ययान्न कः?॥३६॥
¶बभूवतुरदृश्यौ च तावपि त्रिदशौ तदा। **जमदग्नि**श्च सम्प्राप पुरं **नेमिककोष्टक**म्॥३७॥
**जितशत्रुं** महीपालं तत्र भूयिष्ठकन्यकम्। स [१२]प्रेप्सुः कन्यकामेकां [१३]दक्षं हर इवाऽगमत्॥३८॥
कृत्वाऽभ्युत्थानमुर्वीशः प्राञ्जलिस्तमभाषत। किमर्थमागता यूयं? ब्रूत किं करवाण्यहम्?॥३९॥
कन्यार्थमागतोऽस्मीति मुनिनोक्तेऽब्रवीन्नृपः। मध्ये शतस्य कन्यानां त्वां येच्छति गृहाण ताम्॥४०॥
स कन्यान्तःपुरे गत्वा जगाद नृपकन्यकाः। धर्मपत्नी मम काचि[१४]द्भवतीभ्यो भवत्विति॥४१॥
[१५]जटिलः [१६]पलितः [१७]क्षामो [१८]भिक्षाजीवी वदन्निदम्। न लज्जसे त्वमिति ताः कृतथूत्कारमूचिरे॥४२॥
समीरण इव क्रुद्धो **जमदग्नि**र्मुनिस्ततः। [१९]अधिज्येष्वासयष्ट्याभाः कन्याः कुब्जीचकार ताः॥४३॥
¶अथाङ्गणे रेणुपुञ्जे रममाणां नृपात्मजाम्। एकामालोकयामास **रेणुके**त्यब्रवीच्च ताम्॥४४॥
स तस्या इच्छसीत्युक्त्वा [२०]मातुलिङ्गमदर्शयत्। तया प्रसारितः पाणिः पाणिग्रहणसूचकः॥४५॥
तां मुनिः परिजग्राह [२१]रोरो धनमिवोरसा। सार्धं गवादिभिस्तस्य ददौ च विधिवन्नृपः॥४६॥
स [२२]श्यालीस्नेहसम्बन्धादेकोनं कन्यकाशतम्। सज्जीचक्रे तपःशक्त्या धिङ् मूढानां तपोव्ययम्॥४७॥
¶नीत्वाऽऽश्रमपदं तां च सुमुग्धमधुराकृतिम्। हरिणीमिव लोलाक्षीं प्रेम्णा मुनिरवर्धयत्॥४८॥
अङ्गुलीभिर्गणयतो दिनान्यस्य तपस्विनः। यौवनं चारुकन्दर्पलीलावनमवाप सा॥४९॥
[२३]साक्षीकृत्य ज्वलदग्निं **जमदग्नि**मुनिस्ततः। यथावदुपयेमे तां [२४]भूतेश इव पार्वतीम्॥५०॥
ऋतुकाले स ऊचे तां चरुं ते साधयाम्यहम्। यथा [२५]ब्राह्मणमूर्धन्यो धन्य उत्पद्यते सुतः॥५१॥
सोवाच **हास्तिनपुरे**ऽ**नन्तवीर्य**स्य भूपतेः। पत्न्यस्ति मत्स्वसा तस्यै चरुः क्षात्रोऽपि साध्यताम्॥५२॥
ब्राह्मं सधर्मचारिण्यै क्षात्रं त[२६]ज्जामयेऽपरम्। स चरुं साधयामास [२७]पुत्रीयमुपजीवितुम्॥५३॥
साऽचिन्तयदहं तावदभूवम[२८]टवीमृगी। मा भून्मादृक् सुतोऽपीति क्षात्रं चरुमभक्षयत्॥५४॥
साऽदाद् ब्राह्मं चरुं स्वस्रे जातौ च तनयौ तयोः। तत्र **रामो रेणुकायाः कृतवीर्य**श्च तत्स्वसुः॥[२९]५५॥

---

१. वटमिव॥ २. वल्मीकेन व्याप्तं पादप्रान्तं यस्य तम्॥ ३. चटकः-पक्षिविशेषः(चकली) तस्य युगलं भूत्वा॥ ४. अन्यस्त्रियामासक्तः॥ ५. *नाऽप्यमंस्त सा* मु.॥ ६. उक्तः शपथो येन तम्॥ ७. पापेन॥ ८. अन्धकारः॥ ९. व्यर्थमित्यर्थः; *०सूत्रितं* मु.॥ १०. *क्षुभितस्तं परिज्ञाय धिग् भ्रान्तस्तापसैरिति* । हे.॥ ११. तापसैरहं भ्रान्त इति ध्यायन् धन्वन्तरिः श्रावको जातः इत्यन्वयः॥ १२. प्रकर्षेणाप्तुमिच्छुः॥ १३. *गौरीं* छा. पा.; दक्षनृपं प्रति॥ १४. "भवतीनां" इति पाठः स्यादत्रेति सम्भाव्यते॥ १५. जटाधारी॥ १६. श्वेतवालः-वृद्धः॥ १७. क्षीणकायः॥ १८. *भिक्षाजीवो* मु.विना॥ १९. सज्जीकृतधनुर्यष्टिसदृशीः॥ २०. बीजपूरम् "बीजोरूं"॥ २१. निर्धनः॥ २२. *स श्यालीः स्नेह०* मु.प्रभृतिषु। श्याली-पत्न्याः भगिनी॥ २३. *साक्षीकृतज्वल०* खंता.॥ २४. *ज्वलदग्निर्जमद०* खंता. मु.विना॥ २४. महादेवः॥ २५. ब्राह्मणश्रेष्ठः॥ २६. रेणुकाया भगिन्यै॥ २७. पुत्रस्येदं पुत्रीयं-पुत्रोत्पादकम्॥ २८. अरण्ये हरिणी॥ २९. योगशास्त्रे द्वितीयप्रकाशे (पत्राङ्क २०३-२११) इदमेव सूभुमचरितं प्रायो दृश्यते। तत्र ५५तमश्लोकादनन्तरं "क्रमेण ववृधे राम ऋषित्वे पैतृकेऽपि सः। क्षात्रं प्रदर्शयंस्तेजो हुताशनमिवाऽम्भसि॥" इत्ययं श्लोकोऽधिकः॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

¶विद्याधरोऽन्यदा तत्र कोऽप्यागादतिसारकी[१] । विद्या तस्याऽतिसारार्त्या विस्मृताऽऽकाशगामिनी ॥५६॥
**रामे**ण [२]प्रतिचरितो भेषजाद्यैः [३]स्वबन्धुवत् । **रामा**य सेवमानाय विद्यां [४]**पारशवीं** ददौ ॥५७॥
मध्ये**शरवणं** गत्वा तां च विद्यामसाधयत् । **रामः परशुरामो**ऽभूत् ततः प्रभृति विश्रुतः ॥५८॥
¶अन्येद्युः पतिमापृच्छ्य **रेणुको**त्कण्ठिता स्वसुः । जगाम **हास्तिनपुरे** प्रेम्णो दूरे न किञ्चन ॥५९॥
श्यालीति लालयन् लोललोचनां तत्र **रेणुकाम्** । **अनन्तवीर्यो**ऽरमयत् कामः कामं निरङ्कुशः ॥६०॥
ऋषिपत्न्या तया राजाऽहल्ययेव [५]पुरन्दरः । अन्वभूच्च यथाकामं सम्भोगसुखसम्पदम् ॥६१॥
**अनन्तवीर्या**त् तनयो **रेणुका**यामजायत । **ममता**यामिवो[६]**तथ्य**सधर्मिण्यां **बृहस्पतिः** ॥६२॥
तेनाऽपि सह पुत्रेण **रेणुका**मानयन् मुनिः । स्त्रीणां लुब्धो जनः प्रायो दोषं न खलु वीक्षते ॥६३॥
तां पुत्रसहितां वल्लीमकालफलितामिव । सञ्जातकोपः **परशुरामः** [७]परशुनाऽच्छिदत् ॥६४॥
¶तद्भगिन्या स वृत्तान्तोऽ**नन्तवीर्य**स्य शंसितः । कोपमुद्दीपयामास [८]कृशानुमिव [९]मारुतः ॥६५॥
ततश्चाऽवार्यदोर्वीर्योऽ**नन्तवीर्यो** महीपतिः । **जमदग्न्या**श्रमं गत्वाऽभाङ्क्षीन् मत्त इव द्विपः ॥६६॥
तापसानां कृतत्रासः समादाय गवादि सः । मन्दं मन्दं परिक्रामन् केसरीव न्यवर्तत ॥६७॥
त्रस्यत्तपस्वितुमुलं श्रुत्वा ज्ञात्वा च तां कथाम् । क्रुद्धः **परशुरामो**ऽथाऽधावत् साक्षादिवाऽ[१०]न्तकः ॥६८॥
[११]सुभटग्रामसङ्ग्रामकौतुकी **जमदग्नि**जः । पर्शुना खण्डशश्चक्रे [१२]दारुवद्दारुणेन तम् ॥६९॥
¶राज्ये निवेशयाञ्चक्रे तस्य [१३]प्रकृतिपूरुषैः । **कृतवीर्यो** महावीर्यः स एव तु वयोलघुः ॥७०॥
तस्याऽभवच्च महिषी **तारा** तारविलोचना । बुभुजाते च तौ भोगानविघ्नममराविव ॥७१॥
**भूपाल**राजजीवोऽपि स्वमायुः परिपूर्य सः । **महाशुक्रा**त् परिच्युत्य **तारा**कुक्षाववातरत् ॥७२॥
**कृतवीर्यो**ऽन्यदा मातुर्मुखाच्छ्रुत्वा पितुः कथाम् । [१४]आदिष्टाहिरिवाऽऽगत्य **जमदग्नि**ममारयत् ॥७३॥
**रामः** पितृवधक्रुद्धो द्राग् गत्वा **हस्तिनापुरे** । अमारयत् **कृतवीर्यं** किं यमस्य [१५]दवीयसि ? ॥७४॥
**जामदग्न्य**स्ततस्तस्य राज्ये न्यविशत स्वयम् । राज्यं हि विक्रमाधीनं न प्रमाणं क्रमाक्रमौ ॥७५॥
¶**रामा**क्रान्तपुराद् राज्ञी **कृतवीर्य**स्य [१६]गुर्विणी ।व्याघ्राघ्रातवनादे[१७]णीवाऽगमत् तापसाश्रमम् ॥७६॥
कृपाधनैर्भू[१८]गृहान्तः सा निधाय निधानवत् । तपस्विभिर्गोप्यते स्म क्रूरात् **परशुराम**तः ॥७७॥
चतुर्दशमहास्वप्नसूचितोऽस्याः सुतोऽजनि । गृह्णन् [१९]भूमिं मुखेनाऽभूत् **सुभूमो** नामतस्ततः ॥७८॥
क्षत्रियो यत्र यत्राऽऽसीत् तत्र तत्राऽप्यदीप्यत । पर्शुः **परशुराम**स्य कोपाग्निरिव मूर्तिमान् ॥७९॥
**रामो**ऽगादन्यदा तत्राऽऽश्रमे पर्शुश्च सोऽज्वलत् । [२०]क्षत्रं चाऽसूचयद्धूम इव [२१]धूमध्वजं तदा ॥८०॥
किमत्र क्षत्रियोऽस्तीति पृष्टास्तेन तपस्विनः । इत्यूचुस्तापसीभूताः क्षत्रिया वयमास्महे ॥८१॥
**रामो**ऽप्यमर्षान्निःक्षत्रां [२२]सप्तकृत्वो वसुन्धराम् । निर्ममे निस्तृणां शैलतटीमिव दवानलः ॥८२॥
[२३]क्षुण्णक्षत्रियदंष्ट्राभी **रामः** स्थालमपूरयत् । यमस्य पूर्णकामस्य पूर्णपात्रश्रियं दधत् ॥८३॥
**रामः** पप्रच्छ नैमित्तानन्येद्युर्मे कुतो वधः ? । सदा वैरायमाणा हि शङ्कन्ते परतो मृतिम् ॥८४॥
यो दंष्ट्राः पायसीभूताः सिंहासन इह स्थिताः । भोक्ष्यतेऽमूस्[२४]ततस्त्यस्ते वधो भावीति तेऽब्रुवन् ॥८५॥
**रामो**ऽथ कारयामास सत्रागारमवारितम् । धुरि सिंहासनं तत्राऽस्थापयत् स्थालमग्रतः ॥८६॥
¶अथाऽऽश्रमे स्वर्णवर्णोऽष्टाविंशतिधनून्नतिः । गतोऽङ्गणद्रुम इव **सुभूमो** वृद्धिमद्भुताम् ॥८७॥
विद्याधरो **मेघनादो**ऽन्येद्युर्नैमित्तिकानिति । परिपप्रच्छ **पद्मश्रीः** कन्या मे कस्य दीयताम् ? ॥८८॥

---

१. अतिसारवान् ॥ २. सेवितः ॥ ३. ***स बन्धुवत्*** हे. ला. ॥ ४. परशुसम्बन्धिनीम् ॥ ५. इन्द्रः ॥ ६. **बृहस्पति**स्तस्य भ्रातु**रुतथ्य**स्य भार्यां **ममतां** भुक्तवांस्तत-स्तस्याः पुत्रोऽजायतेति पुराणकथानकं श्रूयते; ***०तथ्यः सधर्मिण्यां बृहस्पतेः*** खंता. विना ॥ ७. ***०शुनाऽच्छिनत्*** खंता. ला. मु. विना ॥ ८. अग्निमिव ॥ ९. पवनः ॥ १०. यमः ॥ ११. सुभटसमूह ॥ १२. काष्ठवत् ॥ १३. प्रधानपुरुषैः ॥ १४. आदिष्टश्चाऽसौ अहिः-सर्पश्च ॥ १५. अतिदूरे ॥ १६. **गर्भिणी** ॥ १७. मृगीव ॥ १८. भुवि गृहं भूगृहं तस्याऽन्तः ॥ १९. ***भूमीमुखेन*** हे. ॥ २०. क्षत्रियम् ॥ २१. अग्निम् ॥ २२. सप्तवारान् ॥ २३. मृतानां क्षत्रियाणां दंष्ट्राभिरित्यर्थः ॥ २४. तत आगतस्ततस्त्यः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्या वरं वरीयांसं **सुभूमं** तेऽप्युपादिशन्। दत्त्वा कन्यां ततस्तस्मै तस्यैवाऽभूत् स सेवकः ॥८९॥

¶कूपभेक इवाऽ[१]नन्यगोऽथ पप्रच्छ मातरम्। **सुभूमः** किमियानेव लोकोऽयमधिकोऽपि किम्? ॥९०॥

माताऽप्यचीकथदथो लोकोऽनन्तो हि वत्सक!। मक्षिकापदमात्रं हि लोकमध्येऽयमाश्रमः ॥९१॥

अस्मिंल्लोकेऽस्ति विख्यातं नगरं **हस्तिनापुरम्**। पिता ते **कृतवीर्यो**ऽभूत् तत्र राजा महाभुजः ॥९२॥

हत्वा ते पितरं **रामो** राज्यं स्वयमशिश्रियत्। क्षितिं निःक्षत्रियां चक्रे तिष्ठामस्तद्भयादिह ॥९३॥

तत्कालं **हास्तिनपुरे सुभूमो** भौ[२]मवज्ज्वलन्। जगाम वै[३]रिणे क्रुद्धः क्षात्रं तेजो हि दुर्धरम् ॥९४॥

तत्र सत्रे ययौ सिंह इव सिंहासनेऽविशत्। दंष्ट्रास्ताः पायसीभूताः [४]**सुभूमो** बुभुजे च सः ॥९५॥

उत्तिष्ठमाना युद्धाय ब्राह्मणास्तत्र रक्षकाः। जघ्निरे **मेघनादे**न व्याघ्रेण हरिणा इव ॥९६॥

प्रस्फुरद्दंष्ट्रिकाकेशो दशनैरधरं दशन्। ततो **रामः** क्रुधा कालपाशाकृष्ट इवाऽऽययौ ॥९७॥

**रामे**ण मुमुचे रोषात् [५]**सुभूमाय** [६]परश्वधः। विध्यातस्तत्क्षणं तस्मिन् [७]स्फुलिङ्ग इव वारिणि ॥९८॥

शस्त्राभावात् **सुभूमो**ऽपि दंष्ट्रास्थालमुदक्षिपत्। चक्रीबभूव तत्सद्यः किं न स्यात् [८]पुण्यसम्पदा? ॥९९॥

चक्रवर्त्यष्टमः सोऽथ तेन चक्रेण भास्वता। शिरः **परशुरामस्य** पङ्कजच्छेदमच्छिदत् ॥१००॥

क्षितिं निःक्षत्रियां **रामः** सप्तकृत्वो यथा व्यधात्। एकविंशतिकृत्वस्तां तथा निर्ब्राह्मणामसौ ॥१०१॥

¶[९]क्षुण्णक्षितिप-हस्त्यश्व-पदातिव्यूहलोहितैः। वाहयन् [१०]वाहिनीर्नव्याः स प्राक् प्राचीमसाधयत् ॥१०२॥

स च्छिन्नानेकसुभटमुण्डमण्डितभूतलः। आक्रामद्दक्षिणां [११]दक्षिणाशापतिरिवाऽपरः ॥१०३॥

भटास्थिभिर्दन्[१२]तुरयन् शुक्ति-शङ्खैरिवाऽभितः। [१३]रोधो नीरनिधेः सोऽथ प्रतीचीमजयद्दिशम् ॥१०४॥

हेलोद्घाटितवैताढ्य**कन्दरं** [१४]स्थाममन्दरः। म्लेच्छान् विजेतुं **भरतो**त्तरखण्डं विवेश सः ॥१०५॥

उच्छलच्छोणितर[१५]सच्छटाच्छुरितभूतलः। म्लेच्छांस्तत्राऽथ सोऽभाङ्क्षीदिक्षूनिव [१६]महाकरी ॥१०६॥

**मेघनादाय वैताढ्य**गिरिश्रेण्योर्द्वयोरपि। विद्याधरेन्द्रपदवीं **सुभूम**श्चक्रभृद्ददौ ॥१०७॥

¶[१७]षष्टिवर्षसहस्रायुश्चतुर्दिशमिति भ्रमन्। निहत्य सुभटानुर्वीं स षट्खण्डामसाधयत् ॥१०८॥

[१८]उज्जासयन्नसुमतामिति नित्यरौद्र-
ध्यानानलेन सततं ज्वलदन्तरात्मा।
आसाद्य कालपरिणामवशेन मृत्युं
तां सप्तमीं नरकभूमिमगात् **सुभूमः** ॥१०९॥

[१९]कुमारभावेऽब्दसहस्रपञ्चकं तन्[२०]मण्डलित्वेऽथ शतानि पञ्च।
[२१]जयेऽर्धलक्षं पुनरब्दपञ्चशत्यूनमस्याऽजनि [२२]चक्रभृत्त्वे ॥११०॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे पर्वणि [२३]**सुभूम**चरितवर्णनो
नाम चतुर्थः सर्गः॥

---

१. अन्यत्र न गच्छति सः; *इवाऽनन्यगोपः* मु.प्रभृतिषु ॥ २. मङ्गलवत् ॥ ३. *वैरिणो* ला.मु. ॥ ४. *सुभुजो०* मु. ॥ ५. *सुभौमाय०* खंता. ॥ ६. परशुः ॥ ७. अग्निकण इव ॥ ८. *पुण्यसम्पदः* मु. ॥ ९. क्षुण्णा-मृता ये क्षितिपा-राजानस्तेषां हस्तिनोऽश्वाः पदातयोऽपि मृताः, तेषां सर्वेषां व्यूहः-समूहः, तस्य लोहितैः-रक्तैः ॥ १०. सेनाः नदीश्च ॥ ११. यमः ॥ १२. दन्तुरं-दन्तयुक्तं कुर्वन् ॥ १३. तीरम् ॥ १४. स्थाम-बलं, तेन मन्दरो मेरुरिव ॥ १५. *०रसच्छडा०* खंता. ॥ १६. *महाकिरिः* हे.पा.छा. ॥ १७. आयुर्वर्षाणि ६०सहस्रमितानि ॥ १८. हिंसन् ॥ १९. कौमारे वर्षाणि ५सहस्रमितानि ॥ २०. मण्डलित्वे वर्षाणि ५सहस्रमितानि ॥ २१. दिग्विजये वर्षाणि ५००मितानि ॥ २२. चक्रित्वे वर्षाणि ५०सहस्रमितानि पञ्चशतवर्षोनानि ॥ २३. *सुभूमचक्रवर्तिवर्णनो* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥पञ्चमः सर्गः॥

## ॥दत्त-नन्दन-प्रह्लादचरितम्॥

**अर**तीर्थेऽथाऽऽसन् विष्णु-बल-प्रत्यर्धचक्रिणः। **दत्त-नन्दन-प्रह्लादा**स्तेषां चरितमुच्यते ॥१॥
अस्यैव **जम्बूद्वीपस्य प्राग्विदेह**विभूषणम्। पूः **सुसीमा**ऽस्ति तत्राऽभूत् पृथ्वीनाथो **वसुन्धरः** ॥२॥
स चिरं पालयित्वा [1]क्ष्मां **सुधर्म**मुनिसन्निधौ। व्रतमादाय मृत्वा च **ब्रह्मलोक**मुपाययौ ॥३॥
¶[2]इतोऽस्य **जम्बूद्वीपस्य भरतार्धे**ऽत्र दक्षिणे। नाम्ना **मन्दरधीरो**ऽभूत् पुरे **शीलपुरे** नृपः ॥४॥
गुणरत्नार्णवस्तस्य महावीर्यो महाभुजः। सूनुर्**ललितमित्रो**ऽभून्मि[3]त्रो मि[4]त्राम्बुजन्मनाम् ॥५॥
ज्ञापयित्वा [5]दृप्त इति तं [6]प्रत्याख्याय भूपतेः। भ्रातरं युवराजत्वे **खलो** मन्त्री न्यवेशयत् ॥६॥
ततो **ललितमित्रो**ऽपि विरक्तः सन् पराभवात्। **घोषसेन**मुनेः पार्श्वे परिव्रज्यामुपाददौ ॥७॥
तप्यमानः स विदधे निदानमिति [7]दुर्मनाः। वधाय तपसाऽनेन तस्य स्यां **खल**मन्त्रिणः ॥८॥
स निदानमनालोच्य कालधर्ममुपागतः। **सौधर्मे** देवलोकेऽभूत् त्रिदशः परमर्द्धिकः ॥९॥
¶**खला**ख्यः सचिवः सोऽपि चिरं भ्रान्त्वा भवाटवीम्। अस्यैव **जम्बूद्वीप**स्य गिरौ **वैताढ्य**नामनि ॥१०॥
उत्तरश्रेणितिलके पुरे **सिंहपुरा**भिधे। विद्याधरेन्द्रः **प्रह्लादः** प्रतिविष्णुरजायत ॥११॥[युग्मम्]
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् **भरतार्धे** च दक्षिणे। पुरी **वाराणसी**त्यस्ति श्रिता सख्येव गङ्गया ॥१२॥
अग्निवत् तेजसा तत्र सिंहवच्च पराक्रमात्। **अग्निसिंह** [8]इतीक्ष्वाकुवंशेऽभूद् [9]वसुधाधवः ॥१३॥
[10]तस्य स्थैर्या[11]भियोगाभ्यां पक्षाभ्यामिव [12]विष्टपे। निरन्तरं यशोहंसो न व्यरंसीत् परिभ्रमन् ॥१४॥
सलीलं समरारम्भे दृष्ट्वा [13]तन्नमितं धनुः। [14]तद्वेलामिव बिभ्राणा नेमुः [15]प्रत्यर्थिपार्थिवाः ॥१५॥
बलिष्ठे तस्य दोःस्तम्भे दृढैर्[16]आलानिता गुणैः। स्थिरतां कलयामास [17]श्रीर्वा[18]रणवधूरिव ॥१६॥
तस्याऽभूतामुभे पत्न्यौ **जयन्ती शेषवत्य**पि। अशेषभुवनस्त्रीणां जयन्त्यौ रूपसम्पदम् ॥१७॥
**वसुन्धर**वरो देवश्च्युत्वा पञ्चमकल्पतः। स **जयन्त्या** महादेव्या उदरे [19]समवातरत् ॥१८॥
चतुःस्वप्नाख्यात[20]रामावतारो **नन्दना**भिधः। जगदानन्दनस्तस्याः समये समभूत् सुतः ॥१९॥
**सौधर्माल्ललित**श्च्युत्वा **शेषवत्या**मभूत् सुतः। सप्तस्वप्नाख्यात[21]कृष्णावतारो **दत्त**सञ्ज्ञया ॥२०॥
तौ षड्विंशतिधन्वोच्चौ श्वेत-श्यामावुभावपि। [22]अब्धी क्षीरोद-कालोदाविव पुंस्त्वमुपेयतुः ॥२१॥
नील-पीताम्बरधरौ ताल-तार्क्ष्यध्वजौ च तौ। [23]सवयस्काविव ज्येष्ठ-कनिष्ठावपि चेरतुः ॥२२॥
¶**भरतार्ध**प्र[24]भुर्विष्णुः प्रतिविष्णुरथाऽन्यदा। श्रुत्वैरावणसंकाशं गजेन्द्रं तावयाचत ॥२३॥
तस्मिन् **नन्दन-दत्ता**भ्यामदत्ते कुञ्जरोत्तमे। सद्यश्चुकोप **प्रह्लादः** [25]पञ्चास्य इव [26]तर्जितः ॥२४॥
[27]सर्वाभिसारतो द्वावप्य[28]भ्यषेणयतां मिथः। विष्णुश्च प्रतिविष्णुश्च क्रुद्धौ वनगजाविव ॥२५॥
सैन्ये **प्रह्लाद**सैन्येन नीते दैन्यदशां क्षणात्। [29]युधे चेलतुरारूढस्यन्दनौ [30]सीरि-शार्ङ्गिणौ ॥२६॥
दध्मौ **दत्तः** पाञ्चजन्यं [31]द्विषद्दलहरस्वरम्। शार्ङ्गं चाऽऽस्फालयामास जयकुञ्जरडिण्डिमम् ॥२७॥

---

१. पृथ्वी ॥ २. ***इतश्च*** मु. ॥ ३. सूर्यः ॥ ४. मित्राण्येव अम्बुजन्मानि कमलानि तेषाम् ॥ ५. गर्विष्ठः ॥ ६. निषिध्य ॥ ७. दुष्टं मनो यस्य सः ॥ ८. ***इति नाम्ना बभूव वसुधा०*** हे. ॥ ९. नृपः ॥ १०. ***तत्स्थैर्य-व्यवसायाभ्याम्*** हे. ॥ ११. अभियोगो व्यवसाय उद्योग इति यावत् ॥ १२. जगति ॥ १३. तेनाऽऽकृष्टम् ॥ १४. तन्मर्यादामिव ॥ १५. शत्रुनृपाः ॥ १६. बद्धाः ॥ १७. ***श्रीर्निर्वाणवधूरिव*** हे. ॥ १८. हस्तिनीव ॥ १९. ***समवासरत्*** छा. पा. ॥ २०. बलदेवावतारः ॥ २१. वासुदेवावतारः ॥ २२. क्षीरोदधि-कालोदधिसमुद्रौ पुंस्त्वं-मनुष्यत्वं उपेयतुः-प्रापतुरिव ॥ २३. समानवयसाविव ॥ २४. प्रभुः ॥ २५. सिंहः ॥ २६. तिरस्कृतः ॥ २७. समग्रसैन्येन ॥ २८. युद्धाय अभ्यगमताम् ॥ २९. ***युधि*** मु. खंता. ॥ ३०. नन्दन-दत्तौ ॥ ३१. ***द्विषद्दलहरं वरम्*** मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रह्लादो**ऽपि [1]धनुर्ह्रादैर्ह्रा[2]दयन्नभितो दिशः । डुढौके दृढदोर्दण्डो [3]दण्डपाणिरिवोत्कटः ॥२८॥

उभौ मुमुचतुर्बाणान् [4]हरि-प्रतिहरी रुषा । मिथश्चिच्छिदतुश्चोभावन्योऽन्यजयकाङ्क्षिणौ ॥२९॥

गदा-मुद्गर-दण्डादीन्यायुधान्यपराण्यपि । परस्परं चिच्छिदतुश्छेदे[5]च्छेकावुभावपि ॥३०॥

उल्काकुलं युगान्तार्कमिव ज्वालाशताकुलम् । **प्रह्लादो** भ्रमयित्वा खेऽमुचच्चक्रं हरिं प्रति ॥३१॥

मो[6]घीभूतं समीपस्थं हरिश्चक्रं तदेव हि । उपादाय **प्रह्लादाय** मुक्त्वा चिच्छेद तच्छिरः ॥३२॥

तथैव कृत्वा दिग्यात्रां **भरतार्ध**मसाधयत् । अथोद्दध्रे **कोटिशिला**[7]मर्धचक्री च सोऽभवत् ॥३३॥

कौमारे द्वे वर्षशते मण्डलित्वे दिशां जये । प्रत्येकमब्दपञ्चाशदभूद् **दत्तस्य** शार्ङ्गिणः ॥३४॥

षट्पञ्चाशतमब्दानां सहस्राण्यतिवाह्य सः । ययौ कर्मवशाद् **दत्तः** पञ्चमीं नरकावनिम् ॥३५॥

**दत्तस्य** शार्ङ्गिणो जातेऽवसाने कालमत्यगात् । कथञ्चित् पञ्चषष्ट्यब्दसहस्रायुर्ह[8]लायुधः ॥३६॥

[9]भ्रातृव्ययेन [10]भवभावनया च [11]भूरि-
वैराग्यभाग् भुवनशोभित आत्तदीक्षः ।
तीव्रं व्रतं निरतिचारमपालयच्चा-
ऽगान् **नन्दन**स्तदनु सिद्धिपदप्रतिष्ठाम् ॥३७॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे पर्वणि **नन्दन-दत्त-प्रह्लाद-**
चरितवर्णनो नाम पञ्चमः सर्गः॥



१. धनुःशब्दैः॥२. गर्जयन्॥३. यमः॥४. दत्त-प्रह्लादौ॥५. छेदे छेकौ-चतुरौ॥६. निष्फलीभूतम्॥७. वासुदेवः॥८. नन्दनबलदेवः॥९. भ्रातृमरणेन॥१०. संसारभावनया॥११. *भूरिवैराग्यवान्* मु.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥षष्ठः सर्गः॥

## ॥श्रीमल्लिनाथचरित्रम्॥

जयन्ति **मल्लिनाथ**स्य [1]मल्लीमाल्यामला गिरः। आपीयमाना सोत्कण्ठं [2]भव्यजन्तुमधुव्रतैः ॥१॥
श्रोतृश्रोत्रेषु [3]पीयूषस्रोतःसन्निभमद्भुतम्। [4]उदीरयामश्चरितं श्री**मल्लि**स्वामिनोऽधुना ॥२॥
द्वीपेऽत्रैव **जम्बूद्वीपे विदेहेष्वपरे**षु च। विजये **सलिलावत्यां वीतशोका**भिधाऽस्ति पूः ॥३॥
बलेनोच्चैर्[5]बले इव **बल**स्तत्र नृपोऽभवत्। [6]द्विषद्बलवनोन्माथकुञ्जरो [7]निर्जराकृतिः ॥४॥
राज्ञोऽस्य [8]**धारिणी**पत्न्यां केसरिस्वप्नसूचितः। जज्ञे **महाबलो** नाम सूनुर[9]न्यूनविक्रमः ॥५॥
उद्यौवनः **कमलश्री**प्रभृती राजकन्यकाः। शतानि पञ्चैकदिने पर्यणैषीन् **महाबलः** ॥६॥
तस्याऽऽसन् [10]बालसुहृदोऽ**चलो धरण-पूरणौ । वसुर्वैश्रवण**श्चाऽ**भिचन्द्र** इत्यभिधानतः ॥७॥
अपरेद्यु**र्बलो** राजा तस्या पुर्या बहिर्भुवि। ऐशान्या**मिन्द्रकुब्जा**ख्य उद्याने समुपेयुषाम् ॥८॥
मुनीनामन्तिके धर्मं श्रुत्वा वैराग्यवासितः। राज्ये **महाबलं** न्यस्य प्रव्रज्य च शिवं ययौ ॥९॥युग्मम्॥
¶**कमलश्री**महादेव्यां सिंहस्वप्नेन सूचितः। सूनु**र्महाबल**स्याऽभूद् **बलभद्रा**भिधानतः ॥१०॥
क्रमादुद्यौवनं तं च यौवराज्ये **महाबलः**। निजे निवेशयामास मूर्त्यन्तरमिवाऽऽत्मनः ॥११॥
षड्भिर्बालसुहृद्भिस्तैः समं राजा **महाबलः**। अश्रौषीदार्हतं धर्मं सौहार्दादि[11]कैभावनः ॥१२॥
वयस्यान् सोऽन्यदेत्यूचे भो! भो! भीतोऽस्म्यहं [12]भवात्। [13]ततश्च प्रव्रजिष्यामि पन्थाः कोऽतः परं तु वः ? ॥१३॥
तेऽप्यूचुः सम्भूय भुक्तं यथा सांसारिकं सुखम्। भोक्ष्यामहे शिवसुखं सम्भूयाऽतः परं तथा ॥१४॥
ततो न्यवेशयद् राज्ये **बलभद्रं महाबलः**। स्वे स्वे राज्ये सुतं स्वं स्वं ततश्च सुहृदोऽपि ते ॥१५॥
**वरधर्म**मुनीन्द्रस्य पादमूले महात्मनः। तैः सुहृद्भिः समं षड्भिः प्रवव्राज **महाबलः** ॥१६॥
तपो यदेकः कर्ता नस्तत्कार्यमपरैरपि। सप्तानामप्यभूत् तेषां प्रतिज्ञेयं महात्मनाम् ॥१७॥
एवं ते कृतसङ्केता[14]श्चतुर्थादितपः समम्। [15]चतुर्थपुरुषार्थाय तुल्योत्कण्ठाः प्रचक्रिरे ॥१८॥
अद्य मे [16]दुष्यति शिरो दुष्यत्युदरमद्य च। अद्य नाऽस्ति क्षुदित्यादि व्यपदिश्य **महाबलः** ॥१९॥
नाऽभुङ्क्त [17]पारणाहेऽपि स्वस्याऽधिकफलेच्छया। मायया [18]वञ्चयित्वा तानधिकं विदधे तपः ॥२०॥युग्मम्॥
मायामिश्रेण तपसाऽबध्नात् स्त्रीवेदकर्म सः। अर्हद्भक्त्यादिभिः स्थानैस्तीर्थकृन्नामकर्म च ॥२१॥
पूर्वलक्षचतुरशीत्यायुष्काः सप्त ते व्रतम्। पात्वा चतुरशीत्यब्दसहस्रीमायुषः क्षये ॥२२॥
द्विधा संलेखनां कृत्वा गृहीत्वाऽनशनव्रतम्। विपद्य [19]**वैजयन्ता**ख्ये विमाने जज्ञिरे सुराः ॥२३॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् **भरतार्धे**ऽत्र दक्षिणे। नगरी **मिथिले**त्यस्ति [20]धर्माशिथिलनागरा ॥२४॥
[21]शातकुम्भमयैः कुम्भैः प्रासादास्तत्र बिभ्रति। उपर्युदितमार्तण्डोदयपर्वतविभ्रमम् ॥२५॥
सर्वरत्नमयीं दृष्ट्वा तां पुरीं"मपराः पुरीः। **अलका**द्या रत्नमयीः" कथासु श्रद्दधे जनः ॥२६॥
क्षणं दिवि क्षणं तस्यां क्षणं तस्यां क्षणं दिवि। [22]तद्रामणीयकतृप्तास्तस्थुर्[23]दिविषदोऽनिशम् ॥२७॥

---

१. मल्लीकुसुमवन्निर्मला ॥ २. भव्यजीवा एव मधुकराः, तैः ॥ ३. अमृतनिर्झरसदृशम् ॥ ४. कथयामः ॥ ५. बलदेवः ॥ ६. शत्रूणां सेना एव वनं, तस्य मथने गजसदृशः ॥ ७. देवाकृतिः ॥ ८. ***धारणी०*** खंता. पाता. ॥ ९. पूर्णपराक्रमी ॥ १०. बालमित्राणि ॥ ११. ***०देकभावतः*** मु. ॥ १२. संसारात् ॥ १३. ***तदहम्*** हे. ॥ १४. उपवासादितपः ॥ १५. मोक्षाय ॥ १६. पीडामनुभवति ॥ १७. पारणादिवसे ॥ १८. ***वञ्चयस्येषा नाऽधिकं*** ला. ॥ १९. ***वैजयन्त्याख्ये*** पा. छा. मु. ॥ २०. धर्मेऽशिथिलास्तत्परा नागराः पौरा यस्यां सा ॥ २१. सुवर्णमयैः ॥ २२. ***तद्रामणीयकातृष्णा*** हे. ॥ २३. देवाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इक्ष्वाकुवंशक्षीराब्धिसुधाकुम्भो भुव: पति: । **कुम्भ** इत्यभवल्लक्ष्मीनिवासो निधिकुम्भवत् ॥२८॥

आश्रय: स श्रियामेक: [१]स्रवन्तीनामिवाऽर्णव: । उत्पत्तिभूमिर्नीतीनां मणि(णी)नामिव रोहण: ॥२९॥

विदाञ्चकार शस्त्राणि शास्त्राणि च महामति: । मेदिन्या: करमादत्त [२]दु:स्थितेभ्यो ददौ च स: ॥३०॥

लोभो यशसि नो लक्ष्म्यां [३]त्यागो द्रव्ये न सी[४]मनि । धर्मे च व्यसनं नाऽ[५]क्षादिष्वभूत् तस्य धीमत: ॥३१॥

[६]आस्यप्रभापराभूतचन्द्रा नाम्ना **प्रभावती** । अभूत् तस्य महादेवी [७]शची देवीव [८]वज्रिण: ॥३२॥

पृथिव्या मण्डनं सैका तस्या: शीलं च मण्डनम् । प्रक्रियामात्रमभवत् केयूरकटकादि तु ॥३३॥

पावयन्ती सतीत्वेनाऽमलेन सकलं जगत् । कल्याणहेतु: शुशुभे सा तीर्थमिव जङ्गमम् ॥३४॥

भोगान् सह तया देव्या बुभुजे **कुम्भ**भूपति: । सदा हृदयहारिण्या [९]दाक्षायण्येव चन्द्रमा: ॥३५॥

जीवो **महाबल**स्याऽथ पूर्णायु**र्वैजयन्त**त: । प्रच्युत्य फाल्गुनश्वेतचतुर्थ्यां भे[१०]ऽ**श्वयुज्य**पि ॥३६॥

चतुर्दशमहास्वप्नसूचितार्हतवैभव: । **प्रभावती**महादेव्या: कुक्षाववततार स: ॥३७॥

[११]तस्मिन् गर्भस्थिते देव्यास्तृतीये मासि दोहद: । माल्येषु शयितुं जज्ञे देवताभिश्च पूरित: ॥३८॥

पूर्णे काले मार्गशुक्लैकादश्यां भेऽ**श्वयुज्य**थ । प्राग्जन्ममायाजनितस्त्रीकर्मत्वेन कन्यकाम् ॥३९॥

एकोनविंशमर्हन्तमाश्चर्यं कुम्भला[१२]ञ्छनाम् । नीलत्विषं सर्वशुभलक्षणां सुषुवे च सा ॥४०॥युग्मम्॥

उपेत्य दिक्कुमार्योऽस्या: सूतिकर्माणि चक्रिरे । मेरुमूर्ध्नि च नीत्वा तामिन्द्राश्चाऽस्नपयन् क्रमात् ॥४१॥

स्नपनानन्तरं शक्रस्तां विलिप्याऽऽर्च्य च स्वयम् । उत्तार्याऽऽरात्रिकं चेति भक्तिनिर्भरमस्तवीत् ॥४२॥

"ज्ञानत्रयनिधानाय प्रधानाय जगत्त्रये । एकोनविंशतितमायाऽर्हते ते नमो नम: ॥४३॥

दिष्ट्या त्वद्दर्शनेनाऽनुगृहीतोऽस्मि चिरादहम् । सामान्यपुण्यैर्न ह्यर्हन् देव: साक्षान्निरीक्ष्यते ॥४४॥

देवानामद्य देवत्वं चरितार्थं चिरादभूत् । तव देवाधिदेवस्य जन्मोत्सवनिरीक्षणात् ॥४५॥

एकतोऽच्युतनाथस्य प्राणिमात्रस्य चाऽन्यत: । समानुग्रहबुद्धे! त्वं पाहि न: पततो भवे ॥४६॥

अस्मिन् मेरुगिरौ [१३]धात्र्यां [१४]सुवर्णमुकुटायिते । इन्द्रनील इव न्यस्ता(स्त:) त्वमतीव विराजसे ॥४७॥

स्मरणेनाऽपि मोक्षाया[१५]ऽनीहमानस्य जायसे । दृष्ट्वा स्तुत्वा याच्यसे किं ततोऽप्यभ्यधिकं फलम् ॥४८॥

[१६]धर्माण्येकत्र सर्वाणि तव चैकत्र दर्शनम् । [१७]फलातिसाधकतमं [१८]द्वितीयमतिरिच्यते ॥४९॥

नेन्द्रत्वे नाऽहमिन्द्रत्वे मन्ये मोक्षेऽपि नो तथा । यथा सुखं स्याल्लुठत: पुरस्त्वत्पादपद्मयो:"॥५०॥

स्तुत्वैवं शक्र एकोनविंशमर्हन्तमुच्चकै: । नीत्वा च **मिथिला**पुर्याममुचन् मातृसन्निधौ ॥५१॥

गर्भस्थायां तत्र मातुर्य[१९]न्माल्यस्वापदोहद: । जज्ञे तदकरोत् तस्या नाम **मल्ली**ति भूपति: ॥५२॥

धात्रीभिरिन्द्रायुक्ताभि: पञ्चभि: प्रतिवासरम् । पुष्पमिव लाल्यमाना वृद्धिमाप क्रमेण सा ॥५३॥

इतश्चाऽचलजीवोऽपि **वैजयन्तात्** परिच्युत: । अभूद् **भरतसाकेते प्रतिबुद्ध्य**भिधो नृप: ॥५४॥

तस्य **पद्मावती** नाम साक्षात् [२०]पद्मेव रूपत: । बभूव प्रेयसी सर्वान्त:पुरस्त्रीशिरोमणि: ॥५५॥

इतश्च नगरे तस्मिन्नैशान्यां नागवेश्मनि । अतिष्ठन्नागप्रतिमा [२१]उपयाचितपूरिका: ॥५६॥

देवी **पद्मावती** तासां यात्रायै साऽन्यदा नृपम् । आपप्रच्छे **प्रतिबुद्धिं** सोऽपि तामन्वमन्यत ॥५७॥

[२२]तस्या: पुष्पादि सम्पाद्य **प्रतिबुद्धि**रपि स्वयम् । जगाम यात्रादिवसेऽधिनागप्रतिमागृहम् ॥५८॥

पुष्पमण्डपिकां [२३]पुष्पमुद्गरं स्वां प्रियामपि । प्रेक्ष्येत्यूचे **प्रतिबुद्धि:** [२४]**सुबुद्धिं** सचिवोत्तमम् ॥५९॥

---

१. नदीनाम् ॥ २. दरिद्रेभ्य: ॥ ३. दानम् ॥ ४. राज्यविस्तारे ॥ ५. द्यूतपाशकादिषु ॥ ६. मुखकान्त्या पराभूतश्चन्द्र: यया सा ॥ ७. इन्द्राणी ॥ ८. इन्द्रस्य ॥ ९. दक्षपुत्र्या रोहिण्या ॥ १०. नक्षत्रे अश्विन्यां-अश्विनीनक्षत्रे ॥ ११. *अस्मिन्* मु. खंता. पाता. ॥ १२. *कुम्भलाञ्छनम्* खंता. ॥ १३. पृथिव्या: सुवर्णमुकुटीभूते ॥ १४. *सुवर्णमुकुटायते* खंता. पाता. हे. सं. विना ॥ १५. अनिच्छो: ॥ १६. *कर्माण्येकत्र* पा. छा. । धर्मशब्द: पुंक्लीबलिङ्ग: ॥ १७. *फलातिसाधकत्वेन* पाता., *फलाग्निसाधकत्वेन* मु. ॥ १८. तव दर्शनम् ॥ १९. *०र्यन्माल्यतल्पदोहद:* हे. ॥ २०. लक्ष्मीरिव ॥ २१. इच्छितपूरिका:; *उपयाचितपूरका:* मु. ॥ २२. *तया* मु. ॥ २३. पुष्पगुच्छकम् ॥ २४. *स्वबुद्धिम्* मु. ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

त्वमस्मत्प्रेषणे राज्ञामगा वेश्मस्वनेकशः । स्त्रीरत्नमीदृक् कुसुममुद्गरश्च किमीक्षितः ? ॥६०॥
**सुबुद्धि**[1]रभ्यधादेवं त्वदादेशान् मयेयुषा[2] । अन्तिके **कुम्भ**भूपस्य दृष्टा **मल्ली**ति तत्सुता ॥६१॥
तस्याः स्त्रीरत्नमुख्याया आयुर्ग्रन्थौ[3] विधीयते । स पुष्पमुद्गरः कोऽपि यादृक् स्वर्गेऽप्यसम्भवी ॥६२॥
स्त्रीरत्नं चक्रिणो यच्च स्मरपत्नी च या रतिः । शच्याद्याः स्वःस्त्रियो याश्च तदग्रे तास्तृणोपमाः ॥६३॥
अप्येकवारं ददृशे येन सा **कुम्भ**[4]राजसूः । सुधारसास्वादमिव तद्रूपं विस्मरेन्न सः ॥६४॥
**मल्लेः** प्रतिकृतिर्नारी न मर्त्येषु सुरेषु वा[5] । तस्या हि रूपमद्वैतं वाचामपि न गोचरः[6] ॥६५॥
**प्रतिबुद्धि**रपि सद्यः पूर्वजन्मानुरागतः । दूतं प्रैषीत् तां वरीतुं **कुम्भ**राजान्तिके निजम् ॥६६॥
¶इतो **धरण**जीवोऽपि **वैजयन्तात्** परिच्युतः । **चम्पा**पुर्यामभूच्चन्द्रच्छायो नाम महीपतिः ॥६७॥
तस्यां पुर्यां च वास्तव्यः श्रावकोऽ**र्हन्नया**भिधः । अम्भोधियात्रामकरोत् पोतारूढो वणिज्यया ॥६८॥
**अर्हन्नय**समो नाऽस्ति श्रावकः कश्चिदप्यहो! । इति प्रशंसां विदधे शक्रो मध्येसभं[7] तदा ॥६९॥
ततो मात्सर्यवा[8]नेको देवः कोऽप्येत्य सागरे । औत्पातिकमरुन्मेघाडम्बरं विदधे क्षणात् ॥७०॥
पोतभङ्गभयात् सद्यो क्षुभ्यत्सांयात्रिका भृशम् । ऐच्छन्नभीष्टदेवेभ्य उपयाचितकानि च ॥७१॥
इतो विघ्नान्मृतिश्चेन्मे तदाऽनशनमस्त्विति । प्रत्याख्याय समाधिस्थस्तस्थाव**र्हन्नयः** पुनः ॥७२॥
रक्षोरूपं विकृत्योचे स देवो नभसि स्थितः । **अर्हन्नया**ऽऽर्हतं धर्मं जहीहि कुरु मद्वचः ॥७३॥
नो चेदमुं स्फोटयित्वा पोतं घटकपालवत्[9] । त्वां यादसां[10] भोजनसात् करिष्ये सपरिच्छदम् ॥७४॥
तथाऽप्यचलिते धर्मात् तस्मिन् देवः स विस्मितः । चकार क्षमणां शक्रप्रशंसां तं[11] जगाद च ॥७५॥
तस्मै च कुण्डलद्वन्द्वे दिव्ये दत्त्वा मनोरमे । घोरं च मेघ-वातादि संहृत्य स तिरोदधे ॥७६॥
क्षेमेणा[12]ऽ**र्हन्नयो**ऽप्यब्धेस्तीरोर्व्यामुत्ततार सः । अशेषं भाण्डमादाय ययौ च **मिथिलापुरीम्** ॥७७॥
एकं च **कुम्भ**राजस्योपायने[13] कुण्डलद्वयम् । **अर्हन्नयो** यथार्हज्ञ[14]श्चकारोदारमानसः ॥७८॥
तदैव **कुम्भ**राजोऽपि दुहित्रे **मल्लये** ददौ । **अर्हन्नयं** नयज्ञस्तं सत्कृत्य विससर्ज च ॥७९॥
विक्रीत-क्रीतभाण्डो[15]ऽथ सोऽगाच्च**म्पा**मकम्पधीः । ददौ च **चन्द्रच्छाया**य द्वितीयं कुण्डलद्वयम् ॥८०॥
राजा पप्रच्छ भोः श्रेष्ठिन्! कुतोऽदः कुण्डलद्वयम् । सोऽप्याख्यत् कुण्डलप्राप्तिकथाम[16]वितथां तथा ॥८१॥
तादृक्षाऽपरता[17]डङ्कद्वयदानप्रसङ्गतः । स इत्यवर्णयन् **मल्ल्या** रूपोत्कर्षं विशेषतः ॥८२॥
तस्याश्चेदुद्यतं[18] वक्त्रं तदस्तं यातु चन्द्रमाः । यदि द्युतिस्तदङ्गस्य कृतं[19] मरकतेन तत् ॥८३॥
तस्या लावण्यपूरश्चेत् तदलं जाह्नवीजलैः[20] । तस्याश्च यदि रूपश्रीस्तद्दूरे सुरयोषितः ॥८४॥
वृथैव नेत्राणि नृणां न यैः सा देव! दृश्यते । किं हंसैः पद्मिनीं स्मेरां[21] ये न पश्यन्ति जातुचित् ? ॥८५॥
**चन्द्रच्छाय**नरेन्द्रोऽपि प्राग्जन्मस्नेहयोगतः । **मल्लिं** वरीतुं **कुम्भा**य प्राहिणोद् दूतमुत्तमम् ॥८६॥
¶इतश्च **पूरणा**त्माऽपि **वैजयन्तात्** परिच्युतः । बभूव पुर्यां **श्रावस्त्यां रुक्मी** नाम महीपतिः ॥८७॥
तस्याऽऽसीद् **धारणी**पत्न्यां **सुबाहु**र्नाम कन्यका । रूपातिशयसम्पन्ना पन्नगेन्द्र[22]वधूरिव ॥८८॥
भूपतेः साऽतिवाल्लभ्यात्[23] परिवारेण सादरम् । विशेषमज्जनविधिं चतुर्मास्यामकार्यत ॥८९॥
अन्तःपुरेणाऽपरेद्युः स्नपिता सा विशेषतः । आमुक्त[24]दिव्यालङ्कारा प्रणन्तुं पितरं ययौ ॥९०॥
तां पितोत्सङ्गमारोप्य सौविदल्ल[25]मभाषत । कन्याया मज्जनविधिः किमीदृक् क्वचिदीक्षितः ? ॥९१॥

---

१. ***स्वबुद्धि०*** मु. ॥ २. गतेन ॥ ३. आयुःसूचिकायां ग्रन्थिरूपरेखायां-वर्षग्रन्थौ, भाषायां 'वर्षगांठ' ॥ ४. मल्लिकुमारी ॥ ५. ***च*** मु. ॥ ६. ***गोचरम्*** पाता. ॥ ७. सभायाम् ॥ ८. ईर्ष्यावान् ॥ ९. घटखण्डवत् ॥ १०. जलजन्तूनां भोजनम् ॥ ११. ***तां*** ला.विना ॥ १२. ***क्रमेणार्हन्नयो*** हे.सं.मु. ॥ १३. प्राभृते ॥ १४. यथार्हं यथायोग्यं जानातीति तथा ॥ १५. पूर्वं विक्रीतानि पश्चात् क्रीतानि च भाण्डानि येन सः ॥ १६. सत्याम् ॥ १७. द्वितीयकुण्डलद्वयदानप्रसङ्गात् ॥ १८. उदितम् ॥ १९. अलम् ॥ २०. गङ्गाजलैः ॥ २१. प्रफुल्लाम् ॥ २२. नागेन्द्रवधूरिव ॥ २३. अतिवल्लभत्वात् ॥ २४. आमुक्ता धृता दिव्यालङ्कारा यया सा ॥ २५. अन्तःपुरचरं नपुंसकपुरुषं-कञ्चुकिनम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽप्याख्यद् भवदादेशाद् गतेन **मिथिलां** मया। आयुर्ग्रन्थौ **कुम्भ**पुत्र्या **मल्ले**रधिकमीक्षितः ॥९२॥
[1]अदृष्टप्रतिरूपं च तस्या रूपमपि प्रभो!। कथ्यमानमसम्भाव्यं [2]प्रत्येतव्यं तु मद्गिरा ॥९३॥
अदृष्टपूर्वं स्त्रीरत्नं मम [3]तद्दृष्टपूर्विणः। अन्यस्त्रीवर्णने जिह्वा मौनव्रतमशिश्रियत् ॥९४॥
तस्या ह्यग्रे विभान्त्यन्यास्तन्निर्माल्योपमाः स्त्रियः। पुरः कल्पलताया हि सहकारलताः कियत् ? ॥९५॥
श्रुत्वा जातानुरागेण सद्यो राज्ञाऽपि **रुक्मिणा**। दूतः प्रैष्यत **कुम्भाय मल्लि**मार्गणहेतवे ॥९६॥
¶इतश्च **वसु**जीवोऽपि **वैजयन्तात्** परिच्युतः। जज्ञे **वाराणसी**पुर्यां **शङ्खो** नामाऽवनीपतिः ॥९७॥
**मल्ले**स्तत्कुण्डलद्वन्द्वं दिव्यं [4]विजघटेऽन्यदा। [5]राज्ञाऽऽदिष्टाः स्वर्णकारास्तस्य [6]सङ्घटनाय च ॥९८॥
वयं दिव्यमिदं देव! न सङ्घट्टयितुं [7]क्षमाः। इत्युक्तवन्तस्ते पुर्या राज्ञा [8]निर्वासिताः क्रुधा ॥९९॥
ते च [9]**वाराणसी**मेयुः **शङ्खाय** च महीभुजे। तदशेषं समाचख्युरात्मनिर्वासकारणम् ॥१००॥
कुण्डलप्रक्रमायातं **मल्ले** रूपं तदद्भुतम्। राज्ञोऽग्रे वर्णयामासुर्[10]दृष्टादूनतरं तु ते ॥१०१॥
तस्या मुखस्य शशभृदोष्ठयोर्बिम्बिकाफलम्। [11]कण्ठदेशस्य कम्बुश्च दोष्णोर्बिसलताऽपि च ॥१०२॥
[12]मध्यस्य [13]पविमध्यं च तथोर्वोः करिणः करः। नाभेश्च सरितावर्तो जघनस्य च दर्पणम् ॥१०३॥
जङ्घयोश्च मृगीजङ्घा पाणि-पादस्य पङ्कजम्। उपमेयतया जज्ञे [14]यदन्यत्रोपमानभाक् ॥१०४॥त्रिभिर्विशेषकम्॥
पूर्वस्नेहानुबन्धेन तद्रूपाकर्णनेन च। **कुम्भा**दर्थयितुं [15]**मल्लीं शङ्खो** दूतमथाऽऽदिशत् ॥१०५॥
¶जीवो **वैश्रवण**स्याऽपि **वैजयन्तात्** परिच्युतः। **अदीनशत्रु**र्नाम्नाऽभून्नृपतिर्**हस्तिनापुरे** ॥१०६॥
इतश्च **मल्ले**रनुजो **मल्लो** नाम कुतूहलात्। अकारयच्चित्रकरैश्चित्रितां चित्रशालिकाम् ॥१०७॥
[16]चित्रीयमाणश्चित्रेण [17]तत्रैकश्चित्रकृद्वरः। एकाङ्गदर्शनात् तादृक् [18]सर्वाङ्गालेख्यलब्धिमान् ॥१०८॥
अन्तर्जवनिकं **मल्लेः** पादाङ्गुष्ठं निरीक्ष्य सः। सर्वाङ्गोपाङ्गसहितं यथावद्रूपमालिखत् ॥१०९॥
तत्र च क्रीडितुं **मल्लो** गतः प्रेक्ष्य च चित्रगाम्। **मल्लीं** साक्षान् मन्यमानो लज्जयाऽपासरद् द्रुतम् ॥११०॥
धात्र्या किमेतदित्युक्ते कुमारोऽप्यब्रवीदिति। स्वसा **मल्ली** पुरोऽस्त्येषा ततोऽत्र क्रीड्यते कथम् ? ॥१११॥
सम्यग् निरूप्य धात्री साऽप्याचख्यौ परिभाव्यताम्। न साक्षान् **मल्ल्य**सौ किन्तु चित्रस्था माऽपसर्प तत् ॥११२॥
क्रुद्धो **मल्ल**कुमारोऽपि तस्य चित्रस्य लेखकम्। [19]निकर्त्य [20]दक्षिणकरसन्दंशं निरवासयत् ॥११३॥
सोऽभ्येत्य **हास्तिनपुरे**ऽ**दीनशत्रो**र्महीपतेः। तं वृत्तान्तं समाचख्यौ **मल्लीं** चैवमवर्णयत् ॥११४॥
अशेषजगदाकाशशशिलेखा वराङ्गना। [21]**मल्लिं** विना क्वचित् काऽपि नाऽस्ति नाऽभून्न भाविनी ॥११५॥
यस्तां कन्यां समालोक्याऽऽलोकयेदपरामपि। महानीलमणिं दृष्ट्वा काचखण्डं स पश्यति ॥११६॥
रूपेण [22]लवणिम्ना च गत्या चाऽन्यैश्च चेष्टितैः। सैवैका योषितां धुर्या सरितामिव जाह्नवी ॥११७॥
इति तद्वर्णनं कृत्वा स चित्रकरपुङ्गवः। [23]आकृष्य चित्रफलकं चित्रस्थां तामदर्शयत् ॥११८॥
दृष्ट्वा तां विस्मितः पूर्वस्नेहादुत्कण्ठितश्च सः। प्रैषीत् तद्याचनायोप**कुम्भ**राजं स्वपूरुषम् ॥११९॥
¶इतोऽ**भिचन्द्र**जीवोऽपि **वैजयन्तात्** परिच्युतः। **काम्पील्य**नगरे नाम्ना **जितशत्रु**र्नृपोऽभवत् ॥१२०॥
[24]**धारिणी**प्रमुखं राज्ञीसहस्रं तस्य चाऽभवत्। पुण्याकृष्टं देवलोकाद् वृन्दमप्सरसामिव ॥१२१॥
इतश्च **मिथिला**पुर्यां **चोक्षा** नाम विचक्षणा। एका परिव्राजिकाऽऽख्यद् [25]राजेश्वरगृहेष्विति ॥१२२॥

---

१. अदृष्टं प्रतिरूपं प्रतिकृतिः यस्य तत् ॥ २. विश्वसनीयम् ॥ ३. दृष्टं पूर्वं येन सः, तस्मै ॥ ४. ***विसमघट्यत*** हे.। बभञ्जे ॥ ५. ***राजादिष्टाः*** खंता. ॥ ६. ***सङ्घट्टनाय*** मु. ॥ ७. समर्थाः ॥ ८. निष्कासिताः ॥ ९. ***वाणारसी०*** पाता. ॥ १०. ***दृष्टादूनतरं*** मु.; यथा तैर्दृष्टमासीत् तथा वर्णयितुमसमर्थत्वाद् दृष्टाद् ऊनतरं-अल्पतरं वर्णयामासुरित्यर्थः ॥ ११. कण्ठभागस्य ॥ १२. मध्यदेशः कटिभागः ॥ १३. पविर्वज्रं, वज्रमध्यम् ॥ १४. अन्यस्त्रीषु पूर्वोक्ताश्चन्द्रादय उपमानतां प्राप्नुवन्ति अस्यां तु उपमेयतामित्यर्थः ॥ १५. मल्लीशब्दो दीर्घान्तोऽपि प्रयुक्तः सञ्ज्ञात्वात् ॥ १६. आश्चर्यकारकः ॥ १७. ***तत्रैकचित्रकृद्वरः*** सं., ***तेष्वेकश्चित्रकृद्वरः*** मु. ॥ १८. ***सर्वाङ्गालेख्ये०*** ला. छा. ॥ १९. छित्त्वा ॥ २०. ***दक्षिणकरं सन्दंशं*** ला. मु.; तर्जनीं अङ्गुष्ठं च अनयोः सम्मीलनेन सन्दंशाकृतिर्भवति, 'सन्दंशः स्यात् कङ्कमुख' (अभि.चिन्ता.) 'चीपियो' इति भाषायाम् ॥ २१. ***मल्लेः प्रतिकृतिः काऽपि*** हे. ॥ २२. लावण्येन ॥ २३. निष्कास्य ॥ २४. ***धारणी०*** खंता. ॥ २५. राज्ञां ईश्वराणां धनिकानां च गृहेषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानमूलः सदा धर्मस्तथा तीर्थाभिषेकजः । स्वर्गापवर्गयोर्हेतुरिति नस्तत्त्वतो वचः ॥१२३॥
धर्मे प्रवर्तयन्त्यस्मिन् पौरान् जानपदानपि । विहरन्त्यन्यदाऽभ्यागात् सदने **मल्ल्य**धिष्ठिते ॥१२४॥
त्रिदण्डपाणिः काषायवसना कुण्डिकाजलैः[1] । सदर्भैर्भुवमभ्युक्ष्य[2] स्ववृष्यां[3] निषसाद सा ॥१२५॥
**मल्ले**रप्यन्यजनवत् सा धर्मं तं तथा जगौ । ज्ञानत्रितयभृन्**मल्लि**रप्येवमवदत् ततः ॥१२६॥
दानमात्रं न धर्माय तद्धि धर्माय चेद् भवेत् । तर्ह्योतु-कुर्कुटादीनां पोषणान्यपि तत्कृते[4] ॥१२७॥
तीर्थाभिषेकैः प्राणातिपातमूलैः कथं शुचिः ? । असृजा क्षाल्यमानं किमसृग्दिग्धं[5] विशुध्यति ? ॥१२८॥
धर्मो विवेकमूलस्[6]तन्निर्विवेकस्य नाऽस्ति सः । क्लेशाय केवलं तस्य तपांस्यपि न संशयः ॥१२९॥
**मल्ल्यै**वमुक्ता सा **चोक्षा** विलक्षाऽभूदधोमुखी । केनेश्वरवचो युक्तियुक्तं बाधितुमीश्यते[7] ? ॥१३०॥
कियच्चिरमिदं विश्वमाः पाखण्डिनि! वञ्चितम् । त्वया कुशासनेनेति[8] दास्यादिभिरभर्त्सि सा ॥१३१॥
**चोक्षे**त्यचिन्तयद् राज्यसम्पदुन्मत्तयाऽनया । एतत्परिच्छदेनाऽपि स्वामिच्छन्दानुवर्तिना[9] ॥१३२॥
यदस्मि तर्जिता स्वैरं तद्वैरानृण्यहेतवे[10] । क्षेप्स्याम्येनां सपत्नीषु बह्वीषु निजबुद्धितः ॥१३३॥ [युग्मम्]
एवं विचिन्त्य निर्गत्य साऽमर्षाध्मातमानसा[11] । जगाम **काम्पील्य**पुरे **जितशत्रु**नृपान्तिके ॥१३४॥
प्रतिपत्त्या[12] महत्या सा दृष्टा तेन महीभुजा । कृताशीर्वादकल्याणा स्वस्यां वृष्यामुपाविशत् ॥१३५॥
सा राज्ञोऽन्तःपुरेणाऽपि[13] ववन्दे भक्तिपूर्वकम् । धर्मं तत्राऽपि चाऽशंसद् दान-तीर्थाभिषेकजम् ॥१३६॥
भूपतिस्तामुवाचैवं भगवत्यखिलां महीम् । एतामपरतन्त्रत्वादभ्राम्यस्तेन पृच्छ्यसे ॥१३७॥
वरमन्तःपुरस्त्रैणं[14] **चोक्षे**! यादृगिदं मम । अन्यत्राऽपि[15] हि कुत्राऽपि किं तादृग्दृष्टपूर्विणी ? ॥१३८॥
**चोक्षा** स्मेरमुखीत्यूचे राजन्नन्तःपुरं निजम् । कूपभेकः कूपमिव किमिदं बहु मन्यसे ? ॥१३९॥
यदस्ति **मिथिलापुर्यां कुम्भ**स्य पृथिवीपतेः । **मल्ली**ति कन्यकारत्नं चूडारत्नं मृगीदृशाम् ॥१४०॥
अङ्गुष्ठमात्रकस्याऽपि श्रीस्तदीयस्य काऽपि या । न सा त्रिदशकन्यासु नागकन्यासु चेक्ष्यते ॥१४१॥
संस्थान[16]लक्ष्मीरन्यैव रूपमप्यन्यदेव हि । लावण्यसम्पदन्यैव तस्याः किं वाऽन्यदुच्यते[17] ? ॥१४२॥
**जितशत्रु**स्तदुक्त्यैव पूर्वस्नेहेन च क्षणात् । तत्प्रार्थनकृते प्रैषीद् दूतं **कुम्भ**नृपान्तिके ॥१४३॥
¶प्राग्जन्मसुहृदां तेषां षण्णां **मल्लि**र्महीभुजाम् । पश्यन्त्यवधिना बोधम**शोकवनिका**न्तरे ॥१४४॥
मध्ये[18]सौधापवरकं रत्नपीठे मनोहरे । आत्मनः प्रतिमां हैमीं पद्मरागकृताधराम् ॥१४५॥
नीलकेशीमिन्द्रनील-स्फटिकोपललोचनाम् । प्रवालमयहस्तांह्रिमातालुशुषिरोदराम्[19] ॥१४६॥
सच्छिद्रां तालुनि तत्र स्वर्णाम्भोजपिधानिकाम् । नितान्तरम्यावयवां कारयित्वा न्यवेशयत् ॥१४७॥ चतुर्भिः कलापकम्॥
प्रतिमापवरकस्य पुरो भित्तावकारयत् । सजालककपाटानि[20] षड् द्वाराणि च **कुम्भ**सूः ॥१४८॥
द्वाराणां च पुरस्तेषां ह्रस्वापवराकांश्च षट् । प्रतिमापृष्ठभित्तौ च सैकद्वारमकारयत् ॥१४९॥
ततः सर्वाहारपिण्डीं प्रतिमायास्तु तालुनि । क्षिप्त्वा स्वर्णाम्बुजेनाऽथ पिधाय बुभुजेऽन्वहम् ॥१५०॥
¶इतश्च तेषां युगपत् षण्णामप्यवनीभुजाम् । आययुर्दूतपुरुषा **मिथिलानाथ**सन्निधौ ॥१५१॥
ऊचे तत्राऽऽद्यदूतेन यत् **साकेतपुरे**श्वरः । अनेकसामन्तशिरोमार्जितांह्रिसरोरुहः ॥१५२॥
महाभुजो महोत्साहो[21] रूपेण मकरध्वजः[22] । निशाकरः सौम्यतया प्रतापेन दिवाकरः ॥१५३॥
बृहस्पतिर्धिषणया[23] **प्रतिबुद्धि**र्महीपतिः । कन्यां ते याचते **मल्लीं** परिणेतुमनिन्दिताम् ॥१५४॥ [त्रिभिर्विशेषकम्]

१. कमण्डलुजलैः ॥ २. प्रक्षाल्य-पवित्रीकृत्य ॥ ३. स्वदर्भासने ॥ ४. धर्मकृते ॥ ५. असृजा शोणितेन दिग्धं लिप्तम् ॥ ६. ***विवेकमूलस्तु*** नि. मु. ॥ ७. समर्थीभूयते ॥ ८. कुत्सितेन शासनेन-दर्शनेन ॥ ९. स्वामीच्छानुवर्तिना ॥ १०. वैरशुद्धिहेतवे ॥ ११. क्रोधज्वलितमानसा ॥ १२. गौरवेण ॥ १३. ***राज्ञाऽन्तःपुरेणाऽपि*** छा. पा. मु. ॥ १४. स्त्रीणां समूहः स्त्रैणम् ॥ १५. ***अन्यत्राऽप्यस्ति*** मु.प्रभृतिषु ॥ १६. देहशोभा ॥१७. ***चाऽन्यदुच्यते*** मु. ॥ १८. सौधं नृपमन्दिरं, तस्य अपवरकस्य गर्भगृहस्य मध्ये ॥ १९. तालुपर्यन्तं शुषिरं रन्ध्रसहितमुदरं यस्यास्ताम् ॥ २०.जालक-कपाटसहितानि ॥ २१. महा उत्साहः-उत्साहशक्तिः यस्य सः ॥ २२. कामदेवः ॥ २३. बुद्ध्या ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कन्या ह्यवश्यं दातव्या पित्राऽन्यस्याऽपि कस्यचित् । तदेनं [१]तत्प्रदानेन स्वजनं कर्तुमर्हसि ॥१५५॥

¶ऊचे द्वितीयदूतेन यच्चम्पानगरीपतिः । युवा [२]युगायतभुजः पीनस्कन्धः सुलोचनः ॥१५६॥

कुलीनश्चतुरः [३]सत्यसङ्गरः [४]सङ्गरोर्जितः । [५]अधीती सर्वशास्त्रेषु शस्त्रेषु च कृतश्रमः ॥१५७॥

[६]चन्द्रवच्छायया **चन्द्रच्छायो** नाम महीपतिः । **मल्लीं** मार्गयति त्वत्तस्तां तस्मै दातुमर्हसि ॥१५८॥[त्रिभिर्विशेषकम्]

¶तृतीयेनाऽपि जगदे यच्छ्रा**वस्तीपुरी**श्वरः । चिन्तामणिः प्रणयिनां क्षत्रियाणां शिरोमणिः ॥१५९॥

शरण्यः शरणेच्छूनां [७]वरेण्यो वीर्यशालिनाम् । क्रीडागारं जयश्रीणामुद्यानं [८]गुणशाखिनाम् ॥१६०॥

**रुक्मी** नाम महीपालस्तव कन्यामभीप्सति । विधेह्युचितयोर्योगमुचितज्ञोऽसि पार्थिव! ॥१६१॥[त्रिभिर्विशेषकम्]

¶तुर्येणाऽप्यभ्यधाय्येवं यत् **काशीनगरी**श्वरः । अद्भुतेनेश्वरत्वेन [९]जितपुण्यजनेश्वरः ॥१६२॥

वाग्मी सौन्दर्यकन्दर्पो दर्पच्छित् [१०]परिपन्थिनाम् । सदाचारपथे पान्थः शासने [११]पाकशासनः ॥१६३॥

[१२]शङ्खच्छेदोज्ज्वलयशाः **शङ्खो** नाम महीपतिः । त्वत्तः प्रार्थते कन्यां प्रतिपद्यस्व तन्नृप! ॥१६४॥[त्रिभिर्विशेषकम्]

¶इत्यूचे पञ्चमेनाऽपि य**द्धास्तिनपुरा**धिपः । हस्तिमल्लो [१३]महास्थाम्ना [१४]लघुहस्तो महाभुजः ॥१६५॥

[१५]अनेकरणनिर्व्यूढो [१६]व्यूढोरस्कः सुधीर्युवा । [१७]प्ररोहणः कीर्तिवल्लेर्गुणरत्नैकरोहणः ॥१६६॥

दीनानाथसमुद्धारोऽ**दीनशत्रु**र्महीपतिः । कन्यां मार्गति **मल्लीं** ते **विदेहा**धीश! देहि ताम् ॥१६७॥[त्रिभिर्विशेषकम्]

¶षष्ठेनाऽपीत्यभिदधे यत् **काम्पील्यपुरा**धिपः । अकम्पनीयो रिपुभिः कुञ्जरैरिव पर्वतः ॥१६८॥

शोभितोऽनल्पसेनाभिर्नदीभिरिव सागरः । सेनानीभिः [१८]सुनासीर इवाऽप्रतिघशक्तिभिः ॥१६९॥

**जितशत्रु**र्जिताशेषशत्रुर्मद्वचसा [१९]नृपः! । तव कन्यामर्थयते दीयतामविलम्बितम् ॥१७०॥[त्रिभिर्विशेषकम्]

¶**कुम्भ**राजो जगादैवं [२०]के नु ते [२१]बहुमानिनः । [२२]अप्रार्थितप्रार्थका रे मूढाः [२३]पार्थिवपांशनाः ? ॥१७१॥

जगत्त्रयशिरोरत्नं कन्यारत्नमिदं हि [२४]नः । अपि शक्रादिदेवानां परिणेतुं न योग्यता ॥१७२॥

मनोरथो भवन्नाथैर्वृथा चक्रे दुराशयैः । दूता! वराकास्तद्यात निर्यात नगरान्मम ॥१७३॥

एवं ते [२५]न्यक्कृता राज्ञा गत्वा स्वस्वामिनां द्रुतम् । [२६]तद्वाचिकमवोचन्त क्रोधानलसमीरणम् ॥१७४॥

¶ततः षडपि राजानस्ते समानपराभवाः । दूतान् परस्परं प्रेष्य निश्चिक्युः **कुम्भ**[२७]विग्रहम् ॥१७५॥

चेलुः षडपि ते [२८]वर्षधराद्रय इवौजसा । [२९]स्थगयन्तो महीं सैन्यैः प्रापुश्च **मिथिलापुरीम्** ॥१७६॥

प्रवेश-निर्गमद्वारनिवारणविचक्षणाः । तेऽरुन्धन् वेष्टयित्वा तां चन्दनद्रुमिवाऽहयः ॥१७७॥

¶**कुम्भो**ऽपि तेन रोधेन खिन्नो कतिपयैर्दिनैः । चिन्तापन्नो यावदस्थात् ताव**न्मल्लिः** समाययौ ॥१७८॥

उद्विग्न इव किं तात! तिष्ठसीति तयोदितः । उद्वेगकारणं [३०]सर्वमाचख्यौ **कुम्भ**भूपतिः ॥१७९॥

**मल्लि**रप्यालपत् तात! प्रत्येकं गूढपूरुषैः । तुभ्यं दास्यामि **मल्ली**मित्युक्त्वा षडपि बोधय ॥१८०॥

तस्या मम प्रतिमायाः पुरोऽपवरकेषु ते । क्रमेण सायमानेयाः प्रच्छन्नाः श्वेतवाससा ॥१८१॥

तथैव विदधे राजा तेऽप्याजग्मुस्तथैव हि । कपाटजालकै**र्मल्ली**प्रतिमां ददृशुश्च ताम् ॥१८२॥

अहो! पुण्यैरियं प्रापि सुरूपा चारुलोचना । इति **मल्ली**धिया दध्युस्तेऽनुरागेण पार्थिवाः ॥१८३॥

प्रतिमापृष्ठद्वारेण प्राविशत् तत्र **मल्ल्य**पि । प्रतिमान्तरिता तालुपिधानाब्जम[३१]पानयत् ॥१८४॥

[३२]प्राक्क्षिप्तकुथिताहारगन्धः सद्यश्च निर्ययौ । [३३]शकृद्गन्ध इवाऽसह्यः [३४]प्रसह्य घ्राणबाधकः ॥१८५॥

कपाटजालैस्तदपवरकेष्वपि [३५]सोऽविशत् । षण्णामपि नरेन्द्राणां दारयन्निव नासिकाः ॥१८६॥

---

१. कन्याप्रदानेन ॥ २. युगवदायतौ भुजौ यस्य सः ॥ ३. सत्यः सङ्गरः प्रतिज्ञा यस्य सः ॥ ४. रणे बलवान् ॥ ५. अधीतमनेनेति ॥ ६. कान्त्या चन्द्रसमः ॥ ७. श्रेष्ठः ॥ ८. गुणा एव शाखिनः वृक्षाः, तेषाम् ॥ ९. जितः पुण्यजनानां यक्षाणां ईश्वरः कुबेरः येन सः ॥ १०. शत्रूणाम् ॥ ११. इन्द्रः ॥ १२. शङ्खच्छेदः शङ्खखण्डवद् उज्ज्वलं यशो यस्य सः ॥ १३. महाबलेन ॥ १४. लघुः शीघ्रकारी हस्तो यस्य सः, 'शीघ्रवेधी लघुहस्तः' (अभि.चिन्ता.श्लो.७७२) ॥ १५. अनेकयुद्धेषु जितवान् ॥ १६. उन्नतवक्षस्थलः ॥ १७. अङ्कुरः ॥ १८. इन्द्रः ॥ १९. *नृपः* मु.प्रभृतिषु ॥ २०. *के तु ते* मु. ॥ २१. गर्विष्ठाः ॥ २२. अप्रार्थ्यस्य प्रार्थयितारः ॥ २३. नृपाधमाः ॥ २४. अस्माकम् ॥ २५. तिरस्कृताः । *निकृताः* मु. ॥ २६. तत्सन्देशम् ॥ २७. युद्धम् ॥ २८. वर्षधरपर्वताः ॥ २९. आच्छादयन्तः ॥ ३०. *तस्या आचख्यौ* मु. ॥ ३१. उदघाटयत् ॥ ३२. *प्रक्षिप्त०* मु. ॥ ३३. शकृद् विष्ठा, तद्वद् गन्धो यस्य सः ॥ ३४. हठात् ॥ ३५. *सोऽभवत्* हे. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिधाय नासिकां तेऽपि वाससा गन्धतस्ततः । पराङ्मुखा अजायन्त वैरिभ्य इव कातराः ॥१८७॥
भोः! किं पराङ्मुखा यूयमिति **मल्ल्या**ऽभिभाषिताः । अमुं न शक्नुमः सोढुं दुर्गन्धमिति तेऽभ्यधुः ॥१८८॥
**मल्लि**स्तान् प्रत्युवाचैवं सौवर्णी[१] प्रतिमा ह्यसौ । अत्राऽप्यन्वहमाहारक्षेपाद् गन्धोऽयमीदृशः ॥१८९॥
किं ब्रूमस्[२]तस्य[३] यद्गर्भे पित्रोः शुक्रासृगुद्भवम्[४] । पश्चाच्च कललीभूतं[५] मांसपेशीत्वभाक्[६] ततः ॥१९०॥
ततो मातृकृताहारनिर्यासरस[७]पोषितम् । जरायु[८]र्नरकमग्नं वपुर्विण्मूत्रवासितम् ॥१९१॥युग्मम्॥
एवंविधसमुत्पत्तेर्विष्ठाकोष्ठस्य वर्ष्मणः[९] । रसासृग्-मांस-मेदो-ऽस्थि-मज्ज-शुक्रांचितात्मनः[१०] ॥१९२॥
मूत्रैकस्रोतसः श्लेष्मदृते[११]र्दुर्गन्धधारिणः । किं पुरस्रोतस[१२] इव सारमस्ति मनागपि ? ॥१९३॥युग्मम्॥
अत्र संस्कारहेतुश्च कर्पूरादिसुगन्ध्यपि । मलसात् स्याल्लवणसात् सुधावृष्टिरिवोषरे ॥१९४॥
बहिरन्तश्च बीभत्से कथङ्कारमिहाऽङ्गके । अङ्गानुरागं कुर्वन्तु मनागपि विवेकिनः ॥१९५॥
इतो भवे तृतीय[१३]स्मिन् यद्भवद्भिर्मया सह । तपः प्रव्रजितैश्चक्रे मुग्धाः! स्मरत तन्न किम् ? ॥१९६॥
**मल्ली**वचो विमृशतां[१४] तत् तेषां पृथिवीभुजाम् । जातिस्मरणमुत्पेदे किं स्यान्नाऽर्हदनुग्रहात् ? ॥१९७॥
ततो जालकपाटानि श्री**मल्लि**रुदघाटयत् । ते चाऽभ्युपेत्य षडपि प्रबुद्धा एवमब्रुवन् ॥१९८॥
स्मरामो यद्भवे पूर्वे सप्ताऽपि सुहृदो वयम् । सम्भूय कृतसङ्केतास्तपस्तीव्रमकृष्महि ॥१९९॥
बोधिताः स्मस्त्वया साधु नरकात् साधु रक्षिताः । आदिशाऽतः परं कृत्यं गुरुस्त्वमसि नः प्रभो! ॥२००॥
प्रव्रज्या समये ग्राह्येत्युदीर्य विससर्ज तान् । षडपि क्ष्मापतीन् **मल्लि**र्जग्मुः स्वं स्वं पुरं च ते ॥२०१॥
¶तीर्थं प्रवर्तयेत्युक्ते तदा लौकान्तिकैः[१५] सुरैः । **मल्ल्य**दाद् वार्षिकं दानं पूर्णार्थं[१६] जृम्भकामरैः ॥२०२॥
जन्मतोऽब्दशते पूर्णे पञ्चविंशधनून्नतिः । **कुम्भ**राज-सुरेन्द्राद्यैः कृतनिष्क्रमणोत्सवा[१७] ॥२०३॥
**जयन्ती**[१८]नामशिबिकारत्नमारुह्य **मल्ल्य**थ । **सहस्राम्रवणं** नाम जगामोपवनोत्तमम् ॥२०४॥[युग्मम्]
कृष्णेक्षुवाटैरभ्युद्यत् कृष्णपक्षमिव क्वचित् । उच्छुक्लपक्षमिव च क्वचित् पुण्ड्रेक्षुवाटकैः[१९] ॥२०५॥
नागरङ्गैः[२०] पक्वफलैः शोणाश्मभिरिवाचितम्[२१] । राजमानं मरुबकैर्नीलबद्धमिवाऽभितः[२२] ॥२०६॥
नारीकुचवदुष्णत्वात् पथिकैः शीतपीडितैः । आचम्यमानकूपाम्बु सेव्यमानवटद्रुमम् ॥२०७॥
हेमन्तलक्ष्मीहसितैरिव कुन्दैर्विकस्वरैः । शोभमानं तदुद्यानं प्रविवेश जगद्गुरुः ॥२०८॥चतुर्भिः कलापकम्॥
बहिःपरिच्छदार्हाणां त्रिभिर्नृणां[२३] शतैः समम् । स्त्रीणामप्यान्तर[२४]परीवारार्हाणां त्रिभिः शतैः ॥२०९॥
मार्गस्य शुक्लैकादश्यां पूर्वाह्णे[२५] भेऽ**श्वयुज्य**थ । यथाविधि प्रभु**र्मल्लिः** प्रवव्राज कृताष्टमः(मा) ॥२१०॥[युग्मम्]
मनःपर्ययमुत्पेदे **मल्ले**र्ज्ञानं तदैव हि । तस्मिन्नेव दिनेऽशोकमूले केवलमप्यभूत् ॥२११॥
शक्रादिभिश्च समवसरणं विदधेऽमरैः । धनुःशतत्रयोत्तुङ्गचैत्यपादपशोभितम् ॥२१२॥
तत्र प्रविश्य प्राग्द्वारा[२६] **मल्लि**[२७]स्त्रिश्चैत्यपादपम् । प्रदक्षिणीकृत्य "नमस्तीर्थाये"त्यभिधाय च ॥२१३॥
प्राक्सिंहासनमध्यास्त प्राङ्मुखा[२८]ऽथाऽन्यदिक्ष्वपि । सद्यस्तत्प्रतिरूपाणि विचक्रुर्व्यन्तरामराः ॥२१४॥[युग्मम्]
अवतस्थे यथास्थानं श्रीमान् सङ्घश्चतुर्विधः । **कुम्भ**स्ते षट् च राजानोऽनुशक्रं समुपाविशन् ॥२१५॥
**देवराज**[२९]-**कुम्भ**राजौ नमस्कृत्य जगद्गुरुम् । श्रद्धाधौता[३०]न्तरात्मानाविति तुष्टुवतुर्मुदा ॥२१६॥
¶"दिष्ट्या प्रणमतां भाले त्वत्पादनखरश्मयः । भवन्ति भवभीतानां रक्षातिलकसन्निभाः ॥२१७॥

१. सुवर्णमयी ॥ २. ***ब्रूमस्तद्धि*** हे. ॥ ३. वपुषः ॥ ४. वीर्य-शोणिताभ्यामुद्भूतम् ॥ ५. कललं गर्भवेष्टनचर्म, तद्वद् भूतम् ॥ ६. मांसपेशी गर्भस्थप्राण्यवयवविशेषः ॥ ७. निर्यासरसः-सत्त्वरसः ॥ ८. गर्भाशयः ॥ ९. देहस्य ॥ १०. ***०शुक्राञ्चितात्मनः*** मु. ॥ ११. दृतिः-चर्ममयी, पात्रविशेषः ॥ १२. ***पुरःस्रोतसः*** छा. पा. हे. खंता. पाता.; 'खाळ-गटर' इति भाषायाम् ॥ १३. ***तृतीयेऽस्मिन्*** मु. ॥ १४. विचारयताम् ॥ १५. ***लौकान्तिकामरैः*** मु. ॥ १६. जृम्भकदेवैः पूर्णः अर्थो-धनं यस्मिन् तद्-दानम् ॥ १७. ***०निष्क्रमणोत्सवः*** पाता. ॥ १८. ***जरतीनाम०*** मु. ॥ १९. श्वेतेक्षुवाटैः ॥ २०. ***नागरङ्गीपक्वफलैः*** ला. मु. ॥ २१. ***शोणाश्मखचितैरिव*** हे., ***शोणाश्मभिरिवाञ्चितम्*** मु.; शोणमणिभिः ॥ २२. ***मरुचकैर्नील०*** मु. ॥ २३. ***नृणां दशशतैः समम्*** मु. खंता. पाता. ॥ २४. ***स्त्रीणामप्यन्तर०*** मु. ॥ २५. प्रातःकाले ॥ २६. पूर्वद्वारेण ॥ २७. ***मल्लिस्तं चैत्य०*** ला. मु. ॥ २८. ***प्राङ्मुखो०*** मु. ॥ २९. शक्रः ॥ ३०. श्रद्धया धौतः निर्मलीकृतः अन्तरात्मा ययोः तौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आजन्मब्रह्मचारित्वाद्दीक्षा ते जन्मतोऽपि हि । [१]व्रतपर्यायदेशीयं मन्ये जन्माऽपि [२]तत् तव ॥२१८॥

किं देव[३]सद्मना येन न यत्र तव दर्शनम् ? । इदं तु भूतलं श्रेयस्त्वदालोकपवित्रितम् ॥२१९॥

नृ-देव-तिर्यग्जन्तूनां भीतानां भववैरित: । दुर्गं त्वदीयं समवसरणं शरणं प्रभो! ॥२२०॥

कुकर्माण्य[४]न्यकर्माणि त्वत्पादप्रणतिं विना । यै: कर्मण्येव सूयन्ते संसारस्थितिकारणम् ॥२२१॥

दुर्ध्यानान्यन्यध्यानानि भवद्ध्यानं विना खलु । यैरात्मा [५]बध्यते बाढं निजैर्लूतेव तन्तुभि: ॥२२२॥

कथाश्च दु:कथा एव भवद्गुणकथां विना । यकाभिस्तित्तिरिरिव वाग्भिर्विपदमश्नुते ॥२२३॥

त्वत्पादपद्मसेवाया: [६]प्रभावेण जगद्गुरो! । भव[७]च्छेदोऽस्तु मे यद्वा त्वयि भक्तिर्भवे भवे" ॥२२४॥

एवं स्तुत्वा विरतयोरमरेन्द्र-नरेन्द्रयो: । श्रोतुं चोत्कण्ठिते सङ्घे श्री**मल्लि**र्देशनां व्यधत् ॥२२५॥

"स्वतोऽप्यपार: संसारो वर्धते च विशेषत: । रागादिना पूर्णमासीदिनेनेव सरित्पति: ॥२२६॥

[८]अमन्दानन्दजनने [९]साम्यवारिणि मज्जताम् । जायते सहसा पुंसां राग-द्वेषमलक्षय: ॥२२७॥

[१०]प्रणिहन्ति क्षणार्धेन साम्यमालम्ब्य कर्म तत् । यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभि: ॥२२८॥

कर्म जीवश्च संश्लिष्टं [११]परिज्ञातात्मनिश्चय: । निर्भिन्नीकुरुते साधु: सामायिकशलाकया ॥२२९॥

रागादिध्वान्तविध्वंसे कृते [१२]सामायिकांशुना । स्वस्मिन् स्वरूपं पश्यन्ति योगिन: परमात्मन: ॥२३०॥

स्निह्यन्ति जन्तवो नित्यवैरिणोऽपि परस्परम् । अपि स्वार्थकृते [१३]साम्यभाज: साधो: प्रभावत: ॥२३१॥

चेतनाचेतनैर्भावैरिष्टानिष्टतया स्थितै: । न मुह्यति मनो यस्य तस्य साम्यं [१४]प्रचक्ष्यते ॥२३२॥

गोशीर्षचन्दनालेपे [१५]वासिच्छेदे च [१६]वाहयो: । [१७]अभिन्ना चित्तवृत्तिश्चेत् तदा साम्यमनुत्तमम् ॥२३३॥

[१८]अभिष्टोतरि च प्रीते रोषान्धे [१९]चाऽभिशप्तरि । यस्याऽविशेषणं चेत: स साम्यमवगाहते ॥२३४॥

हूयते न जप्यते न दीयते वा न किञ्चन । अहो! [२०]अमूल्यक्रीतीयं साम्यमात्रेण निर्वृति: ॥२३५॥

प्रयत्नकृष्टै: क्लिष्टैश्च रागाद्यै: किमुपासितै: ? । अयत्नलभ्यं हृद्यं च धार्यं साम्यं सुखावहम् ॥२३६॥

परोक्षार्थप्रतिक्षेपात् स्वर्ग-मोक्षावपह्नुताम् । साम्यशर्म [२१]स्वसंवेद्यं नास्तिकोऽपि न निह्नुते ॥२३७॥

कविप्रलापरूढेऽस्मिन्नमृते किं विमुह्यते ? । स्वसंवेद्यरसं हन्त पेयं साम्यरसायनम् ॥२३८॥

[२२]स्वाद्य-लेह्य-चूष्य-पेयरसेभ्यो विमुखा अपि । पिबन्ति यतय: स्वैरं साम्यामृतरसं मुहु: ॥२३९॥

कण्ठपीठे लुठन् [२३]भोगिभोगो [२४]मन्दारदाम च । यस्याऽप्रीत्यै न वा नो वा प्रीत्यै स समतापति: ॥२४०॥

न गूढं किञ्चनाऽऽ[२५]चार्यमुष्टि: काचिन्न वाऽपरा । बालानां सुधियां चैकं साम्यं भवरुजौषधम् ॥२४१॥

अतिक्रूरतरं कर्म शान्तानामपि योगिनाम् । यद् घ्नन्ति साम्यशस्त्रेण रागादीनां कुलानि ते ॥२४२॥

अयं प्रभाव: परम: समत्वस्य प्रतीयताम् । यत् पापिन: क्षणार्धेन [२६]पदमिय्रति शाश्वतम् ॥२४३॥

यस्मिन् सति सफलतामसत्यफलतां व्रजेत् । रत्नत्रयं स्वस्ति तस्मै समत्वाय महौजसे ॥२४४॥

संसर्गेऽप्युपसर्गाणामपि मृत्यावुपस्थिते । न तत्कालोचितं किञ्चित् साम्यादौ[२७]पयिकं वरम् ॥२४५॥

एकं मोक्षतरोर्बीजमिहा[२८]ऽप्यद्भुतशर्मदम् । तस्मात् साम्यं विधातव्यं राग-द्वेष[२९]जयैषिणा" ॥२४६॥

तया देशनया भूपा: षट् तेऽन्येऽपि प्रवव्रजु: । सञ्जज्ञिरे श्रावकास्तु **कुम्भ**प्रभृतयस्तदा ॥२४७॥

---

१. दीक्षासदृशम् ॥ २. *ते तत:* हे. ॥ ३. देवलोकेन ॥ ४. अन्यानि कर्माणि-कृत्यानि कुकर्माणि ॥ ५. ***बाध्यते*** छा. पा. ला., ***वञ्च्यते*** हे. ॥ ६. ***प्रभावेन०*** खंता. पाता. ॥ ७. ***०च्छेदोऽस्तु यद्वाऽस्तु त्वयि०*** मु. ॥ ८. ***अमन्दानन्दजनको*** मु. ॥ ९. समताजले ॥ १०. ***प्रतिहन्ति०*** मु. ॥ ११. परिज्ञात आत्मनो निश्चयो येन स:, आत्मज्ञानीत्यर्थ:; ***परिज्ञानात्म०*** मु., तत्र तु परिज्ञानेन आत्मनो निश्चयो येन स:, आत्मज्ञानीत्यर्थ:॥ १२. सामायिकसूर्येण ॥ १३. ***स्वाम्य०*** पाता. ॥ १४. ***प्रचक्षते०*** खंता. पाता. ॥ १५. तक्षण्या छेदे सति ॥ १६. हस्तवाची वाहाशब्दोऽप्यस्ति ॥ १७. ***अभिन्नचित्तवृत्तिश्चेत्*** ला. ॥ १८. स्तुतिं कुर्वति ॥ १९. ***चातिशप्तरि*** मु., ***वाविशस्तरि*** हे.; निन्दां कुर्वति ॥ २०. विना मूल्येन क्रीता ॥ २१. प्रत्यक्षम् ॥ २२. ***खाद्यलेह्यचूष्य०*** मु. ॥ २३. सर्पदेह: ॥ २४. कल्पवृक्षपुष्पमाला ॥ २५. आचार्यमुष्टि:-आचार्येण गोप्यं रहस्यम् ; ***किञ्चनावार्यमुष्टि:*** मु. ॥ २६. ***०पदमिच्छति०*** मु. ॥ २७. वर: प्रधान: उपाय इत्यर्थ: ॥ २८. ***०मिहात्य०*** खंता. मु. ॥ २९. ***०जयेषिणा*** मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भिषगा**द्या गणभृतोऽष्टाविंशतिरथाऽभवन् । भगवद्देशनान्ते च गणभृद्देशनां व्यधात् ॥२४८॥
द्वितीयस्मिन् दिने **मल्लि**प्रभोस्तत्रैव कानने । **विश्वसेन**नृपाज्जज्ञे परमान्नेन पारणम् ॥२४९॥
[१]**मल्लि**पादान्नमस्कृत्य देवराजादय: सुरा: । **कुम्भ**राजादयो भूपा: स्थानं निजनिजं ययु: ॥२५०॥
¶तत्तीर्थजन्मा **कुबेर**यक्ष [२]इन्द्रायुधद्युति: । चतुर्मुखो गजरथश्चतुर्भिर्दक्षिणैर्भुजै: ॥२५१॥
[1]वरदेन [2]पर्शु[3]शूलभृद्भ्याम[4]भयदेन च । वामैर्[1]बीजपूर-[2]शक्ति-[3]मुद्गर[4]काक्षसूत्रिभि: ॥२५२॥
तत्तीर्थभूश्च **वैरोट्या** कृष्णाङ्गी कमलासना । [३]भान्ती दोर्भ्यां दक्षिणाभ्यां [1]वरदेनाऽ[2]क्षसूत्रिणा ॥२५३॥
[४][1]मातुलिङ्ग-[2]शक्तिभृद्भ्यां वामदोर्भ्यां च शोभिता । श्री**मल्ले**रर्हतोऽभूतामुभे शासनदेवते ॥२५४॥
¶तत: स्थानादथाऽन्यत्र ग्रामाकर-पुरादिषु । भव्यलोकावबोधाय विजहार महीं प्रभु: ॥२५५॥
¶चत्वारिंशत्सहस्राणि [५]श्रमणानां महात्मनाम् । सहस्रा पञ्चपञ्चाशदा[६]र्यिकाणां तपोजुषाम् ॥२५६॥
[७]चतुर्दशपूर्वभृतां साष्टषष्टिश्च षट्शती । [८]अवधिज्ञानयुक्तानां द्वाविंशतिशती पुन: ॥२५७॥
[९]मनोविदां सप्तदशशती पञ्चाशदन्विता । [१०]केवलज्ञानधराणां द्वाविंशतिशती पुन: ॥२५८॥
[११]जातवैक्रियलब्धीनां त्रिसहस्री [१२]शतोनिता । [१३]उत्पन्नवादलब्धीनां चतुर्दश शतानि [१४]च ॥२५९॥
[१५]श्रावकाणां लक्षमेकं सत्र्यशीतिसहस्रकम् । [१६]श्राविकाणां त्रिलक्षी च ससप्ततिसहस्रिका ॥२६०॥
संवत्सरशतन्यूनां पञ्चपञ्चाशतं प्रभो: । समासहस्रान् विहर्तु: परिवारो ह्यसावभूत् ॥२६१॥
**सम्मेता**द्रिं **मल्लि**रगाच्चक्रे चाऽनशनं समम् । साध्वीनामथ साधूनां पञ्चशत्या पृथक् पृथक् ॥२६२॥
मासान्ते फाल्गुन[१७]शुद्धद्वादश्यां [१८]**याम्य**भे विभु: । निर्वाणमासदत् सार्धं साध्वीभि: साधुभिश्च तै: ॥२६३॥
कौमारे व्रतपर्याये चायु**र्मल्लि**जिनेशितु: । वर्षाणां पञ्चपञ्चाशत्सहस्राण्यभवन् विभो: ॥२६४॥
**अरनाथ**स्य निर्वाणाच्छ्री**मल्लि**जिननिर्वृति: । कोटीसहस्रे वर्षाणां समतिक्रान्तवत्यभूत् ॥२६५॥

तत्कालमुपेत्य सर्वतोऽप्यमरेन्द्रैरमरैश्च कोटिश: ।
निर्वाणमहोत्सव: प्रभो: श्री**मल्ले**र्विदधे यथाविधि ॥२६६॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे पर्वणि **श्रीमल्लिनाथ**चरित-
वर्णनो नाम षष्ठ: सर्ग: ॥

---

१. ***मल्लिपादौ नम०*** मु. ॥ २. इन्द्रधनुरिव कान्तिर्यस्य स: ॥ ३.शोभमाना ॥ ४. ***मातुलुङ्ग०*** खंता. पाता. ॥ ५.श्रमणानां सङ्ख्या ४०सहस्रमिता ॥ ६. साध्वीनां सङ्ख्या ५५सहस्रमिता ॥ ७. चतुर्दशपूर्विणां सङ्ख्या ६६८मिता ॥ ८. अवधिज्ञानिनां सङ्ख्या २२००मिता ॥ ९. मन:पर्ययज्ञानिनां सङ्ख्या १७ ५०मिता ॥ १०. केवलज्ञानिनां सङ्ख्या २२००मिता ॥ ११. वैक्रियलब्धीनां सङ्ख्या २९००मिता ॥ १२. शतेन न्यूना ॥ १३. वादलब्धीनां सङ्ख्या ४०० मिता ॥ १४. ***०शतानि तु*** खंता. पाता. ॥ १५. श्रावकाणां सङ्ख्या १लक्ष८३सहस्रमिता ॥ १६. श्राविकाणां सङ्ख्या ३लक्ष७०सहस्रमिता ॥ १७. ***फाल्गुनशुद्धदशम्यां*** मु. ॥ १८. भरणीनक्षत्रे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥सप्तमः सर्गः॥

## ॥श्रीमुनिसुव्रतनाथचरितम्॥

**मुनिसुव्रत**नाथस्य देशनायां [1]रदत्विषः। जयन्ति [2]ज्ञानदुग्धाब्धेर्वेलाः [3]पावितभूतलाः ॥१॥
विदुषां [4]प्रतिभोल्लासे सारस्वतमिवाऽमलम्। [5]**मुनिसुव्रत**देवस्य चरितं कीर्तयिष्यते ॥२॥
¶[6]अथाऽत्रैव **जम्बूद्वीपे विदेहेष्वपरे**षु तु। विजये **भरता**ख्येऽस्ति **चम्पे**ति वि[7]पुला पुरी ॥३॥
तस्यामासीन्महाबाहुर्लोकोत्तरपराक्रमः। [8]सुरश्रेष्ठ इव **सुरश्रेष्ठो** नाम महीपतिः ॥४॥
स [9]चतुर्धाऽप्यभूद्वीरो दीनत्राता रणोत्कटः। [10]प्रार्थनाकल्पविटपी जिनधर्मधुरन्धरः ॥५॥
[11]खुरलीसमयेष्वेव सोऽस्त्रविद्यामदर्शयत्। न [12]पुना रणरङ्गेषु साधयन्नाज्ञया नृपान् ॥६॥
विनयादीन् गुणांस्तस्य वर्णयन्तो दिवानिशम्। [13]वाचंयमत्वं मुनयो [14]जहुर्[15]वाचंयमा अपि ॥७॥
सोऽन्यदा **नन्दनं** नाम मुनिं हृदयनन्दनम्। उद्याने समवसृतं ववन्दे भक्तितः सुधीः ॥८॥
तद्देशनावचः श्रुत्वा [16]मोहपङ्कजलप्लवम्। स समासादयामास भववैराग्यभावनाम् ॥९॥
मुनेस्तस्यैव पादान्ते प्रव्रज्यां प्रत्यपादि सः। अपालयद् यथावच्च सात्त्विकानां शिरोमणिः ॥१०॥
अर्हद्भक्त्यादिभिः स्थानैस्तीर्थकृन्नामकर्म सः। अर्जयित्वा विपद्याऽभूत् **प्राणते** त्रिदशोत्तमः ॥११॥
¶इतश्च्युत्वा ह्यसावर्हन् **हरिवंशे**ऽभवत् किल। तस्य वंशस्य तेनेयमुत्पत्तिः पूर्वमुच्यते ॥१२॥
तथाहि **जम्बूद्वीप**स्याऽमुष्य क्षेत्रेऽत्र **भारते**। **कौशाम्बी**नाम पुर्यस्ति [17]**वत्स**मण्डलमण्डनम् ॥१३॥
तस्यां यशोभिः श्री[18]खण्डद्रवैरिव सुगन्धिभिः। [19]मण्डिताशामुखो जज्ञे **सुमुखो** नाम भूपतिः ॥१४॥
नृपैरलङ्घ्या तस्याऽऽज्ञा जाङ्गुलीव भुजङ्गमैः। ऐश्वर्यमद्वितीयं च [20]वज्रपाणेरिवाऽभवत् ॥१५॥
सामकृत् सामयोगेषु पितेव मृदुलाशयः। दानकृद्दानसाध्येषु [21]परेतेष्विव मान्त्रिकः ॥१६॥
अयस्कान्त इवाऽयःसु मायाविषु विभेदकृत्। स दण्डभृच्च दण्ड्येषु [22]दण्डपाणिरिवाऽपरः ॥१७॥
अपरेद्युर्वसन्तर्तौ प्राप्ते मदनबान्धवे। चचाल गन्तुमुद्याने रन्तुकामः स भूपतिः ॥१८॥
स गच्छन् कुञ्जरारूढो **वनमाला**मभिख्यया। भार्यां **वीरकुविन्द**स्याऽरविन्दाक्षीमुदैक्षत ॥१९॥
पीनोन्नतकुचद्वन्द्वां मृणालमृदुदोर्लताम्। वज्राल्पमध्यां [23]पुलिनविपुलश्रोणिमण्डलाम् ॥२०॥
सरिदावर्तगम्भीरनाभिं [24]करिकरोरुकाम्। [25]नव्यकोकनदताम्रपाणिपादां नतभ्रुवम् ॥२१॥
[26]श्रोण्या विस्रंसि बिभ्राणां वासो वामेन पाणिना। कुचस्थलादुत्तरीयं निपतद्दक्षिणेन तु ॥२२॥
तां पश्यन्नवनीभर्ता कामार्तिविधुरः क्षणात्। मन्दीकृतद्विपगतिर्मनस्येवमचिन्तयत् ॥२३॥[चतुर्भिः कलापकम्]
इयं कस्याऽपि शापेन दिवो भ्रष्टा किमप्सराः ?। वनलक्ष्मीः स्वयमथ वसन्तश्रीरथ स्वयम् ? ॥२४॥
रतिः स्मरवियुक्ता वा ? [27]नागी वा भुवमागता ?। स्त्रीरत्नं वा किमप्येतत् कौतुकाद् वेधसा कृतम् ? ॥२५॥
एवं विचिन्तयन् राजा तत्रैवाऽभ्रमयद् गजम्। प्रतीक्षमाणः कमपीवाऽग्रतः प्रययौ न हि ॥२६॥

---

१. दन्तकान्तयः॥ २. ज्ञानक्षीरसमुद्रस्य ऊर्मयः॥ ३. पवित्रितं भूतलं याभिस्ताः॥ ४. बुद्धेर्विकासकरणे॥ ५. ***मुनिसुव्रतनाथस्य*** ला.॥ ६. ***अस्मिन्नेव*** ला. सं. पाता.॥ ७. विशाला॥ ८. इन्द्रः॥ ९. चत्वारो वीराः- त्राणवीरः, रणवीरः, दानवीरः, धर्मवीरः॥ १०. प्रार्थनासु कल्पवृक्षसदृशः॥ ११. शस्त्राभ्याससमये॥ १२. पुनः॥ १३. मौनव्रतम्॥ १४. **०जहु०** मु. खंता.॥ १५. मौनिनः॥ १६. मोहपङ्क-जलतरण्डम्॥ १७. वत्सदेशस्य भूषणम्॥ १८. चन्दनरसैः॥ १९. भूषितं दिशां मुखं येन सः॥ २०. इन्द्रस्य॥ २१. प्रेतेषु॥ २२. यमः॥ २३. पुलिनं जलोज्झितं नदीतीरम्, तद्वद् विपुलं विस्तीर्णं श्रोणिमण्डलं कटीतटं यस्याः सा, ताम्॥ २४. करिकरः हस्तिशुण्डदण्ड इव ऊरू यस्याः सा, ताम्॥ २५. नव्यं नूतनं कोकनदं रक्तकमलं तद्वद् आ ईषद् ताम्रं रक्तं पाणिपादं यस्याः सा, ताम्॥ २६. कट्याः, कटीतटात् पतद् वस्त्रं वामेन हस्तेन, स्तनस्थलाच्च पतद् वस्त्रं दक्षिणेन हस्तेन धारयन्तीम्॥ २७. नागवधूः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वामिन्! सर्वं बलं प्राप्तं किमद्याऽपि विलम्ब्यते ? । भावं जिज्ञासुरित्यूचे सचिवस्तं नरेश्वरम् ॥२७॥
अमात्यवचसा चेतः संस्थाप्य कथमप्यथ । जगाम **यमुनोद्वर्तं** महोद्यानं महीपतिः ॥२८॥
न हि [1]चूतवने [2]मञ्जुमञ्जरीपुञ्जमण्डले । नाऽप्यशोकवने नृत्यन्नवपल्लवशालिनि ॥२९॥
न वा बकुलषण्डेऽपि मधुव्रतकुलाकुले । [3]तालवृन्तायितदले कदलीविपिनेऽपि न ॥३०॥
[4]मधुश्रीकर्णिकाभूते कर्णिकारवने न च । नाऽन्यत्राऽपि रतिं प्राप तया हृतमना: नृपः ॥३१॥ [त्रिभिर्विशेषकम्]
¶सचिवः **सुमति**र्नाम तं तथोद्विग्नमानसम् । एवमज्ञ इवोवाच भावज्ञोऽपि महीपतिम् ॥३२॥
विकारो मानसो वाऽथ भयं वा शत्रुसम्भवम् । मोहाय क्षितिपालानां तृतीयं सम्भवेन्न हि ॥३३॥
न तावद् विक्रमाक्रान्तजगतस्ते द्विषद्भयम् । मनोविकारो यद्यस्ति यद्यगोप्यश्च तद् वद ॥३४॥
राजाऽपि व्याजहारैवं त्वया निर्व्याजशक्तिना । वशीकृता विद्वि[5]षन्तः साक्षिणौ तु भुजौ मम ॥३५॥
[6]भवान् मनोविकारेऽपि प्रतीकारकरः खलु । इति मे निश्चयस्तेन कथयामि कथं न ते ? ॥३६॥
इहाऽधुनैवाऽऽ[7]पतता मया पथि निरीक्षिता । सर्वस्त्रीरूपसर्वस्व[8]लुण्टाकी काचिदङ्गना ॥३७॥
मदीयमप्यपहृतं तया चेतः स्मरातुरम् । तेन ताम्यामि सचिव! कुरूपायमिहोचितम् ॥३८॥
उवाच सचिवोऽप्येवं सा हि ज्ञाता मया प्रभो! । भार्या **वीरकुविन्द**स्य **वनमाले**ति नामतः ॥३९॥
एष सम्पादयिष्यामि शीघ्रमेव तव प्रभो! । परं सहपरीवारो यातु स्वामी स्वमालयम् ॥४०॥
इत्युक्तः शिबिकारूढो विमना रोगवानिव । चिन्तयन् **वनमालां** तां स्वं स्थानमगमन्नृपः ॥४१॥
¶**आत्रेयिकां** नाम परिव्राजिकां **सुमति**स्ततः । प्राहिणोद् **वनमालायै** विचित्रोपायपण्डिताम् ॥४२॥
जगाम **वनमालाया** वेश्माऽऽ**त्रेय्य**पि तत्क्षणम् । तया च वन्दिता साऽऽशीःपूर्वमेवमवोचत ॥४३॥
वत्से! कुतोऽद्य [9]विच्छाया पद्मिनीव हिमागमे ? । दिवा शशिकलाकारौ कुतो [10]गण्डौ च पाण्डुरौ ? ॥४४॥
शून्यप्रक्षिप्तदृष्टिश्च ध्यायन्ती किं नु तिष्ठसि ? । [11]आख्यातपूर्विणी सर्वं दुःखमाख्यासि किं न हि ? ॥४५॥
निःश्वस्य **वनमाला**ऽपि ललापैवं कृताञ्जलिः । [12]दुष्प्रापार्थप्रार्थकतामात्मीयां कथयामि काम् ? ॥४६॥
[13]क्व रासभी ? वाजिराज उच्चैरुच्चैःश्रवाः क्व च ? । क्वाऽसौ [14]शृगालयुवतिः ? क्व केशरिकिशोरकः ? ॥४७॥
क्व वा वराकी चटका ? पक्षिणा[15]मधिपः क्व च ? । क्वाऽहं [16]कुविन्दी ? तादृक् क्व दुर्लभः प्राणवल्लभः ? ॥४८॥
अप्येतेषां भवेद्योगः कथञ्चन विधेर्वशात् । हीनजातेर्मम तु तत्सङ्गः स्वप्नेऽप्यसम्भवी ॥४९॥
**आत्रेयिका**ऽप्येवमूचेऽर्थं ते सम्पादयाम्यहम् । असाधनीयं पुण्यानां मन्त्र-तन्त्रविदां च किम् ? ॥५०॥
प्रत्यूचे **वनमालै**वं मयाऽद्य पथि वीक्षितः । नृपतिः कुञ्जरारूढः प्रत्यक्ष इव मन्मथः ॥५१॥
अपि चन्दननिःस्यन्दसोदरात् तस्य दर्शनात् । देहे मदीये प्रोद्भूतः प्रभूतो [17]मन्मथज्वरः ॥५२॥
[18]ज्वरहृत्तक्षकचूडामणिवत् तस्य सङ्गमः । दुर्लभो हि वराक्या मे किं कर्त्री भगवत्यतः ? ॥५३॥
**आत्रेय्य**प्यभ्यधादेवं देवं दैत्यं विधुं रविम् । विद्याधरं वा कर्षामि मन्त्रैरत्र तु कथा ? ॥५४॥
राज्ञा सह [19]प्रगे योगं करिष्यामि तवाऽनघे! । ज्वलन्तं [20]ज्वलनमथ प्रवेक्ष्याम्याश्वसि[21]ह्ययि! ॥५५॥
आश्वास्यैवं **वनमालां** सा परिव्राजिकाऽव्रजत् । सिद्धप्रायं नृपार्थं तं चाऽऽख्यत् **सुमति**मन्त्रिणे ॥५६॥
सोऽप्यमात्यस्तदाख्यायाऽऽश्वासयत् पृथिवीपतिम् । प्रायेण प्रेयसीप्राप्तिप्रत्याशाऽपि हि शर्मणे ॥५७॥
प्रातर्गत्वाऽऽ**त्रेयिका**ऽपि **वनमाला**मवोचत । मया कृतोऽस्ति ते प्रेमाभिमुखः **सुमुखो** नृपः ॥५८॥

---

१. ***भूतवने*** खंता. पाता. मु.विना ॥ २. ***मङ्क्षु मञ्जरी०*** ला. मु.; मनोहरमञ्जरीणां समूहेन सुन्दरे ॥ ३. ***तालवृन्तायतदले*** ला. मु.; तालवृन्तवदाचरितं दलैः पर्णैर्यत्र ॥ ४. वसन्तश्रीकर्णभूषणसदृशे ॥ ५. रिपवः ॥ ६. ***तवात्मनो०*** मु. ॥ ७. आगच्छता ॥ ८. लुण्टतीत्येवं शीला लुण्टाकी ॥ ९. निस्तेजाः ॥ १०. गण्डौ-कपोलौ(गाल) श्वेतौ(फिक्का) कथम् ? इत्यर्थः ॥ ११. पूर्वमाख्यातवती ॥ १२. ***दुष्प्रापार्थकतामात्मीयां कथां*** मु., ***अप्रार्थितप्रार्थकतामात्मीयां*** सं. ॥ १३. ***क्व रासभी क्व च वाजिराज उच्चैःश्रवा क्व च*** ला. ॥ १४. ***क्व वा शृगालयुवतिः*** पाता., ***क्व च शृगालयुवतिः*** मु. ॥ १५. गरुडः ॥ १६. तन्तुवायपत्नी ॥ १७. ***मान्मथो ज्वरः*** मु. ॥ १८. तक्षकः सर्पराजस्तस्य मस्तकमणिः, स ज्वरं हरतीति श्रूयते ॥ १९. प्रातःकाले ॥ २०. अग्निम् ॥ २१. अयि! इति सम्बोधने; ***०श्वसिह्यपि*** मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तिष्ठ वत्से! गच्छावस्तदद्य नृपसद्मनि। रमस्व राजपत्नीव राज्ञा सह यथासुखम् ॥५९॥

**वनमाला** तया सार्धं नृपवेश्म ययौ ततः। अवरोधे[१] सा निदधे सानुरागेण भूभुजा ॥६०॥

क्रीडोद्यान-सरिद्-वापी-शैलादिषु तया सह। विहरन्नन्वभूद् भोगसुखं **सुमुख**भूपतिः ॥६१॥

¶इतो **वीरकुविन्दो**ऽपि वियुक्तो **वनमाल**या। भूताविष्ट इवोन्मत्त इव मत्त इवाऽभ्रमत् ॥६२॥

धूलीधूसरसर्वाङ्गो जीर्णकर्पटखण्डभृत्[२]। विसंस्थुलशिरःकेशो दीर्घरोमनखावलिः ॥६३॥

उत्तालतुमुलैः पौरदारकैः परिवारितः। **वनमाले! वनमाले!** क्वाऽसि ? मे देहि दर्शनम् ॥६४॥

निरागसं[३] किमत्याक्षीरेकमेकपदे हि माम्। अथवा नर्मणा[४]ऽत्याक्षीः ? सुचिरं युज्यते न तत् ॥६५॥

रूपलुब्धेन वा रक्षो-यक्ष-विद्याधरादिना। केनाऽप्यपहृताऽसि त्वं ? धिङ् धिङ् मां गतभाग्यकम्[५] ॥६६॥

इत्यादि प्रलपन् पुर्यां चत्वरेषु त्रिकेषु च। वराको रङ्कवत् कालमतिवाहयति स्म सः ॥६७॥पञ्चभिः कुलकम्॥

तथैव प्रलपन्नुच्चैरन्येद्यू राजवेश्मनः। प्रययावङ्गणे डिम्भगणैः कपिवदावृतः ॥६८॥

कौतुकालोकनोत्केन[६] राजलोकेन तत्क्षणम्। निर्माल्यमाल्यसंवीतः[७] सोऽवेष्ट्यत पिशाचकी[८] ॥६९॥

उत्तालतालिकानादमिश्रकोलाहलध्वनिम्। तस्याऽनुगामिपौराणां शुश्राव **सुमुखो** नृपः ॥७०॥

किमेतदिति जिज्ञासुः सहैव **वनमाल**या। निजवेश्माङ्गणेऽभ्यागात् **सुमुखः** पृथिवीपतिः ॥७१॥

तं तथा विकृताकारं कश्मलं[९] शून्यमानसम्। आक्रुश्यमानं लोकेन स्नप्यमानं[१०] च रेणुभिः ॥७२॥

**वनमाले! वनमाले!** क्वाऽसीत्यादि प्रलापिनम्। निरीक्ष्य **वनमाला** च नृपतिश्चेति दध्यतुः ॥७३॥

कर्मैतन्निर्घृणमहो! अस्माभिः सौनिकैरिव[११]। दुःशीलैर्विदधे[१२] हन्त विश्वस्तो ह्येष वञ्चितः ॥७४॥

मन्ये नाऽतः परं पापं किञ्चिदन्यत् प्रकृष्यते[१३]। प्रकृष्टपापिनां मध्ये धौरेया[१४] वयमेव हि ॥७५॥

विश्वासघातकेभ्योऽपि निकृष्टा[१५] वयमास्महे। इत्थं जीवन्मृतमिमं यद् वराकमकृष्महि ॥७६॥

धिग् धिग् विषयलाम्पट्यमविवेकपटीयसाम्[१६]। नरकेऽपि हि न स्थानं पाप्मनाऽनेन नः खलु ॥७७॥

धन्यास्ते हि महात्मानः सर्वदा ये जितेन्द्रियाः। जहु[१७]र्वैषयिकं सौख्यं विपाके[१८] दुःखकारणम् ॥७८॥

जिनधर्ममहोरात्रं ये शृण्वन्त्याचरन्ति च। वन्द्यास्ते स्वविवेकेन विश्वविश्वोपकारिणः[१९] ॥७९॥

इति स्वं निन्दतोर्धर्मप्रसक्तांश्चाऽभिनन्दतोः। तयोः पपात खाद्[२०] विद्युत् प्राणानपजहार च ॥८०॥

मिथः स्नेहपरीणामाच्छुभध्यानाच्च तौ मृतौ। उत्पेदाते **हरिवर्षे** वर्षे[२१] मिथुनरूपिणौ ॥८१॥

**हरिश्च हरिणी** चेति पितृभ्यां कल्पिताभिधौ। प्राग्जन्मवद्दम्पती ताववियुक्तौ दिवानिशम् ॥८२॥

कल्पद्रुमैर्दशविधैः सम्पादितसमीहितौ। सुखेन तस्थतुस्तत्र विलसन्तौ सुराविव ॥८३॥

¶विद्युत्पातेन हतयो**र्वनमाला**-नरेन्द्रयोः। चक्रे बालतपो **वीरकुविन्दो**ऽपि सुदुस्तपम् ॥८४॥

मृत्वा च कल्पे **सौधर्मे** सोऽभूत् **किल्बिषिकः** सुरः। प्राग्जन्माऽवधिनाऽपश्यत् स्वं तथा **हरिणी-हरी** ॥८५॥

रोषारुणेक्षणः सद्यो भृ(भ्रु)कुटीभङ्गभीषणः। सञ्जिहीर्षुर्यम इव **हरिवर्षं** जगाम सः ॥८६॥

एवं च स सुरो दध्याविहाऽवध्याविमौ खलु। मृतौ च यास्यतः स्वर्गेऽवश्यं क्षेत्रप्रभावतः ॥८७॥

निर्बन्धने[२२] दुर्गतीनामकालेऽपि मृतिप्रदे। नयाम्यन्यत्र तत्स्थाने[२३] पूर्वजन्मद्विषौ[२४]विमौ ॥८८॥

इति निश्चित्य स सुरस्तौ कल्पतरुभिः सह। आनैषीदत्र[२५] **भरते चम्पापुर्या**मुभावपि ॥८९॥

तत्र पुर्यां तदानीं च नृप इक्ष्वाकुवंशजः। **चन्द्रकीर्ति**र्नामधेयेनाऽपुत्रः पञ्चतां[२६] ययौ ॥९०॥

ततः प्रकृतयस्[२७]तस्य राज्यार्हमपरं नरम्। प्रावर्तन्ताऽभितोऽन्वेष्टुमात्मानमिव योगिनः ॥९१॥

---

१. अन्तःपुरमध्ये॥ २. *०टखण्डवत्* खंता. पाता. हे. सं.विना॥ ३. निरपराधिनम्॥ ४. हास्येन॥ ५. निर्भाग्यम्॥ ६. उत्केन-उत्कण्ठितेन॥ ७. निर्माल्यपुष्पमाला-सहितः ॥८. पिशाचाधिष्ठितः ॥ ९. मलिनम् ॥१०. *०तप्यमानं०* मु.॥ ११. चाण्डालैरिव॥ १२. *०लैर्विहितम्* ला. सं. पाता. ॥ १३. अधिकं भवति॥ १४. अग्रेसराः॥ १५. अधमाः॥ १६. अविवेकिनाम्॥ १७. तत्यजुः॥ १८. परिणामे॥ १९. *ये च विश्वोप०* छा.पा.मु.॥ २०. आकाशात्॥ २१. क्षेत्रे युग्मधर्मो॥ २२. *निर्बन्धेन०* मु.॥ २३. *तं स्थाने* ला. सं.॥ २४. शत्रू॥ २५. *अनैषीदत्र* मु.॥ २६. मृत्युम्॥ २७. प्रधानपुरुषाः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽथ देवो देवऋद्ध्या सर्वान् विस्मापयन् जनान्। तेजःपुञ्ज इवाऽऽकाशस्थित [1]एवमवोचत ॥९२॥
भो भोः! सचिव-सामन्तप्रमुखा! राजचिन्तकाः!। असूनुर्वो मृतो राजा यूयं राजेच्छवस्ततः ॥९३॥
युष्मत्पुण्यैरिवाऽद्यैव प्रेरितोऽहमिहाऽऽनयम्। **हरिवर्षाद्धरिं** नाम राज्यार्हं युग्मरूपिणम् ॥९४॥
अस्येयं **हरिणी** नाम [2]सहजा [3]सहचारिणी। आहारार्थमनयोश्चाऽऽनीताः कल्पद्रुमा अमी ॥९५॥
श्रीवत्स-मत्स्य-कलश-कुलिशाङ्कुशलाञ्छितः। तदयं वो भवत्वद्य राजा [4]राजीवलोचनः ॥९६॥
[5]कल्पद्रुमफलाविद्धं पिशितं पशु-पक्षिणाम्। मद्यं च [6]देयं आहारोऽनयोर्मिथुनरूपिणोः ॥९७॥
एवमस्त्विति ते प्रोच्य गीर्वाणं तं प्रणम्य च। मिथुनं रथमारोप्य तं निन्यू राजवेश्मनि ॥९८॥
ब्रह्म-मागध-गन्धर्वमङ्गलोद्गीतिपूर्वकम्। **हरिं** राज्येऽभिषिषिचुस्ते सामन्तादयस्तदा ॥९९॥
[7]स स्वशक्त्या तयोर्देवो ह्रस्वमायुः स्थितेर्व्यधात्। धनुःशतं च तुङ्गत्वे कृतार्थोऽथ तिरोदधे ॥१००॥
**शीतल**स्वामिनस्तीर्थे **हरी** राजा बभूव सः। ततः प्रभृति तन्नाम्ना **हरिवंशो**ऽभवद् भुवि ॥१०१॥
¶असाधयद् **हरी** राजा वसुधामब्धिमेखलाम्। राज्ञां कन्याः श्रिय इवोपयेमेऽनेकशश्च सः ॥१०२॥
**हरेर्हरिण्या**मजनि गते काले कियत्यपि। [8]पृथुलोरःस्थलः **पृथ्वीपति**रित्याख्यया सुतः ॥१०३॥
**हरिः** समं **हरिण्या** च विपेदेऽर्जितपातकः। **पृथ्वीपति**स्तयोऽ सूनुः पृथ्वीपतिरथाऽभवत् ॥१०४॥
पालयित्वा चिरं राज्यं राज्ये सूनुं **महागिरिम्**। सोऽभिषिच्य तपस्तप्त्वा त्रिदिवं प्रत्यपद्यत ॥१०५॥
**महागिरि**नरेन्द्रोऽपि क्रमाद्धि**मगिरिं** सुतम्। राज्ये न्यस्य तपस्तप्त्वा जगाम [9]पदमव्ययम् ॥१०६॥
ततो **हिमगिरि**र्ज्येष्ठं सुतं **वसुगिरिं** निजे। राज्येऽभिषिच्य प्राव्राजीदव्राजीच्चाऽ[10]पुनर्भवम् ॥१०७॥
सुतं **गिरिं** नाम **वसुगिरि**रप्यात्मनः पदे। निधायाऽऽ[11]त्तपरिव्रज्यः क्षीणकर्मा ययौ शिवम् ॥१०८॥
सुतं **मित्रगिरिं** राज्ये निधाय **गिरि**रप्यथ। परिव्रज्यामुपादत्त स्वर्गलोकं जगाम च ॥१०९॥
एवं क्रमेणाऽसङ्ख्याता **हरिवंशे**ऽभवन्नृपाः। तपसा केऽपि निर्वाणं ययुः स्वर्गं च केऽचन ॥११०॥
¶इतश्चाऽत्रैव **भरत**क्षेत्रे **मगध**मण्डनम्। नाम्ना पुरं **राजगृह**मस्ति स्वस्तिकवद्भुवः ॥१११॥
तत्र यूनां [12]रतभ्रष्टहारमुक्ताकणोत्कराः। [13]वर्धनीभि[14]रपोह्यन्ते प्रातः प्रतिनिकेतनम् ॥११२॥
गृहे गृहे तत्र चाऽश्वा दया दानं गृहे गृहे। गृहे गृहे चित्रशाला रङ्गशाला गृहे गृहे ॥११३॥
[15]मरालानामिव सरः पुष्पमाल्यमिवाऽ[16]लिनाम्। महामुनीनामपि तत्सेवनीयमभूत् तदा ॥११४॥
बभूव **हरिवंश**स्य मुक्तामणिरिवाऽमलः। तत्रोग्रतेजसा [17]मित्रः **सुमित्रो** नाम भूपतिः ॥११५॥
[18]विनेता दुर्विनीतानां परिणेता [19]जयश्रियाम्। उन्नेता निजवंशस्य स नेता सर्वभूभुजाम् ॥११६॥
नवमो दिग्गज इव कुलाचल इवाऽष्टमः। द्वितीय इव शेषाहिर्महीभारं बभार सः ॥११७॥
औदार्य-धैर्य-गाम्भीर्यादयो ये ये गुणाः किल। ते ते तस्मिन्नदृश्यन्त [20]ज्ञेयानीव जिनागमे ॥११८॥
**पद्मावती**त्यभिधया [21]पद्मादेवी [22]हरेरिव। सधर्मचारिणी तस्याऽभवद् भूतलपावनी ॥११९॥
तयाऽशेषस्य जगतो नयनानन्दहेतुना। अलञ्चक्रे नरेन्द्रश्रीर्द्यौरिवो[23]डुपलेखया ॥१२०॥
गुणैः शीलादिभिस्तैस्तैः स्वकीयैः सा सुगन्धिभिः। राज्ञोऽध्यवासयच्चित्तं गन्धचूर्णैरिवांऽ[24]शुकम् ॥१२१॥
तस्या गुणगणं तारागणं दिव इवोच्चकैः। न सङ्ख्यातुमलम्भूष्णुरभूदपि [25]पतिर्गिराम् ॥१२२॥
भोगांस्तया सहाऽभुङ्क्त **सुमित्रः** पृथिवीपतिः। पृथिव्येवाऽनुरागेण [26]जङ्गमीभावमाप्तया ॥१२३॥
¶इतश्च **प्राणते** कल्पे **सुरश्रेष्ठ**सुरोऽपि सः। सुखसागरनिर्मग्नो निजमायुरपूरयत् ॥१२४॥

---

१. ०*एतदवोचत* पाता. ॥ २. सहोत्पन्ना ॥ ३. पत्नी ॥ ४. कमललोचनः ॥ ५. कल्पद्रुमफलमिश्रं मांसम् ॥ ६. *देयमाहारे* मु., *देय आहारे*० खंता. ॥ ७. *स्वशक्त्या च* मु. ॥ ८. विशालवक्षःस्थलः ॥ ९. मोक्षम् ॥ १०. शिवम् ॥ ११. आत्ता गृहीता परिव्रज्या येन सः ॥ १२. रतेन सुरतेन भ्रष्टाः पतिताः हारस्य मुक्ताकणानां उत्करा निवहाः; *रतभ्रष्टा हार*० मु. ॥ १३. सम्मार्जनीभिः; *वर्धिनी*० मु. ॥ १४. दूरीक्रियन्ते ॥ १५. हंसानामिव ॥ १६. भ्रमराणामिव ॥ १७. सूर्यः ॥ १८. दण्डकरः ॥ १९. ०*जयश्रियम्* खंता. पाता. ॥ २०. ज्ञेयवस्तूनि, यथा सर्वे एव ज्ञेयभावाः जिनागमे प्रतिपादिता दृश्यन्ते तथा समग्रसद्गुणास्तस्मिन् अदृश्यन्त ॥ २१. लक्ष्मीदेवी ॥ २२. विष्णोः ॥ २३. चन्द्ररेखया ॥ २४. वस्त्रम् ॥ २५. बृहस्पतिः ॥ २६. जङ्गमत्वं प्राप्तया ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्युत्वा [1]श्रावणराकायां **श्रवण**स्थे निशाकरे । [2]**पद्मावत्या** महादेव्याः कुक्षाववततार सः ॥१२५॥

चतुर्दश महास्वप्नांस्तीर्थकृज्जन्मसूचकान् । सुखसुप्ता निशाशेषे तदा देवी ददर्श सा ॥१२६॥

ज्येष्ठस्य कृष्णाष्टम्यां [3]भे **श्रवणे** कूर्मलाञ्छनम् । [4]तमालश्यामलच्छायं समयेऽसूत सा सुतम् ॥१२७॥

विहिते दिक्कुमारीभिः सूतिकर्मणि भक्तितः । अर्हन् स विंशतितमो निन्ये मेरौ [5]बिडौजसा ॥१२८॥

शक्रोत्सङ्गे निषण्णस्य त्रिषष्ट्येन्द्रैर्जगद्गुरोः । जन्माभिषेको विदधे पावनैस्तीर्थवारिभिः ॥१२९॥

ईशानाङ्कनिषण्णस्य शक्रोऽपि जगदीशितुः । स्नात्रपूजादिकं कृत्वा स्तोतुमित्युपचक्रमे ॥१३०॥

"अद्याऽ[6]वसर्पिणीकालसरोवरसरोरुह! । दिष्ट्या प्राप्तोऽसि भगवन्नस्माभिर्भ्रमरैश्चिरात् ॥१३१॥

अजायत तव स्तोत्रध्यानात् पूजादिकादपि । वाङ्-मनो-वपुषां श्रेयः फलमद्यैव देहि मे ॥१३२॥

यथा यथा नाथ! भक्तिर्गुरू[7]र्भवति मे त्वयि । लघूभवन्ति कर्माणि प्राक्तनानि तथा तथा ॥१३३॥

स्वामिन्नविरतानां [8]नः स्याज्जन्मैतन्निरर्थकम् । यदि त्वद्दर्शनं न स्यादिदं पुण्यनिबन्धनम् ॥१३४॥

तवाङ्गस्पर्शन-स्तोत्र-निर्माल्याघ्राण-दर्शनैः । गुणगीताकर्णनैश्च कृतार्थानीन्द्रियाणि नः ॥१३५॥

मेरुमौलिरयं भाति नीलरत्नत्विषा त्वया । [9]प्रावृषेण्याम्बुदेनेव नयनानन्ददायिना ॥१३६॥

स्थितो **भरत**वर्षेऽपि [10]सर्वगः प्रतिभासि नः । यत्र तत्र स्थितानां यद् भवस्यर्तिच्छिदे स्मृतः ॥१३७॥

अस्तु च्यवनकालेऽपि त्वत्पादस्मरणं मम । यथा प्राग्जन्मसंस्कारात् तदेव स्याद् भवान्तरे" ॥१३८॥

एवं [11]तं विंशमर्हन्तं स्तुत्वाऽदाय च वज्रभृत् । नीत्वा **पद्मावती**देवीपार्श्वेऽमुञ्चद् यथास्थिति ॥१३९॥

¶चक्रे जन्मोत्सवं सूनोः **सुमित्रो**ऽपि नृपः प्रगे । कारामोक्षैरर्थदानाद्यैश्च लोक[12]म्पृणीभवन् ॥१४०॥

अस्मिन् गर्भस्थिते माता मुनिवत् सुव्रताऽभवत् । **मुनिसुव्रत** इत्याख्यां तेनाऽस्य विदधे पिता ॥१४१॥

[13]अज्ञाननाटितं बा[14]ल्ये क्रीडया नाटयन् जने । ज्ञानत्रयपवित्रात्मा क्रमेण ववृधे प्रभुः ॥१४२॥

सम्प्राप्तयौवनः स्वामी विंशधन्वसमुन्नतिः । **प्रभावती**प्रभृतिका राजपुत्रीरुपायत ॥१४३॥

**मुनिसुव्रत**नाथस्य **सुव्रतो** नाम नन्दनः । जज्ञे **प्रभावती**देव्यां प्राच्यामिव निशाकरः ॥१४४॥

अर्धाष्टमेषु वर्षाणां सहस्रेषु गतेष्वथ । पित्राऽध्यारोपितं राज्यभारं प्रभुरुपाददे ॥१४५॥

क्ष्मां पालयन् पञ्चदशाब्दसहस्रीमलङ्घयत् । प्रक्षीणं भोगकर्मेति प्रभुर्ज्ञानाद् विवेद च ॥१४६॥

तीर्थं प्रवर्तय स्वामिन्निति लोकान्तिकामरैः । विज्ञप्तो वार्षिकं दानं ददौ च परमेश्वरः ॥१४७॥

क्षत्रव्रतैकद्रविणं न्यायाम्भोजमधुव्रतम् । राज्ये न्यवेशयत् पुत्रं **सुव्रतं मुनिसुव्रतः** ॥१४८॥

कृतनिष्क्रमणो देवैः **सुव्रते**न च भूभुजा । सहस्रवाह्यां शिबिकां सोऽध्यष्ठाद**पराजिताम्** ॥१४९॥

[15]माकन्दैर्नव्यमुकुलप्रोद्भेदाद्दन्तुरैरिव । [16]उद्गच्छत्पल्लवतया जिह्वालैरिव शोभितम् ॥१५०॥

इतस्ततो मरुत्कीर्णजीर्णपर्णतया मुहुः । [17]मर्मरैराह्वयदिवाऽऽगामिनीं मधुसम्पदम् ॥१५१॥

दुर्वारां सिन्[18]दुवाराणामीक्षितुं कुसुमश्रियम् । असहैरिव वि[19]मदीभूय कुन्दैर्निषेवितम् ॥१५२॥

[20]उद्यद्दमनकामोदप्रमोदि शिशि[21]रर्द्धिकम् । ययौ [22]**नीलगुहां** नामोद्यानं त्रिजगदीश्वरः ॥१५३॥चतुर्भिः कलापकम्॥

फाल्गुनश्वेतद्वादश्यां **श्रवणे** पश्चिमेऽहनि । समं नृपसहस्रेण षष्ठेन प्राव्रजत् प्रभुः ॥१५४॥

द्वितीयेऽह्नि **राजगृहे ब्रह्मदत्त**नृपौकसि । अपारयत् पायसेन भगवान् **मुनिसुव्रतः** ॥१५५॥

अमरैर्वसुधारादिपञ्चकं तत्र निर्ममे । रत्नपीठं स्वामिपादस्थाने **ब्रह्मनृपेण** तु ॥१५६॥

---

१. श्रावणपूर्णिमायाम् ॥ २. ***पद्मावतीमहा०*** मु. ॥ ३. नक्षत्रे ॥ ४. तमाल इव श्यामला छाया कान्तिः यस्य सः ॥ ५. इन्द्रेण ॥ ६. अवसर्पिणीकाल एव सरोवरः, तस्मिन् सरोरुहः कमलसमानः ॥ ७. ***०गुरुर्भवति*** मु. ॥ ८. अस्माकम् ॥ ९. प्रावृषि वर्षाकाले भव प्रावृषेण्यः, स चाऽसौ मेघश्च तेन ॥ १०. सर्वत्र स्थितः; ***सर्वतः*** पाता. ॥ ११. ***एवं च विंश०*** खंता. ॥ १२. लोकं-जगत् प्रीणाति प्रीणयतीति लोकम्पृणस्ततः च्विः ॥ १३. अज्ञाननाटकम् ॥ १४. ***०बाल्यक्रीडया०*** मु. ॥ १५. नवीनमुकुलोद्गमात् सदन्तैरिव माकन्दैराम्रवृक्षैः शोभितम् ॥ १६. उद्यन्नवपल्लवतया सजिह्वैरिव आम्रैः शोभितम् ॥ १७. मर्मरध्वनिभिः (पर्णानाम्) ॥ १८. सिन्दुवारो लोके नगोड इति प्रसिद्धः वृक्षविशेषः ॥ १९. मदरहितैर्भूत्वा ॥ २०. उद्यद् - विकसद् दमनकपुष्पाणां आमोदेन - गन्धेन प्रमोदि-आनन्ददायि ॥ २१. शिशिरस्य समृद्धिर्यस्मिन् तत् ॥ २२. ***०लीनगुहां०*** पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निःसङ्गो निर्ममः सर्वान् सहमानः परीषहान्। **ततो मासानेकादश छद्मस्थो** व्यहरत् प्रभुः ॥१५७॥
विहरन्नाययौ **नीलगुहो**द्यानं पुनः प्रभुः। तस्थौ च **चम्पक**तरोरधस्तात् प्रतिमाधरः ॥१५८॥
फाल्गुनकृष्णद्वादश्यां **श्रवण**स्थे निशाकरे। घातिकर्मक्षयात् तत्रोत्पेदे केवलमीशितुः ॥१५९॥
शक्रादिभिश्च समवसरणं विदधेऽमरैः। चत्वारिंशेष्[१]वासशतद्वयोच्चाशोकपादपम् ॥१६०॥
तत्र प्रविश्य चैत्यद्रोः स्वामी कृत्वा प्रदक्षिणम्। "नमस्तीर्थाये"त्युक्त्वा प्राक्सिंहासन उपाविशत् ॥१६१॥
व्यन्तरास्तत्प्रतिच्छन्दानन्यदिक्ष्वपि चक्रिरे। तस्थिवांश्च यथास्थानं श्रीमान् सङ्घश्चतुर्विधः ॥१६२॥
स्वामिनं समवसृतं तदा ज्ञात्वा च **सुव्रतः**। एत्य नत्वा स्वामिपादाननुशक्रमुपाविशत् ॥१६३॥
भूयोऽपि स्वामिनं नत्वा ललाटघटिताञ्जली। भक्तिगर्भां स्तुतिमिमां चक्राते **शक्र-सुव्रतौ** ॥१६४॥
"त्वत्पाददर्शनस्यैव प्रभावोऽयं जगत्पते!। यत् त्वद्गुणान् वर्णयितुं मादृशोऽपि प्रगल्भते ॥१६५॥
देशनासमये पुण्यां तव [२]गां परमेश्वर!। वन्दामहे [३]श्रुतस्कन्धवत्सप्रसविनीमिह ॥१६६॥
त्वद्गुणग्रहणात् सद्यो भवन्ति गुणिनो जनाः। स्निग्धद्रव्यस्य योगाद्धि स्निग्धीभवति भाजनम् ॥१६७॥
ये हि त्यक्तान्यकर्माणः शृण्वन्ति तव देशनाम्। त्यक्तप्राक्तनकर्माणस्ते भवन्ति क्षणादपि ॥१६८॥
त्वन्नामरक्षामन्त्रेण संवर्मितमिदं जगत्। [४]अंहःपिशाचैर्नैवाऽतः परं देव! ग्रसिष्यते ॥१६९॥
कस्याऽपि न भयं नाथ! त्वयि विश्वाभयप्रदे। स्वस्थानयायिनो मे तु त्वद्वियोगभवं भयम् ॥१७०॥
अपि शाश्वतवैरान्धा बहिरङ्गा न केवलम्। शाम्यन्ति तेऽन्तिके स्वामिन्न[५]न्तरङ्गा अपि द्विषः ॥१७१॥
ऐहि[६]कामुष्मिकाभीष्टदानकामगवी प्रभो!। त्वन्नामस्मृतिरेवाऽस्तु यत्र तत्र स्थितस्य मे" ॥१७२॥
**शक्र-सुव्रत**योरेवं स्तुत्वा विरतयोः सतोः। स्वामी विश्वावबोधाय विदधे धर्मदेशनाम् ॥१७३॥
¶"[७]क्षारोदादिव संसारादसारात् सारमुत्तमम्। [८]उपाददीत सद्रत्नमिव धर्मं महामतिः ॥१७४॥
[1] संयमः [2][९] सूनृतं [3][१०] शौचं [4][११] ब्रह्माऽ[5][१२]किञ्चनता [6] तपः। [7][१३] क्षान्तिर्[8]मार्दवमृ[9]जुता [10][१४] मुक्तिश्च दशधा स तु ॥१७५॥
[१५]निरीहो निजदेहेऽपि स्वस्मिन्नपि हि निर्ममः। [१६]समाशयो नमस्कुर्वत्यपकुर्वति चाऽनिशम् ॥१७६॥
नितान्तमीश्वरः सोढुमुपसर्ग-परीषहान्। मैत्र्यादिभिर्भावनाभिर्नित्यं भावितमानसः ॥१७७॥
क्षमावान् विनयी दान्तः श्रद्धालुर्गुरुशासने। जात्यादिगुणसम्पन्नो यतिधर्माय कल्पते ॥१७८॥[त्रिभिर्विशेषकम्]
सम्यक्त्वमूलानि [१७]पञ्चाऽणुव्रतानि [१८]गुणास्त्रयः। [१९]शिक्षापदानि चत्वारि [२०]धर्मोऽयं [२१]गृहमेधिनाम् ॥१७९॥
[1]न्यायसम्पन्नविभवः [2]शिष्टाचारप्रशंसकः। कुलशीलसमैः सार्धं [3]कृतोद्वाहोऽन्यगोत्रजैः ॥१८०॥
[4]पापभीरुः प्रसिद्धं च [5]देशाचारं समाचरन्। [6]अवर्णवादी न क्वाऽपि राजादिषु विशेषतः ॥१८१॥
अनतिव्यक्तगुप्ते च स्थाने [२२]सुप्रातिवेश्मिके। [7]अनेकनिर्गमद्वारविवर्जितनिकेतनः ॥१८२॥
[8]कृतसङ्गः सदाचारैर्मातापित्रोश्च [9]पूजकः। [२३]त्यजन्नुपप्लुतं [10]स्थानमप्रवृत्तश्च [11]गर्हिते ॥१८३॥
व्ययमायोचितं [12]कुर्वन् [13]वेषं वित्तानुसारतः। अष्टभिर्धीगुणैर्युक्तः[14] [15]शृण्वानो धर्ममन्वहम् ॥१८४॥
अजीर्णे [16]भोजनत्यागी काले [17]भोक्ता च [२४]सात्म्यतः। अन्योऽन्याप्रतिबन्धेन [२५]त्रिवर्गमपि [18]साधयन् ॥१८५॥
यथावदतिथौ साधौ दीने च [19]प्रतिपत्तिकृत्। सदा[२६]ऽनभिनिविष्टश्च[20] [21]पक्षपाती गुणेषु च ॥१८६॥
अदेश-कालयोश्चर्यां [22]त्यजन् [23]जानन् बलाबलम्। वृत्तस्थ-ज्ञानवृद्धानां [24]पूजकः [25]पोष्यपोषकः ॥१८७॥

---

१. इष्वासः-धनुः ॥ २. वाणीम् ॥ ३. श्रुतस्कन्ध एव वत्सस्तज्जनयित्रीम् ॥ ४. पापान्येव पिशाचास्तैः ॥ ५. क्रोधादयोऽन्तरङ्गाः शत्रवः ॥ ६. इहलोक-परलोकयोरिच्छितदाने कामधेनुसमाना ॥७. समुद्रात् ॥ ८. गृह्णीयात् ॥ ९. सत्यम् ॥ १०. मनःशुद्धिः-पवित्रता ॥ ११. ब्रह्मचर्यम् ॥ १२. परिग्रहराहित्यम् ॥ १३. क्षमा ॥ १४. निर्लोभता ॥ १५. इच्छारहितः ॥ १६. नमस्कारमपकारं च कुर्वाणे समचित्तः; ***समाशयो जिनाधीशं नमस्कुर्वति चानिशम्*** पाता. ॥ १७. स्थूलप्राणातिपातविरमणं, स्थूलमृषावादविरमणं, स्थूलअदत्तादानविरमणं, स्वदारासन्तोषः,स्थूलपरिग्रहविरमणं ॥ १८. दिक्परिमाणव्रतं,भोगोपभोगव्रतं, अनर्थदण्डव्रतं; एतानि गुणव्रतानि ॥ १९. सामायिकव्रतं, देशवकाशिकव्रतं, पोषधव्रतं, अतिथिसंविभागव्रतं; एतानि शिक्षाव्रतानि ॥ २०. ***व्रतानि*** मुद्रिते टि. ॥ २१. गृहस्थानाम् ॥ २२. प्रातिवेश्मिकः-'पडोशी' इति भाषायाम् ॥ २३. उपद्रुतम् ॥ २४. अनन्यचित्तो भूत्वा ॥ २५. धर्म-अर्थ-कामान् ॥ २६. अनाग्रही ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[26]दीर्घदर्शी विशेषज्ञः[27] [28]कृतज्ञो [29]लोकवल्लभः । [30]सलज्जः [31]सदयः [32]सौम्यः [33]परोपकृतिकर्मठः[१] ॥१८८॥
[२]अन्तरङ्गारिषड्वर्गपरि[34]हारपरायणः । [35]वशीकृतेन्द्रियग्रामो गृहिधर्माय कल्पते ॥१८९॥
संसारेऽस्मिन् मनुष्येण चैतन्यफ[३]लमिच्छुना । सेव्यः श्रावकधर्मोऽपि यतिधर्माक्षमेण तु "॥१९०॥
श्रुत्वाऽमुं देशनां भर्तुर्बहवः प्राव्रजन् जनाः । [४]श्रावक्यभूवन्नेके च न [५]मोघा देशनाऽर्हताम् ॥१९१॥
**इन्द्रा**दयो गणधराः स्वामिनोऽष्टादशाऽभवन् । देशनाविरते नाथे चकारेन्द्रोऽपि देशनाम् ॥१९२॥
देशनाविरते तत्राऽप्यभिवन्द्य जिनेश्वरम् । स्वं स्वं स्थानं ययुः सर्वे वज्रभृत्-**सुव्रता**दयः ॥१९३॥
¶तत्तीर्थजन्मा [६]**वरुणो** यक्षस्[७]त्र्यक्षश्चतुर्मुखः । श्वेतो जटी वृषरथश्चतुर्भिर्दक्षिणैर्भुजैः ॥१९४॥
[८]मातुलिङ्ग-गदा-बाण-शक्तिभृद्भिस्तथाऽपरैः । नकुलाक्ष-धनुः-पर्शुधारिभिः परिशोभितः ॥१९५॥
तथोत्पन्ना **नरदत्ता** [९]गौरी भद्रासनस्थिता । भान्ती दक्षिणबाहुभ्यां वरदेनाऽक्षसूत्रिणा ॥१९६॥
समातुलिङ्ग-शूलाभ्यां वामदोर्भ्यां च शोभिता । **सुव्रत**स्वामिनोऽभूतामुभे शासनदेवते ॥१९७॥
¶ताभ्यामधिष्ठिताभ्यर्णः पृथिवीं विहरन् वि[१०]भुः । अन्यदा समवासार्षीद् **भृगुकच्छे** महापुरे ॥१९८॥
तत्र राजा **जितशत्रु**र्जात्यमारुह्य वाजिनम् । प्रभुं वन्दितुमभ्यागादथ शुश्राव देशनाम् ॥१९९॥
रोमाञ्चिताङ्गो निः[११]स्पन्द उत्कर्णः स्वामिदेशनाम् । अश्रौषीत् तुरगः सोऽपि **जितशत्रु**महीपतेः ॥२००॥
पप्रच्छ समये चैवं गणभृत् परमेश्वरम् । स्वामिन्! प्रपेदे समवसरणे धर्ममत्र कः ? ॥२०१॥
स्वाम्यप्यूचे धर्ममत्र न कोऽपि प्रत्यपद्यत । **जितशत्रु**नरेन्द्रस्य विनैकं जात्यवाजिनम् ॥२०२॥
सविस्मयो **जितशत्रु**रप्यपृच्छज्जगद्गुरुम् । कोऽयमश्वो विश्वनाथ! यो धर्मं प्रत्यपद्यत ? ॥२०३॥
¶आचख्यौ भगवानेवं **पद्मिनीषण्ड**पत्तने । पुराऽऽसीच्छ्रा[१२]वकः श्रेष्ठी **जिनधर्मो**ऽभिधानतः ॥२०४॥
मित्रं **सागरदत्तो**ऽस्य समस्तनगराग्रणीः । भद्रकत्वात् समं तेन ययौ चैत्येषु सोऽन्वहम् ॥२०५॥
साधुभ्यः सोऽन्यदाऽश्रौषीद् योऽर्हद्बिम्बानि कारयेत् । संसारमथनं सोऽन्यभवे धर्ममवाप्नुयात् ॥२०६॥
श्रुत्वा **सागरदत्त**स्तत् सौवर्णं बिम्बमार्हतम् । कारयित्वा [१३]महाऋद्ध्या साधुभिः प्रत्यतिष्ठपत् ॥२०७॥
¶नगरस्य बहिस्तस्य तेनाऽऽसीत् कारितं पुरा । शिवायतनमुत्तुङ्गं सोऽगात् तत्रोत्तरायणे ॥२०८॥
तत्र प्राक्सञ्चित[१४]स्त्यानसर्पिस्कु(ष्कु)म्भाः शिवार्चकैः । [१५]क्रष्टुमारेभिरे [१६]सर्पिःकवलाय कृतत्वरैः ॥२०९॥
अधस्तेषां घटानां च पिण्डीभूयो[१७]पदेहिकाः । लग्ना बभूवुर्भूयस्यो निपेतुस्ताश्च वर्त्मनि ॥२१०॥
सञ्चरद्भिः पूजकैश्च चूर्यमाणाः समीक्ष्य ताः । **सागरः** कृपया वस्त्रेणाऽ[१८]पनेतुं प्रचक्रमे ॥२११॥
किं श्वे[१९]तभिक्षुभिररे! शिक्षितोऽसीति जल्पता । ततस्ताः पूजकेनैकेनांऽह्रिघातेन चूर्णिताः ॥२१२॥
श्रेष्ठी **सागरदत्तो**ऽपि विलक्षीभूय तत्क्षणम् । तदा तदाचार्यमुखं तच्छिक्षार्थमुदैक्षत ॥२१३॥
उपेक्षमाणे तत्पापं तस्मिन्नपि हि **सागरः** । एवं विचिन्तयामास धिगहो! निर्घृ[२०]णा अमी ॥२१४॥
गुरुबुद्ध्या कथममी पूज्यन्ते दारुणाशयाः । आत्मानं यजमानं च दुर्गतौ पातयन्ति ये ? ॥२१५॥
विचिन्त्येत्य[२१]पुरोधाच्च कृत्वा [२२]तत्कर्म **सागरः** । अनासादितसम्यक्त्वो दान-शीलस्वभावतः ॥२१६॥
[२३]महारम्भार्जितधनत्राणनिष्ठो विपद्य सः । जात्यस्तवाऽश्वोऽयमभूत् तद्बोधायाऽहमागमम् ॥२१७॥ [युग्मम्]
प्राग्जन्मकारितजिनप्रतिमायाः प्रभावतः । धर्मोपदेशं नः श्रुत्वा सम्बुद्धोऽयं क्षणादपि ॥२१८॥
एवं भगवताऽऽख्याते स्तूयमानो जनैर्मुहुः । स्वैरचारी कृतः सोऽश्वः क्षमयित्वा क्षमाभुजा ॥२१९॥
ततः प्रभृति तल्लोके प्रख्यातमतिपावनम् । तीर्थम**श्वावबोधा**ख्यं **भृगुकच्छ**मभूत् पुरम् ॥२२०॥

---

१. परोपकारे कुशलः ॥ २. अन्तरङ्गारिषड्वर्गः-काम-क्रोध-लोभ-मोह-मद-मत्सराः, तेषां परिहारे त्यागे परायणः तत्परः ॥ ३. ०*फलमिच्छता* हे.पा.; खंता. पाता. विना ॥ ४. श्राद्धधर्मवन्तोऽभूवन् ॥ ५. निष्फला न भवति ॥ ६. ०*वरुणयक्ष*० मु. ॥ ७. त्रिनेत्रः ॥ ८. *मातुलुङ्ग*० खंता. पाता. ॥ ९. गौराङ्गी ॥ १०. *प्रभुः* मु. ॥ ११. निश्चलः ॥ १२. ०*च्छ्रावकश्रेष्ठी* मु. ॥ १३. *महत्त्रद्ध्या* ला. मु. ॥ १४. स्त्यानं-शीनं घनीभूतमित्यर्थः ॥ १५. *कर्ष्टुं*० खंता. पाता. ॥ १६. *सर्पिःकम्बलाय* सर्वप्रतिषु ॥ १७. उपदेहिका 'उधई' इति लोके प्रसिद्धा ॥ १८. दूरीकर्तुम् ॥ १९. जैनसाधुभिः ॥ २०. निर्दयाः ॥ २१. आग्रहात् पूजकाचार्यस्येति शेषः ॥ २२. पूजादिकं कार्यम् ॥ २३. महारम्भेण अर्जितस्य धनस्य त्राणे-रक्षणे निष्ठा यस्य सः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶देशनां पारयित्वा तु [१]भुवनोपचिकीः प्रभुः। विहरन् समवासार्षीदन्यदा **हस्तिनापुरे** ॥२२१॥
तस्मिंश्च नगरे नाम्ना **जितशत्रु**रभून्नृपः। श्रेष्ठी [२]वणिक्सहस्रेशः **कार्तिकः** श्रावकोऽपि [३]च ॥२२२॥
तस्मिन् कषायवसनः पुरे **भागवतव्रतः**। मासं मासं चोपवासी पौरैर्भृशमपूज्यत ॥२२३॥
पारणे पारणे पौरैः सोऽतिभक्त्या न्यमन्त्र्यत। न [४]सम्यक्त्वैकवसुना श्रेष्ठिना **कार्तिके**न तु ॥२२४॥
भूतवच्छ्रेष्ठिनस्तस्य छिद्रान्वेषणतत्परः। सोऽन्यदा पारणे राज्ञा न्यमन्त्रि **जितशत्रु**णा ॥२२५॥
स परिव्राजकोऽप्यूचे यदि मे परिवेषणम्। करोति **कार्तिको** राजन्! भुञ्जे तव गृहे तदा ॥२२६॥
आमेत्युक्त्वा नरेन्द्रोऽपि गत्वा तद्वेश्म **कार्तिकम्**। ययाचे भगवतोऽस्य परिवेष्यं त्वयाऽनघ! ॥२२७॥
स्वामिन्न युज्यतेऽस्माकमिदं पाखण्डधारिषु। तवाऽऽज्ञया कार्यमेतदपीति [५]प्रत्यपादि सः ॥२२८॥
पुराऽपि चेत् प्राव्रजिष्यं नाऽकरिष्यमिदं तदा। एवं विचिन्तयन् खेदाच्छ्रेष्ठी राजकुलं ययौ ॥२२९॥
परिवेषयतस्तस्य परिव्राट् **कार्तिक**स्य सः। नि[६]कारं दर्शयामास [७]तर्जनीदशनैर्मुहुः ॥२३०॥
[८]परिवेष्याऽनिच्छयाऽपि श्रेष्ठी निर्वेदभावितः। समं वणिक्सहस्रेण स्वाम्यन्ते प्राव्रजत् तदा ॥२३१॥
[९]द्वादशाङ्गधरः कृत्वा द्वादशाब्दीं परं व्रतम्। मृत्वा **सौधर्म**कल्पेन्द्रः **कार्तिकः** समजायत ॥२३२॥
परिव्राडपि मृत्वा स आभियोग्येन कर्मणा। तस्यैव वाहनमभूदै**रावण** इति द्विपः ॥२३३॥
तं शक्रं प्रेक्ष्य सामर्षः स प्रारेभे पलायितुम्। प्रसह्य धृत्वा शक्रस्तमारुरोह प्रभुर्हि सः ॥२३४॥
द्वे शीर्षे स चकाराऽथ द्विमूर्तिर्वासवोऽप्यभूत्। एवं स यावच्छीर्षोऽभूत् [१०]तावद्वान् वासवोऽपि हि ॥२३५॥
भूयः पलायमानः स वज्रेणाऽऽहत्य वज्रिणा। [११]प्राग्जन्ममत्सरी मङ्क्षु व्यधीयत वशंवदः ॥२३६॥
¶आकेवलाद्विहरतः **सुव्रत**स्वामिनोऽपि हि। एकादशमासन्यूनार्धाष्टमाब्दसहस्रगात् ॥२३७॥
प्रभोस्त्रिंशत्सहस्राणि [१२]श्रमणानां महात्मनाम्। सहस्राणि तु पञ्चाशदा[१३]र्यिकाणां तपोजुषाम् ॥२३८॥
[१४]चतुर्दशपूर्वभृतां सहस्रार्धं महाधियाम्। [१५]अवधिज्ञानयुक्तानामष्टादश शतानि तु ॥२३९॥
शतानि पञ्चदश तु [१६]मनःपर्ययशालिनाम्। [१७]केवलज्ञानयुक्तानामष्टादश शतानि तु ॥२४०॥
[१८]जातवैक्रियलब्धीनां सहस्रद्वितयं पुनः। उत्पन्न[१९]वादलब्धीनां सहस्रं द्वे शते तथा ॥२४१॥
[२०]श्रावकाणां लक्षमेकं द्वासप्ततिसहस्र्यपि। [२१]श्राविकाणां त्रिलक्षी च सार्धा विहरतोऽभवत् ॥२४२॥
निर्वाणकाले **सम्मेतं** ययौ श्री**मुनिसुव्रतः**। समं मुनिसहस्रेणाऽनशनं प्रत्यपादि च ॥२४३॥
मासस्याऽन्ते ज्येष्ठकृष्णनवम्यां **श्रवणे** च भे। समं तैर्मुनिभिः स्वामी ययौ पदमनश्वरम् ॥२४४॥
सार्धाः सप्ताब्दसहस्राः [२२]कौमार-[२३]व्रतयोः पृथक्। [२४]राज्ये पञ्चदश त्रिंशदित्यायुः **सुव्रत**प्रभोः ॥२४५॥
श्री**मल्लि**स्वामिनिर्वाणा**न्मुनिसुव्रत**निर्वृतिः। चतुःपञ्चाशति समालक्षेष्वतिगतेष्वभूत् ॥२४६॥

**मुनिसुव्रत**स्य मुनिभिः सहैव तैः पदमव्ययं गतवतः सुरेश्वराः।
समुपेत्य मोक्षमहिमानमुच्चकैर्विधिवद् व्यधुः सविबुधाः ससंभ्रमाः ॥२४७॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे पर्वणि **श्रीमुनिसुव्रतस्वामि**-
चरितवर्णनो नाम सप्तमः सर्गः॥

१. जगदुपकारं कर्तुमिच्छुः ॥ २. सहस्रवणिजां स्वामी ॥ ३. *०हि* पाता. ॥ ४. सम्यक्त्वमेवैकं वसु धनं यस्य स तेन ॥ ५. अङ्गीचकार ॥ ६. तिरस्कारः ॥ ७. ***तर्जनीदर्शनै०*** मु.; तर्जन्या दन्तैश्च इत्यर्थः ॥ ८. *परिवेष्याऽपमानेन सदा निर्वेदभावितः* पाता. ॥ ९. *विहृत्य स्वामिना सार्धं पालयित्वा चिरं व्रतम्* हे. ॥ १०. तावन्ति सन्ति अस्येति तावद्वान् ॥ ११. प्राग्जन्मद्वेषी ॥ १२. साधूनां सङ्ख्या ३०सहस्रमिता ॥ १३. साध्वीनां सङ्ख्या ५०सहस्रमिता ॥ १४. चतुर्दशपूर्विणां सङ्ख्या ५००मिता ॥ १५. अवधिज्ञानिनां सङ्ख्या १८००मिता ॥ १६. मनःपर्ययज्ञानिनां सङ्ख्या १५००मिता ॥ १७. केवलज्ञानिनां सङ्ख्या १८००मिता ॥ १८. वैक्रियलब्धीनां सङ्ख्या २सहस्रमिता ॥ १९. वादलब्धीनां सङ्ख्या १२००मिता ॥ २०. श्रावकाणां सङ्ख्या १लक्ष७२सहस्रमिता ॥ २१. श्राविकाणां सङ्ख्या ३लक्ष५०सहस्रमिता ॥ २२. कौमारे ७५००वर्षाणि ॥ २३. व्रते ७५००वर्षाणि ॥ २४. राज्ये १५०००वर्षाणि, एवं ३०सह-स्राणि वर्षाणि जातानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥अष्टमः सर्गः॥

## ॥श्रीमहापद्मचक्रवर्तिचरितम्॥

इतश्च विहरत्येव जिनेन्द्रे **मुनिसुव्रते**। जज्ञे चक्री **महापद्म**श्चरितं तस्य कीर्त्यते ॥१॥
**जम्बूद्वीप**स्याऽस्य **पूर्वविदेहा**वनिभूषणे। **सुकच्छ**विजये ख्यातमस्ति **श्रीनगरं** पुरम् ॥२॥
तत्र राजा **प्रजापालः** प्रजापालनतत्परः। [1]परराजयशोहंसनाशनाम्बुधरोऽभवत् ॥३॥
सोऽन्यदाऽऽकस्मिकं विद्युत्पातं दृष्ट्वा विरक्तधीः। **समाधिगुप्त**स्य मुनेः समीपे व्रतमाददे ॥४॥
स चिरं पालयामास खड्गधारोपमं व्रतम्। विपद्य चाऽ**च्युतेन्द्रो**ऽभूत् तपोलेशोऽपि नाऽफलः ॥५॥
¶[2]इतश्च [3]**जम्बूद्वीप**स्य क्षेत्रे **भरत**नामनि। समस्ति **हास्तिनपुरं** [4]पुरं सुरपुरोपमम् ॥६॥
**इक्ष्वाकु**वंश्यस्तत्राऽभून्नाम्ना **पद्मोत्तरो** नृपः। पद्मानिकेतनं पद्ममिव **पद्ममहाह्रदे** ॥७॥
तस्योज्ज्वलगुणा **ज्वाला** नामाऽन्तःपुरभूषणम्। बभूव महिषी रूपेणाऽभिभूतामराङ्गना ॥८॥
तस्यां च केसरिस्वप्नसूचितः प्रथमः सुतः। जज्ञे **विष्णुकुमाराख्यः** श्रिया सुरकुमारवत् ॥९॥
स **प्रजापाल**जीवोऽपि पूरयित्वाऽऽयुर**च्युता**त्। च्युत्वा **ज्वाला**महादेव्या उदरे समवातरत् ॥१०॥
चतुर्दशमहास्वप्नसूचितोऽथ सुतोऽभवत्। **ज्वाला**देव्या **महापद्मो** नाम [5]धामाऽखिलश्रियाम् ॥११॥
क्रमेण ववृधाते तावुभावपि सहोदरौ। निमित्तीकृत्य चाऽऽचार्यं सर्वा जगृहतुः कलाः ॥१२॥
स [6]जिगीषुरिति ज्ञात्वा **पद्मोत्तर**महीभुजा। यौवराज्ये **महापद्म**कुमारो निदधे सुधीः ॥१३॥
¶इतश्चो[7]**ज्जयिनी**पुर्यां **श्रीवर्मा** नाम भूपतिः। बभूव तदमात्यस्तु **नमुचि**र्नाम विश्रुतः ॥१४॥
विहरन्नन्यदा तस्यां नगर्यां समवासरत्। आचार्यः **सुव्रतो** नाम **मुनिसुव्रत**दीक्षितः ॥१५॥
तद्वन्दनाय सर्वर्द्ध्या गच्छतो नगराज्जनान्। प्रासादशिखरारूढोऽपश्यच्छ्**रीवर्म**भूपतिः ॥१६॥
अमी अकालयात्रायां सर्वर्द्ध्या कुत्र नागराः। गच्छन्तीति स पप्रच्छ स्वच्छधी**र्नमुचिं** नृपः ॥१७॥
सोऽप्याख्यद् बहिरुद्याने श्रमणाः केचिदागताः। तद्वन्दनाय तद्भक्त्या एते गच्छन्ति सत्वराः ॥१८॥
यामो वयमपीत्युक्ते राज्ञा **नमुचि**रब्रवीत्। यदि वो धर्मशुश्रूषा धर्मं वक्ष्येऽहमेव तत् ॥१९॥
तत्राऽवश्यं गमिष्यामीत्युक्ते भूयोऽपि भूभुजा। मन्त्र्यूचे स्वामिना तर्हि स्थेयं मध्यस्थवृत्तिना ॥२०॥
सर्वान्निरुत्तरीकृत्य वादे जेष्यामि तानहम्। पाखण्डिनां हि पाण्डित्यं [8]प्राकृतेष्वेव जृम्भते ॥२१॥
इत्युक्ते नृपतिर्मन्त्री राजलोकोऽखिलोऽपि च। प्रययुः **सुव्रता**चार्यसन्निधौ विविधाशयाः ॥२२॥
पप्रच्छुस्तत्र ते धर्मं मुनिभ्यः स्वैरवादिनः। मौनेन मुनयोऽप्यस्थुस्तेषामुच्चा[9]वचोक्तिभिः ॥२३॥
¶ततश्च **नमुचिः** क्रुद्धो निन्दन् शासनमार्हतम्। सूरिं प्रति जगादैवं किमहो [10]वेत्ति गौरयम् ? ॥२४॥
इत्यूचुः **सुव्रता**चार्या अनार्यमपि मन्त्रिणम्। जिह्वा कण्डूयते ते चेत् किमपि ब्रूमहे तदा ॥२५॥
अथैकः **सुव्रता**चार्यपादान् [11]क्षुल्लोऽभ्यधादिदम्। स्वयं वो युज्यते वक्तुं न [12]विद्वन्मानिनाऽमुना ॥२६॥
अमुं वादे विजेष्येऽहं सभ्यीभूयैव पश्यथ। [13]भट्टो वदत्वसौ पक्षं दूषयामि [14]यथाऽद्य तम् ॥२७॥

---

१. शत्रुभूतराजानां यश एव हंसस्तस्य नाशने मेघसमानः, मेघागमे हि हंसाः सरोवराणि विहाय पलायन्ते इति स्थितिः ॥ २. *अमुष्य* हे. ॥ ३. *जम्बूद्वीपेऽस्मिन्* ला. सं. ॥ ४. *पुरन्दरपुरोपमम्* ला. ॥ ५. स्थानम् ॥ ६. जेतुमिच्छुः जयनशील इति यावत् ॥ ७. *इतश्चोज्जयनी०* खंता. पाता. ॥ ८. पामरजनेषु-साधारणजनेषु ॥ ९. उच्चनीचवचनैः ॥ १०. *वेत्ति गौरवम्* मु.; अयं गौः-वृषभः किं वेत्ति ? ॥ ११. लघुसाधुः ॥ १२. आत्मानं विद्वांसं मन्यते इति विद्वन्मानी तेन ॥ १३. *भद्रो* पाता. ॥ १४. *यथातथम्* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊचे **नमुचि**भट्टोऽपि क्रोधकर्कशवागिति । अशौचाः पाखण्डिनश्च [1]त्रयीबाह्याश्च सर्वथा ॥२८॥
तत् संवासयितुं यूयं न युक्ता नि[2]जमण्डले । इत्येष खलु मे पक्षो युष्मास्वन्यत् किमुच्यते ? ॥२९॥
प्रत्यूचे क्षुल्लकोऽप्येवमशौचं सुरतं खलु । तत्सेवकश्च पाखण्डी त्रयीबाह्यः स एव हि ॥३०॥
त्रय्यामर्थोऽयम[3]प्कुम्भः कण्डनी पेषणी तथा । चुल्ली प्रमार्जनी पञ्च [4]सूनाः पापाय गेहिनाम् ॥३१॥
सेवन्ते य इमाः सूनास्त्रयीबाह्या हि ते खलु । सूनापञ्चकहीनास्तु त्रयीबाह्याः कथं वयम् ? ॥३२॥
अस्माकमपदोषाणां दोषवत्सु जनेषु भोः! । म्लेच्छेषूत्तमजातीनामिव वासश्च नोचितः ॥३३॥
इत्थङ्कारं क्षुल्लकेन [5]सुयुक्तिभि[6]रपोदितः । स्वस्थानं सोऽगमन् मन्त्री राजा राजजनोऽपि च ॥३४॥
स मन्त्री निशि चोत्थाय निशाचर इवोत्कटः । ज्वलन्निवाऽतिक्रोधेन तद्वधाय समाययौ ॥३५॥
सद्यः शासनदेव्या च [7]वार्तिकेनेव पन्नगः । स स्तम्भितः प्रभाते च ददृशे विस्मितैर्जनैः ॥३६॥
आश्चर्यं प्रेक्ष्य तद् राजा लोकाश्च बहवस्तदा । श्रुत्वा धर्ममुपाशाम्यन् विमदा इव दन्तिनः ॥३७॥
तथाऽपमानान्**नमुचि**र्नगरं **हस्तिनापुरम्** । ययौ स्थानं विदेशो हि मानिना[8]मपमानिनाम् ॥३८॥
युवराजो **महापद्मः** स्वसाचिव्ये चकार तम् । अभ्यागतेऽन्यनृपतिप्रधाने ह्यर्थिनो नृपाः ॥३९॥
¶इतश्च प्रान्तवास्तव्यो नाम्ना **सिंहबलो** नृपः । दुर्गस्थ इत्यतिबली नभःस्थ इव राक्षसः ॥४०॥
[9]अवस्कन्दमवस्कन्दं **महापद्म**स्य [10]मण्डलम् । प्राविशत् स्वं पुनर्दुर्गं न धर्तुं कोऽपि तं क्षमः ॥४१॥
रुषितोऽथ **महापद्मो**ऽवोचन्**नमुचि**मन्त्रिणम् । क्वचित् किञ्चिदिहोपायं वेत्सि **सिंहबल**ग्रहे ? ॥४२॥
सोऽप्यूचे देव! वेद्मीति वचो वच्मि कथं ह्यहम्? । गेहे[11]नर्दीत्यपवादः सुलभः गर्जतां गृहे ॥४३॥
कृत्वोपायं फलेनैव स्वामिनो दर्शयाम्यहम् । उपायं वचसा वक्तुं कातरा अपि पण्डिताः ॥४४॥
इत्युक्त्वा हृष्टचित्तेन **महापद्मेन** तत्क्षणम् । स आदिष्टो ययौ तस्य दुर्गं [12]वायुरिवाऽस्खलन् ॥४५॥
तीक्ष्णोपायः स तद्दुर्गं भङ्क्त्वा **सिंहबलं** च तम् । मृगं सिंह इवाऽऽदाय **महापद्म**मुपाययौ ॥४६॥
वरं वृणीष्वेति **महापद्मे**नाऽभिहितो मुदा । ऊचे **नमुचि**मन्त्र्येवमादास्ये समये वरम् ॥४७॥
एवं च प्रतिपन्नार्थो यौवराज्यमपालयत् । **महापद्मो नमुचि**ना कृतसाचिव्यमुच्चकैः ॥४८॥
¶**ज्वालया**ऽथ **महापद्म**मात्राऽर्हत्प्रतिमारथः । [13]कर्णीरथ इवाऽऽकारि भवसागरतारणे ॥४९॥
मिथ्यादृष्ट्या च सपत्नीमात्रा **लक्ष्म्य**भिधानया । अकार्यत **ब्रह्मरथ**स्तत्[14]प्रतीपविधित्सया ॥५०॥
अयं **ब्रह्मरथः** पूर्वं परिभ्रमतु पत्तने । पश्चाद**र्हद्रथ** इति **लक्ष्म्या**ऽयाच्यत भूपतिः ॥५१॥
ऊचे **ज्वाला**ऽपि राजानं न प्राग् जैनरथो यदि । यात्रां करिष्यति पुरे तदा ह्यनशनं मम ॥५२॥
ततश्च संशयापन्नो रथयोरुभयोरपि । यात्रां राजाऽरुणत् का हि मध्यस्थस्याऽपरा गतिः ? ॥५३॥
ततश्च मातृदुःखेन **महापद्मो**ऽतिपीडितः । निशि सुप्तेषु लोकेषु निर्ययौ **हस्तिनापुरात्** ॥५४॥
स गच्छन्नुन्मुखः स्वैरं प्रापदेकां महाटवीम् । तत्राऽपि पर्यटन्नेकमपश्यत् तापसाश्रमम् ॥५५॥
तापसैः कृतसत्कारः [15]प्रियातिथिसमागमैः । प्रावर्त्तत **महापद्म**स्तत्र स्थातुं स्ववेश्मवत् ॥५६॥
¶इतश्च पुर्यां **चम्पायां** नृपतिर्**जनमेजयः** । रुद्धः **कालनरेन्द्रेण** युयुधे च ननाश च ॥५७॥
भज्यमाने पुरे तत्र नेशुरन्तःपुरस्त्रियः । [16]कुरङ्ग्य इव दिङ्मूढा दीप्यमाने दवानले ॥५८॥
**चम्पेशस्य नागवती** प्रिया स्वसुतया सह । प्रणष्टा **मदनावल्या** तत्राऽगात् तापसाश्रमे ॥५९॥
**पद्मस्य मदनावल्याश्चा**ऽ[17]न्योऽन्यमदनास्त्रयोः । जज्ञे दर्शनमन्योऽन्यमनुरागश्च तत्क्षणम् ॥६०॥

१. ऋग्वेदादिवेदत्रयीबाह्याः ॥ २. अस्मद्देशे निवासयितुं यूयं न युक्ताः ॥ ३. जलस्थानम् ॥ ४. जीवानां वधस्थानं सूनोच्यते, 'सूना स्थानं वधस्य यत्'(अभि. चिन्ता.श्लो.९३) ॥५. *सयुक्ति०* खंता. पाता. ॥ ६. निरस्तः ॥ ७. गारुडिकेन ॥ ८. तिरस्कृतानाम्; *मानिनामपमानतः* पाता. ॥ ९. उपद्रुत्योपद्रुत्य ॥ १०. देशम् ॥ ११. गेहेशूरः ॥ १२. *वायुरिवाऽस्खलत्* मु. ॥ १३. प्रवहणम् ॥ १४. प्रतीपं-प्रतिकूलम् ॥ १५. प्रियोऽतिथिसमागमो येषां ते ॥ १६. हरिण्यः ॥ १७. अन्योऽन्यं प्रति मदनास्त्रतुल्ययोः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातानुरागां तां ज्ञात्वा जनन्येवमवोचत । पुत्रि! मा चापलं कार्षीर्नैमित्तिकवचः स्मर ॥६१॥
त्वं हि नैमित्तिकेनैवमाख्याताऽसि भविष्यसि । प्रधानपत्नी षट्खण्ड**भरत**क्षेत्रशासितुः ॥६२॥
पुरुषे यत्र तत्राऽपि माऽनुरागं ततः कृथाः । संयता तिष्ठ समये चक्री त्वां परिणेष्यति ॥६३॥
तद्विप्लवभयात् **पद्म**मूचे कुलपतिस्ततः । यत्राऽचालीस्तत्र वत्स! गच्छ स्वस्त्यस्तु तेऽनघ! ॥६४॥
¶श्रुत्वा दध्यौ कुमारोऽपि युगपद् द्वौ न चक्रिणौ । चक्री भाव्यहमेवेह तन्ममैव हि पत्न्यसौ ॥६५॥
निश्चित्यैवं **महापद्मो** निर्गतस्तापसाश्रमात् । पर्यटन्नासदत् **सिन्धुसदनं** नाम पत्तनम् ॥६६॥
तदा च बहिरुद्याने पौरनार्यो [1]मधूत्सवे । चिक्रीडुर्विविधं तत्र स्थिताः कन्दर्पशासने ॥६७॥
तत्केलितुमुलं श्रुत्वा **महासेन**महीपतेः । स्तम्भमुन्मूलयामास कदलीकाण्डवत् करी ॥६८॥
निपात्याऽऽ[2]रोहकौ सद्यः शय्यासंसक्तरेणुवत् । अङ्गे वायोरपि स्पर्शासह उत्तब्धरोमकः ॥६९॥
[3]प्रतिकारैः प्रतिकाराक्षमै[4]र्मुक्तोऽतिदूरतः । ताः पौरनारीर्निकषा झगित्येव स आययौ ॥७०॥युग्मम्॥
पलायितुं न शेकुस्तास्तस्थुस्तत्रैव [5]साध्वसात् । नक्राक्रान्तमरालीवत् तारतारं च चुक्रुशुः ॥७१॥
क्रोशन्तीः प्रेक्ष्य ताः [6]सानुक्रोशं **पद्मो**ऽभिधाव्य तम् । इत्थं ततर्ज रे [7]व्याल! पश्याऽर्वाग् मद्दुर्मद! ॥७२॥
कुमाराभिमुखं रोषाद् ववले व्यालकुञ्जरः । कम्पयन् [8]काश्यपीं पादन्यासैः [9]शुषिरिणीमिव ॥७३॥
अस्मद्रक्षाकृते कोऽपि महात्माऽऽत्मानमक्षिपत् । [10]यमास्यस्येव करिणः पुर इत्यवदन् स्त्रियः ॥७४॥
क्षणेनाऽ[11]भ्येयुषोऽभ्यर्णं तस्य व्यालस्य सन्मुखम् । ऊर्ध्वं वासोऽक्षिपत् **पद्म**श्छद्माऽपि क्वाऽपि शोभते ॥७५॥
कुमारबुद्ध्या तद्वासो मुहुर्विव्याध सिन्धुरः । [12]आन्ध्याय क्रोध एकोऽपि किं पुनर्मदमूर्च्छितः ? ॥७६॥
तदा च तुमुलेनोच्चैरमिलन्नागरो जनः । समं सामन्तसेनेशै**र्महासेन**श्च भूपतिः ॥७७॥
**महासेनो**ऽवदत् **पद्मं** दोष्मन्नपसर द्रुतम् । अकालमृत्युनाऽनेन करिणा रोषितेन किम् ? ॥७८॥
**पद्मो**ऽपि निजगादैवं युक्तमुक्तं त्वया नृप! । [13]परं न मे युक्तमिदं यदारब्धस्य मोक्षणम् ॥७९॥
वशीकृतमिमं [14]व्यालमव्यालमिव जन्मतः । [15]वाह्यमानं मया पश्य मा भूः [16]सौजन्यकातरः ॥८०॥
एवमुक्त्वा कुमारेण मुष्टिवज्रेण ताडितः । [17]प्रच्छादनपटीवेधन्यग्मुखः स महाकरी ॥८१॥
ग्रहणाय कुमारस्योत्तस्थौ यावदिभः स तु । स तावद् [18]विद्युदुत्क्षिप्तकरणेनाऽऽरुरोह तम् ॥८२॥
आसनैश्च नवनवैः स **मण्डूकासना**दिभिः । अग्रतः पार्श्वतश्चाऽपि विचरंस्तमखेदयत् ॥८३॥
कुम्भदेशे चपेटाभिः कण्ठे चाऽङ्गुष्ठपीडनैः । पादन्यासेन पृष्ठे च स **पद्मे**नाऽऽकुलीकृतः ॥८४॥
सविस्मयैर्वीक्ष्यमाणः पौरैः साध्वितिवादिभिः । नृपेण बन्धुबुद्ध्या च वर्ण्यमानपराक्रमः ॥८५॥
भ्रमयामास तं नागमा[19]रोहकपुरन्दरः । [20]कुमारः कारयन् क्रीडां स्वैरं कलभलीलया ॥८६॥[युग्मम्]
आरोहकायाऽपरस्मै तं समर्प्य च सिन्धुरम् । [21]कक्षां गृहीत्वाऽ[22]वारोह[23]द्धरायां पदं [24]ददत् ॥८७॥
तं च विक्रम-रूपाभ्यां प्रधानकुलभूरिति । राजा वितर्कयामास निन्ये च निजवेश्मनि ॥८८॥
निजं कन्याशतं तेन भूपतिःपर्यणाययत् । गृहागतो वरस्तादृक् पुण्यैरेव ह्यवाप्यते ॥८९॥
ताभिर्भोगान् कुमारस्य भुञ्जानस्याऽप्यहर्निशम् । स्मरणं **मदनावल्या** नित्यशल्यमिवाऽभवत् ॥९०॥
¶सोऽन्यदा निशि पर्यङ्के सुप्तो हंस इवाऽम्बुजे । विद्याधर्या **वेगवत्या**ऽपजह्रे वायुवेगया ॥९१॥
निद्राच्छेदे च किं क्षुद्रे! हरसे मामिति ब्रुवन् । मुष्टिमुत्पाटयामास कुमारो वज्रगोलवत् ॥९२॥
साऽप्यूचे मा कुपः [25]स्थामशालिन्नवहितः शृणु । अस्ति **सूरोदयं** नाम पुरं **वैताढ्य**पर्वते ॥९३॥

१. वसन्तोत्सवे ॥ २. हस्तिपकौ ॥ ३. ***प्रती०*** मु. ॥ ४. ***०र्मुक्तो विदूरतः*** मु. ॥ ५. भयात् ॥ ६. सदयं यथा स्यात् तथा ॥ ७. हे दुष्टगज! ॥ ८. पृथ्वीम् ॥ ९. छिद्रसहितामिव ॥ १०. यममुखस्य ॥ ११. आगच्छतः ॥ १२. अन्धत्वाय; ***आध्याय:*** मु. ॥ १३. ***परं व्रीडाकरं तन्मे*** मु. ॥ १४. मत्तमिमं गजं जन्मतः शान्तमिव ॥ १५. ***बाध्यमानं*** मु. ॥ १६. सौजन्येन कातरः-'कायर' भीरुः ॥ १७. आच्छादनवस्त्रस्य वेधे अधोमुखः ॥ १८. विद्युद्वदुत्प्लुतगत्या ॥ १९. आरोहकेषु हस्तिपकेषु पुरन्दरः-इन्द्रः श्रेष्ठ इति यावत् ॥ २०. ***कारयामास तम्*** ला. पा. छा. ॥ २१. हस्तिबन्धनरज्जुम् ॥ २२. अवातरत् ॥ २३. पृथिव्याम् ॥ २४. ***दधत्*** मु. ॥ २५. स्थाम्ना तेजसा शोभमान! ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तत्राऽस्तीन्द्र**धनु**र्नाम विद्याधरनरेश्वरः । **श्रीकान्ता** नाम तद्भार्या **जयचन्द्रा** तयोः सुता ॥९४॥
अनुरूपवराप्राप्त्या **जयचन्द्रा** च साऽभवत् । पुरुषद्वेषिणी जीवन्मृता हीनवराः स्त्रियः ॥९५॥
पटेष्वालेख्य रूपाणि **भरत**क्षेत्रभूभुजाम् । दर्शितानि मया तस्यै न किञ्चि[1]दरुचत् परम् ॥९६॥
पटे त्वद्रूपमन्येद्युर्लिखित्वा दर्शितं मया । द्राक् तस्या हृदि कामेन [2]कामं च निदधे पदम् ॥९७॥
पुरुषद्वेषिणी सा प्राग् जीवितद्वेषिणी [3]ततः । बभूव मन्यमाना त्वां दुर्लभं प्राणवल्लभम् ॥९८॥
पतिर्भवति वा मेऽसौ **पद्मः पद्मोत्तरा**त्मजः । मरणं शरणं वा मे प्रतिज्ञामिति साऽकरोत् ॥९९॥
तस्यास्त्वय्यनुरागं तं पित्रोरहमचीकथम् । अनुरूपवरेच्छातस्तत्क्षणान्मोदमानयोः ॥१००॥
अहं **वेगवती** नाम महाविद्याधरी प्रभो! । ताभ्यामस्मि समादिष्टा त्वदानयनहेतवे ॥१०१॥
तवानुरागिणीं चै[4]तामाश्वासयितुमब्रुवम् । सुभ्रु! [5]स्वस्था भवाऽद्यैव तत्र यास्यामि नन्वहम् ॥१०२॥
आनेष्यामि **महापद्मं** तव हृत्पद्मभास्करम् । नो वा वह्निं प्रवेक्ष्यामि [6]क्षामीकुरु मनोरुजम् ॥१०३॥
एवं तामहमाश्वास्य तदाश्वाससुधाकरम् । इहोपेत्य नयामि त्वामुपकार्यसि मा कुपः ॥१०४॥
साऽथ तं तदनुज्ञाता **सूरोदयपुरे**ऽनयत् । [7]आभियोग्यद्युसद्यानप्रायानल्पेन रंहसा ॥१०५॥
प्रभाते [8]सूरवत् **सूरोदय**नाथेन पूजितः । **जयचन्द्रा**मुपायंस्त स चन्द्र इव रोहिणीम् ॥१०६॥
¶**जयचन्द्रा**मातुलजौ **गङ्गाधर-महीधरौ** । महाविद्याधरौ विद्यामददोर्मददुर्धरौ ॥१०७॥
तद्विवाहं समाकर्ण्य सद्यश्चुकुपतुस्तराम् । एकद्रव्याभिलाषो हि महद्वैरस्य कारणम् ॥१०८॥
तौ च सर्वाभिसारेण शूरौ **सूरोदये** पुरे । समेयतुर्योधयितुं **जयचन्द्रा**पतिं युतौ ॥१०९॥
विद्याधरपरीवारो दुर्वारभुजविक्रमः । नगरान्निरगात् **पद्मो**ऽप्यच्छद्मरणकौतुकी ॥११०॥
स कांश्चित्त्रासयन् कांश्चिन्निघ्नन् कांश्चिच्च मारयन् । लीलयाऽयोधयद् वैरिसै[9]न्यान् हरिरिव द्विपान् ॥१११॥
विद्याधरपती तौ च **गङ्गाधर-महीधरौ** । स्वसैन्यभङ्गमालोक्य [10]जीवग्राहं प्रणेशतुः ॥११२॥
¶ततश्चोत्पन्नचक्रादिरत्नः **पद्मोत्तरा**त्मजः । षट्खण्ड**भरत**क्षेत्रविजयं विदधे बली ॥११३॥
स्त्रीरत्नेन विना तस्य चक्रित्वर्द्धिरपूर्यत । इन्दोः सितचतुर्दश्यां पूर्णतेव कलां विना ॥११४॥
पूर्वदृष्टां स्मरंस्तां च स्त्रीरत्नं **मदनावली**म् । तदाश्रमपदं **पद्मः** क्रीडयैव ययौ पुनः ॥११५॥
आतिथ्यं तापसाश्चक्रुस्तस्मै तत्र भ्रमन् गतः । **जनमेजय**राजस्तु ददौ तां **मदनावली**म् ॥११६॥
पूर्णचक्रधरर्द्धिः स प्रययौ **हस्तिनापुर**म् । ननाम पितरौ प्राग्वन्मुदितौ [11]मुदितोऽधिकम् ॥११७॥
स्वसूनोश्चरितं तच्चाऽऽकर्ण्य कर्णरसायनम् । सोच्छ्वासौ पितरौ तत्राऽभूतां सिक्ताविव द्रुमौ ॥११८॥
¶तदा च **सुव्रतो** नाम **मुनिसुव्रत**दीक्षितः । आचार्यो विहरंस्तत्र समेत्य समवासरत् ॥११९॥
तं गत्वा सपरीवारो राजा **पद्मोत्तरो**ऽनमत् । तद्देशनां च शुश्राव भववैराग्यमातरम् ॥१२०॥
संस्थाप्य तनयं राज्ये दीक्षायै यावदे[12]म्यहम् । स्वामिंस्तावदिह स्थेयमित्याचार्यं नृपोऽवदत् ॥१२१॥
न प्रमादो विधातव्य इत्युक्तः सूरिणा तु सः । तत्पादानभिवन्द्य स्वं प्राविशन्नगरं नृपः ॥१२२॥
आहूयाऽमात्य-सामन्तप्रभृतीः प्रकृतीर्निजाः । सुतं **विष्णुकुमारं** चेत्यूचे **पद्मोत्तरो** नृपः ॥१२३॥
दुःखाब्धिरेष संसारस्त[13]त्पोषाय च देहिनः । प्रवृत्ती रोगितस्येवाऽपथ्येच्छा रोगवृद्धये ॥१२४॥
भवे मे पततः पुण्यैरिहाऽऽगात् **सुव्रतः** प्रभुः । [14]उपकूपं गतस्येवाऽन्धस्य बाहुप्रदो नरः ॥१२५॥
अद्य **विष्णुकुमार**स्तद्राज्ये संस्थाप्यतामयम् । व्रतं **सुव्रत**पादान्ते ग्रहीष्यामि ध्रुवं त्वहम् ॥१२६॥

१. ०***किञ्चिद् रुरुचे परम्*** खंता. ॥ २. अत्यन्तम् ॥ ३. ***तव*** खंता. पाता. ॥ ४. ***तां च विश्वासयितुमब्रुवम्*** हे., ०***मब्रवम्*** मु. ॥ ५. ***सुस्था*** हे. पाता. ॥ ६. मनःपीडां अल्पां कुरु ॥ ७. आभियोगिकदेवविमानतुल्येनाऽनल्पेन वेगेन ॥ ८. सूर्यवत् ॥ ९. सैनिकान् ॥ १०. जीवं गृहीत्वा ॥ ११. हृष्टः, पद्मविशेषणम् ॥ १२. एमि-आगच्छामि ॥ १३. दुःखपोषणाय ॥ १४. कूपसमीपम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विष्णु**रप्यभ्यधत्तैवं कृतं राज्येन तात! मे । त्वामनु प्रव्रजिष्यामि व्रजिष्यामि [1]त्वदध्वना ॥१२७॥
राजाऽथ **पद्म**माहूय [2]सोपरोधमभाषत । वत्सोपादत्स्व राज्यं नः प्रव्रजामो यथा वयम् ॥१२८॥
अभ्यधात् प्राञ्जलिः **पद्म**स्तात! [3]तातसमे मम । आर्ये **विष्णुकुमारे** सत्येतन्न खलु युज्यते ॥१२९॥
राज्येऽभिषिच्यतां **विष्णु**रलम्भूष्णुर्जगत्यपि । भवामि युवराजोऽस्य पदातिवदहं पुनः ॥१३०॥
ऊचे राज्ञाऽभ्यर्थितोऽपि नैष राज्यं [4]जिघृक्षति । [5]जिघृक्षति परिव्रज्यां किन्तु सार्धं मयैव हि ॥१३१॥
आत्तमौनस्ततः **पद्मः पद्मोत्तर**महीभुजा । राज्येऽभिषिच्ये चक्रित्वाभिषेकेण सहैव हि ॥१३२॥
कृतनिष्क्रमणस्तेन **सुव्रतां**ह्रितले व्रतम् । **पद्मोत्तर**नृपो **विष्णुकुमारे**ण सहाऽऽददे ॥१३३॥
स्वपुरेऽभ्रमयत् **पद्मो**ऽप्यार्हतं मातृकं रथम् । पूज्यमानं जनैः सर्वैः स्वशासनमिवाऽवनौ ॥१३४॥
रथभ्रमणकालं तु तेऽपि **सुव्रत**सूरयः । तस्थुस्तत्रैव नगरे समं **पद्मोत्तरा**दिभिः ॥१३५॥
चक्रे जिनप्रवचनस्योन्नतिः **पद्म**चक्रिणा । स्वकीयस्येव वंशस्य चरित्राद्भुतशालिना ॥१३६॥
ग्रामाकर-पुर-द्रोणमुखादिषु स उच्चकैः । कोटिशोऽकारयच्चैत्यान्यद्रीनिव नवोत्थितान् ॥१३७॥
¶विहृत्य गुरुभिः सार्धं पालयित्वोत्तमं व्रतम् । उत्पन्नकेवलः सिद्धिं **पद्मोत्तर**मुनिस्त्वगात् ॥१३८॥
मुनि**र्विष्णुकुमारो**ऽपि तप्यमानोऽद्भुतं तपः । तपोमहिम्ना समभूत् सञ्जातानेकलब्धिकः ॥१३९॥
उत्तुङ्गो मेरुवद् व्योमचारी [6]विहगराजवत् । गीर्वाणवत् कामरूपो रूपवान् [7]मीनकेतुवत् ॥१४०॥
इत्यादि विविधावस्थो भवितुं [8]प्रबभूव सः । बभूव न तु साधूनां लब्धिभोगोऽ[9]पदे न हि ॥१४१॥
तेऽन्यदा **सुव्रताचार्याः** साधुभिः परिवारिताः । प्रावृषोऽतिक्रमायैत्य न्यवसन् **हस्तिनापुरे** ॥१४२॥
आचार्यागमनं ज्ञात्वा प्राग्वैर[10]प्रतियातनाम् । चिकीर्षु**र्नमुचि**र्मन्त्री **महापद्मं** व्यजिज्ञपत् ॥१४३॥
वरः प्राक्प्रतिपन्नो मे नरेन्द्रवर! दीयताम् । [11]न्यासवत् प्रतिपन्नस्य नाऽस्ति नाशो महात्मसु ॥१४४॥
याचस्वेति स राज्ञोक्तेऽब्रवीद् यक्ष्याम्यहं [12]क्रतुम् । तदन्तावधि मे राज्यं देहि वाचं निजां स्मरन् ॥१४५॥
सत्यप्रतिज्ञो निदधे राज्ये **नमुचि**मन्त्रिणम् । अन्तरन्तःपुरं राजा प्रविवेश स्वयं पुनः ॥१४६॥
पुरान्निर्गत्य **नमुचिः** कपटात् [13]क्रतुवाटके । अभवद्दीक्षितः पापो दुष्टध्यायी [14]बकोटवत् ॥१४७॥
[15]तस्याऽभिषेककल्याणं कर्तुं [16]प्रकृतयोऽखिलाः । श्वेतभिक्षून् विना सर्वे लिङ्गिनश्च समाययुः ॥१४८॥
एयुर्मां लिङ्गिनः सर्वे न त्वमी श्वेतभिक्षवः । मात्सर्यादिति तच्छिद्रमग्रे चक्रे स दुर्मतिः ॥१४९॥
गत्वा च **सुव्रता**चार्यानिति साक्षेपमब्रवीत् । यो यदा स्यान्नृपस्तं हि श्रयन्ते लिङ्गिनस्तदा ॥१५०॥
राजरक्ष्याणि हि तपोवनानीति तपोधनैः । राजाऽभिगम्यः क्रियते तपःषष्ठांशभाक् तथा ॥१५१॥
मन्निन्दकाः पुनर्यूयं स्तब्धाः पाखण्डिपांसनाः । निर्मर्यादा विधातारो लोक-राजविरुद्धयोः ॥१५२॥
तद्युष्माभिर्न मे राज्ये स्थातव्यं गच्छताऽन्यतः । योऽत्र वः स्थास्यति स मे वध्यः खलु खलाशयः ॥१५३॥[युग्मम्]
बभाषे सूरिरप्येवं न नः [17]कल्प इति त्वयि । अभिषिक्ते न सम्प्राप्ता निन्दामश्च न [18]कञ्चन ॥१५४॥
प्रत्यूचे स पुनः क्रुद्धः कृतमाचार्य! विस्तरैः । सप्ताहादिह तिष्ठन्तो [19]निग्राह्या दस्युवन्मया ॥१५५॥
¶इत्युक्त्वा स ययौ [20]स्वौकः सूरिरप्यब्रवीन्मुनीन् । किं कर्तव्यमिह ब्रूत यथाशक्ति यथामति ॥१५६॥
तत्रैकः साधुरित्यूचे षष्टिवर्षशतीं तपः । तप्तवान् **विष्णुकुमारो मन्दरे** सोऽस्ति सम्प्रति ॥१५७॥
सोऽग्रजः **पद्मराज**स्य तेन तद्वचनादसौ । शान्तिं यास्यति **नमुचिः** स्वामी सोऽप्यस्य **पद्म**वत् ॥१५८॥
यो विद्यालब्धिमान् साधुस्तमानेतुं प्रयातु सः । उपयोगोऽपि लब्धीनां सङ्घकार्ये न दुष्यति ॥१५९॥

१. तव मार्गेण ॥ २. आग्रहसहितम् ॥ ३. पितृसदृशे ॥ ४. ग्रहीतुमिच्छति ॥ ५. ***परिव्रज्यां किन्तु सार्धं गृ(ग्र)हीष्यति मयैव हि ।*** हे. ॥ ६. गरुडवत् ॥ ७. कामदेववत् ॥ ८. समर्थो बभूव, परं न कृतवानुपयोगमित्यर्थः ॥ ९. अस्थाने ॥ १०. प्रतियातना-प्रतिक्रिया ॥ ११. न्यासः-'थापण' ॥ १२. यज्ञम् ॥ १३. यज्ञमण्डपे ॥ १४. बकवत् ॥ १५. ***अस्याभि०*** पाता. ॥ १६. नागरिकाः ॥ १७. आचारः ॥ १८. ***किञ्चन*** मु. ॥ १९. निग्रहपात्राणि ॥ २०. स्वगृहम् ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अथैकः साधुरित्यूचे गन्तुं तत्र विहायसा। शक्नोमि न समागन्तुं ब्रूत यत्कृत्यमत्र मे ॥१६०॥
त्वां समानेष्यते **विष्णु**रेवेति गुरुणोदिते। उत्पत्य तार्क्ष्यवद्[1] व्योम्ना क्षणात् **पद्माग्रजं** ययौ ॥१६१॥
दृष्ट्वा **विष्णुकुमार**स्तं चिन्तयामासिवानिति। सङ्घकार्यं महद्वेगाद् वदत्यस्याऽऽगमो पुनः ॥१६२॥
प्रावृट्काले हि साधूनां विहारो नाऽन्यथा भवेत्। लब्धीनामुपयोगो हि न ते कुर्युर्यथा तथा ॥१६३॥
एवं विचिन्तयन्तं तं स मुनिर्मुनिपुङ्गवम्। अभिवन्द्य समाचख्यौ तन्निजागमकारणम् ॥१६४॥
क्षणाद् **विष्णुकुमार**स्तं गृहीत्वर्षिं[2] विहायसा। आययौ **हास्तिनपुरे** ववन्दे चाऽऽत्मनो गुरून् ॥१६५॥
ततः साधुपरीवारो[3] **विष्णुर्नमुचि**मभ्यगात्। सर्वै**र्नमुचि**वर्जं च ववन्दे पार्थिवादिभिः ॥१६६॥
**विष्णु**र्धर्मकथापूर्वं ससान्त्वमिदमभ्यधात्। यावत् प्रावृडिहैवाऽमी तिष्ठन्तु मुनयः पुरे ॥१६७॥
एकत्र स्वयमप्येते चिरकालं वसन्ति न। वर्षासु जन्तुबाहुल्याद् विहारस्तु न कल्पते ॥१६८॥
गरीयसि पुरेऽमुष्मिन् भिक्षुभिर्भैक्षवृत्तिभिः। अस्मादृशैर्वसद्भिस्ते हानिः का नाम बुद्धिमन्! ? ॥१६९॥
**भरतादित्यसोमा**द्यैर्वन्दिताः साधवो नृपैः। तथा न चेत् करोषि त्वं स्थातुं देहि तथाऽपि भोः! ॥१७०॥
इत्युक्तो **विष्णु**ना मन्त्री प्रत्यूचे कोपदारुणम्। अलमाचार्य! वचनैर्वस्तुं[4] नेह ददामि वः ॥१७१॥
पुनरप्यभ्यधाद् **विष्णुः** प्रभविष्णुरपि क्षमी। वसन्तूद्यानमेवाऽमी नगरस्य बहिः स्थिताः ॥१७२॥
जातामर्षो महर्षिं तं व्यब्रवीत् सचिवब्रुवः[5]। न सहे गन्धमपि वः संवासप्रार्थनैरलम् ॥१७३॥
पुरस्याऽन्तर्बहिर्वाऽपि निवासः श्वेतवाससाम्। दस्यूनामिव मर्यादाहीनानां न भविष्यति ॥१७४॥
यदि वः प्राणितं[6] प्रेयस्तदाऽपसरत द्रुतम्। अन्यथा वो हनिष्यामि तार्क्ष्यो विषधरानिव ॥१७५॥
इत्युक्त्योद्दीपितो **विष्णु**राहुत्येव हुताशनः। ऊचे तथाऽप्यहो! देहि स्थातुं नस्त्रिपदीमिह ॥१७६॥
ततो **नमुचि**रित्यूचे दत्ता वस्त्रिपदी मया। यस्त्रिपद्या बहिर्वः स्यान्निहनिष्यामि तं खलु ॥१७७॥
एवमस्त्विति देहीति चोक्त्वा प्रववृधे मुनिः। किरीटी कुण्डली स्रग्वी धनु-र्वज्र-कृपाणभृत् ॥१७८॥
खेचरान् स्फारफूत्कारैर्भ्रंशयन् जीर्णपर्णवत्। पद्मिनीपत्रवत् पाददर्दरैः[7] कम्पयन् महीम् ॥१७९॥
उल्लालयन् जलनिधीन् कल्पान्तपवमानवत्। प्रतीपगा[8] आपगाश्च कुर्वाणः सेतुबन्धवत्[9] ॥१८०॥
ज्योतिश्चक्राणि पर्यस्यन् कर्करप्रकरानिव। दारयन् पर्वतवरानपि वल्मीकपुञ्जवत् ॥१८१॥
स महौजा महातेजाः सुरासुरभयङ्करः। वर्धमानः क्रमान्नानारूपो मेरुसमोऽभवत् ॥१८२॥चतुर्भिः कलापकम्॥
त्रिजगत्क्षोभमालोक्य प्रसादनकृतेऽस्य तु। सहस्राक्षः[10] समादिक्षद् गायनीः सुरयोषितः ॥१८३॥
कर्णमूले जगुस्तस्य गान्धारग्रामबन्धुरम्। सर्वज्ञोपज्ञशास्त्रानुरूपमेतन्निरन्तरम् ॥१८४॥
"कोपादिहाऽपि दह्यन्ते स्वार्थे मुह्यन्ति चाऽसकृत्[11]। विपद्य चाऽनन्तदुःखं प्रयान्ति नरकं नराः" ॥१८५॥
इति कोपं शमयितुं किन्नरादिस्त्रियोऽपि हि। जगुश्च ननृतुश्चाऽग्रे तस्य **विष्णु**महामुनेः ॥१८६॥
धरण्यां **नमुचिं** क्षिप्त्वा मध्येपूर्वापराम्बुधि[12]। ददौ पादं जगद्वन्द्यपादः **पद्माग्रजो** मुनिः ॥१८७॥
¶**पद्मो**ऽपि ज्ञातवृत्तान्तः समुपेत्य ससंभ्रमः। चकितः स्वप्रमादेन मन्त्रिदोषेण तेन च ॥१८८॥
स्वमग्रजं महर्षिं तं नमस्कृत्याऽतिभक्तितः। कृताञ्जलिर्नेत्रजलक्षालितांह्रिरदोऽवदत् ॥१८९॥
तातः **पद्मोत्तरो**ऽद्याऽपि चेतसा मम तिष्ठति। स्वामिन्! विजयिनि सति लोकोत्तरगुणे त्वयि ॥१९०॥
श्रीसङ्घाशातनां मन्त्रिपांसनेनाऽमुना न्वहम्[13]। क्रियमाणां न जानामि ज्ञापितोऽस्मि न केनचित् ॥१९१॥
अपराधी तथाऽप्यस्मि भृत्यः पापो ह्यसौ मम। स्वामिनो भृत्यदोषेण गृह्यन्ते इति नीतिवाक् ॥१९२॥

१. गरुडवत्॥ २. *गृहीत्वार्षिं* मु.॥ ३. *साधुकुमारोऽपि* हे.॥ ४. निवासं कर्तुम्॥ ५. आत्मानं सचिवं ब्रूते सः, दुष्टसचिवः॥ ६. जीवितं प्रियम्॥ ७. पादकुट्टनैः॥ ८. प्रतीपं-प्रतिलोमं गच्छन्ति ताः॥ ९. *सेतुबन्धुवत्* खंता. पाता.॥ १०. इन्द्रः॥ ११. पुनः पुनः॥ १२. पूर्वापरयोरम्बुध्योः-समुद्रयोर्मध्ये॥ १३. *०त्वहम्* मु.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाऽहमपि ते भृत्यस्त्वं स्वामी परमो मम । गृह्यसे मम दोषेण तत् कोपमुपसंहर ॥१९३॥
पापस्याऽस्याऽपराधेन त्रैलोक्यं प्राणसंशये । महात्मन्निदमारूढं त्रायस्व करुणानिधे! ॥१९४॥
एवमन्येऽपि विविधं सुरासुर-नरेश्वराः । तमृषिं सान्त्वयामासुः श्रीसङ्घश्च[1] चतुर्विधः ॥१९५॥
[2]अतिशब्दपथां वृद्धिं प्राप्तो यावन्न सोऽशृणोत् । पादस्पर्शं व्यधुस्तस्य तावत् सर्वेऽपि भक्तितः ॥१९६॥
पादस्पर्शेन सोऽधस्तादपश्यद् भ्रातरं पुरः । चतुर्विधं तथा सङ्घं सुरासुर-नृपानपि ॥१९७॥
इत्थं च दध्यौ स मुनिः श्रीसङ्घोऽयं कृपापरः । अयं च दीनो मे भ्राता भीताश्चैते सुरादयः ॥१९८॥
कोपोपसंहारकृते युगपत् सान्त्वयन्ति माम् । मान्यः सङ्घोऽनुकम्प्याश्च **पद्म**प्रभृतयो मम ॥१९९॥
विमृश्यैवं वपुर्वृद्धिं संहृत्य स महामुनिः । तस्थौ प्रकृत्यवस्थायां गतवेल इवाऽर्णवः ॥२००॥
सङ्घानुरोधा**न्नमुचिं** मुमोच स महामुनिः । तं मन्त्रिपांसनं सद्यः **पद्म**स्तु निर[3]वासयत् ॥२०१॥
तया त्रिपद्या स मुनिस्ततः प्रभृति पावनीम् । **त्रिविक्रम** इति ख्यातिमाससाद जगत्त्रये ॥२०२॥
सङ्घकार्यं स तत्कृत्वा शान्तस्तप्त्वा तपः परम् । उत्पन्नकेवलो **विष्णुकुमारः** प्रययौ शिवम् ॥२०३॥
¶**पद्मो**ऽपि हि भवोद्विग्नस्त्यक्त्वा राज्यं [4]पलालवत् । सद्गुरोः पादपद्मान्ते परिव्रज्यामुपाददे ॥२०४॥
[5]कौमारेऽब्दपञ्चशती [6]मण्डलित्वेऽपि सैव हि । [7]जये त्र्यब्दशती [8]चक्रभृत्त्वे सप्तशतीयुता ॥२०५॥
अष्टादशसहस्र्यब्दसहस्रास्तु [9]व्रते दश । त्रिंशद्वर्षसहस्रायु[10]रित्यभूत् **पद्म**चक्रभृत्(चक्रिणः) ॥२०६॥युग्मम्॥

नानाविधाभिग्रहसुन्दराणि प्रतप्य तीव्राणि तपांसि **पद्मः** ।
घातिक्षयासादितकेवलर्द्धिः पदं ययौ शाश्वतशर्मधाम ॥२०७॥

अत्र द्वौ जिन[11]- चक्रिणौ[12] जिनपती[13] चोभावुभौ चक्रिणौ[14]
रामौ[15] द्वौ च हरी[16] उभौ प्रतिहरी[17] चोभावमी कीर्तिताः ।
कीर्तिव्याप्तदिशश्चतुर्दश महात्मानः शलाकानरा-
स्तेषां वृत्तमुदारमस्तु तदिदं लोकस्य कर्णातिथिः[18] ॥२०८॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये षष्ठे[19] पर्वणि **श्रीपद्म**चक्रवर्ति-
वर्णनो नामाऽष्टमः सर्गः॥

## ॥ समाप्तं चेदं षष्ठं पर्व ॥

१. श्लोकोऽयं खंता.प्रतौ नाऽस्ति ॥ २. शब्दमार्गमतिक्रान्तां शब्दातीतामित्यर्थः ॥ ३. देशाद् बहिष्कृतवान् ॥ ४. तृणवत् ॥ ५. कौमारे वर्षाणि ५००मितानि ॥ ६. मण्डलित्वे वर्षाणि ५००मितानि ॥ ७. दिग्विजये वर्षाणि ३००मितानि ॥ ८. चक्रित्वे वर्षाणि १८सहस्र७००मितानि ॥ ९. व्रते वर्षाणि १०सहस्रमितानि ॥ १०. आयुर्वर्षाणि ३०सहस्रमितानि ॥ ११. कुन्थुनाथ-अरनाथौ जिनौ ॥ १२. कुन्थुनाथ-अरनाथौ चक्रिणौ ॥ १३. जिनपती मल्लिनाथ-मुनिसुव्रतौ ॥ १४. चक्रिणौ सुभूम-महापद्मौ ॥ १५. बलदेवौ आनन्द-नन्दनौ ॥ १६. वासुदेवौ पुरुषपुण्डरीक-दत्तौ ॥ १७. प्रतिवासुदेवौ बलि-प्रह्लादौ ॥ एते चतुर्दशशलाकापुरुषाः ॥ १८. *०कर्णातिथि* मु. ॥ १९. *०षष्ठे पर्वणि अष्टमः०* खंता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥अर्हम्॥

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविनिर्मितं

# त्रिषष्टिशलाकापुरुषचरितम्

## ॥राम-लक्ष्मण-रावण-चरितप्रतिबद्धं सप्तमं पर्व॥

### ॥राक्षसवंश-वानरवंशोत्पत्ति-रावणजन्मवर्णनः प्रथमः सर्गः॥

[1]अथ श्री**सुव्रतस्वामि**जिनेन्द्रस्याऽ[2]ञ्जनद्युतेः। [3]हरिवंशमृगाङ्कस्य तीर्थे सञ्जातजन्मनः॥१॥

बलदेवस्य [4]**पद्म**स्य विष्णो[5]र्**नारायण**स्य च। प्रतिविष्णो **रावण**स्य चरितं परिकीर्त्यते॥२॥

**भरते**ऽत्र **रक्षोद्वीपे लङ्कायां घनवाहनः**। आसीद् रक्षोवंशकन्दो विहरत्य**जिते**ऽर्हति॥[6]३॥

स **महारक्षसे** राज्यं सुधीर्दत्त्वा स्वसूनवे। **अजितस्वामि**पादान्ते परिव्रज्य ययौ शिवम्॥४॥

**महारक्षा** अपि चिरं राज्यं भुक्त्वा स्वनन्दने। **देवरक्षसि** संस्थाप्य प्रव्रज्य च शिवं [7]ययौ॥५॥

**रक्षोद्वीपा**धिपेष्वेवमसङ्ख्येषु गतेषु [8]तु। **श्रेयांस**तीर्थेऽभूत् **कीर्तिधवलो** राक्षसेश्वरः॥६॥

¶तदा च **वैताढ्य**गिरौ पुरे **मेघपुरा**भिधे। विद्याधरनरेन्द्रोऽभू**दतीन्द्रो** नाम विश्रुतः॥७॥

**श्रीमत्यां** तस्य कान्तायां **श्रीकण्ठो** नाम नन्दनः। **देवी**ति नाम्ना दुहिता चाऽभूद् देवीव रूपतः॥८॥

विद्याधरेन्द्रस्तां **पुष्पोत्तरो रत्नपुरे**श्वरः। सूनोः **पद्मोत्तर**स्याऽर्थे ययाचे चारुलोचनाम्॥९॥

गुणिने श्रीमतेऽप्यस्मै ता**मतीन्द्रो** ददौ न हि। [9]ददौ **कीर्तिधवला**य किन्तु दै[10]वनियोगतः॥१०॥

तां **कीर्तिधव**[11]**लो**ढां तु श्रुत्वा **पुष्पोत्तरो** नृपः। [12]वैरायते स्माऽ**तीन्द्रेण श्रीकण्ठे**न च [13]मानदः॥११॥

¶**श्रीकण्ठे**नैकदा **मेरो**र्निवृत्तेन व्युदैक्ष्यत। **पुष्पोत्तर**स्य दुहिता **पद्मा** पद्मेव रूपतः॥१२॥

[14]मनोभवविकाराब्धिसमुल्लासनदुर्दिनम्। अन्योऽन्यमनुरागोऽभूत् सद्यः **श्रीकण्ठ-पद्मा**योः॥१३॥

तिष्ठते स्म कुमारी सा **श्रीकण्ठा**यो[15]न्मुखाम्बुजा। स्वयंवरस्रजमिव क्षिपन्ती स्निग्धया दृशा॥१४॥

विज्ञाय तदभिप्रायं **श्रीकण्ठ**स्तां स्मरातुरः। आदाय व्योममार्गेण गन्तुं प्रववृते द्रुतम्॥१५॥

**पद्मां** हरति कोऽपीति पूत्कुर्वन्ति स्म चेटिकाः। **पुष्पोत्तरो**ऽपि सन्नह्याऽन्वधावत् [16]सबलो बली॥१६॥

**श्रीकण्ठो**ऽपि द्रुतं **कीर्तिधवलं** शरणं ययौ। **पद्मा**हरणवृत्तान्तं कथयामास चाऽखिलम्॥१७॥

---

१. ***अर्हं। ॐ नमः सर्वज्ञाय*** खंता.२; ***अर्हं, नमो वीतरागाय, सकलार्हत्० नामाकृति०*** पाता.; ***ॐ नमः श्रीसर्वज्ञाय*** ला.॥ २. अञ्जनस्येव द्युतिः कान्तिर्यस्य तस्य॥ ३. हरिवंशे चन्द्रसमानस्य॥ ४. रामस्य॥ ५. लक्ष्मणस्य॥ ६. ला.प्रतौ तृतीयश्लोकस्थाने ७७सङ्ख्याः श्लोकाः सन्ति। तेषु च आद्यश्लोकद्वयीं अष्टात्रिंशत्तमं एकोनाशीतितमं च श्लोकं मुक्त्वा शेषाः सर्वेऽपि श्लोकाः त्रिषष्टिशलाकागतश्रीअजितस्वामिचरिते चतुर्थे पञ्चमे च सर्गे क्रमशः३०३तः ३३५, १ तः ४० श्लोकत्वेन प्राप्यन्ते॥ तत्राऽप्राप्तश्लोकचतुष्टयी त्वेवम् —

"अस्त्यस्य जम्बूद्वीपस्य, द्वीपस्य भरते पुरी। नाम्ना ख्याता विनीतेति, शिरोमणिरिवाऽवनेः॥३॥
अस्यामिक्ष्वाकुवंशस्य, विततच्छत्रसन्निभः। विश्वसन्तापहरण-श्चक्रभृत् सगरोऽजनि॥४॥
सङ्गीतकैर्नाटकैश्च, विनोदैरपरैरपि। ततश्चाऽरंस्त सगरः, साम्राज्यश्रीलताफलैः॥३८॥
विसूत्रिताऽमित्रबलः, सुत्रामेवैकविक्रमः। व्यधत्त लङ्कयो राज्यं, सुचिरं घनवाहनः॥७९॥"

७. ***ययौ शिवम्*** खंता.१-२,पाता. ला.॥ ८. ***च*** खंता.॥ ९. ***किन्तु कीर्तिधवलाय, ददौ विधिनियोगतः*** खंता.१-२,पाता. मो.॥ १०. दैवादेशात्॥ ११. कीर्तिधवलेन ऊढां परिणीताम्। ***कीर्तिधवलोदूढां श्रुत्वा०*** मो.॥ १२. वैरं कृतवान्॥ १३. मानं द्यति-खण्डयति मानदः॥ १४. कामविकार एव सागरस्तस्य समुल्लासने दुर्दिनम्, अनुरागविशेषणम्॥ १५. उन्नतं मुखमेव अम्बुजं कमलं यस्याः सा॥ १६. सैन्यसहितः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुष्पोत्तरो**ऽपि तत्राऽऽशु प्राप सैन्यैर्निरन्तरैः[1] । [2]आशाः [3]प्रच्छादयन्नद्रि[4]र्युगान्त इव सागरः ॥१८॥
दूतेन **कीर्तिधवलः पुष्पोत्तर**मभाषत । अविमृश्य प्रयासोऽयं मुधा वः [5]साम्परायिकः ॥१९॥
कन्या ह्यवश्यं दातव्या कस्मैचन तया यदि । स्वयं वृतोऽसौ **श्रीकण्ठ**स्तदाऽसौ नाऽपराध्यति ॥२०॥
न तद्वो युज्यते योद्धुं बुद्ध्वा स्वदुहितुर्मनः । कर्तुं वधूवरोद्वाहकृत्यमेव तु [6]साम्प्रतम् ॥२१॥
दूतीमुखेन **पद्मा**ऽपि तदैवेति व्यजिज्ञपत् । [7]वृतो मया स्वयमयं हृताऽहं नाऽमुना पुनः ॥२२॥
इति **पुष्पोत्तरः** श्रुत्वा शान्तकोपोऽभवत् क्षणात् । प्रायो [8]विचारचञ्चूनां कोपः सुप्रशमः खलु ॥२३॥
**श्रीकण्ठ-पद्म**योस्तत्रैवोत्सवेन महीयसा । कृत्वा विवाहं प्रययौ निजं **पुष्पोत्तरः** पुरम् ॥२४॥
¶**श्रीकण्ठं कीर्तिधवलो**ऽब्रवीदत्रैव तिष्ठ यत् । **वैताढ्य**शैले युष्माकं भूयांसो विद्विषोऽधुना ॥२५॥
अस्यैव **राक्षसद्वीप**स्याऽदूरेण [9]मेरुद्दिशि । विद्यते **वानरद्वीपो** योजनत्रिशतीमितः ॥२६॥
अन्येऽपि **बर्बरकुल-सिंहल**प्रमुखाः सखे! । द्वीपा मदीयास्तिष्ठन्ति [10]भ्रष्टस्वःखण्डसन्निभाः ॥२७॥
[11]तेषामेकतमे क्वाऽपि राजधानीं निधाय भोः! । [12]सुखमास्स्वाऽविदूरत्वादवियुक्तो मया समम् ॥२८॥
न यद्यपि द्विषद्भ्यस्ते भयमस्ति मनागपि । तथाऽप्यस्मद्विप्रयोगभयान्न गन्तुमर्हसि ॥२९॥
सस्नेहमिति तेनोक्तस्तद्वियोगातिकातरः । **श्रीकण्ठो** [13]**वानरद्वीप**निवासं प्रत्यपद्यत ॥३०॥
कृत्वाऽधि**वानरद्वीपं किष्किन्धाद्रौ** महापुरीम् । **किष्किन्धां** नाम तद्राज्ये तं **कीर्तिधवलो** न्यधात् ॥३१॥
¶अद्राक्षीद् भ्राम्यतस्तत्र महादेहान् फलाशिनः । भूयसो वानरान् रम्यान् **श्रीकण्ठ**पृथिवीपतिः ॥३२॥
तेषाममारिमाघोष्य सोऽन्नपानाद्यदापयत् । [14]सच्चक्रुस्तानथाऽन्येऽपि यथा राजा तथा [15]प्रजाः ॥३३॥
चक्रुश्चित्रे च लेप्ये च ध्वज-छत्रादि[16]लक्ष्मसु । विद्याधरा वानरांस्ते तदा प्रभृति कौतुकात् ॥३४॥
**वानरद्वीप**राज्येन [17]वानरैर्लक्ष्मभिस्तथा । **वानरा** इति कीर्त्यन्ते तत्स्था विद्याधरा अपि ॥३५॥
**श्रीकण्ठ**स्य सुतो जज्ञे **वज्रकण्ठो**ऽभिधानतः । सोत्कण्ठो रणलीलासु सर्वत्राऽकुण्ठविक्रमः ॥३६॥
**नन्दीश्वरे**ऽथ **श्रीकण्ठो** यात्रायै शाश्वतार्हताम् । अमरान् गच्छतोऽद्राक्षीदा[18]स्थानीमास्थितो निजाम् ॥३७॥
[19]वाजीव ग्रामपद्रस्थो वाजिनां मार्गयायिनाम् । तेषां दिविषदां सोऽथाऽन्वचालीद् भक्ति[20]तन्द्रनः ॥३८॥
विमानं गच्छतस्तस्य स्खलितं **मानुषोत्तरे** । [21]तरङ्गिणीवेग इव मार्गवर्तिनि पर्वते ॥३९॥
प्राग्जन्मनि मया तेपे तपोऽल्पं खलु तेन मे । **नन्दीश्वरा**र्हद्यात्रायां नाऽपूर्यत मनोरथः ॥४०॥
इति निर्वेदमापन्नः प्राव्राजीत् सद्य एव सः । तपस्तीव्रतरं तप्त्वा **सिद्धि**[22]**क्षेत्र**मियाय च ॥४१॥
¶**श्रीकण्ठ**तो **वज्रकण्ठा**दिष्वतीतेष्वनेकशः ।**मुनिसुव्रत**तीर्थेऽभूद् **घनोदधि**[23]**रवो** नृपः ॥४२॥
**लङ्कापुर्या**मपि तदा समभूद् राक्षसेश्वरः । **तडित्केश** इति नाम्ना जज्ञे स्नेहस्तयोरपि ॥४३॥
अपरेद्यु**स्तडित्केशः** सान्तःपुरवधूजनः । ययौ क्रीडितुमुद्याने वरे **नन्दन**नामनि ॥४४॥
क्रीडासक्ते **तडित्केशे** कोऽप्युत्तीर्य कपिर्द्रुमात् । **श्रीचन्द्रायास्त**न्महिष्या विलिलेख नखैः कुचौ ॥४५॥
[24]रोषोच्छ्वसितकेशस्तं **तडित्केशः** प्लवङ्गमम् । जघानैकेन बाणेनाऽसह्यो हि स्त्रीपराभवः ॥४६॥
[25]बाणप्रहारविधुरः किञ्चिद् गत्वा प्लवङ्गमः । एकस्य प्रतिमास्थस्य साधोरग्रे पपात सः ॥४७॥
सोऽदात् तस्मै नमस्कारं परलोकाध्व[26]शम्बलम् । मृत्वा च तत्प्रभावेणा**ऽब्धिकुमारो** बभूव सः ॥४८॥
प्राग्जन्म सोऽवधेर्ज्ञात्वाऽभ्येत्याऽवन्दिष्ट तं मुनिम् । वन्दनीयः [27]सतां साधुर्ह्युपकारी विशेषतः ॥४९॥
अन्यानपि **तडित्केश**भटैस्तत्र प्लवङ्गमान् । हन्यमानान् स ऐक्षिष्ट सद्यः कोपेन चाऽज्वलत् ॥५०॥

---

१. *निरन्तरम्* ला. ॥ २. दिशः ॥ ३. *आच्छादयन्नद्रिर्यु०* मो. ॥ ४. जलैः ॥ ५. युद्धसम्बन्धी प्रयासो यत्नः ॥ ६. युक्तम् ॥ ७. *अयं स्वयं मया वव्रे* खंता.१-२,पाता. मो. ता. ॥ ८. विचारचतुराणाम् ॥ ९. वायव्यकोणे ॥ १०. पतितस्वर्गखण्डसदृशाः ॥ ११. *तेषामेकत्र कुत्राऽपि* ला. मु. ॥ १२. *सुखमास्स्वा०* खंता.१-२। सुखं तिष्ठ ॥ १३. *वानरद्वीपे* ला. ॥ १४. *सच्चक्रुस्तांस्तथाऽन्येऽपि* मो. ॥ १५. *प्रजा* खंता.२,ला. ॥ १६. लक्ष्म-चिह्नम् ॥ १७. *वानरा इति कीर्तिताः । ततो वानरलक्ष्माण०* खंता. १-२, *वानरा इति कीर्तिताः । ततो वानरलक्ष्माणस्तस्थुर्विद्या०* मो. ॥ १८. सभाम् ॥ १९. यथा ग्रामस्य पद्रे(पादरमां) स्थितोऽश्वः मार्गयायिनं वाजिनं दृष्ट्वा चलति तथा ॥ २०. *भक्तिसंयुतः* मु. ॥ २१. नदीवेगः ॥ २२. मोक्षम् ॥ २३. *०घनोदधिरथो०* मु. ॥ २४. रोषेण उच्छ्वसिता-ऊर्ध्वीभूताः केशा यस्य सः ॥ २५. बाणप्रहारेण विह्वलः ॥ २६. पाथेयम् ॥ २७. *स्थितः* मो. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाप्लवङ्गरूपाणि विकृत्याऽनेकशश्च सः। वर्षंस्तरु-[1]शिलाजालैरुपदुद्राव राक्षसान् ॥५१॥
ज्ञात्वा दिव्यप्रयोगं तं **तडित्केश**स्तमुच्चकैः। आनर्चोवाच कोऽसीति कि[2]मुपद्रवसीति च ॥५२॥
ततः सोऽ**ब्धिकुमारो**ऽपि शान्तकोपस्तदर्चया। [3]स्वबधं च नमस्कारप्रभावं च शशंस तम् ॥५३॥
लङ्केशस्तेन देवेन सहैवोपेत्य तं मुनिम्। इत्यपृच्छत् प्रभो! वैरहेतुः कः कपिना मम ? ॥५४॥
¶आचख्यौ मुनिरप्येवं **श्रावस्त्यां** मन्त्रिनन्दनः। **दत्तो** नाम पुराऽभूस्त्वं **काश्या**मेष तु लुब्धकः ॥५५॥
त्वमुपात्तपरिव्रज्योऽन्येद्यु[4]**र्वाराणसी**मगाः। [5]दृष्टोऽनेनाऽपशकुनमित्याहत्य नि[6]पातितः ॥५६॥
**माहेन्द्र**कल्पे देवोऽभूश्च्युत्वा चेटगिहाऽभवः। भ्रान्त्वा नरकमेषोऽभूत् कपिस्तद्वैरकारणम् ॥५७॥
वन्दित्वा तं महासाधुमसामान्योपकारिणम्। अनुज्ञाप्य च **लङ्केशं** सोऽथ देवस्तिरोदधे ॥५८॥
तदाकर्ण्य **तडित्केशः सुकेशे** तनये निजे। राज्यं न्यस्य प्रवव्राज वव्राज च परं पदम् ॥५९॥
**किष्किन्धा**राज्यमाधाय पुत्रे **कि[7]ष्किन्धि**नामनि। दीक्षां [8]**घनोदधिरवो**ऽप्यादायेयाय नि[9]र्वृतिम् ॥६०॥
¶इतश्च **वैताढ्य**गिरौ नगरे **रथनूपुरे**। अभूत् तदानी**मशनिवेगो** विद्याधरेश्वरः ॥६१॥
तस्याऽपि सूनु**र्विजयसिंह** इत्यभवज्जयी। **विद्युद्वेगो** द्वितीयस्तु तद्दोर्दण्डाविवाऽपरौ ॥६२॥
गिरौ तत्रैव चाऽऽ**दित्यपुरे** [10]**मन्दरमाल्य**भूत्। विद्याधरनृपस्तस्य **श्रीमाले**ति च कन्यका ॥६३॥
तस्याः स्वयंवरे तेनाऽऽहूता विद्याधरेश्वराः। ज्योतींषीवा[11]ऽधिविमान[12]मधिमञ्चमुपाविशन् ॥६४॥
कथ्यमानान् प्रतीहार्या तान् विद्याधरपुङ्गवान्। पस्पर्श दृष्ट्या **श्रीमाला** [13]कुल्या वृक्षानिवाऽम्भसा ॥६५॥
अन्यविद्याधरान् सर्वानतिक्रम्य क्रमेण सा। गत्वाऽवतस्थे **किष्किन्धौ जाह्नवी**व पयोनिधौ ॥६६॥
तस्य कण्ठे निचिक्षेप **श्रीमाला** वरमालिकाम्। [14]भविष्यद्दोर्लताश्लेषसत्यङ्कारमिवाऽनघम् ॥६७॥
¶उच्चै**र्विजयसिंहो**ऽथ सिंहवत् प्रियसाहसः। भृकुटीभीषणमुखः सरोषमिदमभ्यधात् ॥६८॥
[15]निर्वासिताः पुराऽप्येते सदा दुर्नयकारिणः। **वैताढ्य**राजधानीतः [16]सुराज्यादिव [17]दस्यवः ॥६९॥
तत् केनाऽमी इहाऽऽनीता दुर्नीताः [18]कुलपांशनाः। तदद्याऽपुनरावृत्त्यै निहन्म्येतान् पशूनिव ॥७०॥
इत्युदीर्य महावीर्यः [19]स उत्थाय यमोपमः। चचाल **किष्किन्धि**नृपवधायाऽऽयुधमुत्क्षिपन् ॥७१॥
**किष्किन्धितः सुकेशाद्या** अन्ये **विजयसिंहतः**। रणायोत्तस्थिरे विद्याधरा पौरुषदुर्धराः ॥७२॥
[20]दन्तादन्तिप्रवृत्तेभैरुत्स्फुलिङ्गीकृताम्बरः। कुन्ताकुन्तिमिलत्[21]सादी शराशरिमिलद्रथी ॥७३॥
[22]खड्गाखड्गयापतत्पत्ति[23]रसृक्पङ्किलभूतलः। रणस्ततः प्रववृते कल्पान्त इव दारुणः ॥७४॥युग्मम्॥
चिरं युद्ध्वाऽथ बाणेन **किष्किन्ध्य**[24]वरजो**ऽन्धकः**। [25]शिरो **विजयसिंहस्या**ऽपातयत् फलवत् तरोः ॥७५॥
त्रेसुश्च **विजयसिंह**[26]गृह्या विद्याधरेश्वराः। निर्नाथानां कुतः शौर्यं ? हतं सैन्यं ह्यनायकम् ॥७६॥
**श्रीमालां** समुपादाय जयश्रियमिवाऽङ्गिनीम्। ययावुत्पत्य **किष्किन्धिः किष्किन्धां** सपरिच्छदः ॥७७॥
¶श्रुत्वा पुत्रवधोदन्तमकाण्डाशनिपातवत्। वेगेना**ऽशनिवेगो**ऽगादधि**किष्किन्धि**[27]पर्वतम् ॥७८॥
**किष्किन्धां** नगरीं सैन्यैः सो[28]ऽवेष्टदनेकशः। महाद्वीपस्थलीं [29]द्वीपवतीपूर इवाऽम्बुभिः ॥७९॥
गुहाया इव [30]पञ्चास्यौ योद्धुकामौ सहा**ऽन्धकौ**। वीरौ **सुकेश-किष्कि[31]न्धी किष्किन्धा**या निरी[32]यतुः ॥८०॥
ततः [33]सर्वाभिसारेणा**ऽशनिवेगो**ऽत्यमर्षणः। योद्धुं प्रववृते वीरस्तृणवद् गणयन् [34]परान् ॥८१॥
ततो **वि[35]जयसिंहे**भसिंहस्याऽऽ[36]जिमुखेऽच्छिदत्। शिरो**ऽन्धकस्य** रोषान्धो**ऽशनिवेगो** महाभुजः ॥८२॥

१. *०शिखाजालै०* मो.॥ २. उपद्रवं करोषि॥ ३. ***स्वसम्बन्धं*** मो.॥ ४. ***वाणारसी०*** खंता.२, ला.॥ ५. ***दृष्टोऽनेनाऽपशकुनमित्याहत्य निपातितः*** मु.॥ ६. मारितः॥ ७. ***किष्किन्ध०*** ला.॥ ८. ***महोदधिरवो०*** खंता.१-२, ***घनोदधिरथो०*** मु.॥ ९. शिवम्॥ १०. ***मन्दिरमाल्यभूत्*** पाता. ला. मु.॥ ११. विमानेषु॥ १२. मञ्चेषु॥ १३. 'नीक' इति भाषायाम्॥ १४. भावी यो दोर्लताया आश्लेषस्तस्य सत्यङ्कारं-शपथम्॥ १५. निष्कासिताः॥ १६. ***स्वराज्या०*** पाता.॥ १७. चौराः॥ १८. कुलाधमाः॥ १९. ***समुत्थाय*** कां. मो.॥ २०. दन्तादन्तियुद्धे प्रवृत्तैर्गजैः॥ २१. सादी अश्ववारः॥ २२. खड्गाखड्गियुद्धेन आपतन्तः पत्तयो यस्मिन् सः॥ २३. असृजा शोणितेन पङ्किलं भूतलं यस्मिन् सः॥ २४. अनुजो भ्राता॥ २५. ***विजयसिंहस्याऽपातयन्मस्तकं फलवत् तरोः*** ला.॥ २६. विजयसिंहस्य पक्षस्थाः॥ २७. ***किष्किन्ध०*** खंता.१-२, पाता.॥ २८. ***सोऽवेष्टयदनेकशः*** ला. पा. छा. मो., ***स चाऽवेष्टदनेकशः*** मु.॥ २९. नदीपूरः॥ ३०. सिंहौ॥ ३१. ***किष्किन्धौ०*** खंता.१-२, पाता.॥ ३२. निर्जग्मुः॥ ३३. सर्वबलेन॥ ३४. शत्रून्॥ ३५. विजयसिंह एव गजस्तस्मिन् सिंहसदृशस्याऽन्धकस्य॥ ३६. रणमुखे॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ततो वानरसैन्यानि सदैत्यानि दिशोदिशम् । पवनास्फालिताम्भोदपटलानीव [१]दुद्रुवुः ॥८३॥
सान्तःपुरपरीवारौ **लङ्का-किष्किन्धनाय**कौ । **पातालङ्कां** ययतुः क्वाऽप्युपायोऽ[२]पसर्पणम् ॥८४॥
निहत्य सुतहन्तार[३]माराधरमिव द्विपः । प्रशान्तकोपः समभूद् **रथनूपुर**पार्थिवः ॥८५॥
मुदितो वैरिनिर्घाता**न्निर्घातं** नाम खेचरम् । स राजस्थापनाचार्यो **लङ्का**राज्ये न्यवेशयत् ॥८६॥
ततो निवृत्य **वैताढ्ये** स्वपुरे **रथनूपुरे** । अमरेन्द्रोऽमरावत्यामिवाऽगा**दशनि**र्नृपः ॥८७॥
अन्येद्युर्जातसंवेगोऽ**शनिवेग**नृपः स्वयम् । **सहस्रारे** सुते राज्यं न्यस्य दीक्षामुपाददे ॥८८॥
¶पुर्यां **पातालङ्कायां सुकेश**स्याऽपि सूनवः । **इन्द्राण्या**मभवन् **माली सुमाली माल्यवान**पि ॥८९॥
**श्रीमालायां** च **किष्किन्धे**र्द्वौ बभूवतुरात्मजौ । नाम्नाऽऽ**दित्यरजा** [४]**ऋक्षरजा**श्चेति महाभुजौ ॥९०॥
अपरेद्युश्च **किष्किन्धिः सुमेरौ** शाश्वतार्हताम् । यात्रां कृत्वा निवृत्तः सन्नपश्यन् **मधुपर्वत**म् ॥९१॥
**किष्किन्धे**र्विष्वगुद्याने तत्र **मेरा**विवाऽपरे । **मनोरमे** मनो रन्तुं विशश्रामाऽधिकाधिकम् ॥९२॥
निधाय **किष्किन्धपुरं** [५]तस्योपरि पराक्रमी । न्यवात्सीत् सपरीवारः **कैलास** इव [६]यक्षराट् ॥९३॥
पुत्रास्ते तु **सुकेश**स्य राज्यं श्रुत्वाऽरिभिर्हृतम् । क्रुधा [७]त्रयोऽग्नय इव जज्वलुर्वीर्यशालिनः ॥९४॥
ते समागत्य **लङ्कायां निर्घातं** खेचरं रणे । न्यगृह्णन् मृत्यवे हि [८]स्याद् वीरैर्वैरं चिरादपि ॥९५॥
ततश्च पुर्यां **लङ्कायां** राजा **माली** तदाऽभवत् । [९]**राक्षसद्वीप**मुख्यानां द्वीपानामेकशासिता ॥९६॥
¶इतश्च **वैताढ्य**गिरौ नगरे **रथनूपुरे** । **सहस्रार**नरेन्द्रस्या[१०]**शनिवेगा**ङ्गजन्मनः ॥९७॥
भार्याया**श्चित्रसुन्दर्या** गर्भे [११]कश्चित् सुरोत्तमः । प्रच्युत्याऽवातरत् सद्यो दृष्टे सुस्वप्नमङ्गले ॥९८॥युग्मम्॥
काले च दोहदस्तस्याः शक्रसम्भोगलक्षणः । दुष्पूरो दुर्वचश्चाऽभूद् देहदौर्बल्यकारणम् ॥९९॥
[१२]निर्बन्धेन तु सा पृष्टा कथञ्चिदपि दोहदम् । कथयामास तं पत्ये लज्जावनमदानना ॥१००॥
**सहस्रारः** [१३]सहस्राक्षरूपं निर्माय विद्यया । तया **शक्र** इति [१४]ज्ञातः पूरयामास दोहदम् ॥१०१॥
असूत समये सूनुमनूनभुजविक्रमम् । **इन्द्र** इत्युक्तनामानमिन्द्रसम्भोगदोहदात् ॥१०२॥
सम्प्राप्तयौवनायाऽस्मै विद्यादोर्वीर्यशालिने । ददौ राज्यं **सहस्रारः** स्वयं धर्मरतोऽभवत् ॥१०३॥
¶स सर्वान् साधयामास विद्याधरनरेश्वरान् । इन्द्रंमन्यश्च [१५]समभूदिन्द्रदोहद[१६]जन्मतः ॥१०४॥
दिक्पालांश्चतुरश्चक्रे [१७]सप्ताऽनीकान्यनीकपान् । तिस्रः परिषदो **वज्रमस्त्रमैरावणं** द्विपम् ॥१०५॥
**रम्भा**दिका वारवधूर्मन्त्रिणं च **बृहस्पतिम्** । [१८]**नैगमेषि**समाख्यं च पत्त्यनीकस्य नायकम् ॥१०६॥युग्मम्॥
एवं विद्याधरैरिन्द्रपरिवाराभिधाधरैः । इन्द्रोऽहमेवेति धिया सोऽखण्डं राज्यमन्वशात् ॥१०७॥
[१९]**माकरध्वजिरादित्यकीर्ति**कुक्षिसमुद्भवः । तत्राऽभूत् **सोम**दिक्पालः प्राच्यां [२०]**ज्योतिष्पुरे**श्वरः ॥१०८॥
**वरुणा-मेघरथयोः** पुत्रः [२१]पश्चिमदिक्पतिः । बभूव **वरुणो** विद्याधरो **मेघपुरे**श्वरः ॥१०९॥
तनयः **सूर-कनकावल्यो**[२२]रुत्तरदिक्पतिः । **कुबेर** इति विख्यातोऽभूत् **काञ्चनपुरे**श्वरः ॥११०॥
**कालाग्नि-श्रीप्रभासूनुः किष्किन्धनगरा**धिपः । अभूद[२३]पाच्यां दिक्पालो **यम** इत्यभिधानतः ॥१११॥
¶→विद्याधरेन्द्र**मिन्द्रं** तमिन्द्रोऽहमिति मानिनम् । गन्धेभोऽन्यमिभमिव न सेहे **मालि**भूपतिः ॥११२॥
भ्रातृभिश्च मन्त्रिभिश्च मित्रैश्चाऽतुलविक्रमैः[२४]← । स चचालेन्द्रयुद्धाय नाऽन्यो मन्त्रो हि दोष्मताम् ॥११३॥
सिंह-द्विपाश्व-महिष-वराह-वृषभादिभिः । यानैः प्रचेलुः [२५]खेऽन्येऽपि रक्षोवीराः सवानराः ॥११४॥

---

१. नेशुः ॥ २. पलायनम् ॥ ३. हस्तिपकम् ॥ ४. ***ऋक्षरजा०*** खंता.१-२, पाता.; ***ऊक्षरजा०*** ता. ॥ ५. मधुपर्वतस्योपरि ॥ ६. कुबेरः ॥ ७. (1) दक्षिणाग्निः, (2) गार्हपत्यः, (3) आहवनीयः; एते त्रयोऽग्नयः ॥ ८. ***स्याद् वैरं वीरैश्चि०*** छा. पा. ॥ ९. ***किष्किन्धायां तु किष्किन्धिगिराऽऽदित्यरजा नृपः*** मु. ॥ १०. अशनिवेगपुत्रस्य ॥ ११. ***सौधर्मवासवः*** मो. ॥ १२. आग्रहेण ॥ १३. इन्द्ररूपम् ॥ १४. ***ख्यातः*** खंता.१ ॥ १५. ***०स पुनः प्राग्जन्मसंस्कारतोऽभवत्*** खंता.१-२, हे. मो. ता. ॥ १६. ***०जन्मनः*** ला. ॥ १७. सप्त सैन्यानि सप्त सेनापतीन् च ॥ १८. नैगमेषिणा तुल्या अभिधा यस्य तम् ॥ १९. मकरध्वजस्य पुत्रः ॥ २०. "पूर्वदिशि ज्योतिष्पुरे माकरध्वजिः सोमदिक्पालः" टि. हे.प्रतौ ॥ २१. "पश्चिमदिशि मेघपुरे वरुणविद्याधरः दिक्पालः" टि. हे. प्रतौ ॥ २२. "उत्तरदिशि काञ्चनपुरे कुबेरविद्याधरः दिक्पालः" टि. हे.प्रतौ ॥ २३. "दक्षिणदिशि किष्किन्धानगरे यमविद्याधरः दिक्पालः" टि. हे.प्रतौ ॥ २४.→← एतच्चिह्नान्तर्गतः पाठः खंता.१ प्रतौ न दृश्यते ॥ २५. आकाशे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रिष्टाः[1] [2]खराः [3]फेरवश्च सारसाश्च [4]ववाशिरे । दक्षिणस्था अपि फले [5]तेषां वामत्वधारिणः ॥११५॥
अन्यान्यप्यशकुनानि दुर्निमित्तानि चाऽभवन् । **माली सुमालिना**[6]ऽवारि प्रयाणाच्च सुमेधसा ॥११६॥
अवज्ञाय वचस्तस्य **माली** दोर्बलगर्वितः । जगाम **वैताढ्य**गिरा**विन्द्र**माह्वास्त चाऽऽ[7]जये ॥११७॥
**इन्द्रो**ऽप्यै**रावणा**रूढो पाणिनोल्लालयन् पविम् । सेनानाथै**र्नैगमेषि**प्रमुखैः परिवारितः ॥११८॥
**सोमा**द्यैर्लोकपालैश्च विविधायुधधारिभिः । विद्याधरभटैश्चाऽन्यै रणक्षेत्रमुपाययौ ॥११९॥युग्मम्॥
[8]**इन्द्र**-राक्षससैन्यानां [9]सम्फेटोऽभूत् परस्परम् । तडिन्निभास्त्रभीष्माणामम्भोदानामिवाऽम्बरे ॥१२०॥
निपेतुः स्यन्दनाः क्वाऽपि शिखराणीव भूभृताम् । पलायन्त गजाः क्वाऽपि वातोद्धूता इवाऽम्बुदाः ॥१२१॥
पेतुर्भटानां मूर्धानो राहुशङ्काप्रदाः क्वचित् । [10]क्लृत्तैकपादाः क्वाऽप्यश्वाश्चेलुः [11]सन्दानिता इव ॥१२२॥
अमर्षा**दिन्द्र**सैन्येन **मालि**सैन्यमभज्यत । बलवानपि किं कुर्यात् प्राप्तः [12]केसरिणा करी ? ॥१२३॥
अथ रक्षःपति**र्माली सुमालि**प्रमुखैर्वृतः । सयूथ इव वन्येभः [13]ससंरम्भोऽभ्यधावत ॥१२४॥
गदा-मुद्गर-नाराचैः [14]करकैरिव वारिदः । उपदुद्रा**वेन्द्र**चमूं स वीर्य[15]द्रविणेश्वरः ॥१२५॥
सलोकपालः सानीकः सानीकपतिरुच्चकैः । **इन्द्रो**ऽप्यै**रावणा**रूढो ढुढौके रणकर्मणे ॥१२६॥
स **इन्द्रो मालिना** लोकपालप्रभृतयः पुनः । **सुमालि**प्रमुखैः सार्धं योद्धुमारेभिरे भटाः ॥१२७॥
तेषां चिरमभूद् युद्धं प्राणसंशयकृन्मिथः । [16]जयाभिप्रायिणां प्रायः प्राणा हि तृणसन्निभाः ॥१२८॥
**इन्द्रो** द्रागथ [17]निर्दम्भरणो [18]दम्भोलिनाऽवधीत् । विद्युतेवाऽम्बुदो [19]गोधां **मालिनं** वीर्यमालिनम् ॥१२९॥
हते **मालिनि** वित्रेसू राक्षसा वानराश्च ते । **सुमाल्य**धिष्ठिताश्चेयु**र्लङ्कां** पातालवर्तिनीम् ॥१३०॥
**विश्रवः**सूनवे सद्यः **कौशिका**कुक्षिजन्मने । [20]**लङ्कां वैश्रमणा**याऽदा**दिन्द्रः** स्वं च पुरं ययौ ॥१३१॥
¶पुर्यां **पातालल**ङ्का**यां** तिष्ठतश्च **सुमालिनः** । [21]**प्रीतिमत्यां** सधर्मिण्यां जज्ञे **रत्नश्रवाः** सुतः ॥१३२॥
सम्प्राप्तयौवनो [22]**रत्नश्रवा** रम्यमथाऽन्यदा । जगाम **कुसुमोद्यानं** विद्यासाधनहेतवे ॥१३३॥
तत्रैकत्र रहःस्थाने सोऽक्षमालाधरो जपन् । नासाग्रन्यस्तदृक् तस्था[23]वालेखित इव स्थिरः ॥१३४॥
इत्थं च तस्थुषे तस्मै काऽपि तस्थौ समीपतः । विद्याधर्यनवद्याङ्गी कुमारी पितृशासनात् ॥१३५॥
तदानीं च महाविद्या नाम्ना **मानवसुन्दरी** । अस्मि सिद्धा तवेत्युच्चै [24]**रत्नश्रवस**मभ्यधात् ॥१३६॥
**रत्नश्रवाः** सिद्धविद्यो जपमालां मुमोच च । ददर्श च [25]पुरस्तात् तां विद्याधरकुमारिकाम् ॥१३७॥
[26]इहाऽगाः हेतुना केन ? कस्य ? वा काऽसि ? वेति च । [27]**रत्नश्रवा** बभाषे तां साऽप्येवं प्रत्यभाषत ॥१३८॥
¶अनेककौतुकागारे पुरे **कौतुकमङ्गले** । विद्याधरपति**र्व्योमबिन्दु**र्नामाऽस्ति विश्रुतः ॥१३९॥
तस्याऽस्ति ज्यायसी पुत्री **कौशिका** नाम मे स्वसा । ऊढा **यक्षपुरे**शेन राज्ञा **विश्रवसा** तु सा ॥१४०॥
[28]तस्या **वैश्रवणो** नाम बभूव तनयो नयी । राज्यं करोति **लङ्कायां** योऽधुना **शक्र**शासनात् ॥१४१॥
अहं तु **कैकसी** नाम **कौशिका**याः कनीयसी । नैमित्तिकगिरा पित्रा दत्ता तुभ्यमिहाऽऽगमम् ॥१४२॥
[29]आहूतबन्धुस्तत्रैवोपयेमे तां [30]**सुमालिसूः** । [31]**पुष्पान्तकं** पुरं न्यस्य चाऽस्थात् क्रीडंस्तया सह ॥१४३॥
¶अन्यदा **कैकसी** स्वप्ने विशन्तं स्वमुखे निशि । [32]कुम्भिकुम्भस्थलीभेदप्रसक्तं सिंहमैक्षत ॥१४४॥
तया तं स्वप्नमाख्यातं व्याख्याद् **रत्नश्रवाः** [33]प्रगे । सूनुस्ते विश्वशौण्डीरो भविष्यति महाभुजः ॥१४५॥
[34]स्वप्नादनन्तरं तस्माच्चैत्यपूजां चकार सा । बभार च [35]महासारं गर्भं **रत्नश्रवः**प्रिया ॥१४६॥

---

१. पक्षिविशेषाः ॥ २. गर्दभाः ॥ ३. शृगालाः ॥ ४. ***ववासिरे*** मु.विना; शब्दं चक्रुः ॥ ५. वीराणाम् ॥ ६. न्यषेधि ॥ ७. युद्धाय ॥ ८. ***सुर-राक्षस०*** खंता.१-२, ता. हे. मो. ॥ ९. युद्धम् ॥ १०. छिन्न एकः पादो येषां ते ॥ ११. बद्धाः ॥ १२. ***केशरिणा*** मु. ॥ १३. आवेशेन सह ॥ १४. 'करा' इति भाषायाम् ॥ १५. वीर्यं बलमेव द्रविणं धनं, तस्य स्वामी ॥ १६. जयेच्छूनाम् ॥ १७. ***निर्दम्भं रणे*** पाता. ॥ १८. वज्रेण ॥ १९. 'घो' इति भाषायाम् ॥ २०. ***धनदाय ददौ लङ्कामिन्द्रः*** हे. मो. ॥ २१. ***रत्नं रत्नाकरस्येव*** खंता.१-२, हे. ता. ॥ २२. ***रत्नश्रवोऽन्येद्युर्मनोरमम्*** खंता.१-२, मो. ॥ २३. चित्रित इव ॥ २४. ***०रूचे रत्नश्रवं प्रति*** खंता.१-२, मो. ॥ २५. ***पुरस्थां*** मु. ॥ २६. आगताऽसि ॥ २७. ***रत्नश्रवो*** खंता.१-२, हे. ॥ २८. ***तस्याश्च धनदो०*** खंता१-२, ***तस्या विश्रवणो०*** का. ला. ता. ॥ २९. आहूता बन्धवो येन सः ॥ ३०. ***सुमालिभूः*** ला. ॥ ३१. ***कुसुमान्तं*** खंता.१-२, हे. ता. ॥ ३२. कुम्भिनो गजस्य कुम्भस्थलभेदने प्रसक्तस्तत्परस्तम् ॥ ३३. प्रातःकाले ॥ ३४. ***तस्मादनन्तरं स्वप्ना०*** कां. ॥ ३५. ***महीसारं*** कां. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य गर्भस्य सम्भूतेः प्रभृत्यत्यन्तनिष्ठुरा । वाणी बभूव **कैकस्या** दृढं चाऽङ्गं जितश्रमम् ॥१४७॥
दर्पणे विद्यमानेऽपि सा खड्गेऽपश्यदाननम् । आज्ञां दातुमभिप्रैषीत् सुरराज्येऽप्यशङ्कितम् ॥१४८॥
विनाऽपि हेतुं हुङ्कारमुखरं सा दधौ मुखम् । अनामयच्च मूर्धानं कथञ्चिन्न गुरुष्वपि ॥१४९॥
विद्विषां मूर्धसु चिरं पादं दातुमियेष सा । इत्यादिदारुणान् भावान् दध्रे गर्भप्रभावतः ॥१५०॥
प्रतिपक्षासनोत्कम्पं [1]कुर्वाणस्तनयस्तया । साधिकद्वादशसमा-सहस्रायुरजन्यत ॥१५१॥
[2]उल्ललन्सूतिकातल्पेऽनल्पौजाः कम्पयन् महीम् । [3]उत्तानशय उद्दामपादको[4]कनदोऽथ सः ॥१५२॥
**भीमेन्द्रेण** पुरा दत्तं [5]नवमाणिक्यनिर्मितम् । चकर्ष पाणिना हारं पार्श्वस्थितकरण्डकात् ॥१५३॥युग्मम्॥
कण्ठे चिक्षेप तं हारं बालः सहजचापलात् । जगाम विस्मयं तेन **कैकसी** सपरिच्छदा ॥१५४॥
**रत्नश्रवसे** साऽऽचख्यौ राक्षसेन्द्रेण यः पुरा । **मेघवाहन**राजाय दत्तस्[6]त्वत्पूर्वजन्मने ॥१५५॥
अद्य यावद् देवतावद् योऽपूजि तव पूर्वजैः । न शक्यो बोढुमन्यैर्यो नवमाणिक्यनिर्मितः ॥१५६॥
यश्च नागसहस्रेण निधानमिव रक्ष्यते । [7]हार आकृष्य कण्ठेऽसौ सोऽक्षेपि शिशुना तव ॥१५७॥त्रिभिर्विशेषकम्॥
नवमाणिक्यसङ्क्रान्तमुखत्वात् तस्य तत्क्षणम् । नामधेयं '**दशमुख**' इति **रत्नश्रवा** व्यधात् ॥१५८॥
शशंस चैव **यन्मेरौ** चैत्यवन्दनहेतवे । **सुमालिना** गतवता पृष्टस्तातेन कोऽप्यृषिः ॥१५९॥
चतुर्ज्ञानभृदित्याख्यद्धारं त्वत्पूर्वजन्मनाम् । यो बोढा नवमाणिक्यं सोऽर्धचक्री भविष्यति ॥१६०॥
¶**कैकसी** सुषुवे चाऽन्यं भानुस्वप्नेन सूचितम् । **भानुकर्ण** इति सूनुं [8]**कुम्भकर्णा**पराभिधम् ॥१६१॥
चन्द्रतुल्यनखत्वेन नाम्ना **चन्द्रणखां** पुनः । ख्यातां [9]**सूर्पणखां** लोके **कैकसी** सुषुवे सुताम् ॥१६२॥
कियत्यपि गते काले पुनश्चाऽसूत **कैकसी** । पुत्रं **बिभीषणं** नाम्ना शशाङ्कस्वप्नसूचितम् ॥१६३॥

साग्रषोडशधनुःसमुन्नतास्ते त्रयोऽप्यहरहः सहोदराः ।
रेमिरे गतभया यथासुखं क्रीडयाऽऽद्यवयसोऽनुरूपया ॥१६४॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
सप्तमे पर्वणि **राक्षस**वंश-**वानर**वंशोत्पत्ति-**रावण**जन्म-
वर्णनो नाम प्रथमः सर्गः॥

१. *कुर्वाणः समये तया । सूनुश्चतुर्दशसमा-सहस्रायु०* खंता.१-२, हे. ता. ॥ २. *स उल्ललत् सूतितल्पेऽनल्पौजाः* खंता.१-२, ला. मो. का. ता. ॥ ३. डिम्भः ॥ ४. रक्तकमलम् ॥ ५. नवभिर्माणिक्यैर्निर्मितम् ॥ ६. तव पूर्वजाय ॥ ७. *लीलयाऽऽकृष्य कण्ठेऽसौ* खंता.१-२, हे. ता. ॥ ८. ***कुम्भकर्ण पराभिधम्*** हे. ॥ ९. ***शूर्पणखां*** मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥द्वितीयः सर्गः॥

अथाऽन्येद्युर्**दशमुखः** सानुजोऽपश्यदम्बरे। विमानारूढ[१]मायान्तमृद्धं **वैश्रवणं** नृपम् ॥१॥
कोऽयमित्य[२]नुयुक्ता तु तेन माताऽब्रवीदिति। **कौशिका**या मम ज्येष्ठभगिन्या ह्ये[३]ष नन्दनः ॥२॥
**विश्रवो**नामधेयस्य विद्याधरपतेः सुतः। सर्वविद्याधरेन्द्रस्ये**न्द्र**स्याऽग्रसुभटो ह्ययम् ॥३॥
भवत्पिता[४]महज्येष्ठं हत्वे**न्द्रो मालिनं** रणे। **लङ्कां सराक्षसद्वीपां** ददावस्मै च नः पुरीम् ॥४॥
ततः प्रभृति **लङ्का**याः प्राप्त्यै कृतमनोरथः। इहाऽस्ति ते पिता वत्स! युक्तं शक्ते द्विषि ह्यदः ॥५॥
**लङ्कां सराक्षसद्वीपां** सह **पातालुलङ्क**या। विद्यां च **राक्षसीं** नाम [५]पूर्वजन्मात्मजन्मने ॥६॥
[६]**रक्षोवंशा**दिकन्दाय **मेघवाहन**भूभुजे। **राक्षसेन्द्रो** ददौ **भीमः** प्रतीकाराय विद्विषाम् ॥७॥युग्मम्॥
तस्यां हृतायामा[७]म्नायराजधान्याम[८]रातिभिः। पितामहस्तिष्ठति ते पिताऽपि च परा[९]सुवत् ॥८॥
अरक्षके क्षेत्र इवोक्षा[१०]णस्तस्यामरातयः। स्वैरं चरन्तीति सदा जीव[११]च्छल्यं पितुस्तव ॥९॥
कदा नु सानुजस्तत्र गत्वा पैतामहासने। आसीनो द्रक्ष्यसे वत्स! मयका मन्दभाग्यया ? ॥१०॥
विलोक्य **लङ्का**लुण्टाकांस्त्वत्का[१२]रायां नियन्त्रितान्। शिरोमणिर्भविष्यामि कदा पुत्रवतीष्वहम् ? ॥११॥
एवं मनोरथैर्वत्स! खपुष्पा[१३]वचयोपमैः। क्षामीभवाम्यहरहर्मरा[१४]लीव **मरौ** गता ॥१२॥
¶अथैवमवदद् रोषभीषणाक्षो **विभीषणः**। अलं मातर्विषादेन न वेत्सि सुतविक्रमम् ॥१३॥
आर्यस्य **दशकण्ठ**स्य पुरस्ताद् देवि! दोष्मतः। क **इन्द्रो** ? **वैश्रव[१५]णः** कः? केऽन्ये विद्याधरा अपि ? ॥१४॥
[१६]अज्ञातपूर्विणा **लङ्का**राज्यं सोढं द्विषामिदम्। **दशास्ये** न प्रसुप्तेन सिंहेनेवेभगर्जितम् ॥१५॥
आस्तामार्यो **दशग्रीवः** परानतिभटानपि। अप्यार्यः **कुम्भकर्णो**ऽयं निःशेषीकर्तुमीश्वरः ॥१६॥
अस्त्वार्यः **कुम्भकर्णो**ऽपि तदादेशात् करोम्यहम्। द्विषामकाण्डे संहारं मातः! पातः [१७]पवेरिव ॥१७॥
¶अथोचे **रावणो**ऽप्येवं दशनैरधरं दशन्। त्वं वज्रकठिनाऽस्यम्ब! यद्दुःशल्यमधा[१८]श्चिरम् ॥१८॥
अप्येक[१९]बाहुस्थाम्ना तान् हन्या**मिन्द्रा**दिकान् द्विषः। शस्त्राशस्त्रिकथाऽप्यस्तु वस्तुतस्ते तृणं हि मे ॥१९॥
दोर्वीर्येणाऽपि निर्जेतुं यद्यप्यलमहं परान्। तथाऽपि हि प्रयोक्तव्या विद्याशक्तिः क्रमागता ॥२०॥
तद्विद्याः साधयिष्यामि निरवद्याः समन्ततः। अनुजानीहि यास्यामि तत्सिद्ध्यै सानुजोऽप्यहम् ॥२१॥
एवमुक्त्वा नमस्कृत्य पितरौ सानुजोऽपि सः। ताभ्यां च चुम्बितो मूर्ध्नि **भीमारण्य**मुपाययौ ॥२२॥
[२०]शयानशयुनिःश्वासकम्पमानान्तिकद्रुमम्। दृप्तशार्दूललाङ्गूलाच्छोटस्फोटितभूतलम् ॥२३॥
अस्तोकघूक[२१]घूत्कारघोरभूरुहगह्वरम्। नृत्यद्भूतपदाघातपतद्गिरितटोपलम् ॥२४॥
भयङ्करं दिविषदामप्येकं पदमापदाम्। भ्रातृभ्यां सहितस्ताभ्यां तदरण्यं विवेश सः ॥२५॥त्रिभिर्विशेषकम्॥
¶ते जटामुकुटान् मूर्ध्नि धारयन्तस्तपस्विनः। [२२]अक्षसूत्रधरा नासावंशाग्रन्यस्तदृष्टयः ॥२६॥
श्वेतां[२३]शुकभृतो यामद्वितयेन त्रयोऽपि हि। सर्वका[२४]मप्रदा**मष्टाक्षरीं** विद्यामसाधयन् ॥२७॥
दशकोटीसहस्राणि [२५]जपतो यः फलप्रदः। आरेभिरे ते जपितुं तं मन्त्रं षोडशाक्षरम् ॥२८॥
¶तदा **त्वनादृतो** नाम **जम्बूद्वीप**पतिः सुरः। सान्तःपुरः क्रीडनाय तत्राऽऽयातो ददर्श तान् ॥२९॥

---

१. *०मायान्तं धनदं प्रवरर्द्धिकम्* खंता.१-२, हे. ता.; ***मायान्तमृद्धवैश्रवणं०*** मु. ॥ २. पृष्टा ॥ ३. ***एष०*** मो. ॥ ४. तव पितामहस्य ज्येष्ठभ्रातरम् ॥ ५. ***पूर्वजन्मात्मजन्मजे*** मु. ॥ ६. राक्षसवंशस्याऽऽद्याङ्कुराय ॥ ७. आम्नायेन - पारम्पर्येणाऽऽगतायां राजधान्याम् ॥ ८. शत्रुभिः ॥ ९. मृतवत् ॥ १०. वृषभाः ॥ ११. 'दूझतो घा' इति भाषायाम् ॥ १२. त्वत्कारागारे बद्धान् ॥ १३. आकाशकुसुमसञ्चयोपमैः ॥ १४. मरुदेशे गता हंसीव ॥ १५. ***धनदः को वा?*** खंता.१-२, ता. हे. ॥ १६. पूर्वमज्ञातेन ॥ १७. वज्रस्य पातः प्रहार इव ॥ १८. धृतवती ॥ १९. एकहस्तबलेन ॥ २०. सुप्ताजगरस्य निःश्वासेन कम्पमानाः समीपस्था द्रुमा यत्र तत् ॥ २१. ***०घूत्कारभूरुहच्छन्नगह्वरम्*** ता. ॥ २२. जपमालाधराः ॥ २३. श्वेतवस्त्रभृतः ॥ २४. ***सर्वकामान्नदामष्टा०*** खंता.१-२, पाता.; ***कामप्रदा-मष्टाक्षरीं*** मु.; ***०प्रदामष्टाक्षरीविद्याम०*** छा. पा. ॥ २५. ***जपितो यः*** खंता.१-२, कां.ता.; ***जपो यस्य*** छा. पा. ता. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्यासाधनविघ्नाय तेषां यक्षाधिपः स तु। [१]अनुकूलोपसर्गार्थं [२]प्रजिघाय स्वयोषितः ॥३०॥
तेषां क्षोभार्थमायातास्तद्रूपैरतिसुन्दरैः। ताः क्षोभं स्वयमेवेयुर्विस्मृतस्वामिशासनाः ॥३१॥
निर्विकारान् स्थिराकारांस्तूष्णीकानवलोक्य तान्। अकृत्रिमस्मरावेशविवशास्ता बभाषिरे ॥३२॥
**भो भो ध्यानजडा!** यूयं यत्नतः [३]पश्यताऽग्रतः। दे[४]वीरपि वशीभूताः का वः सिद्धिरतः परा ? ॥३३॥
किं विद्यासिद्धये यत्नस्तत् क्लेशेनाऽमुना कृतम्। किं करिष्यथ विद्याभिर्देव्यः सिद्धा [५]वयं हि वः ॥३४॥
रमध्वं स्वैरमस्माभिस्त्रयाणां जगतामपि। रम्यरम्यप्रदेशेषु [६]सुरदेश्या यथारुचि ॥३५॥
सकाममिति जल्पन्त्योऽनल्पधैर्येषु तेषु ताः। विलक्षा जज्ञिरे [७]यक्ष्यस्ता[८]लिका नैकहस्तिकाः ॥३६॥
**जम्बूद्वीप**पतिर्यक्षस्ततस्तानब्रवीदिति। मुग्धैः किमेतदारब्धं युष्माभिः कष्टचेष्टितम् ? ॥३७॥
मन्ये पाखण्डिना केनाऽप्यकाण्डे मृत्युहेतवे। पाखण्डं शिक्षिता यूयमना[९]प्तेन दुरात्मना ॥३८॥
यात याताऽधुनाऽप्येतं मुक्त्वा ध्यानदुराग्रहम्। ब्रूताऽहमपि यच्छामि वाञ्छितं वः कृपापरः ॥३९॥
इत्युक्तेऽपि हि तूष्णीकांस्तान् क्रुद्धः सोऽब्रवीदिति। मुक्त्वा प्रत्यक्षदेवं मां किमन्यं [१०]ध्यायथाऽरे ? ॥४०॥
इति स क्रूरवाग् यक्षस्तत्परिक्षोभहेतवे। भ्रूसञ्ज्ञया समादिक्षत् किङ्करान् वानमन्तरान् ॥४१॥
ततः किलकिलारावकारिणो बहुरूपिणः। उत्पाट्य गिरिशृङ्गाणि तदग्रे केऽपि चिक्षिपुः ॥४२॥
चन्दनद्रुमवत् सर्पीभूय तान् केऽप्यवेष्टयन्। सिंहीभूय पुरस्तेषां [११]बूच्चक्रुः केऽपि दारुणम् ॥४३॥
अच्छ-भल्ल-वृक-व्याघ्र-बिडालादिवपुर्भृतः। चक्रुर्बिभीषिकां केचिन्नाऽक्षुभ्यंस्ते तथाऽपि हि ॥४४॥
**कैकसीं रत्नश्रवसं** [१२]जामिं **चन्द्रणखां** च ते। विकृत्य बद्ध्वा च पुरस्तेषां सपदि चिक्षिपुः ॥४५॥
**रत्नश्रवः**प्रभृतयस्ते च [१३]मायामयास्तदा। उदश्रुनयना एवं चक्रन्दुः करुणस्वरम् ॥४६॥
वयं हन्यामहे बद्ध्वा तिर्यञ्चो लुब्धकैरिव। एभिर्ग[१४]तघृणैः कैश्चिद् युष्माकं पश्यतामपि ॥४७॥
उत्तिष्ठोत्तिष्ठ वत्स! त्वं त्रायस्व **दशकन्धर!**। एकान्तभक्तस्तादृक् त्वमस्मान् कथमुपेक्षसे ? ॥४८॥
यो बालोऽपि महाहारं तं कण्ठे [१५]विन्यधाः स्वयम्। तस्य बाहुबलं क्वाऽद्य ? क्वाऽहङ्कारश्च ते गतः ? ॥४९॥
**कुम्भकर्ण!** त्वमपि नो नाऽऽकर्णयसि किं वचः ?। यदेवमस्मान् दीना[१६]स्यानुदासीन इवेक्षसे ? ॥५०॥
**बिभीषण!** क्षणमपि न भक्तिविमुखोऽभवः। किं परावर्तित इव दुष्टदैवेन सम्प्रति ? ॥५१॥
विलपत्स्वपि तेष्वेवं न चेलुस्ते समाधितः। ततस्तदग्रे तन्मौलीश्चिच्छिदुर्यक्षकिङ्कराः ॥५२॥
अपश्यन्त इवाऽग्रस्थमपि तत्कर्म दारुणम्। न मनागप्य[१७]युः क्षोभं ते ध्यानाधीनचेतसः ॥५३॥
**रावणा**ग्रेऽपातयंस्ते मौली त[१८]दनुजन्मनोः। **दशग्रीव**स्य मूर्धानं तयोरग्रे तु मायया ॥५४॥
किञ्चिच्चुक्षुभतुः कोपात् **कुम्भकर्ण-बिभीषणौ** ॥ गुरुभक्तिस्तत्र हेतुर्न पुनः स्वल्पसत्त्वता ॥५५॥
**रावणः** परमार्थज्ञस्तमनर्थमचिन्तयन्। विशिष्टध्याननिष्ठोऽभूद् गिरीन्द्र इव निश्चलः ॥५६॥
साधु साध्वित्यभूद् वाणी गी[१९]र्वाणानामथाऽम्बरे। ते च द्रुतमपा[२०]सर्पंश्चकिता यक्षकिङ्कराः ॥५७॥
¶तव स्मो वशवर्तिन्य इति जल्पन्त्य उच्चकैः। विद्याः सहस्रमभ्येयुर्**दशास्यं** द्योतिताम्बराः ॥५८॥
**प्रज्ञप्ती रोहिणी गौरी गान्धारी** च तथा परा। **नभःसञ्चारिणी कामदायिनी कामगामिनी** ॥५९॥
**अणिमा लघिमाऽक्षोभ्या मनःस्तम्भनकारिणी**। **सुविधाना तपोरूपा दहनी विपुलोदरी** ॥६०॥
**शुभप्रदा रजोरूपा दिनरात्रिविधायिनी**। **वज्रोदरी समाकृष्टिरद[२१]र्शन्यजरामरा** ॥६१॥
**अनलस्तम्भनी तोयस्तम्भनी गिरिदा[२२]रणी**। **अवलोकनी तु वह्निर्घोरा धीरा[२३] भुजङ्गिनी** ॥६२॥

---

१. ***अनुकूलोपसर्गाय*** खंता.१-२, पाता. मु.॥ २. प्रेषितवान्॥ ३. ***पश्यथाऽग्रतः*** इति पाठः श्रीरमणीकविजयैराद्दृतः, अस्माकं त्वयमेव पाठो योग्यः प्रतिभाति॥ ४. ***देव्योऽपि च*** मु.; ***देवीरपि च वशी०*** मु. रसं.॥ ५. ***स्मो वो यतः*** खंता.१-२, हे.॥ ६. देवसदृशाः॥ ७. ***यक्षाः*** मु.॥ ८. एकहस्तेन तालिका न भवेदिति यावत्॥ ९. अहितेन॥ १०. ***ध्यायथाऽपरम्*** मु.॥ ११. ***पूच्चक्रुः*** हे. कां. मु.॥ १२. भगिनीम्॥ १३. कपटयुक्ताः॥ १४. निर्दयैः॥ १५. ***विन्यधात्०*** कां.॥ १६. दीनमुखान्॥ १७. आप्नुवन्॥ १८. तस्य लघुभ्रात्रोः॥ १९. देवानाम्॥ २०. अनश्यन्॥ २१. ***०रदर्शिन्य०*** ला.॥ २२. ***गिरिदारुणी*** कां. खं.२, पाता.; ***गिरिहारणी*** ला.॥ २३. ***वीरा*** ता. हे. मो.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]**वारुणी** [2]**भुवनाऽवन्ध्या दारुणी** [3]**मदनाशिनी । भास्करी** [4]**रूपसम्पन्ना** [5]**रोशनी विजया जया** ॥६३॥
**वर्धनी मोचनी** चैव [6]**वाराही कुटिलाकृतिः । चित्तोद्भवकरी शान्तिः कौबेरी वशकारिणी** ॥६४॥
[7]**योगेश्वरी** [8]**बलोत्सादा** [9]**चण्डा भीतिः** [10]**प्रधर्षिणी । दुर्निवारा जगत्कम्पकारिणी भानुमालिनी** ॥६५॥
एवमाद्या महाविद्याः पुरा सुकृतकर्मणा । स्वल्पैरेव दिनैः सिद्धा **दशास्यस्य** महात्मनः ॥६६॥अष्टभिः कुलकम्॥
**संवृद्धिर्जृ**[11]**म्भणी** [12]**सर्वाहारिणी व्योमगामिनी । इन्द्राणी**ति पञ्च विद्याः **कुम्भकर्णस्य** चाऽसिधन् ॥६७॥
**सिद्धार्था शत्रुदमनी निर्व्याघाता खगामिनी ।** विद्याश्चतस्रः संसिद्धाः [13]**कुम्भकर्णा**नुजन्मनः ॥६८॥
**जम्बूद्वीपपतिः** सोऽपि क्षमयामास **रावणम्** । [14]महतामपराद्धे हि [15]प्रणिपातः प्रतिक्रिया ॥६९॥
स यक्षोऽकृत तत्रैव **रावणस्य** कृते कृती । पुरं **स्वयम्प्रभं** [16]विघ्नप्रायश्चित्तचिकीरिव ॥७०॥
विद्यासिद्धिं तु तां तेषां श्रुत्वा तौ पितरौ स्वसा । बन्धवश्चाऽऽययुस्तत्र प्रतिपत्तिश्च तैः कृता ॥७१॥
पित्रोर्दृशां सुधावृष्टिं बन्धूनामेकमुत्सवम् । जनयन्तः सुखं तस्थुर्भ्रातरस्ते त्रयोऽपि हि ॥७२॥
उपवासैरथो षड्भिश्च**न्द्रहास**मसिं वरम् । **दशास्यः** साधयामासौ[17]पयिकं साधने दिशाम् ॥७३॥
¶इतश्च **वैताढ्यगिरौ** दक्षिणश्रेणिभूषणे । पुरेऽभूत् **सुरसङ्गीते मयो** विद्याधरेश्वरः ॥७४॥
तस्य **हेमवती** नाम गुणानां धाम गेहिनी । तत्कुक्षिजन्मा दुहिता नाम्ना **मन्दोदरी**त्यभूत् ॥७५॥
तां प्राप्तयौवनां प्रेक्ष्य तद्वरार्थी व्यचिन्तयत् । विद्याधरकुमाराणां **मय**राजो गुणागुणान् ॥७६॥
अनुरूपमपश्यंश्च वरं **मय**नरेश्वरः । यावद् विषादमग्नोऽस्थात् तावन्म[18]न्त्र्येवमब्रवीत् ॥७७॥
स्वामिन्! मा [19]विषीद किञ्चिदस्त्यस्या उचितो वरः । **रत्नश्रवः**सुतो दोष्मान् रूपवांश्च **दशाननः** ॥७८॥
सिद्धविद्यासहस्रस्याऽकम्पितस्य सुरैरपि । विद्याधरेषु नाऽस्याऽस्ति तुल्यो **मेरो**रिवाऽद्रिषु ॥७९॥
एवमेतदिति प्रोच्य **मयो** [20]हर्षमयात्मकः । सबान्धवः [21]ससैन्यश्च [22]सान्तःपुरपरिच्छदः ॥८०॥
**मन्दोदरी**मुपादाय प्रदातुं **दशमौलये** । पुरुषैर्ज्ञापयित्वा स्वं **स्वयम्प्रभपुरं** ययौ ॥८१॥युग्मम्॥
**सुमालि**प्रमुखास्तत्र गोत्रवृद्धा महाशयाः । **मन्दोदरीं दशास्यस्य** ग्रहीतुं प्रतिपेदिरे ॥८२॥
विवाहं कारयामासुस्तयोरथ शुभे दिने । वैवाहिकाः **सुमाल्याद्या मय**प्रभृतयश्च ते ॥८३॥
ययुर्**मया**द्याः स्वपुरं कृतोद्वाहमहोत्सवाः । **रावणो**ऽपि चिरं रेमे रमणीवरया तया ॥८४॥
¶**रावणः** क्रीडयाऽन्येद्युर्ययौ [23]**मेघरवं** गिरिम् । [24]उत्पक्षमिव पार्श्वावलम्बिभिर्मेघमण्डलैः ॥८५॥
[25]सरस्यपश्यन् मज्जन्तीस्तत्र खेचरकन्यकाः । षट् सहस्रान् सोऽप्सरस इव क्षीर[26]सरस्वति ॥८६॥
पद्मिन्य इव **मार्तण्डं** स्मेरलोचनपङ्कजाः । [27]नाथीयन्त्यः सानुरागास्तमीक्षाञ्चक्रिरे[28]ऽथ ताः ॥८७॥
सद्योऽप्यपास्य [29]मन्दाक्षममन्दस्मरपीडिताः । भर्ता नस्त्वं भवेवं ताः प्रार्थयाञ्चक्रिरे स्वयम् ॥८८॥
तत्र **पद्मावती** [30]**सर्वश्री-सुरसुन्दरो**द्भवा । **मनोवेगा-बुध**सुता चाऽन्याऽ**शोकलता**भिधा ॥८९॥
अन्या **विद्युत्प्रभा** नाम सुता **कनक-सन्ध्ययोः** । एवमन्या अपि जगत्प्रख्यातान्वयसम्भवाः ॥९०॥
ताः सरागाः सरागेण **दशग्रीवेण** कन्यकाः । गान्धर्वेण विवाहेन सर्वा अप्युपयेमिरे ॥९१॥
तत्सौ[31]विदास्तत्पितॄणामिदमेत्य व्यजिज्ञपन् । कोऽप्येष कन्या यौष्माकीः परिणीयाऽद्य गच्छति ॥९२॥
समं तत्पितृभिर्विद्याधरै**रमरसुन्दरः** । क्रुद्धोऽन्वधावद् रभसा [32]जिघांसुर्**दशकन्धरम्** ॥९३॥
नवोढास्ता **दशग्रीव**मूचुः प्रकृतिकातराः । त्वरितं प्रेरय स्वामिन्! विमानं मा विलम्बय ॥९४॥

---

१. ***वारिणी*** पा. मु. ॥ २. ***भुवनाऽवध्या*** खं.२, पाता.; ***भुवनाऽमध्या*** खं.१ ॥ ३. ***०नाशनी*** खंता.१-२, पाता. ॥ ४. ***रूपसम्पत्ती*** पाता. खं.२, पा. कां. छा.; ***रूपसम्पन्नी*** खं.१, ला. ॥ ५. ***रोशानी*** सर्वप्रतिषु ॥ ६. ***वराही*** ला. ॥ ७. ***योगीश्वरी*** ला. ॥ ८. ***बलोत्सादी*** खंता.२, ला. हे. कां. छा. ता.; ***बलोत्सहा*** ला. मो. ॥ ९. ***चण्डभीतिः*** पाता. ॥ १०. ***प्रधर्षणी*** खंता.१-२, ला. ॥ ११. ***०र्जृम्भिणी*** खं.२, ला. ॥ १२. ***विद्याहारिणी*** खंता.१ ॥ १३. बिभीषणस्य ॥ १४. ***महतामपराधे*** पाता. ॥ १५. निवारणम् ॥ १६. विघ्नस्य प्रायश्चित्तं कर्तुमिच्छुरिव ॥ १७. उपायभूतम् ॥ १८. ***मन्त्रीदमब्रवीत्*** हे.; ***मन्त्र्येवमभ्यधात्*** मो. ॥ १९. ***विषादः*** पाता. खं.१; ***विषदः*** खं.२; ***विषीदः*** ला. ॥ २०. ***हर्षमहामनाः*** मु. ॥ २१. ***ससेनाकः*** खंता.१-२ ॥ २२. ***सान्तःपुरनिवापिदः*** खंता.१ ॥ २३. ***मेघवरं*** खंता.२; ***मेघरविं*** खंता.१; ***मेघरथं*** पाता. ॥ २४. ऊर्ध्वीकृतपक्षम् ॥ २५. सरोवरे ॥ २६. क्षीरसमुद्रे ॥ २७. नाथमिच्छन्त्यः ॥ २८. ***०चक्रिरे तथा*** ला. ॥ २९. लज्जाम् ॥ ३०. ***नामाऽमरसुन्दरनन्दना*** खंता.२, हे. ता. ॥ ३१. कञ्चुकिनः ॥ ३२. हन्तुमिच्छुः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोऽप्य[1]जय्योऽयं विद्याधरेन्द्रोऽ**मरसुन्दरः** । किं पुनः **कनक-बुध**प्रमुखैः परिवारितः ॥९५॥

**दशास्य**स्तद्गिरा स्मित्वा व्याजहारेति सुन्दरीः । पश्यताऽऽजिं ममाऽमीभिर्गरुडस्योरगैरिव ॥९६॥

इति ब्रुवाणमेयुस्तं कुर्वाणाः शस्त्र[2]दुर्दिनम् । घना इव महाशैलं विद्याधरमहाभटाः ॥९७॥

अस्त्राण्यस्त्रैः खण्डयित्वा **रावणो** वीर्यदारुणः । सद्यः [3]**प्रस्वापनास्त्रे**णाऽजि[4]घांसुस्तानमोहयत् ॥९८॥

नागपाशैरबध्नाच्च पशूनिव **दशाननः** । प्रेयसीभिः पितृभिक्षां याचितस्तान् मुमोच च ॥९९॥

ततस्ते स्वपुरं जग्मुः समं ताभिश्च **रावणः** । **स्वयम्प्रभपुरं** प्राप दत्तार्घो मुदितैर्जनैः ॥१००॥

¶अथ **कुम्भपुरे**शस्य **महोदर**महीपतेः । **सुरूपनयना**देवीकुक्षिजां नवयौवनाम् ॥१०१॥

सुतां नाम्ना **तडिन्मालां** तडिन्मालोपमद्युतिम् । पूर्णकुम्भस्तनाभोगां **कुम्भकर्ण** उपायत ॥१०२॥युग्मम्॥

**वैताढ्य**दक्षिणश्रेण्यां **ज्योतिष्पुर**पुरेशितुः । **वीर**नाम्नो **नन्दवती**देवीकुक्षिसमुद्भवाम् ॥१०३॥

[5]पङ्कजश्रीदस्युद्दशं नामतः **पङ्कजश्रियम्** । कन्यां सुरस्त्रियमिव पर्यणैषीद् **बिभीषणः** ॥१०४॥युग्मम्॥

अथ **मन्दोदरी** देवी देवेन्द्रसमतेजसम् । पुत्र**मिन्द्रजितं** नाम सुषुवेऽद्भुतविक्रमम् ॥१०५॥

कियत्यपि गते काले द्वितीयमपि नन्दनम् । मेघवन्नयनानन्दं सुषुवे **मेघवाहनम्** ॥१०६॥

¶आकर्ण्य पितृवैरं तत् **कुम्भकर्ण-बिभीषणौ** । **वै[6]श्रवणा**श्रितां **लङ्का**मुपदुद्रुवतुः सदा ॥१०७॥

[7]**वैश्रवणो**ऽथ दूतेनेत्यवोचत **सुमालिनम्** । निजौ [8]शाधि शिशू हन्त **रावणा**वरजाविमौ ॥१०८॥

स्वान्यशक्ती न जानीतो दुर्मदौ वीरमानिनौ । एतौ **पातालङ्का**स्थौ भेकौ कूपोद्भवाविव ॥१०९॥

अस्मत्पुर्याम[9]वस्कन्दं ददाते छलकर्मणा । [10]जितकाशितया मत्तौ मया चिरमुपेक्षितौ ॥११०॥

न चेच्छिक्षयसि क्षुद्र! तदिमौ **मालिवर्त्मना** । त्वया सहैव नेष्यामि त्वं वेत्स्यस्मद्बलं [11]न तु ॥१११॥

इत्युक्त्वा **रावणः** क्रुद्धोऽभ्यधादिति महामनाः । रे![12] क एष **वैश्रवणः**? करदो यः परस्य हि ॥११२॥

अन्यस्य शासनाल्**लङ्कां** यः शास्त्येवं वदन् स किम् । न लज्जते? स्वात्मनोऽपि तस्य धार्ष्ट्यमहो! महत् ॥११३॥

दूतोऽसीति न हन्मि त्वां याहीति **दशमौलिना** । [13]उक्तो **वैश्रवणं** गत्वा दूतोऽशंसद् यथातथम् ॥११४॥

दूतानुपदमेवाऽथ **दशकण्ठः** ससोदरः । ससैन्यः प्रययौ **लङ्का**[14]ममर्षेण गरीयसा ॥११५॥

अग्रे [15]गतेन दूतेन तेनाऽऽख्यातप्रवृत्तिकः । [16]ससैन्यो निर्ययौ **लङ्कापुर्या वैश्रवणो** [17]युधे ॥११६॥

[18]वन्यामिव महावातः प्रसरन्ननिवारितम् । [19]क्षणादभाङ्क्षीच्च तस्याऽक्षौहिणीं **दशकन्धरः** ॥११७॥

**रावणे**न बले भग्ने भग्नंमन्यः स्वयं ततः । एवं **वैश्रवणो** दध्यौ [20]विध्यातक्रोधपावकः ॥११८॥

सरसो लूनपद्मस्य भग्नदन्तस्य दन्तिनः । शाखिनश्छिन्नशाखस्याऽलङ्कारस्य च निर्मणेः ॥११९॥

नष्टज्योत्स्नस्य शशिनस्तो[21]यदस्य गताम्भसः । परैश्च भग्नमानस्य मानिनो धि[22]गवस्थितिम् ॥१२०॥युग्मम्॥

तस्याऽथवाऽस्त्ववस्थानं यतमानस्य मुक्तये । स्तोकं विहाय बह्विच्छुर्न हि लज्जास्पदं पुमान् ॥१२१॥

तदलं मम राज्येनाऽनेकानर्थप्रदायिना । उपादास्ये परिव्रज्यां द्वारं निर्वाणवेश्मनः ॥१२२॥

अप्येतावपकर्तारौ **कुम्भकर्ण-बिभीषणौ** । जातौ ममोपकर्तारावीदृक्पथनिदर्शनात् ॥१२३॥

**रावणो**ऽग्रेऽपि मे बन्धुर्बन्धुः सम्प्रति कर्मतः । विनाऽस्यो[23]पक्रममिमं न हि स्यान्मम धीरियम् ॥१२४॥

[24]एवं ध्यात्वा **वैश्रवण**स्त्यक्त्वा शस्त्रादि सर्वतः । तत्त्वनिष्ठः परिव्रज्यां स्वयमेव समाददे ॥१२५॥

तं नत्वा **रावणो**ऽप्येवमुवाच रचिताञ्जलिः । ज्येष्ठो भ्राता त्वमसि मे सहस्वाऽऽ[25]गोऽ[26]नुजन्मनः ॥१२६॥

राज्यं कुरुष्व निःशङ्को **लङ्का**यामपि बान्धव! । वयमन्यत्र यास्यामो न हीयत्येव मेदिनी ॥१२७॥

---

१. जेतुमशक्यः ॥ २. शस्त्रवृष्टिम् ॥ ३. *प्रस्वापनास्त्रेण जिघांसु०* ला. मो. कां. छा. ॥ ४. हन्तुमनिच्छुः ॥ ५. कमललक्ष्म्याशोरयित्र्यौ दृशौ-नेत्रे यस्यास्ताम् ॥ ६. *धनदाधिष्ठितां* खंता.१-२, ला. हे. कां. ॥ ७. *दूतेन धनदोऽथैवमवोचत* खंता.१-२, ला. हे. कां. ॥ ८. शिक्षय ॥ ९. धाटीम्(धाड) ॥ १०. *जितकामितया* मु.; जितेन काशते ॥ ११. *ननु* रसंपा. ॥ १२. *अरे क एष धनदः?* खंता. १-२, ला. हे. कां. ॥ १३. *विसृष्टो धनदं* खंता.१-२, ला. हे. कां. ॥ १४. क्रोधेन ॥ १५. *यातेन* हे. ॥ १६. *धनदो लङ्कानगर्या निर्ययौ* खंता.१-२, ला. हे. कां. ॥ १७. *युधि* खंता.१-२, पाता. मु. ॥ १८. वनानां समूहो वन्या, ताम् ॥ १९. *क्षणादभाङ्क्षीद् धनदाक्षौहिणीं* ला. हे. कां. ॥ २०. *विध्मात०* मु. ॥ २१. मेघस्य ॥ २२. *धिगवस्थितिः* ला., मु.विना च ॥ २३. आरम्भम् ॥ २४. *एवं विमृश्य धनद०* खंता.१-२, ला. हे. ॥ २५. अपराधम् ॥ २६. लघुबन्धोः ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तस्मिन्नेवं ब्रुवाणेऽपि महात्मा प्रतिमास्थितः ।[1]किञ्चिन्नोचे **वैश्रवण**स्तद्भवेऽपि शिवङ्गमी[2] ॥१२८॥
[3]ज्ञात्वाऽ[4]नीहं **वैश्रवणं** क्षमयित्वा प्रणम्य च । विमानं **पुष्पकं** तस्य सोऽग्रहीत् सह **लङ्क**या ॥१२९॥
[5]जयलक्ष्मीलतापुष्पं सोऽधिरुह्याऽथ **पुष्पकम्** । **सम्मेतशैल**शृङ्गेऽर्हत्प्रतिमा वन्दितुं ययौ ॥१३०॥
वन्दित्वा प्रतिमाः शैलाद् **रावण**स्याऽ[6]वरोहतः । सेनाकलकलेनैको जगर्ज वनकुञ्जरः ॥१३१॥
[7]अथ **प्रहस्त** इत्यूचे प्रतिहारो **दशाननम्** । हस्तिरत्नमसौ देव! देवस्याऽर्हति [8]यानताम् ॥१३२॥
ततः पिङ्गोत्तुङ्गदन्तं मधुपिङ्गललोचनम् । उदग्रकुम्भशिकरं [9]मदनिर्झरणीगिरिम् ॥१३३॥
सप्तहस्तसमुच्छ्रायं नवहस्तायतं च तम् । क्रीडापूर्वं वशीकृत्याऽध्यारुरोह **दशाननः** ॥१३४॥युग्मम्॥
चकार तस्या **भुवनालङ्कार** इति नाम सः । **ऐरावण**गजारूढ**शक्र**लक्ष्मीं वि[10]डम्बयन् ॥१३५॥
¶गजमा[11]लानितं कृत्वा तत्रैवोवास तां निशाम् । **दशास्यः** प्रातरध्यष्ठादास्थानीं सपरिच्छदः ॥१३६॥
तत्रोपेत्य प्रतीहारविज्ञप्तो घातजर्जरः । विद्याधरस्तं **पवनवेगो** नत्वैवमब्रवीत् ॥१३७॥
देव!**पाताललङ्कायाः किष्किन्धि**नृपनन्दनौ । **किष्किन्धा**यां गतौ **सूर्यरजा ऋक्षरजा** अपि ॥१३८॥
अभूद् युद्धं तयोस्तत्र **यमे**न सह भूभुजा । यमेनेवाऽतिघोरेण प्राणसंशयदायिना ॥१३९॥
चिरं युद्ध्वा **यमे**नोच्चैर्बद्ध्वा [12]कारानिकेतने । [13]क्षिप्तौ **सूर्यरजा** [14]**ऋक्षरजाः** सपदि दस्युवत् ॥१४०॥
विधाय नरकावासांस्तेन वैतरणीयुतान् । छेदभेदादिदुःखं तौ प्राप्येते सपरिच्छदौ ॥१४१॥
तौ त्वदीयौ क्रमायातौ सेवकौ **दशकन्धर!** । मोचय [15]त्वमलङ्घ्याज्ञ! तवैव स पराभवः ॥१४२॥
**रावणो**ऽपि जगादैवमेवमेतदसंशयम् । आश्रयस्य हि दौर्बल्यादाश्रितः परिभूयते ॥१४३॥
परोक्षतः पत्तयोऽमी यद्बद्धास्तेन दुर्धिया । कारायां यच्च निक्षिप्ता एष यच्छामि तत्फलम् ॥१४४॥
¶इत्युदीर्योदग्रवीर्यः सानीकोऽनी[16]कलालसः । पुरीं जगाम **किष्किन्धां यम**दिक्पालपालिताम् ॥१४५॥
त्रपुपान-शिलास्फाल-पर्शुच्छेदादिदारुणान् । ददर्श नरकांस्तत्र सप्ताऽपि **दशकन्धरः** ॥१४६॥
क्लिश्यमानान् निजान् पत्तीन् दृष्ट्वा रुष्टो **दशाननः** । परमाधार्मिकांस्तत्राऽत्रासयद् गरुडोऽहिवत् ॥१४७॥
स्वपत्तीन् मोचयामास तत्रस्थानपरानपि । महतामागमो ह्याशु क्लेशच्छेदाय कस्य न ? ॥१४८॥
**यमाय** नरकारक्षा[17]स्तत्तु नारकमोक्षणम् । क्षणाद् गत्वा समाचख्युः सपूत्कारोर्ध्वबाहवः ॥१४९॥
क्रोधारुणाक्षः सद्योऽपि **यमो** यम इवाऽपरः । नगर्या निर्ययौ योद्धुं [18]युद्धनाटकसूत्रभृत् ॥१५०॥
सैन्याः सैन्यैः समं सेना[19]नीभिः सेनान्य आहवम् । चक्रु**र्यमः** पुनः क्रुद्धः क्रुद्धेन **दशमौलि**ना ॥१५१॥
[20]शराशरि चिरं कृत्वा **यमो**ऽधाविष्ट वेगतः । शुण्डादण्डमिव [21]व्यालो दण्डमुत्पाट्य दारुणम् ॥१५२॥
खण्डशः खण्डयामास [22]नालकाण्डमिवाऽथ तम् । [23]क्षुरप्रेण **दशग्रीवः** [24]क्लीबवद् गणयन् परान् ॥१५३॥
**यमः** [25]पृषत्कैर्भूयोऽपि च्छादयामास **रावणम्** । अवारयद् **रावण**स्ताँल्लोभः सर्वगुणानिव ॥१५४॥
युगपद् भूयसो बाणान् वर्षन्नथ **दशाननः** । **यमं** [26]जर्जरयाञ्चक्रे जरेव बलनाशकृत् ॥१५५॥
¶अथ प्रणश्य सङ्ग्रामाद्**यम**स्त्वरितमभ्यगात् । **रथनूपुर**नेतार**मिन्द्रं** विद्याधरेश्वरम् ॥१५६॥
**यमः शक्रं** नमस्कृत्य जगादेति कृताञ्जलिः । [27]जलाञ्जलिर्मयाऽदायि यमत्वाय प्रभोऽधुना ॥१५७॥
रुष्य वा तुष्य वा नाथ! करिष्ये यमतां हि न । उत्थितो हि **दशग्रीवो** यमस्याऽपि यमोऽधुना ॥१५८॥
वि[28]द्राव्य नरकारक्षान्नारकास्तेन मोचिताः । क्षत्रव्रतधनेनोच्चैर्जीवन्मुक्तोऽस्मि चाऽऽ[29]हवात् ॥१५९॥
जि[30]त्वा **वैश्रवणं** तेन **लङ्का**ऽपि जगृहे युधि । तद्विमानं **पुष्पकं** च जितश्च [31]**सुरसुन्दरः** ॥१६०॥

---

१. ***न किञ्चिदूचे धनद०*** खंता.१-२, ला. हे. कां. ता. ॥ २. शिवं मोक्षं गमिष्यतीति ॥ ३. ***निरीहं धनदं ज्ञात्वा*** खंता.१-२, ला. कां.; ***ज्ञात्वा निरीहं धनदं*** हे. ता. ॥ ४. इच्छारहितम् ॥ ५. जयलक्ष्मीरेव लता, तस्याः पुष्पम् ॥ ६. अवतरतः ॥ ७. ***अथाग्रहस्त०*** खंता.१ ॥ ८. वाहनताम् ॥ ९. मदनद्या उत्पादकत्वेन गिरिसमम् ॥ १०. अनुकुर्वन् ॥ ११. बद्धम् ॥ १२. कारागृहे ॥ १३. ***क्षिप्तावृक्षरजादित्यरजौ सपदि*** खंता.१-२, ला. हे. कां. ता. ॥ १४. ***रुक्षरजाः*** मु. ॥ १५. ***त्वमलङ्घ्याज्ञस्तवैव*** मु. ॥ १६. युद्धलालसः ॥ १७. ***०स्तत्र*** ला. ॥ १८. युद्धनाटके सूत्रधारः ॥ १९. ***सेनाधिपैः*** मु. ॥ २०. बाणयुद्धम् ॥ २१. हस्ती ॥ २२. ***नलकाण्ड०*** ला. छा. पा., कमलदण्डम् ॥ २३. बाणविशेषेण ॥ २४. ***पशुवद्०*** ला. ॥ २५. बाणैः ॥ २६. ***जर्जरयामास*** ला. छा. पा. मो. ॥ २७. तिलाञ्जलिः ॥ २८. निर्वास्य ॥ २९. रणसङ्ग्रामात् ॥ ३०. ***निर्जित्य धनदम्*** खंता.१-२, ला. हे. कां. ता. ॥ ३१. अमरसुन्दरः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रुद्धोऽथ **शक्रो** युद्धेच्छुर्निषिद्धः कुलमन्त्रिभिः । तैस्तैरुपायैर्बलिना सह विग्रहभीरुभिः ॥१६१॥
**यमाय सुरसङ्गीतं** पुरमिन्द्रोऽथ दत्तवान् । स्वयं तथैव तस्थौ च विलसन् **रथनूपुरे** ॥१६२॥
इतश्चाऽऽ**दित्यरजसे किष्किन्धां** नगरीं ददौ । **दशास्य** [1]**ऋक्षरजसे** पुर**मृक्षपुरं** पुनः ॥१६३॥
जगाम तु स्वयं **लङ्का**म[2]लङ्कर्मीणविक्रमः । स्तूयमानो देवतेव बन्धुभिर्नागरैश्च सः ॥१६४॥
अमरेन्द्रोऽमरावत्यामिव तस्यामवस्थितः । **दशास्यः** प्रशशासाऽथ राज्यं पैतामहं महत् ॥१६५॥
¶इतश्चाऽऽ**दित्यरजसः** कपिराजस्य नन्दनः । महिष्या**मिन्दुमालिन्यां वाली** नामाऽभवद् बली ॥१६६॥
**जम्बूद्वीपं** समुद्रान्तं **वाली** बाहुबलो[3]ल्बणः । नित्यं प्रदक्षिणीकुर्वन् सर्वचैत्यान्यवन्दत ॥१६७॥
**सुग्रीव** इति चाऽन्योऽभूदा**दित्यरजसः** सुतः । कन्या कनीयसी तस्य [4]**श्रीप्रभे**ति च नामतः ॥१६८॥
अभूता**मृक्षरजसो**ऽप्युभौ भुवनविश्रुतौ । भार्यायां **हरिकान्तायां नल-नीला**भिधौ सुतौ ॥१६९॥
नरेन्द्र **आदित्यरजा वालि**ने बलशालिने । दत्वा राज्यं प्रवव्राज तपस्तप्त्वा ययौ शिवम् ॥१७०॥
सम्यग्दृष्टिं न्यायवन्तं दयावन्तं महौजसम् । स्वानुरूपं यौवराज्ये **सुग्रीवं वाल्य**पि न्यधात् ॥१७१॥
¶अन्यदा तु **दशग्रीव**श्चैत्यवन्दनहेतवे । सकलत्रो गजारूढः प्रययौ **मेरु**पर्वते ॥१७२॥
अत्रान्तरे **चन्द्रणखा**मपश्यत् **खर**खेचरः । जातरागो जातरागां जह्रे **मेघप्रभात्मजः** ॥१७३॥
ययौ **पातालल**ङ्कां च तत्र **चन्द्रोदरं** नृपम् । **आदित्यरजसः** सूनुं [5]निर्वा[6]स्याऽऽदत्त तां स्वयम् ॥१७४॥
क्षणेनाऽप्याययौ **मेरोर्लङ्का**यां **दशकन्धरः** । आकर्ण्य तच्च**न्द्रणखा**हरणं प्रचुकोप च ॥१७५॥
**खर**खेचरघाताय चचालाऽथ **दशाननः** । पञ्चानन इव क्रुद्धो [7]गजाखेटककर्मणे ॥१७६॥
अथ **मन्दोदरी** देवी निजगादेति **रावणम्** । [8]संरम्भः कोऽयमस्थाने मनाग् विमृश मानद! ॥१७७॥
कन्या ह्यवश्यं कस्मैचिद् दातव्या [9]यदि सा स्वयम् । वरं वृणीते रुचितमभि[10]जातं च साधु तत् ॥१७८॥
अनुरूपो वरश्च**न्द्रणखाया दूषणा**ग्रजः । [11]अदूषणश्च ते पत्तिर्भविष्यत्येष विक्रमी ॥१७९॥
प्रेष्य प्रधानपुरुषांस्तदुद्वाहय तं तया । अस्मै **पातालल**ङ्कां च देहि धेहि प्रसन्नताम् ॥१८०॥
एवं सोऽ[12]वरजाभ्यामप्युक्तो युक्तविचारकृत् । प्रस्थाप्य **मय-मारीचौ** तेन तां पर्यणाययत् ॥१८१॥
ततः **पाताललङ्कायां** स **चन्द्रणख**या समम् । निर्विघ्नं बुभुजे भोगान् दधद् **रावण**शासनम् ॥१८२॥
[13]निर्वासिते तदा तेन [14]काला**च्चन्द्रोदरे** [15]मृते । **अनुराधे**ति तत्पत्नी नंष्ट्वाऽगाद् गर्भिणी वने ॥१८३॥
साऽसूत च वने तस्मिन् सिंही सिंहमिवोल्बणम् । **विराधं** नाम तनयं नयादिगुणभाजनम् ॥१८४॥
[16]स प्राप्तयौवनः सर्वकलाजलधिपारगः । [17]अस्खलत्प्रसरः पृथ्वीं विजहार महाभुजः ॥१८५॥
¶इतः कथाप्रसङ्गेन सभायां **रावणो**ऽशृणोत् । प्रौढप्रतापं बलिनं **वालिनं** वानरेश्वरम् ॥१८६॥
**रावणो**ऽन्यप्रतापस्याऽसहनो भानुमानिव । [18]प्रजिघायाऽ[19]नुशिष्यैकं दूतं **वालि**महीभुजे ॥१८७॥
स गत्वा **वालिनं** नत्वा व्याजहारेति धीरवाक् । दूतोऽहं **दशकण्ठ**स्य राजंस्तद्[20]वाचिकं शृणु ॥१८८॥
अस्माकं पूर्वजं **कीर्तिधवलं** पूर्वजस्तव । शरण्यं शरणायाऽगाच्छ्री**कण्ठो** वैरिवि[21]द्रुतः ॥१८९॥
त्रात्वाऽरिभ्यः [22]श्वशुर्यं तं तद्वियोगैककातरः । इहैव **वानरद्वीपे** श्री**कीर्तिधवलो** न्यधात् ॥१९०॥
तदादि चाऽऽवयोर्भर्तृ-भृत्यसम्बन्धतो मिथः । [23]भूयांसः क्ष्माभुजो जग्मुः पक्षयोरुभयोरपि ॥१९१॥
अथाऽभवत् क्षिति[24]पतिः **किष्किन्धिस्ते** पितामहः । **सुकेश** इत्यभिधया मम तु प्रपितामहः ॥१९२॥
तयोरपि हि [25]निर्व्यूढः स सम्बन्धस्तथैव हि । [26]ततो नृपः **सूर्यरजा**स्त्वदीयस्त्वभवत् पिता ॥१९३॥

१. ***रुक्षरजसे*** मु. ॥ २. अलं- समर्थः कर्मणे-कार्याय विक्रमो यस्य सः ॥ ३. उत्कटबाहुबलः ॥ ४. ***सुप्रभेति*** मु. ॥ ५. *हत्वा राज्यमुपाददे* खंता.१-२ ॥ ६. निराकृत्य ॥ ७. ***गजाखेटककर्मणा*** मो. हे.; गजमृगयाकर्मणे ॥ ८. क्रोधः ॥ ९. ***सा यदि*** ता. ॥ १०. कुलीनम् ॥ ११. निर्दोषः ॥ १२. अनुजाभ्याम् ॥ १३. ***हन्यमाने तदा तेन चन्द्रोदरनरेश्वरे*** खंता.१-२, हे. ॥ १४. ***बला०*** का. ॥ १५. ***नृपे*** का. ला.; तेन खरेण निर्वासिते चन्द्रोदरे कालान्मृते सतीत्यन्वयः ॥ १६. ***सम्प्राप्त०*** मु. ॥ १७. अकुण्ठितगमनः ॥ १८. प्रेषयामास ॥ १९. शिक्षयित्वा ॥ २०. सन्देशम् ॥ २१. वैरनिर्वासितः ॥ २२. श्यालकम्-श्वशुरपुत्रम् ॥ २३. ***जग्मुः षोडश भूपालाः*** खंता.१-२, ला. हे. कां. ॥ २४. ***सप्तदशः*** हे. कां. ॥ २५. निर्वाहितः ॥ २६. ***अष्टादशः सूर्य०*** खंता.१-२, ला. हे. कां. ता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]**यम**गुप्तेस्तमाकर्षं यथाऽहं वेत्ति तज्जनः । यथा च **किष्किन्धा**राज्ये [2]न्यधां तदपि विश्रुतम् ॥१९४॥
[3]नयवांस्तनयस्तस्य **वालिं** स्त्वमधुनाऽभवः । [4]प्राग्वत्स्वस्वामिसम्बन्धादस्मत्सेवां कुरुष्व तत् ॥१९५॥
क्रुद्धोऽप्यविकृताकारो[5]गर्ववह्निशमीतरुः । एवं गम्भीरगी**र्वाली** व्याजहार महामनाः ॥१९६॥
अन्योऽन्यं स्नेहसम्बन्धं जानामि कुलयोर्द्वयोः । रक्षो-वानरराजानामद्य यावदखण्डितम् ॥१९७॥
सम्पद्यापदि चाऽन्योऽन्यं [6]पूर्वे साहायकं व्यधुः । स्नेहो नि[7]बन्धनं तत्र सेव्य-सेवकता तु न ॥१९८॥
देवं सर्वज्ञमर्हन्तं साधुं च सुगुरुं विना । से[8]व्यमन्यं न जानीमो मोहः कः स्वामिनस्तव ? ॥१९९॥
मन्यमानेन सेव्यं स्वमस्मानपि च सेवकान् । कुलक्रमागतः स्नेहगुणस्तेनाऽद्य खण्डितः ॥२००॥
तस्य मित्रकुलोत्पत्तेर्निजां शक्तिमजानतः । न करोमि स्वयं किञ्चिदपवादैककातरः ॥२०१॥
[9]विप्रियं कुर्वतस्तस्य [10]करिष्यामि [11]प्रतिक्रियाम् । [12]अग्रेगूर्न भविष्यामि पूर्वस्नेहद्रुकर्तने ॥२०२॥
यथाशक्ति तव स्वामी स करोतु [14]व्रजाऽरेरे! । **वालि**नैवं विसृष्टः स गत्वाऽऽख्यद् **दशमौ**लये ॥२०३॥
तद्विरोद्दीपितक्रोधपावकोऽथ **दशाननः** । ससैन्यो[15]ऽप्युद्धुरस्कन्धः **किष्किन्धा**माययौ द्रुतम् ॥२०४॥
सन्नह्य **वालि**राजोऽपि राजमानो भुजौजसा । तमभ्यगाद् दोष्मतां हि प्रियो युद्धातिथिः खलु ॥२०५॥
[16]ततः प्रववृते युद्धमुभयोरपि सैन्ययोः । [17]गण्डशैलागण्डशैलि द्रुमाद्रुमि गदागदि ॥२०६॥
तत्राऽचूर्यन्त [18]शतशो भृष्ट[19]पर्पटवद् रथाः । मृत्पिण्डवदभिद्यन्त महान्तोऽपि मतङ्गजाः ॥२०७॥
कूष्माण्डवदखण्ड्यन्त स्थाने स्थाने तुरङ्गमाः । [20]चञ्चापुरुषवद् भूमावपात्यन्त च पत्तयः ॥२०८॥
तं प्रेक्ष्य प्राणिसंहारं [21]सानुक्रोशः [22]प्लवङ्गराट् । [23]वीरः सत्वरमभ्येत्य जगादेति **दशाननम्** ॥२०९॥
युज्यते न वधः प्राणिमात्रस्याऽपि विवेकिनाम् । पञ्चेन्द्रियाणां हस्त्यादिजीवानां बत का कथा? ॥२१०॥
द्विषज्जयाय यद्येष[24] तथाऽप्यर्हो न दोष्मताम् । दोष्मन्तो हि निजैरेव दोर्भिर्विजयकाङ्क्षिणः ॥२११॥
त्वं दोष्मान् श्रावकश्चा[25]ऽसि सैन्ययुद्धं विमुञ्च तत् । अनेकप्राणिसंहाराच्चिराय नरकाय यत् ॥२१२॥
एवं सम्बोधितस्तेन **दशास्यो**ऽपि हि धर्मवित् । अङ्गेन योद्धुमारेभे सर्वयुद्धविशारदः ॥२१३॥
[26]यद्यदस्त्रं **दशग्रीवो**ऽक्षिपत् तत्तत् कपीश्वरः । स्वास्त्रैः [27]प्रतिजघानोच्चैर्वह्नितेज इवाऽर्यमा ॥२१४॥
सार्प-वारुणमुख्यानि मन्त्रास्त्राण्यपि **रावणः** । मुमोच तानि [28]तार्क्ष्याद्यैरस्त्रै**र्वाली** जघान च ॥२१५॥
शस्त्र-मन्त्रास्त्रवैफल्यक्रुद्धो **दशमुख**स्ततः । चकर्ष **चन्द्रहासा**सिं महाहिमिव दारुणम् ॥२१६॥
एकशृङ्गो गिरिरिवैकदन्त इव कुञ्जरः । उच्**चन्द्रहासो**ऽधाविष्ट **वालि**ने **दशकन्धरः** ॥२१७॥
**सचन्द्रहासं लङ्के**शं सशाखमिव शाखिनम् । वामेन बाहुना **वाली** लीलयैव समाददे ॥२१८॥
तं कन्दुकमिव [29]न्यस्याऽविहस्तो हस्तकोटरे । चतुःसमुद्रीं बभ्राम क्षणेनाऽपि कपीश्वरः ॥२१९॥
तदानीमेव तत्रैत्य त्रपावनतकन्धरम् । **दशकन्धर**मुज्झित्वा **वालि**राजोऽब्रवीदिति ॥२२०॥
वीतरागं सर्वविदमाप्तं त्रैलोक्यपूजितम् । विनाऽर्हन्तं न मे कश्चिन्नमस्योऽस्ति कदाचन ॥२२१॥
अङ्गोत्थितं द्विषन्तं तं धिङ् मानं येन मोहितः । इमामवस्थां प्राप्तोऽसि मत्प्रणामकुतूहली ॥२२२॥
पूर्वोपकारान् स्मरता मया मुक्तोऽसि सम्प्रति । दत्तं च पृथिवीराज्यमखण्डाज्ञः प्रशाधि तत् ॥२२३॥
[30]विजिगीषौ मयि सति तवेयं पृथिवी कुतः? । क्व हस्तिनामवस्थानं वने सिंहनिषेविते ? ॥२२४॥
तदादास्ये परिव्रज्यां शिवसाम्राज्यकारणम् । **किष्किन्धायां** तु **सुग्रीवो** राजाऽस्त्वाज्ञाधरस्तव ॥२२५॥

१. यमस्य बन्धनात् ॥ २. स्थापितवान् ॥ ३. *एकोनविंशतितमो०* खंता.१-२, ला. ता. हे. कां. ॥ ४. पूर्ववत् सेव्य-सेवकसम्बन्धात् ॥ ५. गर्व एव वह्निः, तस्य स्वोदरे-स्वमनसि शमीवृक्ष इव रक्षक इत्यर्थः ॥ ६. पूर्वजाः ॥ ७. कारणम् ॥ ८. *सेव्यमानं* पाता. ॥ ९. *प्रथमं०* खंता.१-२, ता. ॥ १०. *करिष्येऽथ* पाता. ॥ ११. प्रतिकारम् ॥ १२. अग्रेसरः ॥ १३. पूर्वस्नेह एव वृक्षस्तस्य च्छेदने ॥ १४. 'अरे' इति क्षुद्रसम्बोधनेऽव्ययम् ॥ १५. *ससैन्य उद्धुर०* मु.; दृढस्कन्धः ॥ १६. *अथ* ता. ॥ १७. गण्डशैलैः गण्डशैलैः मिथः प्रहृत्य कृतं युद्धम्; गण्डशैलाः पर्वतीयशिलाखण्डाः ॥ १८. *तिलशो०* ता. ॥ १९. अग्निना भृष्टा ये पर्पटाः (पापड) तद्वत्; *भ्रष्टपर्पट०* मु. ॥ २०. तृणमयः पुमान्, भाषायां 'चाडियो' इति, तद्वत् ॥ २१. सकरुणः ॥ २२. वानरराजः ॥ २३. *धीरः* खंता.१ ॥ २४. एष प्राणिवधः ॥ २५. *श्रावकश्चाऽपि* ला. ॥ २६. *यद्यच्छस्त्रं* पाता. ॥ २७. *प्रतिजिघानोग्रैर्वह्नि०* मो. ॥ २८. गारुडाद्यैरस्त्रैः ॥ २९. अन्याकुलः स तं रावणं हस्तकोटरे-कक्षायां निक्षिप्य ॥ ३०. विजेतुमिच्छति मयि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमुक्त्वा निजे राज्ये **सुग्रीवं** न्यस्य तत्क्षणात्। स्वयं **गगनचन्द्रर्षि**पादमूलेऽग्रहीद् व्रतम् ॥२२६॥

विविधाभिग्रह[1]तपस्तत्परः प्रतिमाधरः। ध्यानवान् निर्ममो [2]**वाली** मुनिर्व्य[3]हरताऽवनौ ॥२२७॥

**वालि**भट्टारकस्याऽथोत्पेदिरे लब्धयः क्रमात्। सम्पदः पादपस्येव पुष्प-पत्र-फलादयः ॥२२८॥

**अष्टापदाद्रौ** गत्वा च कायोत्सर्गमदत्त सः। लम्बमानभुजो बद्धदो[4]लादण्ड इव द्रुमः ॥२२९॥

कायोत्सर्गं समुत्सृज्य मासान्ते पारणं व्यधात्। [5]उत्सर्गपारणान्येवं भूयो भूयश्चकार सः ॥२३०॥

¶इतश्च **दशकण्ठाय सुग्रीवः श्रीप्रभां** ददौ। संशुष्यत्प्राक्तनस्नेहतरोः [6]सारणिसन्निभाम् ॥२३१॥

यौवराज्ये तु **सुग्रीवो वालि**पुत्रं महौजसम्। चन्द्ररश्म्युज्ज्वलयशा**श्चन्द्ररश्मिं** न्यवीविशत् ॥२३२॥

[7]**सुग्रीव**प्रतिपन्नाज्ञः **श्रीप्रभां** तत्सहोदराम्। उपयम्य गृहीत्वा च ययौ **लङ्कां दशाननः** ॥२३३॥

विद्याधरनरेन्द्राणामन्येषामपि कन्यकाः। उपयेमे रूपवतीर्बलादपि हि **रावणः** ॥२३४॥

**नित्यालोकपुरे नित्यालोक**विद्याधरेशितुः। कन्यां **रत्नावलीं** [8]नाम्नाऽन्यदोद्वोढुं चचाल सः ॥२३५॥

**अष्टापदा**द्रेरुपरि गच्छतस्तस्य **पुष्पकम्**। विमानं स्खलितं सद्यो वप्रो बलमिव द्विषाम् ॥२३६॥

[9]न्यग्राङ्गरं महापोतमिव बद्धमिव द्विपम्। विमानं रुद्धगतिकं प्रेक्ष्याऽकुप्यद् **दशाननः** ॥२३७॥

को मद्विमानस्खलनाद् विवि[10]क्षति यमाननम् ?। एवं वदन् समुत्तीर्य सोऽद्रिमूर्धानमैक्षत ॥२३८॥

अधस्तात् स विमानस्य ददर्श प्रतिमास्थितम्। **वालिनं** तस्य शैलस्य नवं शृङ्गमिवोत्थितम् ॥२३९॥

ऊचे च **रावणः** क्रुद्धो विरुद्धोऽद्याऽपि मय्यसि। व्रतं वहसि दम्भेन जगदेतद् दि[11]दम्भिषुः ॥२४०॥

कयाऽपि माययाऽग्रेऽपि मां [12]वाहीक इवाऽवहः। प्राव्राजीः [13]शङ्कमानोऽस्मत्कृतप्रतिकृतं खलु ॥२४१॥

नन्वद्याऽपि स एवाऽस्मि त एव मम बाहवः। कृतप्रतिकृतं तत् ते प्राप्तकालं करोम्यहम् ॥२४२॥

**सचन्द्रहासं** [14]मामूद्वा यथाऽभ्राम्यस्त्वमब्धिषु। तथा त्वां साद्रिमुत्पाट्य क्षेप्स्यामि **लवणार्णवे** ॥२४३॥

एवमुक्त्वा विदार्य क्ष्मा**मष्टापदगिरे**स्तले। प्रविवेश **दशग्रीव**श्च्युतो दिव इवाऽशनिः ॥२४४॥

विद्यासहस्रं स्मृत्वा च युगपद् **दशकन्धरः**। [15]धरं दुर्धरमुद्दध्रे तं दोर्बलमदोद्धुरः ॥२४५॥

[16]तडत्तडितिनिर्घोषवित्रस्तव्यन्तरामरम्। [17]झलज्झलितिलोलाब्धिपूर्यमाणरसातलम् ॥२४६॥

[18]खडत्खडितिबिभ्रश्यद्ग्रावक्षुण्णवनद्विपम्। [19]कडत्कडितिनिर्भग्ननितम्बोपवनद्रुमम् ॥२४७॥

गिरिं तेनोद्धृतं ज्ञात्वाऽवधिना स महामुनिः। अनेकलब्धिनद्यब्धिरिति दध्यौ विशुद्धधीः ॥२४८॥त्रिभिर्विशेषकम्॥

आः! कथं मयि मात्सर्यादयमद्याऽपि दुर्मतिः। अनेकप्राणिसंहारमकाण्डे तनुतेतराम् ? ॥२४९॥

**भरतेश्वर**चैत्यं च भ्रं[20]शयित्वैष सम्प्रति। यतते तीर्थमुच्छेत्तुं **भरतक्षेत्र**भूषणम् ॥२५०॥

अहं च त्यक्तसङ्गोऽस्मि स्वशरीरेऽपि निःस्पृहः। राग-द्वेषविनिर्मुक्तो निमग्नः [21]साम्यवारिणि ॥२५१॥

तथाऽपि चैत्यत्राणाय प्राणिनां रक्षणाय च। राग-द्वेषौ विनैवैनं शिक्षयामि मनागहम् ॥२५२॥

एवं विमृश्य भगवान् पादाङ्गुष्ठेन लीलया। **अष्टापदाद्रे**र्मूर्धानं **वाली** किञ्चिदपीडयत् ॥२५३॥

मध्याह्नदे[22]हच्छायावत् पयोबाह्यस्थकूर्मवत्। अभितः सङ्कुचद्गात्रो **दशास्य**स्तत्क्षणादभूत् ॥२५४॥

अतिभङ्गुरदोर्दण्डो मुखेन रुधिरं वमन्। अरावीद् रावयन्नुर्वी **रावण**स्तेन सोऽभवत् ॥२५५॥

तस्य चाऽऽरटनं दीनं श्रुत्वा **वाली** कृपापरः। तं मुमोचाऽऽशु तत्कर्म शिक्षामात्राय न क्रुधा ॥२५६॥

निःसृत्य **दशकण्ठो**ऽथ निःप्रतापोऽ[23]नुतापवान्। उपेत्य **वालिनं** नत्वा व्याजहारेत्युदञ्जलिः ॥[24]२५७॥

---

१. ०*विविधाभिग्रहस्तप*० मु. ॥ २. *वालिमुनिर्व्या*० रसंपा. ॥ ३. ०*र्व्याहरता*० मु. ॥ ४. 'हींचको' ॥ ५. कायोत्सर्ग-पारणानि ॥ ६. 'नीक' ॥ ७. सुग्रीवेण प्रतिपन्ना आज्ञा यस्य सः ॥ ८. *नाम्ना तदो*० मु. ॥ ९. 'नांगरेल वहाण' ॥ १०. प्रवेष्टुमिच्छति ॥ ११. वञ्चयितुमिच्छुः ॥ १२. भारवाहकः ॥ १३. ***शङ्कमानोऽस्मत्कृते*** हे. मो.; अस्माकं कृतस्य प्रतिक्रियाम् ॥ १४. ***मां बद्ध्वा*** हे. मो. ॥ १५. पर्वतम् ॥ १६. ***तडत्तडितिनिर्घोषं वि*०** मु. ॥ १७. झलत् झलत् इति शब्दं कुर्वाणेन लोलेन अब्धिना पूर्यमाणं रसातलं येन तम् ॥ १८. खडत् खडत् इति शब्देन पतद्भिः अश्मभिः क्षुण्णा वनगजा यस्मिन् तम् ॥ १९. कडत् कडत् इति शब्दं कुर्वन्तो निर्मग्ना नितम्बोपवनानां द्रुमा यस्य तम् ॥ २०. ***भञ्जयित्वैष*** ता. ॥ २१. समताजले ॥ २२. ***मध्याह्नदेहच्छायेव*** ता. ॥ २३. अनुतापः पश्चात्तापस्तद्वान् ॥ २४. २५७तमश्लोकादनन्तरं हे.सञ्ज्ञकप्रतौ श्लोकोऽयमधिको दृश्यते–

" स्वशक्तिं ये न जानन्ति ये चाऽन्यायं प्रकुर्वते। जीयन्ते ये च लोभेन, तेषामस्मि धुरन्धरः ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूयो भूयोऽपराधानां कर्ताऽहं त्वयि [1]निस्त्रपः । [2]उत्कृपस्त्वं च सोढाऽसि महात्मन्! शक्तिमानपि ॥२५८॥
मन्ये मयि कृपां कुर्वन्नुर्वीं प्रागत्यजः प्रभो! । न त्वसामर्थ्यतस्तत्तु नाऽज्ञासिषमहं पुरा ॥२५९॥
अज्ञानान्नाथ! तेनेयं स्वशक्तिस्तोलिता मया । अद्रि[3]पर्यसने यत्नं कलभेनेव कुर्वता ॥२६०॥
ज्ञातमन्तर[4]मद्येदं भवतश्चाऽऽत्मनोऽपि च । शैल-वल्मीकयोर्यादृग् यादृग् [5]गरुड-भासयोः ॥२६१॥
दत्ताः प्राणास्त्वया स्वामिन्! भृत्यकोटिं गतस्य मे । अपकारिणि यस्येयं मतिस्तस्मै नमोऽस्तु ते ॥२६२॥
[6]दृढभक्त्येति भाषित्वा क्षमयित्वा च **वालि**नम् । त्रिश्च प्रदक्षिणीकृत्य नमश्चक्रे **दशाननः** ॥२६३॥
तादृङ्माहात्म्यमुदिताः साधु साध्विति भाषिणः । उपरिष्टाद् **वालि**मुनेः पुष्पवृष्टिं व्यधुः सुराः ॥२६४॥
¶प्रणम्य **वालिनं** भूयस्तच्छैलमुकुटोपमे । जगाम **रावण**श्चैत्ये **भरतेश्वर**निर्मिते ॥२६५॥
**चन्द्रहासा**दिशस्त्राणि मुक्त्वा सान्तःपुरः स्वयम् । अर्हता**मृषभा**दीनां पूजां सोऽष्टविधां व्यधात् ॥२६६॥
समाकृष्य [7]स्नसां तन्त्रीं प्रमृज्य च **दशाननः** । महासाहसिको भक्त्या भुजवीणमवादयत् ॥२६७॥
[8]उपवीणयति ग्रामरागरम्यं **दशानने** । गायत्यन्तःपुरे चाऽस्य सप्तस्वरमनोरमम् ॥२६८॥
चैत्यवन्दनयात्रायै **धरणः** पन्नगेश्वरः । तत्राऽऽययावर्हतश्च पूजापूर्वमवन्दत ॥२६९॥युग्मम्॥
अर्हद्गुणमयैर्गीतैः करण-ध्रुव[9]कादिभिः । गायन्तं वीणया प्रेक्ष्य **रावणं धरणो**ऽब्रवीत् ॥२७०॥
अर्हद्गुणस्तुतिमयं साधुगीतमिदं ननु । निजभावानुरूपं ते तेन तुष्टोऽस्मि **रावण!** ॥२७१॥
अर्हद्गुणस्तुतेर्मुख्यं फलं मोक्षस्तथाऽप्यहम् । [10]अजीर्णवासनस्तुभ्यं किं यच्छामि वृणीष्व भोः! ॥२७२॥
**रावणो**ऽप्यभ्यधादेवं देवदेवगुणस्तवैः । युक्तं तुष्टोऽसि नागेन्द्र! स्वामिभक्तिर्हि सा तव ॥२७३॥
यथा तव ददानस्य स्वामिभक्तिः प्रकृष्यते । तथा ममाऽऽददानस्य सा काममपकृष्यते ॥२७४॥
भूयोऽप्युवाच नागेन्द्रः साधु मानद! **रावण!** । विशेषतोऽस्मि तुष्टस्ते निराकाङ्क्षतयाऽनया ॥२७५॥
उक्त्वेत्य**मोघविजयां** शक्तिं **रूपविकारिणीम्** । सोऽदाद् विद्यां **रावणाय** [11]जगाम च निजाश्रयम् ॥२७६॥
तीर्थनाथान्नमस्कृत्य **नि[12]त्यालोकपुरे**ऽगमत् । व्यूह्य **रत्नावलीं लङ्का**माजगाम **दशाननः** ॥[13]२७७॥
**वालि**नोऽपि तदोत्पेदे केवलज्ञानमुज्ज्वलम् । केवलज्ञानमहिमा विदधे च सुरासुरैः ॥२७८॥
क्रमेण कर्मणां सोऽथ भवोप[14]ग्राहिणां क्षयात् । सिद्धानन्तचतुष्कोऽगात् पदं तदपुनर्भवम् ॥२७९॥
¶इतश्च **वैताढ्य**गिरौ पुरे **ज्योतिःपुरा**भिधे । बभूव नाम्ना **ज्वलनशिखो** विद्याधरेश्वरः ॥२८०॥
तस्याऽभूच्छ्**रीमती** देवी श्रीमती रूपसम्पदा । तस्यां च दुहिता जज्ञे **तारा** [15]तारविलोचना ॥२८१॥
तामेकदा तु **चक्राङ्क**विद्याधरनृपात्मजः । ददर्श **साहसगतिः** स्मरार्तः सहसाऽप्यभूत् ॥२८२॥
**ज्वलनं** याचयाञ्चक्रे तां **साहसगति**र्नरैः । वानरेन्द्रश्च **सुग्रीवो** रत्ने हि बहवोऽर्थिनः ॥२८३॥
[16]द्वावप्येतावभिजातौ रूपवन्तौ महौजसौ । तत् कस्मै दी[17]यतां कन्येत्यपृच्छज्ज्ञानिनं पिता ॥२८४॥
अल्पायुः **साहसगति**र्दीर्घायुश्च कपीश्वरः । इति नैमित्तिकेनोक्ते **सुग्रीवा**य ददौ [18]स तां ॥२८५॥
[19]अभिलाषविप्रलम्भात् **साहसो**ऽपि दिने दिने । अङ्गारचुम्बित इ[20]व न प्राप क्वाऽपि निर्वृतिम् ॥२८६॥
**तारा**यां रममाणस्य **सुग्रीव**स्य बभूवतुः । द्वाव**ङ्गद-जयानन्दा**वङ्गजौ दिग्गजोर्जितौ ॥२८७॥
स चाऽपि **साहसगतिस्तारा**यामनुरागवान् । मन्मथोन्मथ्यमानात्मा चिन्तयामासिवानिदम् ॥२८८॥
चुम्बिष्यामि कदा तस्या मृगशावकचक्षुषः । पक्वबिम्बाधरदलच्छदनं वदनाम्बुजम् ? ॥२८९॥

---

१. निर्लज्जः ॥ २. अधिकदयावान् ॥ ३. पर्वतनाशने ॥ ४. *०मद्यैवं* पाता. ॥ ५. ***गरुड-नागयोः*** ला. कां.; ***गरुड-काकयोः*** मो. ता.; भासः गृध्रपक्षी ॥ ६. ***दृढा भक्तीति*** खंता.१-२, पाता. हे. कां. छा. ता. पा. ला. ॥ ७. ***स्नसातन्त्री*** खंता.१-२, पाता. ला. ॥ ८. वीणां वादयति सति ॥ ९. करणं ध्रुवकः(ध्रुवका वा) सङ्गीतशास्त्रस्य प्रसिद्धौ क्रिया-गानप्रकारविशेषौ ॥ १०. न क्षीणा वासना यस्य सः ॥ ११. ***ग्रहीतृत्वत्रपाजुषे*** ता. हे. खंता.१-२ ॥ १२. ***चतुर्विंशतिमप्यथ । नगरीं जग्मतुः स्वां स्वां, नागराज-दशाननौ ॥*** खंता.१-२ ॥ १३. २७७तमश्लोकादनन्तरं हे.प्रतावधिकः श्लोको यथा-
"***परिणयित्वा स कन्या-चतुर्विंशतिमप्यथ । नगरीं जग्मतुः स्वां स्वां नागराज-दशाननौ ॥***" १४.नाम-गोत्र-वेदनीया-ऽऽयुषाम् ॥ १५. दीर्घलोचना ॥ १६. ***अभिजातौ द्वावपीमौ*** मु. ॥ १७. ***दीयते कन्या पप्रच्छ*** मु. खंता.१-२, पाता. ला. ॥ १८. ***सुताम्*** पाता. ॥ १९. अभिलाषविरहात् ॥ २०. अङ्गारेण दग्धः ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

कदा स्प्रक्ष्याम्यहं तस्याः कुचकुम्भौ [१]स्वपाणिना ? । कदा च तौ करिष्यामि गाढालिङ्गनवामनौ ? ।।२९०।।

बलेनाऽपि च्छलेनाऽपि तां हर्ताऽस्मीति चिन्तयन् । सस्मार **शेमुषीं** विद्यां रूपस्य परिवर्तिनीम् ।।२९१।।

गत्वा च **क्षुद्रहिमवद्गिरौ** स्थित्वा गुहान्तरे । तां साधयितुमारेभे **चक्राङ्क**नृपनन्दनः ।।२९२।।

¶इतश्च पुर्या **लङ्कायां** दिग्यात्रायै **दशाननः** । विकर्तनः[२] पूर्वशैलतटादिव विनिर्ययौ ।।२९३।।

विद्याधरनरेन्द्रांश्च द्वीपान्तरनिवासिनः । वशीकृत्य स **पाताललङ्कां** नाम पुरीं ययौ ।।२९४।।

तत्र **चन्द्रणखाभर्त्रा खरेणा**ऽ[३]खरभाषिणा । प्राभृतैर्भृतके[४]नेव निभृतं सोऽभ्यपूज्यत ।।२९५।।

**रावणे**न सहाऽचालीत् **खर इन्द्रं**[५] जिगीषता । विद्याधराणां सहस्रैश्चतुर्दशभिरावृतः ।।२९६।।

[६]तत्र **सुग्रीव**राजोऽपि रक्षोराजस्य दोष्मतः । अन्वचालीत् ससैन्योऽपि वायोरिव विभावसुः[७] ।।२९७।।

अनेकपृतना[८]च्छन्नरोदसीको **दशाननः** । पयोराशिरिवोद्भ्रान्तः[९] प्रययावस्खलद्गतिः ।।२९८।।

[१०]कूजन्मरालमालाभिराबद्धरसनामिव । पुलिनोर्व्या विपुलया नितम्बेनेव शोभिताम् ।।२९९।।

अलकानिव बिभ्राणां तरङ्गैरतिभङ्गुरैः । कटाक्षानिव मुञ्चन्तीं शफरोद्वर्तनै[११]र्मुहुः ।।३००।।

कामिनीमिव चतुरां **रेवां** नाम तरङ्गिणीम् । **विन्ध्य**शैलादुत्तरन्तीं ददर्शाऽथ **दशाननः** ।।३०१।।त्रिभिर्विशेषकम्।।

रोधस्यु[१२]वास **रेवायाः** ससैन्यो **दशकन्धरः** । सिन्धुरग्रामणी[१३]र्यूथसमावृत इवोद्धुरः ।।३०२।।

सोऽथ तस्यां कृतस्नानो वसानो धौतवाससी । अर्हद्बिम्बं रत्नमयं न्यस्य पट्टे मणीमये ।।३०३।।

**रेवा**म्भोभिः स्नपयित्वा तदम्भोजैर्विकासिभिः । समारेभे पूजयितुं समाधिसुदृढासनः ।।३०४।।युग्मम्।।

ततश्च पूजाव्यग्रस्य **दशग्रीवस्य** तस्थुषः । अकस्मादब्धिवेलेव[१४] महापूरः समाययौ ।।३०५।।

उन्मूलयन्मूलतोऽपि गुल्मानिव[१५] महीरुहान् । तटीनामुन्नतानामप्युपरि प्रासरत् पयः ।।३०६।।

आस्फोटयंस्तटी[१६]घातैस्तरी[१७]स्तटनियन्त्रिताः । विष्वक्शुक्ति[१८]पुटानीवाऽभ्रंलिहा वीचिपङ्क्तयः ।।३०७।।

रोधोगर्तान् महतोऽपि पातालकुहरोपमान् । स पूरः पूरयामास भक्ष्यं[१९] कुक्षिम्भरीनिव ।।३०८।।[त्रिभिर्विशेषकम्]

समन्तादन्तरीपाणि[२०] स्थगयामास[२१] सा नदी । ज्योतिश्चक्रविमानानि चन्द्रज्योत्स्नेव पार्वणी ।।३०९।।

[२२]मत्स्यानुच्छालयामास प्रोच्छलद्भिर्महोर्मिभिः । पूरो महावात इव वेगावर्त्तै[२३]र्द्रुपल्लवान्[२४] ।।३१०।।

[२५]तत्फेनिलं सावकरं[२६] पूरवारि रयागतम् । अर्हत्पूजामपानैषीद् **दशकण्ठस्य** कुर्वतः ।।३११।।

तेन पूजापहारेण शिरश्छेदाधिकेन सः । जातकोपो **दशग्रीवः** साक्षेपमिदमभ्यधात् ।।३१२।।

अरे रे! केन वारीदं दुर्वारमतिवेगतः । अर्हत्पूजान्तरायायाऽमुच्यताऽकारणारिणा[२७] ।।३१३।।

[२८]परस्तादस्ति किं कोऽपि मिथ्यादृष्टिर्नराधिपः[२९]? । किं वा विद्याधरः? कश्चिदसुरो वा सुरोऽथवा ? ।।३१४।।

¶अथ विद्याधरः कश्चिदाचख्यौ **दशमौलये** । इतः पुरस्तादस्त्युच्चैर्देव[३०]! **माहिष्मती** पुरी ।।३१५।।

तस्यां नाम्ना **सहस्रांशुः** सहस्रांशुरिवाऽपरः । सहस्रशो नृपैः सेव्यः पार्थिवोऽस्ति महाभुजः ।।३१६।।

सेतुबन्धेन **रेवायां** वारिबन्धं व्यधादसौ । जलक्रीडोत्सवकृते किमसाध्यं महौजसाम् ? ।।३१७।।

समं राज्ञीसहस्रेण **सहस्रांशु**रसावितः । वशाभि[३१]र्वरदन्तीव सुखं क्रीडति वारिभिः ।।३१८।।

आत्मरक्षा लक्षसङ्ख्या द्वयोरपि हि तीरयोः । संवर्मिता[३२] उदस्त्राश्च तिष्ठन्त्यस्य हरेरिव[३३] ।।३१९।।

अदृष्टपूर्वोऽवष्टम्भः[३४] कोऽप्यस्याऽप्रतिमौजसः । शोभामात्रं यथा तेऽपि यदि वा कर्मसाक्षिणः ।।३२०।।

क्षुभितं जलदेवीभिर्यादोभिश्च पलायितम् । जलक्रीडाकराघातैरूर्जितैस्तस्य दोष्मतः ।।३२१।।

---

१. *निजैः करैः* ता. ।। २. सूर्यः ।। ३. मृदुभाषिणा ।। ४.भृत्येन ।। ५. *इन्द्रजिगीषया* खंता.१-२, पाता. मु. ।। ६. *ततः* मु. ।।७. अग्निः ।। ८. पृतना-सेना, रोदसी--आकाश-पृथिव्यौ ।। ९. क्षुब्धः ।। १०. *कूजन्मराली०* ला.; कूजन्तो ये मरालाः -हंसास्तेषां मालास्ताभिः परिहितमेखलाम् ।। ११. मत्स्यभ्रमणैः ।। १२. तीरे ।। १३. गजनायकः ।। १४. समुद्रोर्मिरिव ।। १५. तृणगुच्छान् , वृक्षान् ।। १६. *०तटाघातै०* मु. कां. खंता.१-२, पाता. ला. ।। १७. नावः ।। १८. शुक्तिः - 'छीप' ।। १९.*भक्ष्यैः* खंता.१-२, ला. ता. ।। २०. द्वीपान् ।। २१. छादयामास ।। २२. *मत्स्यानुच्छादया०* मु. ।। २३. *वेगवान् द्रुमपल्लवान्* मु. ।। २४. वृक्षपत्राणि ।। २५. *ततोऽतिफेनिलं सावकरं वारि रयागतम्* ला. ।। २६. सपङ्कम् ।। २७. अकारणशत्रुणा ।। २८. *पुरस्तादस्ति* खंता.१, ला. मो. ता. ।। २९. *०र्नराधमः* ला. रसंपा. ।। ३०. *परस्तादस्त्यु०* हे. ला. ।। ३१. हस्तिनीभिः ।। ३२. कवचधारिणः ऊर्ध्वशस्त्राश्च ।। ३३. शक्रस्य ।। ३४. मानः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदमत्यन्तरुद्धत्वात् स्त्रीसहस्रयुतेन च । तेन [१]पर्यस्यमाणत्वात् [२]काममुल्लुठितं पय: ॥३२२॥

रोधसी प्लावयित्वोभे वेगाद् वारीदमुद्धतम् । इह ते प्लावयामास देवपूजां **दशानन:** ॥३२३॥

पश्यैतानि च तत्स्त्रीणां निर्माल्यानि **दशानन! । रेवा**तीरे तरन्त्युच्चैस्तदभि[३]ज्ञानमादिमम् ॥३२४॥

तदङ्गनाजनस्याऽङ्गरागैर्मृगमदादिजै: । इदमत्याविलं वारि दुर्वारं वीरवारण! ॥३२५॥

इति तद्गिरमाकर्ण्य प्राप्याऽऽहुतिमिवाऽनल: । उद्दिदीपेऽधिकं चैवमुवाच च **दशानन:** ॥३२६॥

अरे मुमूर्षुणा तेन वारिभि: स्वाङ्गदूषितै: । दूषिता देवपूजेयं देवदूष्यमिवाऽञ्जनै: ॥३२७॥

तद्यात राक्षसभटास्तं पापं भटमानिनम् । बद्ध्वा समानयत भो! मत्स्यमा[५]नायिका इव ॥३२८॥

उच्चैस्तेनैवमादिष्टा अनु**रेवं** दधाविरे । लक्षशो राक्षसभटा **रेवो**र्मय इवोद्भटा: ॥३२९॥

तीरस्थितै: **सहस्रांशु**सैनिकै: सह ते रणम् । गजा वनान्तरगजैरिव चक्रुर्निशाचरा: ॥३३०॥

विद्याभिर्मोहयन्तस्ते भूमिष्ठांस्तान् नभ:स्थिता: । उपदुद्रुवुरम्भोदा: [६]शरभान् करकैरिव ॥३३१॥

स्वानुपद्रूयमाणांस्तु प्रेक्ष्य क्रोधधुताधर: । चलत्पताकहस्तेनाऽऽश्वास[७]यन् प्रेयसीर्निजा: ॥३३२॥

ऐरावण: [८]सुरसिन्धोरिव **रेवा**त उच्चकै: । निर्जगाम **सहस्रांशु**रधिज्यं च धनुर्व्यधात् ॥३३३॥ ([९]युग्मम्)

बाणैर्विद्रावयामास रक्षोवीरान् नभ:स्थितान् । **सहस्रांशु**र्महाबाहुस्[१०]तूलपूलानिवाऽनिल: ॥३३४॥

व्यावृत्तांस्तान् रणात् प्रेक्ष्य सङ्क्रुद्धो **रावण:** स्वयम् । उपतस्थे **सहस्रांशु**मभि वर्षञ्[११]छिलीमुखान् ॥३३५॥

द्वावप्य[१२]मर्षणौ द्वावप्[१३]यूर्जितौ द्वावपि स्थिरौ । विविधैरायुधैर्युद्धं विदधाते चिराय तौ ॥३३६॥

दोर्वीर्येणाऽविज[१४]य्यं तं ज्ञात्वा जग्राह **रावण:** । विद्यया मोहयित्वेभमिव **माहिष्मती**पतिम् ॥३३७॥

तं प्रशंसन् महावीर्यं जित्वाऽपि जि[१५]तमान्यथ । [१६]अनुत्सिक्तो **दशग्रीव:** स्कन्धावारेऽनयत् स्वयम् ॥३३८॥

¶सभायां यावदासीनस्तस्थौ हृष्टो **दशानन:** । चारणश्रमणस्तावच्**छतबाहु:** समाययौ ॥३३९॥

सिंहासनात् समुत्थाय त्यक्त्वा च मणिपादुके । अभ्युत्तस्थौ **दशास्य**स्तं पयोदमिव [१७]बर्हिण: ॥३४०॥

पपात पादयोस्तस्य पञ्चाङ्गस्पृष्टभूतल: । **रावणो** मन्यमानस्तमर्हद्व्रणधरोपमम् ॥३४१॥

आसने चाऽऽ[१८]सयामास तं मुनिं स्वयमर्पिते । प्रणम्य च **दशग्रीव:** स्वयमुर्व्यामुपाविशत् ॥३४२॥

विश्वास इव मूर्त्तिस्थो विश्वा[१९]श्वासनबान्धव: । धर्मलाभाशिषं तस्मै सोऽदात् कल्याणमातरम् ॥३४३॥

बद्ध्वाऽञ्जलिं **रावणे**न समागमनकारणम् । मुनि[२०]प्रष्ठ: परिपृष्टोऽभाषिष्टाऽदुष्टया गिरा ॥३४४॥

**शतबाहु**रहं नाम्ना **माहिष्मत्यां** नृपोऽभवम् । भववासादितो भीत: शार्दूल: पावकादिव ॥३४५॥

**सहस्रकिरणे** राज्यमारोप्य निजनन्दने । मोक्षा[२१]ध्वस्यन्दनप्रायमहं व्रतमशिश्रियम् ॥३४६॥

इत्यर्धोक्ते **दशग्रीवो** नमद्ग्रीवोऽब्रवीदिति । किमसौ पूज्यपादानाम[२२]ङ्गजन्मा महाभुज: ? ॥३४७॥

[२३]ओमित्युक्ते मुनीन्द्रेण निजगाद **दशानन:** । दिग्[२४]जयप्रक्रमेणाऽहमिहाऽऽगच्छं नदीतटे ॥३४८॥

दत्तावासस्तटेऽमुष्मिञ्जिनार्चां विकचाम्बुजै: । अर्चित्वा यावदेकाग्रमानसस्तन्मयोऽभवम् ॥३४९॥

अमुना तावदुन्मुक्तैर्निजस्नानमलीमसै: । वारिभि: प्लाविता पूजा तेनाऽकार्षमिदं क्रुधा ॥३५०॥ (युग्मम्)

अज्ञानादमुनाऽप्येतत् कृतं मन्ये महात्मना । त्वत्सूनुरेष किं कुर्यादर्हदाशातनां क्वचित् ? ॥३५१॥

एवमुक्त्वा **सहस्रांशुं** तत्रा[२५]ऽऽनैषीद् **दशानन:** । लज्जानम्रानन: सोऽपि ननाम पितरं मुनिम् ॥३५२॥

**रावण**स्तं बभाणैवं भ्राता मे त्वमत: परम् । तवे[२६]वं यन्ममाऽप्येष **शतबाहु**मुनि: पिता ॥३५३॥

गच्छ शाधि निजं राज्यं गृहाणाऽन्यामपि क्षितिम् । अस्माकं हि त्रयाणां त्वं चतुर्थोऽस्यंश[२७]भाक् श्रिय: ॥३५४॥

एवमुक्तश्च मुक्तश्च **सहस्रांशु**रदोऽवदत् । न हि राज्येन मे कृत्यं वपुषा वाऽप्यत: परम् ॥३५५॥

---

१. परिक्षिप्यमाणत्वात् ॥ २. शीघ्रतयाऽवहत् ॥ ३. चिह्नम् ॥ ४. अतिपङ्किलम् ॥ ५. धीवरा: ॥ ६. अष्टापदान् ॥ ७. *०श्वासयत्* इति पाठ: पाता. विना सर्वत्र मुद्रिते च ॥ ८. गङ्गाया: ॥ ९. न कुत्राऽपि प्रतौ मुद्रिते वा ॥ १०. *०स्तृण०* मु. ॥ ११. बाणान् ॥ १२. क्रुद्धौ ॥ १३. तेजस्विनौ ॥ १४. विजेतुमशक्यम् ॥ १५. *जित्वाऽप्यजित०* ता.; आत्मानं जितं मन्यते इति ॥ १६. गर्वरहित: ॥ १७. मयूर: ॥ १८. *चाऽऽसयाञ्चक्रे* खंता.१-२, हे. मो. ता. ॥ १९. विश्वमाश्वासयतीति विश्वाश्वासन:, स चाऽसौ बान्धवश्चेति विग्रह: ॥ २०. मुनिषु प्रष्ठ: श्रेष्ठ: ॥ २१. मोक्षमार्गरथप्रायम् ॥ २२. पुत्र: ॥ २३. *ओमि०* मु. ॥ २४. *दिग्जयाय क्रमेणा०* कां. मु. खंता.१-२, पाता. ला. ॥ २५. *नत्वा०* खंता.१-२, पाता. ला. मु. ॥ २६. *तवेवाऽयं ममा०* मु. ॥ २७. भागी ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

पित्राऽऽश्रितं श्रयिष्यामि व्रतं संसारनाशनम् । अयं हि पन्था: साधूनां निर्वाणमुपतिष्ठते ॥३५६॥
इत्युदीर्य **दशास्याय** समर्प्य तनयं निजम् । व्रतं चरमदेहः स पितृपादान्तिकेऽग्रहीत् ॥३५७॥
[1]**अनरण्य**नरेन्द्राय [2]वाचिकेन तदैव सः । स्वयमात्तां परिव्रज्यां कथयामास सौहृदात् ॥३५८॥
सोऽप्य**योध्या**धिपो दध्यौ प्रियमित्रेण तेन मे । सङ्केत एवमभवदादेयं युगपद् व्रतम् ॥३५९॥
स्वप्रतिज्ञामिति स्मृत्वा राज्यं **दशरथा**य सः । दत्त्वा स्वसूनवे सत्यधनो व्रतमुपाददे ॥३६०॥
**शतबाहु-सहस्रांशू** वन्दित्वर्षी **दशाननः** । **सहस्रांशोः** सुतं राज्ये न्यस्य[3] चाऽचलदम्बरे ॥३६१॥
¶तदा च **नारदमुनि**र्यष्टिघातादिजर्जरः । अन्याय इति [4]पूत्कुर्वन्नेत्याऽऽभाषिष्ट **रावण**म् ॥३६२॥
राजन्! **राजपुरे**ऽमुष्मिन् **मरुत्तो** नाम भूपतिः । मिथ्यादृगस्ति कुर्वाणः [5]क्रतुं दुर्द्विजवासितः ॥३६३॥
यज्ञे वधाय चाऽऽनीतान् [6]सौनिकैरिव तद्द्विजैः । पशूनारटतोऽपश्यं पाशबद्धानना[7]गसः ॥३६४॥
ततो व्योम्नोऽवतीर्याऽहं **मरुत्तं** ब्राह्मणावृतम् । अहो! किमिदमारब्धमित्यपृच्छं कृपापरः ॥३६५॥
अथोवाच **मरुत्तो**ऽपि यज्ञोऽयं ब्राह्मणोदितः । अन्तर्वेदीह होतव्याः पशवो देवतृप्तये ॥३६६॥
अयं खलु महाधर्मः कीर्तितः स्वर्गहेतवे । यक्ष्यामि पशुभिर्यज्ञं तदेभिरहमद्य भोः! ॥३६७॥
ततस्तस्याऽहमित्याख्यं वपुर्वेदीरुदीरिता । [8]आत्मा [9]यष्टा तपो वह्निर्ज्ञानं [10]सर्पिः प्रकीर्तितम् ॥३६८॥
कर्माणि समिधः क्रोधादयस्तु पशवो मताः । [11]सत्यं यूपः सर्वप्राणिरक्षणं दक्षिणा पुनः ॥३६९॥
[12]त्रिरत्नी तु त्रिवेदीयमिति वेदोदितः क्रतुः । कृतो योगविशेषेण मुक्तेर्भवति साधनम् ॥३७०॥
[13]क्रव्यादतुल्या ये कुर्युर्यज्ञं छागवधादिना । ते मृत्वा नरके घोरे तिष्ठेयुर्दुःखिनश्चिरम् ॥३७१॥
उत्पन्नोऽस्युत्तमे वंशे बुद्धिमानृद्धिमानसि । राजन्! व्याधोचितादस्मान्निवर्तस्व तदे[14]नसः ॥३७२॥
यदि प्राणिवधेनाऽपि स्वर्गो जायेत देहिनाम् । तच्छून्यो जीवलोकोऽयमल्पैरेव दिनैर्भवेत् ॥३७३॥
इदं मम वचः श्रुत्वा यज्ञाग्नय इव द्विजाः । क्रुधा ज्वलन्तः प्रोत्तस्थुर्दण्ड-पट्टकपाणयः ॥३७४॥
ततस्तैस्ताड्यमानेन मया प्राप्तोऽसि नश्यता । नदीपूराभिभूतेनाऽ[15]न्तरीपमिव **रावण** ! ॥३७५॥
निरागसो वध्यमानांस्तत् तैर्नृपशुभिः पशून् । त्रायस्व त्रात एवाऽहं पुनस्त्वदवलोकनात् ॥३७६॥
ततो विमाना[16]दुत्तीर्णो **दशास्य**स्तद्दिदृक्षया । आनर्चे भूभुजा तेन [17]पाद्यसिंहासनादिना ॥३७७॥
क्रुद्धो **मरुत्त**भूपालं जगादैवं **दशाननः** । अरे! किमेष क्रियते नरकाभिमुखैर्म[18]खैः ? ॥३७८॥
धर्मः प्रोक्तो ह्यहिंसातः सर्वज्ञैस्त्रिजगद्धितैः । पशुहिंसात्मकाद् यज्ञात् स कथं नाम जायताम् ? ॥३७९॥
लोकद्वयारिं तद् यज्ञं मा कार्षीश्चेत् करिष्यसि । [19]मद्गुप्ताविह ते वासः परत्र नरके पुनः ॥३८०॥
विससर्ज मखं सद्यो **मरुत्त**नृपतिस्ततः । अलङ्घ्या हि **रावणा**ज्ञा विश्वस्याऽपि भयङ्करा ॥३८१॥
अमी पशुवधात्मानः कुतः सञ्जज्ञिरेऽ[20]ध्वराः ? । इति पृष्टो **दशास्ये**न निजगादेति **नारदः** ॥३८२॥
¶अस्ति [21]**चेदि**षु विख्याता नाम्ना **शुक्तिमती** पुरी । [22]**शुक्तिमत्या**ख्यया नद्या नर्मसख्येव शोभिता ॥३८३॥
गतेष्वनेकभूपेषु **सुव्रतान्मौनिसु[23]व्रतेः** । **अभिचन्द्रो**ऽभवत् तस्यां राजा राज्यभृतां वरः ॥३८४॥
**अभिचन्द्र**स्य तनयो **वसु**रित्यभिधानतः । अजायत [24]महाबुद्धिः प्रसिद्धः [25]सत्यवाक्तया ॥३८५॥
पार्श्वे **क्षीरकदम्बक**स्य गुरोः **पर्वतकः** सुतः । राजपुत्रो **वसु**श्चाऽहं चाऽपठाम त्रयोऽपि हि ॥३८६॥
सुप्तेष्वस्मासु सदनोपरि पाठश्रमान्निशि । चारणश्रमणौ व्योम्नि [26]यान्तावित्यूचतुर्मिथः ॥३८७॥
एषामेकतमः स्वर्गं गमिष्यत्यपरौ पुनः । नरकं यास्यतस्तच्चाऽश्रौषीत् **क्षीरकदम्बकः** ॥३८८॥
तच्छ्रुत्वा चिन्तयामास खिन्नः **क्षीरकदम्बकः** । मय्यप्यध्यापके शिष्यौ यास्यतो नरकं हहा! ॥३८९॥

---

१. दशरथस्य पिता ॥ २. सन्देशेन ॥ ३. *न्यस्याऽथाऽचल०* ता. ॥ ४. *पूत्कुर्वन्नित्यभा०* मु. ॥ ५. यज्ञम् ॥ ६. चाण्डालैः ॥ ७. निरपराधिनः ॥ ८. *तल्लीनं च मनो वह्नि-र्ज्ञानं सर्पिः प्रदीपितम्* हे. ॥ ९. यज्ञकर्ता ॥ १०. घृतम् ॥ ११. *क्षमा सत्यमहिंसा च दातव्या दक्षिणा पुनः* हे.; *यूपः सत्यमहिंसा च दातव्या०* ता. ॥ १२. ज्ञान-दर्शन-चारित्राणि ॥ १३. *क्रव्यादा अपि* खंता.१-२, ता. हे. मो.; राक्षसतुल्याः ॥ १४. तत्पापात् ॥ १५. द्वीपः ॥ १६. *०दुत्तीर्य* मु. ॥ १७. अर्घ्यम् ॥ १८. यज्ञः ॥ १९. मम कारागृहे ॥ २०. यज्ञाः ॥ २१. *च दिक्षु* मु. ॥ २२. *शक्तिमत्या* मु. ॥ २३. *मुनिसुव्रतात्* मु.; मुनिसुव्रतस्य पुत्रात् ॥ २४. *महाबाहुः* ता. ॥ २५. सत्यवादित्वेन ॥ २६. गच्छन्तौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभ्यः को यास्यति स्वर्गं ? नरकं कौ च यास्यतः? । जिज्ञासुरित्युपाध्यायोऽस्मांस्त्रीन् युगपदाह्वयत्[१] ॥३९०॥
समर्प्य गुरुरस्माकमेकैकं पिष्टकुक्कुटम् । उवाचाऽमी तत्र वध्या यत्र कोऽपि न पश्यति ॥३९१॥
**वसु-पर्वतकौ** तत्र गत्वा शून्यप्रदेशयोः । [२]आत्मनीनां गतिमिव जघ्नतुः पिष्टकुक्कुटौ ॥३९२॥
[३]दवीयसि प्रदेशे तु गत्वाऽहं नगराद् बहिः । स्थित्वा च विजने देशे दिशः प्रेक्ष्येत्यतर्कयम् ॥३९३॥
गुरुपादैरदस्तावदादिष्टं वत्स! यत् त्वया । वध्योऽयं कुक्कुटस्तत्र यत्र कोऽपि न पश्यति ॥३९४॥
[४]असौ पश्यत्यहं पश्याम्यमी पश्यन्ति खेचराः । लोकपालाश्च पश्यन्ति पश्यन्ति ज्ञानिनोऽपि हि ॥३९५॥
नाऽस्त्येव स्थानमपि तद् यत्र कोऽपि न पश्यति । तात्पर्यं तद् गुरुगिरां न वध्यः खलु कुक्कुटः ॥३९६॥
गुरुपादाः दयावन्तः सदा हिंसापराङ्मुखाः । अस्मत्प्रज्ञां परिज्ञातुमेतन्नियतमादिशन् ॥३९७॥
विमृश्यैवमहत्वैव कुक्कुटं चाऽहमागमम् । कुक्कुटाहनने हेतुं गुरोर्व्यज्ञपयं च तम् ॥३९८॥
स्वर्गं [५]यास्यत्यसौ तावदिति निश्चित्य गौरवात् । आलिङ्गितोऽहं गुरुभिः साधु साध्विति भाषिभिः ॥३९९॥
**वसु-पर्वतकौ** पश्चादागत्यैवं शशंसतुः । निहतौ कुक्कुटौ तत्र यत्र कोऽपि न पश्यति ॥४००॥
अपश्यतं युवामादावपश्यन् खेचरादयः । कथं हतौ कुक्कुटौ रे! पापावित्यशपद् गुरुः ॥४०१॥
ततः खेदादुपाध्यायो दध्यौ [६]विध्यातपाठधीः । मुधा मेऽध्यापनक्लेशो **वसु-पर्वतयो**रभूत् ॥४०२॥
गुरूपदेशो हि यथापात्रं परिणमेदिह । अभ्राम्भः स्थानभेदेन मुक्ता-लवणतां व्रजेत् ॥४०३॥
प्रियः **पर्वतकः** पुत्रः पुत्रादप्यधिको **वसुः** । नरकं यास्यतस्तस्माद् गृहवासेन किं मम? ॥४०४॥
निर्वेदादित्युपाध्यायः प्रव्रज्यामग्रहीत् तदा । तत्पदं **पर्वतो**ऽध्यास्त [७]व्याख्याक्षणविचक्षणः ॥४०५॥
भूत्वा गुरोः प्रसादेन सर्वशास्त्रविशारदः । पुनरेव निजं स्थानमहं तु गतवांस्तदा ॥४०६॥
¶ नृपचन्द्रोऽ**भिचन्द्रो**ऽपि जग्राह समये व्रतम् । ततश्चाऽभूद् **वसू** राजा वासुदेवसमः श्रिया ॥४०७॥
सत्यवादीति स प्राप प्रसिद्धिं पृथिवीतले । तां प्रसिद्धिमपि त्रातुं सत्यमेव जगाद सः ॥४०८॥
अथैकदा [८]मृगयुणा मृगाय [९]मृगयाजुषा । चिक्षिपे [१०]विशिखो **विन्ध्य**नितम्बे सोऽन्तराऽस्खलत् ॥४०९॥
इषुस्खलनहेतुं स ज्ञातुं तत्र ययौ ततः । आकाशस्फटिकशिलामज्ञासीत् पाणिना स्पृशन् ॥४१०॥
स दध्याविति मन्येऽस्यां सङ्क्रान्तः [११]परतश्चरन् । भूमिच्छायेव शीतांशावदर्शि हरिणो मया ॥४११॥
पाणिस्पर्शं विना नेयं सर्वथाऽप्युपलक्ष्यते । अवश्यं तदसौ योग्या **वसो**र्वसुमतीपतेः ॥४१२॥
रहो व्यज्ञपयद् राज्ञे गत्वा तां मृगयुः शिलाम् । हृष्टो जग्राह राजाऽपि ददौ चा[१२]ऽस्मै महद्धनम् ॥४१३॥
स तया घटयामास [१३]च्छन्नं स्वासनवेदिकाम् । तच्छिल्पिनोऽघातयच्च नाऽऽत्मीयाः कस्यचिन्नृपाः ॥४१४॥
[१४]तस्यां सिंहासनं वेदौ **चेदीश**[१५]स्य निवेशितम् । सत्यप्रभावादाकाशस्थितमित्यबुधज्जनः ॥४१५॥
सत्येन तुष्टाः सान्निध्यमस्य कुर्वन्ति देवताः । एवमू[१६]र्जस्विनी तस्य प्रसिद्धिर्व्यानशे दिशः ॥४१६॥
तया प्रसिद्ध्या राजानो भीतास्तस्य वशं ययुः । सत्या वा यदि वा मिथ्या प्रसिद्धिर्जयिनी नृणाम् ॥४१७॥
¶ तत्राऽन्यदाऽहमभ्यागामद्राक्षमथ **पर्वतम्** । व्याख्यानयन्त**मृग्वेदं** शिष्याणां शे[१७]मुषीजुषाम् ॥४१८॥
अजैर्यष्टव्यमित्यत्र मेषैरित्युपदेशकम् । तमवोचमहं भ्रातर्भ्रान्त्या किमिदमुच्यते ? ॥४१९॥
त्रिवार्षिकाणि धान्यानि न हि जायन्त इत्यजाः । व्याख्याता गुरुणाऽस्माकं व्यस्मार्षीः केन हेतुना ? ॥४२०॥
ततः **पर्वतको**ऽवादीदिदं तातेन नोदितम् । उदिताः किं त्वजा मेषास्तथैवोक्ता नि[१८]घण्टुषु ॥४२१॥
अवोचमहमप्येवं शब्दानामर्थकल्पना । मुख्या गौणी च तत्रेह गौणीं गुरुरचीक[१९]थत् ॥४२२॥
गुरुर्धर्मोपदेष्टैव श्रुतिर्[२०]धर्मात्मिकैव च । द्वयमप्यन्यथा कुर्वन् मित्र! मा पापमर्जय ॥४२३॥

१. ०*दाह्वत* खंता.१, पाता. ला. ॥ २. आत्मने हिताम् ॥ ३. अतिदूरवर्तिनि ॥ ४. कुक्कुटः ॥ ५. *यास्यत्ययं* मु. ॥ ६. विध्याता-शान्ता पाठस्य-अध्यापनस्य धीर्यस्य ॥ ७. व्याख्यायां विचक्षणः ॥ ८. व्याधेन ॥ ९. *मृगयायुजा* खंता.१-२; मृगयां कुर्वता ॥ १०. बाणः ॥ ११. अन्यतः ॥ १२. *तस्मै* मो. ॥ १३. *च्छन्नस्वासन०* खंता.१; प्रच्छन्नं यथा स्यात् तथा ॥ १४. *तस्य* पाता. ॥ १५. वसुनृपस्य ॥ १६. महती ॥ १७. बुद्धिमताम् ॥ १८. कोशेषु ॥ १९. सिद्धहेममतेन 'अचकथत्' एव भवितुमर्हति, अन्यमताश्रयणेनाऽत्राऽन्यत्राऽपि च 'अचीकथत्' इति ॥ २०. ०*धर्मात्मकैव* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]साक्षेपं **पर्वतो**ऽजल्पदजान् मेषान् गुरुर्जगौ । गुरूपदेशशब्दार्थो[2]ल्लङ्घनाद् धर्ममर्जसि ? ।।४२४।।
मिथ्याभिमानवाचो हि न स्युर्दण्डभयान्नृणाम् । स्वपक्षस्थापने तेन जिह्वा[3]च्छेदः पणोऽस्तु नः ।।४२५।।
प्रमाणमुभयोरत्र सहाध्यायी **वसु**र्नृपः । [4]प्रत्यश्रौषमहं तच्च न क्षोभः सत्यभाषिणाम् ।।४२६।।
रहः **पर्वत**मूचेऽम्बा गृह[5]कर्मरताऽप्यहम् । अजास्त्रिवार्षिकं धान्यमित्यश्रौषं भवत्पितुः ।।४२७।।
जिह्वाच्छेदं पणेऽकार्षीर्यद् दर्पात् तदसाम्प्रतम् । अविमृश्य विधातारो भवन्ति विपदां पदम् ।।४२८।।
अवदत् **पर्वतो**ऽप्येवं कृतं तावदिदं मया । यथा तथा कृतस्याऽम्ब! [6]करणं न हि विद्यते ।।४२९।।
साऽथ **पर्वतका**पायपीडया हृदि शल्यिता । **वसुराज**मुपेयाय पुत्रार्थे क्रियते न किम् ? ।।४३०।।
दृष्टः **क्षीरकदम्बो**ऽद्य यदम्ब! त्वमसीक्षिता । किं करोमि ? प्रयच्छामि किं वेत्यभिदधे **वसुः** ।।४३१।।
साऽवादीद् दीयतां पुत्रभिक्षां मह्यं महीपते! । धन-धान्यैः किमन्यैर्मे विना पुत्रेण पुत्रक! ।।४३२।।
**वसु**रूचे ततो मेऽम्ब! पाल्यः पूज्यश्च **पर्वतः** । गुरुवद् गुरुपुत्रेऽपि वर्तितव्यमिति [7]श्रुतेः ।।४३३।।
कस्याऽद्य पत्रमुत्क्षिप्तं कालेनाऽकालरोषिणा ? । को जिघांसुर्भ्रातरं मे ? ब्रूहि मातः! किमातुरा ? ।।४३४।।
अजव्याख्यानवृत्तान्तं स्वपुत्रस्य पणं च तम् । त्वं [8]प्रमाणं कृतश्चाऽसीत्याख्यायाऽर्थयते स्म सा ।।४३५।।
कुर्वाणो रक्षणं भ्रातुरजान् मेषानुदीरय । प्राणैरप्युपकुर्वन्ति महान्तः किं पुनर्गिरा ? ।।४३६।।
अवोचत [9]**वसु**र्मातर्मिथ्या वच्मि वचः कथम् ? । प्राणात्ययेऽपि न शंसन्ति नाऽसत्यं सत्यभाषिणः ।।४३७।।
अन्यदप्यभिधातव्यं नाऽसत्यं पापभीरुणा । गुरुवागन्यथाकारे कूटसाक्ष्ये च का कथा ? ।।४३८।।
[10]बहूकुरु गुरोः सूनुं यद्वा सत्यव्रताग्रहम् । तया सरोषमित्युक्तस्तद्वचोऽमंस्त पार्थिवः ।।४३९।।
¶ततः प्रमुदिता **क्षीरकदम्ब**गृहिणी ययौ । अयाव **पर्वतो**ऽहं च **वसुराज**स्य पर्षदि ।।४४०।।
सभायाममिलन् सभ्या माध्यस्थ्यगुणशालिनः । [11]वादिनां सद[12]सद्वादक्षीर-नीरसितच्छदाः ।।४४१।।
आकाशस्फटिकशिलावेदिसिंहा[13]सनं **वसुः** । [14]सभापतिरलञ्चक्रे न[15]भस्तलमिवोडुपः ।।४४२।।
ततः **पर्वतको**ऽहं च व्याख्यापक्षं निजं निजम् । अशंसाव नरेन्द्राय सत्यं ब्रूहीति भाषिणौ ।।४४३।।
विप्रवृद्धै[16]रथोचे स विवादस्त्वयि तिष्ठते । प्रमाणमनयोः साक्षी त्वं रोदस्योरिवाऽर्यमा ।।४४४।।[17]
घटप्रभृतिदिव्यानि वर्तन्ते हन्त सत्यतः । सत्याद् वर्षति पर्जन्यः सत्यात् सिध्यन्ति देवताः ।।४४५।।
[18]त्वयैव सत्ये लोकोऽयं स्थाप्यते पृथिवीपते! । त्वामिहाऽर्थे ब्रूमहे किं ? ब्रूहि सत्यव्रतोचितम् ।।४४६।।
[19]वचोऽश्रुत्वेव तत्सत्यप्रसिद्धिं स्वां निरस्य च । अजान् मेषान् गुरुर्व्याख्यदिति साक्ष्यं **वसु**र्व्यधात् ।।४४७।।
असत्य[20]वचसा तस्य क्रुद्धास्तत्रैव देवताः । [21]दलयामासुराकाशस्फटिकासनवेदिकाम् ।।४४८।।
**वसु**र्वसुमतीनाथस्ततो वसुमतीतले । [22]पपात सद्यो नरकपातं प्रस्तावयन्निव ।।४४९।।
देवताभिरसत्योक्तिकुपिताभिर्निपातितः । जगाम नरकं घोरं नरनाथो **वसु**स्ततः ।।४५०।।
**वसोः** सुताः **पृथुवसुश्चित्रवसुश्च वासवः । शक्रो विभावसुर्विश्वावसुः सूरश्च** सप्तमः ।।४५१।।
अष्टमश्च **महाशूरो** निषण्णाः पैतृके पदे । देवताभिरहन्यन्त तत्कालमपि कोपतः ।।४५२।।
**सुवसु**र्नवमः सूनुर्नष्ट्वा **नागपुरं** ययौ । **बृहद्ध्वजो** [23]**वसोः** सूनुर्दशमो **मथुरां** पुनः ।।४५३।।
हसित्वा बहुधा पौरैस्तस्याः पुर्याश्च **पर्वतः** । निर्वासितः सञ्जगृहे **महाकाला**सुरेण सः ।।४५४।।

---

१. ***साक्षेपः*** खंता.२, रसंपा. ।। २. ***०लङ्घनाधर्ममर्जसि*** खंता.१, पाता. ला. ।। ३. ***जिह्वाच्छेदपणो०*** खंता.१-२, पाता. ला. कां. मो. मु. ता. ।। ४. अङ्गी-चक्रे ।। ५. ***सदा गृहरताऽप्यहम्*** खंता.१ ।। ६. उपायः ।। ७. ***श्रुतिः*** हे. कां. मो.; वेदवचनात् ।। ८. ***प्रमाणीकृत०*** रसंपा. ।। ९. ***वसुरिति मिथ्या०*** पाता. ।। १०. ***बहुं कुरु०*** ला.; बह मानय ।। ११. ***वादिनः*** रसंपा. ।। १२. सन् च असन् च सदसन्तौ, तौ च तौ वादो च सदसद्वादौ, तावेव क्षीर-नीरे – दुग्ध-जले, तयोः पृथक्करणे सितच्छदा-हंसाः ।। १३. ***सिंहासने*** ला. छा. पा. मो. ।। १४. ***सभापतिरुपाविक्षन्नभस्तल इवोडुपः*** ला. छा. पा.; ***सभापतिरुपाविक्षन्नभःस्थल०*** मो. ।। १५. ***नभःस्थल०*** हे. ।। १६. ***विप्रवृद्धैरथोक्तः*** पाता. ।। १७. ४४४तमश्लोकादनन्तरं हे.-मो.प्रत्योरेकः श्लोकोऽधिकः प्राप्यते – "जल१मग्नि२र्घटः३ कोशो४, विषं५ माषा६श्च तन्दुलाः७ । फालं८ धर्मः९ सुतस्पर्शो१०, दिव्यानां दशकं जगुः ।।"
१८. ***त्वया च*** खंता.१-२ ।। १९. ***वचोऽश्रुत्वाऽथ*** पाता.; ***वचोऽश्रुत्वेति*** रसंपा.; ***वचः श्रुत्वेति*** मु. मो. ।। २०. ***असत्यवचनात्*** कां. ।। २१. ***दलयन्ति स्म चाकाश०*** ला. छा. पा. मो. ।। २२. ***पतितः*** पा. छा. मो. ।। २३. ***वसुसूनु०*** रसंपा. ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶कोऽयं **महाकाल** इति पृष्टो **दशमुखे**न तु । उवाच **नारदो**ऽत्राऽस्ति **चारणयुगलं** पुरम् ॥४५५॥
राजा तत्राऽ**योधनो**ऽभूद् **दिति**र्नाम्ना[1] च तत्प्रिया । तयोश्च **सुलसा** नाम दुहिता रूपशालिनी ॥४५६॥
पित्रा स्वयंवरे तस्या आहूताः समुपाययुः । सर्वेऽपि पार्थिवास्तेषु पार्थिवः **सगरो**ऽधिकः ॥४५७॥
**सगर**स्याऽऽज्ञया द्वाःस्था[2] **मन्दोदर्य**भिधानतः । **अयोधन**नृपावासे जगाम प्रतिवासरम् ॥४५८॥
एकदा च गृहोद्यानकदलीसदनेऽविशत् । **दितिः** समं **सुलसया** **मन्दोदर्य**पि चाऽऽययौ ॥४५९॥
लतान्तरे[3]निलीनाऽथ श्रोतुकामा तयोर्वचः । तस्थौ **मन्दोदरी** प्रोचे **दितिश्च** **सुलसा**मिति ॥४६०॥
वत्से! मम मनःशल्यमस्ति तेऽस्मिन् स्वयंवरे । त्वदधीनस्तदुद्धारस्तत् सम्यक् शृणु मूलतः ॥४६१॥
**ऋषभस्वामि**नोऽभूतामुभौ वंशधरौ सुतौ । **भरतो बाहुबलिश्च सूर्य-सोमौ** ययोः[4] सुतौ ॥४६२॥
**सोम**वंशे मम भ्राता **तृणबिन्दु**रजायत । **सूर्य**वंशे ते पिताऽसा**वयोधन**महीपतिः ॥४६३॥
**अयोधन**स्वसा **सत्ययशा** नाम महीपतेः । **तृणबिन्दो**रभूद् भार्या **मधुपिङ्ग**स्तयोः सुतः ॥४६४॥
तस्मै प्रदीयमानां त्वामहमिच्छामि सुन्दरि! । प्रदित्सते[5] त्वत्पिता त्वां स्वयंवरवराय तु ॥४६५॥
न जाने कं वृणोषि त्वं ? मनःशल्यमिदं मम । वरणीयस्त्वया राजमध्ये मद्भ्रातृजस्ततः ॥४६६॥
**सुलसा**ऽपि हि तच्छिक्षां तथैव प्रत्यपद्यत । **मन्दोदर्य**पि तच्छ्रुत्वा[6]ऽऽचख्यौ **सगरभूपते**:[7] ॥४६७॥
¶**सगरो**ऽप्यादिशद् **विश्वभूतिं** निजपुरोधसम् । सद्यः कविः सोऽपि चक्रे **राजलक्षणसंहिताम्**[8] ॥४६८॥
तत्रोचे[9] स तथा येन समस्तै राजलक्षणैः । **सगरो** जायते युक्तो हीनस्तु **मधुपिङ्गलः** ॥४६९॥
तत्पुस्तकं तु पेटायां स चिक्षेप पुराणवत् । राजाज्ञयाऽन्यदाऽऽकृष्टं तेन तद्राजपर्षदि ॥४७०॥
तत्राऽऽदौ **सगरो**ऽवोचद् वाच्यमानेऽत्र पुस्तके । भवेल्लक्षण[10]हीनो यो वध्यस्त्याज्यश्च[11] सोऽखिलैः ॥४७१॥
यथा यथाऽवाचयत् तत्पुस्तकं स पुरोहितः । तथा तथा स जिह्मांय[12] **मधुपिङ्गो**ऽपलक्षणः ॥४७२॥
निर्ययौ **मधुपिङ्गो**ऽथ **सगरं सुलसा**ऽवृणोत् । जज्ञे विवाहः सद्योऽपि सर्वे स्वं स्थानमभ्ययुः ॥४७३॥
¶**मधुपिङ्गो**ऽप्यपमानात् कृत्वा बालतपो मृतः । **महाकाला**भिधः षष्टिसहस्रेशो[13]ऽसुरोऽभवत् ॥४७४॥
अज्ञासीदवधेः[14] सोऽथ **सगर**स्य विजृम्भितम् । स्वयंवरे **सुलसा**या निजं न्यक्कार[15]कारणम् ॥४७५॥
राजानं **सगरं** राज्ञोऽन्यांश्च हन्मीति सोऽसुरः । छिद्रान्वेषी **शुक्तिमती**नद्यां **पर्वत**मैक्षत ॥४७६॥
विप्रवेषस्ततो भूत्वा गत्वा **पर्वत**मभ्यधात् । **शाण्डिल्यो** नाम मित्रं त्वत्पितुरस्मि महामते! ॥४७७॥
धीमतो **गौतमा**[16]ख्यस्योपाध्यायस्य पुरः पुरा । अहं **क्षीरकदम्ब**श्चाऽपठाव सहितावुभौ ॥४७८॥
**नारदे**न जनैश्च त्वां श्रुत्वा धर्षित[17]मागमम् । त्वत्पक्षं पूरयिष्यामि मन्त्रैर्विश्वं विमोहयन् ॥४७९॥
इत्युक्त्वा **पर्वत**युतः कुधर्मेणाऽखिलं जनम् । असुरो मोहयामास दुर्गतौ पातनाय सः ॥४८०॥
व्याधि-भूतादिदोषांश्च सर्वत्राऽजनयन् जने । प्रपन्न[18]**पर्वत**मतं निर्दोषं च चकार सः ॥४८१॥
**शाण्डिल्य**स्याऽऽज्ञया सोऽपि रुक्छान्तिं[19] **पर्वतो** व्यधात् । उपकृत्योपकृत्य स्वमते चाऽस्थापयज्जनम् ॥४८२॥
**सगर**स्याऽपि नगरेऽन्तःपुरेऽथ परिच्छदे । विचक्रे सोऽसुरो रोगान् दारुणानतिभूयसः ॥४८३॥
लोकप्रत्ययतो भेजे **पर्वतं सगरो**ऽपि हि । चकार **शाण्डिल्य**युतो रुक्छान्तिं सोऽपि सर्वतः[20] ॥४८४॥
**सौत्रामण्यां**[21] विधानेन सुरापाणं[22] न दुष्यति । अगम्यागमनं[23] कार्यं यज्ञे **गोसवे**[24]नामनि ॥४८५॥
**मातृमेधे** वधो मातुः **पितृमेधे** वधः पितुः । अन्तर्वेदि विधातव्यो दोषस्तत्र न विद्यते ॥४८६॥
आशुशुक्षणि[25]माधाय पृष्ठे कूर्मस्य तर्पयेत् । हविषा **जुह्वका**ख्याय **स्वाहे**त्युक्त्वा प्रयत्नतः ॥४८७॥

---

१. *०र्नाम च* खंता.१-२ ॥ २. द्वारपालिका ॥ ३. *लतान्तरविलीना०* खंता.१-२, पाता. मु. ॥ ४. *तयोः* कां. छा. पा. ॥ ५. प्रदातुमिच्छति ॥ ६. *तद्गत्वाऽऽचख्यौ* मो. ॥ ७. *भूभुजे* ता. ॥ ८. *नृप०* मु. ॥ ९. तत्र पुस्तके स विश्वभूतिपुरोहितः तथा रचयामासेत्यर्थः ॥ १०. *०लक्षणन्यूनो* ता. ॥ ११. *०स्ताज्यश्च* पाता. ॥ १२. लज्जां प्राप ॥ १३. "षष्टिवर्षसहस्रायुरसुरोऽभवत्" टि.हे.प्रतौ ॥ १४. अवधिज्ञानात् ॥ १५. तिरस्कारकारणम् ॥ १६. *गोतमा०* ता. ॥ १७. तिरस्कृतम् ॥ १८. अङ्गीकृतं पर्वतस्य मतं येन तं नरम् ॥ १९. रोगशान्तिम् ॥ २०. *पर्वतः* खंता.१, पाता. ॥ २१. यज्ञस्य नाम तत्र ॥ २२. *सुरापानम्* मु. ॥ २३. अगम्यायाः स्त्रियाः गमनं-सङ्गः ॥ २४. *गोवध०* खंता.१ ॥ २५. अग्निम् ॥

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

यदा न प्राप्नुयात् कूर्मं तदा शुद्धद्विजन्मनः । [1]खलतेः [2]पिङ्गलाभस्य [3]विक्रियस्य शुचौ जले ॥४८८॥
आ[4]स्यदघ्नेऽवतीर्णस्य मस्तके कूर्मसन्निभे । प्रज्वाल्य ज्वलनं दीप्तमाहुतिं निक्षिपे[5]द् द्विजः ॥४८९॥युग्मम्॥
**सर्वं पुरुष एवेदं यद् भूतं यद् भविष्यति । ईशानो यो[6]ऽमृतत्वस्य यदन्नेना[7]ऽतिरोहति** ॥४९०॥
[8]एवमेकत्र पुरुषे[9] किं केनाऽत्र वि[10]पाद्यते ? । कुरुताऽतो यथाभीष्टं यज्ञे प्राणनिपातनम् ॥४९१॥
मांसस्य भक्षणं तेषां कर्तव्यं यज्ञकर्मणि । [11]यायजूकेन पूतं हि देवोद्देशेन तत्कृतम् ॥४९२॥
इत्यादि स[12]मुपदिश्य **सगरे** स्वमतस्थिते । अन्तर्वेदि **कुरुक्षेत्रा**दिषु सोऽकारयन्मखान् ॥४९३॥
स लब्धप्रसरोऽकार्षीद् **राजसूया**दिकानपि । असुरोऽप्यध्वरहतान् विमानस्थानदर्शयत् ॥४९४॥
ततः सप्रत्ययो लोकः प्राणिहिंसात्मकान् मखान् । निःशङ्कमकरोत् तस्य **पर्वतस्य** मते स्थितः ॥४९५॥
तत् प्रेक्ष्याऽहं तदा विद्याधरं नाम्ना **दिवाकरम्** । अवोचं यत् त्वया यज्ञे हर्तव्याः पशवोऽखिलाः ॥४९६॥
प्रतिपद्य स मे वाचं जह्रे यावत् पशून् मखे । परमाधार्मिकस्तावत् तदज्ञासीत् सुराधमः ॥४९७॥
**ऋषभ**प्रतिमां तत्र तद्विद्याघातनाय सः । अस्थापयन्**महाकाल** उपारंसीच्च खेचरः ॥४९८॥
ततोऽहमपि तूष्णीकः क्षीणोपायोऽन्यतोऽभ्यगात् । यज्ञेषु भावयामास **सगरं** सोऽथ मायया ॥४९९॥
**सगरं सुलसा**युक्तं स जुहावाऽध्वरानले । कृतकृत्यो जगामाऽथ **महाकालः** स्वमाश्रयम् ॥५००॥
एवं च **पर्वतात्** पापपर्वतादध्वरा द्विजैः । हिंसात्मका अक्रियन्त ते निषेध्यास्त्वयैव हि ॥५०१॥
तद्वाचमुररीकृत्य प्रणि[13]पत्य च **नारदम्** । **मरुत्तात्** क्षमयित्वा च विससर्ज **दशाननः** ॥५०२॥
**मरुत्तो रावणं** नत्वोवाच कोऽयं कृपानिधिः । पापादमुष्माद् यो ह्यस्मांस्त्वया स्वामिन्! न्यवारयत् ? ॥५०३॥
आचख्यौ **रावणो**ऽप्यासीन्नाम्ना **ब्रह्मरुचि**र्द्विजः । तापसस्य सतस्तस्य भार्या **कूर्मी**ति [14]गुर्व्यभूत् ॥५०४॥
तत्रेयुः साधवोऽन्येद्युस्तेष्वेकः साधुरब्रवीत् । भवभीत्या गृहवासस्त्यक्तो यत् साधु साधु तत् ॥५०५॥
भूयः [15]स्वदारसङ्गस्य विषयैर्लुप्तचेतसः । गृहवासाद् वनवासः कथं नाम विशिष्यते ? ॥५०६॥
श्रुत्वा **ब्रह्मरुचि**स्तत् तु प्रपन्नजिनशासनः । तदैव प्राव्रजत् सा च **कूर्म्य**भूच्छ्राविका परा ॥५०७॥
मिथ्यात्ववर्जिता तत्र सा वसन्त्याश्रमे सुतम् । सुषुवे **नारदं** नाम रोदनादिविवर्जितम् ॥५०८॥
गतायाश्चाऽन्यतस्तस्यास्तं जह्रुर्**जृम्भकामराः** । [16]पुत्रशोका**दिन्दुमाला**र्यान्तिके प्राव्रजच्च सा ॥५०९॥
तेऽमराः पालयामासुः शास्त्राण्यध्यापयंश्च तम् । **आकाशगामिनीं** विद्यां ददुस्तस्मै क्रमेण च ॥५१०॥
अणुव्रतधरः प्राप यौवनं च मनोहरम् । स शिखाधारणान्नित्यं न गृहस्थो न संयतः ॥५११॥
कलहप्रेक्षणाकाङ्क्षी गीत-नृ[17]त्यकुतूहली । सदा क[18]न्दर्प-कौत्[19]कुच्य-मौखर्यात्यन्तवत्सलः ॥५१२॥
वीराणां कामुकानां च सन्धि-विग्रहकारकः । छत्रिका-ऽक्ष-[20]वृषीपाणिरारूढः पादुकासु च ॥५१३॥
देवैः संवर्धितत्वाच्च देवर्षिः प्रथितो भुवि । प्रायेण ब्रह्मचारी च स्वेच्छाचार्येष **नारदः** ॥५१४॥
इत्युक्तवन्तं **लङ्केश**मज्ञानकृतमात्मनः । **मरुत्तः** क्षमयामासाऽपराधं मखसम्भवम् ॥५१५॥
**मरुत्तराजः** स्वां कन्यां नामतः **कनकप्रभाम्** । तदा ददौ **दशास्याय दशास्यो**प्युदुवाह ताम् ॥५१६॥
¶[21]प्रभञ्जन इवौजस्वी **मरुत्त**मखभञ्जनः । ततो जगाम **मथुरां** नगरीं गुरुविक्रमः ॥५१७॥
उपतस्थे **दशग्रीवं** तन्नृपो **हरि[22]वाहणः** । पुत्रेण **मधु**ना सार्ध**मीशा[23]ने**नेव शूलिना ॥५१८॥
तं भक्त्योपस्थितं प्रीतो [24]वार्तयन् **दशकन्धरः** । पप्रच्छैव भवत्सूनोः कुतोऽदः शूलमायुधम् ? ॥५१९॥

---

१. 'खल्वाटस्य,टालियुते शिरसि' टि. हे.प्रतौ ॥ २. 'पिङ्गला आभा यस्य' टि. हे.प्रतौ ॥ ३.'विशिष्टा क्रिया यस्य' टि. हे.प्रतौ ॥ ४.मुखप्रमाणे ॥ ५. ***प्रक्षिपेद्०*** मु. ॥ ६."अमृतत्वं अजरामरपदम्" टि. हे.प्रतौ ॥ ५."अन्नेन-आहारेण अतिरोहति-वर्धते" टि. हे.प्रतौ ॥ ८.''एकत्र सर्व-वस्तुमये पुरुषे सति किं वस्तु केन पुरुषेण अत्र विश्वे विनाश्यतेऽपि तु केनाऽपि किमपि न विनाश्यते, कस्याऽपि हिंसाजनितं पापं न लगतीत्यर्थः'' टि. हे.प्रतौ ॥ ९. ***कः केनाऽत्र*** ता. ॥ १०. ***विपद्यते*** ला. मु., खंता.१-२, पाता. ला. ॥ ११. पुनः पुनर्यजतीति यायजूकस्तेन ॥ १२. ***समुपादिश्य*** मु. ॥ १३. ***तं सत्कृत्य*** रसंपा. ॥ १४. गर्भवती ॥ १५. ***सदार०*** हे. कां. ला. मो. ॥ १६. ***पुत्रशोकादिन्दुमालासविधे*** मु. ॥ १७. ***०नृत्त०*** रसंपा. ॥ १८. कामचेष्टित-वाचालत्वयोरत्यन्तवत्सलः ॥ १९. ***०कौकुच्य०*** मु. ॥ २०. दर्भासनविशेषो वृषी ॥ २१. महावायुः ॥ २२. ***हरिवाहनः*** मु. ला. ॥ २३. शङ्करेण त्रिशूलधारिणा ॥ २४. ***प्रीतोऽवार्तयद्दश०*** मु. खंता. १-२ प्रभृतिषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पित्रा भ्रूसञ्ज्ञयाऽऽदिष्टो [१]**मधु**र्मधुरमभ्यधात् । इदं मे **चमरेन्द्रे**ण प्राग्जन्मसुहृदाऽर्पितम् ॥५२०॥
¶अवोचच्च**मर**श्चैवं **धातकीखण्ड**नामनि । द्वीप **ऐरावत**क्षेत्रे [२]**शतद्वारे** महापुरे ॥५२१॥
**सुमित्रो** राजपुत्रोऽभूत् **प्रभव:** कुलपुत्रक: । उभावभूतां ते मित्रे वसन्त-मदनाविव ॥५२२॥युग्मम्॥
गुरोरेकस्य पार्श्वे तौ बाल्ये जगृहतु: कला: । सह चिक्रीडतुश्चाऽवि[३]प्रयुक्तावश्विनाविव ॥५२३॥
उद्यौवन: **सुमित्रो**ऽथ तत्राऽभून्नगरे नृप: । महर्द्धिर्विदधे तेन **प्रभवो**ऽप्यात्मसन्निभ: ॥५२४॥
राजैकदा तुरङ्गेण हृत: प्राप महाटवीम् । पल्लीपतिसुतां तत्र **वनमाला**मुपायत ॥५२५॥
तामादाय समायात: स राजा स्वपुरे पुन: । **प्रभवे**ण च सा प्रैक्षि रूप-यौवनशालिनी ॥५२६॥
तद्दर्शनात् प्रभृत्येव स [४]मनोभवपीडित: । दिने दिने कृशो जज्ञे कृष्णपक्ष इवो[५]डुप: ॥५२७॥
असाध्यं मन्त्र-तन्त्राणां तं ज्ञात्वाऽतिकृशं नृप: । इत्यूचे बाधते किं ते ? सम्यगाख्याहि बान्धव! ॥५२८॥
अभ्यधात् **प्रभवो**ऽप्येवं वक्तुमेतन्न शक्यते । अलं कुलकलङ्काय यन्मन:स्थमपि प्रभो! ॥५२९॥
[६]निर्बन्धाद् भूभुजा पृष्ट: स आख्यत् कुलपुत्रक: । **वनमाला**नुरागो मे देहदौर्बल्यकारणम् ॥५३०॥
राजाऽप्यूचे राज्यमपि त्वदर्थे सन्त्यजाम्यहम् । किं पुनर्महिलामात्रमियमद्यैव गृह्यताम् ॥५३१॥
इत्युक्त्वा तं विसृज्याऽथ तस्याऽनुपदमेव ताम् । स्वयं दूतीमिव प्रैषीत् तदोकसि निशामुखे ॥५३२॥
इत्यूचे साऽपि राज्ञाऽहं तुभ्यं दत्ताऽस्मि सी[७]दते । जीवातुरिव त[८]च्छाधि पत्याज्ञा मे बलीयसी ॥५३३॥
मम भर्ता त्वदर्थे हि प्राणानपि विमुञ्चति । किं पुनर्मादृशीं दासीमुदासीन: किमीक्षसे ? ॥५३४॥
बभाषे **प्रभवो**ऽप्येवं धिग्धिङ् मां निर[९]पत्रपम् । अहो! स तु महासत्त्वो यस्येदृक् सौहृदं मयि ॥५३५॥
प्राणा अपि हि दीयन्ते परस्मै न पुन: प्रिया । इति दुष्करमेतद्धि कृतं तेनाऽद्य मत्कृते ॥५३६॥
पिशुनानामिवाऽवाच्यं नाऽयाच्यं बत मादृशाम् । कल्पद्रूणामिवाऽदेयं नाऽस्ति किञ्चित्तु तादृशाम् ॥५३७॥
सर्वथा गच्छ माताऽसि [१०]माऽत: परमिमं जनम् । पश्य भाषस्व [११]वा पापराशिं पत्याज्ञयाऽपि हि ॥५३८॥
तत्र च च्छन्नमागत्य राजा शुश्राव तद्वच: । सुहृद: सत्त्वमालोक्य प्रकर्षेण जहर्ष च ॥५३९॥
**वनमालां** नमस्कृत्य विसृज्य **प्रभवो**ऽपि हि । स्वशिरश्छेत्तुमारेभे खड्गमाकृष्य पाणिना ॥५४०॥
आविर्भूय **सुमित्रो**ऽपि मित्र! मा साहसं कृथा: । इति जल्पन्नपाहार्षीत् कृपाणं तस्य पाणित: ॥५४१॥
[१२]विविक्षन्निव वसुधां **प्रभवो**ऽधोमुखो ह्रिया । कथञ्चन **सुमित्रे**ण स्वस्थावस्था[१३]मनीयत ॥५४२॥
चक्रतुस्तौ चिरं राज्यं प्राग्वन्मैत्रीपरायणौ । **सुमित्र**स्तु परिव्रज्य मृत्वेशानसुरोऽभवत् ॥५४३॥
ततश्च्युत्वा **मथुरे**श**हरि**[१४]**वाहण**नन्दन: । त्वं सुबाहु**र्मधु**[१५]र्नामा **माधवी**कुक्षिभूरभू: ॥५४४॥
**प्रभवो**ऽपि भवं भ्रान्त्वा चिरं **विश्वावसो**रभूत् । **ज्योतिर्मत्यां श्रीकुमार** इति नाम्ना [१६]तनूरुह: ॥५४५॥
सनिदानं तप: कृत्वा कालयोगाद् विपद्य च । अभवं **चमरेन्द्रो**ऽहं पूर्वजन्मसुहृत् तव ॥५४६॥
इत्याख्याय स मेऽदत्त **शूल**मेतदुपेत्य यत् । आयोजनद्विसहस्र्या: कृत्वा कार्यं निवर्तते ॥५४७॥
इति श्रुत्वा **दशग्रीवो** भक्ति-शक्तिविराजिने । ददौ **मधु**कुमाराय कन्यां नाम **मनोरमा**म् ॥५४८॥
¶अथ **लङ्का**प्रयाणाहाद् वर्षेष्वष्टादशस्वगात् । स्वर्णाद्रौ [१७]**पाण्डके** चैत्यान्यर्चितुं **दशकन्धर:** ॥५४९॥
सोत्कण्ठस्तत्र चैत्यानि **दशकण्ठो**ऽभ्यवन्दत । ऋद्ध्या महत्या सङ्गीत-पूजोत्सवपुर:सरम् ॥५५०॥
[१८]**दुर्लङ्घ**नगरेऽथेन्द्रदिक्पालं **नलकूबर**म् । ग्रहीतुं **कुम्भकर्णा**द्या **दशग्रीवा**ज्ञया ययु: ॥५५१॥
[१९]**आशाली** विद्यया वह्निमयं वप्रमथ व्यधात् । स्वपुरे योजनशतप्रमाणं **नलकूबर:** ॥५५२॥
हुताशनमयान्येव चक्रे यन्त्राणि तत्र च । [२०]प्रदीपनमिव व्योम्नि कुर्वाणानि [२१]शिखोत्करै: ॥५५३॥

---

१. *मधुरं मधुरमभ्यधात्* मु.॥ २. *दशद्वारे* पाता. ॥ ३. अवियोगिनौ देववैद्याविव ॥ ४. कामपीडित: ॥ ५. चन्द्र: ॥ ६. आग्रहात् ॥ ७. दु:खिने ॥ ८. आदिश ॥ ९. निर्लज्जम् ॥ १०. *नाऽत:* मु. ॥ ११. *सा* मु. ॥ १२. प्रवेष्टुमिच्छन् ॥ १३. *०मनायि स:* ला. कां. ता. मु. ॥ १४. *०हरिवाहन०* ला. ता. ॥ १५. *०र्मधुर्नाम०* ला. ॥ १६. पुत्र: ॥ १७. *०पाण्डकचैत्या०* ला. ॥ १८. *दुर्लङ्घपुरेऽथेन्द्रप्राग्दिक्पालं०* ला. हे. कां. ला. ॥ १९. *आशाला०* ता. ॥ २०. 'तापणुं' इति भाषायाम् , अग्निम् ॥ २१. *शरोत्करै:* खंता.१; ज्वालासमूहै: ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

तं च वप्रम[1]वष्टभ्याऽवतस्थे **नलकूबरः**। भटैः परिवृतः कोपाज्ज्वलन् वह्निकुमारवत् ॥५५४॥
तेऽप्येत्य **कुम्भकर्णा**द्यास्तं द्रष्टुमपि नाऽशकन्। ग्रीष्ममध्याह्नमार्तण्डमिव सुप्तोत्थिता नराः ॥५५५॥
दु[2]र्लङ्घमेतद् **दुर्लङ्घपुर**मित्यपसृत्य ते। भग्नोत्साहाः कथमपि **दशास्या**य व्यजिज्ञपन् ॥५५६॥
स्वयं **दशास्य**स्तत्राऽगात् तं वप्रं प्रेक्ष्य तादृशम्। अपश्यंस्तद्ग्रहोपायं चिरं दध्यौ स[3]बान्धवः ॥५५७॥
¶अनुरक्ता **दशास्य**स्य **नलकूबर**पत्न्यथ। प्रैषीद् दूती**मुपरम्भा** सा तमेत्यैवमब्रवीत् ॥५५८॥
जयश्रीरिव मूर्तो**परम्भा** त्वयि रिरंसते। सा त्वद्गुणैर्हृतमनास्तत्र मू[4]र्त्यैव तिष्ठति ॥५५९॥
इमां च विद्या**मा[5]शाली**मस्य वप्रस्य रक्षिकाम्। करिष्यति तवाऽऽयत्तामात्मानमिव मानद! ॥५६०॥
ग्रहीष्यति तया चेदं पुरं स**नलकूबर**म्। सेत्स्यत्यत्र च ते चक्रं दे[6]व! नाम्ना **सुदर्शनम्** ॥५६१॥
सप्रहासं **दशास्ये**न वीक्षितोऽथ **बिभीषणः**। एवमस्त्विति भाषित्वा दूतिकां विससर्ज ताम् ॥५६२॥
अथ क्रुद्धो **दशग्रीव** आबभाषे **बिभीषणम्**। अरे! कुलविरुद्धं किं प्रतिपन्नमिदं त्वया ? ॥५६३॥
हृदयं जातुचिद् दत्तं परस्त्रीणां न कैरपि। अस्मत्कु[7]लभवैर्मूढ! रणे पृष्ठं द्विषामिव ॥५६४॥
नवः कुलकलङ्कोऽयं वचसाऽपि कृतस्त्वया। रे **बिभीषण!** केयं ते मतिर्येनेदमब्रवीः ? ॥५६५॥
**बिभीषणो**ऽप्युवाचैवं प्रसीदाऽऽर्य! महाभुज!। न वाग्मात्रं कलङ्काय विशुद्धमनसां नृणाम् ॥५६६॥
सा समायातु विद्यां ते प्रयच्छतु स च द्विषन्। वश्योऽस्तु मा भजेथास्तां वाचोयुक्त्या परित्यजेः ॥५६७॥
यावद् **बिभीषण**वचोऽनुमेने तद् **दशाननः**। तावदागा**दुपरम्भा** तत्परी[8]रम्भलम्पटा ॥५६८॥
ददौ चाऽऽ**शालिकां** विद्यां पत्या वप्रीकृतां पुरे। मोघे[9]तराणि शस्त्राणि व्यन्तराधिष्ठितानि च ॥५६९॥
**दशास्यः** सञ्जहाराऽग्निप्राकारं विद्यया तया। प्रविवेश च **दुर्लङ्घपुरं** सबलवाहनः ॥५७०॥
उत्तस्थे चाऽथ सन्नह्य रणाय **नलकूबरः**। **बिभीषणे**न चाऽग्राहि चर्मभस्त्रेव दन्तिना ॥५७१॥
देवासुरैरप्यजय्यं शक्रसम्बन्धि दुर्धरम्। चक्रं **सुदर्शनं** नाम तत्र प्राप च **रावणः** ॥५७२॥
प्रणताय ततस्तस्मै **दशास्य**स्तत्पुरं ददौ। अर्थिनोऽर्थेषु न तथा दोष्मन्तो विजये यथा ॥५७३॥
**उपरम्भा**मप्युवाच **दशास्यः** स्वकुलोचिताम्। भद्रे! भजाऽऽत्मभर्तारं कर्तारं विनयं मयि ॥५७४॥
विद्यादानाद् गुरुस्थाने मम त्वमसि सम्प्रति। स्वसृ-मातृपदे पश्याम्यन्या अपि परस्त्रियः ॥५७५॥
पुत्री **का[10]मध्वजस्या**ऽसि **सुन्दर्यु**दरसम्भवा। कुलद्वयवि[11]शुद्धायाः कलङ्को मा स्म भूत् तव ॥५७६॥
तामित्युक्त्वाऽपर्यामास **नलकूबर**भूभुजे। अदूषितां पितुर्गेहे रुषित्वेव समागताम् ॥५७७॥
**नलकूबर**राजेन **कुम्भकर्णा**ग्रजोऽर्चितः। चचाल सह च[12]म्वाऽभि **रथनूपुर**पत्तनम् ॥५७८॥
आयान्तं **रावणं** श्रुत्वा **सहस्रारो** महामतिः। सुत**मिन्द्रं** सुतस्नेहात् स्नेहपूर्वमभाषत ॥५७९॥
भवता वत्स! जातेन वंशोऽस्माकं महौजसा। अन्यवंशोन्नतिं हृ[13]त्वा प्रापितः प्रोन्नतिं पराम् ॥५८०॥
एकेन विक्रमेणैव त्वया हीदमनुष्ठितम्। नीतीनामप्यवकाशो दातव्यः सम्प्रति त्वया ॥५८१॥
एकान्तविक्रमः क्वाऽपि विपदेऽपि प्रजायते। एकान्तविक्रमान्नाशं शरभाद्याः प्रयान्ति हि ॥५८२॥
बलीयसो बलिभ्योऽपि प्रसूते हि वसुन्धरा। सर्वेभ्योऽप्यहमोजस्वीत्यहङ्कारं स्म मा कृथाः ॥५८३॥
उत्थितोऽस्त्यधुना[14] वीरः स[15]र्ववीरत्वतस्करः। प्रतापेन स[16]हस्रांशुः **स[17]हस्रांशु**नियन्त्रकः ॥५८४॥
हेलोत्पाटित**कै[18]लासो मरुत्त**मखभञ्जनः। **जम्बूद्वीपे**शयक्षेन्द्रेणाऽप्यक्षोभितमानसः ॥५८५॥
[19]उपार्हन्निजदोर्वीणागीततोषितचेतसः। **धरणेन्द्रा**दमो[20]घास्त्रशक्तिः शक्ति[21]त्रयोर्जितः ॥५८६॥

१. अवलम्ब्य ॥ २. ***दुर्लङ्घ्य०*** ता. ला. मु., खंता.२ ॥ ३. ***दशाननः*** खंता.२, पाता. ता. ॥ ४. स्वगृहे केवलं शरीरेणैव तिष्ठति, मनस्तु तस्यास्त्वयि वर्तत इति ॥ ५. ***०माशाला०*** ता. ॥ ६. ***दैवं*** मु. मो. ता. ॥ ७. ***अस्मत्कुलभटै०*** ता. ॥ ८. तदालिङ्गनोत्सुका ॥ ९. अमोघानि ॥ १०. ***कासध्वज०*** रसंपा. ॥ ११. ***०विरुद्धायाः*** मु. ॥ १२. ***चमूभी०*** खंता.१-२, पाता. ता.; ***सेनाभी०*** मो. मु. ॥ १३. ***हित्वा*** हे.; ***हित्वा*** कां. ॥ १४. ***वीर!*** ता. ॥ १५. सर्वेषां वीरत्वं लुण्टति-नाशयतीत्येतादृशस्तस्करः ॥ १६. सूर्यः ॥ १७. सहस्रांशुर्नाम राजा, तन्नियन्त्रकः ॥ १८. अष्टापदपर्वतः ॥ १९. अर्हत्समीपे निजदोर्वीणाया गीतेन प्रसादितं चित्तं यस्य तस्मात् ॥ २०. ***०दमोघास्त्रशक्तिः*** पाता. ॥ २१. प्रभाव-उत्साह-मन्त्रजास्तिस्रः शक्तयः, ताभिरूर्जितो बलवान् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्रातृभ्यां स्वानुरूपाभ्यां स्वभुजाभ्यामिवोत्कटः । **रावणो** नाम **लङ्केशः सुकेश**कुलभास्करः ॥५८७॥ [चतुर्भिः कलापकम्]

स **यमं** हेलयाऽभाङ्क्षीत् पत्तिं[1] **वैश्रवणं** च ते । पत्तीचक्रे वानरेन्द्रं **सुग्रीवं वालि**सोदरम् ॥५८८॥

[2]दुर्लङ्घवह्निप्राकारं **दुर्लङ्घ्यपुर**मस्य च । प्रविष्टस्याऽनुजो बद्ध्वा जग्राह **नलकूबरम्** ॥५८९॥

स त्वां प्रत्या[3]पतन्नस्ति युगान्ताग्निरिवोद्धतः । प्रणिपातसुधावृष्ट्या शमनीयोऽन्यथा न तु ॥५९०॥

**रूपिणीं** च सुतामस्मै यच्छ रूपवतीमिमाम् । एवं ह्युत्तमसन्धानं सम्बन्धात्[4] ते भविष्यति ॥५९१॥

एवं पितृवचः श्रुत्वा कुप्यन्[5]नेवमुवाच सः । कन्यका स्वा कथङ्कारमस्मै वध्याय दीयते ? ॥५९२॥

किं च नाऽधुनिकं वैरममुना किं तु वंशजम् । [6]तातं **विजयसिंहं** प्रागेतद्[7]गृह्यैर्हतं स्मर ॥५९३॥

एतत्पितामहस्याऽपि **मालिनो** यन्मया कृतम् । तदस्याऽपि करिष्यामि समायात्वेष[8] को ह्ययम् ? ५९४॥

स्नेहतः कातरो मा भूः सहजं धैर्यमाश्रय । स्वसूनोः सर्वदा दृष्टं किं न वेत्सि पराक्रमम् ? ॥५९५॥

¶तस्यैवं वदतोऽभ्येत्य[9] नगरं **रथनूपुरम्** । चमूभिर्वेष्टयामास दुर्धरो **दशकन्धरः** ॥५९६॥

पूर्वमेव **दशास्येन** प्रहितो महितौजसा । अथ दूतोऽभ्युपेत्ये**न्द्र**मित्युवाच ससौष्ठवः ॥५९७॥

ये केचिदिह राजानो विद्या-दोर्वीर्यदर्पिणः[10] । तैरुपेत्योपायनाद्यैः पूजितो **दशकन्धरः** ॥५९८॥

**दशकण्ठ**स्य विस्मृत्या भवतश्चाऽऽर्जवादयम् । इयान् कालो ययौ तस्मिन् भक्तिकालस्तवाऽधुना ॥५९९॥

भक्तिं दर्शय तत् तस्मिन् शक्तिं वा दर्शयाऽधुना । भक्ति-शक्तिविहीनश्चेदेवमेव विनङ्क्ष्यसि ॥६००॥

**इन्द्रो**ऽपि निजगादैवं वराकैः पूजितो नृपैः । **रावण**स्तदयं मत्तः पूजां मत्तो[11]ऽपि वाञ्छति ॥६०१॥

यथा तथा गतः कालो **रावण**स्य सुखाय सः । कालरूपस्त्वयं कालस्तस्येदानीमुपस्थितः ॥६०२॥

गत्वा स्वस्वामिनो भक्तिं शक्तिं वा मयि दर्शय । स भक्ति-शक्तिहीनश्चेदेवमेव विनङ्क्ष्यति ॥६०३॥

दूतेनाऽऽगत्य विज्ञप्तो[12] **रावणो** कोपदारुणः । समनह्यन्महोत्साहः समं सकलसैनिकैः ॥६०४॥

द्रुत**मिन्द्रो**ऽपि सन्नह्य निर्ययौ **रथनूपुरात्** । [13]वीरा हि न सहन्तेऽन्यवीराहङ्कारडम्बरम् ॥६०५॥

¶सामन्ताः सह सामन्तैः सैनिकाः सैनिकैः पुनः । सेनानीभिश्च सेनान्यो द्वयोर्युयुधिरे तयोः ॥६०६॥

तयोर्बलानामन्योऽन्यं सम्फेटः[14] शस्त्रवर्षिणाम् । संवर्त्त-पुष्करावर्त्तवारिदानामिवाऽभवत् ॥६०७॥

वराकैः सैनिकैरेभिः किं हतैर्मशकैरिव ? । इति ब्रुवाणो **भुवनालङ्कार**करिपुङ्गवम् ॥६०८॥

स्वयमारुह्य युद्धायाऽधिज्यीकृतशरासनः । अढौक**तैरावण**स्थे**नेन्द्रे**ण सह **रावणः** ॥६०९॥युग्मम्॥

नागपाशमिवाऽन्योऽन्यं मुखयोः करवेष्टनम्[15] । वितन्वानौ मिमिलतुः करिणौ **रावणेन्द्र**योः ॥६१०॥

द्वावपीभौ महाप्राणौ दन्तैर्दन्तान् प्रजघ्नतुः[16] । उत्थापयन्तौ स्फुलिङ्गानरण्युन्मथनादिव ॥६११॥

मिथोघातैर्विषाणेभ्यः[17] सौवर्णवलयावलिः । पपातोर्व्यां विरहिणी[18]बाहुभ्य इव तत्क्षणात् ॥६१२॥

तद्दन्तघातक्षुण्णेभ्यः शरीरेभ्यो[19] निरन्तरम् । गण्डेभ्यो मदधारावद् रक्तधाराः प्रसुस्रुवुः ॥६१३॥

क्षणाच्छल्यैः क्षणाद् बाणैः क्षणादपि च मुद्गरैः । गजाविव[20] द्वितीयौ तौ **रावणेन्द्रौ** प्रजहतुः[21] ॥६१४॥

महाबलौ पिपिषतु[22]रस्त्रैरस्त्राणि तौ मिथः । नैकोऽप्यहीयतैकस्मादब्धी पूर्वापराविव ॥६१५॥

बाध्य-बाधकताभाग्भिर्द्राग्युत्सर्गा-ऽपवादवत् । मन्त्रास्त्रैरप्ययुध्येतां तौ रणक्रतु[23]दीक्षितौ ॥६१६॥

गाढं मिलितयोरेकवृन्तस्थफलयोरिव । **ऐरावण-भुवनालङ्कार**योः करिणोरथ ॥६१७॥

छलज्ञो **रावणः** स्वेभादुत्पत्यै**रावणं** ययौ । हत्वा च तन्महामात्रं[24] बबन्धे**न्द्रं** करीन्द्रवत् ॥६१८॥युग्मम्॥

स हस्ती परितोऽधस्ताद् रक्षोवीरैरवेष्ट्यत । हर्षादुत्तालतुमुलैर्मधुमण्ड[25] इवाऽलिभिः ॥६१९॥

---

१. *दिक्पालं धनदं* खंता.१-२, ला.; *दिक्पालधनदं* हे. कां. ला. ता. ॥ २. *दुर्लङ्घ्य०* खंता.१, मु. ॥ ३. अभ्यागच्छन् ॥ ४. *विविधात् ते* ता. ॥ ५. *कुप्यन्निदमुवाच* रसंपा. ॥ ६. *तावद्* ला. ॥ ७. एतत्पक्ष्यैः ॥ ८. *समायात्वेषको ह्ययम्* मु. ॥ ९. *वदतोऽप्येत्य* ला. ॥ १०. *०दोर्वीर्यदर्पिताः* मु.; *०दोर्वीर्यदर्पणाः* कां. ला. ॥ ११. मत्पार्श्वात् ॥ १२. *विज्ञप्ते* रसंपा. ॥ १३. *धीरा* ला. ॥ १४. युद्धम् ॥ १५. करः शुण्डा ॥ १६. *प्रजहतुः* ला. रसंपा. ॥ १७. दन्तेभ्यः ॥ १८. विरहाकुलत्वेन कृशायाः स्त्रियो बाहुभ्यः ॥ १९. *करीरीभ्यो०* हे. ता.; *करीरीभ्यां०* ला.; *करीभ्योऽपि* छा. पा. ॥ २०. *गजाविवाद्रि०* मु., खंता. पाता. प्रभृतिषु ॥ २१. *प्रजघ्नतुः* मु. ॥ २२. सञ्चूर्णयामासतुः ॥ २३. रण एव क्रतुः-यज्ञः, तत्र दीक्षितौ ॥ २४. हस्तिपकम्(महावत) ॥ २५. 'मधपूडो' इति भाषायाम् ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**रावणे** न धृते **शक्रे** तत्सैन्यमपि सर्वतः। विदुद्राव जिते नाथे जिता एव पदातयः ॥६२०॥

सहैवै**रावणेनेन्द्रं रावणः** शिबिरे निजे। निनाय नाय[१]क्यभवत् स्वयं श्रेणिद्वयेऽप्यथ ॥६२१॥

ततो निवृत्य **लङ्कायां** जगाम **दशकन्धरः**। कारायां चाऽक्षिपच्छ**क्रं** कीरवत् काष्ठपञ्जरे ॥६२२॥

¶**सहस्रारः** सदिक्पालो **लङ्कायामेत्य रावणम्**। नमस्कृत्येत्यभाषिष्ट पत्तिवद् रचिताञ्जलिः ॥६२३॥

**कैलास**[२]मुदधार्षीद् यो लीलया ग्राव[३]खण्डवत्। दोष्मता तेन भवता विजिता न त्रपामहे ॥६२४॥

तादृशे त्वयि याच्ञ्[४]याऽपि न त्रपायै मनागपि। तद्[५] याचेऽहं मुञ्च **शक्रं** पुत्रभिक्षां प्रयच्छ मे ॥६२५॥

उवाच **रावणो**ऽप्येवं **शक्रं** मुञ्चामि यद्यसौ। सदिक्पालपरीवारः कर्म कुर्यात् सदेदृशम् ॥६२६॥

परितोऽपि पुरीं **लङ्कां** करोत्वेष क्षणे क्षणे। तृणकाष्ठादिरहितां वासागारमहीमिव ॥६२७॥

प्रातः प्रातर्दिव्यगन्धैरम्बुवाह इवाऽम्बुभिः। चेलक्नोपं[६] पुरीमेतामभितोऽप्यभिषिञ्चतु ॥६२८॥

मालाकार इवोच्चित्य[७] ग्रथित्वा[८] च सदा स्वयम्। पुष्पाणि पूरयत्वेष देवतावसरादिषु ॥६२९॥

एवंविधानि कर्माणि कुर्वन्नेष सुतस्तव। पुनर्गृह्णातु राज्यं स्वं मत्प्रसादाच्च नन्दतु ॥६३०॥

एवं करिष्यतीत्युक्ते **सहस्रारेण रावणः**। मुमोच **शक्रं** कारायाः सत्कृत्य निजबन्धुवत् ॥६३१॥

**रथनूपुरमेत्येन्द्र**स्तत्स्थावुद्विग्न उच्चकैः। तेजस्विनां हि निस्तेजो मृत्युतोऽप्यतिदुःसहम् ॥६३२॥

**निर्वाणसङ्गमो** नाम ज्ञानी तत्राऽन्यदा मुनिः। समवासर**दिन्द्रो**ऽपि तं वन्दितुमुपाययौ ॥६३३॥

भगवन्! कर्मणा केन **रावणा**दिदमासदम्। न्यक्कारमिति **शक्रेण** पृष्टः स मुनिरब्रवीत् ॥६३४॥

¶श्रीमत्य**रिञ्जय**पुरे पुरा विद्याधराग्रणीः। नाम्ना **ज्वलनसिंहो**ऽभूद् **वेगवत्य**स्य तु प्रिया ॥६३५॥

**अहल्या** नाम दुहिता रूपवत्यभवत् तयोः। तस्याः स्वयंवरेऽभ्येयुः सर्वे विद्याधरेश्वराः ॥६३६॥

**आनन्दमाली** तत्राऽऽगाच्च**न्द्रावर्तपुरे**श्वरः। **सूर्यावर्तपुरे**शस्त्वमागान्नाम्ना **तडित्प्रभः** ॥६३७॥

सहाऽऽयातमपि त्यक्त्वा त्वा**महल्या** निजेच्छया। **आनन्दमालिनं** वव्रे तवाऽभूच्च पराभवः ॥६३८॥

**आनन्दमालिनी**र्ष्यालुस्त्वमभूस्तत्प्रभृत्यपि। मयि सत्यप्यसावेता**महल्या**मूढवानिति ॥६३९॥

**आनन्दमाली** निर्वेदादन्यदा व्रतमग्रहीत्। तप्यमानस्तपस्तीव्रं व्यहार्षीच्च सहर्षिभिः ॥६४०॥

विहरन् स **रथावर्तं** जगाम गिरिमेकदा। त्वया च ददृशेऽस्मारि चा**ऽहल्यायाः** स्वयंवरः ॥६४१॥

ध्यानारूढस्त्वया बद्धस्ताडितोऽनेकशश्च सः। मनागपि न च ध्यानादचालीदचलाचलः[९] ॥६४२॥

**कल्याण**गुणधरस्तु तद्[१०]भ्राता श्रमणाग्रणीः। प्रेक्ष्य त्वय्यमुचत् तेजोलेश्यां शम्पा[११]मिव द्रुमे ॥६४३॥

**सत्यश्रिया** च त्वत्पत्न्या[१२] शमितो भक्तिजल्पितैः[१३]। तेजोलेश्यां स सञ्जह्रे न दग्धोऽस्ति तदैव तत् ॥६४४॥

मुनिन्यत्कार[१४]जात् पापात् त्वं भ्रान्त्वा कतिचिद् भवान्। शुभं कर्म विधायेन्द्रः **सहस्रार**सुतोऽभवः ॥६४५॥

महामुनितिरस्कारप्रहारोद्भवकर्मणः। उपस्थितं फलमिदं **रावणाद्** यः पराभवः ॥६४६॥

कर्माण्यवश्यं सर्वस्य फलन्त्येव चिरादपि। आपुरन्दरमाकीटं संसारस्थितिरीदृशी ॥६४७॥

तच्छ्रुत्वा **दत्तवीर्याय**[१५] राज्यं दत्त्वाऽङ्गजन्मने[१६]। **इन्द्रः** पर्यव्रजत् तप्तोग्रतपाश्च ययौ शिवम् ॥६४८॥

¶**रावणो**ऽपि ययौ **स्वर्णतुङ्गशैले**ऽपरेऽहनि। **अनन्तवीर्यं** नामर्षिं वन्दितुं जातकेवलम् ॥६४९॥

तं वन्दित्वा यथास्थानं निषण्णो **दशकन्धरः**। शुश्राव च श्रोत्रसुधासारणिं धर्मदेशनाम् ॥६५०॥

देशनान्ते **दशास्ये**न कुतः स्यान्मरणं मम ?। इति पृष्टो महर्षिः स भगवानेवमभ्यधात् ॥६५१॥

पारदारिकदोषेण वासुदेवाद् भविष्यतः[१७]। भविष्यति विपत्तिस्ते प्रतिविष्णो**र्दशानन!** ॥६५२॥

---

१. ***नायकोऽभवत्*** हे. कां. ॥ २. अष्टापदम् ॥ ३. पाषाणखण्डवत् ॥ ४. ***याच्ञादि*** ला. ॥ ५. ***तद् याच्यसे*** हे. कां. पा. छा. ला. ॥ ६. **चेलोत्क्षेपं** मु.; **'चलत्कोपं' इति पाठान्तरे** इति टि. ला.प्रतौ; यावता चेलं (वस्त्रं) क्नूयते-आर्द्रीभवति तावत् (सि.हे.५-४-५८) ॥ ७. 'चूंटीने' इति भाषा ॥ ८. *ग्रन्थित्वा* मु. ॥ ९. अचल(पर्वत)वद् अचला(भूमि)वद् वा अचलः ॥ १०. **'आनन्दमालिभ्राता'** इति ला.टि. ॥ ११. **'विद्युतमिव'** इति ला.टि. ॥ १२. **'तडित्प्रभापत्न्या'** इति ला.टि. ॥ १३. भक्तिवचनैः ॥ १४. ***मुनिन्यक्कार०*** मु., मुनितिरस्कारजातात् ॥ १५. ***दत्तवीर्यस्य*** पाता. विना ॥ १६. *०जन्मनः* पाता. विना ॥ १७. ***भविष्यति*** मु., भाविनः इत्यर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]परस्त्रियमनिच्छन्तीं रमयिष्यामि न ह्यहम् । जग्राहाऽभिग्रहमिमं स तस्यैव मुनेः पुरः ॥६५३॥

मुनिवरमथ नत्वा ज्ञानरत्नाम्बुधिं तं, **दशवदन** इयाय स्वां पुरीं **पुष्पक**स्थः ।
निखिलनगरनारीनेत्रनीलोत्पलानां, प्रमदविभवदानाद् [2]यामिनीजानिकल्पः ॥६५४॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते
महाकाव्ये सप्तमे पर्वणि **रावण**दिग्विजयो
नाम द्वितीयः [3]सर्गः ॥

१. ६५३तमश्लोकस्योपरि ला.सञ्ज्ञकप्रतौ टिप्पणीयम् –
" जइ वि हु सुरूववंता परमहिला तो वि हं न पत्थेमि ।
निअया वि अप्पसन्ना विलया एवं वयं मज्झ ॥१॥ ***वृद्धपद्यचरित्रे*** ॥"

२. यामिनीजानिः चन्द्रस्तत्तुल्य इत्यर्थः ॥ ३. ***सर्गः समाप्तः*** ला. ॥

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

# ॥तृतीयः सर्गः॥

[१]अथेह **वैताढ्यगिरावादित्यपुर**पत्तने । **प्रह्लादो** नाम राजाऽभूत् **केतुमत्य**स्य तु प्रिया ॥१॥
तयोर्बभूव तनयो नामतः **पवनञ्जयः** । जयी पवनवत् [२]स्थाम्ना गगने गमनेन च ॥२॥
¶इतश्च **भरते**ऽत्रैवो[३]पार्णवं **दन्ति**पर्वते । विद्याधरेन्द्रो **महेन्द्रो महेन्द्रनगरे**ऽभवत् ॥३॥
पत्न्यां **हृदयसुन्दर्यां** तस्य चाऽ**ञ्जनसुन्दरी** । **अरिन्दमा**दिपुत्राणां शतस्योपर्यभूत् सुता ॥४॥
उद्यौवनायास्तस्याश्च वरं चिन्तयतः पितुः । शशंसुर्मन्त्रिणो विद्याधरयूनः सहस्रशः ॥५॥
**महेन्द्र**स्याऽऽज्ञयाऽमात्यास्तद्रूपाणि पृथक् पृथक् । यथावदालेख्य[४]पटेष्वानाय्य समदर्शयन् ॥६॥
तत्र विद्याधराधीश[५]**हिरण्याभा**ङ्गजन्मनः । रूपं **विद्युत्प्रभा**ख्यस्य **सुमनः**कुक्षिजन्मनः ॥७॥
**प्रह्लाद**सूनोः **पवनञ्जय**स्य च मनोरमम् । चित्रस्थं सचिवोऽन्येद्यु**र्महेन्द्र**स्याऽभ्यढौकयत् ॥८॥युग्मम्॥
रूपवन्तौ कुलीनौ च द्वावप्येतौ [६]तदेतयोः । [७]वत्सायाः को वर ? इति राज्ञोक्तः सचिवोऽ[८]ब्रवीत् ॥९॥
[९]एषोऽष्टादशवर्षायुर्मोक्षं **विद्युत्प्रभो** [१०]गमी । इति नैमित्तिकाः स्वामिन्! व्यक्तमाख्या[११]तपूर्विणः ॥१०॥
**प्रह्लाद**तनयस्त्वेष चिरायुः **पवनञ्जयः** । योग्यो वरस्तदेतस्मै प्रयच्छाऽ**ञ्जनसुन्दरी**म् ॥११॥
अत्राऽन्तरे तु यात्रायै द्वीपं **नन्दीश्वरं** ययुः । विद्याधरेन्द्राः सर्वेऽपि सर्वर्द्धया सपरिच्छदाः ॥१२॥
**प्रह्लाद**स्त[१२]त्र [१३]यान् प्रेक्ष्य **महेन्द्र**मिदमभ्यधात् । दीयतां मत्सुतायैषा स्वसुताऽ**ञ्जनसुन्दरी** ॥१३॥
**महेन्द्रः** प्रतिपेदे तदग्रेऽपि हृदयस्थितम् । निमित्तमात्रमेवाऽऽसीत् **प्रह्लाद**प्रार्थना तु सा ॥१४॥
इतस्तृतीये दिवसे **मानसा**ख्ये **सरोवरे** । कार्यो विवाह इत्युक्त्वा तौ यथास्थानमीयतुः ॥१५॥
ततो **महेन्द्र-प्रह्लादौ** [१४]साह्लादौ स्वजनैः समम् । जग्मतु**र्मानससर**स्यावासं चक्रतुश्च तौ ॥१६॥
¶मित्रं **प्रहसितं** नामोवाचेति **पवनञ्जयः** । दृष्टाऽस्ति किं त्वया ? ब्रूहि कीदृश्य**ञ्जनसुन्दरी** ? ॥१७॥
हसित्वेषत् **प्रहसितो**ऽप्येवमूचे मयेक्षिता । सा हि रम्भादिकाभ्योऽपि सुन्दर्य**ञ्जनसुन्दरी** ॥१८॥
तस्या निरुपमं रूपं यादृशं दृश्यते दृशा । तादृशं वचसा वक्तुं [१५]वाग्मिनाऽपि न शक्यते ॥१९॥
**पवनञ्जय** इत्यूचे दूरे ह्युद्वाहवासरः । सा दृग्गोचरमद्यैव कथं नेया मया सखे! ? ॥२०॥
वल्लभोत्कण्ठितानां हि घटिकाऽपि दिनायते । मासायते दिनमपि किं पुनस्तद्दिनत्रयम् ? ॥२१॥
ततः **प्रहसितो**ऽप्येवं व्याजहार स्थिरीभव । निशि तत्रैत्य तां कान्तां द्रक्षस्यनु[१६]पलक्षितः ॥२२॥
उत्पत्य **सप्रहसितो** नि[१७]श्यगात् **पवनञ्जयः** । [१८]आस्थितेऽ**ञ्जनसुन्दर्या** प्रासादे सप्तभूमिके ॥२३॥
[१९]राजस्पश इव च्छन्नीभूय सोऽ**ञ्जनसुन्दरी**म् । सम्यगीक्षितुमारेभे समित्रः **पवनञ्जयः** ॥२४॥
धन्याऽसि या हि प्रापस्त्वं तं पतिं **पवनञ्जय**म् । सखी **वसन्ततिलके**त्युवाचाऽ**ञ्जनसुन्दरी**म् ॥२५॥
हले! मुक्त्वा वरं **विद्युत्प्रभं** [२०]चरमविग्रहम् । को वरः श्लाघ्यते ? इति **मिश्रकेश्य**वदत् सखी ॥२६॥
प्रथमा प्रत्युवाचैवं मुग्धे! वेत्सि न किञ्चन । **विद्युत्प्रभो** हि स्वल्पायुः स्वामिन्या युज्यते कथम् ? ॥२७॥
द्वितीयाऽपीत्यभाषिष्ट वयस्ये! मन्दधीरसि । स्तोकमप्यमृतं श्रेयो [२१]भारोऽपि न विषस्य तु ॥२८॥
इत्यालापं तयोः श्रुत्वाऽचिन्तयत् **पवनञ्जयः** । अस्याः प्रियमिदं नूनं तेन नैषा निषेधति ॥२९॥
इति क्रुद्धो[२२]ऽसिमाकृष्याऽऽविरा[२३]सीत् **पवनञ्जयः** । निशाचर इवाऽकस्मादन्धकारात् समुत्थितः ॥३०॥

---

१. ***इतश्च*** पाता. ॥ २. बलेन ॥ ३. समुद्रसमीपे ॥ ४. ***०पट्टे०***; चित्रपटेषु ॥ ५. ***०हरिणाभाङ्ग०*** खंता.१-२, ला. ॥ ६. ***तदेनयोः*** हे. मो. ॥ ७. ***कन्यायाः*** मु.॥ ८. ***सचिवोऽभ्यधात्*** मु. ॥ ९. ***एकोऽष्टा०*** पाता. ला. मो. ॥ १०. गमिष्यति ॥ ११. पूर्वमाख्यातवन्तः ॥ १२. ***प्रह्लादस्तनयां*** मु. ॥ १३. गच्छन् ॥ १४. ***राजानौ*** ता. ॥ १५. प्रशस्ता वागस्येति वाग्मी ॥ १६. अज्ञातः ॥ १७. ***निरगात्*** मु. ॥ १८. ***आस्थिताञ्जन०*** ला.; अधिष्ठिते ॥ १९. "चरः" इति ला.टि. ॥ २०. चरमशरीरिणम् ॥ २१. समूहः ॥ २२. ***क्रुद्धः समाकृष्याऽऽवि०*** ला. ॥ २३. प्रकटोऽभवत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विद्युत्प्रभो** हृदि ययोर्द्वयोरपि तयोः शिरः । छिनद्मीति वदन् रोषाच्चचाल **पवनञ्जयः** ॥३१॥
बाहुदण्डे धारयंस्तमिति **प्रहसितो**ऽवदन् । सापराधाऽप्यवध्यैव स्त्री गौरिव न वेत्सि किम् ? ॥३२॥
किं पुनर्निरपराधैवेय**मञ्जनसुन्दरी** । तथाऽपवादिनीं[1] नैषा निषेधति पुनर्ह्रिया ॥३३॥
इति **प्रहसिते**नोच्चैर्निषिद्धः **पवनञ्जयः** । उत्पत्याऽऽगात् स्वमावासं जाग्रत् तस्थौ च दुःखितः[2] ॥३४॥
प्रातश्चोचे **प्रहसितं** सखे! किमनयोढया ? । भृत्योऽपि हि विरक्तः स्यादापदे किं पुनः प्रिया ? ॥३५॥
तदेहि यामः[3] स्वपुरीमूरीकृत्य परं रयम्[4] । किं स्वादुनाऽपि भोज्येन रोचते न यदात्मने ? ॥३६॥
इत्युदीर्योच्चकैर्यावच्चचाल **पवनञ्जयः** । धृत्वा तावत् **प्रहसित**स्तं साम्नैव[5]मबोधयत् ॥३७॥
न युक्तं महतां यत् स्वप्रतिपन्नस्य लङ्घनम् । अनुल्लङ्घ्यैस्तु गुरुभिः प्रतिपन्नस्य तु का कथा ? ॥३८॥
विक्रीणते वा मूल्येन ददते वा प्रसादतः । गुरवो हीत्यपि सतां प्रमाणं नाऽपरा गतिः ॥३९॥
किं चेहाऽ**ञ्जनसुन्दर्या**मस्ति दोषलवोऽपि न । दूष्यते दैवदोषेण सुहृदो हृदयं पुनः ॥४०॥
महात्मानौ च पितरौ स्वस्य तस्याश्च विश्रुतौ । किं न लज्जयसि भ्रातर्गच्छन् स्वच्छन्दवृत्तितः ॥४१॥
उक्तः **प्रहसिते**नैवं विमृश्य **पवनञ्जयः** । तथैव कथमप्यस्थात् सशल्य इव चेतसि ॥४२॥
**पवनाञ्जनसुन्दर्यो**र्निर्णीते च दिनेऽभवत् । पितृनेत्रोत्पलशशी पाणिग्रहमहोत्सवः ॥४३॥
तद्वधूवरमादाय सदायादः[6] प्रमोदभाक् । **महेन्द्रे**णाऽर्चितः स्नेहात् **प्रह्लादः** स्वां पुरीं ययौ ॥४४॥
¶**प्रह्लादो**ऽ**ञ्जनसुन्दर्याः** प्रासादं सप्तभूमिकम् । अर्पयामास वासाय विमानमिव भूस्थितम् ॥४५॥
तां न सम्भावयामास[7] वाचाऽपि **पवनञ्जयः** । मानिनो ह्यवलेपं[8] न विस्मरन्ति यतस्ततः ॥४६॥
विना शशाङ्कं श्यामेव[9] सा[10] विना **पवनञ्जयम्** । बाष्पान्धकार[11]वदना तस्थावस्वास्थ्यभाजनम् ॥४७॥
पार्श्वद्वितयमाघ्नत्या[12] पर्यङ्कस्य मुहुर्मुहुः । तस्याश्च संवत्सरवद् द्राघीयस्यो[13]ऽभवन् निशाः ॥४८॥
अनन्यमानसा जानुमध्यन्यस्तमुखाम्बुजा । भर्तुरालेखनैरेव[14] व्यतीयाय दिनानि सा ॥४९॥
मुहुरालाप्यमानाऽपि सखीभिश्चाटुपूर्वकम् । परपुष्टेव[15] हेमन्ते न सा तूष्णीकतां[16] जहौ ॥५०॥
¶एवं च काले व्रजति **प्रह्लाद**नृपमन्यदा । दूतो राक्षसराजस्य समुपेत्यैवमब्रवीत् ॥५१॥
समं राक्षसनाथेन[17] यादोनाथः[18] स दुर्मतिः । वैरायतेऽद्य नितरां प्रणिपातममानयन् ॥५२॥
याचितः स नमस्कारमहङ्कारमहागिरिः । दोर्दण्डो चक्षुषा पश्यन्निदं वदति कद्वदः[19] ॥५३॥
अरे! को **रावणो** नाम ? तेन किं ननु सिध्यति ? । नाऽहमिन्द्रः **कुबेरो** वा न चाऽस्मि **नलकूबरः** ॥५४॥
**सहस्ररश्मि**र्नाऽप्यस्मि न **मरुत्तो** न वा **यमः** । न च **कैलासशैलो**ऽस्मि किं त्वस्मि **वरुणो** ननु ॥५५॥
देवताधिष्ठितैरस्त्रैर्यदि[20] दर्पोऽस्य दुर्मतेः । तदायातु हरिष्यामि तद्दर्पं चिरसञ्चितम् ॥५६॥
इत्युक्त्वा **रावणः** क्रुद्धः समरायाऽभ्यषेणयत् । अरौत्सीत् तत्पुरं चाऽब्धिवेलेव तटपर्वतम् ॥५७॥
पुरान्निःसृत्य **वरुणो** रणायाऽरुणलोचनः । **राजीव-पुण्डरीका**द्यैर्वृतः पुत्रैरयुध्यत ॥५८॥
तस्मिन् महति सङ्ग्रामे वीरै**र्वरुण**सूनुभिः । योधयित्वा च बद्ध्वा च निन्याते **खर-दूषणौ** ॥५९॥
अभज्यत ततः सैन्यं राक्षसानामशेषतः । कृतार्थमानी **वरुणो**ऽप्यविशन्नगरीं निजाम् ॥६०॥
विद्याधरेन्द्रानाह्वातुं प्राहिणोद् **रावणो**ऽपि हि । दूतान् प्रत्येकमप्यद्य भवते प्रेषितस्त्वहम् ॥६१॥
¶**प्रह्लादो**ऽथ **दशास्याय** साहायककृते स्वयम् । यावच्चचाल तावत् तमुवाच **पवनञ्जयः** ॥६२॥
इहैव तिष्ठ तात! त्वं **दशग्रीव**मनोरथम् । पूरयिष्याम्यहमपि तवाऽस्मि तनयो ननु ॥६३॥
इत्युदीर्य सनिर्बन्धं पितरं चाऽनुमान्य सः । लोकं चाऽशेषमाभाष्य चचाल **पवनञ्जयः** ॥६४॥

१. कुत्सितवादिनीम् ॥ २. *दुःस्थितः* खंता.१ ॥ ३. *यावः* ला. मु.प्रभृतिकागदप्रतिषु ॥ ४. वेगम् ॥ ५. शान्त्या ॥ ६. सकुटुम्बः ॥ ७. *सम्भाषयामास* ला. ॥ ८. गर्वम् ॥ ९. रात्रिरिव ॥ १०. *विना सा* ता. ॥ ११. *पुष्टान्धकार०* हे. ॥ १२. पार्श्वयोः परावर्तनं कुर्वत्याः ॥ १३. दीर्घाः ॥ १४. *भर्तुरालेखनैरेव* कागदप्रतिषु मु. च ॥ १५. कोकिला ॥ १६. मौनम् ॥ १७. *राक्षसराजेन* खं.१ ॥ १८. "वरुणः" इति ला. टि. ॥ १९. कुत्सितवादी ॥ २०. *देवताधिष्ठितै रत्नै०* पाता. ला. विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुत्वाऽञ्जना जनमुखात् पत्युर्यात्रामथोत्सुका । देवीव व्योमशिखरात् प्रासादादवरुह्य[1] च ॥६५॥

तमीक्षितुमवष्टभ्य स्तम्भं पाञ्चालिकेव सा । निर्निमेषेक्षणा तस्थावस्वास्थ्यमथिताशया[2] ॥६६॥युग्मम्॥

द्वारस्तम्भनिषण्णाङ्गीं[3] प्रतिपच्चन्द्रवत् कृशाम् । लुलितालकसञ्छन्नललाटां निर्विलेपनाम् ॥६७॥

नितम्बन्यस्तविस्रस्तश्लथलम्बिभुजालताम्[4] । ताम्बूलरागरहितधूसराधरपल्लवाम् ॥६८॥

बाष्पाम्बुक्षालितमुखामुन्मुखां पुरतः स्थिताम् । **अञ्जनां** व्यञ्जनदृशं[5] ददर्श **पवनो** व्रजन् ॥६९॥त्रिभिर्विशेषकम्॥

तां निध्यायन्[6]निदं दध्यौ सद्यः **प्रह्लाद**नन्दनः । अहो निर्ह्रीत्वमेतस्या निर्भीत्वमपि दुर्धियः ॥७०॥

अथवा ज्ञातमेतस्या दौर्मनस्यं पुराऽपि हि । उदूढा तु मया पित्रोराज्ञालङ्घनभीरुणा ॥७१॥

पतित्वा पादयोस्तस्य साऽप्यूचे रचिताञ्जलिः । त्वया सम्भाषितः सर्वोऽप्यहं तु न मनागपि ॥७२॥[7]

विज्ञप्यसे तथाऽपि त्वं विस्मार्या न ह्यहं त्वया । पुनरागमनेनाऽऽशु पन्थानः सन्तु ते शिवाः ॥७३॥

इति ब्रुवाणां तां दीनामहीनचरितामपि । ययाववगणय्यैव जयाय **पवनञ्जयः** ॥७४॥

[8]पत्यवज्ञावियोगार्ता गत्वाऽन्तर्वेश्म भूतले । वारिभिन्नतला सिन्धुतटीव निपपात सा ॥७५॥

¶[9]पवमानवदुत्पत्य तदा **प्रह्लाद**नन्दनः । जगाम **मानससर**स्युवास च निशामुखे ॥७६॥

विकृत्य तत्र प्रासादमध्यास्त **पवनञ्जयः** । विद्याधराणां विद्यैव सर्वसिद्धिषु कामधुक् ॥७७॥

तत्र पर्यङ्कमारूढः सरःपरिसरावनौ । आर्ता प्रियवियोगेन चक्रवाकीं ददर्श सः ॥७८॥

पूर्वोपात्तामभुञ्जानां मृणाललतिकामपि । तप्यमानां हिमेनाऽपि क्वथितेनेव[10] वारिणा ॥७९॥

दूयमानां ज्योत्स्नयाऽपि वह्न्यर्चिश्छटयेव[11] ताम् । क्रन्दन्तीं करुणं प्रेक्ष्य स एवं पर्यचिन्तयत् ॥८०॥

सकलं वासरं पत्या रमन्ते चक्रवाकिकाः । न सोढुमीशते नक्तमपि तद्विरहं पुनः ॥८१॥

उद्वाहतोऽपि या त्यक्ता भाषिता या न जातुचित् । आगच्छताऽप्यवज्ञाता परनारीव या मया ॥८२॥

आक्रान्ता दुःखभारेण पर्वतेनेव मूलतः । अदृष्टमत्सङ्गसुखा सा कथं हा[12]! भविष्यति ? ॥८३॥युग्मम्॥

धिग्धिङ् ममाऽविवेकेन म्रियते सा तपस्विनी । तद्धत्यापातकेनाऽहं क्व गमिष्यामि दुर्मुखः ? ॥८४॥

इति चिन्तितमात्मीयमाख्यत् **प्रहसिता**य सः । स्वदुःखाख्यानपात्रं हि नाऽपरः सुहृदं विना ॥८५॥

प्रोचे **प्रहसितो**ऽप्येवं साध्वज्ञासीश्चिरादपि । नूनं विपद्यते साऽद्य सारसीव वियोगतः ॥८६॥[13]

आश्वासयितुमद्याऽपि सखे! सा तव युज्यते । प्रियोक्त्या तामनुज्ञाप्य स्वार्थाय पुनरापतेः[14] ॥८७॥

¶इत्येव सुहृदा तेन भाव[15]संवादिनेरितः । ययावञ्जन**सुन्दर्या** वेश्मन्युत्पत्य **मारुतिः**[16] ॥८८॥

किञ्चित्तिरोहितस्तस्थौ द्वार्येव **पवनञ्जयः** । अग्रे भूत्वा **प्रहसितः** प्राविशच्च[17] तदोकसि[18] ॥८९॥

[19]वेल्लन्तीमधिपर्यङ्कं तोयेऽल्पे शफरीमिव । पीड्यमानां ज्योत्स्नयाऽपि हिमेनेव सरोजिनीम् ॥९०॥

अन्तर्हृदय[20]सन्तापप्रस्फुटद्धारमौक्तिकाम् । उन्मुक्तदीर्घनिःश्वासतरलालकमालिकाम्[21] ॥९१॥

अधीषं निःसहस्रस्त[22]दोर्भग्नमणिकङ्कणाम् । **वसन्ततिलका**सख्याऽऽश्वास्यमाना मुहुर्मुहुः ॥९२॥

[23]शून्यदत्तदृशं शून्यचित्तां काष्ठमयीमिव । ईक्षाञ्चक्रे **प्रहसित**स्तत्र चाऽञ्जन**सुन्दरी**म् ॥९३॥चतुर्भिः कलापकम्॥

अकस्माद् व्यन्तर इव को नामेह समाययौ ? । इति भीताऽपि सा धैर्यमवलम्ब्येदमब्रवीत् ॥९४॥

अहो! कस्त्वमिहाऽऽयासीः ? परपुंसाऽथवा त्वया । अलं ज्ञातेन मेह[24] स्थाः परनारीनिकेतने ॥९५॥

---

१. अवतीर्य ॥ २. अस्वास्थ्येन मथितः आशयः (चित्तवृत्तिः) यस्याः सा ॥ ३. ०*निषण्णां तां* ता. ला. ॥ ४. नितम्बे न्यस्ता-धारिता विस्रस्ता-श्लथा लम्बिनी भुजलता यया सा ॥ ५. अञ्जनरहितनेत्राम् ॥ ६. पश्यन् ॥ ७. ७२तमश्लोकस्योपरि टिप्पितं गाथाद्वयं ला.प्रतावेवम्-

"जीवं मरणंमि तुमे आयण्णं नत्थि एत्थ संदेहो । जइ वि हु जासि पवासं तह वि न अम्हं सरिज्जासु ॥१॥

एवं पलवंतीए पवणगई मत्तकरिवरारूढो । निग्गंतूण पुराओ अवट्ठिओ माणससरम्मि ॥२॥ इति **वृद्धपद्यचरित्रे** ॥"

८. पत्युरवज्ञया वियोगेन च पीडिता ॥ ९. पवनवत् ॥ १०. निष्पक्केन ॥ ११. अग्निशिखातेजसा ॥ १२. **नु** पाता. ॥ १३. ८६तमश्लोकस्योपरि टिप्पितेयं गाथा ला.प्रतौ- "पवणंजएण भणिओ सद्दावेऊण मोग्गरामच्चो । ठविऊण सेणरक्खो भणिओ मेरुम्मि वच्चामो ॥१॥ इति **वृद्धपद्यचरिते** ॥"

१४. "आगच्छेः" ला.टि. ॥ १५. भावो मनोगताभिप्रायस्तेन प्रेरितः ॥ १६. पवनञ्जयः ॥ १७. *प्रविशत्तु* ता. ला. ॥ १८. तस्मिन् गृहे इत्यर्थः ॥ १९. लुठन्तीम् ॥ २०. हृदयसन्तापेन प्रस्फुटन्ति हारस्य मौक्तिकानि यस्यास्ताम् ॥ २१. तरलकेशपङ्क्तिम् ॥ २२. असह्यतया बाह्वोः खट्वाङ्गे आस्फालनात् भग्नमणिकङ्कणाम् ॥ २३. शून्ये-आकाशे दत्ता दृग् यया सा, ताम् ॥ २४. मा इह ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वसन्ततिलके!** दोष्णा विधृत्यैनं बहिः क्षिप । क्षपाकरविशुद्धाऽस्मि नैनं द्रष्टुमपि क्षमा ॥९६॥
**पवनञ्जय**मुज्झित्वाऽमुष्मिन् मम निकेतने । न प्रवेशाधिकारोऽस्ति कस्याऽपि किमुदीक्षसे ? ॥९७॥
नत्वा **प्रहसितो**ऽवादीद् दिष्ट्या स्वामिनि! वर्धसे । चिरादायातसोत्कण्ठ**पवनञ्जय**सङ्गमात् ॥९८॥
तस्य मित्रं **प्रहसितो** मन्मथस्येव [1]माधवः । अग्रेसरोऽहमायातोऽन्वायातं विद्धि च प्रियम् ॥९९॥
**अञ्जना**ऽपि जगादैवं हसितां विधिनैव माम् । मा हसीस्त्वं **प्रहसित!** क्षणोऽयं न हि नर्मणः ॥१००॥
अथवा नैष दोषस्ते दोषो मत्पूर्वकर्मणाम् । कुलीनस्तादृशो भर्ता त्यजेन्मां कथमन्यथा ? ॥१०१॥
पाणिग्रहात् प्रभृत्येव मुक्तायाः स्वामिना मम । द्वाविंशतिः समा जग्मुर्जीवाम्यद्याऽपि पापिनी ॥१०२॥
अथ सङ्क्रान्ततद्दुःखप्राग्भारः **पवनञ्जयः** । अन्तः प्रविश्य व्याहार्षीद् बाष्पगद्गदवागिदम् ॥१०३॥
निर्दोषा दोषमारोप्य त्वमुद्वाहात् प्रभृत्यपि । अवज्ञाताऽस्यविज्ञेन [2]मयका विज्ञमानिना ॥१०४॥
मद्दोषादीदृशीमागा दुःसहां दुर्दशां प्रिये! । मृत्युं प्राप्ताऽपि मद्भाग्यैः स्तोकान्मुक्ताऽसि मृत्युना ॥१०५॥
इत्युक्तवन्तं सा नाथमुपलक्ष्य त्रपावती । [3]पर्यङ्केषामवष्टभ्याऽभ्युत्तस्थौ विनमन्मुखी ॥१०६॥
लतां हस्तीव हस्तेन दोष्णा [4]वलयितेन ताम् । आददानोऽधिपर्यङ्कं न्यषदत् **पवनञ्जयः** ॥१०७॥
भूयस्तां **पवनो**ऽवोचन्मयाऽतिक्षुद्रबुद्धिना । [5]निरागाः खेदिताऽसि त्वं तत् सहस्व प्रिये! मम ॥१०८॥
अवोचद**ञ्जना**ऽप्येवं नाथ! मा स्म ब्रवीरिदम् । सदैव तव दास्यस्मि [6]क्षामणाऽनुचिता मयि ॥१०९॥
निर्जगाम **प्रहसितो वसन्ततिलका**ऽप्यथ । रहःस्थयोर्हि दम्पत्योर्न [7]च्छेकाः पार्श्ववर्तिनः ॥११०॥
रेमाते तत्र च **स्वैरमञ्जना-पवनञ्जयौ** । विरराम रसावेशाच्चैकयामेव यामिनी ॥१११॥
[8]प्रभातप्रायमालोक्य तामूचे **पवनञ्जयः** । जयाय कान्ते! यास्यामि ज्ञास्यन्ति गुरवोऽन्यथा ॥११२॥
खेदं माऽतः परं कार्षीः सुखं तिष्ठ सखीवृता । **दशास्य**कृत्यं सम्पाद्य यावदायामि सुन्दरि! ॥११३॥
साऽप्युवाचेति तत्कृत्यं दोष्मतः सिद्धमेव ते । [9]कृतार्थः शीघ्रमागच्छेर्जीवन्तीं मां यदीच्छसि ॥११४॥
अपरं च ऋतुस्नाताऽस्म्यद्यैव यदि मे भवेत् । गर्भस्तत् त्वत्परोक्षेऽ[10]पवदेयुः पिशुना मयि ॥११५॥
**पवनो**ऽप्याललापैवं शीघ्रमेष्यामि मानिनि! । मय्यायाते कथं क्षुद्रावकाशो भविता त्वयि ? ॥११६॥
अथवा गृह्यतामेतन्मदागमनसूचकम् । मन्नामाङ्कमङ्गुलीयं समये तत् प्रकाशयेः ॥११७॥
अर्पयित्वाऽङ्गुलीयं स्वमुत्पत्य **पवनञ्जयः** । जगाम **मानससर**स्तीरस्थे शिबिरे निजे ॥११८॥
ततोऽपि सह सैन्येन नाकीव व्योमवर्त्मना । जगाम [11]**लङ्कां** नगरीं **रावणं** प्रणनाम च ॥११९॥
**रावणो**ऽपि प्रविश्याऽथ पातालं [12]पृतनान्वितः । प्रययौ प्रति **वरुणं** तरुणार्क इव [13]त्विषा ॥१२०॥
¶इतश्च तद्दिने गर्भं बभाराऽ**ञ्जनसुन्दरी** । विशेषसुन्दरीभूतसर्वावयवशालिनी ॥१२१॥
मुखमापाण्डु[14]गण्डश्रि श्यामवक्त्रौ पयोधरौ । गतिं नितान्तमलसां नेत्रे च [15]प्रसृतोज्ज्वले ॥१२२॥
गर्भलक्ष्माणि चाऽन्यानि तस्या व्यक्तानि [16]वर्ष्मणि । दृष्ट्वा **केतुमती** श्वश्रूः साधिक्षेपमदोऽवदत् ॥१२३॥युग्मम्॥
हले! [17]किमिदमाचारीः कुलद्वयकलङ्ककृत् । देशान्तरगते पत्यौ पापे [18]यदुदरिण्यभूः ॥१२४॥
[19]स्वपुत्रे त्वदवज्ञायामज्ञाय्यज्ञानदोषिता । [20]इयच्चिरं त्वमस्माभिर्न हि ज्ञाताऽसि पांसुला ॥१२५॥
एवं निर्भर्त्सिता श्वश्र्वा साश्रुर**ञ्जनसुन्दरी** । पत्युरागमनचिह्नं तदङ्गुलीयमदर्शयत् ॥१२६॥
सा लज्जानम्रमुख्येवं श्वश्र्वा भूयोऽप्यभर्त्स्यत । यस्तेऽग्रहीन्न नामाऽपि कथं ते तेन सङ्गमः ? ॥१२७॥
अङ्गुलीयकमात्रेण प्रतारयसि नः कथम् ? । प्रतारणाप्रकारान् हि बहून् जानन्ति पांसुलाः ॥१२८॥
मद्गृहादद्य निर्गच्छ गच्छ स्वच्छन्दचारिणि! । [21]पितृवेश्मनि माऽत्र स्थाः स्थानमेतत् न [22]हीदृशाम् ॥१२९॥

---

१. वसन्तः ॥ २. ***त्वं मया विज्ञ०*** खंता.१-२, ला.; हे. कां. ला. ॥ ३. पर्यङ्कस्याऽवयवविशेष ईषा ॥ ४. वलयमिवाऽऽचरितेन ॥ ५. निरपराधा ॥ ६. ***क्षमणा०*** खंता.१-२, पाता. ॥ ७. "निपुणाः" इति ला.टि. ॥ ८. ***प्रभातां रात्रिमालोक्य*** पाता. मु. ॥ ९. ***सिद्धार्थः*** ता. ॥ १०. अपवादं दद्युः ॥ ११. ***लङ्कानगरीं*** मु. ॥ १२. "चमूः" इति ला.टि.; सेना ॥ १३. दीप्त्या ॥ १४. ***०गल्लश्रि*** मो. ॥ १५. प्रसृते च ते उज्ज्वले च ॥ १६. शरीरे ॥ १७. ***किमिदमारब्धं*** खंता.१ ॥ १८. गर्भिणी ॥ १९. स्वपुत्रे-पवनञ्जये त्वदवज्ञायां-तव विषये तिरस्कारे तस्यैव अज्ञानदोषोऽद्यपर्यन्तं अज्ञायि-ज्ञातोऽस्माभिः । मत्पुत्रस्याऽज्ञानमेव तव तिरस्कारकरणे कारणमिति मम मान्यताऽऽसीदित्यर्थः ॥ २०. ***इयच्चिरं न त्वस्माभिर्ननु ज्ञाताऽसि पांसुला*** ता. ॥ २१. ***पितुर्वेश्मनि*** मु. ॥ २२. ***हीदृशम्*** ला. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तर्जयित्वाऽ**ञ्जना**मेवं नेतुं पितृनिकेतने । आदिक्षदारक्षनरान् निष्कृपा राक्षसीव सा ॥१३०॥

तां च ते यानमारोप्य **वसन्ततिलका**न्विताम् । **महेन्द्रनगरो**पान्ते नीत्वाऽमुञ्चन्नुदश्रवः ॥१३१॥

तां मातृवन्नमस्कृत्य क्षमयित्वा च ते ययुः । स्वामिवत् स्वाम्यपत्येऽपि सेवकाः समवृत्तयः ॥१३२॥

तद्दुःखदुःखित इव तदा चाऽस्तमगाद् रविः । सन्तः सतां न विपदं विलोकयितुमीश्वराः ॥१३३॥

घूकानां घोरघूत्कारैः फेत्कारैः फेरु[1]योषिताम् । क्रन्दितैर्वृकवृन्दानां श्वा[2]विधां विविधैः स्वनैः ॥१३४॥

तुमुलैः पिङ्[3]गलानां च सङ्गीतैरिव रक्षसाम् । स्फुटत्कर्णेव सा कष्टं तां जाग्रत्यनयन्निशाम् ॥१३५॥युग्मम्॥

प्रातरुत्थाय सा दीना शा[4]लीनेव ह्रिया शनैः । ययौ पितृगृ[5]हद्वारे भिक्षुकीवाऽपरिच्छदा ॥१३६॥

दृष्ट्वा ससम्भ्रमस्तां च प्रतीहारोऽनु[6]युज्य च । अवस्थां तादृशीं सख्याख्यातां राज्ञे व्यजिज्ञपत् ॥१३७॥

[7]लज्जानतश्याममुखो राजाऽप्येवमचिन्तयत् । अचिन्त्यं चरितं स्त्रीणां हि(ही) विपाको विधेरिव ॥१३८॥

इयं कुलकलङ्काय कुलटा गृहमागता । **अञ्जना**ऽञ्जनलेशोऽपि दूषयत्यं[8]शुकं शुचि ॥१३९॥

इति चिन्ताप्रपन्नं तमप्रसन्नीभवन्मुखः । **प्रसन्नकीर्ति**स्तनयो नयनिष्ठोऽब्रवीदिति ॥१४०॥

द्रुतं निर्वास्यतामेषा दूषितं ह्यनया कुलम् । अहिदष्टाङ्गुलिः किं न छिद्यते धीम[9]ता नृणा ? ॥१४१॥

अथाऽवोचन्**महोत्साहो** नाम मन्त्रीति भूपतिम् । श्वश्रूदुःखे दुहितॄणां शरणं शं[10]रणं पितुः ॥१४२॥

किं च **केतुमती** श्वश्रूर्निर्दोषामप्यमूं प्र[11]भो! । निर्वासयेदपि क्रूरा दोषमुत्पाद्य कञ्चन ॥१४३॥

व्यक्तिर्यावद् भवेद् दोषाऽदोषयोस्तावदत्र हि । प्रच्छन्नं पाल्यतामेषा स्वपुत्रीति कृपां कुरु ॥१४४॥

राजाऽपीत्यवदच्छ्वश्रूः सर्वत्र भवतीदृशी । ईदृशं चरितं तु स्याद् वधूनां न हि कुत्रचित् ॥१४५॥

किं च संशृण्महेऽग्रेऽपि द्वेष्येयं **पवन**स्य यत् । गर्भः सम्भाव्यतेऽमुष्याः **पवना**देव तत् कथम् ? ॥१४६॥

सर्वथा दोषवत्येषा साधु निर्वासिता तया । निर्वास्यतामितोऽपि द्राक् पश्यामस्तन्मुखं न हि ॥१४७॥

इत्थं राजाज्ञया द्वाःस्थो निरवासयद**ञ्जना**म् । जनैरपि कृताक्रन्दैर्दीनास्यैः कष्टमीक्षिताम् ॥१४८॥

क्षुधिता तृषिता श्रान्ता निःश्वसन्त्यश्रुवर्षिणी । दर्भविद्ध[12]पदासृग्भी रञ्जयन्ती महीतलम् ॥१४९॥

पदे पदे प्रस्खलन्ती विश्राम्यन्ती तरौ तरौ । सह सख्याऽ**ञ्जना**ऽचालीद् रोदयन्ती दिशोऽपि हि ॥१५०॥

यत्र यत्र पुरे ग्रामे साऽगच्छत् तत्र तत्र च । पूर्वायातनृपपुम्भिर्निषेधान्नाऽऽसदत् स्थितिम् ॥१५१॥

पर्यटन्ती तु सा प्राप कामप्येकां महाटवीम् । गिरिकुञ्जे तरोर्मूले निषद्य विललाप च ॥१५२॥

¶अहो! मे मन्दभाग्याया गुरूणामविचारतः । अग्रे दण्डोऽभवत् पश्चादपराधविवेचनम् ॥१५३॥

साधु **केतुमति**! कुलकलङ्को रक्षितस्त्वया । त्वयाऽपि सम्बन्धिभयात् तात! साधु विचारितम् ॥१५४॥

दुःखितानां हि नारीणां माताऽऽश्वासनकारणम् । पतिच्छ[13]न्दजुषा मातस्त्वयाऽप्यहमुपेक्षिता ॥१५५॥

भ्रातर्दोषोऽपि नाऽस्त्येव ताते जीवति ते ननु । नाथ! त्वयि च[14] दूरस्थे जज्ञे[15] सर्वोऽप्यरिर्मम ॥१५६॥

सर्वथा स्त्री विना नाथं मैकाह[16]मपि जीवतु । यथाऽह[17]मेषा जीवामि मन्दभाग्यशिरोमणिः ॥१५७॥

विलपन्त्य**ञ्जना** सख्या निन्ये सम्बोध्य चाऽग्रतः । ददर्शाऽन्तर्गुहं ध्यानस्थं चाऽ**मितगतिं** मुनिम् ॥१५८॥

चारणश्रमणं तं च प्रणम्य विनयेन ते । निषेदतुः पुरो भूमौ सोऽपि ध्यानमपारयत् ॥१५९॥

मनश्चिन्तितकल्याणमहारामैकसारणिम् । धर्मलाभाशिषं सोऽदात् करमुन्नम्य दक्षिणम् ॥१६०॥

नमस्कृत्य पुनर्भक्त्या **वसन्ततिलका** तु सा । सर्वमप्य**ञ्जना**दुःखमाचख्यौ मूलतोऽपि हि ॥१६१॥

कोऽस्या गर्भेऽभवत् ? केन कर्मणा चेदृशीं दशाम् । सम्प्राप्तैषेति ? तत्सख्या पृष्टः स मुनिरब्रवीत् ॥१६२॥

¶अस्यैव **जम्बूद्वीप**स्य क्षेत्रे **भरत**नामनि । **मन्दरे** नगरे नाम्ना **प्रियनन्दी**त्यभूद् वणिक् ॥१६३॥

**जया**नाम्न्यां च जायायां तस्याऽजायत नन्दनः । **दमयन्तः** प्रियदमः कलानां निधिरिन्दुवत् ॥१६४॥

---

१. शृगालीनाम् ॥ २. 'शाहुडी' इति भाषायाम्; ***श्वापदां*** ला.कां. ॥ ३. नकुलानाम् ॥ ४. ***संलीनेव भिया*** ला.; "अधृष्टेव" ला.टि. ॥ ५. ***पितुर्गृह०*** ता. ॥ ६. "पृष्ट्वा" इति ला.टि. ॥ ७. ***लज्जानतः*** पाता. ला. ॥ ८. वस्त्रम् ॥ ९. ***बुद्धिशालिना*** मु. ॥ १०. गृहम् ॥ ११. ***च भोः!*** ला. ॥ १२. दर्भैर्विद्धयोः पादयोः शोणितैः ॥ १३. पतीच्छानुवर्तिनी ॥ १४. ***विदूरस्थे*** कां. ॥ १५. ***जातः*** पाता. छा. पा. ॥ १६. ***नैकाहमपि*** पाता.; एकदिनमपि न ॥ १७. ***यथाहमेका*** मु. खंभा. पाता. सर्वत्र ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रीडन् सोऽन्येद्युरुद्याने स्वाध्याय-ध्यानतत्परान् । ददर्श साधूंस्तेभ्यश्च धर्मं शुश्राव शुद्धधीः ॥१६५॥
सम्यक्त्वं नियमांश्चाऽथ जग्राह विविधानसौ । यथोचितं च साधुभ्यो ददौ दानमनिन्दितम् ॥१६६॥
तपःसंयमनिष्ठोऽसौ विपद्य क्रमयोगतः । अभूत् कल्पे द्वितीयस्मिन्नमरः परमर्द्धिकः ॥१६७॥
च्युत्वा ततो **जम्बूद्वीपे मृगाङ्कनगरे**[1]शितुः । **प्रियङ्गुलक्ष्म्यां** पुत्रोऽभूद्**हरिचन्द्र**[2]महीपतेः ॥१६८॥
**सिंहचन्द्र** इति ख्यातो जैनं धर्मं प्रपद्य सः । विपद्य क्रमयोगाच्च देव[3]भूयमुपेयिवान् ॥१६९॥
च्युत्वा चाऽत्रैव **वैताढ्ये** नगरे **वारुणे**ऽभवत् । **सुकण्ठराज-कनकोदर्यो**स्तुक्[4] **सिंहवाहनः** ॥१७०॥
भुक्त्वा स सु[5]चिरं राज्यं तीर्थे श्री**विमलप्रभोः** । **लक्ष्मीधर**मुनेः पादमूले व्रतमुपाददे ॥१७१॥
दुस्तपं स तपस्तप्त्वा मृत्वाऽभूल्**लान्तके** सुरः । च्युत्वा ततोऽस्यास्त्वत्सख्या उदरे समवातरत् ॥१७२॥
गुणानामालयश्चाऽयं दोष्मान् विद्याधरेश्वरः । पुत्रश्चरमदेहोऽस्या अनवद्यो भविष्यति ॥१७३॥
¶अन्यच्च **कनकपुरे** नगरेऽभून्नरेश्वरः । नामतः **कनकरथो** म[6]हारथशिरोमणिः ॥१७४॥
पत्न्यौ तस्य च **कनकोदरी लक्ष्मीवती**ति च । अ[7]त्यन्तश्राविका तत्र **लक्ष्मीवत्य**भवत् सदा ॥१७५॥
गृहचैत्ये रत्नमयं जिनबिम्बं विधाय सा । अपूजयदवन्दिष्ट प्रत्यहं कालयोर्द्वयोः ॥१७६॥
मात्सर्यात् **कनकोदर्या** हृत्वाऽर्हत्प्रतिमा तु सा । चिक्षिपेऽव[8]करस्याऽन्तरपवित्रे ह[9]ताशया ॥१७७॥
**जयश्री**र्नाम गणिनी विहरन्त्यागता तदा । तद् दृष्ट्वा तामुवाचैवमकार्षीः किमिदं शुभे! ? ॥१७८॥
भगवत्प्रतिमामत्र प्रक्षिपन्त्या त्वया कृतः । अनेकभवदुःखानामात्माऽयं हन्त भाजनम् ॥१७९॥
इत्युक्ता सानुतापा सा गृहीत्वा प्रतिमां ततः । प्रमृज्य क्षमयित्वा च यथास्थानं न्यवेशयत् ॥१८०॥
तदादि सम्यक्त्वधरा जैनं धर्मं प्रपाल्य च । काले विपद्य **सौधर्मे** कल्पे सा देव्यजायत ॥१८१॥
च्युत्वा ततो **महेन्द्र**स्याऽभूत् सुतेयं सखी तव । अस्यास्तदर्ह[10]दर्चाया दुःस्थानक्षेपजं फलम् ॥१८२॥
अस्यास्तस्मिन् भवे [11]जामिस्त्वमभूस्तस्य कर्मणः । अ[12]नुमन्त्री च त[13]त्पाकमनुभुङ्क्ते सहाऽनया ॥१८३॥
भुक्तप्रायमिदं चाऽस्यास्तस्य दुष्कर्मणः फलम् । गृह्यतां जिनधर्मस्त[14]च्छुभोदर्को भवे भवे ॥१८४॥
आयातो मातुलोऽकस्मादेतां नेता स्ववेश्मनि । मेलकश्चाऽचिरात् पत्या सहैतस्या भविष्यति ॥ १८५॥
एवमुक्त्वाऽऽर्हते धर्मे स्थापयित्वा च ते उभे । समुत्पपात नभसा स मुनीन्द्रः ख[15]गेन्द्रवत् ॥१८६॥
¶अथ पुच्छच्छटाच्छोटैः स्फोटयन्तमिवाऽवनिम् । [16]बूत्कारपूर्णदिक्कुञ्जं [17]कुञ्जरासृक्करालितम् ॥१८७॥
दीपायमाननयनं वज्रकन्दाभदंष्ट्रिकम् । क्रकचक्रूरदशनं ज्वालासोदरकेसरम् ॥१८८॥
लोहाङ्कुशोपमनखं शिलासदृ[18]गुरःस्थलम् । पञ्चाननयुवानं ते[19] समायान्तमपश्यताम् ॥१८९॥त्रिभिर्विशेषकम्॥
ततो वे[20]पथुमत्यौ तौ विवि[21]क्षू इव भूतलम् । [22]कान्दिशीके हरिणिके इव यावदतिष्ठताम् ॥१९०॥
**मणिचूला**भिधस्तावद् गन्धर्वस्तद्गुहाधिपः । विकृत्य [23]शारभं रूपं तं पञ्चास्य[24]मनाशयत् ॥१९१॥
संहृत्य शारभं रूपं स्वं[25] रूपं प्रतिपद्य च । तयोः प्रमोदाय जगौ सप्रियोऽर्हद्गुणस्तुतिम् ॥१९२॥
तेन चाऽमुक्तसान्निध्ये गुहायां तत्र सुस्थिते । **मुनिसुव्रत**देवार्चां स्थापयित्वाऽर्चतः स्म ते ॥१९३॥
¶अन्येद्युः सुषुवे तत्र सिंही सिंहमिवोत्कटम् । कुलिशा-ऽङ्कुश-चक्राङ्कपादं तनय**मञ्जना** ॥१९४॥
तस्याश्च सूतिकर्माणि **वसन्ततिलका**ऽकरोत् । स्वयं समाहृतैर्हर्षवशादेधोजलादिभिः ॥१९५॥
आरोप्य सुतमुत्सङ्गे दुःखिताऽ**ञ्जनसुन्दरी** । उदश्रुवदनाऽरोदीद् रोदयन्तीव तां गुहाम् ॥१९६॥
महात्मन्नत्र विपिने तव जातस्य कीदृशम् । जन्मोत्सवं करोम्येषा वराकी पुण्यवर्जिता ? ॥१९७॥
[26]एवं तां रुदतीं प्रेक्ष्य समुपेत्य च खेचरः । **प्रतिसूर्यो** मधुरगीरपृच्छद् दुःखकारणम् ॥१९८॥

---

१. ***स मृगाङ्कपुरेशितुः*** छा. पा. ॥ २. ***०द्धरिश्चन्द्र०*** खंता.१, पाता. ॥ ३. देवत्वम् ॥ ४. पुत्रः ॥ ५. ***तु चिरं*** ता. ॥ ६. "धनुर्वेदस्य तत्त्वज्ञः, सर्वयोधगुणान्वितः। सहस्रं योधयत्येकः, स महारथ उच्यते ॥" इति ला. टि. ॥ ७. ***अत्यन्तं*** पाता. ॥ ८. 'उकरडो' इति भाषा ॥ ९. हतचित्ता ॥ १०. अर्हत्प्रतिमायाः ॥ ११. भगिनी ॥ १२. "अनुमोदयित्री" इति ला. टि. ॥ १३. तद्विपाकम् ॥ १४. शुभपरिणामः ॥ १५. गरुडवत् ॥ १६. ***क्षूत्कार०*** पाता. ॥ १७. गजशोणितेन भयङ्करम् ॥ १८. ***शिलासदृग्गुरःस्थलं*** रसंपा. ॥ १९. ***तं*** ता. ॥ २०. कम्पमाने ॥ २१. प्रवेष्टुमिच्छुके ॥ २२. भयत्रस्ते ॥ २३. अष्टापदरूपम् ॥ २४. ***०मपानयत्*** मो. ॥ २५ ***स्वरूपं*** ता. ॥ २६. ***एवं रुदतीमश्रान्तमुदश्रुं प्रेक्ष्य खेचरः*** खंता.१-२, ला. मो. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाऽऽविवाहादापुत्रजन्माऽऽचख्यावशेषतः । **अञ्जनाया** दुःखहेतुं बाष्पायितमुखी सखी ॥१९९॥
सद्यो रुदन् सोऽप्यवादीदहं **हनुपुरे**श्वरः । एषोऽस्मि **सुन्दरीमाला**कुक्षिभूश्चि**त्रभानुजः** ॥२००॥
भ्राता **मानसवेगा**ख्यस्त्वज्जनन्याश्च बालिके! । दिष्ट्या त्वां दृष्टवानस्मि जीवन्तीमाश्वसिह्यतः ॥२०१॥युग्मम् ॥
तं मातुलं विदित्वा साऽप्यरोदीदधिकाधिकम् । पुनर्नवीभवेत् प्रायो दुःखमिष्टावलोकनात् ॥२०२॥
रुदन्तीं वारयित्वा तां **प्रतिसूर्यः** सहागतम् । सूनोर्जन्मादि पप्रच्छ दैवज्ञमथ सोऽवदत् ॥२०३॥
भाव्यवश्यं महाराजो भवे चाऽत्रैव सेत्स्यति । शुभग्रहबले लग्ने जातोऽयं पुण्यभाक् शिशुः ॥२०४॥
तथाहि तिथिर्[1]द्येयं चैत्रस्य बहुलाष्टमी । नक्षत्रं श्रवणं स्वामी वासरस्य वि[2]भावसुः ॥२०५॥
आदित्यो वर्तते मेषे भुवनं तुङ्गमाश्रितः । चन्द्रमा मकरे मध्ये[3] भवने समवस्थितः ॥२०६॥
लोहि[4]ताङ्गो वृषे[5] म[6]ध्ये मध्ये मीने विधोः सु[7]तः । [8]कुलीरे धि[9]षणोऽ[10]त्युच्चैरध्यास्य भवनं स्थितः ॥२०७॥
[11]मीने [12]दैत्यगुरुस्तुङ्गस्तस्मिन्नेव शनैश्चरः । मीनलग्नोदये ब्रह्मयोगे सर्वमिदं शुभम् ॥२०८॥चतुर्भिः कलापकम्॥
¶**प्रतिसूर्यो**ऽथ [13]जामेयीं ससखीं सात्मजां च ताम् । विमानवरमारोप्य प्रतस्थे स्वपुरं प्रति ॥२०९॥
विमाने लम्बमानोच्चरत्नप्रालम्बकिङ्किणीः । जि[14]घृक्षुर्मातुरुत्सङ्गादुत्पपाताऽथ बालकः ॥२१०॥
पपात च गिरेर्मूर्ध्नि व्योम्नः पविरिव च्युतः । तत्पातनिर्घा[16]तवशात् स गिरिः कणशोऽभवत् ॥२११॥
आजघ्ने हृदयं सद्यः पाणिनाऽञ्जनसुन्दरी । [15]दरीरपि प्रतिरवै रोदयन्ती रुरोद च ॥२१२॥
**प्रतिसूर्यो**ऽनु[17]पत्याऽऽशु भागिनेय्यास्तमर्भकम् । अक्षताङ्गमुपादायाऽर्पयन्न[18]ष्टनिधानवत् ॥२१३॥
**प्रतिसूर्यो** विमानेन मनोवेगेन तद्युतः । ययौ पुरे **हनुरुहे** सद्यः कृतमहोत्सवे ॥२१४॥
नीत्वा चोत्तारयामास स्ववेश्मन्य**ञ्जनां** मुदा । कुलदेवीमिवाऽऽयातां तच्छु[19]द्धान्तोऽप्यपूजयत् ॥२१५॥
पुरे **हनुरुहे** यस्माज्जातमात्रोऽयमाययौ । तत् सूनोर्मातुलश्चक्रेऽभिधानं **हनुमा**निति ॥२१६॥
यच्छैलश्चूर्णितोऽनेन पतितेन विमानतः । ततः **श्रीशैल** इत्याख्यां तस्याऽन्यामपि सोऽकरोत् ॥२१७॥
**हनुमान**प्यवर्धिष्ट तत्र क्रीडन् यथासुखम् । राजहंसार्भक इव मानसाम्भोजिनीवने ॥२१८॥
दोषोऽध्यारोपितः श्वश्र्वा कथं नामोत्तरिष्यति ? । स[20]दैवं चिन्तयाऽताम्यदन्तःशल्येव चाऽ**ञ्जना** ॥२१९॥
¶इतश्च **पवनः** सन्धिं विधाय **खर-दूषणौ । वरुणा**न्मोचयामास तोषयामास **रावण**म् ॥२२०॥
ततश्च **रावणो लङ्कां** जगाम सपरिच्छदः । **पवनो**ऽपि तमापृच्छ्य स्वमेव पुरमाययौ ॥२२१॥
प्रणम्य पितरौ तत्राऽ**ञ्जना**वासगृहं ययौ । तच्चाऽ[21]**नञ्जन**मद्राक्षीद् गतज्योत्स्नमिवोडुपम् ॥२२२॥
क्वाऽ**ञ्जना** सा नयनयोरमृताञ्जनदर्शना । मत्प्रेयसीति तत्रस्थामेकां पप्रच्छ [22]च स्त्रियम् ॥२२३॥
साऽप्याख्यत् त्वयि यात्रायां गतेऽहस्सु कियत्स्वपि । निर्वासिता **केतुमत्या** गर्भसम्भवदोषतः ॥२२४॥
**महेन्द्रनगरा**सन्ने सा नीत्वाऽऽरक्षपूरुषैः । अरण्ये मुमुचे पापैर्हरिणीव भयाकुला ॥२२५॥
इति श्रु[23]त्वा च **पवनो** ययौ पवनरंहसा । पारापत इव प्रे[24]यस्युत्कः श्वशुरपत्तनम् ॥२२६॥
प्रियामपश्यंस्तत्राऽपि पप्रच्छैकां स योषितम् । इहाऽ**ञ्जना** प्रेयसी मे किमायाताऽथवा न हि ? ॥२२७॥
साऽऽचख्याविह साऽऽयासीद् **वसन्ततिलका**न्विता । परं निर्वासिता पित्रोत्पन्नदौःशील्यदोषतः ॥२२८॥
पविनेवाऽऽहतस्तेन वचसा **पवनञ्जयः** । प्रियामन्वेष्टुमभ्राम्यद् भृशं शैल-वनादिषु ॥२२९॥
तत्प्रवृत्तिं च न प्राप शापभ्रष्ट इवाऽमरः । विषण्णः स जगादैवं मित्रं **प्रहसितं** निजम् ॥२३०॥
सखे! गत्वा शंस पित्रोर्भ्राम्यताऽपि महीमिमाम् । मयाऽद्य यावदालोकि न क्वाऽप्यञ्ज**नसुन्दरी** ॥२३१॥
पुनर्गवेषयिष्यामि तामरण्ये तपस्विनीम् । द्रक्ष्यामि चेत् साधु तर्हि नो चेद् वे[25]क्ष्यामि पावकम् ॥२३२॥

१. ***सुतिथिरयं*** ला.; ***सुतिथिरियं*** मु. ॥ २. सूर्यः ॥ ३. "सर्वेऽपि ग्रहा अर्ध-भुक्ता वर्तन्ते" ला.टि. ॥ ४. मङ्गलः ॥ ५. ***०वृषे कन्यामध्यासीनो विधो०*** ता. ॥ ६. ***मध्यो मध्यो*** इति रसंपा. ॥ ७. बुधः ॥ ८. कर्कराशौ ॥ ९. गुरुः ॥ १०. ***०ऽभ्युच्चै०*** ता. ॥ ११. ***मीने स्थितो दैत्य०*** ला. ॥ १२. शुक्रः ॥ १३. भगिनीपुत्रीम् ॥ १४. ग्रहीतुमिच्छुः ॥ १५. गुहाः ॥ १६. प्रतिघोषैः ॥ १७. धावित्वा ॥ १८. ***०न्निष्ट०*** मो. ॥ १९. "अन्तःपुरं" ला.टि. ॥ २०. ***सदैवं*** ता. ॥ २१. अञ्जनारहितम् ॥ २२. ***वेत्रिणीम्*** मो. ॥ २३. ***श्रुत्वाऽथ*** मु. खंता. पाता.प्रभृतिषु ॥ २४. प्रियायामुत्सुकः ॥ २५. प्रवेशं करिष्यामि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमुक्तः **प्रहसितो** गत्वाऽऽ**दित्यपुरे** द्रुतम् । **प्रह्लाद-केतुमत्यो**स्तत् कथयामास [1]वाचिकम् ॥२३३॥
श्रुत्वा **केतुमती** तच्च [2]ग्राव्णेव हृदये हता । मूर्छिता न्यपतद् भूमौ सञ्ज्ञां लब्ध्वेत्युवाच च ॥२३४॥
स किं त्वया **प्रहसित!** [3]व्यापत्तौ कृतनिश्चयः । प्रियमित्रं वने मुक्त एकाकी कठिनाशय! ॥२३५॥
अथवा किं मया साऽपि निर्दोषा परमार्थतः । अविमृश्य विधायिन्या पापिन्या निरवास्यत ॥२३६॥
लब्धं मयाऽत्रैव साध्व्या दोषारोपणजं फलम् । अत्युग्रपुण्य-पापानामिहैव ह्याप्यते फलम् ॥२३७॥
एवं रुदन्तीं **प्रह्लाद**स्तां निवार्य कथञ्चन । चचाल सबलः सूनुमन्वेष्टुं [4]स इवाऽ**ञ्जनाम्** ॥२३८॥
सर्वविद्याधरेन्द्राणामाप्तानां चाऽन्तिके नरान् । **अञ्जना-पवना**न्वेषहेतवे प्रजिघाय सः ॥२३९॥
सह विद्याधरैः सूनुं स्नुषां चाऽऽलोकयन् स्वयम् । प्रादुर्भूतत्वरो भ्राम्यन् सोऽगाद् **भूतवनं** वनम् ॥२४०॥
**पवनो**ऽत्राऽन्तरे तत्र विरचय्य चितां वने । ज्वलनं ज्वालयामास **प्रह्लाद**स्तं ददर्श च ॥२४१॥
[5]स्थित्वोपचितं **पवनः** प्रोचे हे वनदेवताः! । विद्याधरेन्द्र**प्रह्लाद-केतुमत्योः** सुतोऽस्म्यहम् ॥२४२॥
महासत्य**ञ्जना** नाम पत्नी मे सा च दुर्धिया । निर्दोषाऽपि मयोद्वाहात् प्रभृत्यपि हि खेदिता ॥२४३॥
तां परित्यज्य यात्रायां चलितः स्वामिकार्यतः । दैवाज्ज्ञात्वा तामदोषामुत्पत्य पुनरागमम् ॥२४४॥
रमयित्वा च तां स्वैरम[6]भिज्ञानं समर्प्य च । पितृभ्यामपरिज्ञातः पुनः कटकमापतम् ॥२४५॥
जातगर्भा च सा कान्ता मद्दोषाद् दोषशङ्किभिः । निर्वासिता मे गुरुभिः क्वाऽप्यस्तीति न बुध्यते ॥२४६॥
साऽग्रेऽधुना च निर्दोषा सम्प्राप्ता दारुणां दशाम् । ममैवाऽज्ञानदोषेण धिग्धिक् पतिमपण्डितम् ॥२४७॥
मया भ्रान्त्वाऽखिलां पृथ्वीं सम्यङ् [7]मार्गयताऽपि हि [8] । [9]न साऽऽप्ता मन्दभाग्येन रत्नं रत्नाकरे यथा ॥२४८॥
तदद्य स्वां तनुमिमां जुहोम्यत्र हुताशने । जीवतो मे यावज्जीवं दुःसहो विरहानलः ॥२४९॥
यदि पश्यथ मे कान्तां ज्ञापयध्वं तदा ह्यदः । त्वद्वियोगात् तव पतिः प्रविवेश हुताशने ॥२५०॥
इत्युक्त्वा तत्र [10]चित्यायां दीप्यमाने हविर्भुजि । झम्पां प्रदातुं **पवनः** प्रोत्पपात नभस्तले ॥२५१॥
[11]श्रुततद्वचनो वेगात् **प्रह्लादो**ऽप्यतिसम्भ्रमी । [12]वक्षःस्थलोपपीडं तं स्वबाहुभ्यामधारयत् ॥२५२॥
मृत्योः प्रियवियोगार्ति[13]प्रतिकारस्य सम्प्रति । को [14]विघ्नोऽयं ममेत्युच्चैरुवाच **पवनञ्जयः** ॥२५३॥
**प्रह्लादो**ऽप्यब्रवीत् साश्रुरेष पापोऽस्मि ते पिता । [15]निर्दोषाया यः स्नुषाया निर्वासनमुपैक्षत ॥२५४॥
अविमृश्य कृतं तावत् त्वन्मात्रैवैकमादितः । द्वितीयं मा कृथास्त्वं तु स्थिरीभव सुधीरसि ॥२५५॥
स्नुषान्वेषणहेतोश्चाऽऽदिष्टाः सन्ति सहस्रशः । विद्याधरा मया वत्साऽऽ[16]गमयस्व तदागमम् ॥२५६॥
¶अत्राऽन्तरे तत्प्रहिताः केऽपि विद्याधरोत्तमाः । गवेषयन्तः **पवनाञ्जने हनुपुरं** ययुः ॥२५७॥
**प्रतिसूर्याञ्जन**योस्तेऽ**ञ्जना**विरहदुःखतः । **पवन**स्याऽग्निप्रवेशप्रतिज्ञामाचचक्षिरे ॥२५८॥
दुःश्रवं तद्वचः श्रुत्वा पीत्वा विषमिवाऽ**ञ्जना** । हा हताऽस्मीति जल्पन्ती पपात भुवि मूर्च्छिता ॥२५९॥
आसिक्ता चन्दनाम्भोभिस्तालवृन्तैश्च वीजिता । लब्धसञ्ज्ञा समुत्थाय सा रुरोदेति दीनगीः ॥२६०॥
पतिव्रताः पतिशोकात् प्रविशन्ति हुताशने । तासां विना हि भर्तारं दुःखाय खलु जीवितम् ॥२६१॥
नारीसहस्रभोक्तॄणां भर्तॄणां श्रीमतां पुनः । क्षणिकः प्रेयसीशोकस्तत्कुतोऽग्निप्रवेशनम् ॥२६२॥
विपरीतमिदं जज्ञे त्वयि वह्निप्रवेशिनि । विरहेऽपि मयि पुनर्हा जीवन्त्यामियच्चिरम् ॥२६३॥
महासत्त्वस्य तस्याऽल्पसत्त्वायाश्च ममाऽन्तरम् । उपलब्धमिदं [17]नीलं-काचयोरिव सम्प्रति ॥२६४॥
न मे श्वशुरयोर्दोषो दोषः पित्रोर्न चाऽप्ययम् । ममैव मन्दभाग्यायाः कर्मदोषोऽयमीदृशः ॥२६५॥
रुदन्तीं बोधयित्वा तां **प्रतिसूर्यः** सनन्दनाम् । विमानवरमारोप्य **पवना**न्वेषणे ययौ ॥२६६॥
स भ्राम्यन् प्राप तत्रैव वने **भूतवना**भिधे । दूरादपि **प्रहसिते**नेक्षाञ्चक्रे च साश्रुणा ॥२६७॥

१. सन्देशवाचम् ॥ २. पाषाणखण्डेन ॥ ३. मरणाय ॥ ४. पवनञ्जय इव ॥ ५. चितासमीपम् ; ***स्थित्वोपचित्यं*** रसंपा. ॥ ६. चिह्नम् ॥ ७. ***सम्यग् मार्गयिताऽपि*** हे. ला. मो. ॥ ८. ***न*** पाता. ॥ ९. ***सा प्राप्ता*** पाता.; ***न प्राप्ता*** मो. ॥ १०. चितायाम् ॥ ११. ***श्रुत्वा तद्वचनो*** मो. ॥ १२. वक्षःस्थले उपपीड्य ॥ १३. ***प्रतीकारस्य*** मु. ॥ १४. ***विघ्नो ह्ययं*** ला. ॥ १५. ***निर्दोषायां यः स्नुषायां*** ला. ॥ १६. "प्रतीक्षस्व तदागमनं" ला. टि. ॥ १७. नीलमणेः काचस्य च ॥

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

साञ्जनं तं समायान्तमारात् **प्रहसितः** स तु । आख्यत् **प्रह्लाद-पवनञ्जय**योर्जयपूर्वकम् ॥२६८॥
ततो विमानादुत्तीर्य **प्रतिसूर्यो**ऽञ्जनाऽपि च । **प्रह्लादं** नेमतुर्दूराद् भक्त्या भून्यस्तमस्तकौ ॥२६९॥
**प्रतिसूर्यं** परिष्वज्य पौत्रमङ्के निवेश्य च । **प्रह्लादो** जातसंह्लादो जगादैवं ससम्भ्रमः ॥२७०॥
मज्जन्तं व्यसनाम्भोधौ मामद्य सकुटुम्बकम् । समुद्धरंस्त्वमेवाऽसि बन्धुः सम्बन्धिनां धुरि ॥२७१॥
मद्वंश[१]पर्वभूतेयं शाखासन्तानकारणम् । स्नुषा त्यक्ता विना दोषं साध्वियं रक्षिता त्वया ॥२७२॥
सद्यो व्यसनवेलाया न्यवर्तत पयोधिवत् । प्रशान्तशोकज्वलनो मुदितः **पवनो**ऽपि हि ॥२७३॥
विद्यासामर्थ्यतस्तत्र [२]सर्वे विद्याधरेश्वराः । महान्तमुत्सवं चक्रुरानन्दाब्धिनिशाकरम् ॥२७४॥
पुरं [३]**हनुरुहं** जग्मुस्ततः सर्वेऽपि ते मुदा । विमानैर्विदधानाः स्वैर्दिवं ज्योतिष्मतीमिव ॥२७५॥
**महेन्द्रो**ऽप्याययौ तत्र समं **मानसवेगया** । सा च **केतुमती** देवी सर्वेऽप्यन्ये च बान्धवाः ॥२७६॥
विद्याधरेन्द्रैर्विदधे मिथः सम्बन्धिबन्धुभिः । पूर्वोत्सवादप्यधिकस्तत्राऽपि हि महोत्सवः ॥२७७॥
ततश्चाऽन्योऽन्यमापृच्छ्य सर्वे स्वं स्वं पुरं ययुः । तत्रैव **पवनस्तस्थावञ्जना-हनुमद्यु**तः ॥२७८॥
**हनुमान्** ववृधे तत्र पितुः सह मनोरथैः । कलाश्च जगृहे सर्वा विद्याश्च समसाधयत् ॥२७९॥
नागराजायतभुजः शस्त्र-शास्त्रविचक्षणः । क्रमाच्च यौवनं प्राप **हनुमान्** भानुमांस्त्विषा ॥२८०॥
¶इतश्चा[४]ऽमर्षणप्रष्ठो **रावणः** सन्धिदूषणम् । उत्पाद्य **वरुणं** जेतुं प्रतस्थे [५]स्थेमपर्वतः ॥२८१॥
दूताहुतास्ततश्चेयुः सर्वे विद्याधरेश्वराः । कटकं तस्य कुर्वन्तो वैताढ्य[६]कटकोपमम् ॥२८२॥
**पवन-प्रतिसूर्यौ** तौ तत्र यावत् प्रचेलतुः । इत्यूचे **हनुमां**स्तावदवष्टम्भै[७]कसानुमान् ॥२८३॥
इहैव [८]तिष्ठतं तातौ जेष्याम्यहमपि द्विषः । प्रहरेद् बाहुना को हि तीक्ष्णे प्रहरणे सति ? ॥२८४॥
बालत्वान्नाऽनुकम्प्योऽस्मि यद्युष्मत्कुलजन्मनाम् । पौरुषावसरे प्राप्ते न प्रमाणं वयः खलु ॥२८५॥
एवं तावतिनिर्बन्धात् [९]प्रतीक्ष्याऽऽपृच्छ्य चोच्चकैः । ताभ्यां च चुम्बितो मूर्ध्नि कृतप्रस्थानमङ्गलः ॥२८६॥
महासामन्तसेनानीसेनाशतसमावृतः । प्रययौ **रावण**स्कन्धावारे दुर्वारविक्रमः ॥२८७॥युग्मम्॥
**हनूमन्तं** [१०]समायातं दृष्ट्वा जयमिव स्वयम् । प्रणमन्तं मुदा स्वाङ्के निदधे **दशकन्धरः** ॥२८८॥
अभ्यर्णे **वरुण**पुर्यास्तस्थौ युद्धाय **रावणः** । **वरुणो** [११]**वारुणय**श्च दोष्मन्तो निर्ययुः शतम् ॥२८९॥
अभ्येत्य योधयामासू **रावणं वरुणा**त्मजाः । **सुग्रीवा**द्यैः समं वीरैर्युयुधे **वरुणो**ऽपि हि ॥२९०॥
महौजसो **वारुणयो**ऽरुणाक्षा **दशकन्धरम्** । जात्यश्वा[१२]न इव क्रोडं खेदयामासुराहवे ॥२९१॥
¶अत्राऽन्तरे च **हनुमान्** दारुणो **वरुणा**त्मजान् । कुञ्जरान् केशरीवैत्याऽयोधयत् क्रोधदुर्धरः ॥२९२॥
विद्यासा[१३]मर्थ्यतोऽस्तम्भाद् **वारुणीं**स्तान् बबन्ध च । पशूनिव क्रुधा रक्तहनुको **हनुमानथ** ॥२९३॥
तान् दृष्ट्वा **वरुणः** क्रुद्धोऽभ्यधाविष्ट **हनूमते** । **सुग्रीव**प्रभृतीन् धुन्वन् दन्ती मार्गतरूनिव ॥२९४॥
**रावणो**ऽप्यापतन्तं तं नदीर[१४]यमिवाऽचलः । अन्तरा स्खलयामास वर्षन् विशि[१५]खधोरणीम् ॥२९५॥
वृषभो वृषभेणेव कुञ्जरेणेव कुञ्जरः । **वरुणो रावणे**नोच्चैः क्रोधान्धो युयुधे चिरम् ॥२९६॥
सर्वौजसाऽऽकुलीकृत्य **वरुणं रावण**श्छली । उत्पत्येन्द्रमिवाऽबध्नात् सर्वत्र बलवच्छलम् ॥२९७॥
ततो जयजयारावैर्मुखरीकृतदिङ्मुखः । स्कन्धावारं पृथुस्कन्धो जगाम **दशकन्धरः** ॥२९८॥
**रावणो वरुणं** तत्र सह पुत्रैर्वशं[१६]वदम् । मुमोच प्रणिपातान्तः प्रकोपो हि महात्मनाम् ॥२९९॥
पुत्रीं **सत्यवतीं** नाम **वरुणो**ऽदाद्**धनूमते** । दृष्टसारः स्वयं हीदृग् जामाता खलुः दुर्लभः ॥३००॥
**लङ्कायां रावणो**ऽथागादादत्त च **हनूमते** । **हृष्टश्चन्द्रणखापुत्रीमनङ्गकुसुमा**भिधाम् ॥३०१॥
**सुग्रीवेण पद्मरागा नलेन हरिमालिनी** । अन्यैः सहस्रसङ्ख्याश्च तस्मै दत्ताः स्वकाः सुताः ॥३०२॥

---

१. *मद्वंशपूर्व०* ता. ॥ २. *सर्वविद्या०* मु., खंता.१प्रभृतिषु ॥ ३. *हनुपुरं* पाता. ॥ ४. क्रोधकारिषु धुर्यः ॥ ५. स्थैर्यपर्वतः ॥ ६. गिरिमध्यभागः ॥ ७. मानपर्वतः ॥ ८. *तिष्ठतां तातौ* हे. कां. मो. ॥ ९. पूजयित्वा ॥ १०. *समायान्तं* ता. ॥ ११. वरुणपुत्राः; *वारुणेयाश्च* मु. ॥ १२. जात्याः श्वानः-सारमेयाः इव शूकरम् ॥ १३. *०सामर्थ्यतो यत्नाद्* कां. मो. ॥ १४. *नदीपूरमिवा०* कां. ॥ १५. *विशिखघोरणीः* छा. मो. पा. ता.; बाणश्रेणिम् ॥ १६. वशीभूतम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्लिष्ट्वा [1]दृढं **दशमुखेन** मुदा विसृष्टो
दोष्मानथो **हनुपुरे हनुमान्** जगाम ।
अन्येऽपि वानरपतिप्रमुखाः प्रजग्मु-
र्विद्याधरा निजनिजं नगरं प्रहृष्टाः ॥३०३॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
[2]सप्तमे पर्वणि **हनुमदु**त्पत्ति-**वरुण**साधनो
नाम तृतीयः सर्गः॥

१. *मुखं* खंता.१ ॥ २. *सप्तमपर्वणि* खंता.१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥चतुर्थः सर्गः॥

इतश्च **मिथिलापुर्यां हरिवंशे** महीपतिः । आसीद् **वासवकेत्वा**ख्यो **विपुला** तस्य च प्रिया ॥१॥

तयोः सूनुरनूनश्रीर्बभूव भुवि विश्रुतः । प्रजानां जनक इव **जनको** नाम पार्थिवः ॥२॥

¶इतश्च पु**र्ययोध्यायामृषभस्वामि**राज्यतः । **इक्ष्वाकु**वंशान्तर्भूताऽऽ**दित्यवंशे**षु राजसु ॥३॥

यातेषु केषुचिन्मोक्षं स्वर्गं यातेषु केषुचित् । सङ्ख्यातीतेषु विंशस्याऽर्हतस्तीर्थे प्रसर्पति ॥४॥

बभूव **विजयो** राजा **हिमचूला** च तत्प्रिया । तयोरभूतां द्वौ पुत्रौ **वज्रबाहु-पुरन्दरौ** ॥५॥त्रिभिर्विशेषकम्॥

¶इतश्चाऽभून्**नागपुरे** पुरे राजे**भवाहनः** । **चूडामणि**श्च तत्पत्नी तत्पुत्री च **मनोरमा** ॥६॥

गत्वोद्यद्यौवनां **वज्रबाहुः** परिणिनाय ताम् । [1]महेन महता [2]श्वेतमरीचिरिव रोहिणीम् ॥७॥

भक्त्या च श्यालेनो**दयसुन्दरे**णाऽनुगामिना । **मनोरमा**मथाऽऽदाय प्रतस्थे स्वपुराय सः ॥८॥

स गच्छन्नन्तराऽपश्यत् तपस्तेजोभिरीश्वरम् । **वसन्ताद्रि**स्थमुदयाचलस्थमिव भास्करम् ॥९॥

[3]मोक्षाध्ववीक्षकमिवो[4]त्पश्यमातापनापरम् । **गुणसागर**नामानं तपस्यन्तं महामुनिम् ॥१०॥युग्मम्॥

मयूर इव जीमूतं तं दृष्ट्वा [5]जातसम्मदः । कुमार इदमाह स्म धृत्वा सपदि वाहनम् ॥११॥

अहो! महात्मा कोऽप्येष वन्द्य एव महामुनिः । चिन्तामणिरिव [6]मया दृष्टः पुण्येन भूयसा ॥१२॥

उवाच चैव**मुदयसुन्दरो**ऽथ कुमार! किम् । [7]आदित्ससे परिव्रज्यां ? सोऽवदच्चित्तमस्ति मे ॥१३॥

**उदयो** नर्मणा भूयः प्रोचे यद्यस्ति ते मनः । तदद्य मा विलम्बस्व सहायोऽहमपीह ते ॥१४॥

कुमारो व्याजहारैवं मर्यादामिव वारिभिः । मा त्याक्षीः स्वामिमां [8]सन्धां [9]सोऽप्यामेत्यभ्यभाषत ॥१५॥

कुमारो वाहनान्मोहादिवोत्तीर्याऽऽरुरोह तम् । **वसन्तशैलमुदयसुन्दरा**दिभिरावृतः ॥१६॥

**वज्रबाहु**मथाऽवादी**दिभवाहन**नन्दनः । स्वामिन्! मा प्रव्राजीरद्य [10]धिग् मां नर्माभिभाषिणम् ॥१७॥

नर्मोक्तिरावयोरासीत् को दोषस्तद्व्यतिक्रमे । नर्मोक्तिर्न हि सत्यैव प्रायो धवलगीतवत् ॥१८॥

भविष्यसि सहायस्त्वं व्यसनेष्वखिलेष्वपि । इत्यकाण्डेऽपि मा भाङ्क्षीरस्मत्कुलमनोरथान् ॥१९॥

इदमद्याऽपि [11]मङ्गल्यं तव हस्तेऽस्ति कङ्कणम् । तद् विवाहफलं भोगान् सहसा कथमुज्झसि ? ॥२०॥

सांसारिकसुखास्वादं[12]वञ्चितेयं **मनोरमा** । जीविष्यति कथं नाथ! त्वया तृणवदुज्झिता ? ॥२१॥

**वज्रबाहु**कुमारोऽथ जगादो**दयसुन्दर**म् । सुन्दरं मर्त्यजन्मद्रोः फलं चारित्रलक्षणम् ॥२२॥

नर्मोक्तिरपि तेऽस्मासु बभूव [13]परमार्थसात् । शुक्तिषु स्वातिजीमूतवारि मौक्तिकसादिव ॥२३॥

त्वत्स्वसा च कुलीना चेत् तत् प्रव्रज्यां ग्रहीष्यति । नो चेदस्याः शिवः पन्था भोगैः पुनरलं मम ॥२४॥

तद् व्रतायाऽनुमन्यस्व मां त्वमप्यनुयाहि [14]च । कुलधर्मः क्षत्रियाणां स्वसन्धापालनं खलु ॥२५॥

**उदयं** प्रतिबोध्यैवं **वज्रबाहु**रुपाययौ । सागरं गुणरत्नानां महर्षिं **गुणसागरम्** ॥२६॥

तत्पादान्ते **वज्रबाहुः** परिव्रज्यामुपाददे । **उदयो मनोरमा**ऽथ कुमाराः पञ्चविंशतिः ॥२७॥

**वज्रबाहुं** प्रव्रजितं श्रुत्वा **विजय**भूपतिः । वरं बालोऽप्यसौ नाऽहमिति वैराग्यमासदत् ॥२८॥

ततश्च **विजयः** पुत्रं राज्ये न्यस्य **पुरन्दरम्** । **निर्वाणमोह**स्य मुनेः पार्श्वे व्रतमुपाददे ॥२९॥

**पुरन्दरो**ऽपि स्वे राज्ये **पृथिवी**कुक्षिजं सुतम् । न्यस्य **कीर्तिधरं क्षेमङ्कर**र्ष्यन्तेऽभवद् यतिः ॥३०॥

---

१. महोत्सवेन ॥ २. चन्द्रः ॥ ३. *मोक्षाध्वमीक्षक०* मु. ॥ ४. ऊर्ध्वं द्रष्टारम् ॥ ५. जातहर्षः ॥ ६. *ह्येष* खंता. ला. ॥ ७. आदातुमिच्छसि ॥ ८. प्रतिज्ञाम् ॥ ९. *सोऽप्यामेत्यन्वभाषत* ता.; *सोऽप्यामेवेत्यभाषत* ला. हे. कां. मो. प्रभृतिषु, मु. ॥ १०. *धिग् मे नर्मातिभाषणं* ला.; *धिग् मे नर्माभिकारणं* खंता.१; *धिग् मे नर्माभिभाषणं* मु. ॥ ११. *माङ्गल्यं* मु. ॥ १२. *वन्धितेयं* खंता.१ ॥ १३. परमार्थरूपा ॥ १४. *नः* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶अथ **कीर्तिधरो** [१]राजाऽभुक्त वैषयिकं सुखम् । **सहदेव्या** समं पत्न्या पौलोम्येव पुरन्दरः ॥३१॥
प्रविव्रजिषुरन्येद्युः स मन्त्रिभिरभण्यत । तवाऽनुत्पन्नपुत्रस्य न व्रतादान[२]मर्हति ॥३२॥
[३]त्वय्यपुत्रे व्रतभाजि [४]निर्नाथेयं वसुन्धरा । तत् प्रतीक्षस्व यावत् ते स्वामिन्नुत्पद्यते सुतः ॥३३॥
ततः **कीर्तिधर**स्याऽपि तथैव गृहवासिनः । काले गच्छत्यभूत् पुत्रः **सहदेव्यां** [५]**सुकोशलः** ॥३४॥
ज्ञात्वा जातमिमं बालं पतिर्मे प्रव्रजिष्यति । **सहदेवी**ति बुद्ध्या तं जातमात्रमगोपयत् ॥३५॥
विवेद मेदिनीनाथ[६]स्तं गुप्तमपि बालकम् । प्राप्तोदयं हि तरणिं तिरोधातुं क ईश्वरः ? ॥३६॥
राजाऽथ स्वार्थकुशलो राज्ये न्यस्य [७]**सुकोशलम्** । सूरे**र्विजयसेन**स्य पादान्ते व्रतमाददे ॥३७॥
तप्यमानस्तपस्तीव्रं सहमानः परीषहान् । [८]स गुर्वनुज्ञयैकाकिविहारेणाऽन्यतो ययौ ॥३८॥
¶**साकेत**मन्यदा मासोपवासी पारणेच्छया । स आजगाम भिक्षार्थं मध्याह्ने तत्र चाऽभ्रमत् ॥३९॥
सौधाग्रस्था **सहदेवी** तं च दृष्ट्वेत्यचिन्तयत् । पत्यौ प्रव्रजितेऽमुष्मिन् पतिहीना पुराऽभवम् ॥४०॥
वत्सः [९]**सुकोशलो**ऽप्यद्य दृष्ट्वैनं प्रव्रजेद् यदि । [१०]तदा पुत्रोऽपि मे न स्यान्निर्वीरा[११] स्यां ततः परम् ॥४१॥
तस्मान्निरपराधोऽपि भर्ताऽपि व्रतधार्यपि । निर्वास्यो नगरात् सूनो राज्यस्थेमचिकीर्षया ॥४२॥
इत्यन्यलिङ्गिभिः सार्धं तं राज्ञी निरवासयत् । लोभाभिभूतमनसां विवेकः स्यात् कियच्चिरम् ॥४३॥
¶धात्री [१२]**सुकोशल**स्याऽथ स्वामिनं व्रतधारिणम् । पुरान्निर्वासितं ज्ञात्वा रोदिति स्म निरर्गलम् ॥४४॥
किं रोदिषीति पप्रच्छ [१३]**सुकोशल**नृपोऽपि ताम् । कथयामास साऽप्येवमक्षरैः शोकगद्गदैः ॥४५॥
राज्ये त्वां बालकं न्यस्य तव **कीर्तिधरः** पिता । प्राव्राजीत् सोऽद्य भिक्षार्थं प्राविक्षदिह पत्तने ॥४६॥
तद्दर्शनात् तवाऽप्यद्य व्रतग्रहणशङ्कया । निर्वासितः स ते मात्रा दुःखेनाऽनेन रोदिमि ॥४७॥
[१४]**सुकोशलो**ऽपि तच्छ्रुत्वा गत्वा च पितुरन्तिके । बद्धाञ्जलिर्विरक्तात्मा तस्माद् व्रतमयाचत ॥४८॥
**चित्रमाला**[१५] च तत्पत्नी गुर्व्येत्य सह मन्त्रिभिः । उवाचाऽस्वामिकं स्वामिन्! न राज्यं त्यक्तुमर्हसि ॥४९॥
राजाऽप्यवोचद् गर्भस्थोऽपि हि सूनुर्मया तव । राज्येऽभिषिक्तो भाविन्यप्युपचारो हि भूतवत् ॥५०॥
इत्युक्त्वा सकलं लोकं सम्भाष्य पितुरन्तिके । [१६]**सुकोशलः** प्रवव्राज तपस्तेपे च दुस्तपम् ॥५१॥
निर्ममौ निःकषायौ तौ पिता-पुत्रौ महामुनी । विजह्रतुर्युतावेव पावयन्तौ महीतलम् ॥५२॥
तनयस्य वियोगेन खेदभाक् **सहदेव्य**पि । आर्तध्यानपरा मृत्वा व्याघ्र्यभूद् गिरिगह्वरे ॥५३॥
इतश्च तौ **कीर्तिधर-[१७]सुकोशल**महामुनी । प्रावृट्कालचतुर्मासीमत्येतुं दान्तमानसौ ॥५४॥
निःस्पृहौ स्वशरीरेऽपि स्वाध्याय-ध्यानतत्परौ । गिरेर्गुहायामेकस्य तस्थतुः सुस्थिताकृती ॥५५॥युग्मम्॥
[१८]प्राप्ते च कार्तिके [१९]मासि प्रयान्तौ पारणाय तौ । दृष्टौ मार्गे तया व्याघ्र्या यमदूत्येव दुष्टया ॥५६॥
सा व्याघ्री शीघ्र[२०]मभि तौ दधावे स्फारितानना । दूराद[२१]भ्यागमस्तुल्यो दुर्हृदां सुहृदामपि ॥५७॥
आपतन्त्यामपि व्याघ्र्यां तौ क्षमाश्रमणोत्तमौ । [२२]धर्मध्यानं प्रपेदानौ कायोत्सर्गेण तस्थतुः ॥५८॥
सा तु व्याघ्री विद्युदिव पपाताऽऽदौ [२३]**सुकोशले** । दूरापातप्रहारेण पृथ्व्यां च तमपातयत् ॥५९॥
चटच्चटिति तच्चर्म [२४]दारं दारं नखाङ्कुशैः । पापा साऽ[२५]पादतृप्ताऽश्रं वारीव मरुपान्थिका ॥६०॥
त्रोटयित्वा त्रोटयित्वा त्रटत्त्रटिति सा [२६]रदैः । जग्रसे मांसमपि हि [२७]वालुङ्कमिव रङ्किका ॥६१॥
दन्तयन्त्रातिथीचक्रे कर्कशा कीक[२८]सान्यपि । कटत्कटिति [२९]कुर्वन्ती सेक्षूनिव [३०]मतङ्गजी ॥६२॥
कर्मक्षयसहायेयमिति मम्लौ मुनिर्न सः । विशेषतस्त्वभू[३१]दुच्चावचरोमाञ्चकञ्चुकः ॥६३॥

---

१. *राजाऽभुङ्क्त* मु. ॥ २. *०मर्हसि* ला. ॥ ३. *अप्यपुत्रे* ला. ॥ ४. *निर्नाथा ते* मो. ॥ ५. *सुकोसलः* खंता.२, पाता. ॥ ६. *०नाथः सुगुप्तमपि* मो. ॥ ७. *सुकोसलं* खंता.२, पाता. ॥ ८. *स्वगुर्व०* मु. ॥ ९. *सुकोसलो* खंता.२, पाता. ॥ १०. *ततः* पाता. ॥ ११. अपुत्रा ॥ १२-१३-१४. *सुकोसल०* खंता.२, पाता. ॥ १५. *चित्रमालाऽपि* ता. ॥ १६-१७. *सुकोसल०* खंता.२, पाता. ॥ १८. *सम्प्राप्ते* मु. ॥ १९. *मासे* ता. ॥ २०. *शीघ्रमभितो* मु.; "तौ अभि-तयोः सम्मुखं" इति ला.टि ॥ २१. आगमनम् ॥ २२. *धर्म्यं ध्यानं* ता. ॥ २३. *सुकोसले* खंता.२, पाता. ॥ २४. दारयित्वा दारयित्वा ॥ २५. अतृप्ता सा अश्रं-रुधिरं अपाद्-अपिबदित्यन्वयः; *०दतृप्ताऽसृक्* पाता. ॥ २६. दन्तैः ॥ २७. कर्कटीम् ॥ २८. अस्थीनि ॥ २९. *कुर्वाणा* खंता.२, पाता. ता. छा. पा. ला. मो. ॥ ३०. हस्तिनी ॥ ३१. *०दुच्चैर्वर०* ला.; बहुविध ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

व्याघ्र्यैवं खाद्यमानोऽपि शुक्लध्यानमुपेयिवान् । [1]तत्कालोत्केवलो मोक्षं **सुको[2]शल**मुनिर्ययौ ॥६४॥
मुनिः **कीर्तिधरः** सोऽपि समुत्पादितकेवलः । क्रमादासादयामास सुखाद्वैतास्पदं पदम् ॥६५॥
इतश्च **चित्रमाला**ऽपि **सुको[3]शल**नृपप्रिया । **हिरण्यगर्भं** सुषुवे नन्दनं कुलनन्दनम् ॥६६॥
आगर्भवासनृपतेस्तस्य प्राप्तस्य यौवनम् । सधर्मचारिण्यभवन्मृगनेत्रा **मृगावती** ॥६७॥
राज्ञो **हिरण्यगर्भ**स्य **मृगावत्या**मजायत । तनयो **नघुषो** नाम वपुषा स इवाऽपरः ॥६८॥
**हिरण्यगर्भः** स्वेऽपश्यन्मौलौ पलितमन्यदा । तृतीयवयसः सत्यङ्काराभमु[4]पसर्पतः ॥६९॥
तदैव जातवैराग्यः स राजा **नघुषं** सुतम् । स्वे राज्ये न्यस्य **विमलमुन्यन्ते** व्रतमग्रहीत् ॥७०॥
¶**नघुषस्य** नृसिंहस्य **सिंहिका** नाम पत्न्यभूत् । तया च रममाणः स पैतृकं राज्यमन्वशात् ॥७१॥
**उत्तरापथ**भूपालान् **नघुषो** जेतुमन्यदा । जगाम **सिंहिका[5]देवीं** निजे राज्ये मुमोच च ॥७२॥
नाऽस्तीह **नघुष** इति **दक्षिणापथ**भूभुजः । तदै[6]त्याऽ**योध्यां** रुरुधुः छलनिष्ठा हि वैरिणः ॥७३॥
तदा च **सिंहिका** देवी पुंवत् तानभ्यषेणयत् । जिगायाऽनाशयच्चाऽऽशु किं सिंही हन्ति न द्विपान् ? ॥७४॥
जित्वो**त्तरापथं** राजा **नघुष**श्चाऽऽगतोऽन्यदा । शुश्राव च जयोदन्तं पत्न्या दध्याविदं च सः ॥७५॥
स्पष्टधार्ष्ट्यमिदं कर्म दुष्करं मादृशामपि । महाकुलप्रसूतानां महिलानां न युज्यते ॥७६॥
तन्नूनमसती सेयं सत्यो हि पतिदेवताः । पतिसेवां विना नाऽन्यज्जानते क्वे[7]दृशं पुनः ॥७७॥
इति चेतसि निश्चित्य **सिंहिकां** प्रेयसीमपि । राजा परिजहाराऽऽशु [8]न्यक्कितप्रतिमामिव ॥७८॥
¶**नघुषस्या**ऽन्यदा दाहज्वरः समुदपद्यत । दुष्टारिवन्न चाऽशाम्यदुपचारशतैरपि ॥७९॥
स्वसतीत्वज्ञापनाय भर्तुरर्त्तिच्छिदेऽपि हि । तत्समीपं तदेयाय तोयमादाय **सिंहिका** ॥८०॥
सा सत्यश्रावणां चक्रे त्वां विना नाथ! चेन्मया । पुमान्नैषि कदाऽप्यन्यो ज्वरस्तदपयातु ते ॥८१॥
ततश्च साऽम्भसा तेनाऽभिषिषेच निजं पतिम् । तदैव च ज्वरोन्मुक्तः सुधाधौत इवाऽभवत् ॥८२॥
**सिंहिका**या उपरिष्टात् पुष्पवृष्टिं सुरा व्यधुः । राजाऽपि बहु मेने तां ततः प्रभृति पूर्ववत् ॥८३॥
काले गच्छति जज्ञे च **नघुषस्य** महीपतेः । **सिंहिका**यां महादेव्यां **सोदासो** नाम नन्दनः ॥८४॥
**सोदासे** राज्यमारोप्याऽपरेद्यु**र्नघुषो** नृपः । एकमौपयिकं सिद्धेः परिव्रज्यामुपाददे ॥८५॥
¶**सोदास**नृपते राज्येऽर्हतामष्टाह्निकोत्सवे । मन्त्रिणो घोषयामासुरमारिं पूर्वराज्यवत् ॥८६॥
**सोदास**मपि ते प्रोचुरर्हदष्टाह्निकोत्सवे । नाऽखादि मांसं त्वत्पूर्वैः खादीस्त्वमपि मा स्म तत् ॥८७॥
**सोदासो**ऽप्यवदत् सूदं सदा मांसादनप्रियः । प्रच्छन्नं मांसमानेयं त्वयाऽवश्यमतः परम् ॥८८॥
सूदोऽप्यमार्यां घुष्टायां मांसं प्राप न कुत्रचित् । न ह्यसत् प्राप्यते क्वाऽपि केनाऽप्याकाशपुष्पवत् ॥८९॥
मांसाप्राप्तिरित इतो राजाज्ञा बाधते च माम् । किं करोमीति विमृशन् सूदोऽपश्यन्मृतार्भकम् ॥९०॥
मृतार्भकस्य तस्यैवाऽऽदाय मांसं स [10]वल्लवः । संस्कृ[11]त्य तैस्तैर्विज्ञानैः **सोदासा**य ददौ तदा ॥९१॥
**सोदासो**ऽपि हि तन्मांसमश्नन्नेवमवर्णयत् । अहो! अमुष्य मांसस्य कोऽप्यतिप्रीणको रसः ॥९२॥
सूपकारं च पप्रच्छ जन्मापूर्वमिदं मम । कस्य जीवविशेषस्य मांसमाख्याहि सर्वथा ॥९३॥
नृमांसमिति सोऽप्याख्यद् राजाऽवोचदतः परम् । अद्येव दद्याः संस्कृत्य प्रत्यहं नृ[12]पलं मम ॥९४॥
डिम्भान् सूदोऽप्यथाऽहार्षीत् तदर्थं प्रत्यहं पुरे । न हि भीराज्ञया राज्ञामन्यायकरणेऽपि हि ॥९५॥
इति दारुणकर्माणं नृपं विज्ञाय मन्त्रिणः । धृत्वाऽत्यजन्नरण्यान्तर्गृहोत्पन्नमिवोरगम् ॥९६॥
¶तैश्च **सोदास**सूः **सिंहरथो** राज्येऽभिषिच्यत । **सोदासो**ऽप्याट वसुधां मांसं खादन् निरर्गलम् ॥९७॥
**सोदासे**नाऽपि चाऽन्येद्युर्भ्रमता **दक्षिणापथे** । [13]महर्षिः कोऽपि ददृशे सोऽथ धर्ममपृच्छ्यत ॥९८॥

---

१. तत्कालमुत्पन्नं केवलं यस्य सः ॥ २-३. ***सुकोसल०*** खंता.२, पाता. ॥ ४. "आगच्छतः" इति ला.टि ॥ ५. ***सिंहिकां देवीं निजराज्ये*** मु. ॥ ६. ***तदाऽयोध्यां रुरुधिरे*** मु. ॥७. ***क पुनरीदृशम्*** रसंपा. ॥ ८. ***न्यङ्गितां०*** ला.; ***न्यगित०*** मु.; खण्डितप्रतिमामिव ॥ ९. ***पुमान्नैक्षि*** मु. ॥ १०. सूदः ॥ ११. ***संस्कृतस्तैरविज्ञातैः*** ला. ॥ १२. नरमांसम् ॥ १३. ***महर्षिरेको*** ता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बोधार्ह इति तं ज्ञात्वा जगौ तस्मै महामुनिः । मद्य-मांसपरीहारप्रधानं धर्ममार्हतम् ॥९९॥

**सोदासो**ऽपि हि तं धर्ममाकर्ण्य चकितोऽभवत्[1] । प्रसन्नहृदयो भूत्वा श्रावकः परमोऽभवत् ॥१००॥

¶इतो **महापुर**पुरे कोऽप्यपुत्रो नृपोऽमृत[2] । पञ्चदिव्याभिषिक्तोऽथ **सोदास**स्तत्र राडभूत् ॥१०१॥

**सोदासः** प्राहिणोद् दूतमथ **सिंहरथं** प्रति । **सोदास**स्य कुरुष्वाऽऽज्ञामिति दूतोऽप्युवाच तम् ॥१०२॥

दूतः **सिंहरथे**नोच्चैस्तिरस्कृत्य व्यसृज्यत[3] । आगत्याऽऽख्यच्च **सोदास**भूभुजे स[4] यथातथम् ॥१०३॥

**सोदासो**ऽथ **सिंहरथं** सोऽपि **सोदास**पार्थिवम् । अभ्यषेणयतां योद्धुं युयुधाते च तौ पथि[5] ॥१०४॥

**सोदासो**ऽपि **सिंहरथं** जित्वा जग्राह पाणिना । तस्मै राज्यद्वयं चाऽदात् प्रवव्राज स्वयं पुनः ॥१०५॥

¶सूनुः **सिंहरथ**स्याऽभूद्[6] राजा **ब्रह्मरथ**स्ततः । **चतुर्मुख**स्ततो **हेमरथः शतरथ**स्ततः ॥१०६॥

अथोदय**पृथु**-**वारिरथ इन्दुरथ**स्ततः । **आदित्यरथ**-**मान्धातृ**-**वीरसेना**स्ततः क्रमात् ॥१०७॥

**प्रतिमन्यु**नृपस्तस्मात् **पद्मबन्धु**[7]नृपस्ततः । **रविमन्यु**नृपस्तस्माद् **वसन्ततिलक**स्ततः ॥१०८॥

**कुबेरदत्तो**ऽथ **कुन्थु**-**शरभ**-**द्विरदाः** क्रमात् । ततश्च **सिंहदशनो हिरण्यकशिपु**स्ततः ॥१०९॥

**पुञ्जस्थलः ककुत्स्थो**ऽथ **रघु**रेवं नृपेषु तु । केषुचिन्मोक्षमाप्तेषु स्वर्गमाप्तेषु केषुचित् ॥११०॥

¶**अनरण्यो** नाम राजा शरण्यः शरणार्थिनाम् । आनृण्यकृत् प्रणयिनामभूत् **साकेतपत्तने** ॥१११॥

तस्याऽभूतामुभौ पुत्रौ **पृथ्वीदेव्या**श्च कुक्षिजौ । एकोऽ**नन्तरथो** नाम्ना तथा **दशरथो**ऽपरः ॥११२॥

इतोऽ**नरण्य**स्य सुहृत् **सहस्रकिरणो** नृपः । **रावणे**न जितो युद्धे वैराग्याद् व्रतमाददे ॥११३॥

तत्सख्याद**नरण्यो**ऽपि श्रियं न्यस्य लघौ सुते । मासजातेऽ**नन्तरथ**सहितो व्रतमाददे ॥११४॥

**अनरण्यो**ऽगमन्मोक्षमथाऽ**नन्तरथो** मुनिः । तप्यमानस्तपस्तीव्रं विजहार वसुन्धराम् ॥११५॥

राज्यभृत् क्षीर[8]कण्ठोऽपि राजा **दशरथः** पुनः । वयसा विक्रमेणेव वृद्धिमासादयत् क्रमात् ॥११६॥

राजा राजसु सोऽराजद् द्विज[9]राज इवोडुषु । ग्रहेष्विव ग्रह[10]राजः सुमेरुः पर्वतेष्विव ॥११७॥

तत्र स्वामिनि लोकस्य परचक्रादिसम्भवः । अदृष्टपूर्व एवाऽऽसीत् खपुष्पवदुपद्रवः ॥११८॥

स वित्ताभरणादीनि यथेच्छं दददर्थिनाम् । [11]कल्पद्रुमाणां मद्याङ्गादीनामेकादशोऽभवत् ॥११९॥

[12]निजं वंशक्रमायातं तत्साम्राज्यमिवाऽनघम् । स दधावार्हतं धर्मं सर्वदाऽप्यप्रमद्वरः ॥१२०॥

**दभ्रस्थल**पुरेशस्य **सुकोशल**महीपतेः । कन्यां पवित्रा**ममृतप्रभा**कुक्षिसमुद्भवाम् ॥१२१॥

नाम्नाऽ**पराजितां** चारुरूप-लावण्यशालिनीम् । उदुवाह स भूपालो जयश्रियमिवाऽऽहवे ॥१२२॥युग्मम्॥

**सुबन्धुतिलक**स्याऽथ पुरे **कमलसङ्कुले** । **मित्रादेवी**कुक्षिजातां **केकयी**[13]मादिनामतः ॥१२३॥

[14]**सुमित्रा**मन्यनाम्ना च स्वकीर्तिमिव निर्मलाम् । पर्यणैषीद् **दशरथः** शशाङ्क इव रोहिणीम् ॥१२४॥युग्मम्॥

पुण्यलावण्य-सौन्दर्यवर्याङ्गीं[15] **सुप्रभा**भिधाम् । अन्यामप्युपयेमे स राजपुत्रीमनिन्दिताम् ॥१२५॥

सुखं वैषयिकं ताभिर्बुभुजे भूभुजां वरः । अबाधमानो धर्मार्थौ स विवेकि[16]शिरोमणिः ॥१२६॥

¶इतश्च **भरत**स्याऽर्धं भुञ्जानो **दशकन्धरः** । सभायामास्थितोऽपृच्छदिति नैमित्तिकोत्तमम् ॥१२७॥

अमरा अपि नाम्नैवाऽमरा न परमार्थतः । भाव्यवश्यं तु सर्वस्य मृत्युः संसारवर्तिनः ॥१२८॥

तत्किं मे स्वपरीणामाद् विपत्तिः परतोऽथवा ? । तन्ममाऽऽचक्ष्व निःशङ्कमाप्ता हि स्फुटभाषिणः ॥१२९॥

सोऽप्याचख्यौ भविष्यन्त्या **जानक्याः** कारणेन ते । भविष्यतो **दशरथ**पुत्रान्मृत्युर्भविष्यति ॥१३०॥

**बिभीषणो** बभाषेऽथ यद्यप्यस्य सदा ऋतम्[17] । वचस्तथाऽपि ह्यनृतीकरिष्याम्येतदाश्वहम्[18] ॥१३१॥

**जनकं दशरथं** च कन्या-तनययोस्तयोः । अनर्थयोर्बीजभूतं हनिष्याम्यस्तु नः शिवम् ॥१३२॥

---

१. *चकितोऽभवत्* मु. ॥ २. *नृपो मृतः* मु. ॥ ३. *विसृज्य च* खंता.१ । ४. *तद्* खंता.१, पाता. ला. ॥ ५. *मिथः* खंता.२, मु. ॥ ६. *सिंहरथस्याऽथ राजा ब्रह्मरथोऽभवत्* खंता.१, ला. ॥ ७. *प्रतिबन्धुनृप०* मु. ॥ ८. स्तन्यपः ॥ ९. चन्द्रः ॥ १०. सूर्यः ॥ ११. *कल्पद्रुमेभ्यो मद्याङ्गादिभ्य एका०* खंता.१, पाता. ला. ॥ १२. *निजवंश०* खंता.१-२, पाता. मु.प्रभृतिषु ॥ १३. *कैकेयी०* मु.; सुमित्राया नामाऽपि 'केकयी', इति तु महदाश्चर्यकारकम् ॥ १४. *मित्राभूः सुशीला चेति सुमित्रेत्यपराभिधाम्* खंता.२, पाता. मु. ॥ १५. *०वर्याङ्गीसुप्रभा०* मु. ॥ १६. *विवेकशिरोमणिः* मु. ॥ १७. सत्यम् ॥ १८. *०करिष्यामि तदाश्वहम्* मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्पत्तिरेव हि तयोर्निषिद्धा [1]बीजनाशतः । वचो नैमित्तिकस्याऽतो मिथ्यैव हि भविष्यति ॥१३३॥
¶आमेत्युक्तो **रावणेन** स्ववेश्माऽगाद् **बिभीषणः** । तत्रस्थो **नारद**स्तच्च श्रुत्वा **दशरथं** ययौ ॥१३४॥
तं देवर्षिं **दशरथो**ऽभ्युत्तस्थौ दूरतोऽपि हि । नमस्कृत्याऽऽसयामास गुरुवद् गौरवेण च ॥१३५॥
त्वमायासीः कुतः स्थानात् पृष्टस्तेनेति **नारदः** । आख्यत् **पूर्वविदेहे**षु गतोऽहं **पुण्डरीकिणीम्** ॥१३६॥*
**श्रीसीमन्धरनाथ**स्य द्रष्टुं निष्क्रमणोत्सवम् । सुरासुरकृतं तं च दृष्ट्वा **मेरु**मगामहम् ॥१३७॥
तत्राऽभिवन्द्य तीर्थेशान् **लङ्का**यां गतवानहम् । तस्यां शान्तिगृहे **शान्तिं** नत्वाऽगां **रावणा**लयम् ॥१३८॥
**रावण**स्य वधस्तत्र **जानक्य**र्थे त्वदात्मजात् । नैमित्तिकेन केनाऽपि कथ्यमानः श्रुतो मया ॥१३९॥
श्रुत्वा **बिभीषण**स्[2]तत्तु हन्तुं त्वां **जनकं** तथा । कृतप्रतिज्ञो नचिरादिहैष्यति महाभुजः ॥१४०॥
एतत् सर्वं परिज्ञाय **लङ्का**पुर्याः ससम्भ्रमः । साधर्मिक इति प्रीत्या तव शंसितुमागमम् ॥१४१॥
तच्छ्रुत्वा भूभुजाऽभ्यर्च्य विसृष्टो **नारदो** द्रुतम् । तथैव कथयामास **जनका**याऽपि भूभुजे ॥१४२॥
मन्त्रिणां तत् समाख्याय राजा राज्यं समर्प्य च । निर्ययौ योगविदिव चिकीर्षुः कालवञ्चनाम् ॥१४३॥
मूर्तिं **दाशरथीं** लेप्यमयीमन्तर्नृपालयम् । न्यधुश्च मन्त्रिणो ध्वान्ते विद्विषन्मोहहेतवे ॥१४४॥
**जनको**ऽपि तथा चक्रे तथा तन्मन्त्रिणोऽपि हि । तौ त्वलक्षौ **दशरथ-जनकौ** भ्रेमतुर्महीम् ॥१४५॥
**बिभीषण**श्च संरम्भादेत्य [3]सन्तमसेऽसिना । लेप्यमय्या **दशरथ**मूर्तेश्चिच्छेद मस्तकम् ॥१४६॥
जज्ञे कलकलस्तत्र नगरे सकलेऽपि हि । आक्रन्दध्वनिरुत्तस्थावन्तरन्तःपुरं महान् ॥१४७॥
सन्नह्य समधावन्त सामन्ताः साङ्गरक्षकाः । विदधुर्मृतकार्याणि गूढमन्त्राश्च मन्त्रिणः ॥१४८॥
मृतं **दशरथं** ज्ञात्वा ययौ **लङ्कां बिभीषणः** । अकिञ्चित्करमेकं तु नाऽवधीन्मिथिलेश्वरम् ॥१४९॥
मिथश्च [4]**मैथिलैक्ष्वाकौ** भ्राम्यन्तौ मिलितावुभौ । [5]एकावस्थासुहृदौ ता**वुत्तरापथ**मीयतुः ॥१५०॥
¶राज्ञः **शुभमते**स्तत्र पुरे **कौतुकमङ्गले** । दुहितुः [6]**कैकेयी**नाम्न्याः **पृथ्वीश्री**कुक्षिजन्मनः ॥१५१॥
**द्रोणमेघ**[7]सहोदर्या द्वासप्ततिकलानिधेः । तौ स्वयंवरमाकर्ण्य तन्मण्डपमुपेयतुः ॥१५२॥युग्मम्॥
**हरिवाहण**मुख्यानां तौ मध्ये पृथिवीभुजाम् । हंसाविवाऽधि[8]पाथोजमधिमञ्चमुपेयतुः ॥१५३॥
**कैकेयी** कन्यकारत्नं रत्नालङ्कारभूषिता । साक्षाल्लक्ष्मीरिवाऽभ्यागात् तं स्वयंवरमण्डपम् ॥१५४॥
दत्तहस्ता प्रतीहार्या पश्यन्ती सा नृपान् क्रमात् । नक्षत्राणीन्दुलेखेव व्यतिचक्राम भूयसः ॥१५५॥
क्रमेण सा **दशरथं** प्राप गङ्गेव सागरम् । तस्थौ तत्रैव [9]निर्मुक्तनाङ्गरा नौरिवाऽम्भसि ॥१५६॥
सद्यो रोमाञ्चिततनुः **कैकेय्य**[10]तनुसम्मदा । तत्राऽक्षिपद् वरमालां निजां भुजलतामिव ॥१५७॥
**हरिवाहण**मुख्याश्च नृपा [11]न्यक्कृतमानिनः । मानिनो जज्वलुः क्रोधाज्ज्वलज्ज्वलनसन्निभाः ॥१५८॥
अयं वराक एकाकी [12]वृतः कार्पटिकोऽनया । आच्छिद्यमानामस्माभिरि[13]मिकां त्रास्यते कथम् ? ॥१५९॥
साटोपमिति जल्पन्तोऽनल्पं स्वशिबिरेषु ते । गत्वा [14]संवर्मयामासुः सर्वे सर्वात्मनाऽपि हि ॥१६०॥
महीपतिः **शुभमतिः** पक्षे **दशरथ**स्य सः । सन्नाह महोत्साहः सेनया चतुरङ्गया ॥१६१॥
कुरु प्रिये! सारथित्वं यथा [15]मथ्नाम्यमून् द्विषः । इत्यवोचत **कैकेयीं** तदैकाकी हि [16]राघवः ॥१६२॥
**कैकेयी** रश्मिमादायाऽध्यारुरोह महारथम् । द्वासप्ततावपि कलास्वभिज्ञा सा हि धीमती ॥१६३॥
धन्वी [17]निषङ्गी सन्नाही राजा **दशरथो**ऽपि तम् । अध्यास्त रथमेकोऽपि तृणवद् गणयन् परान् ॥१६४॥

---

१. ***जीवनाशतः*** पाता. ॥ २. ***०स्तच्च*** खंता.१, ला. मु. ॥ ३. गाढतमसि ॥ ४. जनक-दशरथौ ॥ ५. ***एकावस्थौ सुहृदौ*** मु. ॥ ६. ***कैकयी०*** ता. ॥ ७. ***द्रोणमेघसोदराया*** मु. ॥ ८. पङ्कजे ॥ ९. ***निर्मुक्तनागरा:*** खंता.१-२, पाता. ॥ १०. अतनुहर्षा ॥ ११. ***न्यक्कृतिमानिनः*** ला.; तिरस्कृतं आत्मानं मन्यमानाः ॥ १२. ***वव्रे*** मु. ॥ १३. इमां कैकेयीम् ॥ १४. सज्जीबभूवुः ॥ १५. ***बध्नाम्यमून्*** कां. ॥ १६. दशरथः ॥ १७. निषङ्गी-असिधरः, सन्नाही-कवचधरः ॥

* खंता.१-प्रतौ १३६तः १३९ श्लोकाः १४१तमश्लोकश्च न दृश्यन्ते । ला. प्रतौ १३६तः १३९ श्लोकाः पार्श्वभागे लिखिताः, तदन्ते च '**पाठान्तरं**' इति टिप्पितं वर्तते । एतच्छ्लोकचतुष्कस्थाने च ला.सञ्ज्ञकप्रताविमे श्लोकाः सन्ति –

"दत्त्वाऽऽशीर्णा(र्ना)रदोऽवादीद् ऋषभस्वामिनः प्रभोः । इक्ष्वाकुसञ्ज्ञे वंशे त्वं महात्मन्! यदजायथाः ॥१३६॥
परमः श्रावकश्चाऽसि तेन शंसामि ते हितम् । सन्तः सतामुपेक्षन्ते न जातु विपदागमम् ॥१३७॥
जानक्यर्थे भवत्पुत्राद् रावणस्य वधोऽधुना । नैमित्तिकेन केनाऽपि कथितस्तथ्यभाषिणा ॥१३८॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हरिवाहण**मुख्यानां रथैर्निजरथं रयात् । [१]प्रत्येकं युगपदिव [२]छेका **कैकेय्य**योजयत् ॥१६५॥
शीघ्रवेधी **दशरथो**ऽप्येकैकमपि तान् रथान् । अखण्डयदखण्डौजा [३]आखण्डल इवाऽपरः ॥१६६॥
इत्थं विद्रावयामास सर्वानपि स भूपतीन् । उपयेमे च **कैकेयीं** [४]जगतीमिव जङ्गमाम् ॥१६७॥
उवाच च नवोढां तां राजा **दशरथो** रथी । वरं याचस्व देवि! त्वत्सारथ्येनाऽस्मि रञ्जितः ॥१६८॥
याचिष्ये समये स्वामिन्! न्यासीभूतोऽस्तु मे वरः । इत्यभाषत **कैकेयी** राजाऽपि प्रत्यपादि तत् ॥१६९॥
समं श्रियेव **कैकेय्या** परसैन्यैर्[५]हठाहृतैः । असङ्ख्यातपरीवारो राजा **राजगृहं** ययौ ॥१७०॥
जगाम राजा **जनको**ऽप्यात्मीयां नगरीमथ । समयज्ञा हि धीमन्तो न तिष्ठन्ति यथा तथा ॥१७१॥
¶राजा **दशरथ**स्तत्र विजित्य **मगधेश्वरम्** । तत्रैवाऽस्थात्र तु ययाव**योध्यां** शङ्कया तया ॥१७२॥
तत्राऽ**पराजिता**मुख्यमन्तःपुरमिलापतिः । निजमानाययामास राज्यं सर्वत्र दोष्मताम् ॥१७३॥
राज्ञीभी रममाणोऽस्थात् पुरे तत्र चिरं नृपः । विशेषतः प्रीतये हि राज्ञां भूः स्वयमर्जिता ॥१७४॥
**पराजिता**ऽन्येद्युर्गज-सिंहेन्दु-भास्करान् । स्वप्नेऽपश्यन्निशाशेषे [६]बलजन्माभिसूचकान् ॥१७५॥
**ब्रह्मलोका**त् परिच्युत्य तदा देवो महर्द्धिकः । कुक्षाववातरत् तस्याः पुष्करिण्यां मरालवत् ॥१७६॥
नृपुण्डरीकं वर्णेन पुण्डरीकविडम्बनम् । सम्पूर्णलक्षणं सूनुं सुषुवेऽथाऽ**पराजिता** ॥१७७॥
प्रथमापत्यरत्नस्य तस्याऽऽस्यकमलेक्षणात् । [७]राकेन्दुदर्शनादब्धिरिवाऽतिमुमुदे नृपः ॥१७८॥
नृपश्चिन्तामणिरिव ददौ दानं तदाऽर्थिनाम् । [८]लोकस्थितिरियं जाते नन्दने दानमक्षयम् ॥१७९॥
महान्तमुत्सवं चक्रुस्तदा लोकास्तथा स्वयम् । यथाऽभूवन्नतिमुदो राज्ञो **दशरथा**दपि ॥१८०॥
नृपौकसि [९]सनाथानि दूर्वा-पुष्प-फलादिभिः । निन्युः [१०]कल्याणपात्राणि पूर्णपात्राणि नागराः ॥१८१॥
सर्वत्र कलगीतानि सर्वत्र [११]घुसृणच्छटाः । सर्वत्र तोरणश्रेण्यो [१२]व्यधीयन्ते तदा पुरि ॥१८२॥
अचिन्तितोपनीतानि प्राभृतानि [१३]महीभृताम् । तदा राज्ञे समाजग्मुस्तस्य सूनोः प्रभावतः ॥१८३॥
[१४]पद्मानिवासपद्मस्य **पद्म** इत्यभिधां नृपः । सूनोस्तस्याऽकरोत् सोऽभूत् प्रथितो **राम** इत्यपि ॥१८४॥
गज-सिंहार्क-चन्द्राग्नि-श्री-समुद्रान् निशात्यये । स्वप्नेऽपश्यत् **सुमित्रा**ऽपि [१५]विष्णुजन्माभिसूचकान् ॥१८५॥
देवलोकात् परिच्युत्य त्रिदशः परमर्द्धिकः । तदा देव्याः **सुमित्रा**या उदरे समवातरत् ॥१८६॥
समये [१६]प्रावृडम्भोदवर्णं सम्पूर्णलक्षणम् । **सुमित्रा**ऽपि जगन्मित्रं पुत्ररत्नमजीजनत् ॥१८७॥
पुरचैत्येषु सर्वेषु श्रीमतामर्हतां तदा । विशेषेणाऽ[१७]ष्टधा पूजां स्नात्रपूर्वं व्यधान्नृपः ॥१८८॥
नृपतिर्मोचयामास धृतान् बन्दिरिपूनपि । को वा न जीवति सुखं पुरुषोत्तमजन्मनि ॥१८९॥
सोच्छ्वासः सप्रजो राजा न केवलमभूत् तदा । [१८]वसुमत्यपि देवी द्रागुच्छ्वासं प्रत्यपद्यत ॥१९०॥
**राम**जन्मनि भूपालो यथाऽकृत महोत्सवम् । तथा तमधिकं चक्रे हर्षे को नाम तृप्यति ? ॥१९१॥
नाम **नारायण** इति विदधे तस्य पार्थिवः । स **लक्ष्मण** इति [१९]ख्यातापरनामा च भुव्यभूत् ॥१९२॥
¶तौ द्वावपि पितुः [२०]कूर्च-कचाकर्षणशिक्षकम् । विशिष्टं प्रापतुर्बाल्यं क्रमेण क्षीरपायिणौ ॥१९३॥
धात्रीभिर्लाल्यमानौ तावपश्यत् परया मुदा । मुहुर्मुहुर्महीपालः स्वदोर्दण्डाविवाऽपरौ ॥१९४॥
[२१]सञ्चेरतुः सदस्यानामङ्कादङ्कं महीभुजाम् । [२२]तेषामङ्केषु वर्षन्तौ तौ स्पर्शेन सुधामिव ॥१९५॥
क्रमेण तौ वर्धमानौ नील-पीताम्बरौ सदा । विजह्रतुः [२३]पादपातैः कम्पयन्तौ महीतलम् ॥१९६॥
कलयामासतुस्तौ तु क्रमेण सकलाः कलाः । साक्षीकृतकलाचार्यौ पुण्यराशी इवाऽङ्गिनौ ॥१९७॥
लीलामुष्टिप्रहारेण [२४]हिमकर्परलीलया । दलयामासतुस्तौ च गिरीनपि महौजसौ ॥१९८॥

१. ***एककालमिवैकैकं*** ला. खंता.१ ॥ २. ***त्वेका*** मु. ॥ ३. इन्द्रः ॥ ४. पृथ्वीम् ॥ ५. बलादानीतैः ॥ ६. बलदेवजन्मसूचकान् ॥ ७. पूर्णिमाचन्द्रदर्शनात् ॥ ८. ***लोके स्थिति*** ता. हे.; लोकमर्यादा ॥ ९. सहितानि ॥ १०. सुवर्णपात्राणि ॥ ११. कुङ्कुमच्छटाः ॥ १२. ***न्यधीयन्त*** हे. ॥ १३. ***महीभृतां*** मु. ॥ १४. लक्ष्म्या निवासे कमलसमस्य ॥ १५. वासुदेवजन्मसूचकान् ॥ १६. वर्षामेघसम(श्याम)वर्णम् ॥ १७. ***भक्त्या विशेषेण*** मो. ॥ १८. मही ॥ १९. ***ख्यातोऽपरनाम च भुव्यधात्*** ता.; ***ख्यातोऽपरनाम्ना च भुव्यभूत्*** मु. ॥ २०. श्मश्रु-केशाकर्षणे शिक्षकम् ॥ २१. ***सञ्चेरतुरनेकेषा०*** खंता.१, ला. ॥ २२. ***मुहुरङ्गेषु*** रसंपा. ॥ २३. चरणघातैः ॥ २४. हिमपात्रस्य लीलया ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रमस्थानेऽपि हि तयोरधिज्यकृतचापयोः । चकम्पे [1]तपनोऽप्युच्चैः स्वस्य वेधाभिशङ्कया ॥१९९॥
तृणाय मन्यमानौ तौ दोःस्थाम्नाऽपि द्विषां बलम् । कौतुकायैव मेनाते शस्त्रकौशलमात्मनः ॥२००॥
शस्त्रास्त्रकौशलेनोच्चैर्दोःस्थाम्ना च तयोर्नृपः । अपि देवासुरादीनां स्वमजय्यममन्यत ॥२०१॥
¶अन्यदा धैर्यमालम्ब्य विक्रमेण कुमारयोः । इक्ष्वाकूणां राजधानी**मयोध्यां** नृपतिर्ययौ ॥२०२॥
[2]अभ्रात्यय इवाऽऽदित्यो दुर्दशातिक्रमे भृशम् । द्योतमानः प्रतापेन महीं **दशरथो**ऽन्वशात् ॥२०३॥
तत्राऽपरेद्युः **कैकेयी** शुभस्वप्नाभिसूचितम् । असूत **भरतं** नाम सुतं भरतभूषणम् ॥२०४॥
**शत्रुघ्न**मभिधानेन शत्रुघ्नभुजविक्रमम् । अजीजनत् **सुप्रभा**ऽपि नन्दनं कुलनन्दनम् ॥२०५॥
स्नेहाद् **भरत-शत्रुघ्ना**ववियुक्तौ दिवानिशम् । बलदेव-वासुदेवावभातामपराविव ॥२०६॥
रेजे राजा **दशरथ**श्चतुर्भिरपि तैः सुतैः । [3]**गजदन्ता**कृतिनगैरि[4]व **मेरु**महीधरः ॥२०७॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् क्षेत्रे चाऽत्रैव **भारते** । **दारुग्रामे वसुभूति**रिति नाम्नाऽभवद् द्विजः ॥२०८॥
पत्न्यां तस्या[5]**ऽनुकोशाया**म**तिभूति**रभूत् सुतः । **अतिभूते**रपि पत्नी बभूव **सरसा**भिधा ॥२०९॥
**कयान**नाम्ना विप्रेण जातरागेण सैकदा । अपजह्रे च्छलेनाऽऽशु किं न कुर्यात् स्मरातुरः ? ॥२१०॥
तामन्वेष्टुं महीमाटा**ऽतिभूति**र्भूतवद् भृशम् । सुत-स्नुषार्थे[6]**ऽनुकोशा-वसुभूती** च चेरतुः ॥२११॥
सुत-स्नुषे अपश्यन्तौ पर्यटन्तावथाऽन्यदा । एकं ददृशतुः साधु ववन्दाते च भक्तितः ॥२१२॥
श्रुतधर्मौ च तत्पार्श्वे तौ द्वौ जगृहतुर्व्रतम् । गुर्वादिष्टा[7]**ऽनुकोशा**ऽगादार्यिकां **कमलश्रिय**म् ॥२१३॥
तौ विपद्य च **सौधर्मे कल्पे** देवौ बभूवतुः । व्रते ह्येकाहमात्रेऽपि न स्वर्गादन्यतो गतिः ॥२१४॥
¶**वसुभूति**स्ततश्च्युत्वाऽत्रैव **वैताढ्य**पर्वते । **रथनूपुर**नाथोऽभून्नाम्ना **चन्द्रगति**र्नृपः ॥२१५॥
ततश्च्युत्वा[8]**ऽनुकोशा**ऽपि तस्य विद्याधरप्रभोः । अभूत् **पुष्पवती** नाम भार्याऽऽर्यचरिता सती ॥२१६॥
तदा च साऽपि **सरसा** कामपि प्रेक्ष्य [9]संयताम् । प्रव्रज्य मृत्वा **चेशाने** देवी समुदपद्यत ॥२१७॥
**सरसा**विरहादार्तो**ऽतिभूति**श्च विपद्य सः । चिरं भ्रान्त्वा च संसारं हंसपोतः कदाऽप्यभूत् ॥२१८॥
भक्ष्यमाणोऽन्यदा श्येनेनोपसाधु पपात सः । [10]कण्ठस्थासोर्नमस्कारं तस्य साधुर्ददौ च सः ॥२१९॥
विपन्नः स नमस्कारप्रभावेणाऽतिभूयसा । दशवर्षसहस्रायुः किन्नरेषु सुरोऽभवत् ॥२२०॥
च्युत्वा **पुरे विदग्धे** च **प्रकाशसिंह**भूपतेः । सुतोऽभूत् **प्रवरावल्यां** पत्न्यां **कुण्डलमण्डितः** ॥२२१॥
भोगासक्तः **कयानो**ऽपि चिरं भ्रान्त्वा भवाटवीम् । पुरे **चक्रपुरे चक्रध्वज**राजपुरोधसः ॥२२२॥
**धूमकेशा**भिधानस्य **स्वाहा**नाम्न्यामजायत । सूनुः सधर्मचारिण्यां नामधेयेन **पिङ्गलः** ॥२२३॥युग्मम्॥
¶राज्ञश्च**क्रध्वज**स्या**ऽतिसुन्दरी**नामया सह । पुत्र्या पपाठैकगुरोरन्तिके स तु **पिङ्गलः** ॥२२४॥
कालेन गच्छता जाते त्वनुरागे परस्परम् । तां छलात् **पिङ्गलो** हृत्वा **विदग्धनगरे** ययौ ॥२२५॥
विज्ञानरहितस्तत्र तृण-काष्ठादिविक्रयात् । आत्मानम[11]र्जिजीवत् स निर्गुणस्योचितं ह्यदः ॥२२६॥
तां चा**ऽतिसुन्दरीं** तत्राऽद्राक्षीत् **कुण्डलमण्डितः** । अन्योऽन्यमनुरागश्च तत्कालमभवत् तयोः ॥२२७॥
अपजह्रे च तां राजपुत्रः **कुण्डलमण्डितः** । [12]पितुर्भिया दुर्गदेशे पल्लीं कृत्वा च [13]संस्थितः ॥२२८॥
विरहाच्चा**ऽतिसुन्दर्या** उन्मत्त इव **पिङ्गलः** । क्ष्मां भ्रमन्नेकदाऽऽचार्य**मार्यगुप्ता**ख्यमैक्षत ॥२२९॥
श्रुत्वा धर्मं च तत्पार्श्वे व्रतं जग्राह **पिङ्गलः** । परं प्रेमा**ऽतिसुन्दर्यां** न मुमोच कदाचन ॥२३०॥
पल्लीस्थितो **दशरथ**भुवं **कुण्डलमण्डितः** । सर्वदा लुण्टयामास सारमेय इव च्छलात् ॥२३१॥
सामन्तो **बालचन्द्रा**ख्यस्ततो **दशरथा**ज्ञया । प्रदाय [14]सौप्तिकं बद्ध्वा तमानैषीत् तदन्तिके ॥२३२॥
कालेन तं **दशरथो**ऽ[15]मुंचत् **कुण्डलमण्डितम्** । कोपः शाम्यति महतां दीने क्षीणे ह्यरावपि ॥२३३॥

१. *तपनोऽप्युच्चैस्तस्थौ* मु. ॥ २. मेघात्यये ॥ ३. गजदन्ताकारपर्वतैः ॥ ४. *०रिवामरमहीधरः* ता. ॥ ५.६.७.८. *अनुकेशा* पाता. ॥ ९. *संयतीं* ला. छा. पा.; साध्वीम् ॥ १०. कण्ठगतप्राणस्य ॥ ११. आजीविकामकरोत् ॥ १२. *पितुर्भयाद्* हे. ॥ १३. *स स्थितः* खंता.२, पाता. ॥ १४. रात्रियुद्धम् ॥ १५. *दशरथोऽमुञ्चत्०* खंता.१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पितृराज्याय स भ्राम्यन् महीं **कुण्डलमण्डितः** । **मुनिचन्द्रा**न्मुनेर्धर्ममाकर्ण्य श्रावकोऽभवत् ॥२३४॥
[illegible][1]च्छुरेव मृत्वा स **मिथिला**यां [2]महापुरि । गर्भे **जनक**भार्याया **विदेहा**याः सुतोऽभवत् ॥२३५॥
**सरसा**ऽपि भवं भ्रान्त्वा पुरोहितसुताऽभवत् । नाम्ना **वेगवती** तत्र प्रव्रज्य च विपद्य च ॥२३६॥
**ब्रह्मलोके**ऽगमच्च्युत्वा **विदेहा**यास्तदोदरे । **कुण्डलमण्डित**जीवयुग्मत्वेन सुताऽभवत् ॥२३७॥
**विदेहा** समयेऽसूत युगपत् पुत्र-कन्यके । मृत्वा तदा **पिङ्गलर्षिः सौधर्मे** त्रिदशोऽभवत् ॥२३८॥
प्राग्जन्माऽवधिनाऽपश्यद् द्विषं **कुण्डलमण्डितम्** । तदा **जनक**पुत्रत्वेनोत्पन्नं स उदैक्षत ॥२३९॥
स प्राग्वैराज्जातरोषो जातमात्रं जहार तम् । दध्यौ च किं निहन्म्येनमास्फाल्याऽऽशु शिलातले ? ॥२४०॥
अथवा यद् भवे पूर्वे दुष्कर्माऽऽचरितं मया । फलं तस्याऽपि भूयस्सु भवेष्वन्वभवं चिरम् ॥२४१॥
दैवाच्छ्रामण्यमासाद्य प्राप्तोऽहमियतीं भुवम् । हत्वा [3]भ्रूणममुं भूयः स्यामनन्तभवः कथम् ? ॥२४२॥
इत्थं विमृश्य स सुरो भूषणैः कुण्डलादिभिः । भूषयित्वा च तं बालं पतज्ज्योतिर्भ्रमप्रदम् ॥२४३॥
**वैताढ्य**दक्षिणश्रेणौ **रथनूपुर**पत्तने । [4]शनकैर्**नन्दनो**द्याने [5]तूलिकायामिवाऽमुचत् ॥२४४॥युग्मम्॥
किमेतदिति सम्भ्रान्तो दृष्ट्वा **चन्द्रगति**श्च तम् । तन्निपातानुसारेण **नन्दनो**पवनं ययौ ॥२४५॥
ददर्श तत्र तं बालं दिव्यालङ्कारभूषितम् । विद्याधरेन्द्रः सोऽपुत्रः [6]पुत्रीयन्नाददे स्वयम् ॥२४६॥
प्रेयस्याः **पुष्पवत्या**श्चाऽर्पयामास तमर्भकम् । देव्यद्य सुषुवे पुत्रमिति चाऽघोषयत् पुरि ॥२४७॥
उच्चैर्जन्मोत्सवं तस्य राजा पौराश्च चक्रिरे । [7]प्रभामण्डलसम्बन्धान्नाम्ना **भामण्डलो**ऽभवत् ॥२४८॥
**पुष्पवती-चन्द्रगत्यो**र्नेत्रकैरवचन्द्रमाः । स वर्धितुं प्रववृते खेचरीकरलालितः ॥२४९॥
¶इतश्चाऽपहृते पुत्रे **विदेहा** करुणस्वरा । रुदती पातयामास बन्धून् शोकमहार्णवे ॥२५०॥
**जनको**ऽन्वेषयामास प्रेष्य प्रतिदिशं नरान् । तत्प्रवृत्तिं पुनः क्वाऽपि न प्राप सुचिरादपि ॥२५१॥
अनेकगुणसस्यानां [8]प्ररोहोऽत्रेति **मैथिलः** । दुहितुर्युग्मजातायाः **सीते**ति विदधेऽभिधाम् ॥२५२॥
कालेन गच्छता शोकस्तयोर्मन्दीबभूव च । शोको हर्षश्च संसारे नरमायाति याति च ॥२५३॥
**सीता** च ववृधे सार्धं रूप-लावण्यसम्पदा । इन्दुलेखेव शनकैः कलापूर्णा बभूव च ॥२५४॥
क्रमादुद्यौवना पुण्यलावण्यलहरी सरित् । [9]सरित्पतितनूजेव साऽलक्षि कमलेक्षणा ॥२५५॥
अनुरूपो वरः कोऽस्या भवितेति दिवानिशम् । अचिन्तयत् तज्जनको **जनकः** पृथिवीपतिः ॥२५६॥
राज्ञां कुमारान् प्रत्येकं स वीक्ष्य चरचक्षुषा । [10]व्यचारयन् महामात्यैर्न कोऽपि रुरुचे पुनः ॥२५७॥
¶तदाऽ**र्धबर्बरैरातरङ्गतमा**दिपार्थिवैः । [11]दैत्यकल्पैरनल्पैर्भूर्**जनक**स्योपदुद्रुवे ॥२५८॥
तेषां रोधाय कल्पान्तवार्धि[12]वारामिवाऽक्षमः । दूतं **दशरथा**हूत्यै प्राहिणो**न्मिथिलेश्वरः** ॥२५९॥
**ऐक्ष्वाको** दूतमायातं तमाहूय ससम्भ्रमः । सप्रसादं निषाद्याऽग्रे जगादैवं महामनाः ॥२६०॥
तस्याऽस्मत्सुहृदो दूरस्थितस्याऽपि त्वदागमात् । मन्ये सौहार्दमद्वैतं मयीन्दाविव वारिधेः ॥२६१॥
कच्चिद् राष्ट्रे पुरे गोत्रे सैन्ये स्वाङ्गेऽन्यतोऽपि च । कुशलं **मिथिला**भर्तुर्ब्रूह्यागमनकारणम् ॥२६२॥
दूतोऽप्यवादीन्मद्भर्तुः सत्स्वप्याप्तेष्वनेकशः । सुहृद्धृदयमात्मा वा त्वमेवाऽसि महाभुज! ॥२६३॥
**जनक**स्य [13]सुखैर्दुःखैर्यत् सदा गृह्यसे यतः । विधुरेऽद्य स्मृतस्तेन त्वं यथा कुलदेवता ॥२६४॥
¶**वैताढ्याद्रे**र्दक्षिणतः **कैलास**स्योत्तरेण च । सन्त्यनार्या जनपदा भूयांसो भीषणप्रजाः ॥२६५॥
तेष्व**र्धबर्बरो** नाम देशो बर्बरकूलवत् । विद्यते दारुणाचारैर्नरैरत्यन्तदारुणः ॥२६६॥
**मयूरमाल**नगरे तस्य देशस्य भूषणे । **आतरङ्गतमो** नाम म्लेच्छराजोऽस्ति दारुणः ॥२६७॥
**शुक-मङ्कन-काम्बोज**प्रभृतीन् [14]विषयानपि । भुञ्जते तनयास्तस्य नृपीभूय सहस्रशः ॥२६८॥

१. *राज्येप्सुरेव* ला. ॥ २. *महापुरे* खंता.१-२, पाता. ॥ ३. बालम् ॥ ४. शनैः ॥ ५. शय्यायाम् ॥ ६. पुत्रमिच्छन् ॥ ७. *स भामण्डल०* खंता.१-२, ला. मु.प्रभृतिषु ॥ ८. अङ्कुरः ॥ ९. समुद्रपुत्री-लक्ष्मीरिव ॥ १०. *विचारयन्* ता. ॥ ११. *आगत्य दैत्यकल्पैर्भूर्जनक०* ला. ॥ १२. प्रलयकालसमुद्रजलानाम् ॥ १३. *सुखे दुःखे यत्०* खंता.१ ॥ १४. देशान् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]इदानीमातरङ्गस्तैः परितः परिवारितः । अक्षय्याक्षौहिणीनाथैरभाङ्क्षी**ज्जनक**क्षितिम् ॥२६९॥
प्रतिस्थानं च चैत्यानि बभञ्जुस्ते दुराशयाः । तेषां ह्याजन्म सम्पद्भ्योऽप्यभीष्टो धर्मविप्लवः ॥२७०॥
अनारतमभीष्टस्य धर्मस्य **जनक**स्य च । तत् कुरुष्व परित्राणं प्राणभूतस्तयोरसि ॥२७१॥
आकर्ण्यैवं **दशरथो** यात्राभेरीमवादयत् । सन्तः सतां परित्राणे विलम्बन्ते न जातुचित् ॥२७२॥
**रामो**ऽथोचे **दशरथं** म्लेच्छोच्छेदाय चेत् स्वयम् । तातो यास्यति तद् **रामः** सानुजः किं करिष्यति ? ॥२७३॥
पुत्रस्नेहाच्च तातेनाऽक्षमो वा तर्कितोऽस्म्यहम् । आ **भरता**जन्मसिद्धं नन्विक्ष्वाकुषु पौरुषम् ॥२७४॥
प्रसीद विरम म्लेच्छानुच्छेत्तुं मां समादिश । अचिराच्छ्रोष्यसि स्वामिन्! जयवार्तां स्वजन्मनः ॥२७५॥
¶इत्थं कथञ्चिद् राजानमनुज्ञाप्य सहानुजः । सेनापरिवृतो **रामो** जगाम **मिथिलां** पुरीम् ॥२७६॥
[2]चमूरु-द्वीपि-शार्दूल-सिंहानिव महावने । पुरीपरिसरेऽद्राक्षीद् **रामो** म्लेच्छमहाभटान् ॥२७७॥
रणकण्डूलदोर्दण्डा म्लेच्छास्ते जि[3]तकाशिनः । **रामं** द्रुतमुपद्रोतुं प्रावर्तन्त महौजसः ॥२७८॥
युगपद् **राम**सैन्यं तैरस्त्रैरन्धीकृतं क्षणात् । महावातैरिवोद्भ्रान्तैर्जगदुत्क्षिप्तरेणुभिः ॥२७९॥
जि[4]तमानिषु सैन्येषु [5]परेषु जयमानिषु । [6]मृतमानिनि **जनके** लोके सं[7]हृतमानिनि ॥२८०॥
**रामो** हसि[8]तमानी स्वमधिज्यं विदधे धनुः । अवादयच्च तन्मौर्वी रणनाटकडिण्डिमम् ॥२८१॥युग्मम्॥
भ्रूभङ्गमप्यकुर्वाणो गीर्वाण इव भूगतः । **राम**स्तान् कोटिशोऽप्यस्त्रैर्विव्याध व्याधवन्मृगान् ॥२८२॥
अयं वराको **जनक**स्तत्सैन्यं मशकोपमम् । तत्साहाय्यागतं सैन्यं दैन्यमागादितोऽप्यभूत् ॥२८३॥
अरे! कुत इमे बाणाश्छादयन्तो नभस्तलम् । पक्षिराजा इवाऽऽयान्तीत्यन्योऽन्यमभिभाषिणः ॥२८४॥
**आतरङ्गा**दयो म्लेच्छाधिपाः कुपितविस्मिताः । वर्षन्तोऽस्त्राणि युगपत् प्रति**रामं** डुढौकिरे ॥२८५॥युग्मम्॥
[9]दूरापाती [10]दृढाघाती शीघ्रवेधी च **राघवः** । तान् म्लेच्छान् हेलयाऽभाङ्क्षीच्छरभः कुञ्जरानिव ॥२८६॥
म्लेच्छाः प्रणश्य ते जग्मुः काका इव दिशोदिशम् । बभूव [11]स्वस्थो **जनको** जनैर्जानपदैः समम् ॥२८७॥
हृष्टोऽथ स्वसुतां **सीतां रामाय जनको** ददौ । द्वयं **रामा**गमात् तस्य वरप्राप्तिर्जयोऽप्यभूत् ॥२८८॥
तदा च **जानकी**रूपं जनादाकर्ण्य **नारदः** । तत्राऽगात् कौतुकाद् द्रष्टुं कन्यावेश्म विवेश च ॥२८९॥
पिङ्गकेशं पिङ्गनेत्रं [12]तुन्दिलं छत्रिकाधरम् । दण्डपाणिं सकौपीनमपीनाङ्गं स्फुरच्छिखम् ॥२९०॥
भीषणं **नारदं** प्रेक्ष्य भीता **सीता** [13]सवेपथुः । हा मातरित्यारटन्ती [14]गर्भागारान्तरेऽविशत् ॥२९१॥युग्मम्॥
कण्ठे शिखायां बाह्वोश्च धृत्वा तुमुलकारिभिः । दासिका-द्वारपालाद्यै रुरुधे **नारद**स्ततः ॥२९२॥
तेषां कलकलादेयुः शस्त्रिणो राजपूरुषाः । यमदूता इव क्रुद्धा हतैनमिति भाषिणः ॥२९३॥
क्षुभितो **नारद**स्तेभ्यः स्वं विमोच्य कथञ्चन । ययावुत्पत्य **वैताढ्यं** तत्र चैवमचिन्तयत् ॥२९४॥
व्याघ्रीभ्य इव गौर्जीवन् दासीभ्यो निरगामहम् । दिष्ट्या प्राप्तोऽस्मि **वैताढ्यं** बहुविद्याधरेश्वरम् ॥२९५॥
¶अस्तीह दक्षिणश्रेणौ **चन्द्रगत्या**त्मजो युवा । **भामण्डलो** नाम दोष्मानाखण्डलपराक्रमः ॥२९६॥
पटे लिखित्वा तत् **सीतां** दर्शयाम्यस्य येन ताम् । हठादपहरत्येष कृते प्रतिकरोम्यदः ॥२९७॥
तथैव **नारदः** कृत्वा **सीता**रूपमदर्शयत् । **भामण्डल**कुमारस्याऽदृष्टपूर्वं जगत्त्रये ॥२९८॥
सद्यो **भामण्डलो** भूतेनेवाऽऽक्रामि मनोभुवा । लेभे न जातुचिन्निद्रां **विन्ध्या**कृष्ट इव द्विपः ॥२९९॥
बुभुजे न हि भोज्यानि पेयान्यपि पपौ न सः । अवतस्थे च मौनेन योगीव ध्यानतत्परः ॥३००॥
तं तथा विधुरं प्रेक्ष्याऽवोचच्च**न्द्रगति**र्नृपः । किमाधिर्बाधते कोऽपि त्वामथ व्याधिरुद्धतः ॥३०१॥
किमाज्ञाखण्डनं केनाऽप्यकारि भवतोऽथवा ? । अन्यद् वा ब्रूहि हे वत्स! यत् ते दुःखस्य कारणम् ॥३०२॥
**भामण्डल**कुमारोऽभूद्ध्रिया द्वेधाऽप्यवाङ्मुखः । गुरूणां तादृगाख्यातुं कुलीनाः कथमीशते ? ॥३०३॥

१. *इदानीमातरमाद्यो* खंता.१ ॥ २. "मृगभेदः" ला.टि. ॥ ३. "जितसङ्ग्रामाः" ला.टि. ॥ ४. आत्मानं जितं मन्यन्ते तेषु ॥ ५. शत्रुषु ॥ ६. आत्मानं मृतं मन्यमाने ॥ ७. आत्मानं संहृतं(हतं) मन्यमाने ॥ ८. आत्मानं हसितं (जयाशया) मन्यमानः ॥ ९. दूरादापततीति ॥ १०. *दृढापाती* खंता.२, पाता. ॥ ११. *सुस्थो* रसंपा. ॥ १२. बृहदुदरम् ॥ १३. सकम्पा ॥ १४. अपवरकान्तरे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊचुर्वयस्या अथ **भामण्डल**स्याऽर्तिकारणम् । कामनां **नारदा**नीतपटालिखितयोषिति ॥३०४॥
वेश्मन्यानीय भक्त्याऽऽशु **नारदं** राजपुङ्गवः । का सा कस्यात्मजेत्यादि पप्रच्छ पटयोषितः[1] ॥३०५॥
आचख्यौ **नारदो**ऽप्येवं **विदेहा-जनका**त्मजा । नामधेयेन **सीता** सा या मया दर्शिता पटे ॥३०६॥
यादृशी साऽस्ति रूपेण लिखितुं तादृशीं पुनः । नाऽभिज्ञोऽहं न चाऽन्यो वा मूर्त्या लोकोत्तरैव सा ॥३०७॥
नाऽमरीषु न नागीषु न गन्धर्वीषु तादृशम् । **सीता**या यादृशं रूपं का कथा मानुषीषु[2] तु ? ॥३०८॥
तादृग् रूपं यथावस्थं विकर्तुं नेश्वराः सुराः । नाऽनुकर्तुं सुरनटा न च कर्तुं प्रजापतिः ॥३०९॥
तस्या मधुरता काचिदाकृतौ वचनेऽपि च । कण्ठे च पाणिपादे च रक्तता काचिदुच्चकैः ॥३१०॥
अथवा तां यथावस्थां यथा नाऽऽलेखितुं[3] क्षमः । नाऽलं तथा वक्तुमपि वच्म्यतः परमार्थतः ॥३११॥
योग्या **भामण्डल**स्येति विचार्य मनसा मया । यथाप्रज्ञं समालिख्य दर्शितेयं पटे नृप! ॥३१२॥
भविष्यति तवैवैषा पत्नी खिद्यस्व मा ततः । इत्याश्वास्य सुतं राजा व्यसृजन्**नारदं** मुनिम् ॥३१३॥
¶ततश्च **चपलगतिं** नाम विद्याधरं नृपः । इत्यादिदेश **जनक**मपहृत्याऽऽनय द्रुतम् ॥३१४॥
रजन्यां **जनकं** हृत्वाऽनुपलक्षित एव सः । समानीयाऽर्पयामास राज्ञश्**चन्द्रगते**रथ ॥३१५॥
**जनकं** बन्धुवत् स्नेहाद् **रथनूपुर**पार्थिवः । समाश्लिष्याऽऽसयित्वा स ससौहार्दमदोऽवदत् ॥३१६॥
लोकोत्तरगुणा पुत्री तव **सीते**ति विद्यते । **भामण्डल**श्च मे सूनुरनूनो रूपसम्पदा ॥३१७॥
द्वयोर्वधू-वरत्वेन संयोगोऽस्तूचितोऽधुना । सम्बन्धादावयोश्चाऽपि मिथो भवतु सौहृदम् ॥३१८॥
इत्यूचे **जनको** दत्ता **रामाय** स्वसुता मया । कथमन्यस्य यच्छामि दीयन्ते कन्यकाः सकृत् ॥३१९॥
अथ **चन्द्रगतिः** प्रोचे स्नेहवृद्धिकृते मया । आनीय याचितोऽसि त्वं तां[4] क्षमो हर्तुमप्यहम् ॥३२०॥
यद्यपि स्वसुता **सीता** त्वया **रामा**य कल्पिता । तथाऽपि नः पराजित्य **रामस्तां** परिणेष्यति ॥३२१॥
**वज्रावर्ता-ऽर्णवावर्ते** धनुषी देवताज्ञया । सदा यक्षसहस्राधिष्ठिते दुःसहतेजसी ॥३२२॥
पूज्ये ते नः सदा गोत्रदेवतावन्निकेतने । कृते भविष्यतो **राम-शार्ङ्गिणो**स्तद् गृहाण ते ॥३२३॥
आभ्यामारोपयत्येकमपि **दाशरथिः** स चेत् । वयं जितास्तदा तेन स उद्वहतु[5] ते सुताम् ॥३२४॥
प्रतिज्ञामित्यनुग्राह्य[6] बलादपि हि **मैथिलम्** । **मिथिला**यामनैषीच्च चापे ते च सनन्दनः[7] ॥३२५॥
मुमोच **जनकं** राजौकसि **चन्द्रगति**र्नृपः । स्वयं तु सपरीवारोऽवात्सीत् पुर्या बहिर्भुवि ॥३२६॥
¶आचख्यौ **जनक**स्तच्च वृत्तं निशि तदैव हि । महादेव्या **विदेहा**याः सद्यो हृदयशल्यदम् ॥३२७॥
**विदेहा**ऽपि रुरोदैवं रे दैवाऽत्यन्तनिर्घृण! । पुत्रं हृत्वा न मे तृप्तः पुत्रीमपि हरिष्यसि ? ॥३२८॥
स्वेच्छयैव वरादानं लोके न हि परेच्छया । परेच्छया वरादानं दैवादापतितं मम ॥३२९॥
परेच्छया प्रतिज्ञातं कोदण्डारोपणं यदि । कुर्यान्न **रामो**ऽन्यः कुर्यात् तदाऽनिष्टो वरो भवेत् ॥३३०॥
अथेत्थं **जनको**ऽवोचन्मा भैषीरेष **राघवः** । दृष्टसारो मया देवि! लतावत् तस्य तद् धनुः ॥३३१॥
**विदेहा**मिति सम्बोध्य प्रभाते **जनको**ऽमुचत् । अर्चित्वा चापरत्ने ते मण्डपे मञ्चमण्डिते ॥३३२॥
**सीतास्वयंवरा**याऽथ विद्याधर-नरेश्वराः । तत्रैत्य[8] **जनका**हूता अधिमञ्चमुपाविशन् ॥३३३॥
¶ततः सखीपरिवृता दिव्यालङ्कारधारिणी । भूचारिणीव त्रिदशी[9] तत्रोपेयाय **जानकी** ॥३३४॥
तत्र कृत्वा धनुःपूजां **रामं** मनसिकृत्य च । अतिष्ठज्**जानकी** तत्र जननेत्रसुधासरित् ॥३३५॥
**नारदो**दितसंवादि**सीता**रूपेक्षणात् तदा । **भामण्डल**कुमारस्य मारोऽभून्मारणात्मकः[10] ॥३३६॥
अथोचे **जनक**द्वाःस्थो भो भोः सर्वेऽपि खेचराः! । महीचराश्च राजानो! **जनको**ऽयं[11] वदत्यदः ॥३३७॥

---

१. ***पटयोषिति*** ला. मो. ॥ २. सर्वप्रतिषु ***मानवीषु*** इति पाठः समस्ति ॥ ३. ***नाऽऽलिखितुं*** खंता.१, ला. ॥ ४. सीताम् ॥ ५. ***समुद्वहतु*** हे. ला. ॥ ६. ***प्रतिज्ञामिति सङ्ग्राह्य*** पाता. हे. मो.; ***प्रतिज्ञामित्यनुज्ञाप्य*** खंता.१-२, रसंपा. ॥ ७. ***ससूनुकः*** खंता.१, ला.; सपुत्रः ॥ ८. ***तत्रैयुः*** पाता. ॥ ९. देवाङ्गना ॥ १०. ***मारकात्मकः*** मु.प्रभृतिषु ॥ ११. ***जनको वो०*** खंता.१-२, ला.; ***जनकोऽवोचदित्यदः*** ला. पा. छा. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरोपयति यः कश्चिदनयोश्चापदण्डयोः । अप्येकतरमद्यैव स उद्वहतु नः सुताम् ॥३३८॥
एकैकशोऽथ दोष्मन्तः खेचरा भूभुजोऽपि च । [1]उपधन्वं समाजग्मुस्तदारोपणकाम्यया ॥३३९॥
वेष्टिते पन्नगै रौद्रैश्चापे ते तीव्रतेजसी । नाऽलं बभूवुस्ते [2]स्प्रष्टुमप्यादातुं तु का कथा ? ॥३४०॥
धनुःस्फुलिङ्गज्वालाभिर्निर्यान्तीभिरनेकशः । [3]प्लुष्यमाणा निवृत्त्येयुस्तेऽन्यतोऽधोमुखा ह्रिया ॥३४१॥
¶अथ **दाशरथी राम**[4]श्चलत्काञ्चनकुण्डलः । गजेन्द्रलीलागमनश्चापोपान्तमुपासरत् ॥३४२॥
वीक्ष्यमाणः सोपहासं **चन्द्रगत्या**दिभिर्नृपैः । **जनकेन** च साशङ्कं निःशङ्को **लक्ष्मणाग्रजः** ॥३४३॥
वज्रमिव वज्रपाणि**र्वज्रावर्तं** महाधनुः । शान्तोरगानलं सद्यः परिपस्पर्श पाणिना ॥३४४॥**युग्मम्**॥
[5]स्थापयित्वाऽध्ययःपीठं नामयित्वा च वेत्रवत् । अधिज्यं विदधे [6]धन्व तद् **रामो** धन्विनां वरः ॥३४५॥
आकर्णान्तं तदाकृष्य [7]रोदःकुक्षिम्भरिध्वनि । [8]धनुरास्फालयामास स्वयशःपटहोपमम् ॥३४६॥
स्वयंवरस्रजं **रामे** स्वयं चिक्षेप **मैथिली** । चापाच्चोत्तारयामास **रामभद्रो**ऽपि [9]शिञ्जिनीम् ॥३४७॥
**लक्ष्मणो**ऽप्यर्णवावर्तं कार्मुकं **राम**शासनात् । अधिज्यं विदधे सद्यः प्रेक्षितो विस्मितैर्जनैः ॥३४८॥
आस्फालयच्च तन्नादबधिरीकृतदिङ्मुखम् । उत्तार्य मौर्वीं **सौमित्रिः** पुनः स्थाने मुमोच च ॥३४९॥
ददुः **सौमित्र**ये विद्याधराश्चकितविस्मिताः । अष्टादश निजाः [10]कन्याः सुरकन्या इवाऽद्भुताः ॥३५०॥
विलक्षा**श्चन्द्रगत्या**द्यास्[11]ताम्यद्**भामण्डला**न्विताः । विद्याधरेन्द्राः प्रययुः पुरं निजनिजं ततः ॥३५१॥
अथ **मैथिल**सन्देशादागाद् **दशरथो** द्रुतम् । महोत्सवेन जज्ञे च विवाहो **राम-सीत**योः ॥३५२॥
तदा च **जनक**भ्राता **कनको**ऽपि निजां सुताम् । **भरताय** ददौ **भद्रां सुप्रभा**कुक्षिसम्भवाम् ॥३५३॥
समं सुतैः [12]स्नुषाभिश्च राजा **दशरथो**ऽपि हि । ययाव**योध्यां** नगरीं नागरैः प्रकृतोत्सवाम् ॥३५४॥
¶अपरेद्यु**र्दशरथो** राजा चैत्यमहोत्सवम् । ऋद्ध्या महत्या विदधे **शान्तिस्नात्रं** चकार च ॥३५५॥
[13]स्नात्राम्भः [14]सौविदल्लेन महिष्यै प्रथमं तदा । [15]पश्चात् त्वपरपत्नीभ्यो दासीभिः प्राहिणोन्नृपः ॥३५६॥
यौवनाच्छीघ्रगामिन्यो दास्यः प्रथममेव ताः । राज्ञीनामार्पयन् स्नात्रपयस्ताश्च ववन्दिरे ॥३५७॥
वृद्धत्वात् सौविदल्ले तु शनिवन्मन्दगामिनि । असम्प्राप्तस्नात्रजला महादेवीत्यचिन्तयत् ॥३५८॥
सर्वासामेव राज्ञीनां जिनेन्द्रस्नात्रवारिणा । प्रसादो [16]विदधे राज्ञा महिष्या अपि मे न हि ॥३५९॥
तत् कृतं मन्दभाग्याया जीवितेनाऽप्यतो मम । ध्वस्ते माने हि दुःखाय जीवितं मरणादपि ॥३६०॥
विमृश्येति प्रविश्याऽन्तर्मरणे कृतनिश्चया । [17]वस्त्रेणोद्बन्धुमात्मानमारेभे सा मनस्विनी ॥३६१॥
तदैवाऽऽगान्नरेन्द्रस्तां तदवस्थां ददर्श च । तन्मृत्युभीतः स्वोत्सङ्गे निवेश्यैवमुवाच च ॥३६२॥
कुतोऽपमानादारब्धं दुःसाहसमिदं त्वया ? । किं नाम दैवाद् विदधे मया काऽप्यवमानना ? ॥३६३॥
साऽपि गद्गदवागूचे जिनस्नात्रपयः पृथक् । सर्वासां प्रैषि राज्ञीनां भवता न पुनर्मम ॥३६४॥
इत्यवोचत सा यावत् तावदागाच्च कञ्चुकी । राज्ञाऽर्हत्स्नात्रवारीदं प्रस्थापितमिति ब्रुवन् ॥३६५॥
सोऽभ्यषिञ्चच्च तां मूर्ध्नि तेन [18]पुण्येन वारिणा । विलम्बेन किमागास्त्वं ? राज्ञा चैवमपृच्छ्यत ॥३६६॥
कञ्चुक्यपि जगादैव [19]वार्द्धकं मेऽपराध्यति । सर्वकार्याक्षमं स्वामिन्! मां पश्य स्वयमप्यमुम् ॥३६७॥
ततो मुमूर्षुमिव तं प्रस्खलन्तं पदे पदे । [20]घण्टान्तर्लालिकालोलदशनं [21]वलिभाजनम् ॥३६८॥
श्वेतसर्वाङ्गरोमाणं भ्रूलोमच्छन्नलोचनम् । शुष्कमांसासृजं [22]प्रादुःस्नसं सर्वाङ्गवेपथुम् ॥३६९॥
विलोक्याऽचिन्तयद् राजा स्मो यावन्नेदृशा वयम् । चतुर्थपुरुषार्थाय तावद्धि प्रयतामहे ॥३७०॥त्रिभिर्विशेषकम्[23]॥

---

१. ***उपधन्व*** खंता.१-२, पाता. ता.; "नपुंसकाद् वा"(सि.७/३/८९) इति सूत्रेण सिध्यति द्वयमपि ॥ २. ०***स्पर्ष्टुमप्यादातुं*** रसंपा.; "स्पृशादिसृपो वा" (सि.४/४/११२)इति द्वितयमपि साध्यम् ॥ ३. "दह्यमानाः" ला.टि. ॥४. ०***श्चलकाञ्चन***० खंता.१ ॥५. ***स्थापयित्वाऽध्यपीठं च*** खंता.१; लोहपीठोपरि ॥ ६. "धन्वन्" ला.टि. ॥७. भूम्यन्तरीक्षयोः मध्यभागपूरको ध्वनिर्यस्य तत् ॥ ८. ***धनुरास्फालयद् रामः*** ला. पा. छा. हे. मो. ॥ ९. प्रत्यञ्चाम् (दोरी) ॥ १०. ***पुत्रीः*** हे. ॥ ११. ०***द्या भ्राम्यद्भामण्डला*** ला. छा. पा. ॥ १२. पुत्रवधूभिः ॥ १३. ***स्नात्राम्बु*** पाता. ॥ १४. कञ्चुकिना ॥ १५. ***पत्नीनामपरासां तु*** ला. ला. ॥ १६. ***विहितो*** खंता.१, पाता. हे. मो. ता. ॥ १७. ***वस्त्रेण बन्द्धु***० ता.; ***वस्त्रेणोद्बद्धु***० कां. ला. मु.; ***वस्त्रेण बद्धु***० मो. ॥ १८. पवित्रेण ॥ १९. वृद्धावस्था ॥ २०. घण्टाया अन्तर्या लालिका-लोलकं तद्वत् लोलाश्चपला दशना-दन्ता यस्य सः, तम् ॥ २१. वलिः-'करचली' इति भाषा ॥ २२. ***प्रादुर्भूतसर्वा***० मु. ॥ २३. खंता. पाता. ला. प्रतिषु न ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंमनोरथो राजा विषयेभ्यः पराङ्मुखः । कमप्यनैषीत् समयं [1]भववैराग्यतन्मयः ॥३७१॥

¶तस्यां नगर्यामन्येद्युश्चतुर्ज्ञानी महामुनिः । **सत्यभूति**रिरिति सङ्घप्रावृतः समवासरत् ॥३७२॥

सपुत्रादिपरीवारो राजा **दशरथो**ऽपि तम् । गत्वा ववन्दे शुश्रूषुर्देशनां निषसाद च ॥३७३॥

तदानीमेव **वैताढ्यगिरेश्चन्द्रगति**र्नृपः । **सीता**भिलाषसन्तप्त**भामण्डल**समन्वितः ॥३७४॥

विद्याधरेन्द्रैरन्वीतो **रथावर्ता**चलेऽर्हतः । वन्दित्वा विनिवृत्तः संस्तत्राऽऽयातो नभःस्थितः ॥३७५॥[2]युग्मम्॥

तं मुनिं समवसृतं वीक्षाञ्चक्रेऽवतीर्य च । ववन्देऽथाग्रतो धर्मं शुश्रूषुर्निषसाद च ॥[3]३७६॥

**सीता**भिलाषजं तापं ज्ञात्वा **भामण्डल**स्य तु । **सत्यभूतिः** सत्यवादी सूरिः प्रस्तुत्य देशनाम् ॥३७७॥

**चन्द्रगति-पुष्पवत्योः सभामण्डल-सीत**योः । समाचख्यौ पूर्वभवांस्तेषां पापान्निवृत्तये ॥३७८॥युग्मम्॥

**सीता-भामण्डल**योश्च भवेऽस्मिन् युग्मजातताम् । **भामण्डला**पहारं च यथावदवदन्मुनिः ॥३७९॥

**भामण्डल**कुमारोऽपि तदाकर्ण्य मुनेर्वचः । सञ्जातजातिस्मरणो मूर्च्छितो न्यपतद् भुवि ॥३८०॥

**भामण्डलो** लब्धसञ्ज्ञः [4]कथितं **सत्यभूति**ना । स्वपूर्वभववृत्तान्तं शशंस स्वयम[5]प्यथ ॥३८१॥

ययुः परमसंवेगं **चन्द्रगत्या**दयोऽप्यथ । स्वसेति **सीतां** च नमश्चक्रे **भामण्डलः** सुधीः ॥३८२॥

जातमात्रो योऽपजह्रे सोऽयं मम सहोदरः । इति हृष्टाऽऽशिषं तस्मै ददौ **सीता** महासती ॥३८३॥

नमश्चकार **रामं** च ललाटस्पृष्टभूतलः । **भामण्डलो** विनयवान् सद्यः सञ्जातसौहृदः ॥ ३८४॥

समं **विदेह**या देव्या **जनकं** भूपतिं ततः । तत्राऽऽनैषीच्च**चन्द्रगतिः** प्रेष्य विद्याधरोत्तमान् ॥३८५॥

जातमात्रापहारादिवृत्तान्ताख्यानपूर्वकम् । **भामण्डलः** सुतस्तेऽसाविति तस्मै शशंस च ॥३८६॥

जहर्ष वचसा तेन [6]स्तनितेनेव बर्हिणः । **जनको** जननी सा च **विदेहा** [7]स्तन्यमक्षरत् ॥३८७॥

**भामण्डलो** नमश्चक्रे पितरावु[8]पलक्ष्य तौ । चुम्ब्यमानो मूर्ध्नि ताभ्यां [9]स्नप्यमानोऽश्रुवारिभिः ॥३८८॥

अथ **चन्द्रगती** राज्यं न्यस्य **भामण्डले** सुते । भवोद्विग्नः प्रवव्राज **सत्यभूते**[10]र्मुनेः पुरः ॥३८९॥

**सत्यभूतिं चन्द्रगतिं** पित[11]रावन[12]रण्यजम् । **सीता-रामौ** च नत्वाऽगान्निजं **भामण्डलः** पुरम् ॥३९०॥

**सत्यभूतिं** महर्षिं तं नत्वा **दशरथो** नृपः । [13]अपृच्छदात्मनः [14]पूर्वभवानाख्यन् मुनिश्च सः ॥३९१॥

¶**सेनापुरे** त्वं वणिजो **भावनस्य** महात्मनः । पत्न्यामभू**द्दीपिकायामुपास्ति**र्नाम कन्यका ॥३९२॥

साधूनां [15]प्रत्यनीका सा भूत्वा तत्र भवे चिरम् । परिबभ्राम क[16]ष्टासु तिर्यगादिषु योनिषु ॥३९३॥

तज्जीवस्त्वं भवं भ्रान्त्वा पुरे [17]**चन्द्रपुरे** ततः । **धनस्या**ऽभूत् सुतः पत्न्यां **सुन्दर्यां वरुणा**भिधः ॥३९४॥

तदोदारः प्रकृत्या त्वं साधुभ्यः श्रद्धयाऽधिकम् । निरन्तरमदा दानं कालधर्ममथाऽऽसदः ॥३९५॥

द्वीपेऽथ **धातकीखण्डे युग्म्युत्तरकुरुष्व**भूः । मृत्वा चाऽगा दे[18]वभूयं परिच्युत्य ततोऽपि हि ॥३९६॥

विजये **पुष्कलावत्यां पुष्कलायां** च पुर्यभूः । **नन्दिघोष**नृप-**पृथ्वी**देव्योस्[19]तुङ् **नन्दिवर्धनः** ॥३९७॥युग्मम्॥

**नन्दिघोषः** सुतं राज्ये न्यस्य त्वां **नन्दिवर्धनम्** । **यशो**[20]**धरा**न्मुनेरात्तदीक्षो **ग्रैवेयके** ययौ ॥३९८॥

श्रावकत्वं पालयित्वा त्वं मृत्वा **नन्दिवर्धनः** । त्रिदशो **ब्रह्मलोके**ऽभूः परिच्युत्य ततोऽपि हि ॥३९९॥

[21]**प्रत्यग्विदेहे वैताढ्ये** चोत्तरश्रेणिभूषणे । पुरे **शशिपुरे रत्नमालिनः** खेचरेशितुः ॥४००॥

**विद्युल्लता**भिधानायां सधर्मिण्यां महाभुजः । सूनुः **सूर्यञ्जय** इति नाम्ना त्वं तनयोऽभवः ॥४०१॥त्रिभिर्विशे[22]षकम्॥

¶अन्यदा **रत्नमाली** स दृप्तं विद्याधरेश्वरम् । विजेतुं **वज्रनयनं** पुरं **सिंहपुरं** ययौ ॥४०२॥

स ज्वालयितुमारेभे पुरं **सिंहपुरं** ततः । सबालवृद्धं सस्त्रैणं सपशूपवनं हठात् ॥४०३॥

अभिधानेनो**पमन्योः** पूर्वजन्मपुरोधसः । जीवो देवः **सहस्रारा**त् तं तदैत्यैवमब्रवीत् ॥४०४॥

भो भो! महानुभावैवं मा कृथाः पापमुत्कटम् । त्वं **भूरिनन्दनो** नाम राजाऽभूः पूर्वजन्मनि ॥४०५॥

---

१. ***भवे वै०*** मु. छा. पा. मो. कां.प्रभृतिषु ॥ २. खंता. ला. पाता. प्रतिषु न ॥ ३. ३७६समनन्तरं " त्रिभिर्विशेषकम्",इति खंता. पाता. ला. प्रतिषु ॥ ४. ***कथितः*** पाता. ॥ ५. ***०मप्यदः*** खं.२ ॥ ६. ***जीमूतेनेव*** खं.२; मेघगर्जितेनेव मयूराः ॥ ७. स्तनमण्डलाद् दुग्धम् ॥ ८. ***०लक्षितौ*** छा. पा. मो. ॥ ९. ***स्नाप्य०*** मु. ॥ १०. ***०भूतेर्मुनेः*** ता. ॥ ११. पितरौ-जनक-विदेहे ॥ १२. दशरथम् ॥ १३. ***आपृच्छतात्मनः*** ता. ॥ १४. ***०पूर्वं भवमा०*** ता. ॥ १५. द्वेषिणी ॥ १६. ***कष्टासु*** मु. ॥ १७. ***द्रङ्गपुरे*** ला. छा. पा. ॥ १८. देवत्वम् ॥ १९. पुत्रः ॥ २०. ***यशोधरमुने०*** मु. ॥ २१. पश्चिमविदेहे ॥ २२. खंता. ला. पाता.प्रतिषु न ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदा मांसनिवृत्तिं त्वं प्रत्यज्ञासीर्विवेकत: । पुरोहितेन तेनोप**मन्यु**नोक्तश्च भग्नवान् ॥४०६॥
पुरोधा: सोऽन्यदा पुंसा **स्कन्द**नाम्ना निपातित: । गजश्चाऽभूद् गृहीतश्च **भूरिनन्दन**भूभुजा ॥४०७॥
हतश्चेभो रणे सोऽथ **भूरिनन्दन**भूपते: । **गन्धारा**यामभूत् पत्न्यां सूनुर्नाम्नाऽ**रिसूदन:** ॥४०८॥
सञ्जातजातिस्मरण: प्रव्रज्य च विपद्य च । सोऽहं देव: **सहस्रारे** कल्पे जातोऽस्मि विद्धि माम् ॥४०९॥
**भूरिनन्दन**[1]राजोऽभूद् विपद्याऽजगरो वने । दग्धो दावेन सोऽयासीद् द्वितीयं नरकावनिम् ॥४१०॥
नरकेऽपि मया गत्वा स प्राक्स्ने[2]हात् प्रबोधित: । तस्मादु[3]द्धृत्य सोऽभूस्त्वं **रत्नमाली**ह पार्थिव: ॥४११॥
मांसप्रत्याख्यानभङ्गं तदानीमिव सम्प्रति । [4]अनन्तदु:खोदर्कं तत् पुरदाहं स्म मा कृथा: ॥४१२॥
[5]तदाकर्ण्य वचो युद्धाद् **रत्नमाली** न्यवर्तत ।राज्ये न्यधत्त च [6]**कुलनन्दनं सूर्य**नन्दनम् ॥४१३॥
**सूर्यञ्जयेन** पुत्रेण सहैव व्रतमाददे । तत्कालमेव **तिलकसुन्दराचार्य**सन्निधौ ॥४१४॥
द्वावप्यभूतां तौ मृत्वा **महाशुक्रे**ऽमरोत्तमौ । **सूर्यञ्जय**स्ततश्च्युत्वा भोस्त्वं **दशरथो**ऽभव: ॥४१५॥
प्रच्युत्य **रत्नमाली** तु **जनको**ऽयमजायत । अभूच्च्युत्वोप**मन्यु**स्तु **कनको जनका**नुज: ॥४१६॥
**नन्दिघोष:** पिता यस्ते **नन्दिवर्धन**जन्मनि । सोऽहं **ग्रैवेयका**च्च्युत्वा **सत्यभूति**रिहाऽभवम् ॥४१७॥
तच्छ्रुत्वा जातसंवेगस्तं वन्दित्वाऽ**नरण्यज:** । [8]प्रविव्रजिषुराधातुं **रामे** राज्यं [9]गृहं ययौ ॥४१८॥
¶[10]अथ राज्ञी: सुतान् मन्त्रिमुख्यानाहूय पार्थिव: । आपप्रच्छे यथौचित्यं [11]दत्तालापसुधारस: ॥४१९॥
नत्वा बभाषे **भरतो**ऽहं सर्वविरतिं प्रभो! । त्वया सममुपादास्येऽवस्थास्ये त्वां विना न हि ॥४२०॥
ममाऽन्यथा हि द्वे कष्टे स्वामिन्नत्यन्त[12]दु:सहे । एकं त्वत्पादविरहोऽपरं [13]संसारतर्पणम् ॥४२१॥
¶तच्छ्रुत्वा चाऽथ **कैकेयी** निश्चितं भाव्यत: परम् । न पतिर्न च मे सूनुरिति [14]भीताऽब्रवीदिदम् ॥४२२॥
स्वामिन्! स्मरसि यो दत्तस्त्वया मह्यं स्वयं वर: । स्वयंवरोत्सवे तत्र तेन [15]सारथ्यकर्मणा ? ॥४२३॥
तं प्रयच्छाऽ[16]धुना मह्यं नाथ! [17]सत्यप्रतिश्रव! । [18]प्रस्तरोत्कीर्णरेखेव प्रतिज्ञा हि महात्मनाम् ॥४२४॥
अथाऽवदद् **दशरथ:** प्रतिपन्नं स्मराम्यहम् । याचस्व यन्ममाऽधीनं विना व्रतनिषेधनम् ॥४२५॥
ततो ययाचे **कैकेयी** त्वं चेत् प्रव्रजसि स्वयम् । स्वामिन्! वि[19]श्वम्भरामेतां **भरता**य प्रयच्छ तत् ॥४२६॥
अद्यैव गृह्यतामेषा मद्भूरित्यभिधाय ताम् । **सलक्ष्मणं** [20]समायातं **रामं दशरथो**ऽवदत् ॥४२७॥
अस्या: सारथ्यतुष्टेन दत्त: पूर्वं मया वर: । सोऽयं **भरत**राज्येन **कैकेय्या** याचितोऽधुना ॥४२८॥
**रामो**ऽपि हृष्टोऽभाषिष्ट मात्रेदं साधु याचितम् । यन्मद्भ्रात्रे **भरता**य राज्यदानं महौजसे ॥४२९॥
आपप्रच्छे प्रसादान्मामिदं तातस्तथाऽप्यद: । दुनोति मामविनय[21]सूचनाकारणं जने ॥४३०॥
[22]अप्येकबन्दिने राज्यं तुष्टस्तातो ददात्वद: । निषेधेऽनुमतौ वा मे न स्वाम्यं [23]पत्तिमानिन: ॥४३१॥
**भरतो**ऽप्यहमेवाऽस्मि निर्विशेषावुभौ तव । अतोऽभिषिच्यतां राज्ये **भरत:** परया मुदा ॥४३२॥
¶इति **राम**वच: श्रुत्वा भूपति: प्रीतिविस्मित: । आदिक्षन् मन्त्रिणो यावद् **भरत**स्तावदब्रवीत् ॥४३३॥
स्वामिन्! सह व्रतादानमादावप्यर्थितं मया । तात! तन्नाऽन्यथा कर्तुं कस्याऽपि वचसाऽर्हसि ॥४३४॥
राजाऽप्युवाच मा वत्स! मत्प्रतिज्ञां मुधा कुरु । वरो मया हि त्वन्मातुर्दत्तो न्यासीकृतश्चिरम् ॥४३५॥
सोऽद्य ते राज्यदानेन **कैकेय्या** याचितोऽनघ! । आज्ञां मम च मातुश्च नाऽन्यथा कर्तुमर्हसि ॥४३६॥
**रामो भरत**मित्यूचे न ते [24]गर्द्धोऽस्ति यद्यपि । तथाऽपि सत्यापयितुं तातं त्वं राज्यमुद्वह ॥४३७॥

१. *०राजाऽभू०* ता. ॥ २. *०स्नेहावबो०* ता. ॥ ३. *०दुद्धृत्य* ला. विना ॥ ४. अनन्तदु:खानि एव उदर्क:-परिणाम: यस्य तम् ॥ ५. *इत्याकर्ण्य* खं.१ ॥ ६. *कुलनन्दनं कुलनन्दनं* ता.; सूर्यञ्जयस्य पुत्रं कुलनन्दननामानम् ॥ ७. दशरथ: ॥ ८. *प्रविव्रजिषुरुत्थाय जगाम निजमालयम्* हे. छा. पा. मो. ता. खं.२, पाता. ॥ ९. *गृहे* खं.१ ॥ १०. *राजा राज्ञी-सुता-ऽमात्यानथ दीक्षोत्सुक: स्वयम्* खं.१, ला. कां. ला. ॥ ११. दत्त आलाप एव सुधारसो येन स: ॥ १२. *०दु:खदे* कां. ला. खं.१, ला. ॥ १३. संसारवृद्धि: ॥ १४. *ध्यात्वाऽब्रवी०* मु. खं.२, पाता. हे. मो.प्रभृतिषु ॥ १५. सारथित्वस्य कर्मणा-कार्येण ॥ १६. *०च्छानुना नित्यं* खं.१ ॥ १७. सत्यप्रतिज्ञ! ॥ १८. प्रस्तर:-पाषाण: ॥ १९. पृथ्वीं-राज्यमित्यर्थ: ॥ २०. *समाहूय* मु. खं.१, ला.प्रभृतिषु ॥ २१. तातो मां प्रसादात् पृच्छति, किन्तु लोके इयं तातकृता पृच्छा ममाऽविनयस्य सूचनां करिष्यति, यद् रामो न विनयी, अतस्तातस्तं पृष्ट्वा भरताय ददाति, एतच्च न युक्तमतो मां दुनोति इत्यर्थ: ॥ २२. *अप्येकनन्दने* पाता. ॥ २३. स्वाम्यं-स्वामित्वं, आत्मानं पत्तिं-सामान्यसेवकं मन्यते य: सोऽहं, तस्य(मम) ॥ २४. गर्द्ध:-आसक्ति:; *गर्वोऽस्ति* मु.प्रभृतिषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाऽश्रुभरितदृष्टिर्**भरतो** गद्गदाक्षरम् । पतित्वा पादयो **राम**मित्युवाच कृताञ्जलिः ॥४३८॥
तातपादार्यपादानां [१]महेच्छानामदः खलु । उचितं ददतां राज्यमाददानस्य मे न तु ॥४३९॥
तातस्य सूनुः किं नाऽहं ? किं वा नाऽऽर्यस्य चाऽनुजः ? । सत्यं [२]मातृमुखोऽस्म्येष [३]गर्द्धमेव करोमि चेत् ॥४४०॥
¶**रामो** राजानमित्यूचे **भरतो** मयि सत्यसौ । राज्यं नाऽऽदास्यते तस्माद् वनवासाय याम्यहम् ॥४४१॥
इत्यनुज्ञाप्य राजानं **रामो** नत्वा च भक्तितः । **भरते** च रुदत्युच्चैर्निर्ययौ [४]चाप-तूणभृत् ॥४४२॥
वनवासाय गच्छन्तं दृष्ट्वा **दशरथः** सुतम् । भूयो भूयो ययौ मूर्च्छामतुच्छां स्नेहकातरः ॥४४३॥
अथाऽ**पराजितां** देवीं नत्वा **रामो**ऽभ्यधादिति । मातर्यथाऽहं तनयो **भरतो**ऽपि तथैव ते ॥४४४॥
स्वां सत्यापयितुं [५]सन्धां तस्मै [६]राज्यमदात् पिता । मयि सत्येष नाऽऽदत्ते तद् गन्तव्यं [७]मया वने ॥४४५॥
तद् दृशा **भरतं** पश्येः सविशेषप्रसादया । कदाचिदपि मा [८]भूस्त्वं मद्वियोगेन कातरा ॥४४६॥
तामाकर्ण्य गिरं देवी पपात भुवि मूर्च्छिता । चेटीभिश्चन्दनाम्भोभिः सिक्तोत्तस्थावुवाच च ॥४४७॥
आः! केन जीविताऽस्म्येषा ? मूर्च्छा हि सुखमृत्यवे । सहिष्ये **राम**विरहदुःखं [९]जीवन्त्यहं कथम् ? ॥४४८॥
वनं व्रजिष्यति सुतः पतिश्च प्रव्रजिष्यति । श्रुत्वाऽप्येतन्न यद्दीर्णा **कौशल्ये**! वज्रमय्यसि ॥४४९॥
**रामो** जगाद भूयोऽपि मातः! पत्न्यसि मत्पितुः । ततः किमिदमारब्धं कातरस्त्रीजनोचितम् ? ॥४५०॥
वनान्यटितुमेकाकी याति [१०]केसरिणीसुतः । स्वस्था तु [११]केसरिण्यस्ति न ताम्यति मनागपि ॥४५१॥
तातस्य ऋण[१२]मस्त्युच्चैः प्रतिपन्नवरो ह्ययम् । [१३]अत्र स्थिते च मय्यम्ब! तस्याऽऽनृण्यं भवेत् कथम् ? ॥४५२॥
इत्यादियुक्तिवचनैर्बोधयित्वाऽ**पराजिताम्** । तां नत्वाऽन्याश्च जननीर्निर्ययौ **लक्ष्मणा**ग्रजः ॥४५३॥
¶दूराद् **दशरथं** नत्वा **सीतो**पेत्याऽ**पराजिताम्** । नत्वा चाऽयाचताऽऽदेशं **रामा**नुगमनं प्रति ॥४५४॥
ऊचेऽ**पराजिता** देवी [१४]क्रोडमारोप्य **जानकीम्** । बालामिव स्नपयन्ती [१५]कवोष्णैर्नयनोदकैः ॥४५५॥
वत्से! वत्सो **रामभद्रो** विनयी पित्रनुज्ञया । वनं प्रयाति तस्यैतन्नृसिंहस्य न दुष्करम् ॥४५६॥
देवीव लालिताऽसि त्वमाजन्मोत्तमवाहनैः । सहिष्यसे कथं वत्से! पादचङ्क्रमणव्यथाम् ? ॥४५७॥
तवाऽङ्गं सौकुमार्येण कमलोदरसोदरम् । क्लिष्टं तापादिना कुर्यात् क्लेशं **दाशरथे**रपि ॥४५८॥
स्वभर्तुरनुयानेनाऽनिष्टकष्टागमनेन च । न निषेधं न चाऽनुज्ञां यान्त्यास्ते कर्तुमुत्सहे ॥४५९॥
**सीता**ऽप्युवाच निःशोका नमस्कृत्याऽ**पराजिताम्** । दधती [१६]प्रातरुत्फुल्लसरोरुहमिवाऽऽननम् ॥४६०॥
[१७]अधित्वदस्तु मे भक्तिर्नित्यं क्षेमङ्करा पथि । एषाऽहमनुयास्यामि **रामं** विद्युदिवाऽम्बुदम् ॥४६१॥
इत्युक्त्वा तां पुनर्नत्वा निर्ययौ **जनकात्मजा** । आत्मान[१८]मात्मरामेव ध्यायन्ती **लक्ष्मणा**ग्रजम् ॥४६२॥
अहो! अत्यन्तमनया पतिभक्त्याऽद्य **जानकी** । आद्योदाहरणं [१९]जज्ञे [२०]पतिदैवतयोषिताम् ॥४६३॥
कष्टादभीता **सीते**यं [२१]सतीजनमतल्लिका । अहो शीलेन महता पुनाति स्वं कुलद्वयम् ॥४६४॥
इति व्यावर्णयन्तीभिः शोकगद्गदया गिरा । पौरीभिः कथमप्यैक्षि **सीता यान्ती** वनं प्रति ॥४६५॥त्रिभिर्विशेषकम्॥
¶**रामं** वनाय निर्यान्तं [२२]दृष्ट्वा सपदि **लक्ष्मणः** । सद्यः [२३]सन्धुक्षितक्रोधवह्निर्दध्याविदं हृदि ॥४६६॥
ऋजुस्तातः प्रकृत्याऽपि प्रकृत्याऽ[२४]नृजवः स्त्रियः । इयच्चिरं वरं धृत्वा [२५]याचते साऽन्यथा कथम् ? ॥४६७॥
दत्तमेतावता राज्यं **भरता**य महीभुजा । अपनीतमृणं स्वस्य गता नश्च [२६]पितॄणभीः ॥४६८॥
निर्भयः साम्प्रतं हत्वा **भरतात्** [२७]कुलपांसनात् । न्यस्यामि राज्यं किं **रामे** वि[२८]रामाय निजक्रुधः ? ॥४६९॥
अथवाऽसौ महासत्त्वस्तृणवद् राज्यमुज्झितम् । **रामो** नाऽऽदास्यते दुःखं तातस्य तु भविष्यति ॥४७०॥

---

१. महाशयानाम् ॥ २. 'मावडियो' इति भाषायां, यः सर्वकार्येषु मातरमेव प्रेक्षतेऽनुसरति च ॥ ३. ***गर्वमेवं*** मु.प्रभृतिषु ॥ ४. ***चापतूणवान्*** मु. ॥ ५. प्रतिज्ञाम् ॥ ६. ***राज्यं ददौ पिता*** खं.१, ला. ॥ ७. ***वने मया*** खं.१-२ ॥ ८. ***भूश्च*** ता. ॥ ९. ***जीवाम्यहं*** खं.१ ॥ १०. सिंहीपुत्रः ॥ ११. ***केसरिण्यास्ते*** मु. ॥ १२. ***ऋणमत्युच्चैः*** ता. ॥ १३. ***अवस्थिते*** मो. ॥ १४. अङ्कम् ॥ १५. ईषदुष्णैः ॥ १६. प्रातःकाले विकस्वरं कमलमिव ॥ १७. त्वयि अधि इति अधित्वत्, तव उपरीत्यर्थः ॥ १८. आत्मस्वरूपे एव आरामो यस्याः सा आत्मारामा-आत्मध्यानं कुर्वन्ती योगिनी तद्वत् ॥ १९. ***जाता*** हे. मो. ता. ॥ २०. पतिरेव दैवतं-देवः यासां, तासां नारीणाम् ॥ २१. सतीसमूहे प्रशस्या ॥ २२. ***श्रुत्वा*** मुद्रिते; छा. पा. मो. विना सर्वप्रतिष्वपि ॥ २३. सन्धुक्षितः-दीप्तः क्रोधवह्निर्यस्य सः ॥ २४. कुटिलाः ॥ २५. ***ययाचे*** खंता.१-२, ला. ॥ २६. ***पितॄण०*** पाता.; पितुः ऋणं, तस्य भीः-भयम्; ("ऋतो वा तौ च" सि.१/२/४) ॥ २७. कुलाङ्गारात् ॥ २८. "शमनाय" इति ला.टि. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तातस्य मा स्म भूद् दु:खं राजाऽस्तु **भरतो**ऽपि हि । अहं त्वनुगमिष्यामि **राम**पादान् पदातिवत् ॥४७१॥
एवं विचिन्त्य **सौमित्रि**र्नत्वाऽऽपृच्छ्य च भूपतिम् । ययौ **सुमित्रा**माप्रष्टुं नत्वा चैवमवोचत ॥४७२॥
गमिष्यति वनं **रामो**ऽनुगमिष्यामि [1]तं त्वहम् । मर्यादाब्धिं विना ह्यार्यं न स्थातुं **लक्ष्मण:** क्षम: ॥४७३॥
कथञ्चिद् धैर्यमालम्ब्य **सुमित्रा**ऽप्यब्रवीदिदम् । साधु वत्साऽसि मे वत्सो ज्येष्ठं यदनुगच्छसि ॥४७४॥
मां नमस्कृत्य वत्सोऽद्य **रामभद्र**श्चिरं गत: । अतिदूरे भवति ते मा विलम्बस्व वत्स! तत् ॥४७५॥
इदं साध्वम्ब! साध्वम्ब! मदम्बाऽसीत्युदीर्य ताम् । नत्वा च **लक्ष्मणो**ऽगच्छत् प्रणन्तु**मपराजिता**म् ॥४७६॥
तां नत्वोवाच **सौमित्रि**रार्य एकाक्यगाच्चिरम् । त्वामाप्रष्टुमहं त्वागामार्यानुगमनोत्सुक: ॥४७७॥
उदश्रुरूचे **कौशल्या** मन्दभाग्याऽस्मि हा! हता । वत्स! त्वमपि मां मुक्त्वा प्रस्थितोऽसि वनाय यत् ॥४७८॥
त्वमेकोऽत्राऽवतिष्ठस्व मा प्रतिष्ठस्व **लक्ष्मण**! । ममाऽऽश्वासकृते **राम**विरहार्दितचेतस: ॥४७९॥
प्रत्यूचे **लक्ष्मणो**ऽप्येवं माता **राम**स्य नन्वसि । मात:! कृतमधैर्येणाऽर्हेण सामान्ययोषिताम् ॥४८०॥
दूरे गच्छति मे बन्धुरनुयास्यामि तं द्रुतम् । तद् विघ्नं मा कृथा देवि! [2]**राम**निघ्न: सदाऽप्यहम् ॥४८१॥
तामित्युक्त्वा च नत्वा च **सौमित्रि**रथ सत्वरम् । [3]अनुधाव्याऽगमत् **सीता-रामौ** कार्मुक-तूणभृत् ॥४८२॥
¶त्रयोऽपि निर्ययु: पुर्या विकस्वरमुखाम्बुजा: । विलासोपवनायेव वनवासाय सोद्यमा: ॥४८३॥
प्राणैरिव विनिर्यद्भि**र्मैथिली-राम-लक्ष्मणै:** । कष्टां नराश्च नार्यश्च नगर्यां लेभिरे दशाम् ॥४८४॥
वेगात् तान्वधावन्ताऽनुरागेण गरीयसा । नागरा: [4]क्रूर**कैकेयी**विध्योराक्रोशदायिन: ॥४८५॥
बाष्पायमाणो राजाऽपि सान्त:पुरपरिच्छद: । द्रुतमन्वसरद् **राम**माकृष्ट: स्नेहरज्जुभि: ॥४८६॥
द्रुतं राज्ञि जने चाऽपि **रामभद्रा**नुगामिनि । नगर्य**योध्या** समभूद्[5]उद्वसेव समन्तत: ॥४८७॥
अथाऽवस्थाय [6]**काकुत्स्थ:** पितरं जननीरपि । न्यवर्तयत् कथमपि गिरा विनयसारया ॥४८८॥
तथा यथोचितालापै: पौरानपि विसृज्य स: । **सीता-सौमित्रि**सहितस्त्वरित[7]त्वरितं ययौ ॥४८९॥
ग्रामे ग्रामे ग्रामवृद्धैर्महेभ्यैश्च पुरे पुरे । प्रार्थ्यमानोऽप्यवस्थातुं **काकुत्स्थो** न ह्यवास्थित ॥४९०॥
¶इतश्च **भरतो** राज्ये नाऽऽददे किं तु प्रत्युत । **कैकेयीं** स्वं च चुक्रोश स्वभ्रातृविरहासह: ॥४९१॥
परिव्रज्योत्सुको राजा सामन्तान् सचिवानपि । प्राहिणोद् **राम**मानेतुं राज्याय [8]सहलक्ष्मणम् ॥४९२॥
[9]पश्चिमायायिनं **रामं** प्रापुत्वरि[10]तमेव ते । नि[11]वृत्त्यै चाऽभ्यधुर्भक्त्या राजाज्ञाख्यानपूर्वकम् ॥४९३॥
तैर्दीनै: प्रार्थ्यमानोऽपि न न्यवर्तत **राघव:** । महतां हि प्रति[12]ज्ञातं न चलत्यद्रिपादवत् ॥४९४॥
विसृज्यमाना अपि ते **राघवेण** मुहुर्मुहु: । सहैव चेलु: सर्वेऽपि कृताशास्तन्निवर्तने ॥४९५॥
अथोग्रश्वापदपदं निर्मानुष्यां घनद्रुमाम् । [13]पारियात्राटवीं प्रापु**र्जानकी-राम-लक्ष्मणा:** ॥४९६॥
अभिधानेन **गम्भीरां** गम्भीरावर्तभीषणाम् । पृथुप्रवाहां पथि ते समीक्षाञ्चक्रिरे नदीम् ॥४९७॥
तत्र स्थित्वाऽवदद् **राम:** सामन्तादीनिदं वच: । इत: स्थानान्निवर्तध्वमध्वा कष्टो ह्यत: परम् ॥४९८॥
अस्माकं कुशलोदन्तं गत्वा तातस्य शंसत । [14]उपाध्वं **भरतं** [15]मद्वत् तातवद् वाऽप्यत: परम् ॥४९९॥
धिगस्मान् **राम**पादानामयोग्यानिति भूरिश: । ते रुदन्तो न्यवर्तन्त [16]बाष्पाम्भ:स्तिमितांशुका: ॥५००॥
उत्ततार ततो **रामो** दुस्तरां तां तरङ्गिणीम् । **ससीता-लक्ष्मण:** [17]सास्रै: प्रेक्षितस्तैस्तटस्थितै: ॥५०१॥
**रामे**ऽथ दृक्पथातीते सामन्ताद्या: कथञ्चन । **अयोध्यानगरी**मीयुस्तद् राज्ञे [18]चाऽऽचचक्षिरे ॥५०२॥
राजाऽप्युवाच **भरतं** नाऽऽयातौ **राम-लक्ष्मणौ** । राज्यं गृहाण मम तद् दीक्षाविघ्नाय मा स्म भू: ॥५०३॥
**भरतो**ऽप्यवदद् राज्यं नाऽऽदास्येऽहं कथञ्चन । आनेष्ये तु स्वयं गत्वा प्रसाद्य निजमग्रजम् ॥५०४॥

---

१. नन्वहम् ॥ २. "रामवश:" इति ला.टि. ॥ ३. ***अनुधाव्याऽभ्यगात्*** खं.१, ला. का. ॥ ४. क्रूराया: कैकेय्या: विधे:-विधातुश्च ॥ ५. उद्वसा-निर्जना 'उज्जड' इति भाषायाम् ॥ ६. राम: ॥ ७. ***०तस्त्वरितं०*** ता. ॥ ८. ***समलक्ष्मणम्*** खं.१ ॥ ९. पश्चिमदिशागामिनम् ॥ १०. ***०मेत्य ते*** ता. ॥ ११. निवर्तनाय ॥ १२. ***प्रतिज्ञा तु*** मु. ॥ १३. पारियात्रो नाम कुलाचलस्तस्याऽटवीम् । केचित् सौराष्ट्रदेशे प्रसिद्धं 'बरडा' इत्याख्यं गिरिं पारियात्रं वदन्ति(मुद्रिते टि.) ॥ १४. सेवध्वम् ॥ १५. ***मद्वत्तातवच्चाप्यत:*** पाता. ॥ १६. बाष्पाम्भसा-अश्रुजलेन स्तिमितानि-आर्द्राणि अंशुकानि-वस्त्राणि येषां ते ॥ १७. साश्रुभि: ॥ १८. ***व्याच०*** मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगात् तदा च **कैकेयी** राजानमिति चाऽब्रवीत् । **भरता**य त्वया राज्यं दत्तं सत्यप्रतिश्रव! ॥५०५॥
परमेष न गृह्णाति राज्यं ते विनयी सुतः । अन्यासां [1]चाऽस्य मातॄणां महद् दुःखं ममाऽपि च ॥५०६॥
अविमृश्यविधायिन्या पापीयस्या मया कृतम् । सति त्वयि सपुत्रेऽपि हहा! राज्यमराजकम् ॥५०७॥
**कौशल्यायाः सुमित्रायाः सुप्रभाया**श्च दुःश्रवम् । रुदितं मम शृण्वन्त्या हृदयं भवति द्विधा ॥५०८॥
**भरते**न समं गत्वा तौ वत्सौ **राम-लक्ष्मणौ** । अनुनीय समानेष्याम्यनुजानीहि नाथ! माम् ॥५०९॥
¶अथाऽऽदिष्टा प्रहृष्टेन राज्ञा **दशरथे**न सा । ययौ **सभरता**मात्या प्रति **रामं** कृतत्वरा ॥५१०॥
**कैकेयी-भरतौ** षड्भिः प्रापतुस्तद् वनं दिनैः । अपश्यतां द्रुमूले च **जानकी-राम-लक्ष्मणान्** ॥५११॥
रथादुत्तीर्य **कैकेयी** वत्स! वत्सेति भाषिणी । प्रणमन्तं **रामभद्रं** चुचुम्बोपरि मूर्धनि ॥५१२॥
पादाब्जयोः प्रणमन्तौ **वैदेही-लक्ष्मणा**वपि । आक्रम्योपरि बाहुभ्यां तारतारं रुरोद सा ॥५१३॥
**भरतो**ऽपि नमश्चक्रे **राम**पादावुदश्रुदृक् । प्रत्यपद्यत मूर्च्छां च [2]मूर्च्छत्खेदमहाविषः ॥५१४॥
बोधितो **रामभद्रे**ण विनयी **भरतो**ऽवदत् । अभक्तमिव मां त्यक्त्वा कथमत्र [3]त्वमागमः ? ॥५१५॥
राज्यार्थी **भरत** इति मातृदोषेण योऽभवत् । ममाऽप[4]वादो हर तमात्मना सह मां नयन् ॥५१६॥
निवृत्य यद् वाऽ**योध्या**यां गत्वा राज्यश्रियं श्रय । [5]कौलीनशल्यं मे भ्रातरेवमप्यपयास्यति ॥५१७॥
जगन्मित्रं हि **सौमित्रि**स्तवाऽमात्यो भविष्यति । [6]अयं जनः प्रतीहारः **शत्रुघ्न**स्त्वातपत्रभृत् ॥५१८॥
एवं ब्रुवाणे **भरते कैकेय्य**प्यब्रवीदिदम् । कुरु भ्रातृवचो वत्स! सदाऽसि [7]भ्रातृवत्सलः ॥५१९॥
अत्र न त्वत्पितुर्दोषो न दोषो **भरत**स्य च । **कैकेय्या** एव दोषोऽयं सुलभः स्त्रीस्वभावतः ॥५२०॥
कौ[8]लट्यवर्जा ये केऽपि दोषाः स्त्रीणां पृथक् पृथक् । ते सर्वे कृतसंस्थाना मयि दो[9]षखनाविव ॥५२१॥
पत्युः सुतानां तन्मातृजनस्य च मया कृतम् । इदं दुःखाकरं कर्म तत् सहस्व सुतोऽसि यत् ॥५२२॥
इत्यादि साश्रु जल्पन्तीं तामूचे **लक्ष्मणा**ग्रजः । तातस्य सूनुर्भूत्वाऽहं प्रतिज्ञातं त्यजामि किम् ? ॥५२३॥
तातेन दत्तमेतस्मै राज्यं ह्यनुमतं मया । [10]अस्त्वन्यथा कथङ्कारं वाग् द्वयोर्जीवतोरपि ? ॥५२४॥
तदस्तु **भरतो** राजा द्वयोरपि निदेशतः । अस्याऽस्म्यहमनुल्लङ्घ्यचो मम तात इवाऽम्बिके! ॥५२५॥
इत्युक्त्वोत्थाय **काकुत्स्थः सीता**नीतजलैः स्वयम् । राज्येऽभिषिञ्चद् **भरतं** सर्वसामन्तसाक्षिकम् ॥५२६॥
**रामः** प्रणम्य **कैकेयीं** सम्भाष्य **भरतं** तथा । विससर्ज प्रतस्थे च [11]ककुभं दक्षिणां प्रति ॥५२७॥
ययावयो**ध्यां भरत**स्तत्र चाऽखण्डशासनः । ऊरीचक्रे राज्यभारं पितुर्भ्रातुश्च शासनात् ॥५२८॥
¶महामुनेः **सत्यभूतेः** पार्श्वे **दशरथो**ऽप्यथ । भूयसा परिवारेण समं दीक्षामुपाददे ॥५२९॥
[12]स्वभ्रातृवनवासेन **भरतः** शल्यितो हृदि । अर्हत्पूजोद्यतोऽरक्षद् राज्यं यामिकवत् सुधीः ॥५३०॥

**सौमित्रि-मैथिलसुता**सहितोऽथ **रामो** गच्छन्नतीत्य गिरिमध्वनि **चित्रकूटम्** ।
आसादयत् कतिपयैर्दिवसैर**वन्तिदेशै**कदेशम[13]वनिस्थितदेवदेश्यः ॥५३१॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये [14]सप्तमे पर्वणि
**राम-लक्ष्मणो**त्पत्ति-परिणयन-वन[15]वासगमनो नाम चतुर्थः[16] सर्गः॥

---

१. *वाऽपि* ता. ॥ २. मूर्च्छत् व्याप्तीभवत् खेद एव महाविषं यस्य सः; "प्रसरत्" इति ला.टि. ॥ ३. *त्वमागतः* खं.१, ता. ॥ ४. *ममाऽपवादं* पाता. ॥ ५. कौलीनं-लोकापवादः, तदेव शल्यम् ॥ ६. भरतः ॥ ७. *मातृवत्सलः* मु. ॥ ८. "असतीत्व" इति ला.टि.; असतीत्वं मुक्त्वाऽन्ये सर्वेऽपि स्त्रीसुलभा दोषाः मयि सन्तीत्याशयः ॥ ९. दोषाणां खनिः-आकरस्तत्रेव ॥ १०. *अन्यथा स्यात्०* हे. ॥ ११. दिशाम् ॥ १२. *सुभ्रातृ०* हे. मो. पा. छा. ला.प्रभृतिषु ॥ १३. अवन्यां स्थितो देव इव ॥ १४. *सप्तमपर्वणि* खं.१-२ ॥ १५. *०वनगमनो* ता. ॥ १६. *चतुर्थसर्गः* पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥पञ्चमः सर्गः॥

**रामो**ऽथ विश्रमयितुं श्रान्तामध्वनि **जानकी**म्। वटस्य मूले न्यषदद् गुह्यकानामिवेश्वरः[१] ॥१॥
तं देशं सर्वतो वीक्ष्य **रामः सौमित्रि**मभ्यधात्। देशः कस्याऽपि भीत्याऽयमधुनैवोद्वसो[२]ऽभवत् ॥२॥
[३]अशुष्ककुल्यान्युद्यानानीक्षुवाटाश्च सेक्षवः। सान्नानि च खलान्याहुर्नूतनोद्वसतामिह ॥३॥
तदा च **रामः** पप्रच्छ गच्छन्तं जनमेककम्। किमुच्चचाल देशोऽयं ? क्व चाऽसि चलितोऽनघ! । ॥४॥
¶सोऽप्यूचेऽ**वन्तिदेशे**ऽस्मिन् **पुर्यवन्त्यां** नरेश्वरः। अस्ति **सिंहोदरो** नाम सिंहवद् दुःसहो द्विषाम् ॥५॥
तस्य च प्रति[४]बद्धो[५]ऽस्ति विषयेऽस्मिन् महामतिः। सामन्तो **वज्रकर्णा**ख्यो **दशाङ्गपुर**नायकः ॥६॥
स पापर्द्ध्यां[६] गतोऽन्येद्युर्वनमध्ये महामुनिम्। कायोत्सर्गस्थमैक्षिष्ट नामतः **प्रीतिवर्धन**म् ॥७॥
किं तिष्ठसि द्रुम इवाऽरण्येऽमुत्रेति तेन तु। अनुयुक्तो मुनिरात्महितार्थमिति सोऽवदत् ॥८॥
भूयोऽप्यूचे **वज्रकर्णः** खाद्य-पेयादिवर्जिते। अत्र सम्पद्यतेऽरण्ये किं नामाऽऽत्महितं तव ? ॥९॥
तं च योग्यं मुनिर्ज्ञात्वा धर्ममात्महितं जगौ। श्रावकत्वं सोऽपि सद्यः प्रपेदे तत्पुरः सुधीः ॥१०॥
विना च देवमर्हन्तं विना साधूंश्च नाऽपरम्। नंस्यामीति तदग्रे स[७] जग्राहाऽभिग्रहं दृढम् ॥११॥
ततश्च तं स वन्दित्वाऽगाद् **दशाङ्गपुरं** पुरम्। पालयन् श्रावकत्वं च चिन्तयामासिवानिदम् ॥१२॥
नमस्कार्यो मया नाऽन्य इति तावदभिग्रहः। **सिंहोदर**श्च मे वैरी भविष्यत्यनमस्कृतः ॥१३॥
एवं विमृश्योत्[८]प्रतिभः स्वाङ्गुलीये मणीमयीम्। **मुनिसुव्रतनाथ**स्य प्रतिमां स[९] न्यवीविशत् ॥१४॥
तद् बिम्बं स्वाङ्गुलीयस्थं नमन् वञ्चयते स्म सः। **सिंहोदरं** नरपतिं मायोपायो[१०] बलीयसि ॥१५॥
तं **वज्रकर्ण**वृत्तान्तं **सिंहोदर**महीपतेः। आचचक्षे खलः कोऽपि खलाः सर्वङ्कषाः[११] खलु ॥१६॥
सद्यः **सिंहोदरो**ऽकुप्यन्महाहिरिव निःश्वसन्। **वज्रकर्णा**य तत्कोपं कोऽप्यागत्य शशंस च ॥१७॥
तस्य कोपो मयि कथं त्वया ज्ञात ? इति स्फुटम्। **वज्रकर्णे**न पृष्टः सन्नाचख्यौ स पुमानिति ॥१८॥
¶पुरे **कुन्दपुरे** श्राद्धः **समुद्रसङ्गमो** वणिक्। **यमुना** नाम तत्पत्नी **विद्युदङ्गो**ऽस्मि तत्सुतः ॥१९॥
क्रमाच्च यौवनं प्राप्तो भाण्डमादाय चाऽगमम्। **उज्जयिन्या**महं पुर्यां क्रय-विक्रयहेतवे ॥२०॥
तत्र **कामलतां** नाम्[१२]ाऽपश्यं वेश्यां मृगीदृशम्[१३]। सद्यश्च कामबाणानामभूवमहमास्पदम् ॥२१॥
निशामेकां वसामीति तया कृतसमागमः। दृढं रागेण बद्धोऽहं मृगो वागुरया[१४] यथा ॥२२॥
आजन्म कष्टेन धनं यन्मत्पित्राऽर्जितं बहु। तद्वशेन मया तत् तु षड्भिर्मासैर्विनाशितम् ॥२३॥
**सिंहोदर**महिष्याः **श्रीधरा**या ये हि[१५] कुण्डले। तादृशे देहि मह्यं त्वमित्यूचे साऽन्यदा तु माम् ॥२४॥
न मेऽर्थः कश्चिदप्यस्ति ते एवाऽपहराम्यहम्। इति रात्रौ साहसिकः खात्रेणा[१६]ऽगां नृपौकसि ॥२५॥
**सिंहोदरं श्रीधरे**ति पृच्छन्ती शुश्रुवे मया। नाथोद्विग्न इवेदानीं निद्रां न लभसे कथम् ? ॥२६॥
**सिंहोदरो**ऽवदद् देवि! तावन्निद्रा कुतो मम। प्रणामविमुखो यावद् **वज्रकर्णो** न मार्यते ? ॥२७॥
अमुं प्रातर्हनिष्यामि ससुहृत्पुत्रबान्धवम्। यात्वियं रजनी तावद् विनिद्रस्याऽपि मे प्रिये! ॥२८॥
तदाकर्ण्य तवाऽऽख्यातुं त्यक्तकुण्डलचौरिकः[१७]। त्वां साधर्मिकवात्सल्यादिह त्वरितमागमम् ॥२९॥
¶**वज्रकर्ण**स्तदाकर्ण्य पुरीं तृण[१८]-कणाधिकाम्। सद्यो[१९] व्यधत्ताऽपश्यच्च परचक्ररजोऽम्बरे ॥३०॥

---

१. यक्षाणामीश्वरः कुबेर इव ॥ २. निर्जनः ॥ ३. अशुष्काः-आर्द्राः कुल्याः ('नीक' इति भाषायाम्) - कृत्रिमनद्यः येषु तानि ॥ ४. अधीनः ॥ ५. *०बद्धोऽस्मिन् विषयेऽस्ति महा०* रसंपा. ॥ ६. मृगयायाम् ॥ ७. *संजग्राहा०* ला. ॥ ८. उत्पन्ना प्रतिभा-बुद्धिर्यस्य सः ॥ ९. *संन्यवी०* मु. ॥ १०. माया एवोपायः ॥ ११. सर्वं कषन्ति-नाशयन्तीति सर्वङ्कषाः ॥ १२. *नाम्नाऽ०* खं.१-२, पाता.; *नाम पश्यन्* ला. ॥ १३. *मृगीदृशीम्* ता. ॥ १४. पाशेन ॥ १५. **च** ला. ॥ १६. 'खातर पाडीने' इति भाषा ॥ १७. *०चौरिकः* ता. ॥ १८. *कण-तृणा०* ता. ॥ १९. *सद्यश्चकाराऽप०* खं.१-२, ला. ता. कां. मो. ला. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]क्षणाच्चाऽवेष्टयत **सिंहोदरे**ण प्रबलैर्बलैः । तद् **दशाङ्गपुरं** विष्वक् चन्दनद्रुरिवाऽहिभिः ॥३१॥
**सिंहोदरो**ऽथ दूतेन **वज्रकर्ण**मदोऽवदत् । प्रणाममायया मायिन्! वञ्चितो[2]ऽस्मि त्वया[3] चिरम् ॥३२॥
विना तेनाऽङ्गुलीयेन मामागत्य नमस्कुरु । अन्यथा सकुटुम्बस्त्वं यमवेश्माऽद्य यास्यसि ॥३३॥
प्रत्यूचे **वज्रकर्णो**ऽपि मम ह्ययमभिग्रहः । विनाऽर्हन्तं विना साधुं प्रणमाम्यपरं न हि ॥३४॥
न पौरुषाभिमानोऽत्र किं तु धर्माभिमानिता । नमस्कारं विना सर्वं ममाऽऽदै[4]त्स्व यथारुचि ॥३५॥
धर्मद्वारं देहि मह्यं यथा धर्माय कुत्रचित् । अहमन्यत्र गच्छामि धर्म एवाऽस्तु मे धनम् ॥३६॥
इत्युक्ते **वज्रकर्णे**न न हि तत् प्र[5]त्यपादि सः । जातु धर्ममधर्मं वा न गणयन्ति मानिनः ॥३७॥
पुरं स**वज्रकर्णं** तद् रुद्ध्वा **सिंहोदरो** बहिः । स्थितोऽस्ति मुष्णन् दे[6]शं च तद्भयादयमुद्वसः ॥३८॥
अहं च सकुटुम्बोऽपि नष्टो[7]ऽस्मि राजविड्[8]वरे । दग्धान्यत्राऽद्य सौधानि जीर्णा सा च कुटी मम ॥३९॥
शून्येभ्य इभ्यवेश्मभ्यो वेश्मोपकरणान्यहम् ।आनेतुं क्रूरगेहिन्या प्रेषितो यामि तन्मुखः ॥४०॥
तस्या दुर्वचसोऽप्येतत् फलं शुभमभून्मम । यन्मया दे[9]वकल्पस्त्वं दृष्टो दैववशा[10]दसि ॥४१॥
एवमुक्तवतस्तस्य दरिद्रस्य **रघूद्वहः**[11] । रत्नस्वर्णमयं सू[12]त्रमदत्त करुणानिधिः ॥४२॥
¶तं विसृज्य ततो **रामो दशाङ्गपुर**मीयिवान् । **चन्द्रप्रभं** बहिश्चैत्ये नत्वा तत्राऽप्यवास्थितं[13] ॥४३॥
**रामा**देशेन **सौमित्रि**स्तत् प्रविश्य क्षणात् पुरम् । **वज्रकर्णा**न्तिकेऽगच्छदलक्ष्[14]याणां ह्यसौ स्थितिः ॥४४॥
**वज्रकर्णः** सदाकारं ज्ञात्वा तं नरमुत्तमम् । ऊचे महाभाग! भव भोजनातिथ्यभाग् मम ॥४५॥
**रामा**नुजोऽप्यभिदधे सकलत्रो मम प्रभुः । स्थितोऽस्ति बहिरुद्याने तमादौ भोजयाम्यहम् ॥४६॥
ततः **सौमित्रि**णा सार्धं **वज्रकर्णो** महीपतिः । भू[15]यिष्ठव्यञ्जनं भोज्यमुप**राम**मनाययत् ॥४७॥
भुक्तोत्तरे चाऽनुशिष्य **रामे**ण प्रेषितो ययौ । **लक्ष्मणो**ऽ**वन्ति**नृपतिं जगादेति च सौष्ठ[16]वी ॥४८॥
राजा **दाशरथि**र्दासीकृताशेषमहीपतिः । विरोधं **वज्रकर्णे**न **भरत**स्ते निषे[17]धति ॥४९॥
**सिंहोदरो**ऽपि प्रत्यूचे भृत्यानां **भरतो**ऽपि हि । भ[18]क्तानामेव कुरुते प्रसादं नाऽन्यथा पुनः ॥५०॥
अयं पुन**र्वज्रकर्णो** मत्सामन्तो दुराशयः । न मां नमति तेनाऽस्य प्रसीदामि कथं ? वद ॥५१॥
भूयोऽपि **लक्ष्मणो**ऽवोचन्नाऽसावविनयी त्वयि । अस्याऽप्र[19]णामसन्धा हि जज्ञे धर्मानुपरोधतः ॥५२॥
मा कु[20]पो **वज्रकर्णा**य मान्यं **भरत**शासनम् । आसमुद्रान्तमेदिन्या **भरतः** शासिता यतः ॥५३॥
क्रुद्धः **सिंहोदरो** स्माऽऽह को नाम **भरतो** नृपः[21] । यो **वज्रकर्ण**[22]गृह्यः सन् वातूलो मां वदत्यदः ॥५४॥
कोपारुणाक्षः **सौमित्रिः** स्फुरदोष्ठदलोऽवदत् । रे न जानासि **भरतं** ? ज्ञापयाम्येष मङ्क्षु तम् ॥५५॥
उत्तिष्ठस्व युधे सर्वात्मना संवर्मितो भव । न भवस्येष गोधेव म[23]द्भुजाशनिताडितः ॥५६॥
**सिंहोदरः** ससैन्योऽथ **सौमित्रिं** हन्तुमुद्यतः । बालः परिस्पृ[24]ष्टुमिव भस्मच्छन्नं हुताशनम् ॥५७॥
**लक्ष्मणो**ऽपि गजा[25]लानं भुजेनोन्मूल्य नालवत् । विद्विषस्ताडयामासोद[26]स्तदण्ड इवाऽन्तकः ॥५८॥
अथ **सौमित्रि**रुत्पत्य **सिंहोदर**मभि स्थितम् । तद्वाससा पशुमिवाऽबध्नात् कण्ठे महाभुजः ॥५९॥
[27]साश्चर्यं पश्यतां तत्र **दशाङ्गपुर**वासिनाम् । तं निन्ये गामिवाऽऽकृष्य **लक्ष्मणो राम**सन्निधौ ॥६०॥
दृष्ट्वा **सिंहोदरो रामं** नत्वा चेदमभाषत । न ज्ञातस्त्वमिहाऽऽयातो मया **रघु**कुलोद्वह! ॥६१॥
अथवा किमिदं देव! मत्परीक्षाकृते कृतम् ? । कृतं नः प्रा[28]णितेनाऽपि यूयं छलपरा यदि ॥६२॥
क्षमस्वाऽज्ञानदोषं मे यत् कर्तव्यं तदादिश । भृत्ये कोपः शिक्षामात्रकृते शिष्ये गुरोरिव ॥६३॥

---

१. ***क्षणाच्च रुरुधे*** खं.१-२, ला., कां. ला. ॥ २. ***चुम्बितोऽस्मि*** खं.१ ॥ ३. ***मया*** खं.१ ॥ ४. गृहाण ॥ ५. स्वीकृतवान् ॥ ६. ***देशश्च*** मु. खं.१-२, पाता. ला.प्रभृतिषु ॥ ७. ***नष्टोऽस्मिन् राजविग्रहे*** मु. ॥ ८. विड्वरः-विप्लवः ॥ ९. देवतुल्यः ॥ १०. ***दैववशादपि*** पाता. ॥ ११. रामः ॥ १३. हारम् ॥ १४. ***०स्थितः*** रसंपा. ॥ १४. स्वैरविहारिणामियं स्थितिः-मर्यादा प्रकृतिर्वा ॥ १५. भूयिष्ठानि-बहुतराणि व्यञ्जनानि शाकादीनि यस्मिंस्तत् ॥ १६. सौष्ठवं-भद्रत्वमस्याऽस्ति ॥ १७. ***निषेधते*** ला. ॥ १८. भक्तानामेव भृत्यानां उपरि भरतः प्रसादं कुरुते इत्यर्थः ॥ १९. प्रणामाकरणप्रतिज्ञा ॥ २०. ***मा कुप्यो वज्रकर्णोऽयं*** कां. ला. मु. ॥ २१. ***यतः*** ता. ॥ २२. वज्रकर्णस्य पक्षपाती; ***वज्रकर्णहृद्यः*** खं.१-२ ॥ २३. मम भुजा एव अशनिर्वज्रं, तेन ताडितः ॥ २४. ***०स्पृष्टुं०*** रसंपा. ॥ २५. गजबन्धनस्तम्भम् ॥ २६. ऊर्ध्वीकृतदण्डः ॥ २७. ***आश्चर्यं*** मु. ॥ २८. जीवितेनाऽपि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्धेहि **वज्रकर्णे**नेत्यादिशत् तं **रघूद्वहः** । **सिंहोदरो**ऽपि तां वाचं तथेति प्रत्यपद्यत ॥६४॥
¶तत्राऽऽगाद् **वज्रकर्णो**ऽपि **रामभद्र**स्य शासनात् । विनयेन पुरोभूय कृताञ्जलिरुवाच च ॥६५॥
स्वामिनौ **वृषभस्वामि**वंशजौ **राम-**[1]**लक्ष्मणौ** । युवां दृष्टौ मया दिष्ट्या किन्तु ज्ञातौ चिरादिह ॥६६॥
**भरतार्ध**स्य सर्वस्य युवां नाथौ महाभुजौ । अहमन्ये च राजानो युवयोरेव किङ्कराः ॥६७॥
मुञ्चैनं मत्प्रभुं नाथ! [2]शाधि चैनमतः परम् । यथाऽसौ सहते [3]मेऽन्याऽप्रणामाभिग्रहं सदा ॥६८॥
विनाऽर्हन्तं विना साधुं नमस्यो नाऽपरो मया । इति ह्यभिग्रहोऽग्राहि महर्षेः **प्रीतिवर्धना**त् ॥६९॥
**राम**भ्रूसञ्ज्ञया **सिंहोदर**स्तत् प्रत्यपद्यत । **सौमित्रि**णा विमुक्तः सन् **वज्रकर्णं** च सस्वजे ॥७०॥
**सिंहोदरो**ऽपि परया प्रीत्या **राघव**साक्षिकम् । राज्यार्धं **वज्रकर्णा**य सोदरायेव दत्तवान् ॥७१॥
**श्रीधरा**कुण्डले ते च याचित्वाऽ**वन्ति**पार्थिवात् । अदत्त **विद्युदङ्गा**य **दशाङ्गपुर**पार्थिवः ॥७२॥
**सौमित्र**ये **वज्रकर्णो** ददावष्टौ स्वकन्यकाः । **सिंहोदरः** ससामन्तः पुनः कन्याशतत्रयम् ॥७३॥
अथोचे **लक्ष्मणः** कन्याः पार्श्वे वः सन्तु सम्प्रति । भ्राता नो **भरतो** राज्ये यतः पित्रा निवेशितः ॥७४॥
समयेऽङ्गीकृतराज्यः परिणेष्यामि वः सुताः । इदानीं तु वयं गत्वा स्थास्यामो **मलयाचले** ॥७५॥
ओमित्युक्त्वा स्थितौ **वज्रकर्ण-सिंहोदरौ** नृपौ । विसृष्टौ **रामभद्रे**णेयतुर्निजनिजं पुरम् ॥७६॥
¶**राम**स्तत्र निशां [4]नीत्वा **ससीता-लक्ष्मणः** प्रगे । गच्छन् क्रमेण सम्प्राप देशं कमपि निर्जलम् ॥७७॥
पिपासितायां **सीता**यां विश्रान्तायां तरोस्तले । **रामा**ज्ञयाऽथ **सौमित्रि**र्जलमानेतुमभ्यगात् ॥७८॥
गच्छन् सरो ददर्शैकमनेकाम्भोजमण्डितम् । दूरादानन्दजननं वयस्यमिव वल्लभम् ॥७९॥
तदा च क्रीडितुं तत्राऽऽगात् [5]**कूबरपुराधिभूः** । नृपः **कल्याणमाला**ख्यः प्रेक्षाञ्चक्रे च **लक्ष्मणम्** ॥८०॥
स कामबाणैः सद्योऽपि बिभिदे [6]भिदुरात्मकैः । नत्वा **लक्ष्मण**मूचे च भव मे भोजनातिथिः ॥८१॥
विकारं मान्मथं देहलक्षणानि च **लक्ष्मणः** । निरीक्ष्य दध्यौ नार्येषा पुंवेषा कारणेन तु ॥८२॥
ध्यात्वेत्युवाच **सौमित्रिः** सभार्योऽस्ति मम प्रभुः । इतश्चाऽदूरदेशेऽस्मिन् भुङ्क्ते तेन विना न हि ॥८३॥
तेन प्रधानपुरुषैर्भद्राकारैः प्रियंवदैः । तत्राऽऽनिन्ये समभ्यर्थ्य स**सीतो**ऽपि **रघूद्वहः** ॥८४॥
सोऽनमस्यद् **रामभद्रं** भद्रधी**र्मैथिली**मपि । तयोः कृते [7]पटकुटीं तत्कालं च न्यवेशयत् ॥८५॥
तत्र **रामं** कृतस्नानभोजनं स उपाययौ । सहैकमन्त्रिणा [8]व्यक्तस्त्रीवेषो निष्परिच्छदः ॥८६॥
लज्जानतमुखीं तां च निजगादेति **राघवः** । [9]भद्रे! पुरुषवेषेण स्त्रीभावं [10]निह्नुषे कुतः ? ॥८७॥
¶ऊचेऽथ **कूबर**पतिः **कूबरे**ऽस्मिन् महापुरे । **वालिखिल्यो** नाम राजा **पृथ्वी**नामाऽस्य तु प्रिया ॥८८॥
[11]आपन्नसत्त्वा सा जज्ञेऽन्येद्युर्म्लेच्छैर्महाभटैः । [12]अवस्कन्दागतैर्निन्ये **वालिखिल्यो** [13]नियम्य सः ॥८९॥
पश्चाच्च **पृथिवी** देवी तनयां [14]मामसूत सा । पुत्रोऽजनीति चाऽघोषि सचिवेन **सुबुद्धि**ना ॥९०॥
[15]तज्ज्ञापितः पुत्रजन्म प्रभुः **सिंहोदरो**ऽवदत् । तत्र राजाऽस्तु बालोऽयं **वालिखिल्या**गमावधि ॥९१॥
क्रमेण वर्धमानाऽहं मूलात् पुंवेषधारिणी । मातृ-मन्त्रिजनं मुक्त्वाऽपरैरनुपलक्षिता ॥९२॥
राज्यं करोमि **कल्याणमाला**ख्या प्रथिता सती । मन्त्रिणां मन्त्रसामर्थ्यात् स्यादलीकेऽपि सत्यता ॥९३॥
म्लेच्छानां भूरि यच्छामि द्रविणं पितृमुक्तये । द्रव्यमेते तु गृह्णन्ति मुञ्चन्ति पितरं न तु ॥९४॥
तत् प्रसीदत मे [16]तातं तेभ्यो मोचयताऽधुना । **सिंहोदरा**न्मोचितः प्राग् [17]**वज्रकर्ण**नृपो यथा ॥९५॥
**रामो**ऽप्युवाच पुंवेषै[18]वाऽस्था राज्यं प्रशासती । यावद् गत्वा मोचयामो म्लेच्छेभ्यः पितरं तव ॥९६॥
महाप्रसाद इत्यूचे सा स्त्री पुंवेषधारिणी । ऊचे **सुबुद्धि**मन्त्री तु **लक्ष्मणो**ऽस्या वरोऽस्त्विति ॥९७॥
**राघवो**ऽप्यब्रवीत् तातादेशाद् देशान्तरं वयम् । यास्यामोऽथ [19]निर्वृत्तेषु **लक्ष्मणः** परिणेष्यति ॥९८॥

१. ***शार्ङ्गिणौ*** खं.२, पाता. मु.प्रभृतिषु ॥ २. शासनं कुरु ॥ ३. ***मेऽन्यप्र०*** खं.१ विना सर्वत्र ॥ ४. ***स्थित्वा*** रसंपा. ॥ ५. ***०पुराधिपः*** पाता.; अधिभूर्नायकः ॥ ६. भेदिभिः ॥ ७. वस्त्रगृहम् ॥ ८. ***युक्तः स्त्रीवेशो निःपरि०*** मु., खं. पा.प्रभृतिप्रतिषु च ॥ ९. ***भद्र!*** मु. ॥ १०. गोपायसि ॥ ११. गर्भवती ॥ १२. आक्रमणं कुर्वद्भिः ॥ १३. बद्ध्वा ॥ १४. ***निश्यसूत*** मो. ॥ १५. ***तज्ज्ञापितपुत्रजन्मा*** पाता., रसंपा. ॥ १६. ***मत्तातं*** पाता. ॥ १७. ***०कर्णो नृपो०*** मु. ॥ १८. ***पुंवेषैव स्वराज्यं*** ता. विना सर्वत्र ॥ १९. ***निवृत्तानां*** खं.१-२, ला. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपद्येति **काकुत्स्थ**स्तस्थौ तत्र दिनत्रयम्। निशाशेषे सुप्तजने **ससीता-लक्ष्मणः** ययौ ॥९९॥
साऽपि प्रातरपश्यन्ती **जानकी-राम-लक्ष्मणान्**। विमनाः स्वं पुरमगाच्चक्रे राज्यं तथैव तु[1] ॥१००॥
¶प्राप क्रमेण **रामो**ऽपि **नर्मदा**मुत्ततार च। पथिकैर्वार्यमाणोऽपि **विन्ध्याटव्यां** विवेश च[2] ॥१०१॥
तत्राऽऽदौ दक्षिणदिशि कण्टकि[3]द्रुस्थितो द्विकः[4]। ररास[5] विरसं क्षीरद्रु[6]स्थोऽन्यो मधुरं पुनः ॥१०२॥
न विषादो न वा हर्षोऽभूद् **राम**स्य तथाऽपि हि। शकुनं चाऽशकुनं च गणयन्ति हि दुर्बलाः ॥१०३॥
गच्छन् ददर्श चाऽगच्छन्म्लेच्छसैन्यमुदायुधम्। [7]असङ्ख्येभरथाश्वीयं देशघाताय निर्गतम् ॥१०४॥
युवा सेनापतिस्तत्र दृष्ट्वा **सीतां** स्मरातुरः। स्वच्छन्दवृत्तिः स्वान् म्लेच्छानुच्चकैरेवमादिशत् ॥१०५॥
अरे रे! पथिकावेतौ नाशयित्वा[8] विनाश्य वा। एतां वरस्त्रियं हृत्वा समानयत मत्कृते ॥१०६॥
इत्युक्ताः[9] सह तेनैवाऽधावन्त प्रति **राघवम्**। प्रहरन्तः शर-प्रास[10]प्रायैः प्रहरणैः शितैः[11] ॥१०७॥
उवाच **लक्ष्मणो रामं** तिष्ठाऽऽर्येह सहाऽऽर्यया। अमून् शुन इव म्लेच्छान् यावद् विद्रावयाम्यहम् ॥१०८॥
इत्युक्त्वा **लक्ष्मणो**ऽधिज्यं कृत्वा धनुरनादयत्। तन्नादाच्चाऽत्रसन् म्लेच्छाः सिंहनादादिव द्विपाः ॥१०९॥
असह्यश्चापनादोऽपि शरमोक्षोऽस्तु[12] दूरतः। इत्थं विमृश्य स म्लेच्छराजो **राम**मुपाययौ ॥११०॥
विमुक्तशस्त्रो दीनास्यः स्यन्दनादवतीर्य सः। **रामभद्रं** नमश्चक्रे क्रुधा **सौमित्रि**णेक्षितः ॥१११॥
¶सोऽवोचद् देव! **कौशाम्ब्यां** पुर्यां **वैश्वानरो**[13] द्विजः। **सावित्री** नाम तत्पत्नी **रुद्रदेवो**ऽस्मि तत्सुतः ॥११२॥
आजन्म क्रूरकर्मा[14]ऽहं तस्करः पारदारिकः। न तत् किमपि कर्माऽस्ति यत् पापो नाऽऽचराम्यहम् ॥११३॥
अथैकदा खात्रमुखे प्राप्तोऽहं राजपूरुषैः। शूलां[15] समारोपयितुं नीतश्च राजशासनात् ॥११४॥
उपशूलं च दीनोऽहमुपशूनमिव[16] च्छगः। दृष्टः श्रावकवणिजा दत्त्वा दण्डं च मोचितः ॥११५॥
मा कार्षीश्चौरिकां भूय इत्युदीर्य महात्मना। विसृष्टो वणिजा तेन तं देशं त्यक्तवानहम् ॥११६॥
भ्रमन्नागामिमां पल्लीं **काक** इत्याख्यया[17]ऽन्यया। इह[18] ख्यातः क्रमात् पल्लीपतित्वमिदमासदम् ॥११७॥
इह स्थितश्च लुण्टाकैर्लुण्टयामि पुरादिकम्। आनयामि स्वयं गत्वा बन्दे धृत्वा नृपानपि ॥११८॥
वश्योऽस्मि व्यन्तर इव तव स्वामिन्! समादिश। किङ्करः किं करोम्येष सहस्वाऽविनयं मम ॥११९॥
**वालिखिल्यं** विमुञ्चेति **रामे**णोक्तः किरातराट्। तं मुमोच नमश्चक्रे **वालिखिल्यो**ऽपि **राघवम्** ॥१२०॥
**रामा**ज्ञया च **काकेन** स निन्ये **कूबरं**[19] पुनः। **कल्याणमालां** पुंवेषामपश्यच्च सुतां निजाम् ॥१२१॥
**राम-लक्ष्मण**वृत्तान्तं मिथोऽकथयतां च तौ। **कल्याणमालिका-वालिखिल्या**वखिलमप्यथ ॥१२२॥
¶**काको**ऽपि स्वां ययौ पल्लीं ततो **रामो**ऽपि निर्गतः। **विन्ध्याटवी**मतिक्रम्य प्राप **तापीं** महानदीम् ॥१२३॥
**तापी**मुत्तीर्य च क्रामंस्तद्देशप्रान्तवर्तिनम्। **अरुणग्राम**नामानं **रामो** ग्राममथाऽऽसदत् ॥१२४॥
पिपासितायां **सीतायां** तत्र **रामः सलक्ष्मणः**। गृहे ययौ कोपनस्य[20] **कपिल**स्याऽग्निहोत्रिणः ॥१२५॥
ब्राह्मणी च **सुशर्मा**ख्या तेभ्योऽदात् पृथगासनम्। स्वयं च पाययामास सलिलं स्वादु शीतलम् ॥१२६॥
आगात् तदा च **कपिलः** पिशाच इव दारुणः। निरीक्ष्य चोपविष्टांस्तान् रुष्टोऽभाषिष्ट गेहिनीम् ॥१२७॥
मलिनानां किमेतेषां प्रवेशो मम वेश्मनि। पापीयसि! त्वया दत्तोऽग्निहोत्रमशुचीकृतम् ? ॥१२८॥
एवमाक्रोशिनं विप्रं क्रूरं **रामानुजः** क्रुधा। करीवाऽऽरभतो[21]द्धृत्य परिभ्रमयितुं दिवि ॥१२९॥
**रामो**ऽप्युवाच को नाम कोपोऽस्मिन् कीटमात्रके ?। द्विजब्रुवं[22] विब्रुवन्तमप्यमुं मुञ्च मानद! ॥१३०॥
**रामा**ज्ञया च **सौमित्रि**स्तं मुमोच शनैर्द्विजम्। **ससीता-लक्ष्मणो रामो** निर्जगाम च तद्गृहात् ॥१३१॥
¶ते गच्छन्तः क्रमात् प्रापुररण्यमपरं महत्। कज्जलश्यामजलद[23]कालश्च समुपाययौ ॥१३२॥

१. **च** ता.॥ २. ***सः*** पाता.॥ ३. बब्बूल(बावळ)वृक्ष॥ ४. काकः॥ ५. कठोरशब्दं कृतवान्॥ ६. पिप्पलवृक्ष॥ ७. असङ्ख्य-इभ-रथ-अश्व-समूहयुक्तम्॥ ८. पलायनं कारयित्वा हत्वा वा॥ ९. ***इत्युक्त्वा*** खं.१-२, पाता. ला. ता.॥ १०. प्रासः-भल्लः॥ ११. तीक्ष्णैः॥ १२. ***०ऽस्ति दूरतः*** मु.॥ १३. ***विश्वानरो०*** पाता.॥ १४. ***क्रूरकर्मत्वात् त०*** मु., खं.२, पाता. ला.प्रभृतिषु॥ १५. ***शूलं*** ला. मो. कां. हे. ता.॥ १६. प्राणिवधस्थानसमीपं अज इव॥ १७. ***०ख्ययाऽनया*** ला.॥ १८. ***इहाख्यातः*** ता.॥ १९. ***कूबरे*** ला., ता.प्रभृतिषु च॥ २०. क्रोधशीलस्य॥ २१. ***करीवारमतो०*** मु.॥ २२. आत्मानं द्विजं ब्रूते-मन्यते स द्विजब्रुवस्तम्॥ २३. वर्षाकालः; ***०जलदः काल०*** पाता. विना सर्वत्र॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्षत्यब्दे च **काकुत्स्थ**स्तस्थौ वटतरोरधः । वर्षाकालं वटेऽत्रैव नयाम इति चाऽवदत् ॥१३३॥
आकर्ण्य तद्वचो भीतस्तन्न्यग्रोधाधिदैवतम्[1] । **इभकर्णा**भिधो यक्षो **गोकर्णं** स्वप्रभुं[2] ययौ ॥१३४॥
तं प्रणम्येत्यभाषिष्ट स्वामिन्नुद्वासितस्ततः[3] । कैश्चिद् दुःसहतेजोभिर्निजावासाद् वटादहम् ॥१३५॥
तत् कुरुष्व परित्राणमत्राणस्य मम प्रभो! । ते हि स्थास्यन्ति सकलां प्रावृषं मद्वटद्रुमे ॥१३६॥
**गोकर्णो**ऽप्यवधेर्[4]ज्ञात्वाऽचख्याविति विचक्षणः । अर्च्याविमौ गृहायातावष्टमौ **राम-शार्ङ्गिणौ** ॥१३७॥
इत्युक्त्वा निशि तत्रैत्य नवयोजनविस्तृताम् । द्वादशयोजनायामां धन-धान्यादिपूरिताम् ॥१३८॥
उत्तुङ्गवप्र-प्रासादां भाण्डपूर्णापणावलिम् । पुरीं **रामपुरीं** नामाऽकृत **रामा**य सोऽमरः ॥१३९॥युग्मम्॥
प्रातर्मङ्गलशब्देन प्रबुद्धो **राम** ऐक्षत । तं वीणाधारिणं यक्षं महर्द्धिं[5] नगरीं च ताम् ॥१४०॥
सोऽवोचद् विस्मितं **रामं** स्वामी त्वमतिथिश्च मे । **गोकर्णो** नाम यक्षोऽहमकार्षं त्वत्कृते पुरीम् ॥१४१॥
मया सपरिवारेण सेव्यमानो दिवानिशम् । इह तिष्ठ सुखं स्वामिन्! यथाकालं यथारुचि ॥१४२॥
इति तेनाऽर्थितो **रामो** यक्षपुम्भिर्निषेवितः । अवतस्थे सुखं तत्र **सीता-सौमित्रि**संयुतः ॥१४३॥
इतश्च विप्रः **कपिलः** समिदादिकृतेऽन्यदा । भ्रमंस्तस्मिन् महारण्ये पर्शुपाणिः[6] समाययौ ॥१४४॥
स ददर्श पुरीं तां च दध्यौ चेति[7] सविस्मयः । मायेयमिन्द्रजालं वा गान्धर्वमथवा पुरम् ? ॥१४५॥
तत्रैकां मानुषीरूपां चारुनेपथ्यवाससम् । सोऽपृच्छद् यक्षिणीं दृष्ट्वा कस्येयं नूतना पुरी ? ॥१४६॥
सोचे **गोकर्ण**यक्षेण कृतेयं नूतना पुरी । नाम्ना **रामपुरी राम-सीता-सौमित्रि**हेतवे ॥१४७॥
दीनादिभ्यो ददात्यर्थमत्र **रामो** दयानिधिः । सर्वः कृतार्थीभूतोऽत्र यो यो दुःस्थः[8] समाययौ ॥१४८॥
त्यक्त्वा सोऽपि समिद्भारं[9] पतित्वा तत्पदाब्जयोः । ऊचे मया कथं **रामो** द्रष्टव्यः ? शंस मेऽनघे! ॥१४९॥
साऽप्याचख्यावत्र[10] पुर्यामस्ति द्वारचतुष्टयम् । नित्यं च रक्ष्यते यक्षैः प्रवेशोऽमुत्र दुर्लभः ॥१५०॥
पूर्वद्वारेऽत्र[11] यच्चैत्यं तद् वन्दित्वा यथाविधि । श्रावकीभूय चेद् यासि प्रवेशं लभसे तदा ॥१५१॥
तद्गिरा **कपिलो**ऽर्थार्थी[12] साधूनामन्तिके ययौ । अभ्यवन्दत[13] तान् साधून् धर्मं तेभ्योऽशृणोच्च सः ॥१५२॥
ततः स लघुकर्मत्वाद् विशुद्धः श्रावकोऽभवत् । गत्वौको[14] धर्ममाख्याय भार्यां च श्राविकां व्यधात् ॥१५३॥
आजन्म दौस्थ्यदग्धौ तौ **रामा**दर्थयितुं धनम् । उपेयतू **रामपुरीं** तच्च चैत्यं प्रणेमतुः ॥१५४॥
राजवेश्म[15] प्रविश्याऽथ **मैथिली-राम-लक्ष्मणान्** । उपलक्ष्य बिभायोच्चैर्दत्ताक्रोशान् द्विजः स्मरन् ॥१५५॥
तं नंष्टुमनसं सानुक्रोशः[16] **सौमित्रि**रब्रवीत् । मा भैषीर्भो द्विजाऽर्थी चेदेह्यार्थं[17] प्रार्थयस्व तत् ॥१५६॥
ततोऽपशङ्कः[18] **कपिलो** गत्वा **रामा**य चाऽऽशिषम् । दत्त्वोपाविशदग्रे च गुह्यकैरर्पितासने[19] ॥१५७॥
कुतस्त्वमागतोऽसीति पृष्टो **रामे**ण सोऽवदत् । किं मां न वेत्सि तं विप्र**मरुणग्राम**वासिनम् ? ॥१५८॥
यूयं येनाऽतिथीभूता अपि दुर्वचसा मया । आक्रुष्टा मोचितोऽस्म्यस्माद् युष्माभिश्च कृपापरैः ॥१५९॥
**सुशर्मा** ब्राह्मणी साऽपि प्राग्वृत्ताख्यानपूर्वकम् । गत्वोप**सीतं**[20] दीनास्या प्रदत्ताशीरुपाविशत् ॥१६०॥
ततः स विप्रो द्रविणैः कृतार्थीकृत्य भूरिभिः । **राघवे**ण विसृष्टः सन् स्वग्राममगमत् पुनः ॥१६१॥
प्रबुद्धो ब्राह्मणः सोऽपि दत्त्वा दानं यथारुचि । **नन्दावतंस**सूरीणामन्तिके व्रतमग्रहीत् ॥१६२॥
¶अथ प्रावृष्यतीतायां यियासुं[21] प्रेक्ष्य **राघवम्** । **गोकर्ण**यक्षो विनयादेवमूचे कृताञ्जलिः ॥१६३॥
यद्यतो यास्यसि स्वामिंस्तत् प्रसीद क्षमस्व मे । यद् भक्तिस्खलितं किञ्चिन्मनागप्यभवत् त्वयि ॥१६४॥
तवाऽनुरूपां कः पूजां कर्तुमीशो महाभुज! । इत्युक्त्वाऽदत्त **रामा**य हारं नाम्ना **स्वयम्प्रभम्** ॥१६५॥
सौमित्रये च ताडङ्के[22] दिव्यरत्नविनिर्मिते । **चूडामणिं** च **सीता**यै वीणां चेप्सितनादिनीम् ॥१६६॥
**रामो**ऽनुमान्य तं यक्षं प्रतस्थे स्वेच्छया ततः । तां पुरीमुपसञ्जह्रे[23] सोऽपि यक्षः स्वयंकृताम् ॥१६७॥

---

१. तद्वटाधिष्ठातृदेवः ॥ २. ***स्वपुरं*** खं.१; "स्वस्वामिनं" इति टि. च ॥ ३. निष्कासितः ॥ ४. ***०प्यवधिं ज्ञा०*** मु. ॥ ५. ***महर्द्धिन०*** खं.२, ला. विना ॥ ६. पर्शुः(फरसी)पाणौ यस्य सः ॥ ७. ***चेतसि विस्मयात्*** मु. ॥ ८. दुःखी ॥ ९. काष्ठभारम् ॥ १०. ***साऽप्यवादीदत्र*** मु. ॥ ११. ***०रे च*** ता. ॥ १२. धनार्थी ॥ १३. ***अभ्यधावत*** खं.१ ॥ १४. ओकः-गृहम् ॥ १५. ***रामवेश्म*** छा. पा. ॥ १६. सानुकम्पः ॥ १७. ***०ह्यर्थं*** ता.विना ॥ १८. निःशङ्कः ॥ १९. यक्षैः ॥ २०. सीतासमीपम् ॥ २१. यातुमिच्छुकम् ॥ २२. कुण्डले ॥ २३. विसर्जनं कृतवान् (पुर्याः) ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶ते क्रामन्तः प्रतिदिनं **जानकी-राम-लक्ष्मणाः** । त्यक्त्वाऽरण्यानि **विजयपुरं** सन्ध्याक्षणे ययुः ॥१६८॥
तस्मिंश्च बहिरुद्याने [१]मरुद्दिशि महीयसः । तले न्यग्रोधवृक्षस्य तेऽवात्सुर्वेश्मसन्निभे ॥१६९॥
पुरे च तस्मिन्नभवद् राजा नाम्ना **महीधरः** । **इन्द्राणी** नाम तत्पत्नी **वनमाले**ति तत्सुता ॥१७०॥
**वनमा[२]ला** च बाल्येऽपि **सौमित्रे**र्गुणसम्पदम् । रूपं चाऽऽकर्ण्य तं मुक्त्वा नाऽन्यं वरमियेष सा ॥१७१॥
तदा प्रव्रजितं श्रुत्वा नृपं **दशरथं** तथा । निर्गतौ **राम-सौमित्री** विषण्णोऽभून्**महीधरः** ॥१७२॥
अदत्त [३]**चन्द्रनगरे वृषभ**[४]क्ष्मापजन्मने । नाम्ना **सुरेन्द्ररूपाय वनमालां महीधरः** ॥१७३॥
**वनमाला**ऽपि तच्छ्रुत्वा मरणे कृतनिश्चया । तस्यां निश्येकिका दैवात् तदुद्यानमुपाययौ ॥१७४॥
प्रविश्य तत्राऽऽयतनेऽपूजयद् वनदेवताम् । जन्मान्तरेऽपि **सौमित्रिः** पतिर्मेऽस्त्वित्युवाच च ॥१७५॥
ययौ च सा तं न्यग्रोधं ददृशे **लक्ष्मणे**न च । प्रसुप्त**जानकी-राम**[५]यामिकेन प्रजाग्रता ॥१७६॥
इदं च दध्यौ **सौमित्रिः** किमियं वनदेवता ? । अधिष्ठात्री वटतरोरस्य वा ? काऽपि यक्षिणी ? ॥१७७॥
एवं चिन्तयतस्तस्य साऽध्यारोहद् वटद्रुमम् । करिष्यति किमेषेति **लक्ष्मणो**ऽप्यारुरोह तम् ॥१७८॥
सा प्रोचे प्राञ्जलिर्भूत्वा मातरो वनदेवताः! । दिग्देव्यो! व्योमदेव्यश्च सर्वाः [६]शृणुत मद्वचः ॥१७९॥
नाऽभूदिह भवे तावन्मम भर्ता स **लक्ष्मणः** । भूयाद् भवान्तरे तर्हि भक्तिस्तत्र ममाऽस्ति चेत् ॥१८०॥
इत्युदित्वा कण्ठपाशं विधायोत्तरवाससा । बद्ध्वा च वटशाखायां द्राक् साऽऽत्मानमलम्बयत् ॥१८१॥
भद्रे! मा साहसं कार्षीर्**लक्ष्मणो**ऽहमिति ब्रुवन् । **लक्ष्मणो**ऽपास्य तत्पाशं तामादायोत्ततार च ॥१८२॥
प्रबुद्धयोर्निशाशेषे **लक्ष्मणो राम-सीतयोः** । शशंस **वनमालाया** वृत्तान्तं तमशेषतः ॥१८३॥
[७]ह्रियाऽवगुण्ठितमुखी **वनमाला**ऽपि तत्क्षणम् । **जानकी-राम**चरणारविन्देभ्यो नमोऽकरोत् ॥१८४॥
इतोऽपि च तदे**न्द्राणी महीधर**नृपप्रिया । **वनमाला**मपश्यन्ती पूच्चक्रे करुणस्वरम् ॥१८५॥
**वनमाला**न्वेषणाय निर्ययौ च **महीधरः** । इतस्ततः परिभ्राम्यंस्तत्रस्थां च ददर्श ताम् ॥१८६॥
हत हतै[८]तान् कुमारीतस्करानितिभाषिषु । उदस्त्रेषु च सैन्येषूत्तस्थौ **रामानुजः** क्रुधा ॥१८७॥
धनुष्यारोपयामास स ज्यां भाल इव भ्रुवम् । अकारयच्च टङ्कारं वैर्यहङ्कारहारकम् ॥१८८॥
चुक्षुभुस्तत्रसुः पेतुस्तद्धनुर्ध्वनिना परे । **महीधरः** पुरः[९]स्थाय **सौमित्रिं** स्वयमैक्षत ॥१८९॥
उपलक्ष्य ततोऽवादीज्ज्यामुत्तारय धन्वनः । [१०]**सौमित्रे!** मत्सुतापुण्यैरिष्यमाणस्त्व[११]मागमः ॥१९०॥
[१२]उत्तारितज्ये **सौमित्रौ** सुस्थितः सन् **महीधरः** । प्रेक्ष्य **रामं** नमश्चक्रेऽवतीर्य स्यन्दनोत्तमात् ॥१९१॥
उवाच च तव भ्रात्रेऽमुष्मै **सौमित्र**ये मया । स्वयं जातानुरागेति कल्पितेयं पुराऽप्यभूत् ॥१९२॥
इदानीमनयोर्जज्ञे [१३]मद्भाग्येन समागमः । जामाता **लक्ष्मण**स्त्वं च सम्बन्धी दुर्लभः खलु ॥१९३॥
इत्युदित्वा महत्या च प्रतिपत्त्या **महीधरः** । निनाय **जानकी-राम-लक्ष्मणान्** निजसद्मनि ॥१९४॥
¶तेषु च तत्र तिष्ठत्सु कदाचन सभास्थितम् । एत्या**ऽतिवीर्य**राड्दूतो नृपमूचे **महीधरम्** ॥१९५॥
**नन्द्यावर्तपुराधीशोऽतिवीर्यो** वीर्यसागरः । साहाय्यायाऽऽह्वयति त्वां जाते [१४]**भरत**विग्रहे ॥१९६॥
भूयांसो भूभुजोऽभ्येयुस्तस्य **दाशरथे**र्बले । तत् त्वमप्य**तिवीर्ये**णाऽऽहूयसे सुमहाबलः ॥१९७॥
अथैवं **लक्ष्मणो**ऽपृच्छन्**नन्द्यावर्त**महीभुजः । **भरत**क्ष्माभुजा सार्धं किं विरोधनिबन्धनम् ? ॥१९८॥
दूतोऽप्युवाच नः स्वामी **भरता**द् भक्तिमिच्छति । स तु प्रती[१५]च्छति न तामिदं विग्रहकारणम् ॥१९९॥
**रामः** पप्रच्छ तं दूत**मतिवीर्य**स्य सङ्गरे । समर्थो **भरतः** किं भोस्तत्सेवां यन्न मन्यते ॥२००॥
दूतोऽप्यूचे महावीर्यो**ऽतिवीर्य**स्तावदेष नः । **भरतो**ऽपि न सामान्यस्तद् द्वयोः संशयो जये ॥२०१॥
इत्युक्तवन्तं तं दूतमागच्छाम्येष सत्वरम् । इत्युक्त्वा व्यसृजद् राजा **रामं** चैवमभाषत ॥२०२॥
अहो! [१६]अज्ञत्वमेतस्या**ऽतिवीर्य**स्याऽल्पमेधसः । यदस्मानयमाहूय **भरतं** योधयिष्यति ॥२०३॥

---

१. वायव्यदिशि ॥ २. *०मालाऽपि* ता. ॥ ३. **चेन्द्र०** ला. ॥ ४. वृषभनृपस्य पुत्राय ॥ ५. यामिकः-प्रहरी ॥ ६. *शृण्वन्तु* ला. ॥ ७. लज्जयाऽवनतमुखी ॥ ८. *हत तान्* मु. ॥ ९. *पुरः स्थित्वा* मु.; *पुरःस्थायं* हे.; पुरःस्थायेत्यत्र "पुरोऽस्तमव्ययम्"(सि.३/१/७), ततो गतिसमासः ॥ १०. *सौमित्रिं* मु. ॥ ११. *०मागतः* मु. ॥ १२. उत्तारिता ज्या येन सः, तस्मिन् ॥ १३. *सद्भाग्येन* कां. ॥ १४. भरतेन सह विग्रहे-युद्धे जाते ॥ १५. स्वीकरोति ॥ १६. *अन्यत्व०* ता. ॥

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

तत् सर्वसेनया गत्वाऽनुपलक्षित[1]दौर्हृदाः । अमुमेव हनिष्यामो **भारता**दिव शासनात् ॥२०४॥
ऊचे **रामो**ऽत्र तिष्ठ त्वं त्वत्सुतैः सबलैः सह । तत्राऽहमेव यास्यामि करिष्यामि यथोचितम् ॥२०५॥
एवमस्त्विति तेनोक्तस्तत्पुत्रबलसंयुतः । **नन्द्यावर्तपुरं रामः ससीता-लक्ष्मणो** ययौ ॥२०६॥
उषितं बहिरुद्याने **रामं** तत्क्षेत्रदेवता । अभाषत महाभाग! किमभीष्टं करोमि ते ? ॥२०७॥
न नः किमपि कर्तव्यमित्युक्ते **राघवेण** तु । साऽप्यधादेवमेतद्धि तथाऽप्युपकरोम्यदः ॥२०८॥
**अतिवीर्यो** जितः स्त्रीभिरिति तस्याऽयशस्कृते । ससैन्यस्य करिष्यामि स्त्रीरूपं का[2]मिकं तव ॥२०९॥
स्त्रीराज्यमिव तत्सैन्यं स्त्रीरूपमभवत् क्षणात् । स्त्रीरूपौ **राम-सौमित्री** चाऽभूतां सुन्दराकृती ॥२१०॥
**महीधरेण** स्वं सैन्यं तव साहाय्यहेतवे । प्रैषीदमिति **राम**स्तं द्वाःस्थेनाऽज्ञापयन्नृपम् ॥२११॥
**अतिवीर्यो**ऽप्युवाचैवं स्वयं नाऽऽगा**न्महीधरः** । कृतं तदस्य सैन्येन मु[3]मूर्षोर्बहुमानिनः ॥२१२॥
जेष्याम्येकोऽपि **भरतं** सहायाः किं ममाऽपि हि ? । निर्वास्यतां द्रुतमिदं तत्सैन्यमयशस्करम् ॥२१३॥
अथाऽन्यः कश्चिदप्यूचे स्वयमागान्न केवलम् । स प्रत्युतोपहासाय स्त्रीसैन्यं प्राहिणोदिह ॥२१४॥
तच्छ्रु[4]त्वाऽतितरां क्रोधं **नन्द्यावर्ते**श्वरोऽकरोत् । स्त्रीरूपधारिणस्ते च **रामाद्या** द्वारमाययुः ॥२१५॥
आदिक्षद**तिवीर्यो**ऽपि दासीवदिमिकाः स्त्रियः । गाढं गृहीत्वा ग्रीवासु निर्वास्यन्तां पुराद् बहिः ॥२१६॥
समन्तात् तस्य सामन्ता उत्थाय सपदातयः । स्त्रीसैन्यं तदुपद्रोतुं प्रावर्तन्त महाभुजाः ॥२१७॥
**रामभद्रो** भुजस्तम्भेनेभस्तम्भमथोच्चकैः । समुत्पाट्याऽऽयुधीकृत्य तान् समन्तादपातयत् ॥२१८॥
तेन सामन्तभङ्गेनाऽ**तिवीर्यः** कुपितो भृशम् । रणाय स्वयमुत्तस्थे खड्गमाकृष्य भीषणम् ॥२१९॥
अथ तत्खड्गमाच्छिद्य **लक्ष्मण**स्तत्क्षणादपि । तमाचकर्ष केशेषु तद्वस्त्रेण बबन्ध च ॥२२०॥
मृगं व्याघ्र इवाऽऽदाय तं नृव्याघ्रश्चचाल सः । दृश्यमानो जनैः पौरैरु[5]त्त्रासतरलेक्षणैः ॥२२१॥
अथ तं मोचयामास **मैथिली** करुणापरा । सद्यो **भरतसेवां** च **सौमित्रिः** प्रत्यपादयत् ॥२२२॥
स्त्रीवेषमथ सञ्जह्रे सर्वेषां क्षेत्रदेवता । अज्ञासीद**तिवीर्यो**ऽपि तौ तदा **राम-लक्ष्मणौ** ॥२२३॥
**अतिवीर्य**स्तयोः पूजां महतीं विदधे ततः । द[6]धौ च मानध्वंसेन मानी वैराग्यमुच्चकैः ॥२२४॥
किं सेविष्येऽहमप्यन्यमित्यहङ्कारभाग् हृदि । दीक्षा[7]र्थी **विजयरथे** पु[8]त्रे राज्यं न्यधत्त च ॥२२५॥
द्वितीयो **भरतो** मेऽसि शाधि क्ष्मां प्रव्रज स्म मा । **रामे**णेत्थं निषिद्धोऽपि स प्राव्राजीन्महामनाः ॥२२६॥
तत्सूनु**र्विजयरथो रतिमाला**भिधां निजाम् । **लक्ष्मणाय** ददौ जा[9]मिं तां प्र[10]तीयेष **लक्ष्मणः** ॥२२७॥
ययौ ससैन्यो **विजयपुरं रामो**ऽपि पत्तनम् । **अयोध्यां विजयरथो भरतं** सेवितुं पुनः ॥२२८॥
विज्ञाततदुदन्तोऽपि **भरतो** [11]गरिमाचलः । सच्चकार तमायान्तं सन्तो हि नतवत्सलाः ॥२२९॥
कनिष्ठां **रतिमाला**या नाम्ना **विजयसुन्दरी**म् । ददौ स्वसारं स्त्री[12]सारं **भरताय** स भूभुजे ॥२३०॥
तदा च विहरंस्तत्राऽ**तिवीर्यो** मुनिराययौ । वन्दित्वा क्षमयाञ्चक्रे **भरतेन** स भूभुजा ॥२३१॥
विसृष्टः सप्रसादेन **भरतेन** महीभुजा । सानन्दो **विजयरथो नन्द्यावर्तपुरं** ययौ ॥२३२॥
**महीधर**मनुज्ञाप्य **रामे** गन्तुं समुद्यते । **वन[13]माला**मापप्रच्छे यियासुरथ **लक्ष्मणः** ॥२३३॥
जगाद **वनमाला**ऽपि बाष्पपूर्णविलोचना । प्राणत्राणं तदाऽकार्षीः प्राणेश! मम किं मुधा ? ॥२३४॥
वरं भवेत् सुखमृत्युस्तदैव मम वल्लभ! । न त्व[14]र्धवैशसमिदं दुःखं त्वद्विरहोत्थितम् ॥२३५॥
अद्यैव परिणीय त्वं सहैव नय मां प्रभो! । त्वद्वियोगाच्छलं प्राप्य नेष्यत्य[15]परथाऽन्तकः ॥२३६॥
अन्वनैषी**ल्लक्ष्मणो**ऽथ भ्रातुः शुश्रूषको ह्यहम् । शुश्रूषाविघ्नकृन्मा भूः सहाऽऽयान्ती मनस्विनि! ॥२३७॥
[16]प्रापय्याऽभीप्सितं स्थानं ज्यायांसं [17]वरवर्णिनि! । त्वां समेष्यामि भूयोऽपि [18]वास्तव्या हृदये ह्यसि ॥२३८॥

---

१. *०सौहृदाः* ला. ता. हे. का.; *दौहृदाः* ला. मु.; अनुपलक्षितं-अज्ञातं दौर्हृदं-दुर्भावः येषां ते ॥ २. कामेन निर्वृत्तम् ; *कामितं* पाता.॥ ३. मरणेच्छोः ॥ ४. *तच्छ्रुत्वा नितरां क्रोधं* ला.; *तच्छ्रुत्वा सुमहाक्रोधं* मु. ॥ ५. अधिकत्रासाच्चञ्चलनेत्रैः ॥ ६. *दध्यौ* खं.१-२,पाता. ता. विना ॥ ७. *दीक्षार्थं* ला. ॥ ८. *सुते* पाता. ॥ ९. भगिनीम् ॥ १०. जग्राह ॥ ११. गरिम्णा अचलः ॥ १२. *सुभगां* ला.; स्त्रीषु सारम्-श्रेष्ठाम् ॥ १३. *०मालां च पप्रच्छ* ला. ॥ १४. "अर्धमरणम्" इति ला.टि. ॥ १५. अन्यथा यमो मां नेष्यति, त्वद्वियोगात्-त्वदभावे छलं लब्ध्वेत्यर्थः ॥ १६. ज्यायांसं -रामं इष्टे स्थाने नीत्वा ततो भूयोऽपि त्वदन्तिके आगमिष्यामि ॥ १७. हे गुणोत्कृष्टे! इत्यर्थः ॥ १८. त्वं मम हृदये वास्तव्या-वसन्ती असि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घोरेभ्यः शपथेभ्यो यं त्वं कारयसि मानिनि! । तं करोमि [1]पुनरिहाऽऽगमप्रत्ययहेतवे ॥२३९॥
न चेदायामि भूयोऽपि तदहं रात्रिभोजिनाम् । गृह्णेऽ[2]हंसेति शपथं **सौमित्रिः** कारितस्तया ॥२४०॥
¶रात्रिशेषे ततो **रामः ससीता-लक्ष्मणो**ऽचलत् । क्रमाद् वनानि लङ्घित्वा प्राप **क्षेमाञ्जलिं** पुरीम् ॥२४१॥
**राम**स्तद्बहिरुद्याने [3]वन्याहारैः फलादिभिः । बुभुजे **लक्ष्मणा**नीतैर्**जानकी**करसंस्[4]कृतैः ॥२४२॥
तत्र **राम**मनुज्ञाप्य कौतुकात् प्राविशत् पुरीम् । **सौमित्रि**स्तत्र चाऽश्रौषीदुच्चैराघोषणामिति ॥२४३॥
शक्तिप्रहारं सहते योऽमुष्य पृथिवीपतेः । तस्मै परिणयनाय ददात्येष स्वकन्यकाम् ॥२४४॥
तेन[5] चाऽऽ[6]घोषणाहेतुं पृष्ट एकोऽवदत् पुमान् । अत्राऽस्ति **शत्रुदमनो** नाम राजा महाभुजः ॥२४५॥
तस्याऽस्ति **कनकादेवी**कुक्षिजा वरकन्यका । **जितपद्मे**ति पद्मा[7]याः सद्मैकं पद्मलोचना ॥२४६॥
वरस्यौ[8]जःपरीक्षार्थमिदमारभ्यते ततः । प्रत्यहं क्ष्माभुजाऽनेन तादृक्षो नैति कोऽपि ना[9] ॥२४७॥
श्रुत्वेत्थं **लक्ष्मणो**ऽ[10]गच्छत् तं राजानं सभास्थितम् । कुतो हेतोः ? कुतस्त्यस्त्वं ? तत्पृष्टश्चैवमब्रवीत् ॥२४८॥
अहं **भरत**दूतोऽस्मि गच्छन्नर्थेन केनचित् । तव कन्यामिमां श्रुत्वा परिणेतुमिहाऽऽगमम् ॥२४९॥
[11]सहिष्यसे शक्तिघातं ममेत्युक्तो महीभुजा । किमेकेन ? सहिष्येऽहं पञ्चेत्यूचे च[12] **लक्ष्मणः** ॥२५०॥
**जितपद्मा** तदानीं च तत्राऽऽगाद् राजकन्यका । बभूव **लक्ष्मणं** प्रेक्ष्य क्षणाच्च मदनातुरा ॥२५१॥
तया सद्योऽनुरागिण्या वार्यमाणोऽपि भूपतिः । चिक्षेप **लक्ष्मणा**याऽऽशु दुःसहं शक्तिपञ्चकम् ॥२५२॥
द्वे कराभ्यां द्वे कक्षाभ्यां दन्तैरेकां च **लक्ष्मणः** । अग्रहीज्**जितपद्मा**याः कन्याया मनसा सह ॥२५३॥
**जितपद्मा**ऽक्षिपत् तत्र स्वयं वरणमालिकाम् । उदुह्यतामियं कन्येत्यब्रवीत् पार्थिवोऽपि तम् ॥२५४॥
**लक्ष्मणो**ऽप्यवदद् बाह्योपवनेऽस्ति ममाऽग्रजः । **रामो दाशरथिस्तेन परतन्त्रोऽस्मि सर्वदा** ॥२५५॥
तौ **राम-लक्ष्मणौ** ज्ञात्वा तत्क्षणं स क्षमापतिः । गत्वा **रामं** नमश्चक्रे स्ववेश्मन्यानिनाय च ॥२५६॥
महत्या प्रतिपत्त्या स राजा **राम**मपूजयत् । सामान्योऽप्यतिथिः पूज्यः किं पुनः पुरुषोत्तमः ? ॥२५७॥
¶ततोऽपि चलिते **रामे सौमित्रि**स्तं महीपतिम् । उवाच परिणेष्यामि व्यावृत्तस्त्वत्सुतामिति ॥२५८॥
निशायां निर्ययौ **रामः** प्राप सायं च पत्तनम् । **वंशस्थलं** नाम **वंशशैला**ख्याद्रितटस्थितम् ॥२५९॥
तस्मिन् सभूपतिं लोकमालुलोके भयाकुलम् । पप्रच्छ च नरं कञ्चिद् **राम**स्तद्भयकारणम् ॥२६०॥
आचख्यौ पुरुषः सोऽपि [13]तार्तीयीकोऽद्य वासरः । अमुष्मिन् पर्वते रात्रौ रौद्रस्योच्छलतो ध्वनेः ॥२६१॥
तद्भयाद् रात्रिमन्यत्र गमयत्यखिलो जनः । प्रातश्च पुनरायाति कष्टा नित्यमियं स्थितिः ॥२६२॥
ततश्च कौतुकाद् **रामः** प्रेरितो **लक्ष्मणे**न च । तत्राऽऽरुरोहाऽपश्यच्च कायोत्सर्गस्थितौ मुनी ॥२६३॥
भक्त्या ववन्दिरे तौ तु **जानकी-राम-लक्ष्मणाः** । तदग्रेऽवादयद् **रामो गोकर्णा**[14]र्पितवल्लकीम् ॥२६४॥
[15]हृद्यं जगौ च **सौमित्रि**र्ग्रामराग[16]मनोहरम् । चित्रा[17]ङ्गहारकरणं **सीता** देवी ननर्त च ॥२६५॥
तदा चाऽस्तं ययावर्को जजृम्भे च वि[18]भावरी । विकृतानेकवेतालश्चाऽऽगाद् देवो**ऽनलप्रभः** ॥२६६॥
स्वयं वेतालरूपः सोऽट्टहासैः स्फोटयन्नभः । महर्षी तावुपद्रोतुं प्रावर्तत दुराशयः ॥२६७॥
मुक्त्वो[19]पसाधु **वैदेहीं** सन्नद्धौ **राम-लक्ष्मणौ** । उत्तस्थाते तं निहन्तुम[20]काले कालतां गतौ ॥२६८॥
सोऽपि देवस्तयोस्तेजःप्रसरं सोढुमक्षमः । निजं स्थानं ययौ साध्वोस्तयोश्चाऽजनि केवलम् ॥२६९॥
देवैश्च केवलज्ञानमहिमा विदधे तयोः । नत्वा **राम**श्च पप्रच्छोपसर्गविधिकारणम् ॥२७०॥
¶तत्राऽऽख्यदेको महर्षिराख्यया **कुलभूषणः** । आसीन्नगर्यां **पद्मिन्यां** राजा **विजयपर्वतः** ॥२७१॥
तस्याऽ**मृतस्वरा**ख्योऽभूद् दूतो दूतस्य तस्य च । भार्यो**पयोगा** तत्पुत्रा**वुदितो मुदितो**ऽपि च ॥२७२॥

१. पुनः इह-त्वत्समीपे आगमनस्य प्रतीत्यर्थम् ॥ २. "पापेन" इति ला.टि. ॥ ३. वने भवा वन्याः, तेषामाहारैः-आहारभूतैः ॥ ४. *०संस्तुतैः* खं.१-२, पाता.; परिचितैरित्यर्थः ॥ ५. लक्ष्मणेन ॥ ६. *चायोषणे हेतुं* खं.१ ॥ ७. लक्ष्म्या गृहम् ॥ ८. बलपरीक्षार्थम् ॥ ९. नरः ॥ १०. *०णोऽवोचत् तं०* खं.१ ॥ ११. *सहिष्यते* पाता. ॥ १२. *स* ता. ॥ १३. तृतीयः ॥ १४. गोकर्णयक्षेण अर्पितां वीणाम् ॥ १५. मधुरं गानं कृतवान् ॥ १६. *०मनोरमम्* ता. हे. ला. छा. पा. ॥ १७. चित्राः-विविधाः अङ्गहारा-भङ्गविक्षेपाः(हावभावाः) करणानि-तालताडनादीनि च यत्र यथा स्यात् तथेति-क्रियाविशेषणम् ॥ १८. रात्रिः ॥ १९. उपसाधु-साधुसमीपे ॥ २०. तमकाले निहन्तुं कालतां-यमत्वं गतौ, यमीभूतावित्यर्थः ॥

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वयस्यस्तस्य दूतस्य **वसुभूति**रिति द्विजः । **उपयोगा** तदासक्ता[1]ऽजिघांसद**मृतस्वरम्** ॥२७३॥
नृपादेशाद् विदेशायाऽन्यदाऽगाद**मृतस्वरः** । सह गच्छन् **वसुभूति**र्मार्गे तं चाऽवधीच्छलात् ॥२७४॥
**वसुभूतिः** पुरीमेत्य जनायैवमबोचत । कुतोऽपि कार्याद**मृतस्वरे**णाऽहं निवर्तितः ॥२७५॥
शशंस चो**पयोगा**यायाः स नौ सम्भोगविघ्नकृत् । मया व्यापादितो मार्गे च्छलं लब्ध्वाऽ**मृतस्वरः** ॥२७६॥
साऽप्यूचे साध्वकार्षीस्त्वं जहि[2] पुत्राविमावपि । अस्तु निर्मक्षिक[3]मिति सोऽपि तत् प्रत्यपद्यत ॥२७७॥
दैवाच्छुश्राव[4] तं मन्त्रं **वसुभूति**सधर्मिणी । ईर्ष्ययाऽऽख्यच्च तत्सूनो[5]र्**मुदित**स्यो**दित**स्य[6] च ॥२७८॥
**उदिते**न रुषा सद्यो **वसुभूति**र्निपातितः[7] । मृत्वैष **नलपल्ल्यां**[8] स म्लेच्छः समुदपद्यत ॥२७९॥
¶धर्मं श्रुत्वाऽन्यदा राजा महर्षे**र्मतिवर्धना**त् । प्रव्रज्यामाददे ताव**प्युदितो मुदितो**ऽपि च ॥२८०॥
**सम्मेते**[9] बन्दितुं चैत्यान्**युदितो मुदितो**ऽपि च । प्रचेलतुः पथि भ्रान्तौ पल्लीं तां च समेयतुः[10] ॥२८१॥
पूर्ववैराद् **वसुभूति**जीवो म्लेच्छो निरीक्ष्य तौ । हन्तुं दधावे म्लेच्छाधिपतिना च न्यषिध्यत ॥२८२॥
म्लेच्छेशः प्राग्भवे सोऽभून्मृगो[11] व्याधाच्च मोचितः । **मुदितोदित**जीवाभ्यां कर्षकाभ्यां[12] च तद्भवे ॥२८३॥
तेन म्लेच्छाधिपेनाऽतस्त्रातौ **सम्मेत**मेत्य च । तौ चैत्यानि ववन्दाते विजहाते चिराय च ॥२८४॥
विधायाऽनशनं मृत्वा **महाशुक्रे** सुरोत्तमौ । तौ **सुन्दर-सुकेशा**ख्यावजायेतां महर्द्धिकौ ॥२८५॥
¶भ्रान्त्वा भवं **वसुभूति**जीवो म्लेच्छः कथञ्चन । अवाप मानुषं जन्म तत्र सोऽभूच्च तापसः ॥२८६॥
स विपद्य समुत्पेदे **ज्योतिष्केषु** सुरेषु तु । **धूमकेतु**र्नाम देवो मिथ्यादृष्टिर्दुराशयः ॥२८७॥
**उदित-मुदित**जीवौ **शुक्रा**च्च्युत्वाऽत्र **भारते** । महापुरेऽ**रिष्टपुरे प्रियंवद**महीपतेः ॥२८८॥
**पद्मावत्यां** सधर्मिण्यामजायेतामुभौ सुतौ । विख्यातौ[13] नामतो[14] **रत्नरथ-चित्ररथा**विति ॥२८९॥
**धूमकेतु**रपि च्युत्वा पत्न्यां तस्यैव भूपतेः । बभूव **कनकाभा**यां नाम्ना सूनुर**नुद्धरः** ॥२९०॥
अभूत् समत्सरो **रत्नरथे चित्ररथे** च सः । तस्योपरि न मात्सर्यं बिभराञ्चक्रतुस्तु तौ ॥२९१॥
न्यस्य **रत्नरथे** राज्यं यौवराज्यं द्वयोः पुनः । **प्रियंवदः** षड् दिनानि[15] प्रायं[16] कृत्वा सुरोऽभवत् ॥२९२॥
राज्यं पालयतो **रत्नरथ**स्यैको नृपो ददौ । **श्रीप्रभां** नाम कन्यां स्वां याचमानेऽप्य**नुद्धरे** ॥२९३॥
क्रुद्धोऽथाऽ**नुद्धरो रत्नरथ**स्योर्वीमलुण्टयत् । पातयित्वा रणे **रत्नरथेन** जगृहे च सः ॥२९४॥
विडम्ब्य बहुधा **रत्नरथेन** मुमुचेऽथ[17] सः । तापसोऽभूच्च स्त्रीसङ्गान्मोघीचक्रे[18] निजं तपः ॥२९५॥
ततो मृत्वा भवं भ्रान्त्वा चिरान्मर्त्यो बभूव सः । तापसीभूय भूयोऽपि चकाराऽज्ञानकं तपः ॥२९६॥
मृत्वाऽ**नलप्रभः** सोऽयं **ज्योतिष्क**स्त्रिदशोऽभवत् । दीक्षां **रत्नरथ-चित्ररथौ** जगृहतुश्च तौ ॥२९७॥
विपद्य चाऽ**च्युते** कल्पेऽ**तिबलो**ऽथ **महाबलः** । नामधेयेन जज्ञाते त्रिदशौ प्रवरर्द्धिकौ ॥२९८॥
च्युत्वा च **सिद्धार्थपुरे क्षेमङ्कर**महीपतेः । महिष्या **विमलदेव्या**स्तौ कुक्षाववतेरतुः ॥२९९॥
क्रमादजनिषातां च **विमला**यामुभौ सुतौ । **कुलभूषण** एषोऽहं तथाऽयं **देशभूषणः** ॥३००॥
उपाध्यायस्य **घोष**स्याऽर्पितौ पाठाय भूभुजा । अपठाव कलाः सर्वा द्वादशाब्दीमवस्थितौ ॥३०१॥
त्रयोदशेऽब्दे **घोषे**ण सहाऽऽयान्तौ[19] नृपान्तिके । राजवेश्मन्यपश्याव कन्यां वातायनस्थिताम् ॥३०२॥
जातानुरागौ तस्यां च सद्योऽपि विमनायितौ[20] । अगमावाऽन्तिकं राज्ञोऽदर्शयावाऽखिलाः कलाः ॥३०३॥
उपाध्यायोऽर्चितो राज्ञा जगाम निजमन्दिरम् । आवां च मातरं नन्तुं गतौ राजाज्ञया ततः ॥३०४॥
तत्र चाऽऽवामपश्याव तां कन्यां मातुरन्तिके । अशंसच्चाऽम्बा युवयोः स्वसेयं **कनकप्रभा** ॥३०५॥
**घोषो**पाध्यायसदने युवयोस्तस्थुषोः सतोः । जातेयं वत्सौ! तेनेमां नोपलक्षयथो युवाम् ॥३०६॥
तच्छ्रुत्वा लज्जितावावमज्ञानात् स्वसृकाङ्क्षिणौ । क्षणाद् वैराग्यमापन्नौ प्राव्रजावाऽन्तिके गुरोः ॥३०७॥

१. ०*क्ता जिघांसुरमृत*० ता.; हन्तुमैच्छत् ॥ २. वधं कुरु ॥ ३. मक्षिकाणामभावो निर्मक्षिकम्, मक्षिकारहितं-निर्विघ्नमित्यर्थः ॥४. *दैवाच्छ्रुत्वा च* मु. ॥ ५. *तत्सूनो*० पाता. ॥ ६. ०*र्मुदितोदितयोस्तयोः* ता. ॥ ७. मारितः ॥ ८. *म्लेच्छपल्ल्यां* ला. ॥ ९. सम्मेतशिखरे ॥ १०. *समीयतुः* हे. ॥ ११. *सोऽभूत् खगो*० रसंपा. ॥ १२. कृषीवलाभ्याम् ॥ १३. *विश्रुतौ* मु. ॥ १४. *नामतो विश्रुतौ* ला. ॥ १५. ०*दिनाशनं कृत्वा*० ता. ॥ १६. अनशनम् ॥ १७. *मुमुचे च* पाता. ॥ १८. निष्फलीचक्रे ॥ १९. *सहायातौ* ला.विना ॥ २०. विमनस्कौ जातौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तप्यमानौ तपस्तीव्रमिहाऽऽयातौ महागिरौ। कायोत्सर्गेण चाऽस्थाव निरपेक्षौ वपुष्यपि ॥३०८॥
पिताऽऽवयोर्वियोगेन गृहीत्वाऽनशनं मृतः। **गरुडेशो**ऽभवद् देवो **महालोचन**नामकः ॥३०९॥
विज्ञायाऽऽसनकम्पेन चोपसर्गं स आवयोः। सम्प्रत्ययमिहाऽऽयातः प्राग्जन्मस्नेहपीडितः ॥३१०॥
**अनलप्रभ**देवः सोऽ**नन्तवीर्य**महामुनेः। पार्श्वे[1] केवलिनोऽगच्छत् सह देवैः कुतूहलात् ॥३११॥
देशनान्तेऽ**नन्तवीर्यः** पृष्टः शिष्येण केनचित्। **मुनिसुव्रत**तीर्थेऽस्मिन् कः पश्चात् तव केवली ? ॥३१२॥
सोऽप्याख्यन्मम निर्वाणे केवली **कुलभूषणः**। **देशभूषण** इति च भ्रातरौ द्वौ भविष्यतः ॥३१३॥
[2]तच्चाऽ**नलप्रभः** श्रुत्वा निजं स्थानमुपेत्य च। विभङ्गेना[3]ऽन्यदा ज्ञात्वा कायोत्सर्गस्थिताविह ॥३१४॥
मिथ्यात्वेनाऽ**नन्तवीर्य**वचनं कर्तुमन्यथा। प्राग्जन्मवैराच्च स नावुपदुद्राव दारुणम् ॥३१५॥युग्मम्॥
दिनान्य[4]तीयुश्चत्वारि तस्योपद्रवतो दृढम्। अद्याऽऽयातौ युवामत्र युष्मद्भीत्या[5]ऽनशच्च सः ॥३१६॥
कर्मक्षयादावयोश्च केवलं समजायत। कर्मक्षये सहायोऽयमुपसर्गपरोऽप्यभूत् ॥३१७॥
**महालोचन**देवोऽपि तदोचे गरुडाधिपः। **काकुत्स्थ!** साध्वकार्षीस्त्वं किं प्रत्युपकरोमि ते ? ॥३१८॥
नाऽर्थो नः कश्चिदप्यस्तीत्युक्ते **रामेण** सोऽमरः। तथाऽप्युपकरिष्यामि क्वाऽपीत्युक्त्वा तिरोदधे ॥३१९॥
अथ **वंशस्थला**धीशो राजा नाम्ना **सुरप्रभः**। तत्राऽऽगत्य नमश्चक्रे **राम**मानर्च चोच्चकैः ॥३२०॥
**रामा**ज्ञया तत्र शैले सोऽर्हच्चैत्यान्यकारयत्। **राम**नाम्ना **रामगिरि**र्गिरिः सोऽभूत् तदादि च ॥३२१॥
¶**सुरप्रभ**मथाऽऽपृच्छ्य प्र[6]तस्थे **रघुपुङ्गवः**। उद्दण्डं **दण्डकारण्यं** प्रविवेश च निर्भयः ॥३२२॥
विधाय तत्र चाऽऽवासं **महागिरि**गुहागृहे। **काकुत्स्थः** सुस्थितस्तस्थौ स्वकीय इव वेश्मनि ॥३२३॥
तत्र भोजनवेलायामन्येद्युश्चारणौ मुनी। नाम्ना **त्रिगुप्त-सुगुप्तौ** नभसा समुपेयतुः ॥३२४॥
द्वि[7]मासोपोषितौ तौ तु पारणार्थमुपस्थितौ। भक्त्या ववन्दिरे **राम-सीता-सौमित्रय**स्त्रयः ॥३२५॥
यथोचितैरन्न-पानैः **सीता** तौ प्रत्यलाभयत्। तदा देवैर्विदधिरे रत्न-गन्धाम्बुवृष्टयः ॥३२६॥
तदा **रत्नजटी कम्बुद्वीप**विद्याधरेश्वरः। द्वौ सुरौ चै[8]त्य **रामाय** प्रीताः साश्वं रथं ददुः ॥३२७॥
गन्धाम्बुवृष्टिगन्धेन तत्र **गन्धा**भिधः खगः। उत्तीर्य पादपाद् रोगी तद्वास्तव्यः समाययौ ॥३२८॥
सञ्जातजातिस्मरणो मुनेर्दर्शनमात्रतः। पपात मूर्च्छया भूमौ **सीता**ऽम्भोभिः सिषेच तम् ॥३२९॥
लब्धसञ्ज्ञः समुत्थाय साधुपादेषु सोऽपतत्। साधोः स्पर्शौषधीलब्ध्या नीरोगश्चाऽभवत् क्षणात् ॥३३०॥
पक्षौ हैमावजायेतां चञ्चुर्विद्रु[9]मविभ्रमा। पद्मरागप्रभौ पादौ नानारत्नप्रभं वपुः ॥३३१॥
रत्नाङ्कुरश्रेणिनिभा जटाः शिरसि चाऽभवन्। **जटायु**र्नाम तस्याऽभूत् ततः प्रभृति पक्षिणः ॥३३२॥युग्मम्॥
**रामो**ऽपृच्छन्महर्षी तौ गृध्रः क्र[10]व्यादयं कुधीः। स्थित्वा वः पादयोः पार्श्वे शान्तः कस्मादजायत ? ॥३३३॥
भदन्तावयमत्यन्तविरूपावयवः पुरा। कथमद्य क्षणाज्जातो हेमरत्नोत्करद्युतिः ? ॥३३४॥
¶**सुगुप्त**र्षिरथाऽऽचख्यावासीदिह पुरा पुरम्। **कुम्भकारकटं** नाम राजा तत्रैष **दण्डकः** ॥३३५॥
**श्रावस्त्यां** च तदा राजा **जितशत्रु**रजायत। [11]**धारिणी** नाम तत्पत्नी **स्कन्दको** नाम तत्सुतः ॥३३६॥
**पुरन्दरयशा**[12] नामाऽभवच्च दुहिता तयोः। **कुम्भकारकटे**शस्तां पर्यणैषीच्च **दण्डकः** ॥३३७॥
अन्यदाऽर्थेन केनाऽपि **जितशत्रु**नृपान्तिके। प्राहिणोद् **दण्डको** दूतं **पालकं** नामतो द्विजम् ॥३३८॥
**जितश**[13]**त्रु**स्तदा चाऽर्हद्धर्मगोष्ठीपरोऽभवत्। आरेभे **पालक**स्तं तु धर्मं दूषयितुं कुधीः ॥३३९॥
स **स्कन्दक**कुमारेण मिथ्यादृष्टिर्दुराशयः। युक्त्या निरुत्तरीचक्रे स[14]त्यसंवादपूर्वकम् ॥३४०॥
तदा स हसितः सभ्यैरमर्षं **स्कन्दके**ऽदधत्। विसृष्टश्चाऽन्यदा राज्ञा **कुम्भकारकटं** ययौ ॥३४१॥
विरक्तश्चाऽन्यदा पञ्चराजपुत्रशतान्वितः। **मुनिसुव्रत**पादान्ते **स्कन्दको** व्रतमा[15]ददे ॥३४२॥

---

१. *पार्श्वं* खं.१-२, ला. कां. छा. पा. ॥ २. *तथाऽनल०* ता. ॥ ३. *विभङ्गतोऽन्यदा* पाता. ॥ ४. अतिक्रान्तानि ॥ ५. *०भीत्या ननाश सः* ता. ॥ ६. *प्रभाते* पाता. ॥ ७. मासक्षपणद्वयकारकौ ॥ ८. च आगत्य ॥ ९. प्रवालसदृशी रक्तेत्यर्थः ॥ १०. "मांसादः" इति ला.टि., मांसभक्षीत्यर्थः ॥ ११. *धारिणी* मु. ॥ १२. *०यशोनामा०* मो. ॥ १३. *०शत्रुः सदा* ला. ॥ १४. *सभ्य०* रसंपा. ॥ १५. *व्रतमग्रहीत्* मो. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुरन्दरयशो**मुख्यलोकं बोधयितुं पुरे। **कुम्भकारकटे** यामीत्यापप्रच्छे स च प्रभुम् ॥३४३॥
उवाच प्रभुरप्येवं तत्र ते मारणान्तिकः । गतस्य सपरीवारस्योपसर्गो भविष्यति ॥३४४॥
वयमाराधकास्तत्र भाविनो वा न वेत्यथ। भूयोऽपि **स्कन्दको**ऽपृच्छत् स्वामिनं **मुनिसुव्रतम्** ॥३४५॥
त्वां विनाऽऽराधकाः सर्वेऽपीत्याख्यद् भगवानपि। सर्वमेतर्हि सम्पूर्णमित्युक्त्वा **स्कन्दको**ऽचलत् ॥३४६॥
क्रमेण **स्कन्दका**चार्यो मुनिपञ्चशतीयुतः । गच्छन्नासादयामास **कुम्भकारकटं** पुरम् ॥३४७॥
तं दृष्ट्वा **पालकः** क्रूरः संस्मरंस्तं पराभवम् । साधूपयोग्युद्यानेषु शस्त्राण्युर्व्यां [1]न्यखानयत् ॥३४८॥
उद्याने **स्कन्दका**चार्य एकस्मिन् समवासरत् । आययौ वन्दितुं तं च **दण्डकः** सपरिच्छदः ॥३४९॥
**स्कन्दको** देशनां चक्रे जहृषुर्बहवो जनाः । प्रहृष्टो देशनान्ते च वेश्माऽगाद् **दण्डको** नृपः ॥३५०॥
गत्वा रहसि राजानमित्यूचे **पालकः** कुधीः । स्वामिन्नेष बकाचारः पाखण्डी **स्कन्दकः** खलु ॥३५१॥
सहस्रयोधिभिः पुम्भिर्मुनिवेषधरैरसौ । त्वां हत्वा राज्यमादातुमागादिह महाशठः ॥३५२॥
अत्रोद्याने [2]स्वस्थाने च मुनिवेषैर्महाभटैः । छन्नं क्षिप्तानि शस्त्राणि दृष्ट्वा प्रत्येतु भूपतिः ॥३५३॥
ततश्चाऽखानयद् राजा मुनिस्थानानि सर्वतः । चित्राण्यस्त्राण्यपश्यच्च विषादं च परं ययौ ॥३५४॥
अविचार्य ततो राजाऽप्यादिदेशेति **पालकम्** । साधु मन्त्रिंस्त्वया ज्ञातं [3]चक्षुष्मान् भवता ह्यहम् ॥३५५॥
कर्तुं त्वमेव जानासि दुर्मतेरस्य चोचितम् । तत्कुरुष्व न भूयोऽपि प्रष्टव्योऽहं महामते! ॥३५६॥
इत्युक्तः **पालकः** शीघ्रं गत्वा यन्त्रमकारयत् । **स्कन्दक**स्याऽग्रतः साधूनेकैकं च न्यपीलयत् ॥३५७॥
निष्पील्यमानानेतांस्तु देशनापूर्वकं स्वयम् । अकारयत् **स्कन्दको**ऽपि सम्यगाराधनाविधिम् ॥३५८॥
[4]उपयन्त्रं शिशौ नीते [5]परिवारान्तिमे मुनौ । कारुण्यात् **स्कन्दका**चार्य इत्यभाषत **पालकम्** ॥३५९॥
आदौ पीलय मामेव कुरुष्वैतद् वचो मम । बालं मुनिं न पश्यामि पील्यमानं यथा ह्यमुम् ॥३६०॥
तत्पीडापीडितं ज्ञात्वा **स्कन्दकं पालको**ऽपि हि। तमेव बालकमुनिं तत्पीडार्थमपीलयत् ॥३६१॥
उत्पन्नकेवलाः सर्वेऽप्यवापुः पदमव्ययम् । [6]प्रत्याख्याय **स्कन्दक**स्तु निदानमिति निर्ममे ॥३६२॥
**दण्डकस्य पालकस्य** तथा [7]तत्कुल-राष्ट्रयोः । व्यापादनाय भूयासं तपसोऽस्य फलं यदि ॥३६३॥
एवं कृतनिदानः सन् पीलितः **पालकेन** सः । देवो **वह्निकुमारो**ऽभूत् कालाग्निरिव तत्क्षये ॥३६४॥
**पुरन्दरयशो**दत्तरत्नकम्बलतन्तुजम् । तद्रजोहरणं [8]रक्तेनाऽक्तं [9]शकुनिकाऽहरत् ॥३६५॥
दोर्दण्डबुद्ध्या यत्नेन गृहीतमपि तत् ततः । पुरः **पुरन्दरयशो**देव्या दैवात् पपात च ॥३६६॥
विदाञ्चकार सा भ्रातुर्महर्षेर्विपदं ततः । किमकार्षीः पाप! पापमित्याक्रोशच्च **दण्डकम्** ॥३६७॥
तां शोकमग्नामुद्धृत्याऽनैषीच्छासनदेवता । **मुनिसुव्रत**पादान्ते प्रव्रज्यामाददे च सा ॥३६८॥
**स्कन्दकाग्निकुमारो**ऽपि प्राग्जन्माऽवधिना विदन् । सपालकं सपूर्लोकमदहद् **दण्डकं** नृपम् ॥३६९॥
[10]तदादि **दण्डकारण्य**मिदं दारुणमुद्वसम् । **दण्डक**स्याऽभिधानेन बभूव भुवि विश्रुतम् ॥३७०॥
**दण्डको**ऽपि भवे भ्रान्त्वा [11]दुःखयोनिषु योनिषु। **गन्धाख्यो**ऽयमभूत् पक्षी महारोगी स्वकर्मभिः ॥३७१॥
अस्याऽस्मद्दर्शनाज्जातिस्मरणं समजायत । अस्मत्स्पर्शौषधीलब्ध्या रोगाश्च क्षयमासदन् ॥३७२॥
तच्छ्रुत्वा मुदितः पक्षी भूयोऽपि मुनिपादयोः । पपात धर्मं चाऽश्रौषीच्छ्रावकत्वं च शिश्रिये ॥३७३॥
जीवघात-[12]पलाहार-रात्रिभोजनकर्मणाम् । प्रत्याख्यानं ददौ तस्येप्सितं ज्ञात्वा महामुनिः ॥३७४॥
इत्यूचे च मुनी **रामं** साधर्मिक इहैष वः । साधर्मिके च वात्सल्यमुक्तं श्रेयस्करं जिनैः ॥३७५॥
बन्धु[13]र्न एष परम इत्युक्त्वा **राघवेण** [14]तौ । वन्दितौ नभसोत्पत्य मुनी जग्मतुरन्यतः ॥३७६॥
तं दिव्यं रथमारुह्य **जानकी-राम-लक्ष्मणाः** । विजहुः क्रीडयाऽन्यत्र [15]सहचारि**जटायवः** ॥३७७॥

---

१. *०व्यामिखानयत्* मु., पाता. ला. ॥ २. ***स्वस्वस्थाने*** रसंपा. ॥ ३. "सनेत्रः" इति ला.टि. ॥ ४. यन्त्रसमीपम् ॥ ५. परिवारेऽन्तिमो मुनिः शिशुः, तत्र ॥ ६. भक्तप्रत्याख्यानं कृत्वा ॥ ७. *तथाऽत्र कुल०* मु. खं.१-२, पाता. ला.; "तथा तत्कुल०" इति तु रसंपा. ॥ ८. रक्तेन व्याप्तम् ॥ ९. चिल्ली(समडी) ॥ १०. ततः प्रभृति ॥ ११. ***दुःखखानिषु*** मु. ॥ १२. मांसाहार ॥ १३. नः-अस्माकम् ॥ १४. *तु* रसंपा. ॥ १५. सहचारी जटायुर्येषाम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶इतः **पाताललङ्कायां खर-चन्द्रणखा**त्मजौ। **शम्बूक-सुन्दन**मानावभूतां नवयौवनौ ॥३७८॥
पितृभ्यां वार्यमाणोऽपि **दण्डकारण्य**मन्यदा। **शम्बूकः सूर्यहासा**सिसाधनार्थमुपेयिवान् ॥३७९॥
सोऽथ **क्रौञ्चरवा**तीरे स्थित्वा[1]ऽन्तर्वंशगह्वरम्। वारयिष्यति मां यस्तं हनिष्यामीत्यवोचत ॥३८०॥
एकान्नभुग् विशुद्धात्मा ब्रह्मचारी जितेन्द्रियः। अधोमुखो वटशाखानिबद्धचरणद्वयः ॥३८१॥
विद्यां जपितुमारेभे **सूर्यहासा**सिसाधिनीम्। [2]सप्ताहाग्रद्वादशाब्द्या या सिद्धिमुपगच्छति ॥३८२॥
एवं च तस्थुषस्तस्य [3]वल्गुलीस्थानकस्पृशः। वर्षाणि द्वादशाऽतीयुश्चत्वारि दिवसानि च ॥३८३॥
सेद्धुकामः **सूर्यहासः** [4]प्रत्याकारतिरोहितः। स्फूर्जत्परिमलो व्योम्ना तत्राऽऽगाद् वंशगह्वरे ॥३८४॥
क्रीडयेतस्ततो भ्राम्यंस्तत्र **सौमित्रि**रराययौ। ददर्श [5]**सूर्यहासं** च सूर्यस्येव [6]करोत्करम् ॥३८५॥
तं खड्गमाददे सोऽथ प्रत्याकाराच्चकर्ष च। अपूर्वशस्त्रालोके हि क्षत्रियाणां कुतूहलम् ॥३८६॥
तत्तीक्ष्णत्वपरीक्षार्थं तत्क्षणं तेन **लक्ष्मणः**। अभ्यर्णस्थां वंशजालीं [7]नललावं लुलाव च ॥३८७॥
वंशजालान्तरस्थस्य **शम्बूक**स्याऽथ कर्तितम्। भूतले मौलि[8]कमलं सोऽपश्यत् पतितं पुरः ॥३८८॥
प्रविवेशाऽग्रतो यावत् **सौमित्रि**र्वंशगह्वरम्। तावत् [9]कबन्धमैक्षिष्ट वटशाखावलम्बिनम् ॥३८९॥
अयुध्यमानोऽशस्त्रश्च पुमान् कोऽपि हतो मया। अमुना कर्मणा धिङ्मामित्यात्मानं निनिन्द सः ॥३९०॥
गत्वा च **रामभद्रा**य तदशेषं शशंस सः। असिं च दर्शयामास **रामो**ऽप्येवमभाषत ॥३९१॥
असावसिः **सूर्यहासः** साधकोऽस्य त्वया हतः। अस्य सम्भाव्यते नूनं कश्चिदुत्तरसाधकः ॥३९२॥
¶अत्राऽन्तरे **दशग्रीव**स्वसा **चन्द्रणखा**भिधा। मत्सूनोः **सूर्यहासो**ऽद्य सेत्स्यतीति कृतत्वरा ॥३९३॥
पूजापानान्नसहिता तत्र प्रमुदिता ययौ। ददर्श च शिरः सूनोश्छिन्नं लुलितकुण्डलम् ॥३९४॥युग्मम्॥
क्वाऽसि हा वत्स! **शम्बूक! शम्बूके**ति रुदत्यथ। अपश्य**ल्लक्ष्मण**स्यांऽह्रिन्यासपङ्क्तिं मनोहराम् ॥३९५॥
मम सूनुर्हतो येन तस्येयं पदपद्धतिः। इति तत्पदपद्धत्या द्रुतं **चन्द्रणखा** ययौ ॥३९६॥
यावत् किञ्चिदगात् तावत् **ससीता-लक्ष्मणं** पुरः। नेत्राभिरामं **रामं** साऽपश्यत् तरुतले स्थितम् ॥३९७॥
निरीक्ष्य **रामं** सा सद्यो [10]रिरंसाविवशाऽभवत्। कामावेशः कामिनीनां [11]शोकोद्रेकेऽपि कोऽप्यहो! ॥३९८॥
कन्यारूपं विकृत्याऽथ नागकन्यासहोदरम्। सा [12]मन्मथार्त्ता **काकुत्स्थ**मुपतस्थे [13]सवेपथुः ॥३९९॥
बभाषे **रामभद्र**स्तां भद्रे! कुत इहाऽऽगमः। दारुणे **दण्डकारण्ये** कृतान्तैकनिकेतने? ॥४००॥
साऽप्यूचेऽ**वन्तिराज**स्य कन्याऽहं [14]भवनोपरि। सुप्ता हृताऽस्मि केनाऽपि खेचरेण [15]क्षपान्तरे ॥४०१॥
इहाऽरण्ये समायातो दृष्टः सोऽन्येन केनचित्। विद्याधरकुमारेण जगदे चेति [16]सासिना ॥४०२॥
स्त्रीरत्नमपहृत्येदं [17]चिल्लो हारलतामिव। क्व गमिष्यसि रे पाप! मृत्युस्तेऽहमुपस्थितः ॥४०३॥
इत्युक्तः सोऽत्र मां मुक्त्वा तेनाऽ[18]स्यसि चिरं व्यधात्। उभावपि विपेदाते मत्तौ वनगजाविव ॥४०४॥
एकाकिनी [19]कान्दिशीका भ्राम्यन्त्यहमितस्ततः। प्राप्ता त्वां पुण्ययोगेन च्छायाद्रुमिव जङ्गले ॥४०५॥
तन्मां परिणय स्वामिन्! कुमारीं कुलसम्भवाम्। महत्सु जायते जातु न वृथा प्रार्थनाऽर्थिनाम् ॥४०६॥
ध्रुवं मायाविनी काचिन्नटवद् वेषधारिणी। कूटनाटकमुत्पाद्याऽऽगाद् वञ्चयितुमत्र नः ॥४०७॥
चिन्तयन्ताविति चिरं बुद्धिसंवादिनौ मुखम्। अन्योऽन्यमीक्षाञ्चक्राते [20]स्मेराक्षौ **राम-लक्ष्मणौ** ॥४०८॥युग्मम्॥
अथ **रामः** स्मितज्योत्स्नापूरस्तबकिताधरः। तामित्यूचे सभार्योऽहमभार्यं भज **लक्ष्मण**म् ॥४०९॥
तयाऽर्थितस्तथैवैत्य **लक्ष्मणो**ऽप्येवमब्रवीत्। आर्यं [21]गता त्वमार्येव तदलं वार्तयाऽनया ॥४१०॥
¶सा याच्ञाखण्डनात् पुत्रवधाच्च रुषिताऽधिकम्। आख्यद् गत्वा **खरा**दीनां तत्कृतं तनयक्षयम् ॥४११॥

१. वंशजालमध्ये स्थित्वा ॥ २. १२वर्ष-७दिन-पर्यन्ते ॥ ३. वल्गुली-'वागोळ'-निशाचरपक्षिप्रकारः, तत्स्थानकं स्पृशति-तस्य ॥ ४. प्रत्याकारं कोशः, 'म्यान' इति भाषायाम् ॥ ५. ***सूर्यहासासिं*** मु. ॥ ६. किरणसमूहम् ॥ ७. नलः-घासविशेषः, तं यथा लुनाति तथा; ***नाललावं*** मु. ॥ ८. शीर्षम् ॥ ९. मस्तकरहितं देहम् ॥ १०. रिरंसा-रतिक्रीडेच्छा, तया परवशा ॥ ११. "शोकस्याऽऽधिक्येऽपि" इति ला.टि. ॥ १२. कामार्त्ता ॥ १३. सकम्पा ॥ १४. ***सदनोपरि*** रसंपा. ॥ १५. रात्रौ ॥ १६. सखड्गेन ॥ १७. "पक्षी" इति ला.टि.; समळी इति भाषा ॥ १८. ***मुक्त्वा खड्गाखड्गि चिरं*** हे., ***०तेनाऽऽजिं सुचिरं*** मु.; "खड्गाखड्गि" इति ला.टि. ॥ १९. भयद्रुता ॥ २०. विस्फारितनेत्रौ ॥ २१. ***गत्वा*** पाता. ॥

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

विद्याधरसहस्रैस्ते चतुर्दशभिरावृताः । ततोऽभ्येयुरुपद्रोतुं **रामं** शैलमिव द्विपाः ॥४१२॥
किमार्यः सत्यपि मयि योत्स्यते स्वयमीदृशैः ? । इति **राम**मथाचिष्ट तेषां युद्धाय **लक्ष्मणः** ॥४१३॥
गच्छ वत्स! जयाय त्वं यदि ते सङ्कटं भवेत् । सिंहनादं ममाऽऽहूत्यै कुर्या इत्यन्वशात् स तम् ॥४१४॥
**रामा**ज्ञां प्रतिपद्योच्चै**र्लक्ष्मणो**ऽथ [१]धनुःसखा । गत्वा प्रववृते हन्तुं स तांस्ता[२]र्क्ष्य इवोरगान् ॥४१५॥
प्रवर्धमाने तद्युद्धे स्वभर्तुः [३]पार्ष्णिवृद्धये । गत्वा त्वरितमित्यूचे **रावणं रावण**स्वसा ॥४१६॥
आयातौ **दण्डकारण्ये** मनुष्यौ **राम-लक्ष्मणौ** । [४]अनात्मज्ञौ निन्यतुस्ते [५]जामेयं यमगोचरम् ॥४१७॥
श्रुत्वा स्वसृपतिस्ते तु सानुजः सबलो ययौ । तत्र **सौमित्रि**णा सार्धं युध्यमानोऽस्ति सम्प्रति ॥४१८॥
कनिष्ठभ्रातृवीर्येण स्ववीर्येण च गर्वितः । [६]परतोऽस्ति स्थितो **रामो** विलसन् **सीत**या सह ॥४१९॥
**सीता** च रूपलावण्यश्रिया सीमेव योषिताम् । न देवी नोरगी नाऽपि [७]मानुष्यन्यैव काऽपि सा ॥४२०॥
तस्या दासीकृताशेषसुरासुरवधूजनम् । त्रैलोक्येऽप्यप्रति[८]च्छन्दं रूपं वाचामगोचरम् ॥४२१॥
[९]आसमुद्रममुद्राज्ञ! यानि कान्यपि भूतले । तवैवाऽर्हन्ति रत्नानि तानि सर्वाणि बान्धव! ॥४२२॥
दृशामनिमिषीकारकारणं रूपसम्पदा । स्त्रीरत्नमेतद् गृह्णीया न चेत् तन्नाऽसि **रावणः** ॥४२३॥
आरुह्य **पुष्पक**मथाऽऽदिदेश **दशकन्धरः** । विमानराज! त्वरितं याहि यत्राऽस्ति **जानकी** ॥४२४॥
ययौ चाऽत्यन्तवेगेन विमानमनु**जानकि** । स्पर्धयेव **दशग्रीव**मनसस्तत्र गच्छतः ॥४२५॥
दृष्ट्वाऽपि **रामा**दत्युग्रतेजसो **दशकन्धरः** । बिभाय दूरे तस्थौ च व्याघ्रो [१०]हुतवहादिव ॥४२६॥
इति चाऽचिन्तयदितः कष्टं **रामो** [११]दुरासदः । इतश्च **सीता**हरणं इतो व्याघ्र इतस्तटी ॥४२७॥
विमृश्य च ततो विद्यामस्मार्षी**दवलोकनीम्** । उपतस्थे च सा मङ्क्षु किङ्करीव कृताञ्जलिः ॥४२८॥
ततश्चाऽऽज्ञापयामास तत्कालं तां **दशाननः** । कुरु साहाय्य[१२]मह्नाय मम **सीतां** हरिष्यतः ॥४२९॥
साऽवोचद् वासुकेर्मौलिरत्नमादीयते सुखम् । न तु **राम**समीपस्था **सीता** दे[१३]वासुरैरपि ॥४३०॥
उपायः किन्त्वसावस्ति यायाद् येनै[१४]ष **लक्ष्मण**म् । [१५]तस्यैव सिंहनादेन सङ्केतो ह्यनयोरयम् ॥४३१॥
एवं कुर्विति तेनोक्ता व्रजित्वा परतस्ततः । सा साक्षादिव **सौमित्रिः** सिंहनादं विनिर्ममे ॥४३२॥
सिंहनादं च तं श्रुत्वा **रामो** दध्यौ ससम्भ्रमः । जगत्यप्रतिमल्लो मे हस्तिमल्ल इवाऽनुजः ॥४३३॥
तं न पश्यामि **सौमित्रि**र्येन [१६]प्राप्नोति सङ्कटम् । तस्य सङ्कटसङ्केत[१७]क्ष्वेडा त्वत्र निशम्यते ॥४३४॥
एवं वितर्कव्यग्रोऽभूद् यावद् **रामो** महामनाः । **सीता लक्ष्मण**वात्सल्यात् तावदेवमवोचत ॥४३५॥
आर्यपुत्र! किमद्याऽपि वत्से सङ्कटमागते । विलम्बसे ? द्रुतं गत्वा त्रायस्व ननु **लक्ष्मणम्** ॥४३६॥
इत्यादि **सीता**वचनैः सिंहनादेन चेरि[१८]तैः । जगाम त्वरितं **रामो**ऽशकुनान्यपमानयन् ॥४३७॥
¶अथोत्तीर्य **दशग्रीवो** विमाने **पुष्पका**भिधे । आरोपयितुमारेभे रुदन्तीं **जनका**त्मजाम् ॥४३८॥
स्वामिन्येषोऽस्मि मा भैषीस्तिष्ठ तिष्ठ निशाचर! । रोषादिति वदन् दूरा**ज्जटायु**स्तमधावत ॥४३९॥
स [१९]त्रोटिनखकोटीभिर्नि[२०]शाताभिर्महाखगः । चकर्ष **रावण**स्योरः [२१]सीरैः कृषिमहीमिव ॥४४०॥
ततः क्रुद्धो **दशग्रीवः** खड्गमा[२२]कृष्य दारुणम् । पक्षौ छित्त्वाऽपातयत् तं [२३]पतङ्गं पृथिवीतले ॥४४१॥
निःशङ्कोऽथ **दशग्रीवः सीता**मारोप्य **पुष्पके** । चचाल नभसा [२४]तूर्णं पूर्णप्रायमनोरथः ॥४४२॥
हा नाथ! विद्वि[२५]षन्माथ! **राम!** हा वत्स! **लक्ष्मण!** । हा तातपादा! हा भ्रात**र्भामण्डल!** महाभुज! ॥४४३॥
**सीता** वो ह्रियतेऽनेन काकेनेव बलिश्छलात् । एवं **सीता** रुरोदोच्चै रोदयन्तीव रो[२६]दसीम् ॥४४४॥

---

१. ***धनुःसखः*** मु., खं.१-ला., हे. कां.प्रभृतिषु च; धनुःसहायः ॥ २. गरुडः ॥ ३. "चमूपुष्टिपुष्टये" इति ला.टि.; पार्ष्णिः सेनापृष्ठभाग इत्यर्थः ॥ ४. अबुधौ ॥ ५. भगिनीपुत्रम् ॥ ६. युद्धभूमेर्दूरम् ॥ ७. ***मनुष्य०*** पात., ***मानुषी नैव*** ला. रसंपा. ॥ ८. अनुपमम् ॥ ९. ***आसमुद्रसमु०*** मु.; "अस्खलिताज्ञ" इति ला. टि. ॥ १०. अग्नेरिव ॥ ११. दुष्प्रापः, तत्समीपं गन्तुं दुष्करमित्याशयः ॥ १२. झटिति ॥ १३. ***देवी सुरै०*** पाता. ॥ १४. येन-उपायेन एष रामः लक्ष्मणं-लक्ष्मणसमीपं गच्छेत् ॥ १५. लक्ष्मणस्यैव ॥ १६. ***प्राप्येत*** रसंपा. ॥ १७. "सिंहनादः" ला.टि. ॥ १८. ***प्रेरितः*** खं.१ ॥ १९. "चञ्चुः" ला.टि. ॥ २०. ***०निशिता०*** मु. खं.२, हे. कां.प्रभृतिषु ॥ २१. हलैः ॥ २२. ***०मारोप्य*** मु. ॥ २३. पक्षिणम् ॥ २४. त्वरितम् ॥ २५. विद्विषतः-शत्रून् मथ्नाति ॥ २६. ***रोदसी*** ता.; स्वर्ग-पृथिव्यौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶श्रुत्वा तद् रुदितं **रत्नजट्यर्कजटि**नन्दनः। खेचरो विममर्शैवं नूनं **राम**स्य पत्न्यसौ ॥४४५॥
समुद्रोपरि शब्दोऽयं श्रूयते येन तेन तु। ह्रियते **रावणे**नेयं छलितौ **राम-लक्ष्मणौ** ॥४४६॥
प्रभो**र्भामण्डल**स्याऽद्योपकरोमीति जातधीः। दधावे खड्गमाकृष्य **दशकन्धर**माक्षिपन् ॥४४७॥
युद्धायाऽऽह्वयमानं तं हसित्[1]वेषद् **दशाननः**। सद्यो जहार तद्विद्यां विद्यासामर्थ्यतोऽखिलाम् ॥४४८॥
नि[2]कृत्तपक्षः पक्षीव हृतविद्यः पपात सः। **कम्बुद्वीपे कम्बुशैल**मारुह्य समवास्थितः ॥४४९॥
**रावणो**ऽपि विमानस्थो गच्छन् व्योम्नाऽर्णवोपरि। इति सानुनयं प्रोचे **मैथिलीं** मन्मथातुरः ॥४५०॥
नभश्चर-क्ष्माचराणां भर्तुर्मे महिषीपदम्। प्राप्ताऽसि रोदिषि कथं ? हर्षस्थाने कृतं [3]शुचा ॥४५१॥
मन्दभाग्येन **रामे**ण सह त्वां योजयन् विधिः। नाऽनुरूपं पुरा चक्रे मयाऽकार्यधुनोचितम् ॥४५२॥
मां पतिं देवि! मन्यस्व सेवया दाससन्निभम्। मयि दासे तव दासाः खेचर्यः खेचरा अपि ॥४५३॥
ब्रुवाणे **रावणे** त्वेवं **सीता** तस्थावधोमुखी। स्मरन्ती मन्त्रवद् भक्त्या **राम** इत्यक्षरद्वयम् ॥४५४॥
**जानकी**पादयोर्मूर्ध्ना स पपात स्मरातुरः। साऽप्यपासारयत् पादौ [4]परपुंस्पर्शकातरा ॥४५५॥
आचुक्रोश च **सीतै**वं निर[5]नुक्रोश! निस्त्रप!। अचिराल्लप्स्यसे मृत्युं परस्त्रीकामनाफलम् ॥४५६॥
तदानीं सम्मुखा एयुर्मन्त्रिणः **सारणा**दयः। अन्ये च रक्षःसामन्ताः समन्ताद् राक्षसप्रभोः ॥४५७॥
महोत्सवां महोत्साहो महासाहसकृत् पुरीम्। आगमद् **रावणो लङ्का**मल[6]ङ्कर्मीणविक्रमः ॥४५८॥
न यावद् **राम-सौमित्रि**क्षेमोदन्तसमागमः। भोक्ष्ये न तावदित्युच्चैः **सीता**ऽभिग्रहमाददे ॥४५९॥

**लङ्का**पूर्वदिशि स्थिते सुरवरोद्यानोपमे खेचर-
स्त्रीणां वि[7]भ्रमधाम्नि **देवरमणो**द्याने स्वयं **जानकीम्**।
रक्ताशोकतरोस्तले **त्रिजटया** चाऽऽरक्षकै[8]रावृतां
मुक्त्वाऽगाद् **दशकन्धरः** प्रमुदितः स्वं धाम धा[9]म्नां निधिः ॥४६०॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
[10]सप्तमपर्वणि **सीता**हरणो नाम पञ्चमःसर्गः॥

---

१. ***हसित्वैष*** मु.॥ २. निकृत्तौ-छिन्नौ पक्षौ यस्य सः॥ ३. शोकेन॥ ४. परपुरुषस्पर्शभीता॥ ५. "निःशूक! निर्लज्ज!" इति ला.टि.॥ ६. कर्मक्षमपराक्रमः॥ ७. "विलास" इति ला.टि.॥ ८. ***श्चाऽऽवृतां*** ता.॥ ९. "तेजसां" इति ला.टि.॥ १०. ***सप्तमे*** पाता. ला. रसंपा.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥षष्ठः सर्गः॥

इतश्च **रामः** सम्प्राप्तस्त्वरितं तत्र चापभृत् । [१]अमित्रैः सह **सौमित्रि**र्यत्राऽभूद् रणकेलिकृत् ॥१॥
आयान्तं **राम**मालोक्य **सौमित्रि**रिदमब्रवीत् । आर्यामेकाकिनीं मुक्त्वा किमार्येह त्वमागमः ? ॥२॥
आहूतः सिंहनादेन तव [२]वैधुर्यलक्ष्मणा । **लक्ष्मणा**ऽहमिहाऽऽयातो व्याजहारेति **राघवः** ॥३॥
**लक्ष्मणो**ऽप्यवदत् सिंहनादोऽकारि मया न हि । श्रुतश्चाऽऽर्येण तन्नूनं वयं केनाऽपि वञ्चिताः ॥४॥
[३]अपनेतुं सत्यमार्याम[४]पनीतोऽस्त्युपायतः । सिंहनादस्य करणे शङ्के स्तोकं न कारणम् ॥५॥
तद् गच्छ शीघ्रमेवाऽऽर्य! त्रातुमार्यां महाभुज! । हत्वाऽरीनहमप्येष यावदायामि पृष्ठतः ॥६॥
इत्युक्तो **रामभद्रो**ऽगात् स्वस्थानं तत्र **जानकीम्** । नाऽपश्यच्च महीपृष्ठे मूर्च्छितो निपपात च ॥७॥
लब्धसञ्ज्ञः समुत्थाय तं मूमुर्षुं [५]**जटायुषम्** । ईक्षाञ्चक्रे **रामभद्रो** दध्याविति च तीक्ष्णधीः ॥८॥
केनाऽपि दयिता नूनं जह्रे च्छलपरेण मे । तेनाऽपहारक्रुद्धोऽयं महात्मा निहतः खगः ॥९॥
ततः प्रत्युपकाराय श्रावकस्य [६]**जटायुषः** । ददौ **रामो** नमस्कारं परलो[७]काध्वशम्बलम् ॥१०॥
स विपद्याऽभवत् कल्पे **माहेन्द्रे** प्रवरः सुरः । **रामो**ऽपि **सीता**मन्वेष्टुमाटाऽटव्यामितस्ततः ॥११॥
¶इतश्च **लक्ष्मणो** वीरः **खरे**ण प्रा[८]ज्यपत्तिना । योद्धुं प्रावर्ततैकोऽपि न सिंहस्य सखा युधि ॥१२॥
अत्राऽन्तरे च **त्रिशिराः खर**स्याऽ[९]वरजो भटः । को नामाऽस्मिंस्तवाऽऽक्षे[१०]पं इति ज्येष्ठं न्यवारयत् ॥१३॥
अथो रथस्थं **त्रिशिरो** राक्षसं समरोद्यतम् । जघान **रामा**वरजो गणयंस्तं [११]पतङ्गवत् ॥१४॥
¶तदा **पातालल‍ङ्के**शचन्द्रोदरनृपात्मजः । **विराधः** सर्वसन्ना[१२]हिसैन्यस्तत्र समाययौ ॥१५॥
आरि[१३]राधयिषुर्नत्वा **विराधो राम**सोदरम् । इत्यूचे तव भृत्योऽहमेतेषां त्वद्द्विषां द्विषन् ॥१६॥
[१४]**चन्द्रोदरा**ख्यं निर्वास्य पितरं मे महाभुज! । **पाताललङ्कां** जगृहुरमी **रावण**पत्तयः ॥१७॥
कः सखांऽ[१५]शोस्तमोध्वंसे ? द्विष[१६]द्विदलने च ते ? । तथाऽपि भृत्यले[१७]शत्वाद् रणायाऽऽदिश मां प्रभो! ॥१८॥
स्मित्वा च **लक्ष्मणो**ऽवोचद्धन्यमानान्मया द्विषः । पश्याऽमून् विजयो ह्यन्यसाहाय्याद् दोष्मतां ह्रिये ॥१९॥
अद्यप्रभृति ते स्वामी ज्येष्ठो मम र[१८]**घूद्वहः** । **पाताललङ्का**रा[१९]ज्ये च स्थापितोऽसि मयाऽद्य भोः! ॥२०॥
विरोधिनं **विराधं** स्वं तं दृष्ट्वा **लक्ष्मणा**न्तिके । क्रुद्धोऽधिकं **खरो**ऽभ्येत्याऽधिज्यधन्वैवमब्रवीत् ॥२१॥
तनयो मम **शम्बूकः** क्वाऽस्ते विश्वस्तघातक! ? । **विराधे**न वराकेण [२०]सख्या किं रक्ष्यसेऽधुना ? ॥२२॥
स्मित्वा चोवाच **सौमित्रिस्त्रिशिरा** अपि तेऽनुजः । भ्रातुः पुत्रस्य सोत्कण्ठस्तमनु प्रेषितो मया ॥२३॥
पुत्रे भ्रातरि चोत्कण्ठा चेत् तवाऽपि बलीयसी । नेतुं त्वामपि तत्राऽस्मि [२१]सज्जः [२२]सज्यधनुर्ननु ॥२४॥
मया प्रमादघातेन पादन्यासेन कुन्थुवत् । तव सूनुर्हतो मूढ! तत्र मे पौरुषं न हि ॥२५॥
अधुना त्वं भटम्मन्यश्चेत् पूरयसि कौतुकम् । त्वया प्रीणामि की[२३]नाशं वनवासेऽपि [२४]सत्र्यहम् ॥२६॥
इत्युक्तवति **सौमित्रा**वमित्रो राक्षसः **खरः** । [२५]खरं प्रहर्तुमारेभे दन्तीव गिरिसानुनि ॥२७॥
**लक्ष्मणो**ऽपि क्षणेनाऽपि [२६]कङ्कपत्रैः सहस्रशः । अम्बरं ति[२७]रयामास भ[२८]र्नुभिर्भानुमानिव ॥२८॥
भयङ्करः खेचराणां गरीयान् सङ्गरस्तयोः । अजायत श्रा[२९]द्धदेव[३०]दैवतैकमहोत्सवः ॥२९॥

---

१. शत्रुभिः ॥ २. वैकल्यचिह्नेन ॥ ३. ***अपहर्तुं*** मु. पाता. ॥ ४. दूरं नीतः ॥ ५. ***मुमूर्षुजटा०*** हे. ॥ ६. ***महात्मनः*** खं.२ ॥ ७. परलोकमार्गपाथेयम् ॥ ८. प्राज्याः-बहवः पत्तयः-सैनिकाः यस्य सः, तेन ॥ ९. लघुभ्राता ॥ १०. आक्षेपः-आक्रमणं युद्धोत्साहो वा ॥ ११. पक्षीव ॥ १२. सुसज्जसर्वसैन्यवान् ॥ १३. आराधयितुमिच्छुः ॥ १४. ***हत्वा चन्द्रोदरं नाम*** खं.२, पाता. ॥ १५. "सूर्यस्य" इति ला.टि. ॥ १६. शत्रुक्षयकरणे ॥ १७. ***०लेश्यत्वा०*** ता. ॥ १८. रघुवंशजः ॥ १९. ***०राज्येऽपि*** ला. ॥ २०. मित्रेण ॥ २१. ***सद्यः*** मु. कां.; ***रक्षः!*** खं.२ ॥ २२. ज्यया-प्रत्यञ्चया सहितं सज्यं धनुर्यस्य सः ॥ २३. यमम् ॥ २४. ***सत्यहम्*** खं.२, पाता.; "सत्रागारी" इति ला.टि., गृहपतिरित्यर्थः ॥ २५. तीक्ष्णम् ॥ २६. बाणैः ॥ २७. छादयामास ॥ २८. किरणैः ॥ २९. श्राद्धदेवो यमः, स एव दैवतं, तस्य महोत्सवः ॥ ३०. ***०देवतैक०*** खं.१, पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]विष्णुनाऽपि रणे यस्य शक्तिरीदृक् **खरः** स हि। [2]प्रतिविष्णोरप्यधिको व्योमन्येवं गिरोऽभवन् ॥३०॥
कालक्षेपो वधेऽस्याऽपीत्यमर्षाल्लज्जितः स्वयम्। **सौमित्रिः खर**मूर्धानं [3]क्षुरप्रेणाऽच्छिदत् क्षणात् ॥३१॥
**दूषणो लक्ष्मणे**नाऽपि ससैन्यो योद्धुमुद्यतः। सञ्जह्ने कुञ्जर इव सयूथो दववह्निना ॥३२॥
¶ततः सार्धं **विराधेन** ववले **राम**सोदरः। [4]स्फुरद्वामेक्षणः काममाशंसन्नार्ययोः[5] शुभम् ॥३३॥
गत्वा दूरमपश्यच्च **रामभद्रं** [6]द्रुमान्तरे। **सीता**विरहितं दृष्ट्वा विषादं[7] परमं ययौ ॥३४॥
पुरःस्थमपि **सौमित्रि**मपश्यन् **रघुपुङ्गवः**[8]। **सीता**विरहशल्येन पीडितः [9]खेऽब्रवीदिति ॥३५॥
वनं भ्रान्तमिदं तावन्मया दृष्टा न **जानकी**। युष्माभिः किं न सा दृष्टा ? ब्रूत हे वनदेवताः! ॥३६॥
अमुष्मिन् भीषणेऽरण्ये भूत-श्वापदसङ्कुले। विमुच्यैकाकिनीं **सीतां लक्ष्मणाय** [10]गतोऽस्म्यहम् ॥३७॥
रक्षोभटसहस्राग्रे [11]संयत्येकं च **लक्ष्मणम्**। [12]मुक्त्वा भूयोऽहमत्राऽऽगामहो! धीर्मम दुर्धियः ॥३८॥
हा **सीते!** निर्जनेऽरण्ये कथं मुक्ता मया प्रिये! ?। हा वत्स! **लक्ष्मण!** कथं मुक्तोऽसि रणसङ्कटे ? ॥३९॥
एवं ब्रुवन् **रामभद्रो** मूर्च्छया न्यपतत् क्षितौ। क्रन्दद्भिः पक्षिभिरपि वीक्ष्यमाणो महाभुजः ॥४०॥
**लक्ष्मणो**ऽप्यब्रवीदेवमार्या[13]ऽऽर्य! किमिदं ननु ?। तवाऽयं **लक्ष्मणो** भ्राता जित्वाऽरीन् [14]समुपस्थितः ॥४१॥
पीयूषेणेव संसिक्तो **रामभद्र**स्तया गिरा। लब्धसञ्ज्ञो ददर्शाऽग्रे [15]सस्वजे च निजानुजम् ॥४२॥
उदश्रुरूचे **सौमित्रिः** सिंहनादस्य कारणम्। **जानकी**हरणमिदं ध्रुवं कस्याऽपि मायिनः ॥४३॥
तस्य प्राणैः सहैवाऽहमाहरिष्यामि **जानकीम्**। तत्प्रवृत्त्युपलम्भाय सम्प्रति प्रयतामहे ॥४४॥
¶**पातालल**ङ्का**राज्ये** च स्थाप्यतामेष पैतृके। **विराधः** [16]प्रतिपन्नं हि मयाऽमुष्मै [17]**खरा**हवे ॥४५॥
**सीता**प्रवृत्तिमानेतुं विद्याधरभटानथ। [18]प्रजिघाय **विराध**स्तावारिराधयिषुः प्रभू ॥४६॥
**काकुत्स्थौ** तस्थतुस्तत्र शोकानल[19]करालितौ। मुहुर्मुहुर्निःश्वसन्तौ निर्दशन्तौ क्रुधाऽधरम् ॥४७॥
दूरं विद्याधराः भ्रान्त्वा **विराध**प्रहिताश्च ते। **सीता**प्रवृत्तिं न प्रापुस्तत्रैत्याऽस्थुरधोमुखाः ॥४८॥
तेषामधोमुखत्वेन ज्ञात्वा **रामो**ऽब्रवीदिति। स्वामिकार्ये यथाशक्ति साधु युष्माभिरुद्यतम् ॥४९॥
**सीता**प्रवृत्तिर्न प्राप्ता को दोषस्तत्र वो भटाः! ?। दैवस्य विपरीतस्य के यूयं कोऽपरोऽथवा ? ॥५०॥
नत्वा **विराधो**ऽप्यवदन्मा निर्वेदं कृथाः प्रभो!। अनिर्वेदः श्रियो मूलं तव भृत्योऽस्मि नन्वहम् ॥५१॥
एहि **पातालल**ङ्का**यां** निवेशयितुमद्य माम्। **सीता**प्रवृत्तिः सुलभा तत्र भर्तुर्भविष्यति ॥५२॥
**विराधे**न ससैन्येन ततो **रामः सलक्ष्मणः**। ययौ **पातालल**ङ्का**याः** पुर्याः परिसरावनौ ॥५३॥
¶तत्राऽरिसूदनः **सुन्दो** नाम रक्षः **खरा**त्मजः। सम्मुखीनो रणायाऽऽगान्महासैन्यसमावृतः ॥५४॥
पुरोगेण **विराधे**न समं पूर्वविरोधिना। **सुन्द**श्चक्रे रणं घोरं सद्यः पितृवधक्रुधा ॥५५॥
अथो रणस्थे **काकुत्स्थे सुन्दश्चन्द्रणखा**गिरा। सद्यः प्रणश्य **लङ्कायां रावणं** शरणं ययौ ॥५६॥
ततः **पातालल**ङ्का**यां** प्रविश्य **रघुपुङ्गवौ**। निवेशयामासतुस्तं **विराधं** पैतृके पदे ॥५७॥
प्रासादे **खर**राजस्य तस्थतू **राम-लक्ष्मणौ**। युवराज इव पुन**र्विराधः सुन्द**वेश्मनि ॥५८॥
¶इतश्च **साहसगते**श्चिरं **तारा**भिलाषिणः। सिद्धा **प्रतारणी** विद्या **हिमवद्गिरि**कन्दरे ॥५९॥
तया **सुग्रीव**रूपः स कामरूप इवाऽमरः। जगाम **किष्किन्धपुरे** द्वितीयोऽर्क इवाऽम्बरे ॥६०॥
क्रीडार्थं बहिरुद्याने **सुग्रीवे** च गते तदा। स तदन्तःपुरमगात् **तारादेवी**वि[20]भूषितम् ॥६१॥
आगाच्च सत्य**सुग्रीवो** द्वारि च द्वारपालकैः। स्खलितोऽग्रे गतो राजा **सुग्रीव** इति वादिभिः ॥६२॥
**सुग्रीव**द्वितयं दृष्ट्वा सन्देहाद् **वालिनन्दनः**। [21]शुद्धान्तविप्लवं त्रातुं तद्द्वारं त्वरितं ययौ ॥६३॥
शुद्धान्ते विट**सुग्रीवः** प्रविशन् **वालि**सूनुना। मार्गाद्रिणा सरित्पूर इव प्रस्खलितस्ततः ॥६४॥

१. लक्ष्मणेन ॥ २. रावणात् ॥ ३. पर्शुना ॥ ४. स्फुरद् वामं ईक्षणं-नेत्रं यस्य सः ॥ ५. राम-सीतयोः ॥ ६. ***द्रुमान्तरे*** ता. ॥ ७. **च परं** ता. ॥ ८. ***रघुनन्दनः*** छा. पा. ॥ ९. आकाशे-आकाशाभिमुखं दृष्ट्वा ॥ १०. ***गतोऽस्मि हा!*** मु., खं.१-२ ॥ ११. ''सङ्ग्रामे'' इति ला.टि. ॥ १२. ***मुक्तधी(धै)र्योऽह०*** ला. ॥ १३. ***०मार्याय*** मु. ॥ १४. ***समुपा.*** मु. ॥ १५. आलिलिङ्ग ॥ १६. मया दातुं प्रतिज्ञातम् ॥ १७. खरसङ्ग्रामे ॥ १८. प्रेषितवान् ॥ १९. ***०परिप्लुतौ*** ता. ॥ २०. ***०[illegible]तम्*** मो. ॥ २१. अन्तःपुरोपद्रवम् ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

[1]अथाऽमिलन् सैनिकानामक्षौहिण्य[2]श्चतुर्दश । आहूतानि जगत्सारसर्वस्वानीव सर्वतः ॥६५॥
द्वयोरपि तयोर्भेदमजानन्तोऽथ सैनिकाः । सत्य**सुग्रीव**तोऽर्धेऽर्धे विट**सुग्रीव**तोऽभवन् ॥६६॥
ततः प्रववृते युद्धं सैन्ययोरुभयोरपि । कुन्तपातैर्दिवं कुर्वदुल्कापातमयीमिव ॥६७॥
युयुधे सादिना सा[3]दी निषा[4]दी च निषादिना । पदातिना पदातिश्च रथिको रथिकेन च ॥६८॥
चतुरङ्गचमूचक्रविमर्दादथ मेदिनी । अवाप कम्पं मुग्धेव प्रौढप्रियसमागमात् ॥६९॥
एह्येहि रे परगृहप्रवे[5]शश्वन्निति ब्रुवन् । विट**सुग्रीव**मुद्ग्रीवः **सुग्रीवो** योद्धुमाह्वत ॥७०॥
ततश्च विट**सुग्रीवो** मत्तेभ इव तर्जितः । ऊर्जितं गर्जितं कुर्वन् सम्मुखीनो युधेऽभवत् ॥७१॥
युयुधाते महायोधौ तौ क्रोधारुणलोचनौ । विदधानौ जगत्त्रासं कीनाशस्येव सोदरौ ॥७२॥
तौ निशातैर्नि[6]शातानि शस्त्रैः शस्त्राण्यथो मिथः । चिच्छिदाते तृणच्छेदं र[7]णच्छेकावुभावपि ॥७३॥
शस्त्रखण्डैरुच्छलद्भिर्दुद्रुवे खेचरीगणः । [8]महायुद्धे तयोर्वृक्ष[9]खण्डो महिषयोरिव ॥७४॥
तौ छिन्नास्त्रावथाऽन्योऽन्यममर्षणशिरोमणी । मल्लयुद्धेनाऽऽस्फलतां पर्वताविव जङ्गमौ ॥७५॥
उत्पतन्तौ क्षणाद् व्योम्नि निपतन्तौ क्षणाद् भुवि । ताम्रचूडाविवाऽभातां वीरचूडामणी उभौ ॥७६॥
तौ द्वावपि महाप्राणौ मिथो जेतुमनीश्वरौ । अपसृत्य च दूरेण वृषभाविव तस्थतुः ॥७७॥
¶साहाय्यकार्थं **सुग्रीवः** समाहूयाऽञ्जनासु[10]तम् । [11]भूयोऽपि युयुधे माया**सुग्रीवे**णोग्रकर्मणा ॥७८॥
**हनूमतः** पश्यतोऽपि द्वयोर्भेदमजानतः । कुट्टयामास **सुग्रीवं** विट**सुग्रीव** उत्कटः ॥७९॥
पुनर्युद्धेन **सुग्रीवः** खिन्नः खिन्न[12]तनुस्ततः । बहिर्निर्गत्य **किष्किन्धपुरा**दावासमग्रहीत् ॥८०॥
तत्रैव विट**सुग्रीव**स्तस्थावस्वस्थमानसः । अन्तःपुरप्रवेशं च न लेभे **वालिनन्दनात्** ॥८१॥
**सुग्रीवो** [13]न्यञ्चितग्रीवमथैवं पर्यचिन्तयत् । अहो! स्त्रीलम्पटः कूटपटुः कोऽप्येष नो द्विषन् ॥८२॥
आत्मीया अप्यनात्मीया द्विषन्मायावशीकृताः । अहो बभूवुस्तदसावव[14]स्कन्दो निजैर्हयैः ॥८३॥
मायापराक्रमोत्कृष्टः कथं वध्यो द्विषन्मया ? । धिग् मां पराक्रमभ्रष्टं **वालि**[15]नाम्नस्त्रपाकरम् ॥८४॥
धन्यो महाबलो **वाली** योऽखण्डपुरुषव्रतः । राज्यं तृणमिव त्यक्त्वा जगाम परमं पदम् ॥८५॥
**चन्द्ररश्मिः** कुमारो मे बलीयान् जगतोऽप्यसौ । किं तु द्वयोरभेदज्ञः कं रक्षतु निहन्तु कम् ? ॥८६॥
इदं [16]तु विदधे साधु साध्वहो **चन्द्ररश्मि**ना । तस्य पापीयसो रुद्धं शुद्धान्ते यत् प्रवेशनम् ॥८७॥
वधाय बलिनोऽमुष्य बलीयांसं श्रयामि कम् ? । यद् घात्या एव रिपवः स्वतोऽपि परतोऽपि वा ॥८८॥
भूर्भुवःस्वस्त्रयीवीरं मरुत्तमखभञ्जनम् । भजामि [17]विद्विषद्घातहेतवे किं **दशाननम्** ? ॥८९॥
असौ किं तु प्रकृत्या [18]स्त्रीलोलस्त्रैलोक्यकण्टकः । तं च मां च निहत्याऽऽशु **तारा**मादास्यते स्वयम् ॥९०॥
ईदृशे व्यसने प्राप्ते साहाय्यं कर्तुमीश्वरः । आसीत् **खरः** खरतरो **राघवेण** हतः स तु ॥९१॥
तावेव **राम-सौमित्री** गत्वा मित्रीकरोमि तत् । तत्कालोपनतस्याऽपि [19]यौ **विराधस्य** राज्यदौ ॥९२॥
तौ तु **पाताललङ्का**यामलङ्कर्मीणदोर्बलौ । **विराध**स्योपरोधेन तथैवाऽद्याऽपि तिष्ठतः ॥९३॥
एवं विमृश्य **सुग्रीवो**ऽनुशिष्य रहसि स्वयम् । **विराध**पुर्यां विश्वासा[20]स्पदं दूतं न्योयजयत् ॥९४॥
गत्वा **पाताललङ्कायां विराधाय** प्रणम्य सः । स्वामिव्यसनवृत्तान्तं कथयित्वाऽब्रवीदिदम् ॥९५॥
महति व्यसने स्वामी पतितो नस्तदीदृशे । **राघवौ** शरणीकर्तुं तव द्वारेण वाञ्छति ॥९६॥
द्रुतमायातु **सुग्रीवः** सतां सङ्गो हि पुण्यतः । तेनेत्युक्तो दूत एत्य **सुग्रीवाय** शशंस तत् ॥९७॥

---

१. ***अथाऽऽगच्छन्*** मो. ॥ २. हे.प्रतौ टिप्पण्यत्रैवं-
''पत्ती सेणा सेणामुहं च गुम्मं च वाहिणी चेव । पियणा चमू अणीगिणी दसगुणिआ अक्खोहिणी होइ ॥''
''नवसहस्स गयवरेहिं नवहिं लक्खेहिं रहवराणं च । नवकोडीहिं हयाणं नराण नवकोडिकोडीहिं ॥''
३. अश्वारोही ॥ ४. गजारोही ॥ ५. ***प्रवेशिन्निति तं ब्रु०*** मु.; ''श्वानः'' इति ला.टि.; हे परगृहप्रवेशे श्वन्-श्वान! इत्यर्थः ॥ ६. तीक्ष्णानि ॥ ७. रणदक्षौ ॥ ८. ***महायुधि*** ता. ॥ ९. वृक्षसमूहः ॥ १०. हनूमन्तम् ॥ ११. ***युयुधे च तदा सार्धं सुग्री०*** पाता. ॥ १२. ''प्रस्वेदितः'' इति ला.टि. ॥ १३. ''नम्रीकृतः'' इति ला.टि. ॥ १४. निजैरेवाऽश्वैर्निजस्यैव पीडनम् ॥ १५. वालिराजस्य नाम्नि लाञ्छनकरम् ॥ १६. ***च*** ता. ॥ १७. ***वा द्वि०*** पाता. ॥ १८. स्त्रीलम्पटः ॥ १९. ***तौ*** ला.विना ॥ २०. ***०सभूतं*** ला.विना ॥

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

प्रचचालाऽथ **सुग्रीवो**ऽश्वानां [१]ग्रैवेयकस्वनैः। दिशो मुखरयन् सर्वा वेगाद् [२]दूरमदूरयन् ॥९८।
**पाताललङ्कां** स प्राप क्षणेनाऽप्यु[३]पवेशमवत्। **विराध**मुपतस्थे चाऽभ्युत्तस्थौ सोऽपि तं मुदा ॥९९॥
**विराधो**ऽपि पुरोभूय **रामभद्राय** तायिने। तं नमस्कारयामास तद्दुःखं च व्यजिज्ञपत् ॥१००॥
**सुग्रीवो**ऽप्येवमूचेऽस्मिन् दुःखे त्वमसि मे [४]गतिः। [५]क्षुते हि सर्वथा [६]मूढे शरणं [७]तरणिः खलु ॥१०१॥
स्वयं दुःख्यपि [८]तद्दुःखच्छेदं **रामो**ऽभ्युपागमत्। स्वकार्यादधिको यत्नः परकार्ये महीयसाम् ॥१०२॥
**सीता**हरणवृत्तान्तं **विराधे**नाऽवबोधितः। **रामं** [९]विज्ञापयामास **सुग्रीवो**ऽथ कृताञ्जलिः ॥१०३॥
त्रायमाणस्य ते विश्वं तथा द्योतयतो रवेः। न काऽपि कारणापेक्षा देव! वच्मि तथाऽप्यदः ॥१०४॥
त्वत्प्रसादात् क्षतारिः सन् [१०]ससैन्योऽस्मि तवाऽनुगः। आनेष्यामि प्रवृत्तिं च **सीता**या नचिरादहम् ॥१०५॥
स**सुग्रीवः** प्रतस्थे च **किष्किन्धां** प्रति **राघवः**। **विराध**मनुगच्छन्तं सम्बोध्य विससर्ज च ॥१०६॥
**रामभद्रे**ऽथ **किष्किन्धा**पुरद्वारमधिष्ठिते। **सुग्रीवो** विट**सुग्रीव**माह्वास्त रणकर्मणे ॥१०७॥
निनदन् विट**सुग्रीवो**ऽप्यागादाह्वानमात्रतः। रणाय नाऽलसाः शूरा भोजनाय द्विजा इव ॥१०८॥
[११]दुर्धरैश्चरणन्यासैः कम्पयन्तौ वसुन्धराम्। तावुभावप्ययुध्येतां मत्ताविव वनद्विपौ ॥१०९॥
**रामः** सरूपौ तौ दृष्ट्वा कोऽस्मदीयः ? परश्च कः ?। इति संशयतस्तस्थावुदासीन इव क्षणम् ॥११०॥
भवत्वेवं तावदिति विमृशन् **रघुपुङ्गवः**। **वज्रावर्त्ता**भिधधनुष्टङ्कारमकरोत् ततः ॥१११॥
धनुष्टङ्कारतस्तस्मात् सा **साहसगतेः** क्षणात्। रूपान्तरकरी विद्या हरिणीव [१२]पलायत ॥११२॥
विमोह्य मायया सर्वं परदारै [१३]रिरंससे ?। पापाऽरोपय रे! चापमिति **राम**स्ततर्ज तम् ॥११३॥
एकेनाऽपीषुणा प्राणांस्तस्याऽहार्षीद् **रघूद्वहः**। न द्वितीया चपेटा हि [१४]हरेर्हरिणमारणे ॥११४॥
**विराध**मिव **सुग्रीवं रामो** राज्ये न्यवेशयत्। **सुग्रीवो**ऽपि स्वलोकेन प्राग्वदेवाऽनमस्यत ॥११५॥
त्रयोदश निजाः कन्या दातुमत्यन्तसुन्दरीः। **रामभद्र**मयाचिष्ट प्राञ्जलिर्वानरेश्वरः ॥११६॥
**रामो**ऽप्युवाच **[१५]सुग्रीव! सीता**न्वेषणकर्मणे। प्रयतस्व किमेताभिरपरेणाऽपि वस्तुना ॥११७॥
इत्युक्त्वा बहिरुद्याने गत्वा तस्थौ **रघूद्वहः**। **सुग्रीवो**ऽपि तदादेशात् प्रविवेश निजां पुरीम् ॥११८॥
¶इतश्च पुर्यां **लङ्का**यां **रावणा**न्तःपुरस्त्रियः। **खरा**दिहननोदन्तान्**मन्दोदर्या**दयोऽरुदन् ॥११९॥
[१६]रुदती सह **सुन्दे**न स्वसा **चन्द्रणखा**ऽपि च। प्राविशद् **रावण**गृहं पाणिभ्यां कुट्टयन्त्युरः ॥१२०॥
दृष्ट्वा च **रावणं** कण्ठे लगित्वोच्चतरस्वरम्। रुदती निजगादैवं दैवेन निहताऽस्मि हा! ॥१२१॥
हतः पुत्रो हतो भर्ता हतौ च मम देवरौ। चतुर्दश सहस्राणि हताश्च कुलपत्तयः ॥१२२॥
**पाताललङ्का** चाऽऽच्छिन्ना राजधानी त्वदर्पिता। दर्पवद्भिर्विद्विषद्भिर्बन्धो! जीवत्यपि त्वयि ॥१२३॥
[१७]जीवग्राहं प्रणश्याऽहं **सुन्दे**न सह सूनुना। त्वां शरण्यमिहाऽऽयाता कुत्र तिष्ठामि शाधि ? माम् ॥१२४॥
अबोधयद् **दशास्यो**ऽपि रुदतीं तां ससौष्ठवः। त्वद्भर्तृ-पुत्रहन्तारं हनिष्याम्यचिरादपि ॥१२५॥
शोकेन तेन **वैदेही**[१८]विप्रलम्भरुजाऽपि च। फालच्युत इव [१९]द्वीपी तल्पे तस्थौ निपत्य सः ॥१२६॥
¶अथ **मन्दोदरी** देवी तमुपेत्याऽभ्यधादिति। कथं [२०]प्राकृतवत् स्वामी निश्चेष्ट इव तिष्ठसि ? ॥१२७॥
**रावणो**ऽप्यब्रवीदेवं **वैदेही**विरहज्वरात्। न चेष्टितुं न वक्तुं च न चाऽऽलोकयितुं क्षमः ॥१२८॥
मया चेज्जीवता तेऽर्थस्तन्मानं [२१]प्रोज्झ्य मानिनि!। गत्वाऽनुनय **वैदेहीं** यथा मयि रिरंसते ॥१२९॥
नाऽन्यनारीमनिच्छन्तीं भुञ्जे जातुचिदप्यहम्। अर्गला नियमो ह्यत्र ममाऽस्ति गुरुसाक्षिकः ॥१३०॥
पीडिता पीडया पत्युः कुलीना साऽपि तत्क्षणम्। जगाम **देवरमणो**द्याने **सीता**मुवाच च ॥१३१॥
एषा **मन्दोदरी** नाम **दशानन**महिष्यहम्। [२२]प्रपत्स्ये त्वयि दासीत्वं भजस्व **दशकन्धरम्** ॥१३२॥

१. कण्ठाभरणशब्दैः ॥ २. दूरमपि समीपीकुर्वन् ॥ ३. उपवेश्म-अङ्गणम् ॥ ४. *मतिः* ता. ॥ ५. छिक्कायाम् ॥ ६. नष्टे ॥ ७. सूर्यः ॥ ८. ***तं दुःखच्छेदं*** हे. कां., ***तद्दुःखं छेत्तुं*** मु. ॥ ९. ***विज्ञपया०*** ला. ॥ १०. ***ससैन्योऽपि*** छा. पा. मु., पाता. ॥ ११. ***दुर्धरैश्च रणन्यासैः*** मु.१ ॥ १२. ***पलायिता*** कां. ॥ १३. रन्तुमिच्छसि ? ॥ १४. सिंहस्य ॥ १५. ***सुग्रीवं सीतान्वेषणहेतवे*** मु.प्रभृतिषु ॥ १६. ***रुदन्ती*** खं.१-२, पाता. ला. ॥ १७. जीवं गृहीत्वा ॥ १८. सीताविरह-पीडयाऽपि ॥ १९. व्याघ्रः ॥ २०. पामरजनवत् ॥ २१. त्यक्त्वा ॥ २२. स्वीकरिष्यामि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सीते**! त्वमेव धन्याऽसि यां [1]सिसेविषतेऽनिशम्। विश्वसेव्यांह्रिकमलः पतिर्मम महाबलः ॥१३३॥
अद्याऽपि तव **रामेण** भूचरेण तपस्विना। पतिमात्रेण किं पत्या ? प्राप्यते चेद् **दशाननः** ॥१३४॥
रुषा बभाषे **सीतै**वं क्व सिंहः? क्व च जम्बुकः[2]? । क्व सुपर्णः[3]? क्वाऽपि काकः? क्व **रामः**? क्व च ते पतिः? ॥१३५॥
दम्पतित्वमहो युक्तं तव तस्य च पाप्मनः। रिरंसुरेकोऽन्यस्त्रीषु दूती भवति चाऽपरा ॥१३६॥
द्रष्टुमप्युचिता नाऽसि किमु सम्भाषितुं हले! ?। स्थानादितो गच्छ गच्छ त्यज दृष्टिपथं मम ॥१३७॥
**रावणो**ऽपि तदा तत्राऽऽजगाम निजगाद च। कुपिताऽसि[4] कुतः **सीते**! दासी **मन्दोदरी** तव ॥१३८॥
दासस्ते स्वयमप्यस्मि प्रसादं कुरु देवि! मे। **जानकि**!त्वं जनममुं प्रीणासि न दृशाऽपि किम् ? ॥१३९॥
**सीता** पराङ्मुखीभूयेत्यभाषत महासती। कृतान्तदृष्ट्या[5] दृष्टोऽसि हरन्मां **रामगेहिनीम्** ॥१४०॥
धिगाशां ते हताशस्याऽप्रार्थितप्रार्थकस्य रे!। जीविष्यसि कियद् **रामे** सानुजे द्विषदन्तके[6] ॥१४१॥
तयेत्याक्रुश्यमानोऽपि भूयो भूयो **दशाननः**। तथैवोवाच धिगहो! कामावस्था बलीयसी ॥१४२॥
¶अत्राऽन्तरे विपन्मग्नां **सीतां** द्रष्टुमिवाऽक्षमः। निममज्ज निधिर्धाम्नां[7] पश्चिमे **लवणाम्बुधौ** ॥१४३॥
प्रावर्तत निशा घोरा घोरबुद्धिश्च **रावणः**। **सीतायै** क्रोध-कामान्ध उपसर्गान् प्रचक्रमे ॥१४४॥
घूत्कारिणो महाघूकाः फेत्कुर्वाणाश्च फेरवः[8]। वृका विचित्रं क्रन्दन्तः ओतवोऽन्योऽन्ययोधिनः ॥१४५॥
पुच्छाच्छोटकृतो व्याघ्राः फूत्कुर्वाणाः फणाभृतः। पिशाच-प्रेत-वेताल-भूताश्चाऽऽकृष्टकर्त्रिकाः[9] ॥१४६॥
[10]उल्ललन्तो दुर्ललिताः[11] यमस्येव सभासदः। विकृता **रावणे**नेयुरुपसीतं[12] भयङ्कराः ॥१४७॥त्रिभिर्विशेषकम्॥
ध्यायन्ती मनसा पञ्चपरमेष्ठिनमस्क्रियाम्। **सीता** तस्थावभीतैव न तु भेजे **दशाननम्** ॥१४८॥
**बिभीषणः** प्रभाते तु निशावृत्तं निशम्य तत्। आगादुप**दशग्रीवं** **सीतां** चैवमवोचत ॥१४९॥
भद्रे! का त्वं ? कुतः स्थानात् ? कस्य चाऽसि ? किमत्र च ?। मा भैषीः सर्वमाख्याहि परस्त्रीसोदरस्य मे ॥१५०॥
तं मध्यस्थं परिज्ञाय **सीता**ऽप्याख्यदधोमुखी। अहं **जनकपुत्र्य**स्मि **सीता** **भामण्डल**स्वसा ॥१५१॥
गृहिणी **रामभद्रस्य** स्नुषा **दशरथ**स्य च। समं पत्या सानुजेन **दण्डकारण्य**[13]मागमम् ॥१५२॥
तत्रैकदा देवरो मे क्रीडयेतस्ततो भ्रमन्। खे महासिं ददर्शैकं जग्राह च कुतूहलात् ॥१५३॥
[14]अभ्यर्णस्थां वंशजालीं तेन चिच्छेद सोऽसिना। अज्ञानाच्च तदन्तःस्थतत्साधकशिरोऽच्छिदत् ॥१५४॥
अयुध्यमानोऽनागस्कः[15] कोऽप्ययं हा! हतो मया। सानुताप इव भ्रातुः समीपं स उपागमत्[16] ॥१५५॥
तस्याऽसिसाधकस्यैव काचिदुत्तरसाधिका। मद्देवरस्याऽनुपदं तत्र कोपादुपागमत्[17] ॥१५६॥
भर्तारं मम दृष्ट्वा चाऽद्भुतरूपपुरन्दरम्। रन्तुं[18] ययाचे कामार्त्ताऽवाज्ञासीत् तां च मत्पतिः ॥१५७॥
साऽगच्छदागमदथ[19] रक्षसां बलमुल्बणम्[20]। क्ष्वेडां वैधुर्य[21]सङ्केतीकृत्याऽगाल्**लक्ष्मणो** युधि ॥१५८॥
मायाक्ष्वेडामथो कृत्वा दूरं नीत्वा च मत्पतिम्। दुराशोऽहृत[22] मामेष स्ववधायैव राक्षसः ॥१५९॥
तच्छ्रुत्वा **रावणं** नत्वा बभाषे च **बिभीषणः**। कुलस्य दूषणमिदं स्वामिन्! कर्म त्वया कृतम् ॥१६०॥
न यावदिह हन्तुं नः **काकुत्स्थो**ऽभ्येति सानुजः। मुच्यतां तावदाश्वेव नीत्वा **सीता** तदन्तिके ॥१६१॥
इत्युक्ते **रावणः** क्रोधारुणाक्षोऽप्यब्रवीदिति। किमिदं भाषसे भीरो! व्यस्मार्षीर्मम पौरुषम् ? ॥१६२॥
**सीता**[23]ऽनुनीताऽवश्यं हि मम भार्या भविष्यति। तौ चाऽऽयातौ हनिष्यामि वराकौ **राम-लक्ष्मणौ** ॥१६३॥
ऊचे **बिभीषणो** भ्रातः! सत्यं तज्ज्ञानिनो वचः। यद् **राम**पत्न्याः **सीता**याः कृते नः कुलसङ्क्षयः ॥१६४॥
भक्तस्य बन्धोर्मे वाचं मन्यसे नाऽन्यथा कथम् ?। मया हतो **दशरथः** स तावज्जीवितः कथम् ? ॥१६५॥
न यद्यप्यन्यथाभावि भावि वस्तु महाभुज!। तथाऽपि प्रार्थ्यसे मुञ्च **सीतां** नः कुलघातिनीम् ॥१६६॥

---

१. सेवितुमिच्छति ॥ २. शृगालः ॥ ३. गरुडः ॥ ४. *कुपिताऽपि* ता. ॥ ५. यमदृष्ट्या ॥ ६. शत्रुषु यमोपमे ॥ ७. सूर्यः ॥ ८. शृगालाः ॥ ९. कर्त्रिका-छुरिका ॥ १०. उच्छलन्तः ॥ ११. दुर्विनीताः ॥ १२. सीतासमीपम् ॥ १३. *०माश्रिता* खं.२ ॥ १४. समीपस्थानम् ॥ १५. निरपराधी ॥ १६. *उपाविशत्* ता. ॥ १७. *०उपेयुषी* खं.१, ला.; *०दुपेयिवान्* खं.२, ला. हे. ॥ १८. *अयाचीत्तं च कामार्त्ता०* ला.; *अयाचीद्रन्तुकामार्त्ता०* मु. खं.१, हे.प्रभृतिषु ॥ १९. *०दागमच्चाऽथ* ता. ॥ २०. ''उत्कटं'' इति ला.टि. ॥ २१. वैधुर्ये-सङ्कटसमये क्ष्वेडां(सिंहनादं) सङ्केतीकृत्य ॥ २२. *दुराशो मां जहारैष* खं.२, ता. ॥ २३. *सीता नीता मयाऽवश्यं* पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]अनाकर्णितकेनेव **बिभीषण**गिरामथ[2]। आरोप्य **पुष्पके सीतां** भ्रमन्नेवमदर्शयत् ॥१६७॥

अमी क्रीडाद्रयो रत्नसानवः[3] स्वादुनिर्झराः। नन्दनोद्यानसोदर्याण्यमून्युपवनानि[4] च ॥१६८॥

[5]यथाकामीनवृष्टीनि धारावेश्मान्यमूनि च। अमूश्च केलिकूलिन्यः[6] सहंसा हंसगामिनि! ॥१६९॥

एतानि रतिवेश्मानि स्वर्गखण्डोपमानि च। मया सह रमस्वैषु[7] सुभ्रु! यत्र रतिस्तव ॥१७०॥

ध्यायन्ती **राम**पादाब्जे हंसीव **जनका**त्मजा। वसुन्धरेव धैर्येण चुक्षोभ न हि तद्गिरा ॥१७१॥

सर्वेषु रम्यस्थानेषु भ्रान्त्वा भ्रान्त्वा **दशाननः**। मुमोचाऽशोकवनिकामध्ये भूयोऽपि **जानकी**म् ॥१७२॥

¶प्रेक्ष्योन्मत्तमिव ज्येष्ठं वाचोयुक्तेरगोचरम्। **बिभीषणो** मन्त्रयितुं कुलामात्याँन्[8]थाऽऽह्वयत् ॥१७३॥

ऊचे च भोः कुलामात्याः! कामाद्या ह्यान्तरद्विषः। भूता इवैते तेष्वेकोऽप्युन्मथ्नाति प्रमादिनम् ॥१७४॥

कामं कामातुरः स्वामीं कामस्त्वेको[9]ऽपि दुर्जयः। किं पुनः कृतसाहाय्यः[10] परनारीरिरंसया ? ॥१७५॥

तदतः परमत्यन्तं महति व्यसनार्णवे। पतिष्यति पतिर्**लङ्का**पुर्या दोष्मानपि द्रुतम् ॥१७६॥

अथ ते मन्त्रिणः प्रोचुर्वयं नाम्नैव मन्त्रिणः। त्वमेव मन्त्री मन्त्रात् तु यस्येदृग्दूरदर्शिता ॥१७७॥

किं करोति परं मन्त्रः प्रभौ कामवशंवदे ?। मिथ्यादृष्टौ जने जैनधर्मस्येवोपदेशनम् ॥१७८॥

**सुग्रीव-हनुमन्**मुख्या मिलिता **राघव**स्य ते। महात्मनां न्यायभाजां कः पक्षं नाऽवलम्बते ? ॥१७९॥

**सीता**निमित्तो ह्यैक्ष्वा**का**ज्ज्ञान्युक्तो नः कुलक्षयः। तथाऽपि पुरुषाधीनं कर्तव्यं समयोचितम् ॥१८०॥

ततो **बिभीषण**श्चक्रे वप्रे यन्त्रादिरोपणम्। अनागतं हि पश्यन्ति मन्त्रिणो मन्त्रचक्षुषा ॥१८१॥

¶इतश्च कालं कमपि कथमप्यत्यवाहयत्। **सौमित्रि**णाऽऽश्वास्यमानो **रामो** विरहपीडितः ॥१८२॥

अनुशिष्याऽथ **रामे**ण प्रेषितो[11] **लक्ष्मणः** स्वयम्। प्रतस्थे प्रति **सुग्रीवं** तूण-चाप-कृपाणभृत् ॥१८३॥

दलयन् क्ष्मां पदन्यासैः कम्पयंस्तं च पर्वतम्। वेगान्दोलितदोःस्पर्शान्मार्गवृक्षांश्च पातयन् ॥१८४॥

उत्कटभृकुटीभीमललाटोऽरुणलोचनः। भीतैर्द्वाःस्थैर्मुक्तमार्गः प्राप **सुग्रीव**वेश्म[12] सः ॥१८५॥युग्मम्॥

आयातं **लक्ष्मणं** श्रुत्वा निर्गत्याऽन्तःपुराद् द्रुतम्। उपतस्थे कपिराजः[13] कम्पमानवपुर्भयात् ॥१८६॥

ऊचे च **लक्ष्मणः** क्रुद्धः कृतकृत्योऽसि वानर!। सुखं तिष्ठसि निःशङ्कः स्वान्तःपुरसमावृतः ? ॥१८७॥

स्वामी तरुतलासीनो दिवसानब्दसन्निभान्। यथाऽत्येति न तद् वेत्सि प्रतिपन्नं च विस्मृतम् ? ॥१८८॥

**सीता**प्रवृत्तिमानेतुमुत्तिष्ठस्वाऽधुनाऽपि हि। मा **साहसगते**र्मार्गं गमः सङ्कुचितो न[14] सः ॥१८९॥

पतित्वा पादयोस्तस्य **सुग्रीवो**ऽथाऽब्रवीदिति। प्रसीदैकं प्रमादं मे सहस्वाऽसि[15] प्रभुर्यतः ॥१९०॥

एवमाराध्य **सौमित्रि**मग्रे कृत्वा कपीश्वरः। द्रुतं ययौ **रामभद्रं** नमश्चक्रे च भक्तितः ॥१९१॥

इत्यादिशच्च स्वान् सैन्यान् भो भोः! सर्वेऽपि दोर्भृतः!। सर्वत्राऽस्खलिता यूयं गवेषयत **मैथिली**म् ॥१९२॥

इत्युक्तास्तेन ते सैन्या द्वीपेष्वद्रिषु सिन्धुषु। भूमिरन्ध्रेष्वथाऽन्यत्र त्वरितत्वरितं ययुः ॥१९३॥

¶**सीता**हरणमाकर्ण्य तदा **भामण्डलो**ऽपि हि। आगमद् **राम**मस्थाच्च स[16] इवाऽत्यन्तदुःखितः ॥१९४॥

**विराधो**ऽपि समं सैन्यैः स्वामिव्यसनपीडितः। एत्य शुश्रूषमाणोऽस्थात् तत्रैव चिरपत्तिवत् ॥१९५॥

**सुग्रीवो**ऽपि स्वयं गच्छन् **कम्बुद्वीप**मुपाययौ। तं च **रत्नजटी** दृष्ट्वा दूरादेवमचिन्तयत् ॥१९६॥

संस्मृत्य किं ममाऽऽगस्तत् प्रैष्ययं **दशमौलिना**। मद्वधाय महाबाहुः **सुग्रीवो** वानरेश्वरः ? ॥१९७॥

हृता विद्या **दशास्येन** पुरा तावन्महौजसा। इदानीमेष मे प्राणान् हरिष्यति हरीश्वरः[17] ॥१९८॥

इति चिन्तापरं तं द्राक् **सुग्रीवो**ऽगादुवाच च। नाऽभ्युदस्था[18]ः कथं मां त्वं ? व्योमयानेऽलसोऽसि किम् ? ॥१९९॥

सोऽप्यभ्यधाद् **दशास्येन** विद्या मे सर्वतो हृता। **जानकीं** हरतस्तस्य युद्धे ह्यहमुपस्थितः ॥२००॥

ततश्च **राम**पादान्ते स नीतः कपिकेतुना[19]। तेन विज्ञापितः **सीतो**दन्तमेवं व्यजिज्ञपत् ॥२०१॥

---

१. अश्रुत्वा इव ॥ २. *०कथामथ* पाता. ॥ ३. रत्नशिखराः स्वादुजला निर्झरा येषु ते ॥ ४. नन्दनवनसदृशानि ॥ ५. यथेच्छवृष्टीनि ॥ ६. क्रीडानद्यः ॥ ७. ***रमैतेषु*** पाता. ॥ ८. *०मात्यानजूहवत्* ता. ॥ ९. *०स्त्वेको हि* ता.विना ॥ १०. परनारीरिरंसया साहाय्यं प्राप्तः कामः सुतरां दुर्जय इत्यर्थः ॥ ११. ***प्रेरितो०*** हे. ॥ १२. *०वेश्मनि* खं.२ ॥ १३. सुग्रीवः ॥ १४. *०तोऽथ सः* ला.; सः - मृत्योर्मार्गः न सङ्कुचितोऽपि तु विशाल एव, अतः साहसगतिरिव त्वमपि तन्मार्गं एव गमिष्यसि ॥ १५. ***सह स्वामि प्र०*** खं.१-२, पाता.; ***सह स्वामिन्! प्र०*** ला. ॥ १६. राम इव ॥ १७. ***कपीश्वरः*** खं.१, पाता. ॥ १८. नाऽभ्युत्थितवान् ॥ १९. सुग्रीवेण ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देव! देवी नृशंसेन सती **सीता** दुरात्मना। हृता **लङ्का**पुरीशेन विद्या च मम [1]कुप्यत: ॥२०२॥
हा **राम**! वत्स **सौमित्रे**! भ्रात**र्भामण्डले**ति च। देव्यां रुदत्यां **सीता**यामकुप्यं **दशमौलये** ॥२०३॥
**सीतो**दन्तेन तेनाऽथ मुदितो **रघुपुङ्गव:**। [2]**सुरसङ्गीत**पुरेशं **रत्नजटिन**माश्लिषत् ॥२०४॥
भूयो भूयोऽपि पप्रच्छ **सीतो**दन्तं **रघूद्वह:**। भूयो भूयोऽपि सोऽप्याख्यत् तन्मन:प्रीतिहेतवे ॥२०५॥
अपृच्छद् **रामभद्र**स्तान् **सुग्रीवा**दिमहाभटान्। इत: कियति दूरे सा **लङ्का**पूस्तस्य रक्षस: ॥२०६॥
ते[3]ऽप्यूचु: किं तया पुर्याऽऽ[4]सन्नयाऽथ दविष्ठया। **रावण**स्य जगज्जिष्णोर्यत् सर्वे तृणवद् वयम् ॥२०७॥
**रामो**ऽप्यूचे कृतं तस्य जय्याजय्यविचिन्तया। [5]दर्शनप्रतिभूवन्नस्तं दर्शयत केवलम् ॥२०८॥
तस्य दर्शितमात्रस्य सामर्थ्यं ज्ञास्यथाऽचिरात्। [6]**सौमित्रि**मुक्तनाराचपीयमानगलासृज: ॥२०९॥
बभाषे **लक्ष्मणो**ऽप्येवं क एष ननु **रावण:** ?। सारमेय इवाऽसार[7]च्छलेनैव चकार य: ॥२१०॥
क्षत्राचारेण तस्याऽहं छेत्स्यामि च्छलिन: शिर:। सङ्ग्रामनाटकं यूयं सभ्यीभूयैव पश्यत ॥२११॥
**जाम्बवान्** व्याजहाराऽथ सर्वं वो युज्यते परम्। यो हि **कोटिशिलो**त्पाटी स हनिष्यति **रावण**म् ॥२१२॥
साधुनाऽ**नन्तवीर्ये**णाऽऽख्यातं ज्ञानवता ह्यद:। अस्मत्प्रत्ययहेतोस्तत् समुत्पाटय तां शिलाम् ॥२१३॥
एवमस्त्वित्युक्तवन्तं ते नयन्ति स्म **लक्ष्मणम्**। सपदि व्योमयानेन यत्र **कोटिशिला**ऽस्ति सा ॥२१४॥
उच्चिक्षेप शिलां दोष्णा **लक्ष्मण**स्तां लतामिव। साधु साध्वित्युच्यमानस्त्रिदशै: पुष्पवर्षिभि: ॥२१५॥
सञ्जातप्रत्ययास्तेऽपि व्योमयानेन पूर्ववत्। **किष्किन्धा**यां समानिन्यु**र्लक्ष्मणं राम**सन्निधौ ॥२१६॥
[8]कपिवृद्धास्तत: प्रोचुर्युष्मत्तो **रावण**क्षय:। आदौ प्रेष्यो द्विषां दूत इति नीतिमतां स्थिति: ॥२१७॥
सन्देशहारकेणाऽपि यदि सिध्येत् प्रयोजनम्। पर्याप्तं स्वयमुद्योगकर्मणा भूभुजां तदा ॥२१८॥
समर्थ: प्रेष्यतां तत्र कोऽपि दूतो महाभुज:। सा [9]दुष्प्रवेशनिष्काशा **लङ्का** हि श्रूयते [10]क्षितौ ॥२१९॥
गत्वा दूत: स **लङ्का**यां भणिष्यति **बिभीषणम्**। **सीता**र्पणकृते रक्ष:कुले स खलु नीतिवा(मा)न् ॥२२०॥
**सीतां** मोचयितुं सोऽपि **रावणं** बोधयिष्यति। **रावणे**न [11]त्ववज्ञातस्त्वामेष्यति तदैव हि ॥२२१॥
एवं वचसि तेषां तु **रामे**णाऽनुमते सति। **श्रीभूतिं** प्रेष्य **सुग्रीवो हनूमन्त**मथाऽऽह्वत ॥२२२॥
¶अथ **रामं** सभासीनं **सुग्रीवा**दिसमावृतम्। नमश्चकार **हनुमान्** भानुमानिव तेजसा ॥२२३॥
ततो **रामाय सुग्रीव:** शशंसैवमयं हि न:। विधुरे परमो बन्धुर्विनयी [12]**पावनञ्जयि:** ॥२२४॥
नाऽस्य तुल्यो द्वितीयोऽस्ति सर्वविद्याधरेष्वपि। **सीता**प्रवृत्तिलाभार्थं स्वामिन्नेनं [13]तदादिश ॥२२५॥
**हनुमान**प्युवाचैवं कपय: सन्त्यनेकश:। [14]मत्प्राया: स्नेहतस्त्वेतद् वक्ति **सुग्रीव**भूपति: ॥२२६॥
**गवो गवाक्षो गवय: शरभ: गन्धमादन:। नीलो द्विविद-**[15]**मैन्दौ** च **जाम्बवानङ्गदो नल:** ॥२२७॥
अन्येऽपि बहव: स्वामिन्! सन्तीह कपिपुङ्गवा:। तेषां सङ्ख्यापूरणोऽहमपि त्वत्कार्यसिद्धये ॥२२८॥
**लङ्कां सराक्षसद्वीपा**मुत्पाट्येह किमानये ?। बद्ध्वा सबान्धवमथाऽऽनयामि **दशकन्धरम्** ? ॥२२९॥
सकुटुम्बं **दशग्रीवं** हत्वा तत्रैव वा द्रुतम्। देवीं **जनकजा**मेवाऽऽनयामि निरुपद्रवाम् ? ॥२३०॥
**रामो**ऽपि [16]निजगादैवं सर्वं सम्भवति त्वयि। तद् गच्छ पुर्यां **लङ्कायां सीतां** तत्र गवेषये: ॥२३१॥
[17]मदूर्मिकामिमां देव्या [18]मदभिज्ञानमर्पये:। तस्याश्चूडामणिं चाऽभिज्ञानमत्र समानये: ॥२३२॥
इदं [19]मद्वाचिकं शंसेर्देवि! **यल्लक्ष्मणा**ग्रज:। त्वद्वियोगातुरोऽत्यन्तं ध्यायंस्त्वामेव तिष्ठति ॥२३३॥
मा त्याक्षीर्मद्वियोगेन जीवितं जीवितेश्वरि!। **लक्ष्मणे**न हतं द्रक्ष्यस्यचिरादेव **रावणम्** ॥२३४॥
¶**हनुमान**प्युवाचैवं यावदाज्ञां विधाय ते। **लङ्काया:** पुनरायामि तिष्ठेस्तावदिह प्रभो! ॥२३५॥

---

१. ***कुप्यता*** ला. ॥ २. "**तं बान्धवमिवाऽऽश्लिष्यत्, कम्बुद्वीपनरेश्वरम्" पाठां०** इति ला.प्रतौ टि.; ता.प्रतावयं पाठश्च ॥ ३. ***सोऽप्यूचे*** ला. ॥ ४. समीपस्थया दूरस्थया वा ॥ ५. मार्गदर्शक('भोमिया' इति भाषा)वत् ॥ ६. सौमित्रिणा मुक्तेन नाराचेन पीयमानं कण्ठशोणितं यस्य, तस्य ॥ ७. तुच्छछलेन ॥ ८. ***केऽपि वृ०*** ला. ॥ ९. कष्टेन प्रवेशो निष्काश:-निर्गमनं च यस्यां सा ॥ १०. ***कृता*** ला., रसंपा. ॥ ११. ***त्वविज्ञात०*** ला. ॥ १२. पवनञ्जयस्याऽपत्यम् ॥ १३. ***समादिश*** ता. ॥ १४. मत्तुल्या: ॥ १५. ***द्विविदमेन्दौ*** ला. ॥ १६. ***च जगादैवं*** ला. ॥ १७. मम अङ्गुलीयकम् ॥ १८. मम स्मृतिचिह्नम् ॥ १९. मम सन्देशम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा **राघवं** नत्वा **मारुतिः** सपरिच्छदः। **लङ्का**पुरीं प्रत्यचालीद् विमानेनाऽतिरंहसा॥२३६॥

स गच्छन् नभसाऽपश्यन्**महेन्द्रगिरि**सानुनि। मातामह**महेन्द्र**स्य **महेन्द्रपुर**पत्तनम्॥२३७॥

एवं च दध्यौ **हनुमान् महेन्द्र**स्य पुरं ह्यदः। येन मेऽनपराधाऽपि माता निर्वासिता तदा॥२३८॥

इति संस्मृत्य [1]स क्रुद्धो रणतूर्यमवादयत्। ब्रह्माण्डं स्फोटयदिव [2]दिङ्मुखप्रतिशब्दितैः॥२३९॥

दृष्ट्वा परबलं राजा **महेन्द्रो**ऽपीन्द्रविक्रमः। समं सैन्यैर्निरगमत् सपुत्रो रणकर्मणे॥२४०॥

[3]**महेन्द्र-हनुम**च्चम्वोरजायत महारणः। व्योमन्यु[4]त्पातजीमूत इवाऽसृग्वृष्टिभीषणः॥२४१॥

**प्राभञ्जनि**र्बभञ्जाऽथ प्रभञ्जन इव द्रुमान्। परसैन्यान् क्षणेनाऽपि भ्रमन् वेगेन सङ्गरे॥२४२॥

**प्रसन्नकीर्ति**[5]र्माहेन्द्रिरयुध्यत **हनूमता**। [6]निघ्नन्नशङ्कं [7]जामेयसम्बन्धमविदन्नथ॥२४३॥

उभावपि महाबाहू उभावप्यत्यमर्षणौ। अन्योऽन्यं दृढयुद्धेन जनयामासतुः श्रमम्॥२४४॥

अथैव चिन्तयामास युध्यमानोऽपि [8]**पावनिः**। [9]आरम्भि धिग् मया युद्धं स्वामिकार्यविलम्बकृत्॥२४५॥

ये जीयन्ते क्षणात् तेऽन्ये मम मातृकुलं ह्यदः। तथाऽप्यारब्धनिर्वाहकृते जेतव्यमेव हि॥२४६॥

ध्यात्वेति **हनुमान्** क्रुद्धः प्रहारैर्मोहयन् क्षणात्। **प्रसन्नकीर्तिं** जग्राह भग्नास्त्र-रथ-सारथिम्॥२४७॥

अग्रहीद् भृशमायोध्य **महेन्द्र**मपि **मारुतिः**। नत्वा चैवं समाचख्यौ [10]नप्ता ते**ऽस्म्यञ्जना**सुतः॥२४८॥

**रामाज्ञया** च **वैदेही**शुद्ध्यै **लङ्कां** व्रजन्नहम्। अत्राऽऽयातः समस्मार्षं मातृनिर्वासनं चिरात्॥२४९॥

जातामर्षेण तत् तात! योधितोऽसि सहस्व मे। स्वामिकार्याय यास्यामि याहि [11]मत्स्वामिसन्निधौ॥२५०॥

**महेन्द्रो**ऽपि समालिङ्ग्य तमित्यूचे महाभुजम्। प्राक्छ्रुतोऽसि जनश्रुत्या दिष्ट्या दृष्टोऽद्य विक्रमी॥२५१॥

गच्छ स्वस्वामिकार्याय पन्थानः सन्तु ते शिवाः। इत्युदित्वा **महेन्द्रो**ऽगात् ससैन्यो **राघवा**न्तिके॥२५२॥

¶व्योम्नाऽथ **हनुमान्** गच्छन् द्वीपे **दधिमुखा**भिधे। कायोत्सर्गे तस्थिवांसौ प्रेक्षाञ्चक्रे महामुनी॥२५३॥

तयोरनतिदूरे चाऽपश्यत् तिस्रः कुमारिकाः। ध्यानस्था निरवद्याङ्गीर्विद्यासाधनतत्पराः॥२५४॥

दवानलस्तदा द्वीपे प्रजज्वालाऽखिलेऽपि हि। तौ साधू ताः कुमार्यश्च निपेतुर्दवसङ्कटे॥२५५॥

तद्वात्सल्येन **हनुमान्** विद्ययाऽऽदाय सागरात्। तं दवाग्निं मेघ इव शमयामास वारिभिः॥२५६॥

तदैव सिद्धविद्यास्ताः कन्या ध्यानस्थितौ तु तौ। मुनी प्रदक्षिणीकृत्य **हनूमन्तं** बभाषिरे॥२५७॥

साधूपसर्गं साधूनामरक्षः परमार्हत!। त्वत्साहाय्येन विद्या नः सिद्धाः कालं विनाऽपि हि॥२५८॥

का यूयमिति तेनोक्ताः कन्यास्ता एवमब्रुवन्। अस्मिन् **गन्धर्वराजो**ऽस्ति राजा **दधिमुखे** पुरे॥२५९॥

स्मस्तस्य कन्याः **कुसुममाला**कुक्षिभवा वयम्। तातं ययाचिरेऽस्मांस्तु बहवः खेचरेश्वराः॥२६०॥

खेचरो**ऽङ्गारको** नामोन्मत्तश्चाऽस्मत्कृतेऽभवत्। [12]ननंस्तस्मै न चाऽन्यस्मै ददौ तातस्[13]त्वरोचकी॥२६१॥

मत्पुत्रीणां पतिः कः स्यादित्यपृच्छत् पिता मुनिम्। यः **साहसगते**र्हन्ता स स्यादिति च सोऽवदत्॥२६२॥

तद्गिराऽन्वेषयंस्तातो नोपलेभे तु तं क्वचित्। विद्यासाधनमस्माभिस्तं ज्ञातुं च प्रचक्रमे॥२६३॥

विद्याभ्रंशनिमित्तं चा**ऽङ्गारकेण** कृतो दवः। त्वया च शमितः साधु भो! निष्कारणबन्धुना॥२६४॥

मासैः सिध्यति या षड्भिस्त्वत्साहाय्यात् क्षणादपि। सा **मनोगामिनी** नाम विद्या नः [14]सिद्धिमाययौ॥२६५॥

आमूलात् **साहसगते**र्वधं **रामे**ण निर्मितम्। शशंस **हनुमां**स्तासां **लङ्का**यां चाऽऽत्मनो [15]गतिम्॥२६६॥

मुदितास्ताः पितुर्गत्वा शशंसुस्तदशेषतः। सोऽपि ताभिः समं सद्यः ससैन्योऽगाद् **रघूद्वह**म्॥२६७॥

¶उत्पपाताऽथ **हनुमानुपलङ्कं** गतश्च सन्। ददर्शाऽऽ**शालिकां** विद्यां घोरां कालनिशामिव॥२६८॥

अरे कपे! क्व याताऽसि ? यातोऽसि मम भोज्यताम्। इति ब्रुवाणा साक्षेपं [16]व्याददाति स्म सा मुखम्॥२६९॥

**हनूमां**श्च गदापाणिः प्रविवेश तदाननम्। अभ्रमध्यमिवाऽऽदित्यस्तां विदार्य च निर्ययौ॥२७०॥

---

१. ***सङ्क्रुद्धो*** ला.विना॥ २. दिङ्मुखानां प्रतिध्वानैः॥ ३. ***महेन्द्राद्-हनुमतोरजायत*** कां. ला.॥ ४. उत्पातमेघ इव रुधिरवृष्टिभीषणः॥ ५. महेन्द्रस्याऽपत्यम्॥ ५. ***निघ्नन्निःशङ्कं*** कां.॥ ७. अयं मे भगिनीसुत इतिरूपं सम्बन्धम्॥ ८. पवनपुत्रः॥ ९. ***आरेभे*** हे. मो. ता., ला.॥ १०. दौहित्रः॥ ११. ***नः स्वामि०*** मु.॥ १२. ***ततस्तस्मै*** मु.॥ १३. अरुचिमान्॥ १४. ***सिद्धिमागमत्*** पाता.॥ १५. गमनम्॥ १६. मुखमुद्घाटयति-प्रसारयति॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तथा कृतं च प्राकारं **लङ्कापुर्या मरुत्सुतः** । विद्यासामर्थ्यतोऽभाङ्क्षीन्मङ्क्षु [1]कर्परलीलया ॥२७१॥
तद्वप्रारक्षमप्युच्चैः क्रुद्धं **वज्रमुखाभिधम्** । सोऽवधीत् सहयुध्वानं युद्धाध्वन्यधुरन्धरः ॥२७२॥
हते **वज्रमुखे लङ्कासुन्दरी** तस्य कन्यका । विद्याबलवती कोपाद् युद्धायाऽऽह्वास्त **मारुतिम्** ॥२७३॥
व्योमनीव तडिल्लेखा साऽचारीच्चतुरं रणे । प्रहरन्ती मुहुः सानुमतीव सा **हनूमति** ॥२७४॥
तदस्त्राणि निजैरस्त्रैश्छिन्दानः **पावनञ्जयिः** । तां निरस्त्रीचकाराऽऽशु निष्पत्रामिव [2]वीरुधम् ॥२७५॥
क एष इति साऽऽश्चर्यादाञ्जनेयमुदीक्षितुम् । सम्प्रवृत्ता च कामेन ताडिता च [3]शिलीमुखैः ॥२७६॥
सा **हनूमन्त**मित्यूचे मया पितृवधोत्थया । अविचार्य क्रुधा वीर! योधितोऽसि मुधैव हि ॥२७७॥
आख्यातं साधुना पूर्वं यस्ते जनकघातकः । भावी भर्तेति तन्नाथ! मामुद्वह वशंवदाम् ॥२७८॥
सकलेऽपि जगत्यस्मिन् कोऽन्यस्तव समो भटः । ततः स्थास्यामि नारीषु त्वया पत्याऽतिगर्विता ॥२७९॥
एवं विनीतां तां कन्यां मुदितो **हनुमानपि** । गान्धर्वेण विवाहेन सानुरागमु[4]पायत ॥२८०॥
स्नातुकाम इव [5]व्योमाटवीपर्यटनश्रमात् । तदा [6]त्विषामधिपतिर्ममज्जाऽपरवारिधौ ॥२८१॥
प्रतीचीमुपभुज्याऽऽशां गच्छता भानुमालिना । सन्ध्याभ्रच्छद्मना तस्या [7]वासांसीवोपनिन्यिरे ॥२८२॥
चकाशे दिशि [8]वारुण्यामरुणाभ्रपरम्परा । अस्तकाले रविं त्यक्त्वा तेजः पृथगिव स्थितम् ॥२८३॥
नवरागो नवरागां सिषेवे वारुणीमसौ । मां हित्वेत्यपमानेन म्लानास्या प्राच्यभूद् ध्रुवम् ॥२८४॥
क्रीडास्थानभुवां तासां परित्यागभुवा [9]रुजा । खगैः कोलाहलमिषादाक्रन्दस्तत्र निर्ममे ॥२८५॥
म्लानिमासादयामास चक्रवाकी वराकिका । दूरीभूतप्रियतमा ललनेव रजस्वला ॥२८६॥
पद्मिनी कलयामास मुखसङ्कोचमुच्चकैः । [10]पतिव्रताव्रतेवाऽस्तङ्गते पत्यावहर्पतौ ॥२८७॥
[11]तर्णकोत्कण्ठितास्तूर्णं गावो [12]व्याजुघुटुर्वनात् । वायव्यस्नानसम्प्राप्तिमुदितैर्वन्दिता द्विजैः ॥२८८॥
अस्तकाले [13]त्विषामीशो निजं तेजो [14]हविर्भुजे । राजेव युवराजाय राज्यसम्पदमार्पयत् ॥२८९॥
नागरीभिः प्रतिपदमदीप्यन्त [15]प्रदीपकाः । दिवोऽवतीर्णनक्षत्रश्रेणिश्री[16]परिमोषिणः ॥२९०॥
अस्तमीयुषि चण्डांशौ शशिन्यनुदिते सति । तमो जृम्भितुमारेभे [17]छलच्छेकाः खलाः खलु ॥२९१॥
किमञ्जनाद्रेश्चूर्णेन पूर्णमेतदथाऽञ्जनैः । रोदसीभाण्डमभितस्तमःपूर्णमलक्ष्यत ॥२९२॥
न हि स्थलं न हि जलं न दिशो न नभो न भूः । तदानीं किं बहूक्तेन ? [18]न स्वहस्तोऽप्यलक्ष्यत ॥२९३॥
तारा व्योमन्य[19]सिश्यामे तमोलिप्ते विशेषतः । चिरं व्यडम्बयन् [20]द्यूतकट्टिस्थवराटिकाः ॥२९४॥
[21]व्यक्तोडु कलयामास कज्जलश्यामलं नभः । [22]उत्पुण्डरीककालिन्दीह्रदसब्रह्मचारिताम् ॥२९५॥
एकाकारकरे विष्वक् तमःपूरे प्रसर्पति । [23]विश्वं विश्वमनालोकमभूत् पातालसन्निभम् ॥२९६॥
[24]स्फीतेऽन्धकारे निःशङ्काः [25]कामिसङ्घट्टनोत्सुकाः । स्वैरं जजृम्भिरे दूत्यो ह्रदे [26]शफरिका इव ॥२९७॥
[27]आजानूत्क्षिप्तमञ्जीरास्तमालश्यामलांशुकाः । [28]मृगनाभिविलिप्ताङ्ग्योऽभिस[29]स्रुर[30]भिसारिकाः ॥२९८॥
अथोदयाद्रिप्रासादे सुवर्णकलशोपमः । [31]कराङ्कुरमहाकन्द उदियाय निशाकरः ॥२९९॥
नैसर्गिकेण वैरेण [32]लक्ष्मव्याजात् सहेन्दुना । [33]नियुद्धमिव तन्वानमन्धकारमलक्ष्यत ॥३००॥
विपुले गोकुल इव क्रीडन्ति स्म नभस्तले । [34]स्वैरं गोष्विव तारासु [35]गवेन्द्र इव चन्द्रमाः ॥३०१॥
व्यक्तमन्तःस्फुरल्लक्ष्मा मृगलक्ष्मा व्यराजत । [36]मृगनाभिद्रवाधार[37]रौप्यभाजनसन्निभः ॥३०२॥

१. मृत्पात्रवत् ॥ २. पत्रविहीनां लतामिव ॥ ३. बाणैः ॥ ४. परिणिनाय ॥ ५. व्योम एव अटवी, तत्र पर्यटनस्य श्रमात् ॥ ६. सूर्यः ॥ ७. ***वासांसीवाप०*** खं.१-२, पाता. मु. ॥ ८. ''पश्चिमायां'' इति ला.टि. ॥ ९. पीडया ॥ १०. पतिव्रता व्रतं यस्याः सा इव ॥ ११. वत्सोत्कण्ठिताः त्वरितम् ॥ १२. प्रतिनिवृत्ताः ॥ १३. सूर्यः ॥ १४. अग्नये ॥ १५. ***प्रदीपिकाः*** पाता. ॥ १६. परिमोषिणः-चौराः ॥ १७. छलचतुराः ॥ १८. ***स्वहस्तोऽपि न लक्ष्यते*** खं.१-२, पाता. ता. विना ॥ १९. खड्गवत् श्यामे ॥ २०. द्यूतपट्टस्थितवराटिकाः (ताराः वराटिकासमाः इत्याशयः) ॥ २१. व्यक्तनक्षत्रम् ॥ २२. उद्गतानि पुण्डरीकाणि-कमलानि यस्मिंस्तस्य कालिन्दीनामकह्रदस्य समानताम् ॥ २३. सकलम् ॥ २४. व्याप्ते ॥ २५. कामिजनानां संयोजने उत्सुकाः ॥ २६. लघुमत्स्याः ॥ २७. जानुपर्यन्तमुत्क्षिप्तानि उच्छलन्ति मञ्जीराणि-नूपुराणि यासां ताः ॥ २८. मृगनाभिः-कस्तूरी ॥ २९. ''चेलुः'' इति ला.टि. ॥ ३०. ''याः प्रियं प्रति यान्ति'' इति ला.टि. ॥ ३१. कराः-किरणाः, त एव महाकन्दा यस्य सः ॥ ३२. कलङ्कमिषात् ॥ ३३. बाहुयुद्धम् ॥ ३४. ''**स्वैरं तारागवां मध्ये**''**पाठां०** इति ला.प्रतौ टि., खंता.२-ता.प्रत्योः पाठश्चायमेव ॥ ३५. वृषभः ॥ ३६. मृगनाभिद्रवः-कस्तूरीलेपः, तदाधारभूतरजतमयपात्रतुल्यः कलङ्कसहितश्चन्द्रमा व्यराजतेत्याशयः ॥ ३७. ***०रूप्य०*** खं.१-२, कां. हे. ला. मो. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्खल्यमाना विरहिभिरन्तरा दत्तपाणिभिः। प्रसस्रुः [१]शीतगुकराः शरा इव मनोभुवः ॥३०३॥
चिरभुक्तामपि प्रोज्झ्य पद्मिनीं प्राप्तदुर्दशाम्। भृङ्गाः [२]कुमुद्वतीं भेजुर्धिगहो! नीचसौहृदम् ॥३०४॥
[३]शेफाल्याः कुसुमानीन्दुः [४]करपातैरपातयत्। प्रियमित्रस्य [५]पुष्पेषोः सज्जीकर्तुमिषूनिव ॥३०५॥
प्रवर्षयन्निन्दु[६]कान्तान् कुर्वाणः सरसीर्नवाः। स्वानि शीत[७]रुचिः [८]पूर्त्तकीर्तनानीव निर्ममे ॥३०६॥
कुलटानामटन्तीनां पद्मि[९]नीनामिवोच्चकैः। विततान मुखम्लानिं [१०]सं ज्योत्स्नाधौतदिङ्मुखः ॥३०७॥
समं च **लङ्कासुन्दर्या पवनञ्जय**नन्दनः। रममाणो निराशङ्कस्तामतीयाय [११]यामिनीम् ॥३०८॥
अथोदियाय किरणैः [१२]स्वर्णसूत्रसहोदरैः। मार्तण्डो मण्डयन्नाशां प्रियां प्राचीन[१३]बर्हिषः ॥३०९॥
अव्याहतं निष्पतन्त्यो रुचयश्चण्डरोचिषः। कुमुद्वतीषु स्मेरासु ययुः [१४]प्रस्वापनास्त्रताम् ॥३१०॥
त्यक्तानि मौलिमाल्यानि प्रबुद्धाभिः [१५]पुरन्ध्रिभिः। केशपाशवियोगेनाऽलि[१६]नादैरुरुदन्निव ॥३११॥
रात्रिजागरणायासकषायितविलोचनाः। निवर्तन्ते स्म गणिकाः कामुकानां निकेतनात् ॥३१२॥
स्मेरपङ्कजकोशेभ्यो निर्ययुर्भृङ्ग[१७]राजयः। [१८]खण्डितामुखपद्मेभ्य इव निःश्वासवल्लयः ॥३१३॥
उदितादित्यतेजोभिर्लुण्टितद्युतिवैभवः। अभवद् रजनी[१९]जानिर्लूता[२०]तन्तुपुटोपमः ॥३१४॥
यद् ब्रह्माण्डेऽपि मातं न तत् तमश्चण्डरोचिषा। मेघश्चण्डानिलेनेव निर्धूय क्वाऽप्यनीयत ॥३१५॥
रात्रेरिवाऽनु[२१]बद्धाया निद्राया अप[२२]सर्पणात्। स्वस्वकर्माणि निर्मातुं प्रावर्तत पुरीजनः ॥३१६॥
तदा च **हनुमाल्लँङ्कासुन्दरीं** सुन्दरोक्तिभिः। आपृच्छ्य प्राविशल्**लङ्कानगरीं** गुरुविक्रमः ॥३१७॥
**बिभीषण**स्य सदनं द्वि[२३]षद्भटबिभीषणः। जगाम स्थामधामाऽथ **पवनञ्जय**नन्दनः ॥३१८॥
**बिभीषणे**न सत्कृत्य पृष्टश्चाऽऽगमकारणम्। अवोच**दञ्जनासूः** सारगम्भीर[२४]गीरिदम् ॥३१९॥
यद् भ्राता **रावण**[२५]स्याऽसि [२६]शुभोदर्कं विचिन्त्य तत्। **राम**पत्नीं हृतां **सीतां** सतीं मोचय **रावणात्** ॥३२०॥
[२७]दुःखाकृदिहलोकेऽपि परलोके न केवलम्। **काकुत्स्थ**पत्नीहरणं त्वद्भ्रातुर्बलिनोऽपि हि ॥३२१॥
**बिभीषणो**ऽप्यभाषिष्ट साधूक्तं **हनुमं**स्त्वया। **सीतां** मोचयितुं पूर्वमप्युक्तः स्वाग्रजो मया ॥३२२॥
भूयोऽपि हि [२८]सनिर्बन्धं प्रार्थयिष्ये स्वबान्धवम्। **सीतां** यदि पुनर्मुञ्चत्येष सम्प्रति मद्गिरा ॥३२३॥
¶एवं **बिभीषणे**नोक्ते समुत्पत्याऽ**ञ्जनासुतः**। जगाम **देवरमणो**द्याने **वैदेह्य**धिष्ठिते ॥३२४॥
तत्राऽशोकतरोर्मूले [२९]कपोलललुलितालकाम्। सन्तताश्रुपयोधारा[३०]पल्वलीकृतभूतलाम् ॥३२५॥
प्रम्लानवदनाम्भोजां हिमार्त्तां पद्मिनीमिव। अत्यन्तक्षामवपुषं प्रथमेन्दुकलामिव ॥३२६॥
उष्णनिःश्वाससन्तापविधुराधरपल्लवाम्। ध्यायन्तीं **राम रामे**ति निःस्पन्दां योगिनीमिव ॥३२७॥
मलिनीभूतवसनां निरपेक्षां वपुष्यपि। ददर्श देवीं **वैदेहीं पवनञ्जय**नन्दनः ॥३२८॥चतुर्भिः कलापकम्॥
एवं च दध्यौ **हनुमान**हो! **सीता** महासती। अस्या दर्शनमात्रेण पवित्रीभूयते जनैः ॥३२९॥
अस्याश्च विरहे **रामः** [३१]स्थाने स खलु [३२]खिद्यते। रूपवच्छीलवच्चेदृक् कलत्रं [३३]यस्य पावनम् ॥३३०॥
द्विधाऽपि हि वराकोऽयं [३४]पतिष्यत्येव **रावणः**। **रघूद्वह**प्रतापेन स्वपापेन च भूयसा ॥३३१॥
ततो [३५]विद्यातिरोभूतः **सीतो**त्सङ्गेऽङ्गुलीयकम्। **हनुमान्** पातयामास तद् दृष्ट्वा मुमुदे च सा ॥३३२॥
¶तदैव गत्वा **त्रिजटा दशकण्ठं** व्यजिज्ञपत्। इयत्कालं विषण्णाऽऽसीत् सानन्दा त्वद्य **जानकी** ॥३३३॥

---

१. चन्द्रकिरणाः ॥ २. नलिनीम् ॥ ३. 'नगोड'इति भाषायाम् ॥ ४. किरणवर्षणैः ॥ ५. कामदेवस्य ॥ ६. "चन्द्रकान्तान्" इति ला.टि. ॥ ७. चन्द्रः ॥ ८. "तटाकादीनि" इति ला.टि.; वापीकूपतडागानि,देवतायतनानि च। अन्नप्रदानमेतत्तु , पूर्त्तं तत्त्वविदो विदुः ॥" (योगदृष्टिसमुच्चये) ॥ ९. "सूर्यविकासिनी" इति ला.टि. ॥ १०. ***सा ज्यौत्स्नी धौतदिङ्मुखा*** खं.१-२; ***सा ज्योत्स्ना धौतदिङ्मुखा*** पाता. मु. रस्वीपा.; स-चन्द्रः, ज्योत्स्नया निर्मलीकृतदिङ्मुख इत्यर्थः ॥ ११. रात्रिम् ॥ १२. सुवर्णरज्जुसदृशैः ॥ १३. इन्द्रस्य; ***प्राचीनबर्हिणः*** खं.१ ॥ १४. निद्रास्त्रताम् ॥ १५. कुटुम्बिनीभिः स्त्रीभिः ॥ १६. भ्रमरनादैः ॥ १७. ***०राशयः*** कां. ला. ॥ १८. "रात्रौ पतिरहिता" इति ला.टि. ॥ १९. "चन्द्रः" इति ला.टि. ॥ २०. लूता-ऊर्णनाभः(करोळियो) तन्मुखनिर्गतानां तन्तूनां पुटः-जालं तत्सदृशः ॥ २१. "सम्बद्धायाः" इति ला.टि. ॥ २२. ***अपसर्पणे*** रसंपा. ॥ २३. शत्रुभटभयङ्करः ॥ २४. ***०गीरदः*** कां. मु. ॥ २५. ***रावणस्याऽऽशु*** ता. ॥ २६. "शुभागामिकालफलं" इति ला.टि. ॥ २७. ***दुःखकृ०*** हे. मो.; दुःखकरम् ॥ २८. साग्रहम् ॥ २९. कपोलयोर्लुलिताः-स्रस्ता अलकाः-केशा यस्याः सा, ताम् ॥ ३०. पल्वलं-लघुसरः 'खाबोचियुं' इति भाषायाम् ॥ ३१. युक्तम् ॥ ३२. ***खिद्यति*** ला. ॥ ३३. ***कस्य*** खं.१-२, ता.ला.; ***तस्य*** पाता. ॥ ३४. ***पतिष्यति च*** ता. ॥ ३५. विद्याबलेन तिरोभूतः-अदृश्यः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्ये विस्मृत**रामे**यं रिरंसुर्मयि सम्प्रति। तद् गत्वा बोध्यतामेवमूचे **मन्दोदरीं** स तु ॥३३४॥

ततश्च पत्युर्दू[1]त्येन पुन**र्मन्दोदरी** ययौ। प्रलोभनकृते **सीतां** विनीता सेत्यवोचत ॥३३५॥

अद्वैतैश्वर्यसौन्दर्यवर्यस्तावद् **दशाननः**। त्वमप्यप्रतिरूपैव रूपलावण्यसम्पदा ॥३३६॥

यद्यप्यज्ञेन दैवेन युवयोरुभयोरपि। न व्यधाय्युचितो योगस्तथाऽपि ह्यस्तु सम्प्रति ॥३३७॥

उपेत्य भजनीयं तं भजन्तं भज **जानकि!**। अहमन्याश्च तत्पत्न्यस्त्वदाज्ञां सुभ्रु! बिभ्रतु ॥३३८॥

**सीता**ऽप्यवोचदाः पापे! पतिदू[2]त्यविधायिनि!। त्वद्भर्तुरिव वीक्षेत मुखं दुर्मुखि! कस्तव ? ॥३३९॥

**राम**स्य पार्श्वे मां विद्धि **सौमित्रि**मिह चाऽऽगतम्। **खरा**दीनिव हन्तुं द्राग् ध[3]वं तव सबान्धवम् ॥३४०॥

उत्तिष्ठोत्तिष्ठ पापिष्ठे! वच्मि नाऽतः परं त्वया। **सीत**या तर्जितैवं सा सकोपा प्रययौ ततः ॥३४१॥

¶अथाऽऽविर्भूय **हनुमान् सीतां** नत्वा कृताञ्जलिः। इत्यूचे देवि! जयति दिष्ट्या **रामः सलक्ष्मणः** ॥३४२॥

त्वत्प्रवृत्तिकृते **रामे**णाऽऽदिष्टोऽहमिहाऽऽगमम्। मयि तत्र गते **राम** इहैष्यति रिपुच्छिदे ॥३४३॥

[4]बाष्पायितेक्षणा **सीता**ऽपृच्छत् त्वमसि को ननु ?। [5]दुर्लङ्घमर्णवं चैतं कथं लङ्घितवानसि ? ॥३४४॥

[6]कच्चित् [7]प्राणिति मे प्राणनाथः **सौमित्रि**णा सह ?। क्व वा स्थाने त्वया दृष्टः ? कालं नयति वा कथम् ? ॥३४५॥

आख्यच्च **हनुमान**स्मि **पवना-ऽञ्जन**योः सुतः। विद्यया व्योमयानेन लङ्घितो जलधिर्मया ॥३४६॥

समस्तवानराधीशं **सुग्रीवं** विद्विषद्वधात्। पत्तीकृत्याऽधि**किष्किन्ध**मस्ति **रामः सलक्ष्मणः** ॥३४७॥

**रामो**ऽस्ति त्वद्वियोगेन तप्यमानो दिवानिशम्। गिरिर्दवानलेनेव तापयन्नपरानपि ॥३४८॥

गवेव वत्सो रहितस्त्वया स्वामिनि! **लक्ष्मणः**। न जातु लभते सौख्यं शून्याः पश्यन् दिशोऽखिलाः ॥३४९॥

क्षणं सशोकौ सक्रोधौ क्षणं ते पति-देवरौ। **सुग्रीवे**णाऽऽश्वास्यमानावपि न प्राप्नुतः सुखम् ॥३५०॥

**भामण्डलो विराधश्च महेन्द्रा**द्याश्च खेचराः। पत्तीभूयोपासते तौ शक्रेशानाविवाऽमराः ॥३५१॥

तव प्रवृत्तिमानेतुमहं **सुग्रीव**दर्शितः। **रामे**ण प्रेषितो देवि! समर्प्य स्वाङ्गुलीयकम् ॥३५२॥

चूडामणिरभिज्ञानं त्वत्त आनायितो मया। तद्दर्शनेन मामत्राऽऽयातं प्रत्येष्यति प्रभुः ॥३५३॥

**हनूमदु**परोधेन **रामो**दन्तमुदा च सा। [10]एकविंशत्यहोरात्रप्रान्ते व्यधित भोजनम् ॥३५४॥

प्रो[11]वाचैवमभिज्ञानं चूडामणिमिमं मम। गृहीत्वा वत्स! गच्छाऽऽशु तिष्ठतः स्यादुपद्रवः ॥३५५॥

अत्र त्वामागतं ज्ञात्वा क्रूरकर्मैष राक्षसः। हन्तुमन्तकवन्नूनं समुपस्थास्यते बली ॥३५६॥

स्मित्वा [12]संप्रश्रयं सोऽपि जगादेति कृताञ्जलिः। त्वं मातर्मयि वात्सल्यादेवं वदसि कातरा ॥३५७॥

**राम-लक्ष्मण**योः पत्तिस्त्रिजगज्जैत्रयोरहम्। तपस्वी **रावणः** कोऽयं ससैन्योऽपि ममाऽग्रतः ॥३५८॥

त्वामपि स्कन्धमारोप्य स्वामिनि! स्वामिनोऽन्तिके। नयामि [13]परिभूयैनं ससैन्यमपि **रावणम्** ॥३५९॥

स्मित्वा **सीता**ऽप्युवाचैवं न हि [14]ह्रेपयसि स्वकम्। **रामभद्रं** प्रभुं भद्र! वदन्नेवं ससौष्ठवम् ? ॥३६०॥

त्वयि सम्भाव्यते सर्वं पदातौ **राम-शार्ङ्गिणोः**। परन्तु परपुंस्पर्शो न मेऽर्हति मनागपि ॥३६१॥

तद् गच्छ शीघ्रमेवैवं सति सर्वं कृतं त्वया। गते त्वयि यदुद्योगमार्यपुत्रः करिष्यति ॥३६२॥

अथेत्थं स्माऽऽह **हनुमाने**ष गच्छाम्यहं परम्। रक्षसां दर्शयिष्यामि किञ्चिद् विक्रमचापलम् ॥३६३॥

[15]जितकाशी [16]**दशास्यो**ऽयं परवीर्यं न मन्यते। जानातु **रामभद्री**यपत्तेरपि पराक्रमम् ॥३६४॥

¶आमेत्युक्त्वाऽऽर्पयत् तस्य **सीता** चूडामणिं निजम्। नत्वा सोऽपि चचालोच्चैः पादन्यासैर्धुवन् धराम् ॥३६५॥

[17]तदेवं **देवरमणो**द्यानं भङ्क्तुं प्रचक्रमे। स वनं [18]वनद्विपवत् प्रसरत्करविक्रमः ॥३६६॥

रक्ताशोकेषु निःशूको बकुलद्रुष्वनाकुलः। सहकारेष्वकारुण्यो निष्कम्पश्चम्पकेष्वपि ॥३६७॥

अमन्दरोषो मन्दारेष्वदयः कदलीष्वपि। अन्यद्रुष्वपि रम्येषु भङ्गलीलां चकार सः ॥३६८॥युग्मम्॥

---

१. *०दौत्येन* मु.॥ २. *दौत्य०* मु.॥ ३. *वरं* ता.॥ ४. अश्रुपूर्णनयना॥ ५. *दुर्लङ्घ्य०* खं.१-२, पाता. कां. मु.॥ ६. ''इष्टपरिप्रश्ने'' इति ला.टि.॥ ७. ''जीवति'' इति ला.टि.॥ ८. सेवकं कृत्वा॥ ९. *०तोऽस्मि च* खं.२, ता.॥ १०. *विंशतेरुपवासानामन्ते व्य०* खं.१, ला. हे. कां.॥ ११. *प्रोवा०* खं.१-२, पाता. मु.॥ १२. सविनयम्॥ १३. *परिभूयैव* ता.॥ १४. लज्जयसे निजम्॥ १५. जितेन-जयेन काशते-शोभते इति जितकाशी॥ १६. *चिरं ह्येष* खं.२॥ १७. *तदैव* हे. मो. पा. छा. कां.॥ १८. *वनद्विप इव प्रसर्पत्कर०* ला.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदुद्याने चतुर्द्वारि द्वारपालाः [1]क्षपाचराः । अधावन्त निहन्तुं तं तदा मुद्गरपाणयः ॥३६९॥
**हनूमति** स्खलन्ति स्म तेषां प्रहरणानि तु । महाम्भोनिधिकल्लोला इव तीर[2]महीधरे ॥३७०॥
**पावनिः** कुपितस्तेभ्यस्तैरेवोद्यानपादपैः । प्रजहार निरायासः सर्वमस्त्रं बलीयसाम् ॥३७१॥
मङ्क्षु वृक्षानिवाऽभाङ्क्षीत् तानारक्षक्षपाचरान् । क्षुद्रानै[3]क्ष्वाकुपत्तिः स [4]समीरण इवाऽस्खलन् ॥३७२॥
**हनूमता** क्रियमाणमुद्यानरक्षसङ्क्षयम् । गत्वाऽऽचचक्षिरे केचित् [5]क्षपाचरपतेस्तदा ॥३७३॥
ततः सह बलै[6]रक्षकुमारं राक्षसेश्वरः । समादिक्ष**द्धनुमतो** घातनायाऽरि[7]घातनम् ॥३७४॥
आक्षिपन्तं [8]रणायाऽ**क्षं** बभाषे **पावनञ्जयिः** । भोजनादौ फलमिव रणादौ मे त्वमापतः ॥३७५॥
मुधा कपे! गर्जसीति तर्जयन् **रावणा**त्मजः । ववर्ष विशि[9]खैस्तीक्ष्णैरक्ष्[10]णोः प्रसररोधिभिः ॥३७६॥
**श्रीशैलो**[11]ऽपीषुवर्षेण सप्रकर्षेण [12]**रावणिम्** । पिदधे वारिभिर्द्वीपमुद्वेल इव वारिधिः ॥३७७॥
शस्त्राशस्त्रि चिरं कृत्वा कौतुका**दञ्जना**सुतः । रणपारं परिप्रे[13]प्सु**रक्षं** पशुमिवाऽवधीत् ॥३७८॥
ततो भ्रातृवधामर्षादाययौ द्रुत**मिन्द्रजित्** । **मारुते!** तिष्ठ तिष्ठेति ससौष्ठवमुदीरयन् ॥३७९॥
द्वयोरपि महाबाह्वोः कल्पान्त इव दारुणः । विश्वविक्षोभकरणश्चिरं प्रववृते रणः ॥३८०॥
वर्षन्तौ वारिधारावन्नी[14]रन्ध्राः [15]शस्त्रधोरणीः । व्योमस्थौ तावलक्ष्येतां [16]पुष्करावर्तकाविव ॥३८१॥
अन्तरीक्षं तयोरस्त्रैरास्फलद्भिर्निरन्तरैः । क्षणादजनि [17]दुष्प्रेक्षं [18]यादोभिरिव वारिधिः ॥३८२॥
मुमोच यावन्त्यस्त्राणि दुर्वारो **रावणा**त्मजः । तदनेकगुणैरस्त्रैस्तानि चिच्छेद **मारुतिः** ॥३८३॥
**हनूमद**स्त्रक्षुण्णाङ्गाः सर्वेऽपी**न्द्रजितो** भटाः । अनश्यन् [19]रक्तहृदिनीपर्वता इव जङ्गमाः ॥३८४॥
दृष्ट्वा नष्टं निजं सैन्यं स्वं च [20]मोघीकृतायुधम् । अमुञ्चन्नागपाशास्त्रं **श्रीशैलाय दशास्य**सूः ॥३८५॥
नागपाशैर्द्रढीयोभिस्तदैवाऽऽपादमस्तकम् । अबन्धि चन्दन इवाऽभितः **पवन**नन्दनः ॥३८६॥
स नागपाशबन्धोऽपि सम[21]साहि **हनूमता** । कौतुकाद्धि क्षणं दत्ते शक्तो जयमपि द्विषाम् ॥३८७॥
हृष्टेने**न्द्रजिता** निन्ये **हनूमानु**परावणम् । निरीक्ष्यमाणः फुल्लाक्षै राक्षसैर्जय[22]साक्षिभिः ॥३८८॥
**मारुतिं रावणः** स्माऽऽह दुर्मते! किं [23]कृतं त्वया ? । आजन्म मामकीनेनाऽऽश्रितौ यत् तौ तपस्विनौ ॥३८९॥
[24]वनेवासौ फलाहारौ मलिनौ मलिनांशुकौ । किराताविव तौ तुष्टौ तुभ्यं कां दास्यतः श्रियम् ? ॥३९०॥
तत्राऽपि मन्दबुद्धे! त्वं तद्वाचा किमिहाऽऽगमः ? । येनेहाऽऽयातमात्रोऽपि प्राप्तोऽसि प्राणसंशयम् ॥३९१॥
दक्षौ भूचारिणौ तौ तु [25]यत् ताभ्यां कारितोऽस्यदः । अङ्गारान् परहस्तेन कर्षयन्ति हि धूर्तकाः ॥३९२॥
यत् सेवकवरो मे त्वमद्य दूतः परस्य च । तदवध्योऽसि रे! शिक्षामात्राय तु विडम्ब्यसे ॥३९३॥
**हनुमान**प्युवाचैवं कदाऽहं तव सेवकः ? । कदा ममाऽभूस्त्वं स्वामी ? वदन्नेवं न लज्जसे ? ॥३९४॥
एकदा युधि सामन्तो बहुम्मन्यः **खरः** स ते । त्वन्मैत्र्या **वरुण**बन्धान्मत्पित्रा मोचितः पुरा ॥३९५॥
साहाय्यार्थं त्वयाऽऽहूतोऽहमप्यभ्यागमं पुरा । रणे **वरुण**पुत्रेभ्यस्त्वामरक्षं च सङ्कटे ॥३९६॥
साहाय्यस्य न योग्योऽसि साम्प्रतं पापतत्परः । [26]संभाषोऽपि हि पापाय परस्त्रीहारिणस्तव ॥३९७॥
[27]त्वदीये तं न पश्यामि यो हि त्वां [28]त्रास्यतेऽधुना । एकस्मादपि **सौमित्रे**र्दूरे **राम**स्तदग्रजः ॥३९८॥
तद्गिरा कुपितो भालाहित[29]भ्रूकुटिभीषणः । **दशाननो** दशन्नोष्ठं दशनैरिदमभ्यधात् ॥३९९॥
[30]मदरी यच्छ्रितोऽसि त्वं मां चा[31]ऽरीकृतवानसि । तन्नूनं मर्तुकामोऽसि वैराग्यं तत्र किं तव ? ॥४००॥
यथा कुष्ठविशीर्णाङ्गं मुमूर्षुमपि कोऽपि न । हत्याभयान्निहन्त्येवं हन्यात् को दूतमप्यरे! ॥४०१॥
आरोप्य रासभे [32]पञ्चशिखीकृत्य च सम्प्रति । अन्तर्लङ्कं प्रतिपथं [33]भ्राम्यसे लोकवेष्टितः ॥४०२॥

---

१. निशाचराः ॥ २. तीरस्थितपर्वते ॥ ३. ***क्षणेनैक्ष्वाकु०*** ता.; रामसैनिको हनुमान् ॥ ४. पवनः ॥ ५. रावणस्य ॥ ६. ***०रक्षःकुमारं*** ला.; तत्र "रक्षःकुमारनाम" इति ला.टि. च ॥ ७. शत्रुनाशकम् ॥ ८. ***रणायोक्षं*** ला.; ***रणायोत्कं*** हे. कां.; अक्षनामकं राक्षसकुमारं हनुमान् बभाषे इत्यर्थः ॥ ९. बाणैः ॥ १०. नेत्रयोः ॥ ११. हनुमान् ॥ १२. रावणस्याऽपत्यम् ॥ १३. अमर्यादः ॥ १४. ***परिप्रेप्सू रक्षः*** ला.; युद्धस्य पारं प्राप्तुमिच्छुः ॥ १५. निरन्तराः शस्त्रपरम्पराः ॥ १६. तौ-हनुमदिन्द्रजितौ पुष्करावर्त्तकाविवाऽलक्ष्येताम् ॥ १७. ***दुष्प्रेक्ष्यं*** खं.१, मु. रस्वीपा. ॥ १८. यादांसि जलजन्तवस्तैः ॥ १९. रुधिरनदीनां पर्वताः ॥ २०. विफलीकृतानि आयुधानि यस्य तम् ॥ २१. असह्यत ॥ २२. ***र्जयकाङ्क्षिभिः*** ला. छा. ॥ २३. ***त्वया कृतं*** ता. ॥ २४. ***वनवासौ*** ला.; वनेचरौ ॥ २५. ***यकाभ्यां*** रसंपा. ॥ २६. संलापोऽपि ॥ २७. तव परिजने ॥ २८. रक्षिष्यति ॥ २९. ***भ्रकुटि०*** ला. ॥ ३०. मम अरी-शत्रू ॥ ३१. मां शत्रुं कृतवान् ॥ ३२. मुण्डीकृत्य ॥ ३३. ***भ्रम्यसे*** हे. मो. ला. ता. छा. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्तो **मारुतिः** क्रुद्धोऽत्रोटयत् पाशपन्नगान् । बद्धो हि नलिनीनालैः कियत् तिष्ठति कुञ्जरः ? ॥४०३॥
तडिद्दण्ड इवोत्पत्य किरीटं राक्षसप्रभोः । कणशश्चूर्णयामास पादघातेन **मारुतिः** ॥४०४॥
हन्यतां गृह्यतां चैष इति जल्पति **रावणे** । अनाथामिव सोऽभाङ्क्षीत् तत्पुरीं [1]पाददर्दरैः ॥४०५॥
क्रीडां कृत्वैवमुत्पत्य [2]सुपर्ण इव **पावनिः** । **राम**मेत्याऽनमत् **सीता**चूडारत्नं [3]समर्पयन् ॥४०६॥
**सीता**चूडामणिं तं तु साक्षात् **सीता**मिवाऽऽगताम् । आरोपयामास हृदि स्पृशन् **रामो** मुहुर्मुहुः ॥४०७॥

आलिङ्ग्य **दाशरथि**ना सुतवत् प्रसादात्
पृष्टः शशंस **दशवक्त्र**विमाननां ताम् ।
**सीता**प्रवृत्तिमखिलां **हनुमान्** यथाव-
[4]दाकर्ण्यमानभुजविक्रमसम्पदन्यैः ॥४०८॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
[5]सप्तमपर्वणि **सीता**प्रवृत्त्यानयनो नाम षष्ठः[6]सर्गः ॥

---

१. पादप्रहारैः ॥ २. गरुडः ॥ ३. ***सम(मा)र्पयत्*** ला. ॥ ४. "**०दावर्ण्यमान०** इति पाठान्तरे" इति ला. प्रतौ टि. ॥ ५. ***सप्तमे*** मु. ॥ ६. ***सर्गः समाप्तः*** पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥सप्तमः सर्गः॥

अथ **रामः** स**सौमित्रिः सुग्रीवा**द्यैर्वृतो भटैः। **लङ्का**विजययात्रायै प्रतस्थे गगनाध्वना ॥१॥

**भामण्डलो नलो नीलो महेन्द्रः पावनञ्जयिः**[1] । **विराध**श्च **सुषेण**श्च **जाम्बवानङ्गदो**ऽपि च ॥२॥

महाविद्याधराधीशाः कोटिशोऽन्येऽपि तत्क्षणम्। चेलू **रामं** समावृत्य स्वसैन्यैश्छन्न[2]दिङ्मुखाः ॥३॥युग्मम्॥

विद्याधरैराहतानि यात्रातूर्याण्यनेकशः। नादैरत्यन्तगम्भीरैर्बिभराञ्चक्रुरम्बरम् ॥४॥

विमानैः स्यन्दनैरश्वैर्गजैरन्यैश्च वाहनैः। खे जग्मुः खेचराः स्वामिकार्यसिद्धावहंयवः[3] ॥५॥

¶उपर्युदन्वतो[4] गच्छन् ससैन्यो **राघवः** क्षणात्। **वेलन्धरपुरं** प्राप **वेलन्धर**महीधरे ॥६॥

**समुद्र-सेतू** राजानौ समुद्राविव दुर्धरौ। तत्र **रामा**ग्रसैन्येनाऽऽरेभाते योद्धुमुद्धतौ ॥७॥

**नलः समुद्रं सेतुं** च **नीलो**ऽबध्नान्महाभुजः। उप**राम**मनैषीच्च मनीषी[5] स्वामिकर्मणि ॥८॥

**काकुत्स्थः** स्थापयामास तथैव पुनरेव तौ। रिपावपि पराभूते महान्तो हि कृपालवः ॥९॥

**समुद्रो**ऽपि हि रूपाभिरामा **रामा**नुजन्मने। रामामतल्लिका[6]स्तिस्रः प्रददौ निजकन्यकाः ॥१०॥

उषित्वा तां निशां **सेतु-समुद्रा**नुगतः प्रगे। क्षणादासादयामास **सुवेलाद्रिं रघूद्वहः** ॥११॥

**सुवेलं** नाम राजानं जित्वा तत्राऽपि दुर्जयम्। उवासैकां निशां **रामः** प्रातर्भूयश्चचाल च ॥१२॥

उपलङ्कमथो **हंसद्वीपे हंसरथं** नृपम्। जित्वा तस्थौ कृतावासस्त[7]त्रैव **रघुपुङ्गवः** ॥१३॥

¶आसन्नस्थेऽथ **काकुत्स्थे** मीन[8]स्थित इवाऽर्कजे[9]। **लङ्का** क्षोभमुपेयाय विष्वक् प्रलयशङ्किनी ॥१४॥

[10]सन्नह्यन्ति स्म युद्धाय सामन्ता **रावण**स्य ते। **हस्त-प्रहस्त-मारीच-सारणा**द्याः सहस्रशः ॥१५॥

**रावणो** रणतूर्याणि दारुणान्यथ कोटिशः। किङ्करैस्ताडयामास द्विषत्ताडनपण्डितः ॥१६॥

तदा **दशास्य**मभ्येत्य नत्वा[11] चोचे **बिभीषणः**। क्षणं प्रसीद विमृश शुभोदर्कं वचो मम ॥१७॥

अविमृश्य पुरा चक्रे लोकद्वितयघातकम्। परदारापहरणं लज्जितं तेन ते कुलम् ॥१८॥

निजभार्यां समानेतुं **काकुत्स्थो**ऽयमुपस्थितः। आतिथ्यमिदमेवाऽस्मै तत्कलत्रार्पणं कुरु ॥१९॥

**सीतां** त्वत्तोऽन्यथा[12]कारमपि **रामो** ग्रहीष्यति। निग्रहीष्यति चाऽशेषं त्वया सह कुलं तव ॥२०॥

दूरे स्तां **राम-सौमित्री** तौ **साहस-खरान्तकौ**। तत्पत्तिरेको **हनुमान्** दृष्टो देवेन किं न हि ? ॥२१॥

इन्द्रश्रियोऽधिका श्रीस्ते तां **सीता**कारणेन मा। परिहार्षीर्भवेदेवमुभयभ्रष्टता तव ॥२२॥

अथेन्**द्रजिदु**वाचैवं त्वया ह्याजन्मभीरुणा। दूषितं नः कुलं सर्वं नाऽसि तातस्य सोदरः ॥२३॥

इन्द्रस्याऽपि विजेतारं नेतारं सर्वसम्पदाम्। तातं सम्भावयन्नेवं नूनं मूर्ख! मुमूर्षसि[13] ॥२४॥

पुराऽपि च्छलितस्तातस्त्वया ह्यनृत[14]भाषिणा। प्रतिज्ञाय **दशरथ**वधं यदकृथा न हि ॥२५॥

इहाऽऽयातं **दाशरथिं** तातादू रक्षितुमिच्छसि। दर्शयन् भयमुत्पाद्य भूचरेभ्योऽपि निस्त्रप! ॥२६॥

तन्मन्ये[15]**राम**गृह्योऽसि[16]मन्त्रेऽप्यधिकरोषि न। आप्तेन मन्त्रिणा मन्त्रः शुभोदर्को हि भूभुजाम् ॥२७॥

**बिभीषणो**ऽप्युवाचैवं शत्रु[17]गृह्यो न खल्वहम्। पुत्ररूपस्तु शत्रुस्त्वमुत्पन्नः कुलनाशकृत् ॥२८॥

अयमैश्वर्य-कामाभ्यामन्धस्तावत् पिता तव। जन्मान्ध इव रे मुग्ध! दुर्धास्य[18]! त्वं तु वेत्सि किम् ? ॥२९॥

राजन्ननेन पुत्रेण चरित्रेण निजेन च। पतिष्यस्यचिरादेव ताम्या[19]मि त्वत्कृते मुधा ॥३०॥

---

१. ***पवन०*** ला. ॥ २. ***स्वसैन्यच्छन्न०*** ता. ॥ ३. "अहङ्कारिणः" इति ला.टि. ॥ ४. समुद्रस्य ॥ ५. बुद्धिमान् ॥ ६. रामासु-स्त्रीषु मतल्लिकाः-श्रेष्ठाः ॥ ७. ***०स्तथैव*** पाता. ॥ ८. मीनराशिगते ॥ ९. "शनौ" इति ला.टि. ॥ १०. सज्जीभवन्ति ॥ ११. ***नत्वाऽवोचद् बि०*** मु. ॥ १२. अन्यप्रकारेण ॥ १३. मरण-मिच्छसि ॥ १४. ***०भाषया*** मो. ॥ १५. रामपक्षपाती ॥ १६. मन्त्राणामप्यनधिकारी ॥ १७. शत्रुपक्षीयः ॥ १८. बाल! ॥ १९. खिन्नो भवामि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रावणो**ऽप्यधिकं क्रुद्धः खड्गमाकृष्य भीषणम्। **बिभीषण**वधायोच्चैरुदस्थाद् दैवदूषितः ॥३१॥
**बिभीषणो**ऽपि भ्रुकुटीभीषणः स्तम्भमायतम्। उत्पाट्य गजवद् योद्धुमुत्तस्थावभि**रावण**म् ॥३२॥
**कुम्भकर्णेन्द्रजि**द्भ्यां तौ पतित्वा द्रुतमन्तरा। युद्धान्निषिध्य नीतौ स्वं स्थानं शालाम्[1]इव द्विपौ ॥३३॥
अरे! निर्याहि मत्पुर्या आश्रयाशो[2]ऽसि वह्निवत्। इत्युक्तो[3] **रावणे**नाऽगाद् **रामाभ्यर्णे बिभीषणः** ॥३४॥
¶रक्षो-विद्याधराणां चाऽक्षौहिण्यस्त्रिंशदुत्कटाः। हित्वा **लङ्का**धिपं सद्योऽप्यनुजग्मु**र्बिभीषणम्** ॥३५॥
आपतन्तं च तं प्रेक्ष्य **सुग्रीवाद्याः** प्रचुक्षुभुः। यथा तथा हि विश्वासः शाकिन्यामिव न द्विषि ॥३६॥
आदौ स पुरुषं प्रेष्य[4] **रामाय** स्वमजिज्ञपत्। विश्वासपात्र**सुग्रीव**मुखं **रामो**ऽप्युदैक्षत ॥३७॥
**सुग्रीवो**ऽप्यब्रवीदेते यद्यप्याजन्ममायिनः। प्रकृत्या राक्षसाः क्षुद्रास्तथाऽप्यायात्वसाविह ॥३८॥
ज्ञास्यामः प्रेषणै[5]रेव भावमस्य शुभाशुभम्। दृष्टभावानुरूपं च करिष्याम इह प्रभो! ॥३९॥
तदभिज्ञोऽभ्यधादेवं **विशालो** नाम खेचरः। महात्मा धार्मिकश्चैष रक्षःस्वेको **बिभीषणः** ॥४०॥
**सीता**मोक्षाय जल्पंश्चाऽनल्परोषेण बन्धुना। निर्वासितः शरण्यं त्वामागान्नैवैतदन्यथा ॥४१॥
श्रुत्वेति **रामो** द्वाःस्थेन **बिभीषण**मवीविशत्। पादयोः क्षिप्तमूर्धानं परिरेभे च सम्भ्रमात् ॥४२॥
**बिभीषणो**ऽप्युवाचैवं हित्वा दुर्नयमग्रजम्। त्वामागतोऽस्मि भक्तं मां तत् **सुग्रीव**वदादिश ॥४३॥
**लङ्का**राज्यं तदा तस्मै प्रत्यपद्यत **राघवः**। न मुधा भवति क्वाऽपि प्रणिपातो महात्मसु ॥४४॥
¶**हंसद्वीपे** दिनान्यष्टावतिवाह्य **रघूद्वहः**। कल्पान्तवातवल्**लङ्कां** प्रत्यचालीच्चमूवृतः ॥४५॥
चम्वा रुद्ध्वा पृथुत्वेन पृथ्व्या विंशतियोजनीम्[6]। रणाय सज्जः **काकुत्स्थो**ऽवतस्थे स्थेम[7]पर्वतः ॥४६॥
**राम**सेनाकलकलो वेला[8]ध्वनिरिवोदधेः। **लङ्कां** बधिरयामास स्फुटद्ब्रह्माण्डभूरिव ॥४७॥
**दशकन्धर**सेनान्योऽनन्यसाधारणौजसः। सद्यः संवर्मयामासुः[9] **प्रहस्ताद्याः** उदायुधाः ॥४८॥
केचिन्मतङ्गजोद्वाह्यैरपरे वाहवाहनैः[10]। शार्दूलवाह्यैरन्ये तु खरवाह्यै रथैः परैः ॥४९॥
कुबेरवन्नरैः केचिन्मेषैः केचित्तु वह्निवत्। यमवन्महिषैः केचित् केचिद् रेवन्तवद्धयैः[11] ॥५०॥
विमानैर्देववत् केचित् प्रह्वाः[12] समरकर्मणे। उत्पत्य युगपद् वीराः परिवव्रु**र्दशानन**म् ॥५१॥ त्रिभिर्विशेषकम्[13]॥
रोषारुणाक्षः सन्नह्य विविधायुधपूरितम्। अध्यास्त स्यन्दनं[14] **रत्नश्रवः**[15]प्रथमनन्दनः ॥५२॥
**भानुकर्णः** शूलपाणिर्दण्डपाणि[16]रिवाऽपरः। उपेत्य **दशकण्ठ**स्य समभूत् पारिपार्श्विकः[17] ॥५३॥
कुमारा**विन्द्रजिन्मेघवाहना**वपराविव। दोर्दण्डौ **दशकण्ठ**स्य पार्श्वयोरेत्य तस्थतुः ॥५४॥
सूनवोऽन्येऽपि दोष्मन्तः सामन्ताः कोटिशोऽपि च। **शुक-सारण-मारीच-मय-सुन्दा**दयोऽभ्ययुः ॥५५॥
अक्षौहिणीनां[18] सहस्रैरसङ्ख्यैः सङ्ख्यकर्मठैः[19]। दिशः प्रच्छादयन् पुर्याः प्रचचाल **दशाननः** ॥५६॥
शार्दूलकेतवः केचित् केचिच्छरभ[20]केतवः। चमूरु[21]केतवः केचित् केचित् करटि[22]केतवः ॥५७॥
मयूरकेतवः केचित् केचित् पन्नगकेतवः। मार्जारकेतवः केचित् केचित् कुक्कुटकेतवः ॥५८॥
कोदण्डपाणयः केचित् केचिन्निस्त्रिंश[23]पाणयः। मुषण्ढी[24]पाणयः केचित् केचिद् मुद्गरपाणयः ॥५९॥
त्रिशूलपाणयः केचित् केचित् परिघपाणयः। कुठारपाणयः केचित् केचिच्च प्रास[25]पाणयः ॥६०॥
विपक्षवीरान् वृण्वन्तो[26] नामग्राहं मुहुर्मुहुः। **दशास्य**वीराश्चतुरं विचेरू रणकर्मणे[27] ॥६१॥ पञ्चभिः कुलकम्॥
**वैताढ्य**स्येव सैन्यस्य प्रथिम्ना[28]ऽऽच्छाद्य मेदिनीम्। पञ्चाशद् योजनान्यस्थाद् **रावणो** रणकर्मणे ॥६२॥
स्वनायकान् प्रशंसन्तो निन्दन्तः परनायकान्। परस्परं चाऽऽक्षिपन्तः कथयन्तो मिथोऽभिधाः[29] ॥६३॥

१. हस्तिशालाम् ॥ २. ***आश्रयासो०*** ला.; आश्रयमेवाऽश्नाति-भक्षयति यः सः ॥ ३. ***इत्युक्ते*** ता. ॥ ४. ***प्रेक्ष्य*** ला. ॥ ५. गूढपुरुषैः ॥ ६. ***योजनविंशतिम्*** खं.१ ॥ ७. बलेन पर्वत इव ॥ ८. पूर्ध्वनिः ॥ ९. कवचान् परिधापयामासुः ॥ १०. उष्ट्रवाहनैः ॥ ११. सूर्यपुत्रवदश्वैः ॥ १२. "तत्पराः" इति ला.टि. ॥ १३. खं.१-२, पाता. ला.प्रतिषु न ॥ १४. रथम् ॥ १५. रावणः ॥ १६. "यमः" इति ला.टि. ॥ १७. ***०पार्श्वकः*** मु. ॥ १८. "अक्षौहिणीसङ्ख्या– गज २१७८०, रथ २१७८०, अश्व ६५६१०, पदाति १०९३५०" इति पाता.प्रतौ टि. ॥ १९. सङ्ग्रामनिपुणैः ॥ २०. शरभोऽष्टापदः, स केतौ येषां ते ॥ २१. चमूरुर्मृगविशेषः ॥ २२. करटी गजः ॥ २३. "खड्ग" इति ला.टि. ॥ २४. ***मुशुण्डी०*** मु.; ***मुषुण्ढी*** रसंपा., "मुषुण्ढी स्याद् दारुमयी, वृत्तायःकीलसञ्चिता (अ.चिं.शेष०)" ॥ २५. ***पाश०*** खं.२-पाता.विना ॥ २६. ***पृच्छन्तो*** मु. ॥ २७. ***०कर्मणि*** मु. ॥ २८. पृथुत्वेन ॥ २९. नामानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्त्राण्यस्त्रैर्वादयन्तः करास्फोटपुरःसरम् । **राम-रावणयोः** [१]सैन्याः मिमिलुः कांस्यतालवत् ॥६४॥युग्मम्॥
गच्छ गच्छ तिष्ठ तिष्ठ मा भैषीरु[२]त्सृजाऽऽयुधम् । कुरुष्वाऽऽयुधमित्या[३]जौ भटानां तत्र वागभूत् ॥६५॥
शल्यानि[४] शङ्कवो बाणाश्चक्राणि परिघा गदाः । समुत्पेतुर्द्वयोश्चम्वोर्व[५]नान्तर्विहगा इव ॥६६॥
खड्गैर्मिथो घातभग्नैर्वेगात् कृत्तैश्च[६] मौलिभिः । उच्छलद्भिरभून्ना[७]नाकेतु-राह्विव खं तदा ॥६७॥
सुभटा मुद्गराघातैर्लोठयन्तो द्विपान् मुहुः । [८]दण्ड-कन्दुकिनीं क्रीडां तन्वाना इव रेजिरे ॥६८॥
कुठारघातैराच्छिन्ना भटानामपरैर्भटैः । [९]पञ्चशाखाः पतन्ति स्म शाखाः [१०]शाखावतामिव ॥६९॥
वीराः शिरांसि वीराणां छित्त्वा भूमौ प्रचिक्षिपुः । बुभुक्षिताय की[११]नाशायोचितान् कवलानिव ॥७०॥
रक्षसां वानराणां च युद्धे तस्मिन् महौजसाम् । [१२]दायादानां धनमिव जयः साध्योऽभवच्चिरम् ॥७१॥
चिरं प्रवर्तमाने च समरे तत्र वानरैः । अभञ्जि राक्षसबलं काननवन्म[१३]हाबलैः ॥७२॥
भग्ने रक्षोबले **हस्त-प्रहस्तौ** योद्धुमुद्यतौ । वानरैः सह [१४]**लङ्केश**जय[१५]प्रतिभुवौ [१६]तदा ॥७३॥
द्वयोरपि तयोर्युद्धा[१७]ध्वरदीक्षितयोरथ । सम्मुखीनावुदस्थातां **नल-नीलौ** महाकपी ॥७४॥
**हस्तो नल**श्चाऽऽदितोऽपि सम्मुखीनौ महाभुजौ । रथारूढावमिलतां [१८]वक्रावक्रग्रहाविव ॥७५॥
आस्फालयामासतुस्तावधिज्यीकृत्य धन्वनी । ज्यानादेन मिथो युद्धनिमन्त्रणपराविव ॥७६॥
तथा ववृषतुर्बाणांस्तौ द्वावपि परस्परम् । शरशूलैर्यथाऽभूतां रथौ [१९]श्वाविन्निभौ तयोः ॥७७॥
क्षणं **नले** क्षणं **हस्ते**ऽभूतां जयपराजयौ । तद्बलान्तरमज्ञायि न तत्र निपुणैरपि ॥७८॥
[२०]सभ्यीभूतस्ववीराणामग्रे ह्री[२१]णो **नलो** बली । अविह[२२]स्तो **हस्त**शिरः क्षुरप्रेणाऽच्छिदत् क्रुधा ॥७९॥
सद्यः **प्रहस्तं नीलो**ऽपि **हस्तं नल** इवाऽवधीत् । दिवोऽभूत् पुष्पवृष्टिश्चोपरिष्टान्न**ल-नील**योः ॥८०॥
**हस्त-प्रहस्त**निधनाद् **दशानन**बले क्रुधा । **मारीचः सिंहजघनः स्वयम्भूः सारणः शुकः** ॥८१॥
**चन्द्राऽर्कोद्दाम-बीभत्साः कामाक्षो मकरो ज्वरः । गम्भीरः सिंहर[२३]थाश्वरथा** अन्येऽप्युप[२४]सरन् ॥८२॥युग्मम्॥
[२५]**मदनाङ्कुर-सन्ताप-प्र[२६]थिताक्रोश-नन्दनाः । दुरितानघ-पुष्पास्त्र-विघ्न-प्रीतिकरा**दयः ॥८३॥
कपयो राक्षसैः सार्धमयुध्यन्त पृथक् पृथक् । उत्पत[२७]न्तः पतन्तश्च कुक्कुटैरिव कुक्कुटाः ॥८४॥युग्मम्॥
**मारीच**रक्षः **सन्तापं नन्दनो ज्वर**राक्षसम् । **उद्दाम**राक्षसो **विघ्नं शुकं दुरित**वानरः ॥८५॥
राक्षसः **सिंहजघनः प्रथितं** नाम वानरम् । योधयित्वा दृढं जघ्नुर्यावस्तं च भास्करः ॥८६॥[२८]युग्मम्॥
द्वयोरपि हि सैन्यानि **राम-रावण**योस्ततः । निवृत्याऽस्थुः शोधयन्तः स्वान् हतानहतानपि ॥८७॥
वि[२९]भातायां विभावर्यां प्रत्यर्कं [३०]दानवा इव । **प्रतिराम**बलं रक्षोयोधा योद्धुं डुढौकिरे ॥८८॥
मध्येसैन्यं **दशास्यो** भूमध्ये मेरुरिवाऽचलः । [३१]गजरथ्यरथारूढश्चचाल रणकर्[३२]मणे ॥८९॥
बिभ्राणो विविधान्यस्त्राण्यन्तकादपि भीषणः । तत्कालारुणया शत्रून् दृशाऽपि हि दहन्निव ॥९०॥
पश्यन् प्रत्येकमप्यात्मसेनान्यं [३३]शतमन्युवत् । मन्यमानस्तृणायाऽरीन् **रावणो**ऽगाद् रणावनिम् ॥९१॥युग्मम्॥
तेऽपि **राघव**सेनान्यः सैन्यैः सह महौजसः । वीक्ष्यमाणा दिव्य[३४]मरैः समरायोपतस्थिरे ॥९२॥
सनदीकमिव क्वाऽपि रक्तवारिभिरुद्धतैः । उत्पर्वतमिव क्वाऽपि पतितै[३५]र्गुरुकुञ्जरैः ॥९३॥
क्वचिच्चोन्मकरमिव म[३६]करास्यै रथच्युतैः । उद्दन्तमिव च क्वाऽपि [३७]सामिभग्नैर्महारथैः ॥९४॥
उत्ताण्डवैः [३८]कबन्धैश्च नृत्तस्थानमिव क्वचित् । अजायत क्षणेनाऽपि [३९]समराजिरभूतलम् ॥९५॥त्रिभिर्विशेषकम्॥

---

१. सैनिकाः ॥ २. त्यज ॥ ३. युद्धभूमौ ॥ ४. तोमराणि,कीलकाः ॥ ५. *०र्वनयो०* रसंपा. ॥ ६. छिन्नैर्मस्तकैः ॥ ७. अनेके केतवो राहवश्च यस्मिन् तद्-आकाशम् ॥ ८. "गेडीदडानी" इति ला.टि. ॥ ९. "हस्ताः" इति ला.टि.; "पञ्चशाखः शयः पाणिः(अमरः)" ॥ १०. वृक्षाणाम् ॥ ११. यमाय ॥ १२. भाग-ग्राहकाणाम् ॥ १३. "वायुभिः" इति ला.टि.; "मातरिश्वा जगत्प्राणः, पृषदश्वो महाबलः(अ.चिं.)" ॥ १४. ***लङ्केशजये*** छा. पा. ॥ १५. "पट्टू" इति ला.टि. ॥ १६. ***सदा*** ता. विना ॥ १७. युद्धयज्ञे दीक्षितयोः ॥ १८. वक्रोऽवक्रश्च द्वौ ग्रहौ, तयोर्मिलनवत् ॥ १९. श्वावित्-"शाहुडी" ॥ २०. ***सभ्यीभूय०*** पाता. ॥ २१. लज्जितः ॥ २२. "अनाकुलः" इति ला.टि. ॥ २३. ***सिंहरथ्याश्वरथ्या०*** खं.१-२, पाता. ॥ २४. "ढौकिताः" इति ला.टि. ॥ २५. रामपक्षीयसुभट-नामानि ॥ २६. ***०प्रतापा०*** ला. ॥ २७. ***उत्पतन्तो निपतन्तः कुर्कुटै०*** ता. ॥ २८. "दिनः प्रथमः" इति ला.टि. ॥ २९. प्रभातसमये जाते ॥ ३०. सूर्यं प्रति दानवा योद्धुमायान्तीति लौकिकशास्त्रप्रसिद्धिः ॥ ३१. गजा रथ्या-रथवोढारो यस्यैतादृशं रथमारूढः ॥ ३२. ***०कर्मणि*** पाता. ॥ ३३. इन्द्रवत् ॥ ३४. दिवि अमरैः ॥ ३५. ***पतितैः कपि०*** खं.१-२, पाता. मु.; ***पतितैः करि०*** ला. पा. छा. ता. ॥ ३६. मकरमुखैः, काष्ठमयमकराकृतयो रथे निक्षिप्यन्ते स्म ॥ ३७. अर्धभग्नैः ॥ ३८. छिन्नमस्तकैः कलेवरैः ॥ ३९. "सङ्ग्रामाङ्गणभूमितलं" इति ला.टि. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶अथ **रावण**हुङ्कारप्रेरितै रजनीचरैः । सर्वैः [1]सर्वाभिसारेण कपिसैन्या बभञ्जिरे ॥९६॥
क्रुद्धः स्वसैन्यभङ्गेन **सुग्रीवो**ऽधिज्यकार्मुकः । स्वयं चचाल चलयन्नचलां प्रबलैर्बलैः ॥९७॥
राजन्निहैव तिष्ठ त्वं ममैवेक्षस्व विक्रमम् । एवं निषिध्य **सुग्रीवं हनुमान**चलद् युधि ॥९८॥
**हनुमान्** राक्षसानीकमनेकानीकदुर्मदम् । दुर्गाहमप्यगाहिष्ट महाब्धिमिव मन्दरः ॥९९॥
अथ पर्जन्यवद् गर्जन्नूर्जितं युधि दुर्जयः । अढौकत धनु[2]स्तूणमाली **माली हनूमते** ॥१००॥
**हनुमन्मालिनौ** वीरौ धनुष्टङ्कारकारिणौ । पु[3]च्छास्फोटकरौ सिंहाविवोद्दामौ विरेजतुः ॥१०१॥
अस्त्रै**र्मालि-हनूमन्तौ** प्रजह्राते परस्परम् । चिच्छेदाते मिथोऽस्त्राणि मिथोऽतर्जयतां च तौ ॥१०२॥
चिरं च युद्ध्वा **हनुमान् मालिनं** वीर्यशालिनम् । चक्रे निरस्त्रं निस्तोयं ग्रीष्मार्क इव पल्वलम् ॥१०३॥
गच्छ गच्छ जरद्रक्षः! किं हतेन त्वया ननु ? । इति ब्रुवाणं **श्रीशैल**मेत्य **वज्रोदरो**ऽवदत् ॥१०४॥
अरे रे! म्रियसे पाप! वदन्नेवं हि [4]कद्वद! । एह्येहि युध्यस्व मया न भवस्येष मा स्म गाः ॥१०५॥
**मारुति**स्तद्वचः श्रुत्वा ह[5]क्कामिव मृगाधिपः । बूत्कुर्वन्[6]नुर्वहङ्कारश्छादयामास तं शरैः ॥१०६॥
तद्बाणवृष्टिं निर्धूय शरै**र्वज्रोदरो**ऽपि तम् । ति[7]रयामास मार्तण्डं प्रावृट्काल इवाऽम्बुदैः ॥१०७॥
अहो! **वज्रोदरो** वीरो योऽलमस्मै **हनूमते** । अहो! वीरः **पावनि**र्योऽलं **वज्रोदर**रक्षसे ॥१०८॥
एवं गिरो रणक्रीडा[8]सदस्यानां दिवौकसाम् । असहिष्णुर्द्विषज्जिष्णु**र्हनुमान्** मानपर्वतः ॥१०९॥
वर्षन् युगपदस्त्राणि चित्राण्युत्पातमेघवत् । **वज्रोदरं** तमवधीत् पश्यतामपि रक्षसाम् ॥११०॥त्रिभिर्विशेषकम्॥
¶**वज्रोदर**वधक्रुद्धो **रावणिर्जम्बुमाल्य**थ । तर्जन् **मारुति**माह्वास्त [9]प्रतिकार इव द्विपम् ॥१११॥
उभावपि महामल्लावन्योऽन्यवधकाङ्क्षिणौ । युयुधाते चिरं बाणैः पन्नगैर्वार्ति[10]काविव ॥११२॥
इषुभ्यः[11] प्रतियच्छन्तौ द्विगुणद्विगुणानिषून् । परस्परं प्रापतुस्ता[12]वधमर्णोत्तमर्णताम् ॥११३॥
क्रुद्धोऽथ कृत्वा **हनुमान**रथ्यरथसारथिम् । तं द्विषं ताडयामास मुद्गरेण गरीयसा ॥११४॥
मूर्च्छितो **जम्बुमाल्यु**र्व्यां नि[13]पपाताऽऽ[14]पपात च । रुषा **महोदरो** रक्षोवीरो वर्षञ्[15]छिलीमुखान् ॥११५॥
अन्येऽपि राक्षसभटा **हनूमन्तं** जिघांसवः । जात्यश्वान इव [16]क्रोडं वेष्टयामासुरुच्चकैः ॥११६॥
दोष्णोः केऽपि मुखे केऽपि केऽप्यंह्र्योर्हृदि केऽपि च । कुक्षौ केऽपि शरैस्तीक्ष्णैर्जघ्निरे ते **हनूमता** ॥११७॥
अन्तर्वणं दव इव मध्येऽम्भोधीव वाडवः । मध्येरक्षोबलं वीरश्चकासामास **मारुतिः** ॥११८॥
क्षणादभाङ्क्षीद् रक्षांसि तमांसीव दिवाकरः । महौजसां [17]शिरोरत्नं **पवनञ्जय**नन्दनः ॥११९॥
¶रक्षोभङ्गेन संक्रुद्धः **कुम्भकर्णो**ऽथ शूलभृत् । ईशा[18]न इव भूमिष्ठः स्वयं योद्धुमधावत ॥१२०॥
कानप्यंह्रिप्रहारेण मुष्टिघातेन कानपि । कांश्चित् [19]कूर्परघातेन [20]तलघातेन कांश्चन ॥१२१॥
कांश्चिन्मुद्गरघातेन शूलघातेन कां[21]श्चन । कानप्यन्योऽन्यघातेन **कुम्भकर्णो**ऽवधीत् कपीन् ॥१२२॥युग्मम्॥
कल्पान्तार्णवकल्पं तमापतन्तं [22]तरस्विनम् । **रावणा**नुजमालोक्य **सुग्रीवः** समधावत ॥१२३॥
**भामण्डलो दधिमुखो महेन्द्रः कुमुदोऽङ्गदः** । अपरेऽप्यन्वधावन्त प्रदीपन[23]इवोद्यते ॥१२४॥
**दशानना**नुजं पञ्चाननं व्याधा इवाऽरुधन् । वर्षन्तोऽस्त्राणि चित्राणि युगपद् वानरोत्तमाः ॥१२५॥
[24]**प्रस्वापनास्त्रं** तेषूच्चैः कालरात्रिमिवाऽपराम् । रात्रिञ्च[25]रवरोऽमुञ्चदमोघं मुनिवाक्यवत् ॥१२६॥
निद्रायमाणं स्वं सैन्यं दिवा कुमुदखण्डवत् । दृष्ट्वा सस्मार **सुग्रीवो** महाविद्यां [26]**प्रबोधिनीम्** ॥१२७॥
[27]अरे! क्व **कुम्भकर्णो**ऽस्तीत्युच्चैस्तुमुलकारिणः । उत्तस्थुर्वानरभटाः खगा इव निशात्यये ॥१२८॥
उपाद्रवन् **कुम्भकर्ण**माकर्णाकृष्टकार्मुकाः । **सुग्रीवा**धिष्ठिताः सुष्ठुयोधिनः कपिकुञ्जराः ॥१२९॥

---

१. सर्वबलेन॥ २. "चापभस्त्रधारी" इति ला.टि.;(बाणनां भाथांवाळो)॥ ३. ***पुच्छाच्छोट०*** ता.॥ ४. कुत्सितं वदति॥ ५. ***हक्कारमिव केसरी*** खं.२,ता.॥ ६. महागर्विष्ठः॥ ७. छादयामास॥ ८. "सभ्यानां" इति ला.टि.॥ ९. हस्तिपकः; "कुन्तारः" इति ला.टि.॥ १०. गारुडिकौ॥ ११. "यतः प्रतिनिधिप्रतिदाने प्रतिना(सि.२-२-७२)"इति पञ्चम्यत्र॥ १२. अधमर्णः-ऋणदाता, उत्तमर्णः-ऋणग्रहीता॥ १३. ***निपपातोत्प०*** ता. मु.॥ १४. "आगात्" इति ला.टि.॥ १५. बाणान्॥ १६. सूकरम्॥ १७. महौजसां पुरुषाणां मूर्धन्यः-हनुमान्॥ १८. ईशानेन्द्रः शङ्करो वा॥ १९. कूर्परः कोणिः॥ २०. चपेटाघातेन॥ २१. ***कानपि*** ता.॥ २२. "वेगवन्तं" इति ला.टि.॥ २३. अग्नौ॥ २४. "निद्रास्त्रं" इति ला.टि.॥ २५. रात्रिञ्चरेषु-निशाचरेषु वरः-कुम्भकर्णः॥ २६. ***प्रबोधनीम्*** ता.॥ २७. ***अरेरे!*** ता.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सुग्रीवो** दलयामास **कुम्भकर्ण**स्य सारथिम्। रथं [१]रथ्यांश्च गदयाऽगदङ्कारो[२] गदानिव ॥१३०॥
भूमिष्ठः **कुम्भकर्णो**ऽथ हस्तेनो[३]दस्तमुद्गरः। एकशृङ्गो गिरिरिव **सुग्रीवा**याऽभ्यधावत ॥१३१॥
युद्धार्थं धावतस्तस्याऽङ्गवातेन गरीयसा। भूयांसः कपयः पेतुः करिस्पर्शेन वृक्षवत् ॥१३२॥
[४]प्लवङ्गैरस्खलितः स्थलैरिव [५]नदीरयः। **सुग्रीव**रथमाहत्याऽचूर्णयन्मुद्गरेण सः ॥१३३॥
खे समुत्पत्य **सुग्रीवः** शिलामेकां महीयसीम्। मुमोच **कुम्भकर्णा**य वज्री वज्रमिवाऽद्रये ॥१३४॥
**कुम्भकर्णो** मुद्गरेण तां शिलां कणशोऽकरोत्। औत्[६]पातिकीं रजोवृष्टिं कपीनां दर्शयन्निव ॥१३५॥
तडत्तडिति कुर्वाणं **तडिद्दण्डा**स्त्रमुत्कटम्। **रावणा**व[७]रजायाऽथ **वालि**नो[८]ऽवरजोऽमुचत् ॥१३६॥
**तडिद्दण्डाय** चण्डाय तस्मै शस्त्राण्यनेकशः। **कुम्भकर्णः** प्रचिक्षेप मो[९]घीभूतानि तानि तु ॥१३७॥
[१०]**कुम्भकर्णः** पपातोर्व्यां **तडिद्दण्डेन** ताडितः। जगद्भयङ्कराकारः कल्पान्त इव पर्वतः ॥१३८॥
मूर्च्छिते भ्रातरि क्रुद्धः स्वयमेव **दशाननः**। साक्षादिवाऽन्तकोऽचालीद् भ्रुकुं[११]टीभीषणाननः ॥१३९॥
नत्वेन्द्र**जित्** तमित्यूचे स्वामिंस्तव पुरो रणे। न **यमो वरुणो** नाऽपि न **कुबेरो** न वा **हरिः** ॥१४०॥
तिष्ठन्ति किं तु[१२] प्लवगा एवैते देव! तिष्ठ तत्। गत्वैष तान् हनिष्यामि रुष्टो म[१३]शकमुष्टिवत् ॥१४१॥
निषिध्यैवं **दशग्रीवं** [१४]मानोद्ग्रीवः स **शक्रजित्**। [१५]आघ्नानः प्रविवेशाऽन्तःकपिसैन्यं महाभुजः ॥१४२॥
[१६]कासारः कासरस्येव भेकैरापततः सतः। कपिभिर्मुमुचे तस्य समरोर्वी महौजसः ॥१४३॥
स त्रस्यतः कपीनूचे रे रे! तिष्ठत वानराः!। अयुध्यमानान्नो हन्मि **रावण**स्याऽस्मि नन्दनः ॥१४४॥
क्व **मारुतिः**? क्व **सुग्रीव**स्ताभ्यामप्यथवा कृतम्। क्व नु तौ **राम-सौमित्री** अ[१७]भ्यमित्रीयमानिनौ ॥१४५॥
इति ब्रुवाणं दोर्दर्पादमर्षारुणितेक्षणः। रणायाऽऽह्वत **सुग्रीव**स्तं **दशग्रीव**नन्दनम् ॥१४६॥
**भामण्डलो**ऽपीन्द्र**जितो**ऽ[१८]वरजं **मेघवाहनम्**। आयोधयितुमारेभे शरभं शरभो यथा ॥१४७॥
दिग्गजा इव चत्वारश्चत्वार सागरा इव। आस्फालन्तः शुशुभिरे ते त्रिलोकीभयङ्कराः ॥१४८॥
गतागतैस्तत्प्रधानामकम्पत वसुन्धरा। चकम्पिरे सानुमन्तश्चुक्षोभ च महोदधिः ॥१४९॥
बुबुधे नाऽन्तरं तेषां बाणाकर्षण-मोक्षयोः। अत्यन्तलघुहस्तानामवि[१९]हस्तत्वशालिनाम् ॥१५०॥
[२०]आयसैर्दैवतै[२१]रस्त्रैरयुध्यन्त चिराय ते। परं न कोऽपि केनाऽपि तेषां मध्यादजीयत ॥१५१॥
अथो मुमुचतुः क्रुद्धावि**न्द्रजिन्मेघवाहनौ**। **सुग्रीव-भामण्डलयोर्नागपाशास्त्र**मुद्धतम् ॥१५२॥
**नागपाशै**स्तथा बद्धौ **भामण्डल-कपीश्वरौ**। [२२]अनीश्वरौ निःश्वसितुमप्यभूतां यथा हि तौ ॥१५३॥
¶इतश्च लब्धसञ्ज्ञेन **कुम्भकर्णे**न रोषतः। गदया ताडितः पृथ्व्यां **मारुति**र्मूर्च्छितोऽपतत् ॥१५४॥
दोष्णा [२३]तक्षककल्पेन तं करीव करेण सः। स[२४]मुद्दध्रे वलयितेनाऽ[२५]न्तःकक्षं न्यधत्त च ॥१५५॥
ऊचे **बिभीषणो रामं** स्वामिन्नेतौ हि ते बले। बलीयसौ सारभूतावानने नयने इव ॥१५६॥
[२६]बद्धौ **वैदे**[२७]**हि-सुग्रीवौ** [२८]**रावणि**भ्यां महोरगैः। याव**ल्लङ्कां** न नीयेते तावत् तौ मोचयाम्यहम् ॥१५७॥
**हनुमान् कुम्भकर्णे**न बद्धो दोष्णा महौजसा। **लङ्का**मप्राप्त एवाऽयं मोचनीयो **रघूद्वह!** ॥१५८॥
स्वामिन्! विना हि **सुग्रीव-भामण्डल-हनूमतः**। अवीरमिव नः सैन्यमनुजानीहि यामि तत् ॥१५९॥
एवं तत्र ब्रुवत्येव वेगाद् गत्वाऽ**ङ्गदो** भटः। आक्षिप्य **कुम्भकर्णे**न युयुधे युद्धकोविदः ॥१६०॥
क्रोधान्ध्यात् **कुम्भकर्णे**न प्रोत्क्षिप्तभुजपाशतः। ययौ **मारुति**रुत्पत्य विहङ्ग इव पञ्जरात् ॥१६१॥
**बिभीषणो** मोचयितुं **भामण्डल-कपीश्वरौ**। **रावणि**भ्यां समं योद्धुमधावत रथस्थितः ॥१६२॥
दध्यतुश्चे**न्द्रजिन्मेघवाहना**वेष नः पितुः। अनुजः स्वयमभ्येति कर्तुमस्माभिरा[२९]हवम् ॥१६३॥

१. अश्वान्॥ २. वैद्यो रोगानिव॥ ३. उदस्तः-ऊर्ध्वीकृतः मुद्गरो येन सः॥ ४. वानरैः॥ ५. नदीवेगः॥ ६. *उत्पातिकीं* मु.॥ ७. कुम्भकर्णाय॥ ८. सुग्रीवः॥ ९. विफलीभूतानि॥ १०. *भानुकर्णः* खं.१-२, ला. हे. कां. पा. छा.॥ ११. *भ्रुकुटी०* ला.॥ १२. *किं नु* मु.॥ १३. 'मच्छर' इति भाषा॥ १४. मानेनोर्ध्वग्रीवः॥ १५. घ्नन्॥ १६. तडागो महिषस्य इव॥ १७. आभिमुख्येन अमित्रान् शत्रून् अलङ्गामी अभ्यमित्रीयः, आत्मानं अभ्यमित्रीयं मन्यमानौ, वीरमानिनौ इत्यर्थः; "वैरिभूतौ" इति टि.ला.॥ १८. लघुभ्रातरम्॥ १९. "अव्याकुलितत्व" इति टि. ला.॥ २०. लोहमयैः॥ २१. *शास्त्रै०* ता.॥ २२. असमर्थौ॥ २३. तक्षको नागः॥ २४. *समुद्दधे* ला.॥ २५. कक्षायाम्॥ २६. *बद्ध्वा* कां. ला. पा. छा.॥ २७. भामण्डलः॥ २८. रावणपुत्राभ्याम्॥ २९. युद्धम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेन तातकल्पेन योद्धव्यं कथमद्य हा! । इतोऽपसरणं युक्तं न [1]ह्रीः पूज्याद्धि बिभ्यताम् ॥१६४॥
पाशबद्धाविमौ चाऽरी निश्चितं हि मरिष्यतः । इहैव हि तदासातां तातो नाऽन्वेति नौ यथा ॥१६५॥
विचिन्त्यैवं नेशतुस्तौ धीमन्तौ **रावणी** रणात् । पश्यन् **बिभीषण**श्चाऽस्थाद् **भामण्डल-कपीश्वरौ** ॥१६६॥
चिन्ताम्लानाननौ तत्र तस्थतू **राम-लक्ष्मणौ** । हि[2]मानीच्छन्नवपुषौ सूर्याचन्द्रमसाविव ॥१६७॥
**रामभद्र**स्ततः पूर्वप्रतिपन्नवरं सुरम् । **महालोचन**मस्मार्षीत् **सुपर्णा**मरपुङ्गवम् ॥१६८॥
ज्ञात्वा चाऽवधिनाऽभ्येत्य ददौ [3]**पद्माय** सोऽमरः । विद्यां **सिंहनिनादा**ख्यां मुशलं स्यन्दनं हलम् ॥१६९॥
**लक्ष्मणा**य ददौ विद्यां **गारुडीं** स्यन्दनं तथा । गदां च **विद्युद्व**[4]**दनां** समरे रि[5]पुनाशिनीम् ॥१७०॥
वरुणा-ऽऽग्नेय-वायव्यप्रमुखाण्यपराण्यपि । दिव्यान्यस्त्राणि छत्रे च स ददावुभयोरपि ॥१७१॥
**सौमित्रे**र्वाहनीभूतं गरुडं प्रेक्ष्य तत्क्षणम् । **सुग्रीव-भामण्डल**योः प्रणेशुः पाशपन्नगाः ॥१७२॥
जज्ञे जयजयारावो **राम**सैन्ये समन्ततः । रक्षोबलमिवाऽस्तं च ययौ देवोऽब्जिनीपतिः ॥१७३[6]॥
प्रातर्भूयोऽपि सैन्यानि **रघूद्वह-दशास्य**योः । [7]सर्वाभिसारसाराणि रणाङ्गणमुपासरन् ॥१७४॥
तेषां कृतान्तदन्ताभस्फुरदस्त्रभयङ्करः । अ[8]काण्डारब्धसंवर्तः प्रावर्तत महारणः ॥१७५॥
क्रुद्धैर[9]क्षोभि रक्षोभिर्वानराणां [10]वरूथिनी । मध्याह्नतापसन्तप्तैः सरसी सूकरैरिव ॥१७६॥
भग्नप्रायां चमूं प्रेक्ष्य **सुग्रीवाद्या** महौजसः । रक्षोऽनीकेषु विविशुर्योगिनोऽन्यवपुःष्विव ॥१७७॥
विदुद्रुवू राक्षसास्तेऽप्याक्रान्तास्तैः कपीश्वरैः । नागा इव [11]गरुत्मद्भि[12]रद्भिरामघटा इव ॥१७८॥
रक्षोभङ्गेन संक्रुद्धो दधावे **रावणः** स्वयम् । महारथप्रचारेण दारयन्निव मेदिनीम् ॥१७९॥
तस्य प्रसरतो दाववह्नेरिव [13]तरस्विनः । मुहूर्तमपि नाऽग्रेऽस्थात् कपिवीरेषु कश्चन ॥१८०॥
तद्युद्धे चलितं **रामं** निषिध्य [14]प्रश्रयादथ । **बिभीषणः** क्षणादेत्य रुरोध **दशकन्धरम्** ॥१८१॥
तं **रावणो**ऽवदद् रे रे! कं श्रितोऽसि **बिभीषण!** । क्रुद्धस्य मम येनाऽऽजौ क्षिप्तः कवलवन्मुखे ॥१८२॥
व्याधेनेव [15]किरौ श्वानं मयि त्वां रे! प्रह्वि[16]ण्वता । **रामे**ण मन्त्रितं साधु साध्विदं ह्या[17]त्मरक्षिणा ॥१८३॥
अद्याऽपि मम वात्सल्यं त्वयि वत्साऽस्ति गच्छ तत् । एतौ ह्यद्य हनिष्यामि ससैन्यौ **राम-लक्ष्मणौ** ॥१८४॥
अमीषां वध्यमानानां मा सङ्ख्यापूरणः स्म भूः । एहि स्वस्थानमेव त्वं [18]पृष्ठे हस्तोऽयमद्य ते ॥१८५॥
**बिभीषणो**ऽप्युवाचैवं **रामो**ऽन्तक इव स्वयम् । अचालीत् त्वां प्रति क्रुद्धो निषिद्धश्च मया [19]च्छलात् ॥१८६॥
त्वां बोधयितुकामोऽहं युद्धव्याजादिहाऽऽगतः । अद्याऽपि मुच्यतां **सीतां**[20] प्रसीद कुरु मद्वचः ॥१८७॥
हन्त! मृत्युभयान्नाऽहं राज्यलोभेन नाऽपि वा । गतोऽस्मि **रामं** नि[21]र्वादभयात् किं तु **दशानन!** ॥१८८॥
**सीतार्पणे**न निर्वादं प्रणाशय यथा ह्यहम् । पुनरेव श्रयामि त्वां विहाय **रघुपुङ्गवम्** ॥१८९॥
क्रुद्धोऽथ **रावणः** प्रोचे किमद्याऽपि बिभीषि[22]काम् । रे **बिभीषण!** दुर्बुद्धे! प्रदर्शयसि कातर! ? ॥१९०॥
भ्रातृहत्याभयादुक्तोऽस्येवं नाऽन्येन हेतुना । इत्युक्त्वाऽस्फालयामास का[23]र्मुकं **दशकन्धरः** ॥१९१॥
भ्रातृहत्याभयादुक्तो[24]ऽस्येवं नाऽन्येन हेतुना । इत्युक्त्वाऽस्फालयामास धनुः सोऽपि **बिभीषणः** ॥१९२॥
ततः प्रववृताते तौ भ्रातरौ योद्धुमुद्यतौ । चित्राण्यस्त्राणि कर्षन्तौ वर्षन्तौ च निरन्तरम् ॥१९३॥
¶अथे**न्द्रजित्कुम्भकर्णौ** राक्षसा अपरेऽपि च । स्वामिभक्त्याऽभ्यधावन्त कृतान्तस्येव किङ्कराः ॥१९४॥
**रामो**ऽरौत्सीत् **कुम्भकर्णं लक्ष्मणो रावणिं** पुनः । नीलस्तु **सिंहजघनं** [25]**दुर्मर्षं**[26]**श्च घटोदरम्** ॥१९५॥
**स्वयम्भूर्दुर्मतिं शम्भुं नलवीरो**ऽ**ङ्गदो मयम्** । **स्कन्दः** पुनश्च**न्द्रणखं विघ्नं चन्द्रोदरा**त्मजः ॥१९६॥
**केतुं भामण्डल**नृपः **श्रीदत्तो जम्बुमालिनम्** । **कुम्भकर्ण**सुतं **कुम्भं पवनञ्जय**नन्दनः ॥१९७॥
**किष्किन्धेशः सुमाला**ख्यं **कुन्दो** [27]**धूम्राक्ष**राक्षसम् । **वालिसूश्चन्द्ररश्मिश्च** भटं **सारण**राक्षसम् ॥१९८॥

१. लज्जा ॥ २. महद् हिमं हिमानी, तया छन्नं वपुर्ययोस्तौ ॥ ३. रामाय ॥ ४. *विद्युद्गमनां* ता. ॥ ५. *०नाशनीम्* ता. ॥ ६. ''दिन २'' इति टि.ला. ॥ ७. सर्वौघसाराणि ॥ ८. अकाण्डे आरब्धः संवर्तः-क्षयः यत्र ॥ ९. अक्षोभि-क्षुब्धा ॥ १०. सेना ॥ ११. गरुडैः ॥ १२. जलैरपक्कघटा इव ॥ १३. वेगवतः ॥ १४. प्रणयात् ॥ १५. ''शूकरे'' इति टि.ला. ॥ १६. प्रेषयता ॥ १७. *ह्यात्मरक्षणम्* मु.; *ह्यात्मरक्षणात्* मो. ॥ १८. *पृष्ठौ* ला. ॥ १९. *बलात्* मु. ॥ २०. *सीता* खं.१-२, पाता. ॥ २१. अपवादभयात् ॥ २२. भीतिम् ॥ २३. धनुः ॥ २४. *०ऽप्येवं* ला. ॥ २५. *दुर्मुखस्तु* पाता. ला. ॥ २६. *०स्तु* खं.१-२ ॥ २७. *धूम्राक्ष०* खं.१-२, पाता.; *धूमाख्य०* ला. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राक्षसानेव[1]मन्यानप्यरौत्सुः कपयोऽपरे। अयुध्यन्त च तैः सार्धं नक्रैर्नक्रा इवाऽर्णवे ॥१९९॥
एवं युद्धे वर्तमाने भीषणेभ्योऽपि भीषणे। **लक्ष्मणा**याऽमुचत् क्रोधादस्त्रं **तामसमिन्द्रजित्** ॥२००॥
तदस्त्रं **तपनास्त्रे**ण **सौमित्रिः** शत्रुतापनः। सद्यो विद्रावयामासाऽग्निना [2]मदनपिण्डवत् ॥२०१॥
**सौमित्रिर्नागपाशास्त्रं** मुमोचेन्द्र**जिते** क्रुधा। तन्तुनाऽम्भसि हस्तीव स तेन द्रागबध्यत ॥२०२॥
आक्रम्यमाणसर्वाङ्गो **नागास्त्रे**ण **दशास्य**[3]सूः। निपपाताऽ[4]शनिरिव दारयन् [5]सागराम्बराम् ॥२०३॥
चिक्षेप [6]स्वरथाङ्के तं **विराधो लक्ष्मणा**ज्ञया। कारापाल इवाऽनैषीन्निजे [7]च शिबिरे द्रुतम् ॥२०४॥
**नागपाशैः कुम्भकर्णं** त्वबध्नाल्ल**क्ष्मणा**ग्रजः। **भामण्डल**स्तं शिबिरेऽनैषीद् **रामा**ज्ञया ततः ॥२०५॥
अन्येऽपि प्रतियोद्धारो बद्धा **राम**स्य सैनिकैः। **मेघवाहन**मुख्यास्ते निन्यिरे शिबिरे निजे ॥२०६॥
¶दृष्ट्वा **दशमुख**स्तत् तु क्रोधशोकसमाकुलः। **बिभीषणा**य चिक्षेप शूलं मूलं जयश्रियः ॥२०७॥
तच्छूलमन्तरालेऽपि कदलीकाण्डलीलया। चकार कणशो **रामा**वरजः [8]पत्रिभिः शितैः ॥२०८॥
**धरणेन्द्र**प्रदत्तां ताम**मोघविजया**ह्वयाम्। विजयार्थी **दशग्रीवो** महाशक्तिं समुद्दधे ॥२०९॥
धगद्धगिति ज्वलन्तीं तडत्तडिति नादिनीम्। [9]संहाराब्दतडिल्लेखामिव खेऽभ्रमयत् स ताम् ॥२१०॥
अपसस्रुर्दिवि सुरा दृशं सैन्या[10] न्यमीलयन्। तां विलोक्य न केऽप्यस्थुः [11]सुस्थितं सुस्थिता अपि ॥२११॥
**रामः सौमित्रि**मित्यूचेऽस्माकमेष **बिभीषणः**। [12]आगन्तुर्हन्यते हन्त धिग् न आश्रितघातिनः ॥२१२॥
इति **राम**वचः श्रुत्वा **सौमित्रि**र्मित्रवत्सलः। **बिभीषणा**ग्रे गत्वाऽस्थादाक्षिपन् **दशकन्धर**म् ॥२१३॥
पुरःस्थं गरुडस्थं तं प्रेक्ष्योवाच **दशाननः**। न तुभ्यं शक्तिरुत्क्षिप्ता मा मृथाः परमृत्युना ॥२१४॥
म्रियस्व यदि वा मार्यस्त्वमेवाऽसि यतो [13]मम। वराकस्त्वत्पदे ह्येष ममाऽग्रेऽस्थाद् **बिभीषणः** ॥२१५॥
इत्युक्त्वा भ्रमयित्वा तां शक्तिं **रामा**[14]नुजन्मने। मुमोच [15]पतदुत्पाताशनिकल्पां **दशाननः** ॥२१६॥
तामापतन्तीं **सौमित्रिः सुग्रीवो हनुमान् नलः**। **भामण्डलो विराधो**ऽन्येऽप्यस्त्रैः स्वैः स्वैरताडयन् ॥२१७॥
साऽवज्ञाय तदस्त्रौघं व्यालद्विप इवाऽङ्कुशम्। [16]और्वानल इवाऽम्भोधौ **लक्ष्मणो**रःस्थलेऽपतत् ॥२१८॥
तया भिन्नो महीपृष्ठे निपपात च **लक्ष्मणः**। उत्पपात च तत्सैन्ये विष्वग् हाहारवो महान् ॥२१९॥
क्रुद्धोऽथ ज्येष्ठ[17]**काकुत्स्थो** जि[18]घत्सुरिव **रावण**म्। आयोधयितुमारेभे पञ्चाननरथस्थितः ॥२२०॥
क्षणाच्चकार विरथं पञ्चाननरथो द्विषम्। **दशानननो**ऽपि वेगेनाऽध्यारुरोह रथान्तरम् ॥२२१॥
भङ्क्त्वा भङ्क्त्वा रथानेवं पञ्च वारान् **दशानन**म्। **काकुत्स्थो** विरथीचक्रे [19]जगदद्वैतपौरुषः ॥२२२॥
**दशास्यो**ऽचिन्तयच्चैवं भ्रातृस्नेहादयं स्वयम्। मरिष्यत्येव तत् किं मे योधितेना[20]ऽमुनाऽधुना ? ॥२२३॥
**दशग्रीवो** विमृश्यैवं ययौ **लङ्कापुरीं** द्रुतम्। अस्तं जगाम च रविः **राम**शोकादिवाऽऽतुरः ॥२२४॥
¶भग्नेऽथ **रावणे रामो** निवृत्त्येयाय **लक्ष्मण**म्। तं च दृष्ट्वा निपतितं पपात भुवि मूर्च्छितः ॥२२५॥
**सुग्रीवा**दिभिरासिक्तो **राम**श्चन्दनवारिणा। लब्धसञ्ज्ञो निषद्यो[21]प**सौमित्री**त्यगदद् रुदन् ॥२२६॥
तव किं बाधते वत्स! ? ब्रूहि तूष्णीं स्थितोऽसि किम् ?। सञ्ज्ञयाऽपि समाख्याहि प्रीणयाऽग्रजमात्मनः ॥२२७॥
एते त्वन्मुखमीक्षन्ते **सुग्रीवा**द्यास्तवाऽनुगाः। नाऽनुगृह्णासि किं वाचा दृशा वा प्रियदर्शन! ? ॥२२८॥
जीवन् रणाद् **रावणो**ऽगादिति लज्जावशाद् ध्रुवम्। न भाषसे तद् भाषस्व पूरयिष्ये तवेप्सितम् ॥२२९॥
रे रे **रावण**! दुष्टात्मंस्तिष्ठ तिष्ठ क्व यास्यसि ?। एष प्रस्थापयामि त्वां [22]नचिराय [23]महापथे ॥२३०॥
इत्युक्त्वा धनुरास्फाल्योदस्थाद् यावद् **रघूद्वहः**। तावत् कपीश्वरेणैवमूचे विनयपूर्वकम् ॥२३१॥
स्वामिन्! निशेयमगम**ल्लङ्कां** च स निशाचरः। शक्तिप्रहारविधुरः स्वामी नश्चैष वर्तते ॥२३२॥
धैर्यमाधेहि जानीहि हतमेव **दशानन**म्। प्रतिजागरणोपायं **सौमित्रे**रेव चिन्तय ॥२३३॥

---

१. *०मन्योऽन्यमरौत्सुः* पाता.प्रभृतिषु, मु. ॥ २. मदनः'मीण' ॥ ३. *दशास्यभूः* ता. ॥ ४. वज्रमिव ॥ ५. पृथ्वीम् ॥ ६. स्वरथोत्सङ्गे ॥ ७. *तं* ला. ॥ ८. तीक्ष्णैर्बाणैः ॥ ९. प्रलयकालीनमेघस्य विद्युल्लेखामिव ॥ १०. सैनिकाः ॥ ११. *सुस्थिता अपि दुःस्थिता* खं.२ ॥ १२. अतिथिः ॥ १३. *ममाऽग्रतः* मो. ॥ १४. *रामानुजाय ताम्* खं.२ ॥ १५. पतद् यदुत्पातोल्का-तत्तुल्याम् ॥ १६. *उर्वानलः* मु.;वडवानलः ॥ १७. रामः ॥१८. भक्षणेच्छुः ॥ १९. जगति अद्वितीयपराक्रमः ॥ २०. *योधितेनाऽधुनाऽमुना* मु. ॥ २१. सौमित्रिसमीपम् ॥ २२. शीघ्रम् ॥ २३. मृत्युपथे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूयो **रामो** जगादैवं हृता भार्या हतोऽनुजः । तिष्ठत्यद्याऽपि **रामो**ऽयं शतधा न विदीर्यते ॥२३४॥
सखे **सुग्रीव! हनुमन्! भामण्डल! नलाऽङ्गद!** । **विराधा**द्याश्च सर्वेऽपि यात स्वौकसि सम्प्रति ॥२३५॥
**सीता**पहारात् **सौमित्रि**वधादप्यधिकं शुचे[1] । सखे! **बिभीषणा**ऽभूस्त्वं यत् कृतार्थीकृतोऽसि न[2] ॥२३६॥
प्रातः पश्य परं बन्धो! निजबान्धववर्त्मना[3] । नीयमानं स्वबन्धुं[4] तं बन्धुरूपेण वैरिणम् ॥२३७॥
प्रातः कृतार्थीकृत्य त्वामनुयास्यामि **लक्ष्मणम्** । **लक्ष्मणं** हि विना किं मे **सीत**या जीवितेन वा ? ॥२३८॥
**बिभीषणो** बभाषेऽथ किमधैर्यमिदं प्रभो! ? । शक्त्या हतोऽपि ह्यनया पुमान् जीवति यामिनीम्[5] ॥२३९॥
मन्त्र-तन्त्रादिना घातप्रतीकाराय[6] सर्वथा । प्रयत्यतां प्रभो! यावन्न विभाति विभावरी[7] ॥२४०॥
आमेति **राघवे**णोक्ते **सुग्रीवा**द्यास्तु विद्यया । सप्त वप्रांश्चतुर्द्वारान् **राघवौ** परितो व्यधुः ॥२४१॥
प्राच्यां द्वारेषु तत्राऽस्थुः **सुग्रीवः पावनञ्जयिः** । **तारः कुन्दो दधिमुखो गवाक्षो गवयः** क्रमात् ॥२४२॥
उदीच्याम**ङ्गदः कूर्मोऽङ्गो महेन्द्रो विहङ्गमः** । **सुषेणश्चन्द्ररश्मि**श्च द्वारेष्वस्थुः क्रमादमी ॥२४३॥
प्रतीच्यां **नील-समरशील-दुर्धर-मन्मथाः** । **जय**श्च **विजय**श्चैव **सम्भव**श्चाऽवतस्थिरे ॥२४४॥
**भामण्डलो विराधश्च गजो भुवनजिन्नलः** । **मैन्दो**[8] **बिभीषण**श्चाऽस्थुर्दक्षिणस्यां क्रमादमी ॥२४५॥
मध्ये कृत्वेति **काकुत्स्थौ सुग्रीवा**द्या महाभुजाः । प्रजागरपरा[9]स्तस्थुरात्मारामा[10] इवोद्यता ॥२४६॥
¶**सीता**याः कश्चिदाचख्यौ यच्छक्त्या **लक्ष्मणो** हतः । प्रातर्विपत्स्यते **रामभद्रो**ऽपि भ्रातृसौहृदात् ॥२४७॥
वज्रनिर्घोषवद् घोरं तच्छ्रुत्वा **जनका**त्मजा । पपात मूर्च्छया पृथ्व्यां लतेव पवनाहता ॥२४८॥
विद्याधरीभिरम्भोभिः संसिक्ता लब्धचेतना । उत्थाय विललापैवं **जानकी** करुणस्वरम् ॥२४९॥
हा वत्स! **लक्ष्मण**! क्वाऽगास्त्यक्त्वैकाकिनमग्रजम् । मुहूर्तमपि हि स्थातुं विना त्वामेष न क्षमः ॥२५०॥
धिगहं मन्दभाग्याऽस्मि यतो मम कृतेऽधुना । स्वामि-देवरयोर्दैवतुल्ययोरीदृगागतम् ॥२५१॥
प्रसीद मत्प्रवेशाय द्विधा भव वसुन्धरे! । प्राणनिर्याण[11]हेतोस्त्वं भव वा हृदय! द्विधा ॥२५२॥
एवं रुदन्तीं करुणं **सीतां** काऽपि कृपावती । अवलोक्याऽ**वलोकिन्या** विद्याधर्यब्रवीदिति ॥२५३॥
भविष्यत्यक्षताङ्ग[12]स्ते प्रभाते देवि! देवरः । समं च **रामभद्रे**ण त्वामेत्याऽऽनन्दयिष्यति ॥२५४॥
स्वस्थावस्था तद्गिराऽस्थात् **काकुत्स्थ**[13]गृहिणी तदा । सूर्योदयं चिन्तयन्ती चक्रवाकीव जाग्रती ॥२५५॥
¶**सौमित्रि**र्मारितोऽद्येति क्षणं जहर्ष **रावणः** । क्षणं स्मृत्वा भ्रातृ-पुत्र-मित्रबन्धं[14] रुरोद च ॥२५६॥
हा वत्स! **कुम्भकर्ण!** त्वं ममाऽऽत्मैवाऽपरः परः । द्वितीयाविव मे बाहू हे[15]**न्द्रजिन्मेघवाहनौ!** ॥२५७॥
हा वत्सा! **जम्बुमाल्याद्या!** मम रूपान्तरोपमाः! । अप्राप्तपूर्वं प्राप्ताः स्थ कथं बन्धं गजा इव ? ॥२५८॥
स्मारं स्मारं स्वबन्धूनामित्थं बन्धादि नूतनम् । भूयो भूयो **दशग्रीवो** मुमूर्च्छ च रुरोद च ॥२५९॥
¶इतश्च **पद्मसैन्ये**ऽ[16]वाक्प्राकारद्वाररक्षकम् । **भामण्डल**मुपेत्यैवं कोऽपि विद्याधरोऽवदत् ॥२६०॥
**पद्म**पादान् दर्शय मे तदाप्तो ननु यद्यसि । अहं[17] **लक्ष्मण**जीवातु[18]माख्यास्यामि हितोऽस्मि वः ॥२६१॥
विधृत्य पाणिना दोष्णि नीतो **भामण्डलेन** सः । **पद्म**स्य पादपद्मान्ते प्रणम्यैवं व्यजिज्ञपत् ॥२६२॥
**सङ्गीतपुर**नाथस्य **शशिमण्डल**भूपतेः । तनयः **प्रतिचन्द्रो**ऽहं **सुप्रभा**कुक्षिसम्भवः ॥२६३॥
क्रीडार्थं सकलत्रोऽहं चलितोऽन्येद्युरम्बरे । दृष्टः **सहस्रविजय**नाम्ना विद्याधरेण च ॥२६४॥
तेन मैथुनिकाद्[19] वैराद् योधितोऽहं चिरं तदा । पातितश्च**ण्डरवया** शक्त्या चाऽऽहत्य भूतले ॥२६५॥
**साकेतपुर्यां माहेन्द्रोदयो**द्याने लुठन् भुवि । दृष्टश्च **भरते**नाऽहं त्वद्भ्रात्राऽतिकृपालुना ॥२६६॥
सद्यो गन्धाम्बुभिस्तेन सिक्तोऽहं पृथिवीभुजा । मत्तश्च निरगाच्छक्तिर्दस्युः[20] परगृहादिव ॥२६७॥
सद्यो रूढप्रहारेण मया विस्मितचेतसा । पृष्टो गन्धाम्बुमाहात्म्य[21]मित्यशंसत् तवाऽनुजः ॥२६८॥

१. शोकाय ॥ २. 'त्वं अस्माभिः कृतार्थो न कृतः' इति विचारोऽस्माकं महते शोकाय भवति ॥ ३. लक्ष्मणवर्त्मना मृत्युरूपेणेत्यर्थः ॥ ४. स्वस्य-तव बन्धुं-रावणम् ॥ ५. रात्रिम् ॥ ६. *प्रतिकाराय* ता. ॥ ७. रात्रिः ॥ ८. *मन्दो* पाता. ला.; *मैन्दो* खं.१-२ ॥ ९. जागरूकाः ॥ १०. योगिनः ॥ ११. *प्राणनिर्वाण* मु., रस्वीपा.; प्राणनिर्गमनहेतुना ॥ १२. *भविष्यति शुभाङ्गस्ते* ला. ॥ १३. सीता ॥ १४. बन्धनम् ॥ १५. हा! इन्द्र० इति पदच्छेदः ॥ १६. *०सैन्ये प्राक्०* मु., रस्वीपा.; "दक्षिणोत्पन्न" इति टि.ला. ॥ १७. *अलं* मु., रस्वीपा. ॥ १८. जीवनौषधम् ॥ १९. मैथुननिमित्तकात् ॥ २०. चौरः ॥ २१. *गन्धाम्बुमाहात्म्यं शशंसैवं तवा०* ला. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶सार्थवाहो **विन्ध्य**नामाऽभ्यगाद् **गजपुरा**दिह । एकस्तन्महिषो मार्गेऽतिभारात्रुटितोऽपतत् ॥२६९॥
तन्मूर्ध्नि पादं विन्यस्य सञ्चचार पुरीजनः । उपद्रवेण महता विपन्नः सोऽथ सैरिभः[1] ॥२७०॥
सोऽकामनिर्जरायोगाच्छ्वे**तङ्करपुरे**श्वरः । सुरो **वायुकुमारो**ऽभून्नाम्ना **पवनपुत्रकः** ॥२७१॥
ज्ञात्वा चाऽवधिना पूर्वं मृत्युं प्रकुपितोऽथ सः । पुरे जनपदे चाऽस्मिन् व्याधीन् नानाविधान् व्यधात् ॥२७२॥
देशे गृहे च न व्याधिरभून्मन्मातुलस्य[2] तु[3] । **द्रोणमेघ**नरेन्द्रस्य मन्महीवर्तिनोऽपि हि ॥२७३॥
अव्याधिकारणं पृष्टो मया **द्रोणघनो**ऽवदत् । भार्या **प्रियङ्करा** मेऽभूत् पुराऽतिव्याधिबाधिता ॥२७४॥
जाते गर्भे तत्प्रभावाद् व्याधिना[4]ऽमुच्यताऽथ सा । सुषुवे च क्रमात् पुत्रीं **विशल्याम**भिधानतः ॥२७५॥
त्वद्देश इव मद्देशेऽप्युद्भूते व्याध्युपद्रवे । **विशल्या**स्नानतोयेन सिक्तो लोकोऽभवद् विरुक्[5] ॥२७६॥
पृष्टो मया **सत्यभूतशरणो**[6] मुनिरन्यदा । वंदति[7] स्म **विशल्यायाः** प्राग्जन्मतपसः फलम् ॥[8]२७७॥
व्रणसंरोहणं शल्यापहारो व्याधिसङ्क्षयः । नृणां स्नानाम्भसाऽप्यस्या भावी भर्ता च **लक्ष्मणः** ॥२७८॥
तया मुनिगिरा सम्यग्[9] जातादनुभवादपि । **विशल्या**स्नानपयसः प्रभावो निश्चितो मया ॥२७९॥
इत्युदित्वा **द्रोणमेघो विशल्या**स्नपनोदकम् । ममाऽपि ह्यार्पयत् तेनाऽभवद् भूमिर्[10]ममाऽप्यरुक् ॥२८०॥
तस्याः स्नानाम्भसाऽनेन मया सिक्तस्त्वमप्यहो! । निःशक्तिशल्यः संरूढव्रणश्च संमभूः[11] क्षणात् ॥२८१॥
**भरत**स्य ममाऽप्येवमुत्पन्नः[12] प्रत्ययः प्रभो! । आं[13] प्रत्यूषादानयत **विशल्या**स्नानवारि तत् ॥२८२॥
त्वर्यतां त्वर्यतां तस्मात् प्रत्यूषे किं करिष्यथ ? । पर्यस्ते[14] शकटे हन्त किं कुर्वीत गणाधिपः[15] ? ॥२८३॥
¶**भामण्डलं हनूमन्तमङ्गदं** च **रघूद्वहः** । आदिशत् प्रति**भरतं विशल्या**स्नानवारिणे ॥२८४॥
प्रययुस्ते विमानेना**ऽयोध्यां** पवनरंहसा[16] । प्रासादाङ्के च ददृशुः शयानं **भरतं** नृपम् ॥२८५॥
**भरत**स्य प्रबोधाय ते गीतं चक्रुरम्बरे । राजकार्येऽपि राजान उत्थाप्यन्ते ह्युपायतः ॥२८६॥
विबुध्य **भरते**नाऽपि दृष्टः पृष्टः पुरो नमन् । ऊचे **भामण्डलः** कार्यं नाऽऽप्तस्याऽऽप्ते प्ररोचना[17] ॥२८७॥
सेत्स्यत्येतन्मया तत्रेयुषेति **भरत**स्ततः । तद्विमानाधिरूढोऽगात् पुरं **कौतुकमङ्गलम्** ॥२८८॥
**भरतेन द्रोणघनो विशल्या**मथ याचितः । सहोद्वाह्य[18] स्त्रीसहस्रसहितां तामदत्त च ॥२८९॥
**भामण्डलो**ऽप्ययोध्यायां मुक्त्वा **भरत**मुत्सुकः । आययौ सपरीवारो **विशल्या**संयुतस्ततः ॥२९०॥
ज्वलद्दीपविमानस्थो भीतैः सूर्योदयभ्रमात् । क्षणं दृष्टो निजैः सोऽधाद् **विशल्यामुपलक्ष्मणम्** ॥२९१॥
तया च पाणिना स्पृष्टा**ल्लक्ष्मणात्** तत्क्षणादपि । निर्जगाम महाशक्तिर्यष्टिनेव महोरगी[19] ॥२९२॥
समुत्पतन्ती सा शक्तिः समुत्पत्य **हनूमता** । प्रसभं जगृहे श्येनविहगेनेव वर्तिका[20] ॥२९३॥
साऽप्यूचे देवतारूपा न मे दोषोऽस्ति कश्चन । प्रदत्ता **धरणे**नाऽस्मै **प्रज्ञप्ति**भगिनी ह्यहम् ॥२९४॥
**विशल्या**प्राग्भवतपस्तेजः सोढुमनीश्वरी । एषा यास्यामि मां मुञ्च प्रैष्य[21]भावादनागसम्[22] ॥२९५॥
इत्युक्तो मुक्तवान् शक्तिं **मारुति**स्तां महाभुजः । मुक्तमात्रा च सा शक्तिर्लज्जितेव तिरोदधे ॥२९६॥
**विशल्या**ऽपि हि **सौमित्रिं** भूयः पस्पर्श पाणिना । विलिलेप च गोशीर्षचन्दनेन शनैः शनैः ॥२९७॥
रूढव्रणोऽथ **सौमित्रि**र्द्राक् प्रसुप्त इवोत्थितः । सस्वजे **रामभद्रेण** वर्षताऽश्रु[23]जलं मुदा ॥२९८॥
सर्वं **विशल्या**वृत्तान्तं **राम**स्तस्मै शशंस च । तत्स्नानपयसा चाऽऽशु स्वान् परांश्चा[24]ऽभ्यषेचयत् ॥२९९॥

१. महिषः ॥ २. *०रभून्मे मातुल०* खं.२ ॥ ३. **च** खं.१-२ ॥ ४. ***व्याधिना मुमुचेऽथ०*** ला. ॥ ५. रोगरहितः ॥ ६. ***सत्यभूतिः०*** पाता.; ***सत्यभूतचारणो*** हे. मो. ॥ ७. *निजगाद* मो. ॥ ८. अत्र स्थाने ला.सञ्ज्ञकप्रतौ टिप्पितं गाथात्रिकमेवं—
" एवं साऽणंगसरा, वाससहस्साणि तिण्णि तवचरणं । काऊण य संविग्गा, ववसइ संलेहणं तत्तो ॥१॥
पच्चक्खिअ आहारं, चउव्विहं देहमाइअं सव्वं । भणइ अ हत्थसयाओ, एओ पुरओ ण गंतव्वं ॥२॥
निअमस्स छट्ठदिवसे, वोलीणे नवरि खेअरो एक्को । नामेण लद्धिआसो, पणमिअ मेरुं पडिनिअत्तो ॥३॥इति वृद्धपद्मचरिते ॥"
मुद्रिते पउमचरिए(पद्मचरिते) तु उ.६३, गाथा : ४९-५०-५१(पृ.३८८) ॥
९. ***सम्यग् ज्ञाना०*** ता.विना सर्वप्रतिषु, मु. ॥ १०. भूमिर्देशः ॥ ११. ***त्वमभूः*** मु. ॥ १२. ***०मुत्पन्नप्रत्ययं*** खं.१, पाता. ॥ १३. प्रातःकालात् पूर्वम् ॥ १४. भग्ने; 'उल्ललिते' इति टि. ला. ॥ १५. 'गणेशः' इति टि. ला. ॥ १६. पवनवेगेन ॥ १७. प्रस्तावना-प्रीतिवाक्यं(खुशामत) ॥ १८. सह 'लक्ष्मणेन' इत्यध्याहारः; अथवा 'सः'-द्रोणघनः, 'ह' इति स्फुटार्थेऽव्ययम् ॥ १९. सर्पिणी ॥ २०. 'चटिका' इति टि. ला.; 'चकली' ॥ २१. ***प्रैष्य०*** मु. ॥ २२. 'अपराधरहितां' इति टि. ला. ॥ २३. ***वर्षताऽस्रु०*** खं.१-२, पाता. ॥ २४. रावणभटान् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कन्यासहस्रसहितां **विशल्यां राम**शासनात् । तदानीमेव **सौमित्रि**रुपयेमे यथाविधि ॥३००॥
**सौमित्रे**र्जीवनोद्वाहोत्साहजन्मा महोत्सवः । विद्याधरनृपैश्चक्रे जगदाश्चर्यकारणम् ॥३०१॥
¶**सौमित्रि**र्जीवित इति चरैर्[1]नक्तञ्चराधिपः । विज्ञाय मन्त्रयाञ्चक्रे समं मन्त्रिवरैरिति ॥३०२॥
अभवन्मम भावोऽयं **सौमित्रिः** शक्तिताडितः । प्रातर्मरिष्यति ततो **रामो**ऽपि स्नेहपीडितः ॥३०३॥
यास्यन्ति कपयो नंष्ट्वा ते च मद्बन्धु-सूनवः । **कुम्भकर्णेन्द्रजि**न्मुख्याः स्वयमेष्यन्ति मामिह ॥३०४॥
अधुना दैववैगुण्या**ल्लक्ष्मणः** सोऽपि जीवितः । मया मोचयितव्यास्ते **कुम्भकर्णा**दयः कथम् ? ॥३०५॥
मन्त्रिणोऽप्येवमूचुस्तं **जानकी**मोक्षणं विना । न मोक्षः **कुम्भकर्णा**दिवीराणां प्रत्युताऽशिवम् ॥३०६॥
इयत्यपि गते स्वामिन्! रक्ष रक्ष निजं कुलम् । उपायश्चाऽत्र नाऽन्योऽस्ति **रामा**नुनयनं विना ॥३०७॥
**रावण**स्तानवज्ञाय दूतं **सामन्त**मादिशत् । [2]साम-दान-दण्डपूर्वमनुशिष्योप**राघवम्** ॥३०८॥
स गत्वा द्वाःस्थविज्ञप्तः **सुग्रीवा**दिसमावृतम् । **पद्मनाभं** नमस्कृत्य व्याजहारेति धीरगीः ॥३०९॥
**दशास्य**स्त्वां वदत्येवं बन्धुवर्गं विमुञ्च मे । [3]**जानकी**मनुमन्यस्व राज्यार्धं च गृहाण मे ॥३१०॥
त्रीणि कन्यासहस्राणि तुभ्यं दास्यामि, तेन [4]च । [5]सन्तुष्य, नो चेत् ते सर्वं न ह्येतन्न च जीवितम् ॥३११॥
बभाषे **पद्मनाभो**ऽथ नाऽर्थो मे राज्यसम्पदा । न चाऽन्यप्रमदावर्गभोगेन महताऽपि हि ॥३१२॥
प्रेषयिष्यत्यर्चयित्वा **जानकीं रावणो** यदि । तदा मोक्ष्यामि तद्बन्धु-तनयानन्यथा न हि ॥३१३॥
**सामन्तः** पुनरप्यूचे **राम**! नैतत् तवोचितम् । स्त्रीमात्रकस्याऽस्य कृते स्वं क्षेप्तुं प्राणसंशये ॥३१४॥
**सौमित्रि**रेकवारं चेज्जीवितो **रावणा**हतः । जीविष्यति कथं सोऽद्य त्वं चाऽमी च प्लवङ्गमाः ? ॥३१५॥
एकोऽपि **रावणो** हन्तुमिदं विश्वमपीश्वरः । सर्वथा तद्वचो मान्यम्[6]उदर्कं विमृश स्वयम् ॥३१६॥
**लक्ष्मण**स्तद्गिरा क्रुद्धोऽभ्यधाद् रे दूतपांशन! । स्वशक्तिं परशक्तिं वा वेत्त्यद्याऽपि न **रावणः** ॥३१७॥
[7]हत-बद्धपरीवारो भार्याशेषीकृतोऽपि सन् । पौरुषं नाटयत्येष एषा का तस्य धृष्टता ? ॥३१८॥
शेषै[8]कमूलमुशलश्छिन्नाशेषजटस्तरुः । यथा सोऽपि तथैकाङ्गः कियत् स्थास्यति **रावणः** ॥३१९॥
तद् गच्छ संवाहय तं युद्धाय **दशकन्धरम्** । कृतान्त इव सज्जो मे तं व्यापादयितुं भुजः ॥३२०॥
**लक्ष्मणे**नैवमाक्षिप्तो विभाषितुमनाः स तु । उत्थाय धृत्वा ग्रीवायां वानरैर्निरवास्यत ॥३२१॥
**रावणा**य स गत्वाऽऽख्यत् सर्वं **राघव**[9]वाचिकम् । सचिवान् **रावणो**ऽप्यूचे किं कार्यं ? ब्रूत सम्प्रति ॥३२२॥
अब्रुवन् मन्त्रिणोऽप्येवं **सीतार्पण**मिहोचितम् । [10]व्यतिरेकफलं दृष्टं पश्याऽन्वयफलं प्रभो! ॥३२३॥
अन्वय-व्यतिरेकाभ्यां सर्वं कार्यं परीक्ष्यते । एकेन व्यतिरेकेण किं स्थितोऽसि **दशानन**! ? ॥३२४॥
अक्षता [11]बहवोऽद्याऽपि बन्धवः सूनवश्च ते । **सीतार्पणा**द् विमुक्तैस्तैः सममेधस्व सम्पदा ॥३२५॥
तेषां **सीतार्पण**गिरा मर्मणीव हतोऽधिकम् । अन्तर्दूनो **दशमुख**श्चिरं स्वयमचिन्तयत् ॥३२६॥
¶विद्याया **बहुरूपाया** हृदि निर्णीय [12]साधनम् । **शान्ति**चैत्यं ययौ शान्तकषायी[13]भूय **रावणः** ॥३२७॥
स्नात्रं **श्रीशान्तिनाथ**स्य पयस्कुम्भै**र्दशाननः** । स्वयमिन्द्र इवाऽकार्षीद् भक्त्या विकसिताननः ॥३२८॥
गोशीर्षचन्दनेनाऽङ्गरागं पुष्पैश्च दैवतैः । पूजां विधाय **श्रीशान्तेः** स्तुतिमेवं विनिर्ममे ॥३२९॥
देवाधिदेवाय जगत्तायिने परमात्मने । श्रीमते **शान्तिनाथाय** षोडशायाऽर्हते नमः ॥३३०॥
**श्रीशान्तिनाथ**! भगवन्! भवाम्भोनिधि[14]तारण! । सर्वार्थ[15]सिद्धिमन्त्राय त्वन्नाम्नेऽपि नमो नमः ॥३३१॥
ये तवाऽष्टविधां पूजां कुर्वन्ति परमेश्वर! । अष्टाऽपि सिद्धयस्तेषां करस्था अणिमादयः ॥३३२॥
धन्यान्यक्षीणि यानि त्वां पश्यन्ति प्रतिवासरम् । तेभ्योऽपि धन्यं हृदयं [16]तद्दृष्टो येन धार्यसे ॥३३३॥
देव! त्वत्पादसंस्पर्शादपि स्यान्निर्मलो जनः । अयोऽपि हेमीभवति स्पर्शवेधिरसान्न किम् ? ॥३३४॥

१. रावणः ॥ २. ***सामदाम०*** मु. ॥ ३. सीतां मम समर्पयेत्यर्थः ॥ ४. ***वा*** ता. ॥ ५. सन्तुष्टो भव ॥ ६. उदर्कः फलमुत्तरम् ॥ ७. ***हतबन्धु०*** मु. खं.१-२, पाता. ॥ ८. यस्य वृक्षस्य मूले मुशलमात्रमेव अवशिष्टं, शेषा जटाः छिन्नाः, तादृशमूलयुक्ततरुरिव ॥ ९. लक्ष्मणसन्देशम् ॥ १०. सीतार्पणाभावेऽनर्थरूपं फलं दृष्टं इति व्यतिरेकः, अधुना सीतार्पणरूपस्याऽन्वयस्य फलं पश्य ॥ ११. ***बाहवो०*** पाता. ॥ १२. ***साधनाम्*** ता. ॥ १३. ***०भूतरावणः*** पाता. ता.; शान्तकषायो भूत्वा ॥ १४. ***०तारणे*** पाता. ॥ १५. ***सर्वार्थसिद्ध०*** ला. विना ॥ १६. तैरक्षिभिर्दृष्टः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वत्पादाब्जप्रणामेन नित्यं [1]भूलुठनै: प्रभो! । शृङ्गारतिलकीभूयान्मम भाले [2]किणावलि: ॥३३५॥
पदार्थै: पुष्प-गन्धाद्यैरु[3]पहारीकृतैस्तव । प्रभो! भवतु मद्राज्यसम्पद्वल्लेः सदा फलम् ॥३३६॥
भूयो भूय: प्रार्थये त्वामिदमेव जगद्विभो! । भगवन्! भूयसी भूयात् त्वयि भक्तिर्भवे भवे ॥३३७॥
स्तुत्वेति **शान्तिं लङ्केश:** पुरो रत्नशिलास्थित: । तां साधयितुमारेभे विद्याम[4]क्षस्रजं दधत् ॥३३८॥
¶अथ **मन्दोदरी** द्वा:स्थं **यमदण्ड**मदोऽवदत् । जिनधर्मरतोऽष्टाहान्यस्तु सर्वोऽपि पूर्जन: ॥३३९॥
न करिष्यति यस्त्वेवं तस्य दण्डो वधात्मक: । भविष्यतीति **लङ्का**यामाघोषय [5]हेतानक: ॥३४०॥
तदादेशेन स द्वा:स्थ: पुर्यामाघोषयत् तथा । तच्च [6]चारनरैरेत्य **सुग्रीवा**य न्यवेद्यत ॥३४१॥
¶**सुग्रीवो**ऽप्यब्रवीदेवं न यावद् **बहुरूपिणी**म् । विद्यां साधयति स्वामिंस्तावत् साध्यो **दशानन:** ॥३४२॥
स्मित्वा **पद्मो**ऽप्युवाचैवं शान्तं ध्यानपरायणम् । कथं **दशास्यं** गृह्णामि ? न [7]ह्यहं स इव च्छली ॥३४३॥
इति **राम**वच: श्रुत्वा छन्नमेवाऽ**ङ्गदा**दय: । विद्याभ्रंशाय **लङ्केशं शान्ति**चैत्यस्थितं ययु: ॥३४४॥
विदधुर्विविधांस्तत्रोपसर्गांस्ते निरर्गला: । मनागपि न तु ध्यानादचालीद् **दशकन्धर:** ॥३४५॥
अथाऽ**ङ्गदो** जगादैवं **रामाद्** भीतेन किं त्वया । इदं पाखण्डमारब्धमप्राप्तशरणेन भो:! ? ॥३४६॥
त्वया परोक्षे मद्भर्तुर्हृता भार्या महासती । **मन्दोदरीं** तु ते पत्नीं पश्यतोऽपि हराम्यहम् ॥३४७॥
इत्युदीर्याऽमन्दरोषोऽकर्षन्**मन्दोदरीं** [8]कचै: । सोऽनाथामिव रुदतीं [9]कुररीकरुण[10]स्वराम् ॥३४८॥
**रावणो** ध्यानसंलीन: प्रेक्षाञ्चक्रेऽपि तां न हि । प्रादुरासीच्च सा विद्या द्योतयन्ती नभस्तलम् ॥३४९॥
[11]सेत्यूचे तव सिद्धाऽस्मि ब्रूहि किं करवाणि भो:! ? । करोमि ते वशे विश्वं कियन्मात्रौ हि **राघवौ** ? ॥३५०॥
**रावण:** प्रत्युवाचैवं सर्वं निष्पद्यते त्वया । स्मृता [12]समापते: काले स्वस्थानं गच्छ सम्प्रति ॥३५१॥
तद्विसृष्टा तिरोधत्त सा विद्या तेऽपि वानरा: । स्कन्धावारं निजं जग्मु[13]रुत्प्लुत्य [14]पवमानवत् ॥३५२॥
¶**मन्दोदर्यङ्गदो**दन्तं शुश्राव च **दशानन:** । चक्रे च सद्योऽहङ्कारगर्भं हुङ्कारमुच्चकै: ॥३५३॥
स्नात्वा भुक्त्वा च **लङ्केशो**ऽगाद् **देवरमणे** वने । ऊचे **सीतां** च सुचिरं मया तेऽनुनय: कृत: ॥३५४॥
उज्झित्वा नियमभङ्गभीरुत्वमधुना पुन: । सेवि[15]ष्येऽहं प्रसह्य त्वां हत्वा त्वत्पति-देवरौ ॥३५५॥
तद्वाचा वि[16]षसध्रीच्या मूर्च्छिता **जनका**त्मजा । निपपात **दशास्यस्य** [17]तस्यामाशेव तत्क्षणम् ॥३५६॥
कथञ्चिल्लब्धसञ्ज्ञा सा जग्राहैवमभिग्रहम् । मृत्युश्चेद् **राम-सौमित्र्यो**स्तदाऽस्त्वनशनं मम ॥३५७॥
तच्छ्रुत्वा **रावणो** दध्यौ **रामे**[18] स्नेहो निसर्गज: । अस्यास्तदस्यां मे राग: स्थले कमलरोपणम् ॥३५८॥
[19]कृतं युक्तं मया तन्नाऽवज्ञातो यद् **बिभीषण:** । नाऽमात्या: मानिता: स्वं च कुलमेतत् कलङ्कितम् ॥३५९॥
मुञ्चाम्येतामद्य चेत् तन्न विवेकपदे पतेत्[20] । **रामा**क्रान्तेन मुक्तेयमिति स्यात् प्रत्युताऽयश: ॥३६०॥
बद्ध्वेह **राम-सौमित्री** समानेष्ये ततस्तयो: । अर्पयिष्याम्यमूं धर्म्यं यशस्यं च हि तद् भवेत् ॥३६१॥
¶इति निश्चित्य **लङ्केश**स्तामतीत्य विभावरीम् । [21]युद्धे चचालाऽशकुनैर्वार्यमाणोऽपि दुर्मद: ॥३६२॥
भूय: प्रववृते युद्धं **राम-रावण**सैन्ययो: । अत्युद्भटभटभुजास्फोटत्रासितदिग्गजम् ॥३६३॥
विधूयाऽशेषरक्षांसि [22]तूलानीव महाबल: । **लक्ष्मण**स्ताडयामास विशि[23]खै**र्दशकन्धरम्** ॥३६४॥
**सौमित्रे**र्विक्रमं दृष्ट्वा साशङ्को **दशकन्धर:** । सस्मार **बहुरूपां** तां विद्यां विश्वभयङ्कराम् ॥३६५॥
स्मृतिमात्रोपस्थितायां विद्यायां तत्र **रावण:** । विचक्रे भैरवाण्याशु स्वानि रूपाण्यनेकश: ॥३६६॥
भूमौ नभसि पृष्ठेऽग्रे पार्श्वयोरपि **लक्ष्मण:** । अपश्यद् **रावणा**नेव विविधायुधवर्षिण: ॥३६७॥
[24]तावद्रूप इवैकोऽपि तार्क्ष्यस्थो **लक्ष्मणो**ऽपि तान् । जघान **रावणान्** बाणैश्चिन्तितोप[25]नतै: [26]शतै: ॥३६८॥

---

१. ***भूलुण्ठनै:*** मु. रस्वीपा. ॥ २. व्रणावलि: ॥ ३. ***०रुपहारै:*** ता. ॥ ४. अक्षमालाम्-जपमालाम् ॥ ५. 'आनक: पटह:' इति टि. ला. ॥ ६. **चरनरै०** ला. ॥ ७. अहं रावण इव कपटी न ॥ ८. ***करै:*** ता.; केशै: ॥ ९. टिट्टिभी ॥ १०. ***०स्वरम्*** ता. ॥ ११. ***साऽप्यूचे*** पाता. ॥ १२. आगच्छे: ॥ १३. ***जग्मुरुत्पत्य*** मु. रस्वीपा. ॥ १४. पवनवत् ॥ १५. ***रमयिष्ये*** मु. ला. ॥ १६. विषतुल्यया ॥ १७. सीतायां विषये रावणस्याऽऽशेव ॥ १८. ***रामस्नेहो*** ता. ॥ १९. ***मया न युक्तं तच्चक्रेऽवज्ञातो०*** ला. ॥ २०. भवेत् ॥ २१. ***युधे*** ता. ॥ २२. वायु: कार्पासपुंभिका इव ॥ २३. ***विशेषै०*** ला. ॥ २४. तावन्ति-रावणतुल्यानि एव रूपाणि यस्य स तावद्रूप: ॥ २५. चिन्तिता एव उपनता:-हस्तमागता: ॥ २६. ***शरै:*** मु.; ***शतै:*** रसंपा. ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**नारायणस्य** तैर्बाणैर्विधुरो **दशकन्धरः** । सस्मार जाज्वलच्चक्रमर्धचक्रित्वलाञ्छनम् ॥३६९॥
रोषारुणाक्षस्तच्चक्रं भ्रमयित्वा नभस्तले । मुमोच **रावणः** शस्त्रमन्त्यं **रामा**नुजन्मने ॥३७०॥
कृत्वा प्रदक्षिणां तत् तु **सौमित्रे**र्दक्षिणे करे । अवतस्थे रविरिवोदयपर्वतमूर्धनि ॥३७१॥
विषण्णो **रावणो** दध्यौ सत्यं जातं मुनेर्वचः । तेषां **बिभीषणा**दीनां सत्यश्चा[1]लोचनिर्णयः ॥३७२॥
विषण्णं भ्रातरं प्रेक्ष्य भूयोऽप्यूचे **बिभीषणः** । भ्रातरद्याऽपि **वैदेहीं** मुञ्च त्वं चेज्जिजीविषुः ॥३७३॥
क्रुद्धस्तं **रावणो**ऽवोचत् किं मेऽस्त्रं चक्रमेव रे! ? । द्विषं सचक्रमप्[2]येनं द्राग्घनिष्यामि मुष्टिना ॥३७४॥
इति दर्पाद् विब्रुवतो रक्षोनाथस्य **लक्ष्मणः** । [3]वक्षस्तेनैव चक्रेण कूष्माण्डवदपाटयत् ॥३७५॥
तदा च ज्येष्ठकृष्णैकादश्या[4]मह्नश्च पश्चिमे । यामे मृतो **दशग्रीव**श्चतुर्थं नरकं ययौ ॥३७६॥

सपदि जय जयेति व्याहरद्भिर्द्युसद्भि-
र्व्यरचि कुसुमवृष्टि**र्लक्ष्मण**स्योपरिष्टात् ।
समजनि च कपीनां ताण्डवं चण्डहर्षो-
त्थितकि[5]लिकिलनादापूर्णरो[6]दोनिकुञ्जम् ॥३७७॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
स[7]प्तमे पर्वणि **रावण**वधो नाम सप्तमः सर्गः स[8]मासः ॥

१. मन्त्रनिर्णयः ॥ २. *०मप्येतं* ता. ॥ ३. *शिर०* ला. ॥ ४. *०मह्नि च* ता. ॥ ५. *०किलिकिलि०* खं.२, ता. ला. ॥ ६. रोदः—आकाश-पृथिव्यौ ॥ ७. ***सप्तमपर्वणि*** खं.१-२ ॥ ८. 'समाप्तः' इति खं.१-२, ता. ला.प्रतिषु न ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥अष्टमः सर्गः॥

अथो **बिभीषण**स्तत्र[1] कान्दिशीकान् निशाचरान्। एवमाश्वासयामास ज्ञातिस्नेहवशीकृतः ॥१॥
**पद्म-नारायणा**वेतावष्टमौ बल-शार्ङ्गिणौ। शरण्यौ शरणायाऽऽशु श्रयध्वमविशङ्किताः ॥२॥
ते सर्वे शिश्रियुः **पद्म-सौमित्री** तौ च चक्रतुः। तेषां प्रसादं वीरा हि प्रजासु समदृष्टयः ॥३॥
हतं च भ्रातरं दृष्ट्वा शोकावेशाद् **बिभीषणः**। मर्तुकामः स्वयमपि चकर्ष[2] क्षुरिकां निजाम् ॥४॥
तया स्वकुक्षि[3]माघ्नानं दध्रे **रामो बिभीषणम्**। हा! भ्रातर्भ्रातरित्युच्चैः क्रन्दन्तं करुणाक्षरम् ॥५॥
**मन्दोदर्या**दिभिः सार्धं रुदन्तमुपरावणम्। इति तं बोधयामास **पद्मनाभः सलक्ष्मणः** ॥६॥
ईदृक्पराक्रमः सोऽयं न हि शोच्यो **दशाननः**। यस्याऽऽशशङ्किरे दूरं[4] समरेष्वमरा अपि ॥७॥
वीरवृत्त्याऽनया मृत्युं गतोऽसौ कीर्तिभाजनम्। तदस्योत्तरकार्याणि कुरुध्वं रुदितैरलम् ॥८॥
इत्युदित्वा **पद्मनाभो** महात्मा प्राप्तबन्धनान्। **कुम्भकर्णेन्द्रजिन्मेघवाहना**दीन्[5]मोचयत् ॥९॥
**बिभीषणः कुम्भकर्णः शक्रजिन्मेघवाहनः**। [6]**मन्दोदर्य**पि [7]सम्भूयाऽपरेऽपि पतदश्रवः ॥१०॥
**दशग्रीवा**ङ्गसंस्कारं सद्यो गोशीर्षचन्दनैः। कर्पूरा[8]गुरुसम्मिश्रैर्विदधुर्ज्वालितानलैः ॥११॥ [9]युग्मम्॥
**पद्मः** पद्मसरस्येत्य ते[10] च स्नात्वा जलाञ्जलिम्। सम्म[11]श्रुजलैः को[12]ष्णैः प्रददु**र्दशमौलये** ॥१२॥
गिराऽभिरामया **रामः** कि[13]रन्निव सुधारसम्। **सलक्ष्मणः कुम्भकर्ण**प्रभृतीनित्यभाषत ॥१३॥
पूर्ववत् स्वस्वराज्यानि कुरुध्वमधुनाऽपि हि। युष्मल्लक्ष्म्या न नः कृत्यं हे वीराः! क्षेममस्तु वः ॥१४॥
इत्युक्ताः **पद्मनाभे**न युगपच्छोक-विस्मयौ। बिभ्राणाः **कुम्भकर्णा**द्या जगदुर्गद्गदाक्षरम् ॥१५॥
नाऽर्थो राज्येन नः कश्चित् प्राज्येनाऽपि महाभुज!। ग्रहीष्यामः परिव्रज्यां मोक्षसाम्राज्यसाधनीम् ॥१६॥
¶अत्राऽन्तरे च **कुसुमायुधो**द्याने महामुनिः। **अप्रमेयबलो** नाम चतुर्ज्ञानी समाययौ ॥१७॥[14]
तत्रैव निशि तस्याऽभूत् केवलज्ञानमुज्ज्वलम्। चक्रुश्च केवलज्ञानमहिमानं दिवौकसः ॥१८॥
प्रातश्च **राम-सौमित्री कुम्भकर्णा**दयश्च ते। उपेत्य तमवन्दन्त ततो धर्मं च शुश्रुवुः ॥१९॥
पप्रच्छतुर्देशनान्ते **शक्रजिन्मेघवाहनौ**। परं वैराग्यमापन्नौ पुरातनभवान्निजान् ॥२०॥
मुनिः सोऽथाऽब्रवीत् पुर्यां **कौशाम्ब्या**मिह **भारते**। निःस्वौ[15] बन्धू युवां जातौ नाम्ना **प्रथम-पश्चिमौ** ॥२१॥
तावन्यदा[16]**भवदत्ताद्** धर्मं श्रुत्वा महामुनेः। व्रतं जगृहतुः शान्तकषायौ च विजह्रतुः ॥२२॥
अन्येद्युस्तौ तु **कौशाम्ब्यां** गतौ ददृशतुर्नृपम्। पत्न्ये**न्दुमुख्या** क्रीडन्तं **नन्दिघोषं** [17]मधूत्सवे ॥२३॥
तं दृष्ट्वा **पश्चिमो**ऽकार्षीन्निदानं तपसाऽमुना। ईदृक्क्रीडापरः पुत्रः भूयासमनयोरहम् ॥२४॥
साधुभिर्वार्यमाणोऽपि निदानान्न न्यवर्तत। मृत्वा च **पश्चिमो** जज्ञे तयोस्तुग्[18] **रतिवर्धनः** ॥२५॥
क्रमेणोद्यौवनः प्राप्तराज्यः स **रतिवर्धनः**। पितेव रेमे विविधं रमणीभिः समावृतः ॥२६॥
मृत्वा **प्रथम**साधुस्तु निर्निदानतपोवशात्। बभूव पञ्चमे कल्पे त्रिदशः परमर्द्धिकः ॥२७॥
सोऽवधेर्भ्रातरं ज्ञात्वा तत्रोत्पन्नं महीपतिम्। तं बोधयितुमभ्यागात् मुनिरूपधरः सुरः ॥२८॥

---

१. भयत्रस्तान् राक्षसान् ॥ २. *च्छुरिकां* मु. ॥ ३. *०क्षिं निघ्नानं* खं.१ ॥ ४. **दूरे** मु.; अत्यर्थम् ॥ ५. *०दीनबोधयत्* हे. मो. ॥ ६. *मन्दोदरी च* ता. ॥ ७. *सम्भूय परे०* खं.१-२, पाता. ला. ॥ ८. *कर्पूरागरु०* ता. विना ॥ ९. खं.१-२, पाता. ला.प्रतिषु न ॥ १०. बिभीषणादयः ॥ ११. *सममम्रजलैः* खं.१-२, पाता. ला. ॥ १२. ईषदुष्णैः ॥ १३. वर्षन्निव ॥ १४. अत्र ला.प्रतौ टिप्पितं गाथाद्विकमिदं–
''अह तस्स दिणस्संते, साहू नामेण अप्पमेयबलो। छप्पण्णसहसजुत्तो, मुणीण लंकापुरी पत्तो ॥१॥
जइ सो मुणी महप्पा, पत्तो लंकाहिवंमि जीवंते। तो लक्खणस्स पीती, होंति(ती) सह रक्खसिंदेण ॥२॥इति वृद्धपद्मचरिते ॥''
(मुद्रिते पउमचरिए उ.७५, गा.२३-२३; पृ.४२८) ॥
१५. निर्धनौ ॥ १६. *भवद्दत्ता०* ता. ॥ १७. वसन्तोत्सवे ॥ १८. तुक्-पुत्रः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रतिवर्धन**राजेनाऽर्पिते पट्टे निषद्य सः । शशंस प्राग्भवं तस्य स्वस्य च भ्रातृसौहृदात् ॥२९॥
सञ्जातजातिस्मरणाद् विरक्तो **रतिवर्धनः** । प्राव्राजीदथ मृत्वा च **ब्रह्मलोके** सुरोऽभवत् ॥३०॥
च्युत्वा ततो विदेहेषु **विबुद्धनगरे** युवाम् । अभूतं भ्रातरौ भूपौ प्रव्रज्याऽ**च्युत**मीयथुः ॥३१॥
च्युत्वाऽ**च्युता**द् **दशास्य**स्य प्रतिविष्णोस्तु सम्प्रति । पुत्रौ युवामजायेथा**मिन्द्रजिन्मेघवाहनौ** ॥३२॥
**रतिवर्धन**माता तु भवं भ्रान्त्वे**न्दुमुख्य**पि । **मन्दोदरी** समभवज्जननी युवयोरियम् ॥३३॥
**कुम्भकर्णेन्द्रजिन्मेघवाहना**द्या निशम्य तत् । **मन्दोदर्या**दयश्चाऽपि तदैवाऽऽददिरे व्रतम् ॥३४॥
¶मुनिं नत्वा तु तं **रामः ससौमित्रि-कपीश्वरः** । **बिभीषणे**न[1] प्रह्वेण वेत्रिणे[2]वाऽग्रगामिना ॥३५[3]॥
दर्श्यमानपथो विद्याधरीभिः कृतमङ्गलः । ऋद्ध्या महत्येन्द्र इव **लङ्कायां** प्राविशत् पुरीम् ॥३६॥[4]युग्मम्॥
¶गिरेः **पुष्पगिरे**र्मूर्धन्युद्याने तत्र **मैथिली**म् । गत्वा ददर्श **काकुत्स्थो** यथाख्यातां **हनूमता** ॥३७॥
तामुत्क्षिप्य निजोत्सङ्गे द्वितीयमिव जीवितम् । तदैव जीवितम्मन्यो धारयामास **राघवः** ॥३८॥
इयं महासती **सीता** जयत्विति [5]मरुत्पथे । तदानीं जुघुषुः सिद्ध-गन्धर्वाद्याः प्रमोदिनः ॥३९॥
**सीता**देव्या नमश्चक्रे पादौ प्रक्षालयन्निव । निरन्तरै[6]रश्रुजलैः **सुमित्रा**नन्दनो मुदा ॥४०॥
चिरं जीव चिरं नन्द चिरं जीव मदाशिषा । इति ब्रुवाणा **वैदेही** जघ्रौ शिरसि **लक्ष्मण**म् ॥४१॥
**भामण्डलो** नमश्चक्रे **सीतां सीता**ऽपि तं मुदा । आशिषाऽऽनन्दयामास मुनिवाक्यसमानया ॥४२॥
स्वनामाख्यानपूर्वं च[7]**कपिराजो बिभीषणः** । **हनुमानङ्गदो**ऽन्येऽपि प्रणेमु**र्जनका**त्मजाम् ॥४३॥
[8]पार्वणेन शशाङ्केन चिरात् कुमुदिनीव सा । **रामे**ण शुशुभे **सीता** विकाशं समुपेयुषी ॥४४॥
**ससीतो**ऽध्यास्य **भुवनालङ्कारं राघवो** गजम् । जगाम धा[9]म **दाशास्यं सुग्रीवा**द्यैः समावृतः ॥४५॥
तदन्तश्च मणिस्तम्भसहस्राङ्कं जिनेशितुः । चैत्यं **श्रीशान्तिनाथस्य** प्रविवेश विवन्दिषुः ॥४६॥
**बिभीषणा**र्पितैस्तत्र कुसुमाद्यै[10]रुपस्कारैः । **शान्ति**मानर्च **काकुत्स्थः सीता-सौमित्रि**संयुतः ॥४७॥
**बिभीषणा**भ्यर्थितोऽथ **बिभीषण**गृहं ययौ । **रामः ससीता-सौमित्रिः सुग्रीवा**दिभिरन्वितः ॥४८॥
तत्र देवार्चनं [11]स्नान-भोजनादि च **राघवः** । चक्रे सपरिवारोऽपि मानयन् **रावणा**नुजम् ॥४९॥
**रामं** सिंहासनासीनमग्रासीनो **बिभीषणः** । वाससी परिधायोभे बभाषेऽथ कृताञ्जलिः ॥५०॥
रत्न-स्वर्णादिकोशोऽयमिदं हस्ति-हयादि च । अयं च **राक्षसद्वीपो** गृह्यतां पत्तिरस्मि ते ॥५१॥
राज्याभिषेकमधुना कुर्महे ते त्वदाज्ञया । पवित्रय पुरीं **लङ्कां** प्रसीदाऽनुगृहाण माम् ॥५२॥
**रामो**ऽप्युवाच दत्तं ते **लङ्का**राज्यं मया पुरा । व्यस्मार्षीस्तदिदानीं किं महात्मन्! भक्तिमोहितः ? ॥५३॥
एवं निषिध्य तं **पद्मो लङ्का**राज्ये तदैव हि । अभ्यषिञ्चत् स्वयं प्रीतः प्रतिज्ञातार्थपालकः ॥५४॥
**सीता-सौमित्रि-सुग्रीव**प्रमुखैरावृतो ययौ । **रामो**ऽथ **रावण**गृहे **सुधर्मा**यामिवाऽद्रिभि[12]त् ॥५५॥
¶तत्र **सिंहोदरा**दीनामुद्वोढुं प्राक् [13]प्रतिश्रुताः । कन्या **रामा**ज्ञयाऽऽनैषुस्तत्र विद्याधरोत्तमाः ॥५६॥
अथ स्वस्वप्रतिपन्नास्ताः कुमारीर्यथाविधि । [14]**राघवा**वुपयेमाते खेचरीगीतमङ्ग[15]लौ ॥५७॥
भोगांस्तत्रोपभुञ्जानौ निर्विघ्नं **राम-लक्ष्मणौ** । **सुग्रीवा**द्यैः सेव्यमानौ [16]षडब्दीमतिनिन्यतुः ॥५८॥
अत्राऽन्तरे **विन्ध्यस्थल्यामिन्द्रजिन्मेघवाहनौ** । तौ सिद्धिमीयतुर्जज्ञे **तीर्थं मेघ[17]रथं** च तत् ॥५९॥

---

१. नम्रेण ॥ २. ***वेत्रिणा चाग्र०*** खं.१ ॥ ३. अत्र ला.प्रतौ टिप्पितं गाथाचतुष्कमेवं –
''तिसमुद्दमेइणिवई, मह दइओ विणिहओ रणमुहम्मि । पुत्तेहिं विमुक्काऽहं, कं सरणं भो पवज्जामि ? ॥१॥
एवं सा विलवंती, अज्जाए तत्थ संजमसिरीए । पडिबोहिआ य गिण्हइ, पव्वज्जं सा महादेवी ॥२॥
चंदणहा वि अणिच्चं, जीअं नाऊण तिव्वदुक्खत्ता । पव्वइआ दढभावा, जिणवरधम्मुज्जया जाया ॥३॥
अट्ठावण्णसहस्सा, तत्थ य जुवईण लद्धबोहीणं । पव्वइआणि तवगुणं कुणंति दुक्खक्खयट्ठाए ॥४॥ इति वृद्धपद्मचरिते ॥''
(मुद्रिते पउमचरिए उ.७५, गा. ८१-८२-८३-८४) ॥
४. खं.१-२, पाता. ला.प्रतिषु न ॥ ५. ***महापथे*** खं.२; आकाशे ॥ ६. ***०रस्रजलैः*** खं.१-२, पाता. ला. ॥ ७. सुग्रीवः ॥ ८. पूर्णिमासम्बन्धिना चन्द्रेण ॥ ९. ***रावणावासं*** कां. मु. ॥ १०. सामग्रीभिः ॥ ११. ***स्नानं*** पाता. ॥ १२. इन्द्रः ॥ १३. अङ्गीकृताः ॥ १४. राम-लक्ष्मणौ परिणिन्यतुः ॥ १५. ***०मङ्गलैः*** पाता. ॥ १६. षड् वर्षाणि ॥ १७. ***मेघरवं*** खं.१-२, पाता. ला. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नर्मदा**यां **कुम्भकर्णो** नद्यां सिद्धिमियाय च। **पृष्टरक्षित**मित्यासीत् तत् तीर्थं चाऽभिधानतः ॥६०॥

¶इतश्च **साकेतपुरे राम-लक्ष्मण**मातरौ। तद्वार्तामप्यजानन्त्यौ तस्थतुर्भृशदुः[1]खिते ॥६१॥

तदा च **धातकीखण्डा**दागतस्तत्र **नारदः**। पप्रच्छ भक्तिनम्रे ते विमनस्के कुतो युवाम् ? ॥६२॥

अथाऽ**पराजितो**वाच पुत्रौ मे **राम-लक्ष्मणौ**। पित्राज्ञया[2] वनं यातौ स्नुषया **सीत**या सह ॥६३॥

**सीता**पहाराल्**लङ्का**यां जग्मतुस्तौ महाभुजौ। **रावणे**न रणे शक्त्या **लक्ष्मण**स्ताडितः किल ॥६४॥

शक्तिशल्योद्धरणाय **विशल्या**ऽऽनायि तत्र च। न विद्मो यदभूत् किञ्चिद् वत्सो जीवति वा न वा ? ॥६५॥

अभिधायेति हा वत्स! वत्सेति करुणस्वरम्। रुरोद सा रोदयन्ती **सुमित्रा**मपि निर्भरम् ॥६६॥

ततस्ते **नारदो**ऽवोचद् भवतं सुस्थिते युवाम्। युष्मत्पुत्रावुपेष्यामि तथाऽऽनेष्यामि ताविह ॥६७॥

तयोरेवं प्र[3]तिश्रुत्य **नारदो** गगनाध्वना। जनश्रुत्या ज्ञातवृत्तो **लङ्का**यां **राम**मभ्यगात् ॥६८॥

सत्कृत्य पृष्टो **रामे**ण किमत्राऽऽगा ? इति स्वयम्। तन्मातृदुःखवृत्तान्तमाचख्यौ **नारदो**ऽखिलम् ॥६९॥

सद्यः स[4]रणरणकः **पद्मो**ऽवादीद् **बिभीषण**म्। विस्मृत्य दुःखं मातॄणां त्वद्भक्त्याऽस्थामिहाऽधिकम् ॥७०॥

अस्मद्दुःखाद् विपद्यन्ते न यावन्मातरो हि नः। तावत् तत्राऽद्य यास्यामोऽनुमन्यस्व महाशय! ॥७१॥

नत्वा **बिभीषणो**ऽप्यूचे तिष्ठाऽत्राऽहानि षोडश। यावत् स्वैः शिल्पिभी रम्यां ता**मयोध्यां** करोम्यहम् ॥७२॥

एवमस्त्विति **रामो**क्तः स[5] विद्याधरशिल्पिभिः। दिनैः षोडशभिश्चक्रेऽ**योध्यां** स्व[6]र्नगरीनिभाम् ॥७३॥

तदा **रामे**ण सत्कृत्य विसृष्टो **नारदो** ययौ। आख्यच्च **राम**मातॄणां पुत्रागममहोत्सवम् ॥७४॥

¶अथाऽह्नि षोडशे सान्तःपुरावारुह्य **पुष्पक**म्। शक्रेशानाविवैकस्थो प्रतस्थाते **रघूद्वहौ** ॥७५॥

**रावणा**नुज-**सुग्रीव-भामण्डल**नृपादिभिः। अन्वीयमानौ नगरी**मयोध्यां** चेयतुः क्षणात् ॥७६॥

आयान्तौ **पुष्पका**रूढौ दूरादपि निरीक्ष्य तौ। अ[7]भ्यागात् कुञ्जरारूढो **भरतः** सानुजोऽपि हि ॥७७॥

आ[8]याति **भरते रामा**ज्ञयोर्प[9]क्षिति **पुष्पक**म्। जगाम **पालक**मिव पा[10]कशासनशासनात् ॥७८॥

आदावप्युत्ततारेभाद् **भरतो** भ्रातृसंयुतः। उत्तेरतुः **पुष्पका**च्च सोत्कण्ठौ **राम-लक्ष्मणौ** ॥७९॥

पादयोः पतितं **रामो भरतं** साश्रुलोचनम्। परिरेभे समुत्थाप्य मूर्ध्नि चुम्बन् मुहुर्मुहुः ॥८०॥

**शत्रुघ्न**मपि पादान्ते लुठन्तं **रघुपुङ्गवः**। उत्थाप्य परिमृज्य स्वां[11]शुकेन परिषस्वजे ॥८१॥

ततो **भरत-शत्रुघ्नौ** नमन्तौ **लक्ष्मणो**ऽपि हि। प्रसारितभुजो बाढमालिलिङ्ग ससम्भ्रमः ॥८२॥

आरोहदनुजैः सार्धं त्रिभी **रामो**ऽथ **पुष्पक**म्। समादिदेश चाऽ**योध्या**प्रवेशाय कृतत्वरः ॥८३॥

तूर्येषु व्योम्नि भूमौ च वाद्यमानेष्वथोन्मुदौ। **अयोध्यां राम-सौमित्री** निजां प्राविशतां पुरीम् ॥८४॥

सोत्कण्ठैरुन्मुखैः पौरैर्मयूरैरिव वारिदौ। निर्निमेषैः प्रेक्ष्यमाणौ स्तूयमानौ च निर्भरम् ॥८५॥

[12]अर्कवद् दीयमानार्घौ स्थाने स्थाने पुरीजनैः। स्वं प्रासादं प्रसन्नास्यौ जग्मतू **राम-लक्ष्मणौ** ॥८६॥

¶उत्तीर्य **पुष्पकात्** तत्र **रामः सौमित्रि**णा स[13]ह। जगाम मातृसदनं सुहृद्हृदयनन्दनः ॥८७॥

**रामो**ऽ**पराजितां** देवीं मातृवर्गमथाऽपरम्। नमश्चक्रे स**सौमित्रि**स्ताभिश्चाऽऽशीर्भिरै[14]ध्यत ॥८८॥

अथ **सीता-विशल्या**द्याः प्रणेमुर**पराजिताम्**। श्वश्रूरन्याश्च तत्पादपद्मेषु निहि[15]तालकाः ॥८९॥

अस्मद्वद् वीरप्र[16]काण्डप्रसविन्योऽस्मदाशिषा। भूयास्त यूयमिति ताः श्वश्र्वोऽप्याशासतोच्चकैः ॥९०॥

अथाऽ**पराजिता** देवी भूयो भूयोऽपि **लक्ष्मण**म्। स्पृशन्ती पाणिना मूर्ध्नि चुम्बन्ती चैव[17]मब्रवीत् ॥९१॥

दिष्ट्या दृष्टोऽसि हे वत्स! पुनर्जातोऽसि चाऽधुना। कृत्वा विदेशगमनं विजयीह यदागमः ॥९२॥

तानि तानि च कष्टानि वनवासभवान्यसौ। **रामः सीता** चाऽतिनिन्ये तवैव परिचर्यया ॥९३॥

**लक्ष्मणो**ऽप्यवदत् तातेनेवाऽऽर्येणाऽतिलालितः। त्वयेव **सीता**देव्या च वनेऽप्यस्थामहं सुखम् ॥९४॥

१. *०दुःस्थिते* पाता. ॥ २. *वनं पित्राज्ञया यातौ* रस्वीपा. ॥ ३. प्रतिज्ञापूर्वकं कथयित्वा ॥ ४. सोत्कण्ठः ॥ ५. *तां* ता. ॥ ६. *स्वर्णगरी०* ता.; *स्वर्गपुरी०* मु. ॥ ७. *अभ्यगात्* मु. रस्वीपा. ॥ ८. *आयाते* छा. पा.; आगच्छति सति ॥ ९. क्षितिसमीपे ॥ १०. इन्द्रशासनात् ॥ ११. स्ववस्त्रेण ॥ १२. सूर्यवद् दीयमानोऽर्घः-पूजोपचारविशेषो याभ्यां तौ ॥ १३. *समम्* रसंपा. ॥ १४. *०रैध्यत* ला.विना; अपूज्यत ॥ १५. स्थापितकेशाः ॥ १६. प्रचण्डवीर(पुत्र)प्रसविन्यः ॥ १७. *सेद०* पाता. ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

[1]स्वेच्छादुर्ललितैर्मे चाऽऽर्यस्य वैराणि जज्ञिरे। **सीता**पहारो यन्मूल: किमन्यद् देवि! गद्यते ? ॥९५॥
परन्तु युष्मदाशीभिर्लङ्घित्वा वै[2]रसागरम्। मात:! सपरिवारोऽपि क्षेमेणाऽऽर्य इहाऽऽययौ ॥९६॥
अथोत्सव**मयोध्यायां भरतो**ऽकारयन्मुदा। पुरतो **राम**पादानां पत्तिमात्रत्वमाचरन् ॥९७॥
¶अन्यदा **रामभद्रं** तु प्रणम्य **भरतो**ऽभ्यधात्। आर्य! त्वदाज्ञया राज्यमियत्कालं मया धृतम् ॥९८॥
प्राव्रजिष्यं तदैवाऽहं तातपादै: सह प्रभो!। अर्गला नाऽभविष्यच्चेदार्याज्ञा राज्यपालने ॥९९॥
मां व्रतायाऽनुमन्यस्व स्वयं राज्यं प्रतीच्छ च। भवोद्विग्नस्त्वयि प्राप्ते न ह्यत: स्थातुमुत्सहे ॥१००॥
**रामो**ऽप्युदश्रुस्तं स्माऽऽह किमेवं वत्स! भाषसे ?। कुरु राज्यं त्वमेवेह त्वय्यु[3]त्का वयमागता: ॥१०१॥
त्यजन्न: सह राज्येन भूयस्त्वद्विरहव्यथाम्। किं दत्से ? वत्स! तत् तिष्ठ कुर्वाज्ञां मम पूर्ववत् ॥१०२॥
इत्याग्रहपरं **रामं** ज्ञात्वा नत्वा च सोऽचलत्। यावत् **सौमित्रिणा** तावदुत्थायाऽधारि पाणिना ॥१०३॥
**भरतं** च तथा यान्तं व्रताय कृतनिश्चयम्। ज्ञात्वा **सीता-विशल्या**द्यास्तत्राऽऽजग्मु: ससम्भ्रमा: ॥१०४॥
विस्मारयितुकामास्ता **भरतस्य** व्रताग्रहम्। जलक्रीडाविनोदार्थ[4]मर्थनां चक्रिरेतराम् ॥१०५॥
उपरोधेन तासां च ययौ सान्त:पुरोऽपि स:। क्रीडासरसि चिक्रीड विरक्तोऽपि मुहूर्तकम् ॥१०६॥
¶जलान्निर्गत्य **भरत**स्तीरेऽस्थाद् राजहंसवत्। स्तम्भमुन्मूल्य **भुवनालङ्कार**स्तत्र चाऽऽययौ ॥१०७॥
मदान्धोऽप्यमद: सोऽभूत् सद्यो **भरत**दर्शनात्। तद्दर्शनेन **भरतो**ऽप्यवाप परमां मुदम् ॥१०८॥
सम्भ्रमाद् **राम-सौमित्री** तस्योपद्रवकारिण:। करिणो बन्धनायाऽऽशु ससामन्तावुपेयतु: ॥१०९॥
**रामा**ज्ञया हस्तिप[5]कै: स स्तम्भे हस्त्यनीयत। आगतौ च मुनी **देशभूषण: कुलभूषण:** ॥११०॥
उद्याने समवसृतौ वन्दितुं तौ महामुनी। प्रययु: **राम-सौमित्रि-भरता:** सपरिच्छदा: ॥१११॥
वन्दित्वा तौ च पप्रच्छ **रामो** [6]मत्तकरी कथम्। अमदोऽजनि **भुवनालङ्कारो भरते**क्षणात् ? ॥११२॥
¶अथाऽऽख्यत् केवली **देशभूषणो नाभिसूनु**ना। समं सहस्राश्चत्वारो राजान: प्राव्रजन् पुरा ॥११३॥
ते तु स्वामिन्यनाहारे कृतमौने विहारिणि। निर्विण्णा जज्ञिरे सर्वे तापसा वनवासिन: ॥११४॥
**प्रह्लादन-सुप्रभराद्**तनयौ तेषु तापसौ। चिरं **चन्द्रोदय-सूरोदया**ख्यौ भ्रेमतुर्भवम् ॥११५॥
**चन्द्रोदयो गजपुरे** राज्ञो **हरिमते**रभूत्। भार्यायां **चन्द्रलेखायां** सूनुर्नाम्ना **कुलङ्कर:** ॥११६॥
**सूरोदयो**ऽपि तत्रैव **विश्वभूते**र्द्विजन्मन:। भार्यायाम**ग्निकुण्डा**यां नाम्ना **श्रुतिरति:** सुत: ॥११७॥
अभूत् **कुलङ्करो** राजा स गच्छंस्तापसाश्रमम्। अवधिज्ञानिनेत्यूचे चा**ऽभिनन्दन**साधुना ॥११८॥
तप्यमानेन पञ्चाग्नितपस्तत्र तपस्विना। दग्धुमानीतकाष्ठस्य मध्ये तिष्ठति पन्नग: ॥११९॥
सोऽहि: पुरा भवे **क्षेमङ्करा**ख्यस्ते पितामह:। तद्दारु दारयित्वा तं यत्नादाकृष्य रक्ष भो:! ॥१२०॥
आकुलस्तद्वच: श्रुत्वा गत्वा तद्दार्वदारयत्। ददर्शाऽन्त:स्थितं चाऽहिं राजा विस्मयते स्म च ॥१२१॥
आदित्सते स्म प्रव्रज्यां यावद् राजा **कुलङ्कर:**। द्विज: **श्रुतिरति:** सोऽथ तावदेवं[7]मवोचत ॥१२२॥
धर्मो नाऽऽ[8]म्नायिको वोऽयं निर्बन्धश्चेत् तवान्तिमे। दीक्षा वयस्युपादेया किं सम्प्रत्यपि खिद्यसे ? ॥१२३॥
राजाऽपि तद्गिरा भग्नदीक्षोत्साहो मनागपि। मया किमत्र कर्तव्यमिति ध्यायन्न[10]वाँस्थित ॥१२४॥
**श्रीदामा**ख्याऽथ तद्राज्ञी सदा सक्ता पुरोधसा। नूनं मां ज्ञातवानेष इत्याशङ्कत दुर्मति: ॥१२५॥
आवां यावन्न हन्त्येष तावद्धन्मीति सा विषम्। पुरोधोऽनुमता दत्त्वा **कुलङ्कर**ममारयत् ॥१२६॥
क्रमाच्छ्रु**तिरति:** सोऽपि मृतो भूयोऽप्युभावपि। चिरं भवं भ्रेमतुस्तौ नानायोनिनिपा[11]तिनौ ॥१२७॥
¶पुरेऽन्यदा **राजगृहे कपिल**ब्रह्मण: सुतौ। **सावित्र्यां** यु[12]ग्मतोऽभूतां **विनोद-रमणा**भिधौ ॥१२८॥
**रमणो** वेदमध्येतुं ययौ देशान्तरं तत:। कालेनाऽधीतवेद: सन्नागाद् **राजगृहं** निशि ॥१२९॥
अकालोऽसाविति धिया तदाऽस्थाद् बहिरेव स:। सर्वसाधारणेऽस्वाप्सीदेकस्मिन् यक्षमन्दिरे ॥१३०॥

---

१. *आसीद् दुर्ललितैर्मे तु वैरमार्यस्य केवलम्* रस्वीपा.; *आसीद्०* पाता.; मम स्वच्छन्दचेष्टितै: ॥ २. *वैरि०* मु. ॥ ३. त्वयि-तव विषये उत्का:-उत्कण्ठिता: ॥ ४. प्रार्थनाम् ॥ ५. महावत ॥ ६. *मम करी* ला.विना ॥ ७. *०देवमबोधयत्* पाता. ॥ ८. कुलपरम्परागत: ॥ ९. *खिद्यते* मु. ॥ १०. *०न्नवास्थित:* ला.विना ॥ ११. *०निपातितौ* खं.१, पाता. ॥ १२. *जन्मतो०* ला. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विनोद**भार्या **शाखा**ख्या **दत्ते**न ब्रह्मणा समम्। तत्राऽऽगात् कृतसङ्केता **विनोदो**ऽपि हि तामनु ॥१३१॥
सा **दत्त**बुद्ध्या **रमण**मुत्थाप्याऽरमत् तदा। **विनोदो**ऽप्यसिमाकृष्य तं जघानाऽविशङ्कित: ॥१३२॥
**शाख**या **रमण**च्छुर्या **विनोदो**ऽपि हतस्तदा। चिरं भ्रान्त्वा भवं चाऽभूदिभ्यपुत्रो **धना**भिध: ॥१३३॥
**रमणो**ऽपि भवं भ्रान्त्वा **धनस्यै**वाऽभवत् सुत:। **लक्ष्मी**कुक्षिसमुद्भूतो [१]**भूषणो** नामधेयत: ॥१३४॥
द्वात्रिंशदिभ्यकन्या: स **धनो**क्त: परिणीतवान्। ताभि: [२]क्रीडन् सोऽन्यदाऽस्थान्निशि स्वगृहमूर्धनि ॥१३५॥
तत्र यामे निशस्तुर्ये **श्रीधरस्य** महामुने:। उत्पन्ने केवलेऽद्राक्षीद् देवैरारब्धमुत्सवम् ॥१३६॥
जातधर्मपरीणाम: [३]सद्योऽप्युत्तीर्य वेश्मत:। तं वन्दितुमचालीच्च मार्गे दष्टश्च सोऽहिना ॥१३७॥
¶शुभेन परिणामेन भ्रान्त्वा शुभगतीश्चिरम्। **जम्बूद्वीपे**ऽत्र **विदेहे**ऽपरे **रत्नपुरे** पुरे ॥१३८॥
महिष्यां **हरिणी**नाम्यामचला**ख्य**स्य चक्रिण:। **प्रियदर्शन**नामाऽभूत् स सूनुर्धर्मतत्पर: ॥१३९॥
स प्रविव्रजिषु: पित्रनुरोधात् परिणीतवान्। त्रीणि कन्यासहस्राणि संविग्नोऽस्थात् तथाऽपि हि ॥१४०॥
चतु:षष्टिसहस्राणि वर्षाणां स तप: परम्। चरित्वा गृहवासेऽपि **ब्रह्मलोके** सुरोऽभवत् ॥१४१॥
¶भ्रान्त्वा **धनो**ऽपि संसारं स **पोतनपुरे**ऽभवत्। [५]**शकुना**-ऽ**ग्निमुख**ब्रह्मपत्न्यां **मृदुमति:** सुत: ॥१४२॥
स पित्रा दुर्विनीतत्वाद् गृहान्निर्वासितो [६]भ्रमन्। धूर्त: सर्वकला[७]कल्पो भूत्वा भूयोऽप्यगाद् गृहम् ॥१४३॥
सदा [८]दिदेव द्यूतेन न त्वजीयत केनचित्। दिने दिने [९]देवकेभ्यो भूयिष्ठमजयद् धनम् ॥१४४॥
**वसन्तसेन**या सार्धं भुङ्क्त्वा भोगान् स वेश्यया। अन्ते गृहीतश्रामण्यो **ब्रह्मलोके** सुरोऽभवत् ॥१४५॥
च्युत्वा पूर्वभवमायादोषाद् **वैताढ्य**पर्वते। अयं बभूव **भुवनालङ्कारो** नाम कुञ्जर: ॥१४६॥
**प्रियदर्शन**जीवोऽपि **ब्रह्मलोका**त् परिच्युत:। बभूव [१०]भवतो भ्राता **भरतो**ऽयं महाभुज: ॥१४७॥
**भरता**लोकनाज्जातजातिस्मृतिरसौ गज:। सद्यो गतमदो जज्ञे विवेके न हि रौद्रता ॥१४८॥
¶इति पूर्वभवान् श्रुत्वा विरक्तो **भरतो**ऽधिकम्। व्रतं राजसहस्रेणाऽग्रहीन्मोक्षमियाय च ॥१४९॥
सहस्रं तेऽपि राजान: पालयित्वा चिरं व्रतम्। नानालब्धिजुषो भूत्वाऽनुरूपं पदमासदन् ॥१५०॥
कुञ्जर: सोऽपि वैराग्याद् विधाय विविधं तप:। प्रपन्नानशनो मृत्वा **ब्रह्मलोके** सुरोऽभवत् ॥१५१॥
व्रतं **भरत**माताऽपि **कैकेयी** समुपाददे। पालयित्वा निष्कलङ्कं प्रपेदे पदमव्ययम् ॥१५२॥
**भरते** च प्रव्रजिते भूपा भूचर-खेचरा:। अर्थयाञ्चक्रिरे **राम**मभिषेकाय भक्तित: ॥१५३॥
**लक्ष्मणो** वासुदेवोऽयं भवद्भिरभिषिच्यताम्। तानेवमादिशद् **राम**स्ते तथैवाऽऽशु चक्रिरे ॥१५४॥
बलदेवत्वाऽभिषेकं **रामभद्र**स्य च व्यधु:। राज्यं द्वावप्यपातां चाऽष्टमौ तौ बल-शार्ङ्गिणौ ॥१५५॥
**पद्मो बिभीषणा**याऽदाद् **रक्षोद्वीपं** क्रमागतम्। **सुग्रीवाय कपिद्वीपं श्रीपुरं** [११]तु **हनूमते** ॥१५६॥
**विराधाय** तु **पाताललङ्कामृक्षपुरं** पुन:। **नीलाय प्रतिसूर्या**य पुरं **हनुपुरं** पुन: ॥१५७॥
**देवोपगीतनगरं** तद् **रत्नजटिने** पुन:। **भामण्डलाय वैताढ्ये** नगरं **रथनूपुरम्** ॥१५८॥
अन्येभ्योऽपि प्रदायैवं **राम: शत्रुघ्न**मभ्यधात्। यस्तुभ्यं रोचते वत्स! तं देश[१२]मुररीकुरु ॥१५९॥
**मथुरां** मे प्रयच्छेति **शत्रुघ्ने**नाऽर्थित: पुन:। **रामो** जगाद [१३]दु:साधा सा वत्स! **मथुरा** पुरी ॥१६०॥
तत्र राज्ञो **मधो:** शूलं **चमरेण** पुराऽर्पितम्। दूरात् परबलं सर्वं निहत्याऽभ्येति तत्करे ॥१६१॥
**शत्रुघ्नो**ऽप्येवमवदद् देव! रक्ष:कुलान्तक!। तवाऽस्मि नन्वहं भ्राता त्राता कस्तस्य मद्युधि ? ॥१६२॥
प्रयच्छ **मथुरां** मह्यं स्वयमेव **मधो**रहम्। प्रतीकारं करिष्यामि व्याधेरिव भिषग्वर: ॥१६३॥
**शत्रुघ्न**मत्याग्रहिणं ज्ञात्वा **रामो**[१४]ऽन्वशादिति। [१५]अपशूल: प्रमत्तश्च योधनीयो **मधु**स्त्वया ॥१६४॥
अनुशिष्येत्यदाद् **राम**स्तूणाव[१६]क्षय्यसायकौ। **कृतान्तवदनं** नाम सेनान्यं च सहाऽदिशत् ॥१६५॥
[१७]शिलीमुखान**ग्निमुखानर्णवावर्त**धन्व च। **लक्ष्मणो**ऽपि ददौ तस्मायाशंसन् विजयं परम् ॥१६६॥

---

१. ***लक्ष्मणो*** खं.१॥ २. ***क्रीडन्नन्यदा०*** ता.विना॥ ३. ***सद्योऽत्यु०*** मु. रस्वीपा.॥ ४. ***विदेहे पुरे*** मु. रस्वीपा.॥ ५. शकुना चाऽसौ अग्निमुखब्रह्मण: पत्नी चेति समास:, तस्याम्॥ ६. ***०ऽभ्रमत्*** ला.विना॥ ७. सर्वकलाविद्॥ ८. चिक्रीड॥ ९. द्यूतकारेभ्य:॥ १०. ***भरतो भ्राता भवतो०*** मु.॥ ११. **च** मु.॥ १२. स्वीकुरु॥ १३. ***दु:साध्या*** मु.॥ १४. ***०ऽब्रवीदिति*** पाता.॥ १५. शूलरहित:॥ १६. अक्षय्या: सायका-इषवो यत्र तौ॥ १७. बाणान्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः प्रतस्थे **शत्रुघ्नः** प्रयाणैश्च निरन्तरैः। ययावुप[1]**मधू**पघ्नम[2]वात्सीच्च नदीतटे ॥१६७॥
तत्राऽऽदौ प्रेषिताश्चारास्तस्याऽऽख्यन्नेत्य यन्**मधुः**। गतः **कुबेरो**द्यानेऽस्ति **मथुरा**पूर्वदिक्[3]स्थिते ॥१६८॥
पत्न्या **जयन्त्या** सार्धं स तत्र क्रीडापरोऽधुना। अस्त्रागारे च तच्छूलं कालोऽयं तस्य योधने ॥१६९॥
ततश्छलज्ञः **शत्रुघ्नः** प्राविशन्**मथुरां** निशि। प्रविशन्तं **मधुं** तत्र रुरोध च बलैः स्वयम् ॥१७०॥
जघान समरे चाऽऽदौ **लवणं मधु**नन्दनम्। रामायणरणारम्भे **खरं नारायणो** यथा ॥१७१॥
**मधुः** सुतवधक्रुद्धो धावित्वा [4]स्फालयन् धनुः। युयुधे **दाशरथिना** रथिना रथिनां वरः ॥१७२॥
अन्योऽन्यमस्त्रैरस्त्राणि च्छिन्दानौ तावुभावपि। शस्त्राशस्त्रि प्रचक्राते चिरं देवासुराविव ॥१७३॥
धनुः **समुद्रावर्तं** चाऽ**ग्निमुखां**श्च शिलीमुखान्। **सौमित्रि**दत्तानस्मार्षीत् तुर्यो **दशरथा**त्मजः ॥१७४॥
तत्स्मृतोपनतं धन्वाऽधिज्यीकृत्याऽग्निप[5]त्त्रिभिः। तैर्जघान **मधुं** वीरः शार्दूलमिव लुब्ध[6]कः ॥१७५॥
तद्बाणघातविधुरो **मधु**रेवमचिन्तयत्। शूलं पाणौ न मेऽभ्यागान्न हतो **लक्ष्मणा**नुजः ॥१७६॥
गतं मम मुधा जन्म जिनेन्द्रो न यदर्चितः। कारितानि न चैत्यानि दत्तं पात्रेषु नो मया ॥१७७॥
इति ध्यायन्ना[7]त्तदीक्षो नमस्कारपरायणः। मृत्वा **सनत्कुमारे**ऽभून्**मधु**र्देवो महर्द्धिकः ॥१७८॥
**मधु**देहस्योपरिष्टात् तद्विमानसुरा व्यधुः। पुष्पवृष्टिं जुघुषुश्च **मधु**र्देवो जयत्विति ॥१७९॥
तच्छूलं देवतारूपमुपेत्य **चमरा**न्तिके। **शत्रुघ्नान्मधु**निधनं छलोत्पन्नं शशंस च ॥१८०॥
ततो मित्रवधामर्षाच्**चमरः** प्राचलत् स्वयम्। पृष्टः क्व यासीति तार्क्ष्यस्वामि[8]ना **वेणुदारिणा** ॥१८१॥
हन्तुं स्वमित्रहन्तारं **शत्रुघ्नं मथुरा**स्थितम्। यास्यामीति तदाख्याते **वेणुदार्य**वदत् पुनः ॥१८२॥
**धरणेन्द्राद् रावणे**न या लब्धा साऽपि निर्जिता। शक्तिः **सौमित्रि**णा पुण्यप्रकृष्टेनाऽर्धचक्रिणा ॥१८३॥
**रावणो**ऽपि हतस्तेन तत्पत्तिस्तु कियान् **मधुः** ? । **शत्रुघ्नो लक्ष्मणा**देशादवधीत् प्र[9]धने **मधु**म् ॥१८४॥
उवाच **चमरेन्द्रो** यच्छक्तिः **सौमित्रि**णा जिता। कन्यकाया **विशल्याया**: प्रभावेण तदा खलु ॥१८५॥
तस्याश्चाऽब्रह्मचारिण्याः स प्रभावो गतोऽधुना। किं वा तेऽनेन ? यास्यामि तं हन्तुं मित्रघातकम् ॥१८६॥
इत्युक्त्वा **चमरो** रोषाच्**छत्रुघ्न**विषयं ययौ। सौराज्यसुस्थितं तत्र सर्वं लोकं ददर्श च ॥१८७॥
प्राक् प्रजोपद्रवेणोपद्रवाम्येतं **मधु**द्विषम्। इति बुद्ध्या व्यधाद् व्याधीन् विविधांस्तत्प्रजासु सः ॥१८८॥
कुलदेवतया तच्च ज्ञापितो व्याधिकारणम्। **शत्रुघ्नो**ऽगाद**योध्यायां राम-लक्ष्मण**सन्निधौ ॥१८९॥
तौ **देशभूषण-कुलभूषणा**वागतौ तदा। **राम-लक्ष्मण-शत्रुघ्ना** उपेत्य च ववन्दिरे ॥१९०॥
आग्रही हेतुना केन **शत्रुघ्नो मथुरां** प्रति ? । इति **रामे**ण पृष्टः सन् बभाषे **देशभूषणः** ॥१९१॥
**शत्रुघ्न**जीव उत्पद्य **मथुरा**यामनेकशः। विप्रोऽभूच्**छ्रीधरो** नाम रूपवान् साधुसेवकः ॥१९२॥
सोऽन्यदाऽध्वनि [10]यान् राजमहिष्या **ललिता**ख्यया। दृष्टो रागादथाऽऽनायि स्वान्तिके र[11]न्तुकामया ॥१९३॥
आगाच्चाऽतर्कितो राजा क्षुभिता **ललिता**ऽपि च। चौरोऽसाविति पूच्चक्रे राज्ञाऽधारि स तु द्विजः ॥१९४॥
राजादेशाद् वधार्थं स वधस्थानमनीयत। प्रतिज्ञातव्रतोऽमोचि **कल्याणमुनि**ना ततः ॥१९५॥
विमुक्तः प्राव्रजत् सोऽपि तपस्तप्त्वा दिवं ययौ। च्युत्वाऽभून्**मथुरा**पुर्यां **चन्द्रभद्र**नृपात्मजः ॥१९६॥
स **काञ्चनप्रभा**राज्ञीकुक्षिभू**रचला**भिधः। अत्यन्तवल्लभश्चाऽऽसीच्**चन्द्रभद्र**स्य भूपतेः ॥१९७॥
**भानुप्रभा**द्यैः [12]सापत्नैः सोऽ**चलो**ऽष्टभिरग्रजैः। व्यापादयितुमारेभे राजाऽयं मा स्म भूदिति ॥१९८॥
तन्मन्त्रे मन्त्रिणाऽऽख्याते नंष्ट्वाऽगाद**चलो**ऽन्यतः। भ्रमंश्चाऽविध्यत वने कण्टकेन गरीयसा ॥१९९॥
स क्रन्दन् पथि दृष्टश्च पुंसा **श्रावस्ति**वासिना। पितृनिर्वासितेनाऽ**ङ्क**नाम्नैधो[13]भारधारिणा ॥२००॥
काष्ठभारं विमुच्याऽ**ङ्को**ऽपनिन्ये तस्य कण्टकम्। हृष्टः स कण्टकं दत्त्वोवाचाऽ**ङ्कं** साधु भोः! कृतम् ॥२०१॥
**अचलं मथुरा**पुर्यां त्वं शृणोषि यदा नृपम्। तदा तत्र समागच्छेः परमो ह्युपकार्यसि ॥२०२॥

---

१. मधोरुपघ्नः-आश्रयः(मथुरा), तत्समीपम् ॥ २. ०*मावात्सीच्च* रसंपा. ॥ ३. ०*दिक्पतिः* ता. ॥ ४. *ऽस्फालयद्* खं.१ ॥ ५. अग्निशरैः ॥ ६. व्याधः ॥ ७. गृहीतदीक्षो भावचारित्रवानित्यर्थः ॥ ८. वेणुदारीत्यभिधेन सुपर्णकुमारनिकायेन्द्रेण ॥ ९. युद्धे ॥ १०. गच्छन्; *यन् राज०* मु. ॥ ११. ०*काम्यया* कां. मो. मु. खं. २ ॥ १२. सपत्नीपुत्रैः ॥ १३. काष्ठभारवाहकेन ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कौशाम्ब्यामचलो**ऽथाऽऽगात् तत्र **सिंहगुरोः** पुरः । **इन्द्रदत्त**नृपं धन्वाऽ[1]भ्यस्यन्तं स [2]उदैक्षत ॥२०३॥
**सिंहेन्द्रदत्त**योः सोऽपि धानुष्कत्वमदर्शयत् । तस्मै **द**[3]**त्तामिन्द्रदत्तो**ऽदत्त पुत्रीं [4]भुवा सह ॥२०४॥
सोऽसाधयज्जातबलो देशा**नङ्गा**दिकांस्ततः । **मथुरां** चाऽन्यदाऽगच्छद् युयुधे चाऽग्रजैः सह ॥२०५॥
**भानुप्रभा**दीन् स भ्रातृन् बद्ध्वाऽष्टावपि चाऽग्रहीत् । तन्मुक्त्यै मन्त्रि[5]णः प्रैषी[6]**च्चन्द्रभद्रो**ऽ**चला**न्तिके ॥२०६॥
आख्यत् तेषां स्ववृत्तान्त**मचल**स्तेऽपि मन्त्रिणः । विज्ञाय गत्वा चाऽऽचख्यु[7]**श्चन्द्रभद्रा**य सत्वरम् ॥२०७॥
**अचलं चन्द्रभद्रो**ऽपि हृष्टः पुर्यामवीविशत् । क्रमेण निजराज्ये तं लघीयांसमपि न्यधात् ॥२०८॥
पित्रा निर्वास्यमानांस्तान् भ्रातृन् **भानुप्रभा**दिकान् । कथञ्चि**दचलो**ऽरक्षच्चक्रे चाऽ[8]दृष्टसेवकान् ॥२०९॥
अन्यदा नटरङ्गस्थेनाऽ**ङ्को** दृष्टोऽ**चले**न सः । हन्यमानः प्रतीहारैरानायि च निजान्तिके ॥२१०॥
तस्मै तज्जन्मभूमिं तां **श्रावस्तिमचलो** ददौ । तौ द्वौ सम्भूय चक्राते राज्यमद्वैतसौहृदौ ॥२११॥
तावन्यदा प्राव्रजतां **समुद्राचार्य**सन्निधौ । मृत्वा कालेन चाऽभूतां **ब्रह्मलोके** सुरोत्तमौ ॥२१२॥
च्युत्वा ततोऽ**चल**जीवः **शत्रुघ्नो**ऽभूत् तवाऽनुजः । प्राग्जन्ममोहनीयेन ततोऽसौ **मथुरा**ग्रही ॥२१३॥
च्युत्वा ततोऽ**ङ्क**जीवोऽपि सेनापतिरयं तव । **कृतान्तवदनो** नाम समजायत **राघव**! ॥२१४॥[9]
¶इतश्च **श्रीनन्दनस्य प्रभापुर**पुरेशितुः । भार्यायां **धारणी**नाम्न्यां सप्ताऽभूवन् क्रमात् सुताः ॥२१५॥
**सुरनन्दः श्रीनन्दः श्रीतिलकः सर्वसुन्दरः । जयन्तश्चा**[10]**मर**श्चाऽपि **जयमित्र**श्च सप्तमः ॥२१६॥
मा[11]सजातं सुतं राज्ये न्यस्य **श्रीनन्दनो**ऽन्यदा । गुरोः **प्रीतिकर**स्याऽन्ते प्राव्राजीत् तैः सुतैः सह ॥२१७॥
**श्रीनन्दनो** ययौ मोक्षं **सुरनन्दा**दयस्तु ते । सप्ताऽप्यासंस्तपःशक्त्या **जङ्घाचारण**लब्धयः ॥२१८॥
विहरन्तः पुरीं जग्मु**र्मथुरां** ते महर्षयः । प्रावृट् चाऽभूत् तदा तस्थुरधिशैलगुहागृहम् ॥२१९॥
चक्रुः षष्ठाष्टमादीनि ते तपांसि सदाऽपि हि । उत्पत्य दूरदेशेषु पारणं चक्रिरे पुनः ॥२२०॥
भूयोऽपि **मथुरा**शैलगुहायां तस्थुरेत्य च । तत्प्रभावा[12]**च्चमर**भूव्याधिस्तत्र क्षयं ययौ ॥२२१॥
पारणायाऽन्यदोपेत्याऽ**योध्यायां** ते ययुः पुरि । **अर्हद्दत्त**श्रेष्ठिनश्च भिक्षार्थं प्राविशन् गृहे ॥२२२॥
सावज्ञं तान् स वन्दित्वा दध्यौ श्रेष्ठीति के ह्य[13]मी ? । नेह[14]त्याः साधुवेषास्तद् वर्षास्वपि विहारिणः ॥२२३॥
पृच्छामि किममून् ? यद् वा पाखण्डैर्भाषितैरलम् । तस्यैवं ध्यायतस्ते तु तद्बध्वा प्रतिलम्भिताः ॥२२४॥
आचार्यस्य [15]**द्युते**र्जग्मुर्वसतौ ते महर्षयः । अभ्युत्थाय **द्युति**नाऽपि वन्दितास्ते सगौरवम् ॥२२५॥
अकालचारिण इति [16]तत्साधुभिरवन्दिताः । दत्तासनास्ते **द्युति**ना तत्र पारणकं व्यधुः ॥२२६॥
आयाता **मथुरा**पुर्या यास्यामस्तत्र सम्प्रति । इत्याख्याय समुत्पत्य स्वं स्थानं ते पुनर्ययुः ॥२२७॥
¶तेषां **जङ्घाचारणा**नां गुणस्तोत्रं **द्युति**र्व्यधात् । तत्साधवः कृतावज्ञाः **पश्चात्तापं** प्रचक्रिरे ॥२२८॥
तच्छ्रुत्वा श्रावकः सोऽ**र्हद्दत्तो**ऽप्यनु[17]शयं व्यधात् । कार्तिकश्वेतसप्तम्यां ययौ च [18]**मथुरा**पुरीम् ॥२२९॥
अर्चित्वा तत्र चैत्यानि सप्तर्षींस्तानवन्दत । क्षमयामास चाऽवज्ञादोषं शंसन् स्वयं कृतम् ॥२३०॥
सप्तर्षीणां प्रभावेण शान्तरोगं स्वमण्डलम् । विज्ञायेयाय कार्तिक्यां **शत्रुघ्नो**ऽपि हि तां पुरीम् ॥२३१॥
तान्नत्वोवाच **शत्रुघ्नो** भिक्षा मे गृह्यतां गृहे । प्रत्यूचुस्तेऽपि साधूनां राजपि[19]ण्डं न कल्पते ॥२३२॥
भूयोऽप्युवाच **शत्रुघ्नो** यूयं मय्युपकारिणः । मद्देशे दैविको रोगः शान्तो युष्मत्प्र[20]भावतः ॥२३३॥
तल्लोकानुग्रहायेह किञ्चिदद्याऽपि तिष्ठत । सर्वा प्रवृत्तिर्भवतां ह्यन्योपकृतिहेतवे ॥२३४॥
तेऽप्यूचिरे गतः प्रावृट्कालोऽयं तीर्थयात्रया । अधुना विहरिष्यामो नैकत्र मुनयः स्थिराः ॥२३५॥
गृहे गृहे त्वं गृहिणां कारयेर्बिम्बमार्हतम् । पुर्यामस्यां ततो जातु व्याधिर्भावी न कस्यचित् ॥२३६॥

---

१. ०*भ्यसन्तं* ता. ॥ २. *समुदैक्षत* खं.१विना ॥ ३. दत्तानाम्नीम् ॥ ४. राज्येन ॥५. *मन्त्रिणो* खं.१-२, पाता.; *मन्त्रिणोऽप्रै०* रसंपा.; *मन्त्रिणां प्रै०* मु. ॥ ६. ०*चन्द्रप्रभो०* ता. ॥ ७. ०*श्चन्द्रप्रभाय* ता. ॥ ८. सेवकविहीनान् गुप्तचरकलितान् वा ॥ ९. २१४श्लोकानन्तरं "इत्युक्त्वा मुनिवर्यौ तौ, ततोऽन्यत्र विजहतुः । रामचन्द्रादयः सर्वे, स्वं स्वं स्थानं मुदा ययुः ॥" इतिभावार्थकः श्लोकोऽपेक्षितः इति प्रतिभाति । (इति टिप्पणी पूर्वमुद्रितप्रतौ) ॥ १०. ०*श्चमर०* ता. रसंपा. ॥ ११. अष्टमं सुतमित्यर्थः ॥ १२. चमरेन्द्रकृतः ॥ १३. *त्वमी* ता. ॥ १४. इह-भरतभूमौ भवाः ॥ १५. द्युतिनामकजैनाचार्यस्य ॥ १६. द्युतेः साधुभिः ॥ १७. पश्चात्तापम् ॥ १८. *मथुरां* मु. ॥ १९. ०*पिण्डो* ला.विना ॥ २०. *युष्मत्प्रसादतः* ता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा ते समुत्पत्य ययुः सप्तर्षयोऽन्यतः । **शत्रुघ्नो**ऽपि तथा चक्रे लोकश्चाऽभून्निरामयः ॥२३७॥
तेषां सप्तऋषीणां च प्रतिमा रत्ननिर्मिताः । स चक्रे **मथुरा**पुर्यां ककुप्सु[1] चतसृष्वपि ॥२३८॥
¶इतश्च **वैताढ्य**गिरौ दक्षिणश्रेणिभूषणे । पुरे **रत्नपुरे रत्नरथो** राजा तदाऽभवत् ॥२३९॥
तस्य **चन्द्रमुखी**कुक्षिजन्मा नाम्ना **मनोरमा** । उद्यौवना कन्यकाऽभूद् रूपेणाऽपि मनोरमा ॥२४०॥
दातव्या कस्य कन्येयमिति मन्त्रपरे[2] नृपे । उपेत्य **नारदो**ऽवोचल्**लक्ष्मण**स्येयमर्हति ॥२४१॥
पुत्रा[3] **रत्नरथ**स्याऽथ कुपिता गोत्रवैरतः । भृत्यान् भ्रूसञ्ज्ञयाऽऽदिक्षन्[4] विटोऽयं कुट्यतामिति ॥२४२॥
उत्तिष्ठतो जिघांसूंस्तान्[5] धीमान् विज्ञाय **नारदः** । समुत्पत्य पतत्रीव[6] प्रययावुप**लक्ष्मणम्** ॥२४३॥
लिखित्वा तां पटे कन्यां दर्शयामास **नारदः** । **लक्ष्मणाय** स्ववृत्तान्तं तं चाऽऽचख्यावशेषतः ॥२४४॥
तद्रूपदर्शनाज्जातानुरागो **लक्ष्मणः**[7] क्षणात् । समं **रामेण** तत्राऽऽगाद् रक्षो-विद्याधरैर्वृतः ॥२४५॥
जितः **सौमित्रिणा** चाऽऽशु तत्र **रत्नरथो** ददौ । **रामाय** कन्यां **श्रीदामां लक्ष्मणाय मनोरमाम्** ॥२४६॥
**वैताढ्य**दक्षिणश्रेणिं जित्वा सर्वां च **राघवौ** । भूयोऽ**योध्या**मीयतुः क्ष्मां पालयन्तौ च तस्थतुः ॥२४७॥
षोडशान्तःपुरवधूसहस्रं **लक्ष्मणस्य** तु । महिष्योऽष्टाऽभवंस्तत्र **विशल्या रूपवत्य**पि ॥२४८॥
**वनमाला** च **कल्याणमालिका**[8] **रत्नमालिका** । **जितपद्मा**ऽ**भयवती**[9] चाऽष्टमा तु **मनोरमा** ॥२४९॥युग्मम्॥
सूनवो द्वे शते सार्धे तेष्वष्ट महिषीभवाः । **श्रीधरो**ऽभूद् **विशल्याभूः पृथिवीतिलकः** पुनः ॥२५०॥
**रूपवत्य**ङ्गजो **वनमाला**जोऽ**र्जुन**सञ्ज्ञकः । **श्रीकेशी जितपद्मायाः कल्याणायास्तु मङ्गलः** ॥२५१॥
**सुपार्श्वकीर्तिस्तु मनोरमाया विमलः** पुनः । [10]**रतिमालाभूरभयवतीभूः सत्यकीर्तिकः** ॥२५२॥
**राम**स्याऽऽसन् महादेव्यश्चतस्रस्तत्र **मैथिली** । **प्रभावती रतिनिभा श्रीदामा** तु चतुर्थिका ॥२५३॥
**सीतै**कदा ऋतुस्नाता निशान्ते स्वप्नमैक्षत । च्युतौ विमानाच्छरभौ[11] प्रविशन्तौ निजानने ॥२५४॥
व्याख्याद् **राम**स्तयाऽऽख्याते वीरौ ते भाविनौ सुतौ । च्युतौ विमानाच्छरभौ यत् तु तन्न मुदे मम ॥२५५॥
धर्मस्य ते च माहात्म्यात् सर्वं भावि शुभं प्रभो! । इत्यूचे **जानकी** देवी तदा गर्भं बभार च ॥२५६॥
¶**सीता** प्राणप्रियाऽग्रेऽपि प्राप्तगर्भा विशेषतः । बभूव **रामचन्द्र**स्य लोचनानन्दचन्द्रिका ॥२५७॥
ईर्ष्यालवः सपत्न्यस्तां मायाविन्योऽब्रुवन्नदः । कीदृग्रूपो **रावणो**ऽभूत् ? तं लिखित्वा प्रदर्शय ॥२५८॥
**सीता**ऽप्यूचे मया दृष्टः सर्वाङ्गं न हि **रावणः** । दृष्टौ तच्चरणावेव कथं नाम लिखामि तम् ? ॥२५९॥
तत्पादावप्यालिख त्वं कौतुकं नस्तदीक्षणे । इत्युक्ता प्रकृतिऋजु[12]**र्दशास्यां**ह्री लिलेख सा ॥२६०॥
स्थाने तत्राऽऽगमद् **रामो** बभाषे ताभिरप्यदः । **रावण**स्य स्मरत्यद्याऽप्यसौ **सीता** तव प्रिया ॥२६१॥
**सीता**स्वहस्तलिखितं **रावण**स्य क्रमद्वयम् । पश्यैतन्नाथ! जानीहि **सीता** तस्यैव[13] नाथते ॥२६२॥
दृष्ट्वाऽपि तत् तथा **रामो** गम्भीरत्वान्महामनाः । तथैव[14] ववृते **सीता**देव्यामनुपलक्षितः ॥२६३॥
**सीता**दोषपदं तच्च देव्यो दासीजनैर्निजैः । जने प्राकाशयन् प्रायः प्रवादा[15] लोकनिर्मिताः ॥२६४॥
वसन्तेऽथाऽब्रवीद् **रामः सीते**! त्वां गर्भखेदिताम् । विनोदयितुकामेव मधुलक्ष्मीरिहाऽऽययौ[16] ॥२६५॥
पुष्पन्ति[17] बकुलप्राया वृक्षाः स्त्रीदत्तदोहदैः । रन्तुं व्रजामो **महेन्द्रोदयो**[18]द्यानं ततोऽधुना ॥२६६॥
**सीता**ऽप्यूचे दोहदो मे देवतार्चनलक्षणः । तं पूरयोद्यानभवैर्नानापुष्पैः सुगन्धिभिः ॥२६७॥
**रामः** सद्योऽपि देवानां पूजां[19] वर्यामकारयत् । ययौ **महेन्द्रोदये** च **ससीतः** सपरिच्छदः ॥२६८॥
विचित्रनागर[20]क्रीडं तत्राऽपश्यन्मधूत्सवम् । अर्हत्पूजोत्सवमयं सुखासीनो **रघूद्वहः** ॥२६९॥
¶अत्राऽन्तरे च **सीताया** दक्षिणं चक्षुरस्फुरत् । आचचक्षे च सद्योऽपि साशङ्का **राघवाय** सा ॥२७०॥
नेदं साध्विति **रामे**णाऽऽख्याते **सीता**ऽब्रवीदिति । किं **रक्षोद्वीप**वासान्मे सन्तुष्टोऽद्याऽपि नो विधिः ? ॥२७१॥

---

१. दिशासु ॥ २. *मन्त्रपरो नृपः* पाता. ॥ ३. *पुत्री* खं.२, रस्वीपा. मु. ॥ ४. *०दिक्षद् विटो०* खं.१-२, मु. रस्वीपा. ॥ ५. हन्तुमिच्छून् ॥ ६. पक्षीव ॥ ७. *लक्ष्मणस्तदा* ता. ॥ ८. *रतिमालिका* ता. ॥ ९. *०ऽभयावती* पाता. ॥ १०. *वनमाला०* ता. ॥ ११. अष्टापदमृगौ ॥ १२. *प्रकृतिऋज्वी दशा०* मु.; सरलस्वभावा ॥ १३. रावणमेव वाञ्छतीत्यर्थः ॥ १४. पूर्ववत् ॥ १५. प्रायेणाऽपवादा लोकैरेव निर्मिता भवन्ति, न तु वास्तविकाः ॥ १६. वसन्तर्तुः ॥ १७. *पुष्पन्ति* पाता. ॥ १८. *माहेन्द्रो०* पाता. ॥ १९. *पूजाचर्या०* मु. ॥ २०. *नगर०* मु., *नागरी०* पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]त्वद्वियोगभवाद् दुःखाद् दुःखमद्याऽपि मेऽधिकम्। किमसौ दास्यति विधिर्निमित्तं नैतदन्यथा ॥२७२॥
**रामो**ऽपि तामुवाचैवं देवि! मा खेदमुद्वह। अवश्यमेव भोक्तव्ये कर्माधीने सुखासुखे ॥२७३॥
तद् गच्छ मन्दिरे स्वस्मिन् देवानामर्चनं कुरु। प्रयच्छ दानं पात्रेभ्यो धर्मः शरणमापदि ॥२७४॥
[2]**सीता**ऽपि सदनं गत्वा संयमेन महीयसा। अर्हतोऽ[3]पूजयद् दानं प्रददे चाऽ[4]वदानवत् ॥२७५॥
**रघुनाथ**मथाऽऽजग्मू [5]राजधानीमहत्तराः। [6]यथाभूतपुरीवृत्तकीर्तनैकाधिकारिणः ॥२७६॥
**विजयः सूरदेव**श्च **मधुमा**नथ **पिङ्गलः**। **शूलधरः काश्यप**श्च **कालः क्षेम**श्च नामतः ॥२७७॥
नत्वा **रामा**ग्रतस्तस्थुः कम्पमाना [7]द्रुपत्रवत्। न तु विज्ञपयामासू राजतेजो हि दुस्सहम् ॥२७८॥
तानूचे **रामभद्रो**ऽपि भो भोः! पुरमहत्तराः!। अभयं वो ब्रुवाणानामेकान्तहितवादिनाम् ॥२७९॥
तेष्वाद्यः [8]सर्वसंवित्त्या **विजया**ख्यो महत्तरः। इति विज्ञपयामास सावष्टम्भः प्रभोर्गिरा ॥२८०॥
स्वामिन्नवश्यविज्ञप्यं यदि विज्ञप्यते न हि। वञ्चितः स्यात् तदा स्वामी, विज्ञप्तं चाऽतिदुःश्रवम् ॥२८१॥
देव! देव्यां प्रवादोऽस्ति घटते दुर्घटोऽपि हि। युक्त्या हि [9]यद् घटामेति श्रद्धेयं तन्मनीषिणा ॥२८२॥
तथाहि **जानकी** हृत्वा **रावणे**न रिरंसुना। एकैव निन्ये तद्वेश्मन्यवात्सीच्च चिरं प्रभो! ॥२८३॥
**सीता** रक्ता विरक्ता वा [10]संवित्त्या वा [11]प्रसह्य वा। स्त्रीलोलेन **दशास्ये**न नूनं स्याद् भोगदूषिता ॥२८४॥
लोको[12] हि प्रवदत्येवं प्रवदामो वयं तथा। युक्तियुक्तं प्रवादं तन्मा सहस्व **रघूद्वह**! ॥२८५॥
आजन्मोपार्जितां कीर्तिं निजं कुलमिवाऽमलाम्। प्रवादसहनेन त्वं मा देव! मलिनीकृथाः ॥२८६॥
कलङ्कस्याऽतिथीभूतां **सीतां** निश्चित्य **राघवः**। सद्योऽभूद् [13]दुःखतूष्णीकः प्रायः प्रेमाऽतिदुस्त्यजम् ॥२८७॥
धैर्यमालम्ब्य **काकुत्स्थ**स्तानुवाच महत्तरान्। साधु व्यज्ञपि युष्माभिर्न भक्ताः क्वाऽप्युपेक्षकाः ॥२८८॥
न स्त्रीमात्रकृते जातु सहिष्येऽहमिहाऽयशः। इति **पद्मः** प्रतिज्ञाय विससर्ज महत्तरान् ॥२८९॥
निशायामथ **काकुत्स्थः** प्रच्छन्नः सदनाद् बहिः। निरगादिति चाऽश्रौषीज्जन[14]वाचं पदे पदे ॥२९०॥
[15]**रावणे**नाऽपनीतेयं तद्गृहे च चिरं स्थिता। **सीता**ऽऽनीता च **रामे**ण सतीति च स मन्यते ॥२९१॥
नीता[16] रक्तेन तेनेयं नोपभुक्ता कथं भवेत्?। [17]नाऽदोऽपि व्यमृशद् **रामो** न रक्तो दोषमीक्षते ॥२९२॥
इत्यादि**सीता**निर्वादं शृण्वन् **रामो** [18]गृहं [19]ययौ। भूयोऽपि तच्छ्रवणार्थमादिदेश चरान् वरान् ॥२९३॥
एवं च दध्यौ **काकुत्स्थो** मया यस्याः कृते कृतः। रक्षःकुलक्षयो रौद्रस्तस्याः किमिदमागतम्? ॥२९४॥
जाने महासती **सीता** स्त्रीलोलः स च **रावणः**। कुलं च मे निष्कलङ्कं हा **रामः** किं करोत्वसौ? ॥२९५॥
द्राक् चरास्ते बहिः श्रुत्वा **सीता**निर्वादमब्रुवन्। **रामस्य** [20]सानुज-कपि-रक्षोराजस्य सुस्फुटम् ॥२९६॥
क्रुद्धोऽथ **लक्ष्मणो**ऽवोचद् दोषान् [21]सङ्कल्प्य हेतुभिः। ये निन्दन्ति सतीं **सीतां** तेषामेषोऽन्तकोऽस्म्यहम् ॥२९७॥
**रामो**ऽप्यूचे मम पुरा व्यज्ञपीदं महत्तरैः। स्वयं च शुश्रुवे तस्य संवादोऽयं चरैः कृतः ॥२९८॥
श्रुत्वा चाऽमी समायाताः प्रत्यक्षं [22]वोऽपि भाषिताः। **सीता**त्यागे माऽपवादीत् **सीता**स्वीकारवज्जनः[23] ॥२९९॥
ऊचे च **लक्ष्मणो** लोकगिरा **सीतां** स्म मा त्यज। यथा तथाऽपवदिता यदबद्धमुखो जनः ॥३००॥
लोकः सौराज्यसुस्थोऽपि राजदोषपरो भवेत्। शिक्षणीयो न चेत् तत्रोपेक्षणीयः स भूभुजाम् ॥३०१॥
**रामो**ऽप्यूचे सत्यमेतदीदृग् लोकः सदाऽपि हि। सर्वलोकविरुद्धं तु त्याज्यमेव यशस्विना[24] ॥३०२॥
इत्युक्त्वोवाच सेनान्यं **कृतान्तवदनं** [25]बलः। अरण्ये त्यज्यतां क्वाऽपि **सीते**यं गर्भवत्यपि ॥३०३॥

१. *त्वद्वियोगभवाद्दुःखमद्याऽपि मेऽधिकं पुनः* पाता. ॥ २. *सीता गत्वा च सदनं* खं.१; *सीताऽपि गत्वा सदनं* खं.२, ता. ला.; *सीता गत्वाऽपि सदनं* पाता. ॥ ३. *०ऽपूपुजद्०* ला. ॥ ४. अवदानं-शुद्धं कर्म ॥ ५. राजधानी-अयोध्या, तस्य महत्तराः-महाजनः ॥ ६. नगर्या यथार्थवृत्तान्तकथनेऽधिकृताः ॥ ७. वृक्षपर्णवत् ॥ ८. सर्वव्यतिकरज्ञातृत्वेन आद्यः ॥ ९. यद् घटते ॥ १०. सीतायाः अनुमत्यात्मकबुद्ध्या ॥ ११. बलात् ॥ १२. *लोकोऽपि* पाता.विना ॥ १३. दुःखेन मौनावलम्बी ॥ १४. *०जनवादं* मु. रत्वीपा. ॥ १५. *रावणेनोप०* खं.२ ॥ १६. *सीतारक्तेन* मु. ॥ १७. न एतदपीत्यर्थः ॥ १८. *गृहे* पाता.विना ॥ १९. *गृहे* खं.२ ॥ २०. अनुज(लक्ष्मण)-कपि(सुग्रीव)-रक्षो(बिभीषण)युक्तस्य ॥ २१. *सङ्कल्प०* खं.१, पाता. ॥ २२. *चाऽपि भाषिताः* खं.१, मु. रत्वीपा.; *च स्वभाषिताः* ला. ॥ २३. यथा सीतायाः स्वीकारे कृते जनोऽपवदितुं-निन्दितुं लग्नः, तथा लोकापवादं श्रुत्वैव सीतायास्त्यागे कृतेऽपि लोकोऽपवदिष्यतीत्याशङ्का सम्भवति, तन्निरासाय इमे चराः सीतापवादं श्रुत्वाऽऽगताः-वः-युष्माकं च प्रत्यक्षं ते भाषिताः-यथाश्रुतं निवेदिता मया, अतः सीतात्यागेऽपि लोकापवादो भविष्यतीत्याशङ्का न स्थाने इत्याशयोऽत्र सम्भाव्यते ॥ २४. *यशस्विनः* मु. ॥ २५. रामः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतित्वा **राम**पादेषु बभाषे **लक्ष्मणो** रुदन् । **सीता**देव्या महासत्यास्त्यागोऽयमुचितो न हि ॥३०४॥
नाऽतः परं त्वया वाच्यमिति **रामे**ण भाषिते । [1]नीरङ्गीच्छन्नवक्त्रोऽगात् **सौमित्रिः** स्वगृहं रुदन् ॥३०५॥
**कृतान्तवदनं रामो**ऽन्वशात् **सीतां** वने नय । [2]**सम्मेत**यात्राव्याजेन तस्याः खल्वेष दोहदः ॥३०६॥
सेनानीरपि **सम्मेत**यात्रायै **राम**शासनम् । आख्याय **सीता**मारोप्य स्यन्दने प्राचलद् द्रुतम् ॥३०७॥
दुर्निमित्तेष्वशकुनेष्वपि **सीता** रथस्थिता । जगाम दूरमध्वानमार्जवादविशङ्किता ॥३०८॥
**गङ्गा**सागरमुत्तीर्याऽरण्ये **सिंहनिनादके** । गत्वा **कृतान्तवदन**स्तस्थौ किञ्चिद् विचिन्तयन् ॥३०९॥
साश्रुं म्लानमुखं तं च प्रेक्ष्य **सीता**ऽब्रवीदिति । कथमित्थं स्थितोऽसि त्वं सशोक इव दुर्मनाः ? ॥३१०॥
**कृतान्तः** कथमप्यूचे दुर्वचं वच्म्यहं कथम् ? । दुष्करं कृतवांश्चैतत् [3]प्रैष्यभावेन दूषितः ॥३११॥
राक्षसावाससंवासापवादाल्लोकजन्मनः । भीतेन देवि! **रामे**ण त्याजिताऽसि वनेऽनघे! ॥३१२॥
अपवादे चराख्याते **रामं** त्वत्त्यजनोद्यतम् । न्यषेधील्**लक्ष्मणो** लोकं प्रति क्रोधारुणेक्षणः ॥३१३॥
[4]सिद्धाज्ञया निषिद्धश्च **रामेण** स रुदन् ययौ । अहं च प्रेषितोऽमुष्मिन् कार्ये पापोऽस्मि देवि! हा! ॥३१४॥
अमुष्मिन् श्वापदाकीर्णे मृत्योरेकनिकेतने । जीविष्यसि मया त्यक्ता स्वप्रभावेण केवलम् ॥३१५॥
तच्छ्रुत्वा स्यन्दनात् **सीता** मूर्च्छिता न्यपतद् भुवि । मृतेति बुद्ध्या सेनानीः पापमन्यो रुरोद सः ॥३१६॥
**सीता**ऽपि वनवातेन कथञ्चित् प्राप चेतनाम् । भूयो भूयोऽप्यमूर्च्छच्च चेतनामाससाद च ॥३१७॥
महत्यामथ वेलायां सुस्थीभूयेत्युवाच सा । इतो**ऽयोध्या** कियद्दूरे ? **राम**स्तिष्ठति कुत्र वा ? ॥३१८॥
सेनानीरभ्यधाद् दूरे**ऽयोध्या** किं पृच्छयाऽनया ? । उग्राज्ञस्य च **रामस्य** पर्याप्तं देवि! वार्तया ॥३१९॥
इति श्रुत्वाऽपि सा **राम**भक्ता भूयोऽप्यभाषत । भद्र! मद्वाचिकमिदं शंसे **रामस्य** सर्वथा ॥३२०॥
यदि निर्वादभीतस्त्वं परीक्षां नाऽकृथाः कथम् ? । शङ्कास्थाने हि सर्वोऽपि दिव्यादि लभते जनः ॥३२१॥
अनुभोक्ष्ये स्वकर्माणि मन्दभाग्या वनेऽप्यहम् । नाऽनुरूपं त्वकार्षीस्त्वं विवेकस्य कुलस्य च ॥३२२॥
यथा खलगिराऽत्याक्षीः स्वामिन्नेकपदेऽपि माम् । तथा मिथ्यादृशां वाचा मा धर्मं जिनभाषितम् ॥३२३॥
इत्युक्त्वा मूर्च्छिता भूमौ पतितोत्थाय चाऽभ्यधात् । मया विना कथं **रामो** जीविष्यति ? हताऽस्मि हा! ॥३२४॥
**रामा**य स्वस्त्यथाऽऽशंसेराशिषं **लक्ष्मण**स्य च । शिवास्ते सन्तु पन्थानो वत्स! गच्छोप**राघव**म् ॥३२५॥

एवंविधेऽपि दयिते विपरीतवृत्तौ
यैवंविधा तदियमेव सतीषु धुर्या ।
सञ्चिन्तयन्निति भृशं प्रणिपत्य मुक्त्वा
**सीतां कृतान्तवदनो** ववले कथञ्चित् ॥३२६॥

इत्याचार्यश्री[5]**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
[6]सप्तमपर्वणि **सीता**परित्यागो नामाऽष्टमः [7]सर्गः॥

१. मुखं वस्त्रेण आवृत्य('घुंघट काढीने') इति भाषायाम् ॥ २. सम्मेतशिखरयात्रामिषेण ॥ ३. किङ्करभावेन ॥ ४. अनुल्लङ्घनीयनिजाज्ञादानेन ॥ ५. *०हेमचन्द्राचार्य०* ला.विना ॥ ६. *सप्तमे०* पाता. ला. ॥ ७. *सर्गः समाप्तः* पाता. मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥नवमः सर्गः॥

अथ **सीता** भयोद्भ्रान्ता बभ्रामेतस्ततो वने। आत्मानमेव निन्दन्ती पूर्वदुष्कर्मदूषितम् ॥१॥
भूयो भूयश्च रुदती **स्खलन्ती** च पदे पदे। गच्छन्ती पुरतोऽपश्यन्महत् सैन्यं समापतत्[1] ॥२॥
मृत्यु-जीवितयोस्तुल्याशया प्रेक्ष्याऽपि तद् बलम्। **सीता** तस्थावभीतैव नमस्कारपरायणा ॥३॥
तां दृष्ट्वा बिभयाञ्चक्रुः सैनिकाः प्रत्युताऽपि ते। का नाम दिव्यरूपेयं भूस्थितेत्यभिभाषिणः ॥४॥
**सीता**या रुदितं श्रुत्वा स्वरवित्[2] तच्चमूनृपः। इयं महासती काऽपि गुर्विणी चेत्यवोचत ॥५॥
कृपालुः स महीपाल उप**सीतं** जगाम च। **सीता**ऽप्याशङ्किता तस्य स्वं[3] नेपथ्यमढौकयत्[4] ॥६॥
राजाऽप्येवमभाषिष्ट मा भैषीस्त्वं मनागपि। तवैव भूषणान्येतान्यङ्गे तिष्ठन्तु हे स्वसः! ॥७॥
का त्वं ? कस्त्वामिहाऽत्याक्षीन्निर्घृणेभ्योऽपि निर्घृणः ?। आख्याहि मा स्म शङ्किष्ठास्त्वत्कष्टेनाऽस्मि कष्टितः ॥८॥
तन्मन्त्री **सुमति**र्नाम **सीता**मेत्याऽब्रवीदिति। **गजवाहन**राजस्य **बन्धुदेव्या**श्च नन्दनः ॥९॥
नृपति**र्वज्रजङ्घो**ऽयं **पुण्डरीकपुरे**श्वरः। महार्हतो महासत्त्वः परनारीसहोदरः ॥१०॥
गजान् ग्रहीतुमत्रैत्य कृतार्थीभूय च व्रजन्। त्वद्दुःखदुःखितोऽत्राऽऽगाद् दुःखमाख्याहि तन्निजम् ॥११॥
विश्वस्य[5] **सीता**ऽप्याचख्यौ **स्ववृत्तान्तमशेषतः**। रुदती रोदयन्ती तौ कृपालू राज-मन्त्रिणौ ॥१२॥
निर्व्याजो[6] व्याजहारैवं राजा धर्मस्वसा[7]ऽसि मे। एकं धर्मं प्रपन्ना हि सर्वे स्युर्बन्धवो मिथः ॥१३॥
मम **भामण्डल**स्येव भ्रातुरेहि[8] तदोकसि। स्त्रीणां पतिगृहादन्यत् स्थानं भ्रातृनिकेतनम् ॥१४॥
**रामो**ऽपि लोकवादेन त्वामत्याक्षीन्न तु स्वयम्। पश्चात्तापेन सोऽप्यद्य मन्ये त्वमिव कष्टभाक् ॥१५॥
गवेषयिष्यत्यचिरात् त्वां सोऽपि विरहातुरः। चक्रवाक इवैकाकी ताम्यन् **दशरथा**त्मजः ॥१६॥
इत्युक्ता निर्विकारेण तेनोमि[9]त्यभिधायिनी। **सीता** रुरोह शिबिकां सद्यस्तदुपायिताम्[10] ॥१७॥
**पुण्डरीकपुरं** चाऽऽगान्**मिथिला**मपरामिव। अहर्निशं धर्मशीला चाऽस्थात् तद्दर्शिते गृहे ॥१८॥
¶इतश्च **राम**सेनानीर्गत्वा **रामाय** सोऽवदत्। वने **सिंहनिनादा**ख्ये त्यक्तवानस्मि **जानकीम्** ॥१९॥
मुहुर्मुहुः सा मूर्च्छित्वा चेतित्वा[11] च मुहुर्मुहुः। कथञ्चिद् धैर्यमालम्ब्य वाचिकं चैवमादिशत् ॥२०॥
नीतिशास्त्रे स्मृतौ देशे कस्मिन्नाचार ईदृशः। एकपक्षोक्तदोषेण पक्षस्याऽन्यस्य शिक्षणम्[12] ? ॥२१॥
सदा विमृश्य कर्तुस्तेऽप्यविमृश्यविधायिता। मन्ये मद्भाग्यदोषेण निर्दोषस्त्वं सदाऽप्यसि ॥२२॥
खलोक्त्याऽहं यथा त्यक्ता निर्दोषाऽपि त्वया प्रभो!। तथा मिथ्यादृशां वाचा मा त्याक्षीर्धर्ममार्हतम् ॥२३॥
इत्युक्त्वा मूर्च्छिता **सीता** पतित्वोत्थाय चाऽब्रवीत्। मया विना कथं **रामो** जीविष्यति ? हताऽस्मि हा! ॥२४॥
इत्याकर्ण्य वचो **रामः** पपात भुवि मूर्च्छया[13]। सम्भ्रमा**ल्लक्ष्मणे**नैत्य सिषिचे चन्दनाम्भसा ॥२५॥
उत्थाय विललापैवं क्व सा **सीता** महासती ?। सदा खलानां लोकानां वचसा ही मयोज्झिता ॥२६॥
अथोचे **लक्ष्मणः** स्वामिंस्तस्मिन्नद्याऽपि सा वने। महासती स्वप्रभावत्राता नूनं भविष्यति ॥२७॥
गत्वा गवेषयित्वा च स्वयमानीयतां प्रभो!। **सीता** देवी त्वद्विरहान्न हि यावद् विपद्यते ॥२८॥
श्रुत्वैवं सह तेनैव सेनान्या खेचरैश्च तैः। **रामो**ऽगाद् व्योमयानेन तत्राऽरण्येऽतिदारुणे ॥२९॥
प्रतिस्थलं प्रतिजलं प्रतिशैलं प्रतिद्रुमम्। **रामो** गवेषयामास ददर्श न तु **जानकीम्** ॥३०॥
मन्ये व्याघ्रेण सिंहेन श्वापदेनाऽपरेण वा। **सीता** जग्धे[14]ति सुचिरं दध्यौ **रामो**ऽतिदुःखितः ॥३१॥

---

१. आगच्छत् ॥ २. स्वरज्ञानवान् ॥ ३. ***स्वनेपथ्य०*** खं.२, पाता. ॥ ४. आभूषणादि समर्पितवती ॥ ५. विश्वासं कृत्वा ॥ ६. निष्कपटः ॥ ७. धर्मभगिनी ॥ ८. ***भ्रातुरेव तवौकसि*** पाता. ता. ॥ ९. ***तेनौमि०*** पाता.; ***तेनामि०*** खं.१-२; ***तेनामे०*** मु. ॥ १०. ***०स्तदुपयायिताम्*** पाता. ॥ ११. सञ्ज्ञां प्राप्य ॥ १२. शिक्षा ॥ १३. ***मूर्च्छितः*** ता. ॥ १४. भक्षिता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सीता**प्राप्तौ विमुक्ताशो निवृत्य स्वपुरीं ययौ । पौरैः [1]**सीता**गुणग्राहं निन्द्यमानो मुहुर्मुहुः ॥३२॥
प्रेत[2]कार्यं च **सीता**याः **पद्मो**ऽकार्षीदुदश्रुदृक् । पश्यन् **सीता**मयमिव सर्वं शून्यमिवाऽथ वा ॥३३॥
सैका हृदि दृशोरग्रे तस्थौ **राम**स्य वाचि च । क्वाऽपि तिष्ठति **सीते**ति तथाऽपि न विवेद सः ॥३४॥
¶इतश्च तत्र **वैदेही** सुषुवे युग्मिनौ सुतौ । नामतोऽ**नङ्गलवणं मदनाङ्कुश**मप्यथ ॥३५॥
**वज्रजङ्घ**स्तयोश्चक्रे जन्म-नाममहो[3]त्सवौ । स्वपुत्रलाभादधिकं मोदमानो महामनाः ॥३६॥
धात्रीजनैर्लाल्यमानौ लीलादुर्ललितावुभौ । क्रमेण ववृधाते [4]तावश्विनाविव भूचरौ ॥३७॥
कलाग्रहणयोग्यौ तावजायेतां महाभुजौ । कलभाविव शिक्षार्हौ नरेन्द्रनयनोत्सवौ ॥३८॥
तदा च नाम्ना **सिद्धार्थो**ऽणुव्रती सिद्धपुत्रकः । विद्या-बलर्द्धिसम्पन्नः कलागमविचक्षणः ॥३९॥
त्रिसन्ध्यमपि **मेर्वद्रौ** चैत्ययात्रासु [5]चङ्क्रमैः । आकाशगामी भिक्षार्थं **वैदेही**गृहमाययौ ॥४०॥युग्मम्॥
**वैदेह्या** भक्तपानाद्यैः श्रद्धया स [6]तु भोजितः । तथा सुखविहारं च तया पृष्टस्तदाऽवदत् ॥४१॥
तेनाऽपि पृष्टा **वैदेही** सुतजन्मावधि स्वकम् । मूलाद् वृत्तान्तमाचख्यौ तस्य भ्रातुरिवाऽग्रतः ॥४२॥
ऊचेऽष्टाङ्गनिमित्तज्ञः **सिद्धार्थः** करुणानिधिः । किं ताम्यसि मुधा ? यस्यास्तनयौ **लवणाङ्कुशौ** ॥४३॥
प्रशस्तलक्षणौ साक्षादिव तौ **राम-लक्ष्मणौ** । मनोरथं तव सुतौ नचिरात् पूरयिष्यतः ॥४४॥
तेनेत्याश्वासिता **सीता** तमभ्यर्थ्य कृता[7]ग्रहा । स्वगृहे धारयामास पुत्राध्ययनहेतवे ॥४५॥
स भव्याविति तत्पुत्रौ सर्वा [8]अग्राहयत् कलाः । तथा यथा तावभूतां दुर्जयौ द्युसदामपि ॥४६॥
तावधीताखिलकलौ प्रपेदाते च यौवनम् । नूतनाविव [9]कन्दर्प-[10]वसन्तौ सहचारिणौ ॥४७॥
**वज्रजङ्घः शशिचूलां** पुत्रीं **लक्ष्मीवती**भवाम् । कन्या द्वात्रिंशतं चाऽन्या **लवणे**नोदवाहयत् ॥४८॥
सोऽ**ङ्कुशा**य ययाचे तु **पृथ्वीपुर**पतेः **पृथोः** । कन्यका**ममृतवती**जातां **कनकमालिका**म् ॥४९॥
वंशो न ज्ञायते यस्य तस्मै स्वदुहिता कथम् । दीयतामित्यभाषिष्ट **पृथुः** पृथुपराक्रमः ॥५०॥
**वज्रजङ्घ**स्तदाकर्ण्य तं क्रोधादभ्यषेणयत् । [11]**पृथु**गृह्यं **व्याघ्ररथं** युद्धे बद्ध्वाऽग्रहीन्नृपम् ॥५१॥
स्वमित्रं **पोतन**पतिं साहाय्यायाऽह्वयत् **पृथुः** । विधुरेषु हि मित्राणि स्मरणीयानि मन्त्रवत् ॥५२॥
**वज्रजङ्घो**ऽपि पुत्रान् स्वान् नरैरानाययद् युधि । तैर्वार्यमाणावपि तौ चेयतु**र्लवणाङ्कुशौ** ॥५३॥
अन्येद्युर्ववृते युद्धं चम्वोर्मिलितयोर्द्वयोः । परैरतिबलै**र्वज्रजङ्घ**सैन्यं त्वभज्यत ॥५४॥
संक्रुद्धौ मातुलचमूभङ्गेन **लवणाङ्कुशौ** । निरङ्कुशाविव गजौ [12]प्रणिघ्नन्तावधावताम् ॥५५॥
तयोरोजस्विनो रंहो मनागपि न सेहिरे । द्विषन्तः [13]प्रावृडुत्पूरस्रोतसोरंह्रिपा इव ॥५६॥
अभज्यत ससैन्योऽपि **पृथु**र्यावन्नरेश्वरः । ऊचतुस्तावदेवं तौ स्मेरास्यौ **राम**नन्दनौ ॥५७॥
अपरिज्ञातवंशाभ्यामप्यावाभ्यामिहाऽऽहवे । विज्ञातवंशजा यूयं पलायध्वे कथं त्वहो ? ॥५८॥
इति तद्वचनं श्रुत्वा वलित्वा **पृथु**रब्रवीत् । व्यज्ञायि वंशो युष्माकं विक्रमेणाऽमुना मया ॥५९॥
**अङ्कुशा**याऽर्थिता कन्या **वज्रजङ्घे**न भूभुजा । नूनं मम हितेनैव वरो हीदृक् क्व लभ्यते ? ॥६०॥
इति सानुनयं प्रोच्य सोऽ**ङ्कुशा**य तदैव हि । कन्यां **कनकमाला**ख्यां प्रददौ पूर्वयाचिताम् ॥६१॥
[14]सन्धानं **वज्रजङ्घे**न समक्षं सर्वभूभुजाम् । चक्रे **पृथु**नृपः पुत्र्याः स्पृहय**न्नङ्कुशं** वरम् ॥६२॥
तत्राऽस्थाच्छिबिरं न्यस्य **वज्रजङ्घ**नरेश्वरः । आगाच्च **नारद**मुनिः सच्चक्रे तेन चोच्चकैः ॥६३॥
**वज्रजङ्घो** निषण्णेषु राजसूवाच **नारद**म् । **अङ्कुशाय पृथु**र्दास्यत्यसौ कन्यां निजां मुने! ॥६४॥
**लवणाङ्कुश**योर्वंशमस्मत्सम्बन्धिनोऽस्य तत् । आख्याहि ज्ञातजामातृवंशो येनैष तुष्यति ॥६५॥
अथोचे **नारदः** स्मित्वा वंशं को वेत्ति नाऽनयोः ? । यस्योत्पत्त्यादिकन्दः स भग[15]वा**नृषभध्वजः** ॥६६॥
चक्रिणो ह्यनयोर्वंशे **भरता**द्याः कथाश्रुताः । को न वेत्त्यनयोस्तातौ प्रत्यक्षौ **राम-लक्ष्मणौ** ॥६७॥

१. सीताया गुणान् गृहीत्वा ॥ २. मरणोत्तरक्रिया ॥ ३. *०महोत्सवैः* ला. ॥ ४. *तावश्विना०* मु.; देववैद्यौ ॥ ५. **च *क्रमात्*** खं.१-२, पाता. ला. ॥ ६. **च** ला. ॥ ७. *कृताग्रही* ला. ॥ ८. *अज्ञापयत्* छा. पा. ॥ ९. *कन्दर्पौ* पाता. ॥ १०. कामदेवो वसन्तर्तुश्च ॥ ११. पृथुराजस्य पक्षपातिनम् ॥ १२. प्रहारं कुर्वन्तौ ॥ प्रावृषः-वर्षायाः उत्पूरायाः(नद्याः) च स्रोतः-प्रवाहं यथा वृक्षा न सेहिरे तथा ॥ १४. सन्धिम् ॥ १५. *भगवान् वृषभ०* रसंपा. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गर्भस्थयोरप्यनयो**रयोध्या**लोकजन्मनः । अपवादाच्चकितेन त्यक्ता **रामेण जानकी** ॥६८॥

अथाऽ**ङ्कुशो** हसित्वोचे ब्रह्मन्! न खलु साधु तत् । चक्रे **रामेण वैदेहीं** त्यजता दारुणे वने ॥६९॥

भूयांसि ह्यपवादस्य कारणानि निरा[1]कृतौ । भवन्ति तत्र किं [2]न्वेवं विद्वानपि चकार सः ? ॥७०॥

पप्रच्छ **लवणो**ऽथैवं दूरे कियति सा पुरी । यस्यां वसति मे तातः सानुजः सपरिच्छदः ? ॥७१॥

मुनिश्चोचे तव पिता यस्यां विश्वैकनिर्मलः । सा**ऽयोध्या** पूरितः [3]षष्टियुग्योजनशतं खलु ॥७२॥

**वज्रजङ्घ**मथोवाच **लवणः** प्रश्रयं श्रयन् । इच्छावस्तत्र गत्वाऽऽवां प्रेक्षितुं **राम-लक्ष्मणौ** ॥७३॥

प्रतिपद्य स तद्वाच**मङ्कुशं** पर्यणाययत् । महोत्सवेन **पृथु**राट्पुत्र्या **कनकमालया** ॥७४॥

**वज्रजङ्घ-पृथुभ्यां** तावन्वितौ **लवणाङ्कुशौ** । साधयन्तौ बहून् देशान् **लोकाख्यपुर**मीयतुः ॥७५॥

युद्धभूमौ च तद्रूपं धैर्य-शौण्डीर्यशालिनम् । **कुबेरकान्त**नामानं मानिनं तत्र जिग्यतुः ॥७६॥

[4]**लम्पाकेष्वेककर्णा**ख्यं विजिग्याते नृपं च तौ । ततश्च **विजयस्थल्यां** भूपं **भ्रातृशता**भिधम् ॥७७॥

**गङ्गा**मुत्तीर्य **कैलास**स्योत्तरां दिशमीयतुः । तत्र **नन्दनचारू**णां देशानां चक्रतुर्जयम् ॥७८॥

[5]**ऋष-कुन्तल-कालाम्बु-नन्दिनन्दन-सिंहलान्** । **शलभान**[6]**नलान् शूलान् भीमान् भूतरवा**दिकान् ॥७९॥

तौ जयन्तौ नृपान् **सिन्धोः** परकूलमुपेयतुः । तत्र चाऽऽर्याननार्यांश्च साधयामासतुर्नृपान् ॥८०॥युग्मम्॥

बहुदेशेश्वरानेवं साधयित्वा सहैव तैः । निवृत्योपेयतुस्तौ तत् **पुण्डरीकपुरं** पुरम् ॥८१॥

अहो! धन्यो **वज्रजङ्घो** यदीयौ [7]यामिनन्दनौ । ईदृशाविति जल्पद्भिर्वीक्ष्यमाणौ पुरीजनैः ॥८२॥

जग्मतुः स्वगृहं वीरौ भूपवीरैः समावृतौ । प्रणेमतुश्च **जानक्या**श्चरणौ विश्वपावनौ ॥८३॥युग्मम्॥

चुचुम्ब मूर्ध्नि तौ **सीता** स्नपयन्ती [8]मुदश्रुभिः । **राम-लक्ष्मण**योस्तुल्यौ भूयास्तमिति चाऽवदत् ॥८४॥

¶ऊचतु**र्वज्रजङ्घं** तौ मातुल! प्राक् त्वयाऽऽवयोः । [9]मेने यान**मयोध्या**यामिदानीमनुतिष्ठ तत् ॥८५॥

आज्ञाप्यन्तां च **लम्पाक-ऋष-कालाम्बु-कुन्तलाः** । **शलभानल-शूला**द्याश्चाऽपरेऽपि महीभुजः ॥८६॥

प्रयाणभम्भा वाद्यन्तां छाद्यन्तां च दिशो बलैः । त्यक्ता येनाऽऽवयोर्माता वीक्ष्यस्तस्याऽद्य विक्रमः ॥८७॥

**सीता**ऽपि सद्यो रुदती ज[10]गादैवं सगद्गदम् । वत्सौ! केयमनर्थेच्छा युवयोः कर्मणाऽमुना ? ॥८८॥

वीरौ पितृ-पितृव्यौ वां दुर्जयौ द्युसदामपि । यकाभ्यां निहतो रक्षःपतिस्त्रैलोक्यकण्टकः ॥८९॥

उत्कण्ठा पितरं द्रष्टुं युवयोर्यदि बालकौ! । विनीतीभूय तद् यातं पूज्ये हि विनयोऽर्हति ॥९०॥

ततस्तावेवमूचाते विनयः क्रियते कथम् । तस्मिन् द्विषत्[11]पदप्राप्ते त्वत्त्याजिनि पितर्यपि ? ॥९१॥

पुत्रौ तवाऽऽवामायाताविति तस्य पुरः कथम् । गत्वा स्वयं वदिष्यावस्तस्याऽपि ह्रीक[12]रं वचः ? ॥९२॥

आनन्दजनकं तस्य जनकस्याऽपि दोष्मतः । युद्धाह्वानं युज्यते तु कुलद्वययशस्करम् ॥९३॥

अभिधायेति **सीता**यां [13]रुदत्यामपि चेलतुः । महोत्साहौ महासैन्यौ तौ **रामनगरीं** प्रति ॥९४॥

कुठार-कुद्दालभृतां सहस्राणि नृणां दश । तयोः पथ्यच्छिदन् वृक्षादिकं क्ष्मां च समां व्यधुः ॥९५॥

क्रमेण गत्वा सेनाभी रुन्धानौ सर्वतो दिशः । तावूषतुरुपा**योध्यं** योद्धुकामौ महाभुजौ ॥९६॥

विरुद्धं तद्बलं भूरि श्रुत्वाऽऽयातं पुरो बहिः । उभौ विसिष्मि[14]याते च सिष्मि[15]याते च **राघवौ** ॥९७॥

अथेत्थमूचे **सौमित्रिः**[16] परे केऽमी पतङ्गवत् । मर्तुकामाः समापेतुरा[17]र्यविक्रमपावकम् ? ॥९८॥

इत्युक्त्वा सह **रामेण सुग्रीवा**दिभिरावृतः । युद्धे चचाल **सौमित्रि**रमित्रध्वान्तभास्करः ॥९९॥

¶इतश्च **नारदा**च्छ्रुत्वा तद् **भामण्डल**भूपतिः । **पुण्डरीकपुरे सीता**मुपेयाय ससम्भ्रमः ॥१००॥

तस्याऽऽख्यद् रुदती **सीता रामो** मां भ्रातरत्यजत् । मत्त्यागमसहिष्णू च त्वद्[18]यामेयौ युधे गतौ ॥१०१॥

**भामण्डलो**ऽप्युवाचैवं त्वत्त्यागं रभसावशात् । चक्रे **रामो** द्वितीयं तु मा कार्षीत् पुत्रयोर्वधम् ॥१०२॥

१. निराकरणे ॥ २. ***त्वेवं*** ला. ॥ ३. १६०योजनानि ॥ ४. लम्पाकदेशेषु ॥ ५. देशनामान्येतानि ॥ ६. ***०ननलांश्शूलान्*** ला. ॥ ७. ***जामि०*** पाता.; भगिनीसुतौ ॥ ८. आनन्दाश्रुभिः ॥ ९. ***अमानि कोशलायानमिदानी०*** हे. छा. पा. ॥ १०. ***जगादेदं*** ला. ॥ ११. शत्रुत्वं प्राप्ते ॥ १२. लज्जाकरम् ॥ १३. ***रुदन्त्या०*** मु. ॥ १४. 'विस्मितौ' इति टि.ला. ॥ १५. 'हसितौ' इति टि.ला. ॥ १६. ***०त्रि-रमित्रध्वान्तभास्करः*** खं.१ ॥ १७. आर्यस्य-रामस्य विक्रम एव पावकः-[illegible] ॥ १८. ***त्वज्जामेयौ*** पाता.; त्वद्भगिनीपुत्रौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मजौ तावजानानौ न यावद्धन्ति **राघवः** । उत्तिष्ठ तावद् गच्छावस्तत्राऽऽवामविलम्बितम् ॥१०३॥
इत्युक्त्वा **जानकी**मात्मविमानमधिरोप्य च । **लवणाङ्कुश**योः स्कन्धावारे **भामण्डलो** ययौ ॥१०४॥
तौ नमश्चक्रतुः **सीतां** कुमारौ **लवणाङ्कुशौ** । मातुलोऽयमिति **सीता**ख्यातं **भामण्डलं** तथा ॥१०५॥
स तौ शिरसि चुम्बित्वा स्वोत्सङ्गमधिरोप्य च । हर्षरोमाञ्चितवपुरित्यूचे गद्गदाक्षरम् ॥१०६॥
वीरपत्नी पुराऽप्यासीद् दिष्ट्या सम्प्रति वीरसूः[1] । अभूद् युवाभ्यां मे यामिर्यामिनीजामिनिर्मला[2] ॥१०७॥
वीरपुत्रौ च वीरौ च युवां यद्यपि मानदौ । रणं पितृ-पितृव्याभ्यां मा कृषाथां तथाऽपि हि ॥१०८॥
न रणे **रावणो**ऽप्यासीद् ययोर्मल्लस्तयोः कथम् । युद्धं युवाभ्यामारेभे दोष्कण्डूरभसावशात् ? ॥१०९॥
तावूचतुर्मातुलाऽलं स्नेहभीरुतयाऽनया । त्वत्स्वसाऽप्यस्मदम्बेयमूचेऽदः कातरं वचः ॥११०॥
आवामपि हि विद्वो यन्न मल्लः कोऽपि तातयोः । युद्धं त्यक्त्वा तयोरेवोत्पादयावः कथं ह्रियम् ? ॥१११॥
तयोर्ब्रुवाणयोरेव सैन्यानां **राम**सैनिकैः । समं प्रववृते युद्धं संवर्त्तावर्तदर्शकम्[3] ॥११२॥
**सुग्रीवाद्यैः** खेचरैर्माऽनयोः सैन्यं महीचरम् । हन्यतामिति साशङ्को ययौ **भामण्डलो** युधि ॥११३॥
उत्तस्थाते कुमारावप्याहवाय महाबलौ । उच्छ्वास्यमानवर्माणौ रोमाञ्चेनाऽतिशायिना ॥११४॥
निःशङ्कं युध्यमानास्ते **सुग्रीवाद्या** नभश्चराः । युधि **भामण्डलं** दृष्ट्वा पप्रच्छुः काविमाविति ॥११५॥
**भामण्डला**च्च ते ज्ञात्वा **राम**पुत्राविमाविति । गत्वा **सीतां** नमश्चक्रुर्न्यषदंश्च पुरो भुवि ॥११६॥
¶[4]इतश्च तौ क्षणेनाऽपि दोष्मन्तौ **लवणाङ्कुशौ** । **राम**सैन्यं दुधुवतुः क्षयो[5]द्भ्रान्ताब्धिदुर्धरौ ॥११७॥
यत्र यत्र भ्रेमतुस्तौ वने सिंहाविवोद्धतौ । रथी सादी निषादी वा न तत्राऽस्थाद् धृतायुधः ॥११८॥
हत-विद्रुतमेवं च **राम**सैन्यं विधाय तौ । केनाऽप्यस्खलितौ **रामं सौमित्रिं** चेयतुर्युधि[6] ॥११९॥
तौ प्रेक्ष्य **राम-सौमित्री** एवमन्योऽन्यमूचतुः । कावप्येतावभिरामौ कुमारौ विद्विषौ च नः ? ॥१२०॥
निसर्गात् स्निह्यति मनो बलाद् द्रुह्यति किं त्विदम् । उद्यच्छावः किमाश्लेष्टुमेतौ योधयितुं नु[7] वा ? ॥१२१॥
इति व्याहारिणं[8] **रामं** रथस्थं **लवणो** रथी । **लक्ष्मणं** चा**ऽङ्कुशो**ऽवोचत् सौष्ठव-प्रश्रयान्वितम् ॥१२२॥
जैत्रं जगदजय्यस्य **रावणस्या**ऽपि दोष्मतः । दिष्ट्याऽद्राक्षं वीरयुद्धश्रद्धालुस्त्वामहं चिरात् ॥१२३॥
नाऽपूर्यत रणश्रद्धा **रावणे**नाऽपि ते ध्रुवम् । एष तां पूरयिष्यामि त्वं च मे पूरयिष्यसि[9] ॥१२४॥
इत्युक्ते **राम-सौमित्री** द्वौ तौ च **लवणाङ्कुशौ** । आस्फालयामासतुः स्वं स्वं धनुर्ध्वानभीषणम् ॥१२५॥
¶**कृतान्त**सारथी **राम**स्यन्दनं **वज्रजङ्घ**राट् । **अनङ्गलवण**रथमभ्यढौकयतां मिथः ॥१२६॥
रथं **विराधः सौमित्रेरङ्कुश**स्य पुनः **पृथुः** । अन्योऽन्यमभ्यमित्रीणं[10] चक्राते वरसारथी ॥१२७॥
चतुरं भ्रमयामासुस्तेऽग्रसारथयो रथान् । प्रजह्रुर्विविधं ते च चत्वारो द्वन्द्वयोधिनः ॥१२८॥
विज्ञातज्ञातिसम्बन्धौ सापेक्षौ **लवणाङ्कुशौ** । युयुधाते निरपेक्षौ त्वज्ञानाद् **राम-लक्ष्मणौ** ॥१२९॥
विविधैरायुधैर्युद्ध्वा युद्धान्तेच्छू **रघूद्वहः** । ऊचे **कृतान्तवदनं** रथं प्रत्यरि[11] वाहय ॥१३०॥
**कृतान्तो**ऽपि बभाषेऽदः खेदं प्राप्ता ह्यमी हयाः । सर्वाङ्गं विशिखैर्विद्धाः प्रतियोधेन तेऽमुना ॥१३१॥
तुरङ्गा न त्वरन्तेऽमी कशाभिस्ताडिता अपि । रथश्च जर्जरस्तेऽभूदसौ वैर्यस्त्रताडितः ॥१३२॥
एतौ च मम दोर्दण्डौ द्विट्काण्डाघातजर्जरौ । न हि रश्मिं[12] प्रतोदं वा क्षमौ चालयितुं प्रभो! ॥१३३॥
**पद्मनाभो**ऽप्यभाषिष्ट ममाऽपि शिथिलायते । धनुश्चित्रस्थितमिव **वज्रावर्तं** न कार्यकृत् ॥१३४॥
अभून्**मुशलरत्नं** च वैरिनिर्दलनाक्षमम् । कण[13]कण्डनमात्रार्हमेवैतदपि सम्प्रति ॥१३५॥
अनेकशोऽङ्कुशीभूतं यद् दुष्टनृपदन्तिनाम् । **हलरत्नं** तदप्येतदभूद् भूपाटनो[14]चितम् ॥१३६॥
सदा यक्षै रक्षितानां विपक्षक्षयकारिणाम् । तेषामेव ममाऽस्त्राणामवस्था केयमागता ? ॥१३७॥
यथा**ऽपराजितासूनो**रभून्मोघास्त्रता तदा । तथैव **लक्ष्मणस्या**ऽपि **मदनाङ्कुश**योधिनः ॥१३८॥

---

१. वीरं सूते इति वीरसूर्वीरमातेत्यर्थः ॥ २. यामिनी रात्रिर्जाया यस्य स चन्द्रस्तद्वन्निर्मला ॥ ३. प्रलयमेघावर्त्तदर्शनम् ॥ ४. *ततश्च* पाता. ॥ ५. क्षये-प्रलयकाले उद्भ्रान्तसमुद्रवद् दुर्धरौ ॥ ६. *०र्युधे* खं.१-२, पाता. ॥ ७. *तु* खं.१-२, पाता. ॥ ८. वदन्तम् ॥ ९. *०ष्यति* खं.१ ॥ १०. शत्रून्मुखम् ॥ ११. अरिं प्रति ॥ १२. बन्धनीं (लगाम) कशां (चाबुक) वा ॥ १३. धान्यकणानां कण्डनयोग्यं मुशलमभूत् ॥ १४. क्षेत्रकर्षणयोग्यम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶अत्राऽन्तरे च **सौमित्रिरङ्कुशे**नोरसीषुणा । ताडितः [1]कुलिशेनेव मूर्च्छितो न्यपतद् रथे ॥१३९॥
**सौमित्रि**मूर्च्छाविधुरो **विराधः** स्यन्दनं रणात् । अचालयत् **प्रत्ययोध्यं** सञ्ज्ञां लेभेऽथ **लक्ष्मणः** ॥१४०॥
साक्षेपं **लक्ष्मण**श्चोचे किं **विराधा**ऽकृथा नवम् । **रामभ्रातुर्दशरथ**सूनोरनुचितं ह्यदः ? ॥१४१॥
तच्छीघ्रं नय तत्रैव रथं यत्र स मे द्विषन्[2] । एष छिनद्मि तच्छीर्षं **चक्रे**णाऽमोघरंहसा ॥१४२॥
एवमुक्तो **विराधो**ऽथाऽनैषीत् **प्रत्यङ्कुशं** रथम् । तिष्ठ तिष्ठेति जल्पंश्च **चक्रं** जग्राह **लक्ष्मणः** ॥१४३॥
[3]भ्राम्यदर्कभ्रमकरं भ्रमयित्वा च तद् दिवि । क्रुद्धो मुमोच **सौमित्रिरङ्कुशा**याऽस्खलद्रयम् ॥१४४॥
आपतत् ताडयामासाऽनेकशो[4]ऽस्त्रैस्त**दङ्कुशः** । सर्वात्मना **लवणो**ऽपि न तु तत्प्रत्यहन्यत ॥१४५॥
वेगेनाऽऽपत्य **तच्चक्रमङ्कुशस्य** प्रदक्षिणाम् । कृत्वा **लक्ष्मण**हस्तेऽगात् पुनर्नीड इवाऽण्डजः[5] ॥१४६॥
तद् भूयो **लक्ष्मणो**ऽमुञ्चत् कृत्वा तद्वत् प्रदक्षिणाम् । पुनस्तत्पाणिमेवाऽऽगाच्छालां भग्न[6] इव द्विपः ॥१४७॥
चिन्तयामासतुश्चैवं विषण्णौ **राम-लक्ष्मणौ** । किं सीरि[7]-शार्ङ्गिणावेतौ न त्वावामिह **भारते** ? ॥१४८॥
¶अत्राऽन्तरे **नारदर्षिः सिद्धार्थेन** सहैव हि । तत्रोपेत्याऽवोचदेवं खिन्नं **रामं सलक्ष्मणम्** ॥१४९॥
हर्षस्थाने विषादोऽयं युवयोः किं **रघूद्वहौ** ? । पुत्रात् पराजयो वंशोद्योतनाय न कस्य हि ? ॥१५०॥
**सीता**कुक्षिभवौ पुत्रौ ताविमौ **लवणाङ्कुशौ** । त्वां द्रष्टुमागतावत्र युद्धव्याजेन न त्वरी[8] ॥१५१॥
[9]अभिज्ञानमिदं तेऽत्र यच्चक्रं प्रबभूव न । मुधाऽभूद् **भारतं**[10] चक्रं पुरा **बाहुबलौ**[11]वपि ॥१५२॥
त्यागात् प्रभृति **सीताया** वृत्तान्तं **नारदो**ऽखिलम् । पुत्रयुद्धान्तमाचख्यौ विश्वविस्मयदायकम् ॥१५३॥
**रामो**ऽपि विस्मय-व्रीडा-खेद-हर्षसमाकुलः । मुमूर्च्छ सञ्ज्ञां लेभे च संसिक्तश्चन्दनाम्भसा ॥१५४॥
**लक्ष्मणे**न सहोदश्रुः पुत्रवात्सल्यपूरितः । जगाम **रामो लवणाङ्कुश**योर्द्रुतमन्तिके[12] ॥१५५॥
अवतीर्य रथात् सद्यो विनीतौ **लवणाङ्कुशौ** । पादेषु **पद्म-सौमित्र्यो**स्त्यक्तास्त्रौ पेततुः क्रमात् ॥१५६॥
तावालिङ्ग्य निजोत्सङ्गमारोप्य च **रघूद्वहः** । मूर्ध्नि चुम्बन् रुरोदोच्चैः शोक-स्नेहसमाकुलः ॥१५७॥
**रामो**त्सङ्गान्निजोत्सङ्गं तावारोप्याऽथ **लक्ष्मणः** । चुम्बन् शिरसि बाहुभ्यां परिरेभेऽश्रुपूर्णदृक् ॥१५८॥
विलुठन्तौ पितुरिव विनीतौ पादपद्मयोः । दूरात् प्रसारितभुजः **शत्रुघ्नो**ऽप्यालिलिङ्ग तौ ॥१५९॥
अपरेऽपि हि भूपालाः सेनयोरुभयोरपि । प्रमोदन्ते स्म सम्भूय विवाहमिलिता इव ॥१६०॥
¶पुत्रयोर्विक्रमं दृष्ट्वा पित्रा च सह सङ्गमम् । हृष्टा **सीता** विमानेन **पुण्डरीकपुरं** ययौ ॥१६१॥
सद्दक्षपुत्रलाभेन मुदितौ **राम-लक्ष्मणौ** । जहृषुः[13] स्वामिहर्षेण भूचराः खेचराश्च ते ॥१६२॥
**भामण्डल**नृपाख्यातो **वज्रजङ्घ**नृपोऽपि हि । ननाम **राम-सौमित्री** विनीतश्चिरपत्तिवत् ॥१६३॥
**रामस्तमाललापैवं भामण्डल**समोऽसि मे । पुत्रौ योऽवर्धयस्त्वं मेऽनैषीः काष्ठा[14]मिमां च यः ॥१६४॥
इत्युक्त्वा **पुष्पकारूढः पद्मनाभः सलक्ष्मणः** । अर्धासनोपविष्टाभ्यां पुत्राभ्यां प्राविशत् पुरीम् ॥१६५॥
उदग्रीवपार्ष्णिभिः पौरै राजमार्गे[15] च विस्मितैः । प्रेक्ष्य[16]माण-स्तूयमान[17]सुतो **रामो**ऽगमद् गृहम् ॥१६६॥
तत्रोत्ततार पुत्राभ्यां सह **रामः सलक्ष्मणः** । महान्तमत्यन्तमुदा कारयामास चोत्सवम् ॥१६७॥
¶अथ **रामं सुमित्राभूः**[18] **कपीश्वर-बिभीषणौ** । **हनूमानङ्गदा**द्याश्च सम्भूयैवं व्यजिज्ञपन् ॥१६८॥
परदेशे स्थिता देवी त्वया विरहिताऽधुना । विनाऽमूभ्यां कुमाराभ्यामतिकष्टेन तिष्ठति ॥१६९॥
यद्यादिशसि तत् स्वामिन्नानयामोऽद्य तामिह । विपत्स्यतेऽन्यथा सा तु पति-पुत्रोज्झिता सती ॥१७०॥
किञ्चिद् **रामो** विचिन्त्योचे **जानक्या**नीयते कथम् ? । लोकापवादोऽलीकोऽपि बलवानन्तरायकृत् ॥१७१॥
जानेऽहं यत् सती **सीता** साऽपि स्वं वेत्ति निर्मलम् । दिव्यं दातुमथाऽदातुं तद् द्वयोरपि नाऽस्ति भीः ॥१७२॥
प्रत्यक्षं सर्वलोकानां दिव्यं देवी करोतु सा । शुद्ध्या च तया सार्धं गृहवासोऽस्तु मे पुनः ॥१७३॥

---

१. वज्रेणेव ॥ २. ***द्विषः*** खं.१ ॥ ३. ***भ्रमदर्क०*** कां. छा. मु. ॥ ४. ***०मासाऽनेकशस्त्रै०*** पाता. ॥ ५. ***इवाऽण्डजम्*** ता.; अण्डजः-पक्षी नीडे-गृहे इव ॥ ६. पलायितो गजो यथा पुनर्हस्तिशालायामागच्छति तथा ॥ ७. बलदेव-वासुदेवौ ॥ ८. न तु शत्रू ॥ ९. चिह्नम् ॥ १०. भरतचक्रवर्तिनः चक्रं बाहुबलिविषये निष्फलं पुराऽभूत् ॥ ११. ***बाहुबलादपि*** खं.१-२, पाता. ॥ १२. ***०मन्तिकम्*** पाता. ॥ १३. ***जहर्षुः*** खं.१ ॥ १४. स्थितिम् ॥ १५. ***मार्गे मार्गे च*** ता. ॥ १६. ***प्रेक्ष्यमाणः*** खं.१ विना ॥ १७. ***स्तूयमानस्ततो*** पाता. ॥ १८. ***सुमित्रासूः*** खं.१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमस्त्वित्युदित्वा ते पुर्या बहिरकारयन् । विशालान् मण्डपानुच्चैस्तदन्तर्मञ्चधोरणी:[1] ॥१७४॥
तेषु चोपाविशन् [2]भूपा: पौरामात्यादयोऽपि च । ते [3]**बिभीषण-सुग्रीव**प्रमुखा: खेचरा अपि ॥१७५॥
ततो **रामा**ज्ञयोत्थाय **पुण्डरीकपुरे** स्वयम् । गत्वा नत्वा च **वैदेही**मित्युवाच **कपीश्वर:** ॥१७६॥
त्वत्कृते प्रैषि **रामे**ण विमानं देवि! **पुष्पक**म् । इदानीमिदमध्यास्स्व **रामो**पान्तमुपेहि च ॥१७७॥
साऽप्यूचेऽद्याऽपि मेऽरण्यत्यागदु:खं न शाम्यति । तत: कथं यामि **रामं** भूयो दु:खान्तरप्रदम् ? ॥१७८॥
नत्वा भूयोऽपि सोऽवोचन्मा कुपस्तव शुद्धये । समं पौरैर्नृपै: सर्वैर्मञ्चारूढोऽस्ति **राघव:** ॥१७९॥
तेनेत्युक्ते पूर्वमपि **जानकी** शुद्धिकाङ्क्षिणी । आरुरोह विमानं त**दयोध्या**यां जगाम च ॥१८०॥
[4]**माहेन्द्रोदय**मुद्यानं समुपेत्योत्ततार सा । दत्तार्घा **लक्ष्मणे**नैत्य नमश्चक्रे नृपैरपि ॥१८१॥
अग्रे निषद्य **सौमित्रि**र्नृपै: सममदोऽवदत् । निजां पुरीं निजं वेश्म प्रवेशाद् देवि! पावय ॥१८२॥
**सीता**ऽप्यूचे प्राप्तशुद्धि: प्रवेक्ष्यामि पुरीमिमाम् । गृहं च नाऽन्यथा वत्साऽपवादो जातु शाम्यति ॥१८३॥
इति **सीता**प्रतिज्ञां तेऽशंसन् **रामाय** भूभुज: । **रामो**ऽप्युपेत्य **वैदेही**मित्यूचे न्यायनिष्ठुरम् ॥१८४॥
भोगा न चेद् **दशास्ये**न तस्थुष्या अपि तद्गृहे । समक्षं सर्वलोकानां तद् दिव्यं कुरु शुद्धये ॥१८५॥
स्मित्वा **सीता**ऽप्युवाचैवं विज्ञस्त्वत्तोऽपरो न हि । अज्ञात्वा[5] यो हि मे दोषं त्यागं [6]कुर्यान्महावने ॥१८६॥
दण्डमादौ विधायाऽद्य कुरुषे मत्परीक्षणम् । विचक्षणोऽसि **काकुत्स्थ**! सज्जा तत्राऽपि नन्वहम् ॥१८७॥
ऊचे विलक्षो **रामो**ऽपि जाने दोषस्तवाऽस्ति न । जनोत्पादितदोषस्योत्तारणायेदमुच्यते ॥१८८॥
जगाद **जानकी** दिव्यपञ्चकं स्वीकृतं मया । विशामि वह्नौ ज्वलिते भक्षयाम्यथ तण्डुलान्[7] ॥१८९॥
[8]तुलां समधिरोहामि तप्तं कोशं[9] पिबाम्यहम् । गृह्णामि जिह्वया फालं[10] किं तुभ्यं रोचते ? वद ॥१९०॥युग्मम्॥
¶अत्राऽन्तरेऽन्तरीक्षस्थ: **सिद्धार्थो नारदो**ऽप्यथ । लोक: सर्वश्च तुमुलं निषिध्येदमभाषत ॥१९१॥
भो भो **राघव! सीते**यं निश्चयेन सती सती । [11]महासतीति मा कार्षीर्विकल्पमिह जातुचित् ॥१९२॥
**रामो**ऽप्युवाच हे लोका! मर्यादा काऽपि नाऽस्ति व: । सङ्कल्प्य दोषं युष्माभिरेवेयं दूषिता पुरा ॥१९३॥
[12]ब्रूथाऽस्मत्पुरतो यूयमन्यद् दूरे स्थिता: पुन: । तदा कथं सदोषाऽऽसीच्छीलवत्यधुना कथम् ? ॥१९४॥
भूयोऽपि गृह्णतां दोषम[13]र्गला नाऽस्ति [14]काऽपि व: । प्रत्ययाय तत: **सीता** विशतु ज्वलितेऽनले ॥१९५॥
इत्युक्त्वाऽखानयद् **रामो** गर्तं हस्तशतत्रयम् । [15]पुरुषद्वयदघ्नं चाऽपूरयच्चन्दनेन्धनै: ॥१९६॥
¶अत्राऽन्तरे च **वैताढ्य**स्योत्तरश्रेणिवर्तिन: । **हरिविक्रम**राजस्य कुमारो **जयभूषण:** ॥१९७॥
ऊढाष्टशतनारीक: पत्नीं **किरणमण्डला**म् । सुप्तां **हेमशिखा**ख्येन समं मातुलसूनुना ॥१९८॥
दृष्ट्वा निर्वासयामास तदैव प्राव्रजत् स्वयम् । साऽपि मृत्वा समजनि **विद्युद्दंष्ट्रे**ति राक्षसी ॥१९९॥
**अयोध्या**बहिरभ्येत्य स तदा **जयभूषण:** । तस्थौ प्रतिमया **विद्युद्दंष्ट्रा** च तमुपाद्रवत् ॥२००॥
केवलं तस्य चोत्पेदे तदुत्सवविधित्सया । तदानीं च समाजग्मु: [16]**सुनासीरा**दय: सुरा ॥२०१॥
**सीता**या: प्रेक्ष्य तद् देवा: **शक्र**मेवं व्यजिज्ञपन् । [17]लोकालीकापवादेन **सीता** वह्नौ प्रवेक्ष्यति ॥२०२॥
[18]पत्त्यनीकपतिं **सीता**सान्निध्यायाऽऽदिशद्धरि: । तस्यर्षे: केवलज्ञानोत्सवं तु विदधे स्वयम् ॥२०३॥
[19]**रामा**ज्ञया च भृतकास्तं गर्तं चन्दनाञ्चितम् । परितो ज्वालयामासुर्दु:प्रेक्षं[20] चक्षुषामपि ॥२०४॥
ज्वालाकरालं तं प्रेक्ष्य **रामो** दध्याविदं हृदि । अहो! अत्यन्तविषमं किं [21]ममेदमुपस्थितम् ? ॥२०५॥
इयं महासती नूनं[22] नि:शङ्काऽग्नौ प्रवेक्ष्यति । दैवस्येव हि दिव्यस्य प्रायेण विषमा गति: ॥२०६॥
मया सहाऽस्या निर्वासो हरणं **रावणे**न च । वने त्यागो मया भूयो भूयोऽप्येतच्च मत्कृतम् ॥२०७॥
एवं सोऽचिन्तयद् यावत् तावत् **सीतो**पपावकम् । स्थित्वा स्मृत्वा च सर्वज्ञं चक्रे [23]सत्यापनामिति ॥२०८॥

१. मञ्चश्रेणी: ॥ २. ***भूपपौरा०*** ला. ॥ ३. ***बिभीषणश्च सुग्रीव०*** ला. ॥ ४. ***महेन्द्रो०*** ला. ॥ ५. ***न हि*** ता. ॥ ६. ***कुर्या महा०*** पाता.विना ॥ ७. ***तन्दुलान्*** ला.; 'लोहमयानग्निवर्णांश्च' इति टि.ला. ॥ ८. '५२ पलगोलरूपां' इति टि.ला. ॥ ९. सीसकम् ॥ १०. शस्त्रस्य धाराम् ॥ ११. ***महासती च*** ता. ॥ १२. ***ब्रूथाऽन्यत्र पुरतो०*** ला.विना ॥ १३. ***दोषानर्गला*** ला. ॥ १४. ***काऽपि नाऽस्ति*** ता. ॥ १५. ***पुरुषत्रय०*** मो.; पुरुषद्वय(बे माथोडां)प्रमाणम् ॥ १६. इन्द्रादय: ॥ १७. लोकस्य असत्यकलङ्केन ॥ १८. हरिणैगमेषिदेवम् ॥ १९. ***रामाज्ञयाऽथ*** मु. ॥ २०. ***०मुर्दु:प्रेक्ष्यं*** मु. ॥ २१. ***ममेदं किमु०*** ला. ॥ २२. ***सीता नि:शङ्का०*** पाता. ॥ २३. शपथम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे लोकपाला! लोकाश्च सर्वे शृणुत यद्यहम् । अन्यमभ्यलषं **रामात्** तदाऽग्निर्मां दहत्वयम् ॥२०९॥
अन्यथा तु सुखस्पर्शो वारीवाऽस्त्वित्युदीर्य सा । झम्पां स्मृतनमस्कारा ददौ तस्मिन् हुताशने ॥२१०॥
यावत् सा प्राविशत् तावद् विध्यातो वह्निराश्वपि । गर्तः स्वच्छोदकापूर्णः स तु वापीत्वमाययौ ॥२११॥
**सीता** त्वधिजलं पद्मोपरि सिंहासनस्थिता । पद्मेवा[1]ऽस्थात् सतीभावतुष्टदेवप्रभावतः ॥२१२॥
¶कुर्वाणं क्वाऽपि हुङ्कारं क्वचिद् गुलुगुलारवम् । क्वाऽपि भम्भा[2]यितध्वानं क्वचित् पटपटाध्वनिम्[3] ॥२१३॥
क्वचिद् दिलदिलस्वानं क्वचित् खलखलास्वनम् । समुद्राम्भ इवाऽम्भस्तत् तत्र सावर्त्तमैक्ष्यत ॥२१४॥युग्मम्॥
तदुच्छलज्जलं वाप्या उद्वेलस्येव[4] वारिधेः । आप्लावयितुमारेभे मञ्चानपि गरीयसः ॥२१५॥
विद्याधरा भयोद्भ्रान्ताः समुत्पत्येयुरम्बरे । भूचराश्चुक्रुशुश्चैवं पाहि **सीते!** महासति! ॥२१६॥
**सीता**ऽप्युं[5]ल्लोलमम्भस्तत् स्वपाणिभ्यामवालयत् । पुनर्वापीप्रमाणं तदभूत् तस्याः प्रभावतः ॥२१७॥
उत्पलैः कुमुदैः पद्मैः पुण्डरीकैर्निरन्तरा । सौर[6]भोद्भ्रान्तभृङ्गालीसङ्गीता हंसशालिनी ॥२१८॥
आस्फलद्वीचिनिचयमणिसोपानबन्धुरा । बद्धोभयतटा रत्नोपलैर्वापी बभूव सा ॥२१९॥युग्मम्॥
¶ननृतुर्**नारदा**द्याः खे **सीता**शीलप्रशंसिनः । **सीतो**परिष्टात् तुष्टाश्च पुष्पवृष्टिं व्यधुः सुराः ॥२२०॥
अहो शीलमहो शीलं **राम**पत्न्या यशस्करम्! । इति लोकप्र[7]घोषोऽभूद् रोदः[8]कुक्षिम्भरिः क्षणात् ॥२२१॥
मातुः प्रभावं तं दृष्ट्वा मुदितौ **लवणाङ्कुशौ** । हंसाविव तरन्तौ तौ तत्समीपमुपेयतुः ॥२२२॥
तौ मूर्ध्न्याघ्राय **वैदेह्या** पार्श्वयोरुपवेशितौ । क[9]लभाविव रेजाते नदीतीरद्वयस्थितौ ॥२२३॥
गत्वा **सौमित्रि-शत्रुघ्न-भामण्डल-बिभीषणाः** । **सुग्रीवा**द्याश्च **वैदेहीं** नमश्चक्रुः सभक्तितः ॥२२४॥
**सीता**मुपाययौ **रामो**ऽप्यभिरामतरद्युतिम्[10] । पश्चात्तापत्रपापूर्ण इत्यूचे रचिताञ्जलिः ॥२२५॥
स्वभावादप्यसद्दोषग्राहिणां पुरवासिनाम् । छन्दा[11]नुवृत्त्या त्यक्ताऽसि मया देवि! सहस्व तत् ॥२२६॥
त्यक्तोग्रश्वापदेऽरण्येऽजीवस्त्वं स्वप्रभावतः । एकं दिव्यं तदप्यासीन्नाऽज्ञासिषमहं पुनः ॥२२७॥
क्षान्त्वा सर्वं ममेदानीमिदमध्यास्स्व **पुष्पकम्** । चलं[12] स्ववेशमने प्राग्वद् रमस्व सहिता मया ॥२२८॥
**सीता**ऽप्यूचे न ते दोषो न च लोकस्य कश्चन । न चा[13]ऽन्यस्याऽपि कस्याऽपि किं तु मत्पूर्वकर्मणाम् ॥२२९॥
निर्विण्णा कर्मणामीदृग्दुःखावर्तप्रदायिनाम् । ग्रहीष्यामि परिव्रज्यां तेषामुच्छेदकारिणीम् ॥२३०॥
इत्युक्त्वा **मैथिली** केशानुच्चखान स्वमुष्टिना । **रामस्य** चाऽर्पयामास शक्रस्येव जिनेश्वरः ॥२३१॥
सद्यो मुमूर्च्छ **काकुत्स्थो** नोत्तस्थौ यावदेष च । तावत् **सीता** ययौ साधु**जयभूषण**सन्निधौ ॥२३२॥

केवली स **जयभूषणो** मुनि-
**मैथिलीं** विधिवदप्यदीक्षयत् ।
**सुप्रभा**ह्वयगणिनीपरिच्छदे
तां चकार च तपःपरायणाम् ॥२३३॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषच[14]रित्रे महाकाव्ये
स[15]प्तमे पर्वणि **सीता**शुद्धि-व्रतग्रहणो नाम नवमः सर्गः॥

१. लक्ष्मीरिव ॥ २. ***हंभाषिताध्वानं*** पाता.; ***संभाषिताध्वानं*** खं.२ ॥ ३. ***०ध्वनि*** पाता. मु. रस्वीपा. ॥ ४. अमर्यादस्य ॥ ५. ***सीताऽप्युत्तीर्ण०*** ला.विना ॥ ६. सौरभेण उद्भ्रान्ता या भृङ्गाली-भ्रमरसमूहः तत्सङ्गीतं यस्यां सा ॥ ७. ***लोकप्रवादो०*** खं.१ ॥ ८. आकाश-पृथ्व्योर्व्यापी ॥ ९. हस्तिबालौ ॥ १०. ***०द्युतिः*** मु. रस्वीपा.; मनोहरतरदीप्तिम् ॥ ११. अभिप्रायानुसरणेन ॥ १२. ***चल स्ववेश्मनि*** मु. रस्वीपा. ॥ १३. ***न चाऽन्यस्य च कस्याऽपि*** खं.१ ॥ १४. ***०चरिते*** ता. ॥ १५. ***सप्तम०*** खं.१-२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥दशमः सर्गः॥

अथ सिक्तश्चन्दनेन लब्धसञ्ज्ञो **रघूद्वहः**। व्याजहार क्व ननु सा **सीता**देवी मनस्विनी ? ॥१॥
भो भूचराः! खेचराश्च न चेद् यूयं मुमूर्षवः। तन्मे लुञ्चितकेशामप्याशु दर्शयत प्रियाम् ॥२॥
वत्स! वत्सैहि **सौमित्रे**! तूणौ तूणौ [१]धनुर्धनुः!। यदमी सन्त्युदासीनाः सुस्थिता [२]दुःस्थिते मयि ॥३॥
इत्युक्त्वा धन्व गृह्णन्तं तं नत्वा **लक्ष्मणो**ऽब्रवीत्। आर्याऽऽर्य! किमिदं ? लोकः खल्वेष तव किङ्करः ॥४॥
**सीतां** यथा दोषभीतोऽत्याक्षीस्त्वं न्यायनैष्ठिकः। भवभीता स्वार्थनिष्ठा तथा सा सर्वमत्यजत् ॥५॥
प्रत्यक्षमिह वः **सीता** स्वयमुत्पाट्य कुन्तलान्। आददे विधिवद् दीक्षां **जयभूषण**सन्निधौ ॥६॥
इदानीमेव तस्यर्षेरुदपद्यत केवलम्। तज्ज्ञानमहिमाऽवश्यं[३]कृत्यमस्ति तवाऽपि हि ॥७॥
तत्राऽऽस्ते स्वामिनी **सीता** स्वामिन्नात्तमहाव्रता। दर्शयन्ती मुक्तिमार्गं सतीमार्गमिवाऽनघा ॥८॥
**रामः** प्रकृतिमालम्ब्योवाच साधु मम प्रिया। उपाददे परिव्रज्यां तस्य केवलिनोऽन्तिके ॥९॥
इत्युक्त्वा सपरीवारो जगाम **जयभूषण**म्। नत्वा च देशनां तस्माच्छुश्राव **रघुपुङ्गवः** ॥१०॥
देशनान्ते च पप्रच्छ नाऽऽत्मानं वेद्म्यहं प्रभो!। भव्योऽहं किमुताऽभव्यस्तदाचक्ष्व प्रसीद मे ॥११॥
अथाऽऽख्यत् केवली सोऽपि भव्योऽसि त्वं न केवलम्। सिद्धिं यास्यस्यनेनैव जन्मनोत्पन्नकेवलः ॥१२॥
**रामः** पप्रच्छ भूयोऽपि मोक्षः प्रव्रज्यया भवेत्। सर्वत्यागेन सा किं तु **लक्ष्मणो** दुस्त्यजो मम ॥१३॥
मुनिराख्यदवश्यं ते भोक्तव्या **बल**सम्पदः। तदन्ते त्यक्तसङ्गः सन् प्रव्रज्य शिवमाप्स्यसि ॥१४॥
नत्वा **बिभीषणो**ऽपृच्छत् केन प्राग्जन्मकर्मणा। जहार **रावणः सीतां** [४]**लक्ष्मण**स्तं न्यहन् युधि ? ॥१५॥
**सुग्रीवो भामण्डल**श्च तथेमौ **लवणाङ्कुशौ**। अहं च कर्मणा केनाऽत्यन्त[५]भक्ता **रघूद्वहे** ? ॥१६॥
¶भगवानाचचक्षेऽथ **भरतार्धे**ऽत्र **दक्षिणे**। पुरे **क्षेमपुरे** नाम्ना **नयदत्तो**ऽभवद् वणिक् ॥१७॥
**धनदत्त-वसुदत्तौ सुनन्दा**कुक्षिजौ सुतौ। तस्याऽभूतां तयोर्मित्रं **याज्ञवल्क्यो**ऽभवद् द्विजः ॥१८॥
नाम्ना **सागरदत्त**श्च पुरे तस्मिन्नभूद् वणिक्। तस्य सूनुर्**गुणधरः** कन्या **गुणवती** पुनः ॥१९॥
दत्ता **सागरदत्ते**न **नयदत्ता**त्मजन्मने। **धनदत्ताय गुणवत्य**नुरूपगुणाय सा ॥२०॥
**श्रीकान्त**नाम्ने चाऽऽढ्याय तत्रत्यायाऽर्थलोभतः। ददौ **गुणवतीं** छन्नं माता **रत्नप्रभा** पुनः ॥२१॥
**याज्ञवल्क्य**स्तु तज्ज्ञात्वा **नयदत्ता**त्मजन्मनोः। स्वमित्रयोः समाचख्या[६]वसहो मित्रवञ्चने ॥२२॥
**वसुदत्त**स्ततो गत्वा **श्रीकान्त**मवधीन्निशि। **श्रीकान्ते**नाऽपि खड्गेन **वसुदत्तो** निपातितः ॥२३॥
विन्ध्याटव्यामभूतां तावुभावपि [७]कुरङ्गकौ। **गुणवत्य**[८]पर्यनूढैव मृत्वा तत्राऽभवन्मृगी ॥२४॥
तस्याः कृते च तत्राऽपि युद्ध्वा पञ्चत्वमीयतुः। मिथो वैरेण तावेवं भूयांसं भ्रेमतुर्भवम् ॥२५॥
¶तदानीं **धनदत्तो**ऽपि स्वभ्रातृवधपीडितः। निर्धर्मोऽटन् निशि साधून् ददर्श क्षुधितोऽन्यदा ॥२६॥
ययाचे भोजनं तेभ्यस्तेष्वेको मुनिरब्रवीत्। दिवाऽपि [९]हिं न साधूनां भक्त-पानादिसङ्ग्रहः ॥२७॥
तवाऽपि नोचितं रात्रौ भोक्तुं पातुं च भद्रक!। को वेत्ति जीवसंसक्तिमन्नादौ तमसीदृशे ? ॥२८॥
इत्यादि बोधितस्तेन सुधर्ये[१०]णोक्षितो हृदि। श्रावकीभूय मृत्वा च **सौधर्मे** त्रिदशोऽभवत् ॥२९॥
¶च्युत्वा **महापुरपुरे धारणी-मेरु**नन्दनः। नाम्ना **पद्मरुचिः** श्रेष्ठी परमश्रावकोऽभवत् ॥३०॥
सोऽन्यदा गोकुलं गच्छन्नश्वारूढो[११]यदृच्छया। [१२]जरद्वृषभमद्राक्षीन्मुमूर्षुं पतितं [१३]पथि ॥३१॥

१. *धनुर्धर!* कां. मो. ॥ २. *दुस्थिते* खं.१, मु. रस्वीपा. ॥ ३. *०वश्यकृत्य०* ला. मु. ॥ ४. *लक्ष्मणस्तं जघान च* खं.२; *लक्ष्मणस्तमहन् युधि* ला. ॥ ५. *०ऽत्यन्तरक्ता* मु. रस्वीपा. ॥ ६. असहिष्णुः ॥ ७. हरिणौ ॥ ८. अपरिणीतैव ॥ ९. *नहि* ला. मु. रस्वीपा. ॥ १०. सिक्तः ॥ ११. यथेच्छम् ॥ १२. गलितवृषभम् ॥ १३. *भुवि* पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृपालुः सोऽवरुह्याऽश्वान्निकटीभूय तस्य तु। कर्णमूले ददौ पञ्चपरमेष्ठि[१]नमस्कृती: ॥३२॥
मृत्वा च तत्प्रभावेण तत्रैव स सुतोऽभवत्। **छत्रच्छाय**नरेन्द्र-**श्रीदत्त**योर्**वृषभध्वजः** ॥३३॥
स्वैरं भ्रमन् सोऽन्यदा तां जरद्वृषभुवं ययौ। लेभे च जातिस्मरणं प्राग्जन्मस्थानदर्शनात् ॥३४॥
तत्र चाऽकारयच्चैत्यं तस्य चैत्यस्य चैकतः। भित्तावालेखयामास मुमूर्षुं तं [२]जरद्गवम् ॥३५॥
तत्कर्णान्ते नमस्कारदायिनं पुरुषं च तम्। तदभ्यर्णे तदीयं च [३]सपर्याणं तुरङ्गमम् ॥३६॥युग्मम्॥
आरक्षांस्तत्र चाऽऽदिक्षद् यश्चित्रं परमार्थतः। इदं विदन्[४]नुदीक्षेत स ज्ञाप्यस्त्वरितं मम ॥३७॥
¶इत्युक्त्वा स ययौ वेश्म चैत्ये तत्राऽन्यदा पुनः। [५]वन्दनायाऽऽययौ **पद्मरुचिः** स श्रेष्ठिपुङ्गवः ॥३८॥
वन्दित्वा तत्र सोऽर्हन्तं भित्तिचित्रमुदैक्षत। सर्वं मे संवदत्येतदित्यूचे च सविस्मयः ॥३९॥
विज्ञप्तोऽथ तदारक्षैस्तत्राऽऽगाद् **वृषभध्वजः**। किं वेत्सि चित्रवृत्तान्तमित्यपृच्छच्च तं नरम् ॥४०॥
गवेऽस्मै म्रियमाणाय नमस्कारानदां पुरा। इहाऽभिज्ञेन केनाऽपि लिखितोऽस्मीत्युवाच सः ॥४१॥
तं नत्वोवाच **वृषभध्वजो** योऽयं जरद्गवः। राजपुत्रोऽभवं सोऽहं नमस्कारप्रभावतः ॥४२॥
[६]कामयास्यमहं योनिं ? तिर्यग्योनिस्तदाऽप्यहम्। कृपालुस्त्वं न चेन्मह्यं नमस्कारानदास्यथाः ॥४३॥
सर्वथा त्वं गुरुः स्वामी दैवतं चाऽसि मे खलु। भुङ्क्ष्व राज्यमिदं प्राज्यं त्वया दत्तं ममाऽपि यत् ॥४४॥
इत्युक्त्वा **पद्मरुचि**ना सहैव **वृषभध्वजः**। विजहाराऽ[७]कृतद्वैधः पालयञ्छ्रावकव्रतम् ॥४५॥
श्रावकत्वं चिरं सम्यक् पालयित्वा विपद्य च। **ईशानकल्पे** जज्ञाते तौ देवौ परमर्द्धिकौ ॥४६॥
च्युत्वा ततः **पद्मरुचिर्मेरो**रपरतो गिरौ। **वैताढ्ये** नगरे **नन्दावर्ते** [८]**नन्दीश्वरा**त्मजः ॥४७॥
[९]**कनकाभा**कुक्षिजन्मा **नयनानन्द** इत्यभूत्। राज्यं भुक्त्वा परिव्रज्य [१०]**माहेन्द्रे** त्रिदशोऽभवत् ॥४८॥युग्मम्॥
च्युत्वा च **प्राग्विदेहे**षु **क्षेमा**यां पुरि भूपतेः। **विपुलवाहन**स्याऽभूत् **पद्मावत्यां** स नन्दनः ॥४९॥
**श्रीचन्द्रो** नाम भुक्त्वा च राज्यं प्रव्रज्य चाऽन्तिके। **समाधिगुप्त**स्य मुनेर्**ब्रह्मलोके**न्द्रतां ययौ ॥५०॥युग्मम्॥
च्युत्वा ततोऽयं **पद्मो**ऽभूद् बलभद्रो महाबलः। **सुग्रीव** एष **वृषभध्वज**जीवस्त्वभूत् क्रमात् ॥५१॥
भ्रान्त्वा **श्रीकान्त**जीवोऽभून्**मृणालकन्द**पत्तने। [११]राजसूनुर्**[१२]वज्रकण्ठः** [१३]**शम्भु-हेमवती**भवः ॥५२॥
भ्रान्त्वा च **वसुदत्तो**ऽभूच्**छम्भु**राजपुरोधसः। **विजयस्य रत्नचूडा**भवः **श्रीभूति**रात्मजः ॥५३॥
**गुणवत्य**पि सा भ्रान्त्वा **श्रीभूते**स्तस्य नन्दना। **सरस्वती**कुक्षिभवा नाम्ना **वेगवती**त्यभूत् ॥५४॥
सोद्यौवनाऽन्यदा साधुं प्रतिमास्थं **सुदर्शनम्**। वन्द्यमानं जनैर्दृष्ट्वा सोपहासमदोऽवदत् ॥५५॥
अहो साधुरयं दृष्टः पुरा क्रीडन्[१४]महेलया। साऽनेन प्रेषिताऽन्यत्र तं वन्दध्वं कथं जनाः ? ॥५६॥
श्रुत्वा विपरिणम्याऽऽशु लोकः सर्वोऽपि तं मुनिम्। [१५]विप्लावयितुमारेभे कलङ्कोद्घोषपूर्वकम् ॥५७॥
न मे यावत् कलङ्कोऽयमुत्तरिष्यति सर्वथा। न तावत् पारयिष्यामीत्यभिजग्राह सोऽप्यृषिः ॥५८॥
ततश्च देवतारोषाच्[१६]छूनं **वेगवती**मुखम्। साधुव्यतिकरं [१७]ज्ञात्वा सा पित्रा भर्त्सिता भृशम् ॥५९॥
रोगात् पितुश्च सा भीता **सुदर्शन**मुनेः पुरः। प्रत्यक्षं सर्वलोकानामित्युच्चैःस्वरमब्रवीत् ॥६०॥
निर्दोषः सर्वथाऽसि त्वं दोषोऽलीकोऽयमेव ते। मयैवाऽऽरोपितः स्वामिंस्तितिक्षस्व क्षमानिधे! ॥६१॥
श्रुत्वेति तद्वचो लोको भूयोऽप्यानर्च तं मुनिम्। [१८]उल्लाघाऽभूद् **वेगवती** तदादि श्राविका च सा ॥६२॥
तां च रूपवतीं दृष्ट्वा ययाचे **शम्भु**भूपतिः। दास्ये मिथ्यादृशे नेति **श्रीभूतिः** प्रत्युवाच तम् ॥६३॥
**शम्भु**र्निहत्य **श्रीभूतिं** बुभुजे तां बलादपि। भवान्तरे ते वधाय भूयासमिति साऽशपत् ॥६४॥
**शम्भु**नाऽपि विमुक्ता सा **हरिकान्तार्यिका**न्तिके। प्रवव्राजाऽथ पूर्णायुर्**ब्रह्मलोक**मुपाययौ ॥६५॥
ततश्च्युत्वा [१९]**शम्भु**जीवरक्षोनाथस्य मृत्यवे। निदानवशतो जज्ञे **सीते**यं **जनका**त्मजा ॥६६॥

१. *०नमस्क्रियाम्* कां. ला. ॥ २. *जरद्वृषम्* ला. रसंपा. ॥ ३. सज्जमश्वम् ॥ ४. *०न्नुदीक्ष्येत* मु. ॥ ५. *वन्दनाय ययौ* पाता. ॥ ६. अहं कां योनिं अयास्यम् ? इति अन्वयः ॥ ७. न कृतं द्वैधं-भेदो येन सोऽभिन्नीभूत इत्यर्थः ॥ ८. *नन्देश्वरा०* ला. ॥ ९. *कनकाम्भो०* ता. ॥ १०. *महेन्द्रे* ता. ॥ ११. *राज्ञः सूनु०* हे. कां. मो. ला. ॥ १२. *०र्वज्रकन्दः* पाता. ॥ १३. *शम्भुर्हेम०* ता. ला. ॥ १४. स्त्रिया सह ॥ १५. *विद्रावयितु०* कां.; उपद्रवं कर्तुम् ॥ १६. स्तब्धं शोथयुतम् ॥ १७. *ज्ञात्वा पित्रा निर्भर्त्सिता* पाता. ॥ १८. स्वस्था ॥ १९. शम्भोर्जीव एव रक्षोनाथः-रावणस्तस्य ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**सुदर्शन**मुनेस्तस्याऽलीकदोषाधिरोपणात्। अस्याः कलङ्कोऽलीकोऽयं लोकेनेहाऽधिरोपितः ॥६७॥
¶भवं भ्रान्त्वा **शम्भु**जीवोऽप्युदपादि द्विजन्मनः। **कुशध्वजस्य सावित्र्यां प्रभासो** नाम नन्दनः ॥६८॥
स प्रवव्राज **विजयसेन**र्षेरन्तिकेऽन्यदा। परमं च तपस्तेपे सहमानः परीषहान् ॥६९॥
**सम्मेत**यात्राचलितं विद्याधरनरेश्वरम्। **कनकप्रभ**मद्राक्षीदिन्द्रवत् परमर्द्धिकम् ॥७०॥
तपसाऽनेन भूयासमिद्दृगृद्धिरिति व्यधात्। स निदानं विपद्याऽथोत्पेदे कल्पे तृतीयके ॥७१॥
ततश्च्युत्वा **रावणो**ऽभूत् खेचरेन्द्रस्तवाऽग्रजः। **कनकप्रभ**ऋद्धेर्यो निदानमकरोत् तदा ॥७२॥
**धनदत्त-वसुदत्त**मित्रं यस्तु द्विजोऽभवत्। **याज्ञवल्क्यो** भवं भ्रान्त्वा त्वमभूः स **बिभीषणः** ॥७३॥
राज्ञा हतस्तु **श्रीभूति**र्द्यां जगाम ततश्च्युतः। **सुप्रतिष्ठपुरे** विद्याधरोऽजनि **पुनर्वसुः** ॥७४॥
स **पुण्डरीकविजये**ऽपजहार स्मरातुरः। कन्यां **त्रिभुवनानन्द**चक्रिणोऽ**नङ्गसुन्दरीम्** ॥७५॥
चक्रिणा प्रेषितैर्विद्याधरैर्युद्धाकुलस्य तु[१]। विमानात् तस्य चाऽपप्तन्[२] निकुञ्जेऽ**नङ्गसुन्दरी** ॥७६॥
कृत्वा निदानं तत्प्राप्त्यै प्रव्रज्य च **पुनर्वसुः**। स्वर्गं ययौ ततश्च्युत्वा **लक्ष्मणो**ऽयमजायत ॥७७॥
¶[३]वनस्थिता साऽप्य**नङ्गसुन्दर्यु**ग्रं तपोऽकरोत्। विहितानशना चाऽन्ते जग्रसेऽजगरेण सा ॥७८॥
मृत्वा समाधिना साऽभूद् देवी कल्पे द्वितीयके। ततश्च्युत्वा **विशल्या**ऽभू**ल्लक्ष्मण**स्य महिष्यसौ ॥७९॥
योऽभूद् **गुणवती**भ्राता नाम्ना **गुणधरः** स तु। भवं भ्रान्त्वाऽभवद् राजपुत्रः **कुण्डलमण्डितः** ॥८०॥
श्रावकत्वं पालयित्वा चिराय च विपद्य सः। **सीता**सोदर एषोऽभूद् **भामण्डल**नरेश्वरः ॥८१॥
¶इतोऽभूतां च **काकन्द्यां वामदेव**द्विजन्मनः। **श्यामला**कुक्षिजौ पुत्रौ **वसुनन्द-सुनन्दनौ** ॥८२॥
एकदा च तयोर्गेहे तिष्ठतोराययौ मुनिः। मासोपवासी ताभ्यां च भक्तितः प्रतिलम्भितः ॥८३॥
मृत्वा तद्दानधर्मेणोत्तरेषु तु **कुरु**ष्वथ। अभूतां युग्मिनौ मृत्वा **सौधर्मे** तौ सुरौ ततः ॥८४॥
च्युत्वाऽभूतां च **काकन्द्यां रतिवर्धन**भूपतेः। **सुदर्शना**भवौ पुत्रौ **प्रियङ्कर-शुभङ्करौ** ॥८५॥
राज्यं चिरं पालयित्वा प्रव्रज्य च विपद्य च। सुरौ **ग्रैवेयके**ऽभूतां च्युत्वा च **लवणाङ्कुशौ** ॥८६॥
**सुदर्शना** तयोः पूर्वभवमाता भवं चिरम्। भ्रान्त्वाऽभूदेष **सिद्धार्थो**ऽध्यापको **राम**पुत्रयोः ॥८७॥
एवं मुनिवचः श्रुत्वा संवेगं बहवो ययुः। तदैव **राम**सेनानीः **कृतान्तः** प्राव्रजत् पुनः ॥८८॥
¶अथोत्थाय नमश्चक्रे **काकुत्स्थो जयभूषणम्**। उपसीतं च गत्वैवं चिन्तयामास चेतसि ॥८९॥
असौ शिरीषमृद्वङ्गी राजपुत्री मम प्रिया। **सीता** शीतातपक्लेशं कथं नाम सहिष्यते ? ॥९०॥
इमं संयमभारं च सर्वभारातिशायिनम्। उद्वक्ष्यति कथं नाम हृदयेनाऽपि दुर्वहम् ? ॥९१॥
यद् वा सतीव्रतं यस्या न भङ्क्तुं **रावणो**ऽप्यलम्। सा निर्व्यूढप्रतिज्ञैव[४] भाविनी संयमेऽपि हि ॥९२॥
एवं विमृश्य **वैदेहीं** ववन्दे **लक्ष्मणा**ग्रजः। **लक्ष्मणो**ऽन्ये च राजानः श्रद्धानिर्धौतचेतसः[५] ॥९३॥
¶[६]ततश्च सपरीवारो **रामो**ऽ**योध्यां** ययौ पुनः। **सीता-कृतान्तवदनौ** तेपाते च परं तपः ॥९४॥
तपस्तप्त्वा **ब्रह्मलोके कृतान्तवदनो** ययौ। **सीता**ऽपि षष्टिं वर्षाणि विदधे विविधं तपः ॥९५॥
त्रयस्त्रिंशदहोरात्रीं कृत्वाऽन्तेऽनशनं मृता। द्वाविंशत्यर्णवायुः[७] सोऽ**च्युतेन्द्रः** समजायत ॥९६॥
¶इतश्च शैले **वैताढ्ये**ऽभूत् **काञ्चनपुरे** पुरे। नामतः **कनकरथो** विद्याधरपतिस्तदा ॥९७॥
**मन्दाकिनी-चन्द्रमुख्योः** कन्ययोः स स्वयंवरे। सपुत्रान् भूपतीन् **राम-लक्ष्मणा**दीनथाऽऽह्वयत् ॥९८॥
तत्राऽऽसीनेषु भूपेषु **मन्दाकिन्या** निजेच्छया। **अनङ्गलवणो** वव्रे **चन्द्रमुख्या**ऽ**ङ्कुशः** पुनः ॥९९॥
**लक्ष्मण**स्य सुतास्तत्र क्रोधादुत्तस्थिरे युधि। सार्धे शते द्वे अपि ते युगपच्छ्री**धरा**दयः ॥१००॥
श्रुत्वा सन्नह्यतस्तांश्च प्रोचाते **लवणाङ्कुशौ**। को नाम योत्स्यतेऽमीभिरवध्या[८] भ्रातरः खलु ॥१०१॥
यथा न तातयोर्भेदः कोऽपि ज्येष्ठ-कनिष्ठयोः। तत्पुत्राणां तथाऽस्माकममीषामपि माऽस्तु सः[९] ॥१०२॥

१. च खं.१-२॥ २. *चाऽपतन् निकुञ्जे०* हे. कां. ला. खं.१-२, पाता.॥ ३. *वने स्थिता* पाता.॥ ४. *०प्रतिज्ञैवं* मु.॥ ५. श्रद्धया निर्मलचित्ताः॥ ६. *इतश्च* मु.॥ ७. २२सागरोपमायुष्कः॥ ८. *०ऽमूभि०* ला.॥ ९. भेदः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं तयोर्वचो ज्ञात्वा चरेभ्यो **लक्ष्मणा**त्मजाः। [1]वीक्षापन्ना निनिन्दुः स्वं [2]दुष्कर्मारम्भसम्मुखम् ॥१०३॥
सद्यः संवेगमापन्नाः पितरावनुमन्य ते। **महाबल**मुनेः पादपद्मान्ते जगृहुर्व्रतम् ॥१०४॥
जातोद्वाहौ तदानीं ताव**नङ्गलवणाङ्कुशौ**। सहैव सीरि-शार्ङ्गिभ्या**मयोध्या**मीयतुः पुरीम् ॥१०५॥
¶इतश्च स्वपुरे हर्म्यमूर्ध्नि **भामण्डलः** स्थितः। कदाचिदेवं मनसा चिन्तयामास शुद्धधीः ॥१०६॥
श्रेणिद्वयं वशीकृत्याऽस्खलन् सर्वत्र लीलया। विहृत्याऽन्ते चाऽऽत्तदीक्षो भवेयं पूर्णवाञ्छितः ॥१०७॥
एवं चिन्तयतस्तस्य मूर्ध्नि विद्युत् पपात [3]खात्। स मृत्वा **देवकुरुषु** जज्ञे युगलधर्मिषु ॥१०८॥
¶इतश्च **हनुमांश्चै**[4]**त्रे** चैत्यवन्दनहेतवे। **मेरुं** गतो निवृत्तोऽस्त[5]मयन्तं सूर्यमैक्षत ॥१०९॥
एवं च दध्यावुदयो यथा ह्यस्तं तथा खलु। निदर्शनमयं सूर्यो धिग्धिक् सर्वमशाश्वतम् ॥११०॥
एवं विचिन्त्य स्वपुरे गत्वा राज्ये सुतं न्यधात्। **धर्मरत्ना**चार्यपार्श्वे प्रव्रज्या स्वयमाददे ॥१११॥
तमनुप्राव्रजन् राज्ञां सार्धसप्तशतानि [6]च। आर्या**लक्ष्मीवती**पार्श्वेऽस्थुस्तत्पत्न्यश्च दीक्षिताः ॥११२॥
ध्यानानलेन निर्दह्य क्रमात् कर्माणि मूलतः। **श्रीशैलः** प्राप्य शैलेशीं जगाम पदमव्ययम् ॥११३॥
¶**हनूमन्तं** प्रव्रजितं ज्ञात्वा दध्यौ **रघूद्वहः**। हित्वा भोगसुखं कष्टां दीक्षां किमयमाददे ? ॥११४॥
तां **राम**चिन्तामवधेर्ज्ञात्वा **सौधर्म**वासवः। ऊचे मध्येसभमहो! कर्मणां विषमा गतिः ॥११५॥
**राम**श्चरमदेहोऽपि यद् धर्मं हसति स्वयम्। सौख्यं विषयसम्भूतं प्रत्युतै[7]षं प्रशंसति ॥११६॥
अथवा ज्ञातमनयो **राम-लक्ष्मण**योर्मिथः। स्नेहो गाढतरः कोऽपि भवानिर्वेदकारणम् ॥११७॥
द्वौ देवौ कौतुकात् तत्र तयोः स्नेहं परीक्षितुम्। उपेयतु**रयोध्यायां लक्ष्मण**स्य निकेतने ॥११८॥
दर्शयामासतुः सद्यो मायया **लक्ष्मण**स्य तौ। सर्वम[8]न्तःपुरस्त्रैणमाक्रन्दत् करुणस्वरम् ॥११९॥
हा **पद्म!** पद्मनयन! बन्धुपद्मदिवाकर!। अकाण्डमृत्युः कोऽयं ते विश्वस्याऽपि भयङ्करः ? ॥१२०॥
एवं च रुदतीर्वक्षांस्याघ्नाना मुक्तकुन्तलाः। अन्तःपुरवधूः प्रेक्ष्य विषण्णो **लक्ष्मणो**ऽवदत् ॥१२१॥
ममाऽसौ किं मृतो भ्राता जीवितस्याऽपि जीवितम् ?। पिशुनेन कृतान्तेन किं कृतं छलघातिना ? ॥१२२॥
एवं च भाषमाणस्य वचसा सह जीवितम्। **सौमित्रे**र्निर्ययौ कर्मविपाको दुरतिक्रमः ॥१२३॥
स्वर्णस्तम्भमवष्टभ्य स्थितः सिंहासनेऽपि हि। सोऽथ [9]प्रसारिताक्षोऽस्थाल्लेप्यमूर्तिरिवाऽक्रियः ॥१२४॥
[10]परासुं **लक्ष्मणं** दृष्ट्वा विषण्णौ तौ सुरावपि। मिथो जजल्पतुरहो! किमावाभ्यामिदं कृतम् ? ॥१२५॥
विश्वाधारः पुमानेष किमावाभ्यां हहा! हतः ?। इति स्वं बहु निन्दन्तौ [11]स्वकल्पं जग्मतुः पुनः ॥१२६॥
परासुं **लक्ष्मणं** प्रेक्ष्य तत्र चाऽन्तःपुरस्त्रियः। चक्रन्दुः सपरीवारा [12]विलुलत्कुन्तलालिकाः ॥१२७॥
तच्चाऽऽक्रन्दितमाकर्ण्य तत्र **रामः** समाययौ। उवाच च किमारब्धमविज्ञायाऽप्यमङ्गलम् ? ॥१२८॥
जीवन्नेवैष तिष्ठामि जीवत्येष च मेऽनुजः। कोऽप्यमुं बाधते व्याधिर्भेषजं तत्प्रतिक्रिया ॥१२९॥
इत्युक्त्वाऽऽजूहवद् **रामो** वैद्याञ्ज्योतिषिकानपि। प्रयोगं मन्त्र-तन्त्राणां कारयामास चाऽसकृत् ॥१३०॥
वैफल्ये मन्त्र-तन्त्राणां मूर्च्छां प्राप **रघूद्वहः**। कथञ्चिल्लब्धसञ्ज्ञः सन् विललापोच्चकैःस्वरम् ॥१३१॥
ते **बिभीषण-सुग्रीव-शत्रुघ्ना**द्या [13]उदश्रवः। विमुक्तकण्ठं रुरुदुर्हताः स्म इति भाषिणः ॥१३२॥
**कौशल्या**द्या मातरश्च स्नुषाभिः सह साश्रवः। भूयो भूयोऽपि मूर्च्छन्त्यश्चक्रन्दुः करुणस्वरम् ॥१३३॥
प्रतिमार्गं प्रतिगृहं प्रत्यट्टं क्रन्दनात् तदा। शोकाद्वैतमभूत् सर्वं [14]रसान्तरमलिम्लुचम् ॥१३४॥
नत्वाऽथ **राम**मूचाते कुमारौ **लवणाङ्कुशौ**। भवादद्याऽतिभीतौ [15]स्वः [16]कनीयस्तातमृत्युना ॥१३५॥
अकस्मादापतत्येष मृत्युः सर्वस्य तन्नरैः। तत्परैः परलोकाय स्थातव्यं मूलतोऽपि हि ॥१३६॥
अनुमन्यस्व दीक्षायै न नो युक्तमतः परम्। कनीयस्तातमुक्तानां गृहे स्थातुं मनागपि ॥१३७॥

१. विस्मयं प्राप्ताः ॥ २. दुष्कर्मण आरम्भस्य सम्मुखं-मुखं-विचारं इति यावत् ॥ ३. गगनात् ॥ ४. चैत्रमासाष्टाह्निकायाम् ॥ ५. 'अयि गतौ' इत्यात्मनेपदी धातुरपि परस्मैपदित्वेनाऽत्राऽऽचार्येण निवेदितः, "आत्मनेपदमनित्यं" इति न्यायोऽपि द्रष्टव्यः ॥ ६. *तु* खं.१ ॥ ७. *प्रत्युतैवं* ला. ॥ ८. अन्तःपुरसत्कं स्त्रीवृन्दम् ॥ ९. प्रसारिते-विस्फारिते अक्षिणी यस्य सः ॥ १०. गतप्राणम् ॥ ११. *स्वं कल्पं* रसंपा. ॥ १२. *०कुन्तलालकाः* ता.; विलुलन्-मुक्तः कुन्तलालिः-केशपाशो यासां ताः ॥ १३. *उदश्रवः* खं.१-२, पाता. ॥ १४. अन्यरसनाशकम् ॥ १५. 'अस्'धातोः प्रथमपुरुषद्विवचनरूपम् ॥ १६. लघुपितुः लक्ष्मणस्य मृत्युना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा **राम**मानम्याऽ**मृतघोष**मुनेः पुरः । उभौ जगृहतुर्दीक्षां क्रमाच्च शिवमीयतुः ॥१३८॥

¶**रामो** भ्रातृविपत्त्या च वियोगेन च पुत्रयोः । मुमूर्च्छ भूयो भूयोऽपि मोहादेवं जगाद च ॥१३९॥

मया[1]ऽपमानना काचित् क्वचिच्चक्रेऽद्य बान्धव! ? । कस्मादकस्मादालम्बि भवता मौनमीदृशम् ? ॥१४०॥

त्वयि ह्येवं स्थिते भ्रातः! पुत्राभ्यामपि चोज्झितः । प्रविशन्ति च्छिद्रशते नृणां भूतशतानि हि ॥१४१॥

उन्मत्तभाषिणं चैवं **राम**मेत्य कथञ्चन । **बिभीषणा**द्याः सम्भूय जगदुर्गद्गदस्वरम् ॥१४२॥

धीरेष्वपि हि धीरस्त्वं वीरो वीरेष्विव प्रभो! । लज्जाकरमिदं तस्मादधैर्यं मुञ्च सम्प्रति ॥१४३॥

लोकप्रसिद्धमधुना **सौमित्रे**रौर्ध्व[2]देहि[3]कम् । अङ्गसंस्कारपूर्वं हि कर्तव्यं समयोचितम् ॥१४४॥

इत्युक्त्या कुपितो **राम**स्तानूचे विधु[4]ताधरः । जीवत्येष हि मे भ्राता किमिदं वो वचः खलाः! ? ॥१४५॥

सर्वेषां वः सबन्धूनां ज्वलने दाहपूर्वकम् । मृतकार्यं विधातव्यं दीर्घायुः स्तान्ममाऽनुजः ॥१४६॥

भ्रात[5]र्भ्रातर्ब्रूहि शीघ्रं वत्स! **लक्ष्मण!** नन्वयम् । दुर्जनानां प्रवेशोऽस्ति किं खेदयसि मां चिरम् ? ॥१४७॥

यद् वा खलसमक्षं न वत्स! कोपस्तवोचितः । इत्युक्त्वांऽसे[6] तमारोप्य ययावन्यत्र **राघवः** ॥१४८॥

नीत्वा स्नानगृहे **रामः** कदाऽप्यस्नपयत् स्वयम् । ततश्च तं स्वहस्तेन विलिलेप विलेपनैः ॥१४९॥

आनाय्य दिव्यभोज्यानि पूरयित्वा च भाजनम् । कदाचित् तस्य पुरतो मुमोच स्वयमेव च ॥१५०॥

कदाऽप्यारोपयदङ्के निजेऽचुम्बच्छिरो मुहुः । कदाऽप्यस्वापयत् तल्पे[7] वाससाऽऽच्छादिते स्वयम् ॥१५१॥

कदाऽपि स्वयमाभाष्य स्वयं स्म प्रतिभाषते । स्वयं संवाह[8]कीभूय ममर्द च कदाचन ॥१५२॥

इत्यादि चेष्टा विकलाः स्नेहोन्मत्तस्य कुर्वतः । ययू[9] **रामस्य** षण्मासा विस्मृताशेषकर्मणः ॥१५३॥

¶श्रुत्वा च तं तथोन्मत्त**मिन्द्रजित्सुन्द**सूनवः । खेचरा विद्विषो[10]ऽन्येऽपि[11] **राम**मेयुर्जिघांसवः ॥१५४॥

**अयोध्यां** रुरुधुः सैन्यैरुन्मत्तरघुपुङ्गवाम् । सुप्तसिंहां गिरिगुहामिव व्याधा[12]श्छलौजसः ॥१५५॥

**रामो**ऽपि **लक्ष्मणं** स्वाङ्के निधायाऽऽस्फालयद् धनुः । **वज्रावर्त**मकालेऽपि संवर्तस्य प्रवर्तकम् ॥१५६॥

तदा चाऽऽसनकम्पेन **माहेन्द्रा**न्नाकिभिः समम् । **जटायु**राययौ **रामं** द्रुढात् प्राग्जन्मसौहृदात् ॥१५७॥

अद्याऽपि नाकिनो **राम**[13]गृह्या इति विभाषिणः । **इन्द्रजित्**पुत्रमुख्यास्ते दुद्रुवुः खेचरा द्रुतम् ॥१५८॥

अत्र देवसखो[14] **रामो** हन्ता[15] नोऽग्रे **बिभीषणः** ।[16] इति भीता लज्जिताश्च ते संवेगं परमं दधुः ॥१५९॥

ते मुने**रतिवेग**स्य पार्श्वे संवेगधारिणः । उपेत्य दीक्षां जगृहुर्गृहवासपराङ्मुखाः ॥१६०॥

¶ततो **जटायु**रमरो बोधार्थं **राघवस्य** सः । पुरः[17]स्थाय तरुं शुष्कं सिषेच मुहुरम्भसा ॥१६१॥

क्षिप्त्वा करीषं[18] दृषदि रोपयामास पद्मिनीम्[19] । बीजान्युवापाऽकालेऽपि मृतोक्षणा[20] लाङ्गलेन च[21] ॥१६२॥

यन्त्रे च वालुकाः[22] क्षिप्त्वा तैलार्थं पर्यपीलयत् । इत्याद्यसाधकं **राम**स्याऽन्यदप्युदभावयत् ॥१६३॥

**राम**स्तमूचे किं शुष्कं तरुं सिञ्चसि भो! मुधा ? । फलं दूरेऽस्तु किं नाम मुसलं क्वाऽपि पुष्पति[23] ? ॥१६४॥

शिलायां पद्मिनीखण्डमारोपयसि मुग्ध! किम् ? । किं वा वपसि बीजानि निर्जलेऽपि[24] मृतैर्वृषैः ? ॥१६५॥

न वालुकाभ्यस्तैलं स्यात् किं पीलयसि मूर्ख![25] ताः[26] ? । अनुपायविदस्तेऽसौ प्रयासः सर्वथा वृथा ॥१६६॥

स्मित्वा **जटायु**रप्यूचे यदीयदपि वेत्सि भोः! । अज्ञानचिह्नं मृतकं स्कन्धे वहसि तर्हि किम् ? ॥१६७॥

**सौमित्रि**वपुरालिङ्ग्य **राम**स्तं प्रत्यभाषत । अमङ्गलं भाषसे किं ? त्यज दृष्टिपथं मम ॥१६८॥

¶एवं **जटायुषं**[27] **रामे** भाषमाणेऽवधेर्विदन् । **कृतान्तवदनो** देवस्तद्बोधार्थं समाययौ ॥१६९॥

स्कन्धे स्त्रीमृतकं न्यस्योप[28]**रामं** विचचार सः । **रामो**ऽप्यूचे किमुन्मत्तोऽस्येवं स्त्रीमृतकं वहन् ? ॥१७०॥

प्रत्युवाच **कृतान्तो**ऽपि भाषसे किममङ्गलम् ? । ममैषा प्रेयसी त्वं तु किं शवं वहसि स्वयम् ? ॥१७१॥

---

१. ***मयाऽपमानता*** मु. रस्वीपा. ॥ २. ***०रूर्ध्व०*** खं.१ ॥ ३. ***०देहिकम्*** खं.१-२, ला. ॥ ४. कम्पितौष्ठः ॥ ५. ***भ्रातस्त्वं तद् ब्रूहि*** ला. ॥ ६. स्कन्धे ॥ ७. शय्यायाम् ॥ ८. तैलमर्दको भूत्वा ॥ ९. ***ययौ रामस्य षण्मासी*** मु. ॥ १०. ***विद्विषो(ष) एते राम०*** ला. ॥ ११. ***रामस्येयु०*** कां. मो. मु. ॥ १२. छलमेव ओजो येषां ते ॥ १३. देवा रामस्य पक्षपातिनः ॥ १४. ***देवसखा*** ला.विना ॥ १५. ***नाऽग्रे*** ला. ॥ १६. ***इति ते लज्जिताश्चित्ते संवेगं परमं दधुः*** ला. ॥ १७. पुरः स्थित्वा ॥ १८. गोमयम् ॥ १९. ***पद्मिनीः*** खं.२, पाता. ता. ॥ २०. मृतौ वृषभौ योजितौ यस्मिन् लाङ्गले-हले-तेन ॥ २१. ***वा*** ता. ॥ २२. ***वालुकां*** ला. ॥ २३. ***पुष्प्यति*** ता.; ***पुष्यति*** मु. ॥ २४. ***निर्जले मृतकैर्वृषैः*** ता. ॥ २५. ***मुग्ध*** पाता. ॥ २६. ***भोः*** कां. मु. ॥ २७. ***जटायुषा*** पाता. ॥ २८. रामसमीपम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृतां जानासि मे भार्यामुह्यमानां मया यदि। निजस्कन्धस्थितं किं न मृतकं वेत्सि [1]बुद्धिमन्! ? ॥१७२॥
तेनैवं दर्शितैस्तैस्तैर्हेतुभिर्जातचेतनः । **रामो** दध्यौ किं नु सत्यं न जीवति ममाऽनुजः ? ॥१७३॥
ततस्तौ लब्धबोधाय **रामाय** स्वमशंसताम् । देवौ **जटायुःकृतान्तौ** निजस्थानं च जग्मतुः ॥१७४॥
¶मृतकार्यं ततो **रामश्च**कार स्वानुजन्मनः । दीक्षां प्रपित्सुः **शत्रुघ्नं** राज्यदानाय चाऽऽदिशत् ॥१७५॥
अहमप्यनुयास्यामि भवत्पादानिति ब्रुवन् । प्र[2]त्यादिदेश **शत्रुघ्नो** राज्यं भवपराङ्मुखः ॥१७६॥
ततो **लवण**पुत्रायाऽ**नङ्गदेवाय राघवः** । ददौ राज्यं स्वयं तुर्यपुरुषार्थाय सत्वरः ॥१७७॥
**मुनिसुव्रत**वंशस्य **सुव्रत**स्य महामुनेः । **अर्हद्दास**श्रावकेणोपदिष्टस्याऽन्ति[3]कं ययौ ॥१७८॥
तत्र **शत्रुघ्न-सुग्रीव-बिभीषण-विराधितैः** । अन्यैश्च राजभिः सार्धं **रामो** व्रतमुपाददे ॥१७९॥
**रामभद्रे** तु निष्क्रान्ते निष्क्रान्तान्यथ षोडश । महीभुजां सहस्राणि भववैराग्ययोगतः ॥१८०॥
सप्तत्रिंशत् सहस्राणि प्राव्रजन् वरयोषितः । **श्रीमत्याः** [4]श्रमणायाश्च ता बभूवुः परिच्छदे ॥१८१॥
षष्ठ्यब्दीं गुरुपादान्ते विविधाभिग्रहोद्यतः । तेपे तपांसि **रामर्षिः** पूर्वाङ्गश्रुतभावितः ॥१८२॥
¶अथ **रामः** [5]प्रपन्नैकविहारो गुर्वनुज्ञया । एकाकी प्रययौ निर्भीरटव्यां गिरिकन्दरे ॥१८३॥
तस्यामेव विभावर्यां तत्र ध्यानजुषः सतः । उदभूदवधिज्ञानं **रामभद्र**महामुनेः ॥१८४॥
पश्यंश्चतुर्दशरज्जु[6]प्रमं विश्वं करस्थवत् । देवाभ्यां हतमज्ञासीद् गतं च नरकेऽनुजम् ॥१८५॥
इदं च चिन्तयामास **राम**भट्टारकस्तदा । **धनदत्ता**भिधोऽभूवमहं पूर्वत्र जन्मनि ॥१८६॥
**वसुदत्तो**ऽभिधानेन **लक्ष्मणो**ऽभून्ममाऽनुजः । तत्राऽप्यकृतकृत्योऽसावेवमेव [7]व्यपद्यत ॥१८७॥
भवेऽस्मिन् मे **वसुदत्त**जीवोऽभू**ल्लक्ष्मणो**ऽनुजः । तत्राऽप्यमुष्य कौमारे मुधाऽगाच्छ[8]रदां शतम् ॥१८८॥
शतत्रयं मण्डलित्वे चत्वारिंशत् तु दिग्जये । व[9]र्षैकादशसहस्राः सार्धा राज्येऽब्दषष्टि च ॥१८९॥
द्वादशाब्दसहस्राणि सर्वमायुरिति क्रमात् । ययावविरतस्यैव केवलं नरकावहम् ॥१९०॥
न दोषो देवयोः कोऽपि [10]मायावधकयोस्तयोः । विपाकः कर्मणामीदृग् भवत्येव शरीरिणः ॥१९१॥
एवं विचिन्तयन् **रामः** कर्मच्छेदेऽधिकोद्यतः । [11]तपःसमाधिनिष्ठोऽभून्निर्ममः सन् विशेषतः ॥१९२॥
¶अथ षष्ठोपवासान्ते प्राविशत् पारणाय सः । युगमात्रदत्तदृष्टिर्नगरे **स्यन्दनस्थले** ॥१९३॥
निशाकरमिवाऽवन्यामायान्तं नयनोत्सवम् । सम्मुखीनाः समापेतुः पौराः प्रचुरसम्मदाः ॥१९४॥
पौर्यः स्वस्वगृहद्वारि भिक्षादानाय तस्य च । विचित्रभोज्यपूर्णानि भाजनानि पुरो दधुः ॥१९५॥
पौराणां हर्षतस्तत्र तुमुलोऽभूत् तथा यथा । स्तम्भान् बभञ्जुः करिणो ययुश्चो[12]त्कर्णतां हयाः ॥१९६॥
**रामो**ऽप्युज्झि[13]तधर्माभिरतत्वात् पौरढौकितम् । आहारं नाऽग्रहीत् तेभ्योऽभ्यागात् तु नृपवेश्मनि ॥१९७॥
तत्र चोज्झितधर्मेणाऽऽहारेण प्रत्यलम्भयत् । **प्रतिनन्दि**नृपो **रामं** विधिवद् बुभुजे च सः ॥१९८॥
अमरैर्विदधे तत्र वसुधारादिपञ्चकम् । भगवान् **रामभद्रो**ऽपि तदरण्यं ययौ पुनः ॥१९९॥
¶मा भूद् भूयः पुरक्षोभः सङ्कट्टो मे च मा स्म भूत् । इति बुद्ध्या शुद्धबुद्धिः सोऽभिग्रहमिमं व्यधात् ॥२००॥
अरण्येऽत्रैव चेद् भिक्षाकाले भिक्षोपलप्स्यते । तदानीं पारणं कार्यमस्माभिर्नाऽन्यथा पुनः ॥२०१॥
इत्यभिग्रहभृद् **रामो** निरपेक्षो वपुष्यपि । परं समाधिमापन्नोऽवतस्थे प्रतिमाधरः ॥२०२॥
तत्राऽन्येद्युर्विपर्यस्तशिक्षेणाऽश्वेन वेगिना । आकृष्यमाण आयासीत् **प्रतिनन्दि**नरेश्वरः ॥२०३॥
पङ्के **नन्दनपुण्या**ख्यसरसोऽश्वो ममज्ज सः । समापपाताऽनुपदं सैन्यं च **प्रतिनन्दिनः** ॥२०४॥
पङ्कात् तमश्वमुत्तार्य शिबिरं न्यस्य तत्र च । स्नात्वा च स नृपश्चक्रे भोजनं सपरिच्छदः ॥२०५॥
तदा च पारितध्यानो **रामर्षिः** पारणेच्छया । तत्राऽऽजगाम भगवानभ्युत्तस्थौ च तं नृपः ॥२०६॥
अवशिष्टैर्भक्त-पानैः स **रामं** प्रत्यलम्भयत् । कृतपारणके तस्मिन् रत्नवृष्टिरभूद् दिवः ॥२०७॥

१. ***बुद्धिमान्*** पाता.॥ २. निषिषेध॥ ३. ***०न्तिके*** खं.१॥ ४. साध्व्यः॥ ५. ***प्रच्छन्नैक०*** मु.॥ ६. ***०रज्जुमानं*** पाता.॥ ७. ***विपद्य सः*** मो.॥ ८. वर्षाणाम्॥ ९. ११५६० वर्षाणि॥ १०. मायया वधकर्त्रोः॥ ११. ***ततः समाधि०*** पाता.॥ १२. अश्वैः कर्णा ऊर्ध्वीकृताः॥ १३. अन्त-प्रान्तभिक्षाऽऽदानरूपधर्मेऽभिरतत्वात्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**राम**र्षिर्देशनां चक्रे **प्रतिनन्द्या**दयोऽथ ते। बभूवुः श्रावकाः सम्यग्द्वादशव्रतधारिणः ॥२०८॥
ततः प्रभृति तत्रैव **राम**स्तस्थौ चिरं वने। देवीभिर्वनवासाभिः पूज्यमानो महातपाः ॥२०९॥
मासेनैकेन मासाभ्यां मासैस्त्रिचतुरैरपि। **रामर्षिः** पारयामास [1]भवपारयियासया ॥२१०॥
पर्यङ्कस्थः कदाऽप्यस्थात् प्रलम्बितभुजोऽन्यदा। कदाऽप्युत्कटिकासीन ऊर्ध्वबाहुः कदाचन ॥२११॥
अङ्गुष्ठस्थोऽन्यदा तस्थौ पार्ष्णिस्थश्च कदाऽपि हि। इति [2]नानासनो ध्यानी स तेपे दुस्तपं तपः ॥२१२॥
¶विहरन्नन्यदा **रामो** ययौ **कोटिशिलां** शिलाम्। विद्याधरसमक्षं या **लक्ष्मणे**न पुरोद्दधे ॥२१३॥
[3]तामध्यास्य शिलां **रामः** क्षपकश्रेणिमा[4]स्थितः। शुक्लध्यानान्तरं भेजे निशायां प्रतिमाधरः ॥२१४॥
तदा चाऽवधिना ज्ञात्वा **सीतेन्द्र** पर्यचिन्तयत्। अयं [5]भवी भवति चेद् **रामो** युज्येऽ[6]मुना पुनः ॥२१५॥
अनुकूलैरुपसर्गैः क्षपकश्रेणिवर्तिनः। उपद्रवं करोम्यस्य यथा स्यान्मत्सुहृत् सुरः ॥२१६॥
इति सञ्चिन्त्य **सीतेन्द्र** उप**रामं** समाययौ। विचक्रे च महोद्यानं वसन्तर्तुविभूषितम् ॥२१७॥
चुकूज कोकिलाकुलं ववौ च मलयानिलः। रणन्तो भ्रमरा भ्रेमुः कुसुमामोदमोदिनः ॥२१८॥
चूत-चम्पक-[7]कङ्केल्लि-पाटला-बकुलादयः। दधुः सद्योऽपि पुष्पाणि नव्यास्त्राणि [8]मनोभुवः ॥२१९॥
**सीता**रूपं च **सीतेन्द्रो** विकृत्य स्त्रीजनानपि। ऊचे प्रिय! प्रिया तेऽस्मि **सीते**ह समुपस्थिता ॥२२०॥
रक्तं त्यक्त्वा तदानीं त्वामहं पण्डितमानिनी। प्राव्रजं नाथ! पश्चाच्च पश्चात्तापो ममाऽत्यभूत् ॥२२१॥
विद्याधरकुमारीभिराभिरद्याऽहमर्थिता। प्रसीद नाथ! स्वं नाथं **रामं** नाथीकुरुष्व [9]नः ॥२२२॥
त्वं च मुञ्च परिव्रज्यां **राम**स्य महिषी भव। त्वदादेशात् तस्य पत्न्यो भविष्यामोऽधुना वयम् ॥२२३॥
अमूर्विद्याधरवधूस्तदुद्वह **रघूद्वह!** प्राग्वत् सह त्वया रंस्ये तां सहस्वाऽवमाननाम् ॥२२४॥
इति ब्रुवाणे **सीतेन्द्रे** वैक्रि[10]य्यः खेचरस्त्रियः। सङ्गीतं विविधं चक्रुः स्मरोज्जीवनभेषजम् ॥२२५॥
**सीतेन्द्र**वचनैस्तैश्च तेन सङ्गीतकेन च। वसन्तेन च नाऽक्षुभ्यद् **रामभद्र**महामुनिः ॥२२६॥
माघस्य शुक्लद्वादश्यां तदा यामेऽन्तिमे निशि[11]। उदपद्यत **रामर्षेः** केवलज्ञानमुज्ज्वलम् ॥२२७॥
**राम**स्य केवलज्ञानमहिमानं सभक्ति[12]कैः। **सीतेन्द्रो** नाकिनोऽन्ये च विदधुर्विधिपूर्वकम् ॥२२८॥
दिव्यस्वर्णाम्बुजासीनो दिव्यचामरराजितः। दिव्यातपत्रवान् **रामो** विदधे धर्मदेशनाम् ॥२२९॥
देशनान्ते क्षमयित्वा **सीतेन्द्रे**ण प्रणम्य च। **सौमित्रि-रावण**गतिं पृष्टो **राम**र्षिरभ्यधात् ॥२३०॥
¶अधुना नरके तुर्ये **सशम्बूको दशाननः**। **लक्ष्मण**श्चाऽस्ति गतयः कर्माधीना हि देहिनाम् ॥२३१॥
नरकायुश्चाऽनुभूय तौ **दशानन-लक्ष्मणौ**। नगर्यां **विजयावत्यां प्राग्विदेह**विभूषणे ॥२३२॥
**सुनन्द-रोहिणी**पुत्रौ **जिनदास-सुदर्शनौ**। भविष्यतोऽर्हद्धर्मं च सततं पालयिष्यतः ॥२३३॥युग्मम्॥
ततो विपद्य **सौधर्मे** त्रिदशौ तौ भविष्यतः। च्युत्वा च **विजयापुर्यां** श्रावकौ भाविनौ पुनः ॥२३४॥
ततोऽपि मृत्वा पुरुषौ **हरिवर्षे** भविष्यतः। तौ चाऽवसानमासाद्य देवलोकं गमिष्यतः ॥२३५॥
च्युत्वा च **विजयापुर्यां जयकान्त-जयप्रभौ**। **कुमारवार्तराड्-लक्ष्म्यो**स्तौ कुमारौ भविष्यतः ॥२३६॥
जिनोक्तं संयमं तत्र पालयित्वा विपद्य च। गीर्वाणौ **लान्तके** कल्पे भविष्यत उभावपि ॥२३७॥
तदा त्व**मच्युता**च्च्युत्वा क्षेत्रे चाऽत्रैव **भारते**। **सर्वरत्नमति**र्नाम चक्रवर्ती भविष्यसि ॥२३८॥
च्युत्वा तौ भाविना**विन्द्रायुध-मेघरथा**भिधौ। सुतौ ते त्वं [13]परिव्रज्य **वैजयन्ते** [14]व्रजिष्यसि ॥२३९॥
**इन्द्रायुधः** स तु जीवो **रावण**स्य भवत्रयम्। शुभं भ्रान्त्वा तीर्थकरगोत्रकर्माऽर्जयिष्यति ॥२४०॥
ततो **रावण**जीवः स तीर्थनाथो भविष्यति। **वैजयन्ता**च्च्युतस्तस्य भावी गणधरो भवान् ॥२४१॥
ततस्तौ यास्यतो मोक्षं स जीवो **लक्ष्मण**स्य तु। भवत्सूनु**र्मेघरथो** व्रजिष्यति गतीः शुभाः ॥२४२॥
ततश्च **पुष्करद्वीपे प्राग्विदेह**विभूषणे। नगर्यां **रत्नचित्रा**यां चक्रवर्ती भविष्यति ॥२४३॥

---

१. भवपारं यातुमिच्छया ॥ २. *नानासनी* पाता.; *नानासने* खं.१ ॥ ३. *तामध्यासीच्छिलां* मु. ॥ ४. *०मास्रितः* पाता. विना ॥ ५. संसारी ॥ ६. अहं रामेण पुनर्योगं प्राप्नुयामिति तच्चिन्ता ॥ ७. *कङ्केल्लि०* पाता.; *कङ्कील्लि०* मु. ॥ ८. कामदेवस्य ॥ ९. *तत्* ता. ॥ १०. वैक्रियशक्त्या प्रादुर्भूताः ॥ ११. *निशः* रसंपा. ॥ १२. *[illegible]कम्* ता. ॥ १३. *परित्यज्य* पाता. ॥ १४. *व्रजिष्यति* खं.१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्रवर्तिश्रियं भुक्त्वा परिव्रज्य क्रमेण च। स तीर्थनाथो भविता निर्वाणं च प्रपत्स्यते ॥२४४॥
¶एवमाकर्ण्य **सीतेन्द्रो रामभद्रं** प्रणम्य च। ययौ प्राक्स्नेहवशतो दुःखभाग् यत्र **लक्ष्मणः** ॥२४५॥
सिंहादिरूपैर्विकृतैस्तत्र **शम्बूक-रावणौ**। **लक्ष्मणे**न समं क्रुद्धौ युध्यमानौ ददर्श सः ॥२४६॥
नैवं वो युध्यमानानां दुःखं भावीति वादिनः। परमाधार्मिकाः क्रुद्धा अग्निकुण्डेषु तान् न्यधुः ॥२४७॥
दह्यमानास्त्रयोऽप्युच्चै रटन्तो गलिताङ्गकाः। ततः कृष्ट्वा तप्ततैलकुम्भ्यां निदधिरे बलात् ॥२४८॥
विलीनदेहास्तत्राऽपि भ्राष्ट्रे चिक्षिपिरे पुनः। तडत्तडिति शब्देन स्फुटन्तो दुद्रुवुः पुनः ॥२४९॥
इत्यादि दुःखं तेषां स प्रेक्ष्योवाचाऽसुरानिति। किं रे न वि[1]त्थ यदमी आसन् पुरुषपुङ्गवाः ? ॥२५०॥
अपयाताऽसुरा! दूरं मुञ्चतैतान् महात्मनः। निषिध्येत्यसुरानूचे सोऽथ **शम्बूक-रावणौ** ॥२५१॥
युवाभ्यां तत् कृतं पूर्वं येनेमं नरकं गतौ। पूर्ववैरं किमद्याऽपि दृ[2]ष्टोदर्कं न मुञ्चितम् ? ॥२५२॥
तावप्येवं निषिध्येन्द्रः **सौमित्रे रावणस्य** च। **राम**केवलिनाख्यातमाचख्यौ बोधहेतवे ॥२५३॥
तावप्यथ बभाषाते साध्वकार्षीः कृपानिधे!। भवच्छुभोपदेशेन जाता [3]नो दुःखविस्मृतिः ॥२५४॥
प्राग्जन्मोपार्जितैस्तैः क्रूरैः कर्मभिरर्पितः। दीर्घो नो नरकावासस्तद् दुःखं कोऽपनेष्यति ? ॥२५५॥
[4]इत्युक्त्या करुणापूर्णः **सीतेन्द्रः** प्रत्यवोचत। नेष्यामि सुरलोके[5] त्रीनपि वो नरकादितः ॥२५६॥
इत्युक्त्वा पाणिनोद्दध्रे स तांस्त्रीनपि ते पुनः। विशीर्य कणशः पेतुः पाणेः पारदवत् क्षणात् ॥२५७॥
भूयोऽपि मिलिताङ्गांस्तानुद्दध्रे स यथा यथा। पुनरेव पतन्ति स्म पूर्ववत् ते तथा तथा ॥२५८॥
ततः **सीतेन्द्र**मूचुस्ते भवत्यधिकमेव नः। दुःख[6]मुद्ध्रियमाणानां तन्मुञ्चाऽस्मान् दिवं व्रज ॥२५९॥
तान् मुक्त्वेयाय **सीतेन्द्रो रामं** नत्वा ततोऽगमत्। शाश्वतार्हत्तीर्थयात्राकृते **नन्दीश्वरा**दिषु ॥२६०॥

गच्छन्नथो **देवकुरु**प्रदेशे
निरीक्ष्य **भामण्डल**राजजीवम्।
प्राक्स्नेहयोगात् प्रतिबोध्य सम्यग्
निजं स **सीतेन्द्र** इयाय कल्पम् ॥२६१॥

उत्पन्ने सति केवले स शरदां पञ्चाधिकां विंशतिं
मेदिन्यां भविकान् प्रबोध्य भगवाञ्छ्री**राम**भट्टारकः।
आयुश्च व्यतिलङ्घ्य पञ्चदश चाऽब्दानां सहस्रान् कृती
शैलेशीं प्रतिपद्य शाश्वतसुखानन्दं प्रपेदे पदम् ॥२६२॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
स[7]प्तमे पर्वणि **सीता**शुद्धि-व्रतग्रहणो नाम
दशमः सर्गः[8]समाप्तः ॥

१. ***वेत्थ*** पाता. ॥ २. ***दृष्टेदक्षं*** ला.; दृष्ट उदर्कः-परिणामो यस्य तत् ॥ ३. ***नौ*** रसंपा. ॥ ४. ***इत्युक्त्वा*** खं.१, पाता. ॥ ५. ***०लोकेऽमूनपि०*** पाता. ॥ ६. ***दुःखं विलीयमानानां*** कां. ॥ ७. ***सप्तम०*** खं.१-२, ता. ॥ ८. 'समाप्तः' इति नाऽस्ति ता. खं.१-२ प्रतिषु; 'दशमः सर्गः' इत्यतः परं ***समाप्तं चेदं रामायणम्*** इति खं.१-२, पाता. प्रतिषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥एकादश: सर्ग:॥

## ॥श्रीनमिनाथचरित्रम्॥

[1]नमो **नमि**जिनेन्द्राय सुरेन्द्रमहितांह्रये । कर्मद्रुमगजेन्द्राय धरित्रीकल्पशाखिने ॥१॥
तस्यैव कीर्तयिष्यामश्चरित्रमतिपावनम् । विश्वस्याऽप्युपकाराय परलोकेहलोकयो: ॥२॥
**जम्बूद्वीपे**ऽत्रैव **प्रत्यग्विदेहे भरता**भिधे । विजये सम्पदां कोश: **कौशाम्बी** नामतोऽस्ति पू: ॥३॥
आखण्डल इवाऽखण्डशासनस्तत्र चाऽभवत् । [2]सिद्धार्थीकृतसर्वार्थी **सिद्धार्थो** नाम पार्थिव: ॥४॥
गाम्भीर्यं धैर्यमौदार्यं वीर्यं बुद्धिरथाऽपरे । अन्योऽन्यस्पर्द्धयेवाऽऽसन् सर्वे तस्याऽद्भुता गुणा: ॥५॥
सम्पद् विस्तारमापन्ना तस्याऽत्युन्नतिशालिन: । अभूद् विश्वोपकाराय छाया मार्गतरोरिव ॥६॥
धर्मो मनसि तस्यैको नित्यमत्यन्तनिर्मले । निवासं [3]कारयामास राजहंस इवा[4]ऽम्बुजे ॥७॥
भवाद् विरक्त: सोऽन्येद्युरुत्सृज्य तृणवच्छ्रियम् । **सुदर्शन**मुने: पादमूले दीक्षामुपाददे ॥८॥
आर्जयत् स्थानकै: कैश्चित् तीर्थकृन्नामकर्म स: । सम्यग् व्रतं पालयित्वा मृत्वाऽगा**दपराजिते** ॥९॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् क्षेत्रे चाऽत्रैव **भारते** । नगरी **मिथिले**त्यस्ति [5]धर्माशिथिलनागरा ॥१०॥
प्राकारवलयो रत्न-स्वर्णहर्म्याट्टगर्भित: । तस्यामाभाति [6]सर्वस्वसमुद्गक इवाऽवने: ॥११॥
परितो रत्नखचितास्तस्या[7]मुद्यानदीर्घिका: । तटद्रुम[8]परागेण यान्ति [9]पङ्किलतां यदि ॥१२॥
तस्यां सर्वारिविजयी **विजयो** नाम पार्थिव: । बभूव [10]भूवासवतां दधान: परया श्रिया ॥१३॥
भ्रूभङ्गमप्यकृत्वैवाऽसन्नाह्याऽपि [11]वरूथिनीम् । स लीलया पराजिग्ये [12]परान् यून इव स्मर: ॥१४॥
स सागर इवाऽगाधोऽभिरामश्चन्द्रमा इव । समीरण इवौजस्वी तेजस्वी भानुमानिव ॥१५॥
**वप्रे**ति नामतस्तस्य सर्वान्त:पुरमण्डनम् । [13]मण्डनीभूतशीलाऽभूद् भूरिवाऽ[14]ङ्गवती प्रिया ॥१६॥
गङ्गेव स्वच्छगम्भीरा जगतोऽपि हि पावनी । ज्योत्स्नेव नयनानन्ददायिनी सा व्यराजत ॥१७॥
ये ये [15]सूनृत-शीलाद्या निरीक्ष्यन्ते गुणा: किल । अवदातैरभूत् तैस्तै: स्त्रीणां सैका निदर्शनम् ॥१८॥
¶इतश्च **सिद्धार्थ**जीवो विमाने सो**ऽपराजिते** । स्वमायु: पूरयामास [16]त्रयस्त्रिंशदर्णवोपमम् ॥१९॥
च्युत्वाऽश्वयुक्पूर्णिमाया[17]मश्विकिन्यामवातरत् । **वप्रादेव्या:** स उदरे कृतोद्योतो जगत्त्रये ॥२०॥
तदा च यामिनीशेषे **वप्रादेवी** चतुर्दश । उदैक्षत महास्वप्नांस्तीर्थकृज्जन्मसूचकान् ॥२१॥
पितुर्मनोरथ इव गर्भ: प्रववृधे क्रमात् । अतिलावण्यजननो जनन्या: सुखकृच्च स: ॥२२॥
पूर्णे काले नभ:[18]कृष्णाष्टम्यां भे चाऽ[19]श्विदेवते । नीलोत्पलाङ्कं स्वर्णाभं देवी सूतमसूत सा ॥२३॥
¶अथैत्याऽऽसनकम्पेन चक्रुर्देवी-कुमारयो: । तदैव सूतिकर्माणि विधिवद् दिक्कुमारिका: ॥२४॥
**शक्रो** निन्ये **मेरुमूर्धन्यच्युता**द्याश्च वासवा: । चतु:षष्टिरपि तीर्थाम्भोभिरस्नपयन् प्रभुम् ॥२५॥
स्नपनान्ते जगन्नाथमभ्यर्च्य कुसुमादिभि: । रचितारात्रिक: **शक्र:** इति स्तोतुं प्रचक्रमे ॥२६॥
"[20]व्याहर्ता मोक्षमार्गस्य संहर्ता सर्वकर्मणाम् । प्रहर्ता च कषायाणां जय त्वं परमेश्वर! ॥२७॥
कुमतस्याऽपनेतारं नेतारं जगतामपि । सद्बोधस्य प्रणेतारं त्वां नमामि जगद्गुरो! ॥२८॥

१. ***अर्हं*** ॥ खं.१-२, पाता. ॥ २. ***सिद्धार्थीकृतसिद्धार्थी*** खं.१-२; ***सिद्धार्थीकृतसर्वार्थ*** ता.; असिद्धार्था: सिद्धार्था: कृता: सर्वेऽर्थिनो येन स: ॥ ३. स्वार्थे णिच्-प्रत्यय: सम्भाव्यतेऽत्र ॥ ४. ***इवाऽम्भसि*** खं.२ ॥ ५. धर्मेऽशिथिला:-उद्यता नागरा-नगरजना यस्यां सा ॥ ६. सर्वं स्वं-धनं तस्य समुद्गक:-मञ्जूषा ॥७. उद्यानवाप्य: ॥ ८. परागो मकरन्द: ॥ ९. कर्दममयताम् ॥ १०. भुवि-पृथ्व्यां वासवतां-इन्द्रत्वम् ॥ ११. सेनाम् ॥ १२. शत्रून् ॥ १३. शीलं मण्डनीभूतं यस्या: सा ॥ १४. मूर्तिमती पृथ्वीव ॥ १५. सूनृतं-सत्यम् ॥ १६. ***त्रयस्त्रिंशा०*** मु. रस्वीपा. ॥ १७. अश्विनीनक्षत्रे ॥ १८. श्रावणकृष्णाष्टम्याम् ॥ १९. अश्विनीनक्षत्रे ॥ २०. कथयिता-वक्ता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विश्वैश्वर्यस्याऽधिकर्त्रा[१] न्यक्कर्त्रा[२] विश्वपाप्मनाम् । [३]अविकर्त्रोपकर्त्रा च सनाथं भवता जगत् ॥२९॥

धर्मबीजसमुद्धर्त्रे धर्त्रेऽतिशयसम्पदाम् । श्रुतस्कन्धविधात्रे च भगवन्! भवते नमः ॥३०॥

[४]प्रत्यादेष्टुः कुमार्गाणामादेष्टुर्मुक्तिवर्त्मनः । धर्मः प्रभविता त्वत्त उपदेष्टुरतः परम् ॥३१॥

नव्यतीर्थप्रतिष्ठातुरनुष्ठातुस्तपःश्रियाम् । प्रभो! जगदधिष्ठातुर्भवतः किङ्करा वयम् ॥३२॥

[५]आदातर्यपवर्गस्य विश्वस्याऽभयदातरि । त्वयि त्रैलोक्य[६]शरण! प्रपन्नशरणोऽस्म्यहम् ॥३३॥

अस्मिन् भवे यथाऽभूस्त्वं प्रभुर्मम जगत्पते! । भवान्तरेष्वपि तथा भूया नाऽन्यो मनोरथः" ॥३४॥

इति स्तुत्वा जगन्नाथं पुनरादाय वासवः । मुमोच **वप्रा**स्वामिन्याः पार्श्वे नीत्वा यथास्थिति ॥३५॥

¶राजाऽपि **विजयः** प्रातः सूनोर्जन्ममहोत्सवम् । चकार कारामोक्षादिपूर्वकं परया मुदा ॥३६॥

प्रभौ गर्भस्थिते रुद्धा पुर्यासीन्**मिथिला**ऽरिभिः । अधिप्रासादमारोहद् **वप्रादेवी** च तत्क्षणम् ॥३७॥

**वप्रां** प्रेक्ष्य च तद्गर्भानुभावाद् **विजयं** नृपम् । यन्नेमुर्द्विष इत्यस्य **नमि**रित्यभिधा ददे ॥३८॥

पाल्यमानोऽथ धात्रीभिः शक्रादिष्टाभिरन्वहम् । **नमिनाथः** प्रववृधे निशानाथ इवाऽपरः ॥३९॥

विमुक्तशैशवः स्वामी धनूंषि दश पञ्च च । उच्छ्रिताङ्गः पर्यणैषीत् [७]कन्यां पितृनिदेशतः ॥४०॥

[८]सार्धे वर्षसहस्रे द्वे व्यतिक्रम्य स जन्मतः । दत्तं पित्राऽऽददे राज्यं कर्म भोगफलं विदन् ॥४१॥

पञ्चस्वब्दसहस्रेषु राज्याद् यातेष्वथ प्रभुम् । तीर्थं प्रवर्तयेत्यूचुरेत्य लो[९]कान्तिकामराः ॥४२॥

निवेश्य **सुप्रभं** नाम पुत्रं राज्ये **नमिप्रभुः** । प्रददौ वार्षिकं दानं द्रविणै**र्जृम्भका**हृतैः ॥४३॥

**सुप्रभा**द्यैर्नृपैः **शक्रा**दिभिर्देवैर्वृतः प्रभुः । **देवकुर्वा** शिबिकया **सहस्राम्रवणं** ययौ ॥४४॥

[१०]कदम्बचुम्बनासक्तमधुव्रतकदम्बकम् । [११]मल्लिकाकुसुमोच्चायव्याकुलोद्यान[१२]पालकम् ॥४५॥

[१३]विगलत्पाटलापुष्पपाटलीभूतभूतलम् । [१४]कामुकप्रस्तरीभूतशिरीषकुसुमोत्करम् ॥४६॥

वहमानारघट्टोत्थैः प्रोच्छलच्छीकरोत्करैः । ग्रीष्मेऽपि दर्शिता[१५]ब्दर्तु तद् वनं प्राविशत् प्रभुः ॥४७॥त्रिभिर्विशेषकम्॥

आषाढकृष्णनवम्यामश्विन्यां चरमेऽहनि । समं राज्ञां सहस्रेण षष्ठेन प्राव्रजत् प्रभुः ॥४८॥

तदोत्पन्न**मनोज्ञानो** द्वितीयेऽहनि पारणम् । स क्षैरे[१६]य्या **वीरपुरे** चक्रे **दत्त**नृपौकसि ॥४९॥

चक्रे च विबुधैस्तत्र वसुधारा[१७]दि **दत्तराट्** । पीठं च व्यहृताऽन्यत्र नवमासांस्ततः प्रभुः ॥५०॥

ततः **सहस्राम्रवणं** दीक्षास्थानं तदा ययौ । षष्ठेन **बकुल**स्याऽधस्तस्थौ च प्रतिमाधरः ॥५१॥

मार्गस्य शुक्लैकादश्यामश्विन्यां भे **नमिप्रभोः** । घातिकर्मक्षयादाविरभूत् **केवल**मुज्ज्वलम् ॥५२॥

¶सद्योऽपि देवाः समवसरणं विदधुस्ततः । अशीत्यग्रशतधनुस्तुङ्गाशोकद्रुभूषितम् ॥५३॥

तत्र प्रदक्षिणीकृत्याऽशोकं तीर्थाय चाऽनमत् । न्यषदत् प्राङ्मुखः पूर्वरत्नसिंहासने प्रभुः ॥५४॥

रत्नसिंहासनस्थानि प्रतिबिम्बानि च प्रभोः । विचक्रुर्व्यन्तरसुरा दिक्ष्वन्यास्वपि तत्क्षणम् ॥५५॥

अवतस्थे यथास्थानं श्रीमान् सङ्घश्च[१८]तुर्विधः । भगवन्तं नमस्कृत्य **सौधर्मेन्द्रो**ऽस्[१९]तवीदिति ॥५६॥

"केवलज्ञानसञ्ज्ञेन चक्षुषा वीक्षसेऽखिलम् । जगदेतत् तदेवं ते त्रिनेत्राय नमः प्रभो! ॥५७॥

पञ्चत्रिंशदतिशयवचसे परमेष्ठिने । चतस्त्रिंशदतिशयान्विताय भवते नमः ॥५८॥

मालवकैशिकीमुख्यग्रामरागमनोरमाम् । सर्वभाषानुगां नाथ! तव वाचमुपास्महे ॥५९॥

त्वद्दर्शनात् प्रणश्यन्ति कर्मपाशाः शरीरिणाम् । ताक्ष्र्यावलोकनान्नागपाशा इव दृढा अपि ॥६०॥

त्वद्दर्शनाद् देहभाजोऽधिरोहन्ति शनैः शनैः । निःश्रेणिमिव मोक्षस्य गुणस्थानकमालिकाम् ॥६१॥

---

१. अधिकारिणा ॥ २. तिरस्कर्त्रा सर्वपापानाम् ॥ ३. अविकारिणा ॥ ४. निरसनं कर्तुः ॥ ५. आ-समन्ताद् दातरि ॥ ६. ***त्रैलोक्यशरणे*** मु. रस्वीपा. ॥ ७. ***कन्याः*** रसंपा. ॥ ८. ***सार्धवर्ष०*** मु. रस्वीपा. ॥ ९. ***लौकान्तिका०*** रसंपा. ॥ १०. कदम्बानां चुम्बने आसक्तो मधुव्रतानां-भ्रमराणां कदम्बः-समूहो यत्र तत् ॥ ११. मल्लिकापुष्पाणामवचये व्याकुला उद्यानपाला यत्र तत् ॥ १२. ***०द्यानपालिकाम्*** खं.१, पाता.; ***०द्यानपूर्वकम्*** खं.२ ॥ १३. विगलद्भिः-पतद्भिः पाटलापुष्पैः पाटलीभूतं-रक्तवर्णं भूतलं यत्र तत् ॥ १४. कामुकानां प्रस्तरीभूतः-आसनीभूतः शय्याभूतो वा शिरीषकुसुमानामुत्करो यत्र तत् ॥ १५. दर्शितोऽब्दानां-मेघानां ऋतुर्येन तत् ॥ १६. परमान्नेन ॥ १७. ***वसुधारादिपञ्चकम्*** खं.२ ॥ १८. "भाविनि भूतवदुपचारः" इति रूढिमाश्रित्य वचनमिदं स्यात् ॥ १९. ***०ऽब्रवीदिति*** खं.२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मृतः श्रुतः स्तुतो ध्यातो दृष्टः स्पृष्टो नमस्कृतः । येन तेन प्रकारेण स्वामिन्! भवसि शर्मणे ॥६२॥
स्वामिन्! पुण्यानुबन्धीनि पूर्वपुण्यानि नः खलु । यै[1]स्त्वं दृग्गोचरं नीतोऽसाधारणगतिप्रदः ॥६३॥
यथा तथा ममाऽस्त्वन्यत् स्वर्गराज्यादि सर्वतः । मा जातु हृदयाद् यान्तु नाथ! त्वद्देशनागिरः" ॥६४॥
इति स्वामिगुणस्तोत्रं विधा[2]य विरते हरौ । जगत्त्रयगुरुर्धर्मदेशनामकरोदिमाम् ॥६५॥
¶"असारः खलु संसारः स[3]रिदूर्मिचलं धनम् । विद्युद्विलाससदृशं शरीरमपि नश्वरम् ॥६६॥
अनास्थां सर्वथा तेषु तद् विधाय विचक्षणः । यतेत यतिधर्माय मुमुक्षुर्मोक्षवर्त्मने ॥६७॥
अशक्तस्तद्विधाने चेत् तदाकाङ्क्षी तथाऽपि हि । सम्यक्छ्रावकधर्मायोत्तिष्ठेत द्वादशात्मने ॥६८॥
नयेन्नित्यमहोरात्रं श्रावकस्त्व[4]प्रमद्वरः । धर्म्याभिरिति चेष्टाभिर्मनोवाक्कायजन्मभिः ॥६९॥
ब्राह्मे मूहुर्त्त उत्तिष्ठेत् परमेष्ठिस्तुतिं पठन् । किंधर्मा ? किंकुलश्चाऽस्मि ? किंव्रतोऽस्मीति च स्मरन् ॥७०॥
शुचिः [5]पुष्पामिषस्तोत्रैर्देवमभ्यर्च्य वेश्मनि । प्रत्याख्यानं यथाशक्ति कृत्वा देवगृहं व्रजेत् ॥७१॥
प्रविश्य विधिना तत्र त्रिः प्रदक्षिणयेज्जिनम् । पुष्पादिभिस्तमभ्यर्च्य स्तवनैरुत्तमैः स्तुयात् ॥७२॥
ततो गुरूणामभ्यर्णे प्रतिपत्तिपुरःसरम् । विदधीत विशुद्धात्मा प्रत्याख्यानप्रकाशनम् ॥७३॥
अभ्युत्थानं तदालोकेऽभियानं च तदागमे । शिरस्यञ्जलिसंश्लेषः स्वयमासनढौकनम् ॥७४॥
आसनाभिग्रहो भक्त्या वन्दना पर्युपासनम् । तद्याने‍ऽनुगमश्चेति प्रति[6]पत्तिरियं गुरोः ॥७५॥
ततः प्रतिनिवृत्तः सन् स्थानं गत्वा यथोचितम् । सुधीर्धर्माविरोधेन विदधीताऽर्थचिन्तनम् ॥७६॥
ततो [7]माध्याह्निकीं पूजां कुर्यात् कृत्वाऽथ भोजनम् । तद्विद्भिः सह शास्त्रार्थरहस्यानि विचारयेत् ॥७७॥
ततश्च सन्ध्यासमये कृत्वा देवार्चनं पुनः । कृतावश्यककर्मा च कुर्यात् स्वाध्यायमुत्तमम् ॥७८॥
न्याय्ये काले ततो देव-गुरुस्मृतिपवित्रितः । निद्रामल्पामुपासीत प्रायेणाऽब्रह्मवर्जकः ॥७९॥
निद्राच्छेदे योषिदङ्ग[8]सत्तत्त्वं परिचिन्तयेत् । महात्मनां मुनीनां हि तन्निवृत्तिं परामृशन् ॥८०॥
यकृ-च्छकृन्-मल-श्लेष्म-मज्जा-ऽस्थिपरिपूरिताः । [9]स्नायुस्यूता बही रम्याः स्त्रियश्च[10]र्मप्रसेविकाः ॥८१॥
बहिरन्तर्विपर्यासः स्त्रीशरीरस्य चेद् भवेत् । तस्यैव कामुकः कुर्याद् [11]गृध्र-गोमायुगोपनम् ॥८२॥
स्त्रीशस्त्रेणाऽपि चेत् कामो जगदेतज्जिगीषति । तुच्छपिच्छमयं शस्त्रं किं नाऽऽदत्ते स मूढधीः ? ॥८३॥
[12]सङ्कल्पयोनिनाऽनेन हहा! विश्वं विडम्बितम् । तद् [13]दुःखनामि सङ्कल्पं मूलमस्येति चिन्तयेत् ॥८४॥चतुर्भिः कलापकम्॥
यो यः स्याद् बाधको दोषस्तस्य तस्य प्रतिक्रियाम् । चिन्तयेद् दोषमुक्तेषु प्रमोदं यतिषु व्रजन् ॥८५॥
दुःस्थां भवस्थितिं [14]स्थेम्ना सर्वजीवेषु चिन्तयन् । [15]निसर्गसुखसर्गं तेष्वपवर्गं विमार्गयेत् ॥८६॥
जिनो देवः कृपा धर्मो गुरवो यत्र साधवः । श्रावकत्वाय कस्तस्मै न श्लाघेताऽविमूढधीः ? ॥८७॥
जिनधर्मविनिर्मुक्तो मा भूवं चक्रवर्त्यपि । स्यां चेटोऽपि दरिद्रोऽपि जिनधर्माधिवासितः ॥८८॥
त्यक्तसङ्गो जीर्णवासा मलक्लिन्नकलेवरः । भजन् माधुकरीं वृत्तिं मुनिचर्यां कदाऽऽश्रये ? ॥८९॥
त्यजन् दुःशीलसंसर्गं गुरुपादरजः स्पृशन् । कदाऽहं योगमभ्यस्यन् प्रभवेयं भवच्छिदे ? ॥९०॥
महानिशायां प्रकृते [16]कायोत्सर्गे पुराद् बहिः । स्तम्भवत् स्कन्धकषणं वृषाः कुर्युः कदा मयि ? ॥९१॥
वने पद्मासनासीनं क्रोडस्थितमृगार्भकम् । कदा घ्रास्यन्ति वक्त्रे मां जरन्तो मृगयूथपाः ? ॥९२॥
शत्रौ मित्रे तृणे स्त्रैणे स्वर्णेऽश्मनि मणौ मृदि । मोक्षे भवे भविष्यामि निर्विशेषमतिः कदा ? ॥९३॥
अधिरोढुं गुणश्रेणीं [17]निःश्रेणीं मुक्तिवेश्मनः । परानन्दलताकन्दान् कुर्यादिति मनोरथान् ॥९४॥सप्तभिः कुलकम्॥
इत्यहोरात्रिकीं चर्यामप्रमत्तः समाचरन् । यथावदुक्तवृत्तस्थो गृहस्थोऽपि विशुध्यति" ॥९५॥
श्रुत्वेमां देशनां भर्तुर्बहवः प्राव्रजज्जनाः । कुम्भादयो गणधरास्तत्र सप्तदशाऽभवन् ॥९६॥

१. ***यस्त्वं*** मु. ॥ २. ***विधीय*** मु. ॥ ३. ***चलदूर्मिचलं*** मु. ॥ ४. अप्रमादी ॥ ५. पुष्प-नैवेद्य-स्तवनैः ॥ ६. भक्तिः ॥ ७. ***मध्या०*** खं.१-२, पाता. मु. ॥ ८. योषित्-नारी तदङ्गस्य सत्तत्त्वं-याथार्थ्यम् ॥ ९. ***स्नायुः स्यूता*** खं.१, पाता. ॥ १०. चर्मभस्त्राः ॥ ११. गृध्र-शृगालेभ्यो रक्षा ॥ १२. सङ्कल्प एव योनिः-उत्पत्तिस्थानं यस्य कामस्य तेन ॥ १३. दुर् उपसर्गः खन् धातुः; कष्टेन-कष्टं वा खनामि-खननं करोमि ॥ १४. स्थैर्येण ॥ १५. निसर्गतः सुखं-तस्य सर्गो(सर्जनं) यस्मिन तम् ॥ १६. ***प्रकृतकायो०*** मु. रस्वीपा. ॥ १७. ***०श्रेणिं निःश्रेणिं*** खं.१, पाता. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशनान्ते जगद्भर्तुः **कुम्भो** व्यधित देशनाम् । तद्देशनान्ते नत्वेशं शक्राद्याः स्वं पदं ययुः ॥९७॥
¶तत्तीर्थजन्मा **भृकुटि**र्यक्षस्त्र्यक्षश्चतुर्मुखः । स्वर्णवर्णो वृषरथश्चतुर्भिर्दक्षिणैः भुजैः ॥९८॥
धृतमातुलिङ्ग-शक्ति-मुद्गरा-ऽभयदैर्युतः । वामैः पुनर्नकुलक-पर्शु-वज्रा-ऽक्षसूत्रिभिः ॥९९॥युग्मम्॥
तथैव देवी **गान्धारी** श्वेताङ्गी हंसवाहना । दोर्भ्यां वरद-खड्गिभ्यां दक्षिणाभ्यां विराजिता ॥१००॥
वामाभ्यां [1]बीजपूरिभ्यां बाहुभ्यामुपशोभिता । अभूतामित्युभे भर्तु**र्नमेः** शासनदेवते ॥१०१॥
¶ताभ्याममुक्तसान्निध्यो विजहार वसुन्धराम् । सार्धे वर्षसहस्रे द्वे नवमासोनिते विभुः ॥१०२॥
प्रभोरभूवन् साधूनां सहस्राण्यथ विं[2]शतिः । व्रतिनीनां पुनरे[3]कचत्वारिंशत्सहस्र्यपि ॥१०३॥
चतुर्दशपूर्वभृतां सार्धं [4]शतचतुष्टयम् । अवधिज्ञानभाजां तु सहस्रं [5]षट् शताधिकम् ॥१०४॥
[6]षष्ट्यग्रा द्वादशशती मनःपर्ययशालिनाम् । [7]शतानि षोडश पुनः केवलज्ञानधारिणाम् ॥१०५॥
जातवैक्रियलब्धीनां [8]सहस्राः पञ्च सङ्ख्यया । तथा [9]सहस्रमेकं तु वादलब्ध्युपशोभिनाम् ॥१०६॥
श्रावकाणां [10]लक्षमेकं सहस्राणि च सप्ततिः । श्राविकाणां [11]त्रिलक्ष्यष्टचत्वारिंशत्सहस्रयुक् ॥१०७॥
मोक्षकालमथ ज्ञात्वा **सम्मेताद्रि**मगात् [12]प्रभुः । समं मुनिसहस्रेणाऽनशनं प्रत्यपादि च ॥१०८॥
मासान्ते वैशाखकृष्णदशम्यामश्विनी[13]युजि । समं तैर्मुनिभिः स्वामी प्रपेदे पदमव्ययम् ॥१०९॥
कौमारेऽब्दानां [14]सहस्रौ सार्धौ राज्ये तु [15]पञ्च ते । व्रते [16]सार्धौ सहस्रौ चेत्य[17]युतायु**र्नमिप्रभुः** ॥११०॥
**मुनिसुव्रत**निर्वाणान्निर्वाणं **श्रीनमिप्रभोः** । वर्षाणां षट्सु लक्षेषु व्यतिक्रान्तेष्वजायत ॥१११॥

निर्वाणकल्याणमुपेत्य तत्र
गीर्वाणनाथास्त्रिदशैः समेताः ।
शरीरसंस्कारपुरःसरं **श्री-**
**नमे**रकार्षुः सपरिच्छदस्य ॥११२॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
[18]सप्तमे पर्वणि **नमिनाथ**चरितवर्णनो
नामैकाद[19]शः सर्गः ॥

१. बीजपूरधारिभ्याम् ॥ २. २०००० साधवः ॥ ३. ४१००० साध्व्यः ॥ ४. ४५० चतुर्दशपूर्विणः ॥ ५. १६०० अवधिज्ञानिनः ॥ ६. १२६० मनःपर्यवज्ञानिनः ॥ ७. १६०० केवलज्ञानिनः ॥ ८. ५००० वैक्रियलब्धिधराः ॥ ९. १००० वादिमुनयः ॥ १०. १,७०,००० श्रावकाः ॥ ११. ३,४८,००० श्राविकाः ॥ १२. *विभुः* ता. ॥ १३. अश्विनीनक्षत्रे ॥ १४. २५०० वर्षाणि ॥ १५. ५००० वर्षाणि ॥ १६. २५०० वर्षाणि ॥ १७. १०,००० वर्षाणि ॥ १८. ***सप्तम०*** खं.१-२, ता. ॥ १९. ***नामैकादशमः*** पाता. ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

# ॥द्वादशः सर्गः॥

## ॥श्रीहरिषेणचक्रिचरितम्॥

इतश्च विहरत्येव **नमिनाम्नि** जिनेश्वरे । **हरिषेणो**ऽभवच्चक्री चरितं तस्य कीर्त्यते ॥१॥
इहैव **भरते**ऽनन्त**तीर्थे नरपुरे** पुरे । **नराभिरामो** नृपतिरभिरामो [१]नरेष्वभूत् ॥२॥
क्रमेण च भवोद्विग्नः [२]परिव्रज्यां प्रपद्य सः । **सनत्कुमारकल्पे**ऽभूदमरः परमर्द्धिकः ॥३॥
¶इतश्च **पञ्चाल**[३]देशाकल्पः [४]स्वःकल्पमृद्धिभिः । परैरकम्प्यं **काम्पील्य**मित्यस्ति प्रवरं पुरम् ॥४॥
तस्मिन् **महाहरि**र्नाम राजा हरिरिवौजसा । **इक्ष्वाकुवंश**तिलको बभूव भुवि विश्रुतः ॥५॥
तस्याऽभून्महिषी नाम्ना **मेरा** स्मेराम्बुजानना । शीलालङ्करणा रूपेणाऽलङ्कृतमहीतला ॥६॥
**नराभिराम**जीवोऽपि तस्याः कुक्षाववातरत् । चतुर्दशमहास्वप्नाख्यातश्चक्रधरर्द्धिकः ॥७॥
सा कालेऽसूत हेमाभं **हरिषेणा**भिधं सुतम् । पञ्चदशधनूच्छ्रायो युवराज्येऽभ्यषेचि सः ॥८॥
पैतृकं शासतस्तस्य राज्यं प्राज्यभुजौजसः । अन्येद्युरस्त्रशालायां चक्ररत्नमजायत ॥९॥
पुरोधो-वर्धकि-गृहि-सेनानीप्रभृतीन्यपि । तस्य त्रयोदशाऽन्यानि क्रमाद् रत्नानि जज्ञिरे ॥१०॥
¶चक्रमार्गानुगः प्राच्यां गत्वा तीर्थे स **मागधे** । **मागधतीर्थकुमारं** दिग्जयादावसाधयत् ॥११॥
दक्षिणस्यामथोपेत्य दक्षिणाम्भोधिवर्तिनम् । **वरदामपतिं** देवं [५]वशीचक्रे महाभुजः ॥१२॥
उपेत्य दिशि [६]वारुण्यां **प्रभासाधिपतिं** सुरम् । सोऽसाधयदखण्डौजा बिडौजा इव भूस्थितः ॥१३॥
महानदीमेत्य **सिन्धुं** [७]दिक्सिन्धुरपराक्रमः । क्रमाद् वशंवदीचक्रे चक्रभृद् दशमोऽथ सः ॥१४॥
ततोऽभिसृत्य **वैताढ्यं वैताढ्याद्रिकुमारक**म् । विधिना साधयामास स दिक्साधनपण्डितः ॥१५॥
**कृतमालामरं** चाऽथ कृती स्वयमसाधयत् । पश्चाच्च सेनापतिना पश्चिमं **सिन्धुनिष्कुट**म्॥१६॥
[८]वामान्यकुम्भविन्यस्त**मणिरत्ने**न कुम्भिना । सेनान्युद्घाटितद्वारां **तमिस्रां** प्रविवेश सः ॥१७॥
**काकिणीरत्न**लिखितमण्डलोद्योतितान्तराम् । पद्ययोत्तीर्य चो**न्मग्ना-निमग्ने** तामलङ्घयत् ॥१८॥
स्वयमुद्घाटितोदीच्यद्वारा तस्य विनिर्ययौ । **आपात**सञ्ज्ञान् म्लेच्छांस्तान् स्वच्छन्दानजयच्च सः ॥१९॥
[९]अजापयच्च सेनान्या **सिन्धोः पश्चिमनिष्कुट**म् । गत्वा च **क्षुद्रहिमवत्कुमार**मजयत् स्वयम् ॥२०॥
[१०]**काकिण्या ऋषभकूटे** स्वनामाऽऽलिख्य सञ्चलन् । [११]**गङ्गा**मसाधयद् **गाङ्गं** सेनान्या **पूर्वनिष्कुट**म् ॥२१॥
विद्याधरैर्दत्तदण्ड उभयश्रेणिवर्तिभिः । स्वयं च [१२]साधयामास **नाट्यमाल**[१३]मथाऽमरम् ॥२२॥
**सेनान्योद्घाटितां खण्डप्रपातां** [१४]चाऽऽविशद् गुहाम् । चक्रानुगश्चक्रवर्ती निर्जगाम च पूर्ववत् ॥२३॥
सेनान्या साधयामास **गाङ्गं प्राचीननिष्कुट**म् । स्वयमावासयामास **गङ्गा**यां वसुधाधिपः ॥२४॥
नवाऽपि निधयो **गङ्गामुखमागध**वासिनः । सिध्यन्ति स्म स्वयं तस्योत्कृष्टपुण्यानुभावतः ॥२५॥
¶सम्पूर्णचक्रवर्तिश्रीर्जितषट्खण्ड**भारतः** । अथाऽऽजगाम **काम्पील्यपुरं** स श्रीपुरन्दरः ॥२६॥
तस्य चक्रित्वाभिषेकश्चक्रे देवैर्नरैरपि । महोत्सवः पुरे चाऽऽसीद् यावद् द्वादश वत्सरान् ॥२७॥
भूपालैः पाल्यमानाज्ञो **भरते** सकलेऽपि [१५]हि । धर्माविबाधया **भोगान्** बुभुजे स महाभुजः ॥२८॥
भवाद् विरक्तः सोऽन्येद्यू राज्यमुत्सृज्य लीलया । उपादत्त परिव्रज्यां [१६]शिवव्रज्योत्सवोत्सुकः ॥२९॥

१. ***नरेष्वपि*** पाता. ॥ २. ***परिव्रज्य विपद्य सः*** ता. ॥ ३. पञ्चालदेशभूषणम् ॥ ४. स्वर्गतुल्यम् ॥ ५. ***वशीचक्रे स चक्रभृत्*** रसंपा. ॥ ६. पश्चिमायाम् ॥ ७. दिग्गजसमविक्रमः ॥ ८. वामान्यः-दक्षिणः ॥ ९. ***अज्ञापयच्च*** मु. ॥ १०. ***काकण्या*** खं.१-२, पाता. ॥ ११. ***जगाम साधय०*** मु. ॥ १२. ***चासाधयामास*** खं.१-२, पाता. मु. ॥ १३. ***०मथापरम्*** मु.; ***०मथावरम्*** पाता. ॥ १४. ***प्राविशद्*** मु. ॥ १५. ***हि*** ता. मु. ॥ १६. मोक्षगमनोत्सुकः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हरिषेण**स्य कौमारे [1]सपादाब्दशतत्रयी । मण्डलित्वेऽपि [2]सैवाऽथ सार्धमब्दशतं[3] जये ॥३०॥
चक्रभृत्त्वे पुनरष्टौ[4] सहस्राणि शताष्टकम् । पञ्चाशच्च व्रतकाले पुनः सार्धं[5] शतत्रयम् ॥३१॥

वर्षा[6]युतायुः परिपाल्य सम्यक्
तीव्रं व्रतं घातितघातिकर्मा ।
उत्केवलज्ञान इयाय नित्य-
सुखं पदं त**द्धरिषेणचक्री** ॥३२॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
सप्तमे[7] पर्वणि **हरिषेण**चक्रवर्तिचरितवर्णनो
नाम द्वादशः[8] सर्गः[9] समाप्तः ॥

१. ३२५ वर्षाणि ॥ २. ३२५ ॥ ३. १५० वर्षाणि ॥ ४. ८८५० वर्षाणि ॥ ५. ३५० वर्षाणि ॥ ६. १०,००० वर्षाणि ॥ ७. ***सप्तम०*** खं.१-२ ॥ ८. ***द्वादशमः*** पाता. ॥ ९. ता.प्रतौ न ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥त्रयोदशः सर्गः॥

### ॥जयचक्रिचरितम्॥

**नमे**र्भगवतस्तीर्थे समुत्पन्नस्य चक्रिणः। **जय**स्य जयिनः पुण्यं चरित्रमिदमुच्यते ॥१॥
अस्यैव **जम्बूद्वीपस्यैरवते श्रीपुरे** पुरे। वसुन्धरापतिरभूत् ख्यातो नाम्ना **वसुन्धरः** ॥२॥
स प्रेयस्याः **पद्मवत्या**[1] मृत्युनोद्विग्नमानसः। राज्ये निवेशयामास तनयं **विनयन्धरम्** ॥३॥
**मनोहर**वने पार्श्वे **वरधर्म**महामुनेः। तत्त्वं श्रुत्वा प्रतिबुद्धः परिव्रज्यामुपाददे ॥४॥
चिरकालं परिव्रज्यां स यथावदपालयत्। विपद्य सप्तमे कल्पे देव[2]भूयमियाय च ॥५॥
¶इतश्चाऽस्ति **राजगृहं** पुरं **मगधमण्डनम्**। श्रियामेकं कुलगृहं स्वःपुर्या इव सोदरम् ॥६॥
**इक्ष्वाकुवंश**प्रभवः प्रभवो न्यायवर्त्मनः। विजयी **विजयो** नाम तत्राऽभूत् पृथिवीपतिः ॥७॥
**वप्रा**भिधाना तस्याऽभून्महिषी शीलशालिनी। भूगता काऽपि देवीव रूप-लावण्यसम्पदा ॥८॥
काले गच्छति तस्याश्च कुक्षाववततार सः। **वसुन्धर**महीपालजीवः **शुक्रा**त् परिच्युतः ॥९॥
जज्ञे तस्यां **जयो** नाम धनुर्द्वादशकोन्नतिः। सूनुश्चतुर्दशस्वप्नसूचितः काञ्चनच्छविः ॥१०॥
पित्रा राज्येऽभिषिक्तश्च तस्याऽऽयुधगृहेऽन्यदा। **चक्ररत्नं** समुत्पेदे प्रथमं चक्रिलक्षणम् ॥११॥
तथा **च्छत्रं मणिर्दण्डो निस्त्रिंशश्चर्म काकिणी**। जज्ञिरे तस्य सप्तैवं रत्नान्येकेन्द्रियाणि तु ॥१२॥
**पुरोधो-गृहि-हस्त्य-श्व-सेनानी-वर्धकि-स्त्रियः**। पञ्चेन्द्रियाणि सप्तैवं तस्य रत्नानि जज्ञिरे ॥१३॥
¶दिग्यात्रार्थं सोऽनुचक्रं पूर्वं पूर्वाब्धिमभ्यगात्। **मागधतीर्थकुमारं** तत्र चक्रे वशंवदम् ॥१४॥
ततो निवृत्य याम्याब्धौ **वरदामपतिं** सुरम्। सोऽसाधयन्न देवोऽपि भुव्यलं चक्रवर्तिनः ॥१५॥
गत्वा च पश्चिमाम्भोधौ **प्रभासाधीश्वरं** सुरम्। क्षिप्तेनैकेन बाणेन वशीचक्रे स लीलया ॥१६॥
ततश्चाऽसाधयत् **सिन्धुं** सिन्धुराज इवाऽपरः। **वैताढ्याद्रिकुमारं** च सुरं सुरवरोपमः ॥१७॥
सोऽथ स्वयं वशीचक्रे **कृतमाला**भिधं सुरम्। सेनान्या तु महानद्याः **सिन्धोः पश्चिमनिष्कुटम्** ॥१८॥
यथाविधि **तमिस्रां** स प्रविश्य च निरीय च। **आपात**नाम्नः किरातान् निर्जिगाय महाभुजः ॥१९॥
**पश्चिमं निष्कुटं सिन्धोः** सेनान्या स विजित्य च। वशीचकार **हिमवत्कुमारं** देवविक्रमः ॥२०॥
**काकिण्या ऋषभकूटे** स लिखित्वाऽऽत्मनोऽभिधाम्। सेनान्या **निष्कुटं गाङ्गं प्राचीनं** चलितोऽजयत् ॥२१॥
साधयित्वा स्वयं **गङ्गां** जित्वा विद्याधरेश्वरान्। **खण्डप्रपाता**द्वारस्थं **नाट्यमाल**मसाधयत् ॥२२॥
**खण्डप्रपाता**गुहया **वैताढ्या**न्निर्जगाम स[3]ः। से[4]नान्या साधयित्वा च **गाङ्गं प्राचीननिष्कुटम्** ॥२३॥
आवासितस्य **गङ्गा**यां तेऽथ **गङ्गामुख**स्थिताः। नवाऽपि निधयस्तस्य **नैसर्पा**द्याः वशेऽभवन् ॥२४॥
¶सोऽथ सम्पूर्णचक्रिश्रीराजगाम निजं पुरम्। चक्रे चक्रित्वाभिषेकश्चाऽस्य देवैर्नृपैरपि ॥२५॥
षट्खण्डां बुभुजे पृथ्वीमखण्डितपराक्रमः। क्रमेण च परिव्रज्यां भवोद्विग्नः स आददे ॥२६॥
एवं **जयस्य** कौमारे वत्सराणां [5]शतत्रयम्। तदेव[6] मण्डलित्वेऽब्द[7]शतं तु ककुभां जये ॥२७॥
[8]एकोनविंशतिशती वर्षाणां चक्रिसम्पदि। व्रतकाले तु च[9]त्वारि संवत्सरशतान्यगुः ॥२८॥

---

१. ***पद्मावत्याः*** खं.२, पाता. ॥ २. देवत्वम् ॥ ३. **च** ता. ॥ ४. ***सेनान्याऽसाधयच्चाऽऽशु*** ता. विना ॥ ५. ३०० वर्षाणि ॥ ६. ३०० ॥ ७. १०० वर्षाणि दिग्विजये ॥ ८. १९०० वर्षाणि ॥ ९. ४०० वर्षाणि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]समासहस्रत्रयमायुरात्मन:
स पूरयित्वा परिपाल्य च व्रतम् ।
घातिक्षयाविष्कृतकेवलो ययौ
कैवल्यमक्षीणसुखास्पदं जय: ॥२९॥

इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाका**पुरुषचरिते महाकाव्ये
[२]सप्तमे पर्वणि **जय**चक्रवर्तिचरितवर्णनो
नाम त्रयोदश: सर्ग: ॥

॥ समाप्तं चेदं सप्तमं पर्व ॥

**राम-लक्ष्मण-दशानना नमि-**
स्तीर्थकृच्च **हरिषेण**चक्रभृत् ।
चक्रभृच्च **जय** इत्यमुत्र षड्
वर्णिता: श्रुतिसुखाय सन्तु व: ॥१॥[३]

१. आयु: ३००० वर्षाणि ॥ २. ***सप्तम०*** खं.१-२ ॥ ३. ***ग्रन्थाग्रं ३८८८*** खं.२; ***ग्रन्थाग्रं ३८८०*** पाता. ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥प्रथमं परिशिष्टम्॥

## ॥श्लोकानामकारादिक्रमेणाऽनुक्रमः॥

### ॥ पञ्चमं पर्व ॥


| श्लोकः | सर्गः | क्रमाङ्कः | श्लोकः | सर्गः | क्रमाङ्कः | श्लोकः | सर्गः | क्रमाङ्कः |
|---|---|---|---|---|---|---|---|---|
| **अ** | | | | | | | | |
| अकामया निर्जरया | १ | ४३० | अथाऽपराजितो माया० | २ | १५५ | अनिवृत्तधनाशौ तौ | ४ | ८३ |
| अकार्षं वार्षिकीमत्र | २ | ३०४ | अथाऽपरेद्युर्विहरन् | ४ | ३३८ | अनुतिष्ठाऽऽत्मनो वाच० | २ | १७७ |
| अकुलीनस्ततो मन्ये | १ | ५९ | अथाऽपसार्य नीरङ्गीं | ५ | ५२३ | अनुरूपो वरोऽमुष्या० | ४ | १२२ |
| अखण्डद्वादशविध० | २ | ३३७ | अथाऽभिनन्दनमुनि० | १ | १६० | अनेकचिन्तासन्तान० | १ | ४४८ |
| अखण्डपञ्चसमितिं | २ | २५८ | अथाऽर्ककीर्तितनयो | १ | २९२ | अनेकदुःखसन्तान० | ५ | ३२० |
| अखण्डभण्डलोद्योती० | ५ | ३३ | अथाऽर्हतः पञ्चधात्री० | ५ | ९९ | अनेन हि शरीरेण | ४ | २८० |
| अखाद्यमपि खादन्ति | ५ | ३३३ | अथाऽऽवयोऽ समभव० | ३ | ९७ | अन्तःपुरस्त्रीमुखानां | ३ | ५८ |
| अङ्कस्थकल्पलतिका० | १ | १०८ | अथाविश्वक्रतुः स्वं स्वं | २ | १७८ | अन्ते चाऽनशनं चक्रे | ४ | २४६ |
| अङ्गसङ्कोचहल्लास० | २ | १३८ | अथाऽशनिमिवोद्याम्या० | १ | ३४० | अन्तेऽप्यात्ता परिव्रज्या | १ | ४८५ |
| अचिरादप्यपश्याव | १ | २७७ | अथाऽस्य जम्बूद्वीपस्य | ४ | १ | अन्ते साऽनशनं कृत्वा | १ | ११८ |
| अच्युतेन्द्रादयो यं च | ५ | १४१ | अथाऽस्य जम्बूद्वीपस्य | ४ | ९९ | अन्यच्च जम्बूद्वीपेऽस्मिन् | ४ | २९९ |
| अज्ञात्वा भगिनीमेतां | १ | ९६ | अथाऽस्य जम्बूद्वीपस्य | ५ | १ | अन्यदा चाऽमिततेजा० | १ | १७० |
| अञ्जलिभिः शृङ्गिकाभि० | ३ | ५९ | अथेत्थं घोषयामास | ५ | ९५ | अन्यदा तूपवासान्ते | २ | ३३८ |
| अतः परं क्षणोऽप्येको | १ | ४३६ | अथेन्द्रप्रमुखैर्देवै० | ५ | २७६ | अन्यदा देवरमण० | ४ | १९३ |
| अतः परमपि स्वामिन्! | ४ | १२७ | अथैकदा घनरथो | ४ | १८९ | अन्यदा नन्दनवने | १ | ४७२ |
| अतिथीनामिव सदा | १ | ४१० | अथैकदा पुत्र-पौत्र० | ३ | १९ | अन्यदाऽन्यत्र विजये | २ | ३०१ |
| अतो भवात् त्वं नवमे | १ | ४२० | अदानाभोग्यते चैषां | ५ | ३८५ | अन्यदा प्रावृषि निशि | १ | ५२ |
| अत्यन्तमार्दवान्मृत्वा | १ | ९१ | अदान्तैरिन्द्रियहयै० | ५ | ३२४ | अन्यदा रथनूपुर० | १ | १५७ |
| अत्राऽन्तरे च पृथिवी० | ४ | १२७ | अदोऽनुकूलं शकुन० | ५ | ४१२ | अन्यदाऽर्थोपार्जनार्थं | ५ | ३८९ |
| अत्राऽन्तरे तस्य पुरः | ४ | १९५ | अदोऽर्धपुष्करद्वीपं | ४ | १८६ | अन्यदा विहरंस्तत्र | ४ | २४३ |
| अत्राऽन्तरे पुनर्दूतो | २ | ९९ | अद्य यावत् तमद्राक्षं | ५ | ५२० | अन्यदा श्रीनदीतीर्थे | ४ | ९३ |
| अत्राऽन्तरे ब्राह्मणेन | ५ | ४८४ | अद्य सूरनिपाताख्य० | ३ | ४८ | अन्यदा सत्ययशसं | २ | २८८ |
| अत्राऽन्तरे रत्नमयं | २ | ३५४ | अद्याऽपराजिताऽनन्त० | २ | ११० | अन्यदा समवासार्षीत् | ३ | १९३ |
| अत्रापतद्द्वयामावाभ्या० | १ | २७२ | अद्यैव तातपादान्ते | ४ | ३४९ | अन्यदा सागरदत्तं | ४ | २९२ |
| अत्रोर्ध्वं गच्छतश्चाऽस्य | ४ | २२४ | अद्यैव दृष्टमस्माभिः | २ | ७५ | अन्यदा सोऽष्टमीचन्द्रो० | ५ | ४०४ |
| अथ क्षेमङ्करो लोका० | ३ | ७५ | अद्रयोऽमी च वैताढ्या | ४ | १८१ | अन्येद्युरभयघोषः | ४ | १३३ |
| अथ गङ्गातटे गत्वा | ५ | २४२ | अधिवापि जलक्रीडा | ५ | २८४ | अन्येद्युरमिततेजा० | १ | ४५३ |
| अथ ज्ञात्वाऽवधिज्ञाना० | ३ | १०४ | अधिष्ठितं देवतया | २ | ३५५ | अन्येद्युरमिततेजाः | १ | ४६४ |
| अथ तं कुञ्जरीभूया० | ३ | २०८ | अधिसेहे स हेमन्ते | १ | ४०४ | अन्येद्युश्च फलार्थं द्वा० | ४ | २३३ |
| अथ तावूचतुर्मोहा० | १ | १२९ | अधुना प्रविशामः किं | ५ | २०१ | अन्येद्युश्चाऽऽययौ तत्र | २ | ३७ |
| अथ तौ चारणमुनी | १ | ४८४ | अधोलोकादथाऽष्टेयु० | ५ | ५३ | अन्येद्युः केनचिद् विद्या० | २ | ५३ |
| अथ द्वादशमासान्ते | ५ | २९१ | अनन्तवीर्य इत्याख्यां | २ | ३० | अन्योन्यं चिच्छिदुः शस्त्रा० | ४ | ५२ |
| अथ द्वावपि गर्जन्तौ | १ | ३४४ | अनन्तवीर्यजीवोऽपि | २ | ४०२ | अन्योन्यस्याऽपि जिह्मीमः | ५ | २०० |
| अथ नाटकशिक्षायै | २ | १४७ | अनन्तवीर्यजीवोऽपि | २ | ४०६ | अन्यो वा पृष्ठतः कोऽपि | २ | १९७ |
| अथ नैमित्तिको हृष्टः | १ | २२२ | अनन्तवीर्यजीवोऽपि | ३ | १३ | अन्वर्ककीर्ति समभूत् | १ | १३७ |
| अथ पित्रा कृते स्नाने | १ | ६३ | अनन्तवीर्यपुत्रं तं | २ | ३२१ | अपनिद्रा ततो देवी | ५ | १०१ |
| अथ प्रियमतिसूनोः | ४ | १२ | अनन्तवीर्योऽपीत्यूचे | २ | ३३२ | अपरस्याऽपि कस्याऽपि | ४ | ७० |
| अथ मेघरथोऽशंस० | ४ | २०७ | अनन्तवीर्योऽप्यशिषन् | २ | ५२ | अपरं च तवाऽपीदं | ४ | २६० |
| अथवैतानुपेक्ष्याऽलं | ५ | १७९ | अनन्तवीर्योऽप्युद्राहुः | २ | १९९ | अपराजितजीवः सो० | ३ | ५ |
| अथ व्याकरणादीनि | १ | २१ | अनन्तवीर्यो व्याहार्षीत् | २ | १९३ | अपराजितपादानां | २ | १८२ |
| अथ श्रीविजयः क्रुद्धः | १ | ३४६ | अनपत्यस्य तस्याऽथ | १ | २०३ | अपरेणाऽपि भोज्येन | ४ | २६५ |
| अथ श्रीविजयो राजा | १ | २४० | अनभीष्टं करोत्येष | ५ | ५१३ | अपरेद्युर्भ्रमन्ती सा | २ | २५६ |
| अथ सञ्चिन्तयामास | ५ | १३५ | अनर्थपरिहाराय | १ | २२३ | अपरेद्युर्मेघरथः | ४ | २५४ |
| अथ सूरनिपाताख्ये | ३ | १८९ | अनासीनोऽशयानश्च | ५ | २९० | अपरेद्युर्वसन्तर्तौ | ४ | १२४ |
| अथाख्यद् भगवान् सत्य० | १ | ३९४ | अनिजितेन्द्रियग्रामो | ५ | ३४६ | अपरेद्युर्विमानस्थं | १ | ४१४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| श्लोकः | सर्गः | क्रमाङ्कः | श्लोकः | सर्गः | क्रमाङ्कः | श्लोकः | सर्गः | क्रमाङ्कः |
|---|---|---|---|---|---|---|---|---|
| अपरेद्युस्ततः स्थाना० | १ | १०१ | अलमालापविघ्नेन | ५ | ५२५ | आख्याते च तया स्वप्ने | २ | ३६३ |
| अपरेऽपि दमितारे० | २ | २०१ | अलिदष्टा मर्कटीव | ५ | ५१९ | आगच्छतः प्रतापोष्ण० | १ | ३५३ |
| अपवादो न दातव्यो | २ | २०३ | अर्हतोऽर्हज्जनन्याश्च | ५ | ९६ | आगत्य चमरस्तत्र | २ | ४०१ |
| अपानघण्टैर्भस्माङ्गैः | २ | १२६ | अवञ्चयेतां तौ विश्वं | ४ | ९० | आचरिष्यामि सुकृतं | १ | ७३ |
| अप्यावां प्रव्रजिष्यावः | ४ | १४७ | अवदद् दमितारिस्तं | २ | २३७ | आचख्यौ कपिलस्तस्मै | १ | ३८ |
| अभयं याचमानं तं | ४ | २५६ | अशक्यो विषयोऽस्प्रष्टु० | ५ | ३४८ | आजन्मज्ञानवृद्धोऽपि | ५ | १०६ |
| अभिमन्त्र्य तयोरेकः | १ | २६७ | अशाम्यन्नशिवान्यस्मिन् | ५ | १०४ | आत्मानुरूपे तनये | ५ | २७५ |
| अभिषेकोत्सवश्चाऽभू० | ५ | २५५ | अशूकलान् शूकलांश्च | २ | ३९ | आत्माभेदेन मामद्य | ४ | ३४८ |
| अभीष्टेभ्यः प्रदास्येऽहं० | ५ | ३८६ | अशेषं तं च वृत्तान्त० | १ | ३६८ | आदत्स्व वत्स! भूभारं | ४ | ३४५ |
| अभीष्टोऽस्म्यहमेतस्या० | ५ | ४१९ | अश्रद्दधानस्तां वाचं | ३ | २१ | आददाते परिव्रज्यां | ४ | २४४ |
| अभूतां पुंस्त्रियौ तत्र | १ | ९२ | अश्वघोषः शतघोषः | १ | ३२३ | आदाय कोऽप्यरेर्मौलिं | १ | ३३४ |
| अभूतां वणिजौ तत्र | ४ | ९२ | अष्टैयुः पूर्वरुचकाद् | ५ | ५७ | आदाय दात्र-परशू | १ | ४०८ |
| अभूदनिलवेगेति | २ | २९४ | अष्टोर्ध्वलोकादेयुर्दि० | ५ | ५६ | आदाय विविधं भाण्डं | ४ | २९४ |
| अभ्यधुर्भूभुजोऽप्येव० | २ | ३९१ | असावनन्तवीर्योऽहं० | २ | २०२ | आदित्सेयं करेणेन्दौ | २ | १७१ |
| अभ्यस्यतः स्म शस्त्राणि | २ | ३५ | असुराश्चमरस्येव | २ | ११२ | आ देवेन्द्रादा च कीटाद् | ५ | ३३८ |
| अभ्याजगाम निहतं० | ४ | ५७ | असौ वसन्तदेवोऽस्मि | ५ | ४९८ | आनन्दरभसोद्भ्रान्तो | ५ | १०२ |
| अभ्युत्तस्थौ दूरतस्तं | १ | १७३ | अस्खल्यमानप्रसरैः | ४ | ४७ | आनर्च च ववन्दे च | १ | ४११ |
| अभ्युत्थायाऽमिततेजाः | १ | ४६९ | अस्तुङ्कारस्तद्वचसः | ३ | ४९ | आपतत्यपि तत्रेभे | ५ | ४६८ |
| अभ्रंलिहाग्रशिखरः | ५ | २२४ | अस्त्यस्य जम्बूद्वीपस्य | ३ | ९१ | आपदं मरणान्तां तां | २ | ३७८ |
| अभ्रंलिहाभिः कीलाभि० | ५ | ४१ | अस्त्रागारे चक्ररत्न० | ३ | ८० | आप्लाव्यमानं सलिले० | ५ | २१५ |
| अभ्रंलिहोऽस्ति मेदिन्याः | १ | ९८ | अस्त्रैरस्त्राण्यखण्डयन्ता० | ४ | ४६ | आभोगिन्या ततो ज्ञात्वा | ३ | १०२ |
| अमरैर्बद्धमुकुटै० | ५ | २५४ | अस्त्रैः शस्त्रैर्मायया च | १ | ३३८ | आमेत्युक्तवति श्येने | ४ | २७५ |
| अमरौ रतिसागरावगाढा० | १ | ४९३ | अस्मत्सीमानमुत्सृज्य | ४ | ३२ | आमेत्युक्ते जम्बुकाया० | १ | ४८ |
| अमी किं पन्नव इवा० | ५ | १७७ | अस्मादह्नः सप्तमेऽह्नि | १ | १८२ | आमोदमेदुरस्मेर० | ५ | ३६ |
| अमीभिः सह तद् भोक्तुं | ५ | ५२९ | अस्मानाकाशयानेन | २ | ९० | आयतनेष्वार्हतेषु | १ | ४४६ |
| अमी वर्षधरा शैलाः | ४ | १८० | अस्मिन्नेव जम्बूद्वीपे | ४ | ८१ | आयातं स्वामिनं ज्ञात्वा० | ५ | १५८ |
| अमीषामपि कूटेषु | ४ | १८२ | अस्मिन्नेवंविधेऽपारे | ४ | ३४७ | आयुधाकर्षणे रक्ता० | २ | १३२ |
| अमुक्तसन्निधिस्ताभ्यां | ५ | ३७७ | अस्याः पलायितः सद्यः | ३ | १०० | आयुष्यमानयोरित्थं | ४ | ७८ |
| अमोघं तद्वचो ज्ञात्वा | १ | ४८१ | अस्याः प्रतिदिशं चाऽर्ध० | ४ | १७८ | आयुःक्षये च प्रथमं | ५ | ३९७ |
| अयं च भगवान् धन्य० | १ | ४३९ | अस्यैव जम्बूद्वीपस्य | १ | ३ | आयुःक्षये वपुरपास्य | ३ | २२७ |
| अयं तु रूपसम्पन्नो० | १ | ४७ | अस्यैव जम्बूद्वीपस्य | ३ | १ | आयोजनविसर्पिण्या | ४ | ३४० |
| अयं महात्मा भगवा० | ३ | ३८ | अस्यैव जम्बूद्वीपस्य | ३ | १०५ | आरभ्य केवलाद् वर्ष० | ५ | ५३८ |
| अयं मेघरथो नाम | ४ | ३२० | अस्यैव जम्बूद्वीपस्य | ४ | १०८ | आरभ्य चक्रवर्तित्वा० | ५ | २६६ |
| अयं हि षोडशस्तीर्थ० | ५ | १३९ | अस्यैव जम्बूद्वीपस्य | ५ | ३८७ | आरात्रिकमथोत्तार्य | ५ | ८४ |
| अयि! द्वीपे जम्बूद्वीपे | ५ | २६९ | अहं तु प्रव्रजिष्यामि | ४ | १४५ | आराहस्तान् हस्तिपकान् | ५ | ४६६ |
| अयोध्याराजपुत्राभ्या० | ४ | १०२ | अहं वां प्राग्भवे माता | १ | १२५ | आरुह्याऽम्बरतिलकं | ४ | ३५७ |
| अरे! किमेतदारब्ध० | ५ | २२३ | अहमात्मानुभूतत्वात् | ५ | ५१२ | आरुह्याऽशोकवृक्षं स | ५ | ४५० |
| अरे! युध्यस्व युध्यस्व | २ | २१२ | अहिता मोहिताः सद्य० | १ | ३५५ | आरूढकरिणः केऽमी | ५ | १७६ |
| अरे! रे! कोऽयमायातो | ५ | १७४ | अहो! एषामनालोच्य० | ५ | १७८ | आर्त्तध्यानं प्रपन्नौ च | ४ | १६५ |
| अरे! रे! न भवस्येष | १ | २८० | अहो! किमिदमस्माक० | ५ | १७९ | आर्त्तध्यानोद्भवं कर्मा० | १ | ३९९ |
| अरैरिव सहस्रेण | ५ | १२९ | **आ** | | | आवयोः प्राक्तनान् सम्यग् | ४ | ११५ |
| अर्ककीर्तिर्दुहितरं | १ | १५४ | आकर्ण्य कर्णकटुकान् | २ | २१४ | आवेग-विस्मय-व्रीडा० | २ | १८१ |
| अर्ककीर्तेरभूत् पत्नी | १ | १४० | आकर्ण्य कर्णपीयूष० | ५ | ३६० | आ शक्रादाक्रमैः प्राणाः | १ | २२५ |
| अर्कप्रभोऽथाऽर्करथो | १ | २९७ | आकर्ण्य देशनां तां च | ४ | २२३ | आशातनाभीतभीता | ५ | १०७ |
| अर्चन्तीं केसरां तत्र | ५ | ४१० | आकर्ण्य रत्नवृष्टिं ता० | २ | ३४२ | आश्चर्यभूतमेतस्या | २ | ३४३ |
| अर्धसंस्रितसंव्यानं | ४ | ३२७ | आकाशभाषणैर्दैवो० | २ | १२८ | आसीच्च तद्गृहासन्न० | १ | २१२ |
| अर्धे तयोरसम्पन्न० | ५ | ४४३ | आखुस्रग्मालिनः केचित् | ४ | २०० | आसीच्च बलदेवस्य | २ | ३३५ |
| अर्धे च दक्षिणे तस्य | १ | ४ | आख्यन् मुनिरपि द्वीपे | ४ | ११६ | आसीत् तत्रैव नगरे | ३ | १०७ |
| अर्हतः समवसृतान् | ४ | २१८ | आख्यन् मुनिरिति द्वीपे | २ | २५२ | आसीत् तदा नौ सङ्केत० | २ | ३८१ |
| अर्हतोऽर्हज्जनन्याश्च | ५ | ९६ | आख्यन् मेघरथोऽप्येवं | ४ | २३० | आसीदनन्तवीर्योऽपि | २ | १८३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| श्लोकः | सर्गः | क्रमाङ्कः |
|---|---|---|
| आस्थानीमन्यदाऽऽस्थाय | २ | ५७ |
| आहत्याऽन्योऽन्यमद्यैवा० | ३ | १४८ |
| आः पापौ किमिहारब्धं | ३ | ३१३ |
| **इ** | | |
| इतश्च गत्वैतौ भोग० | ४ | १५९ |
| इतश्च चमरचञ्चा० | १ | ३०८ |
| इतश्च चमरचञ्चां | १ | ३७३ |
| इतश्च जम्बूद्वीपेऽस्मिन् | २ | १ |
| इतश्च जम्बूद्वीपेऽस्मिन् | २ | २९० |
| इतश्च जम्बूद्वीपेऽस्मिन् | ४ | १५२ |
| इतश्च तत्रैरवते | ४ | ११९ |
| इतश्च निर्ययौ पुर्या | २ | ३८ |
| इतश्च मशकासारे | ३ | १६२ |
| इतश्च सर्वार्थसिद्धे | ५ | २५ |
| इतश्चसुस्थितावर्ता० | २ | १९ |
| इतश्चऽत्रैव भरते | १ | १३४ |
| इतश्चऽन्ते त्रिपृष्ठस्य | १ | १६८ |
| इतश्चऽश्वग्रीवसुतौ | ३ | २०४ |
| इतश्चऽस्तीह भरते | १ | २४ |
| इतस्तश्च क्रीडन्त्यौ | २ | ३६६ |
| इतः ्र्याः समादाय | १ | ३७० |
| इतः वनगरं गत्वा | ४ | २४९ |
| इति ्यं समालोच्य | १ | ३१९ |
| इति ीश्चित्य मनसा | ५ | १४३ |
| इति ीश्चित्य सर्वेऽपि | ५ | २०७ |
| इति ्र्वभवान् श्रुत्वा | ४ | १५७ |
| इति ्घरथेनोक्त० | ४ | ३६ |
| इति ्रेज्ञपयन्तस्ते | ३ | १५० |
| इति ्त्वाऽमिततेजाः | १ | २३८ |
| इति ्श्चिन्तयन् स्वस्थः | १ | २६९ |
| इति ाटोपमुक्तास्तै० | ५ | २२९ |
| इति तुत्वेशमीशानात् | ५ | ९३ |
| इतो ावात् त्वं नवमे | १ | ४२० |
| इत्थभ्यर्थितस्ताभ्यां | ४ | १७५ |
| इत्थाख्यानपूर्वं तौ | ४ | १८७ |
| इत्थंव नाना तौ यावत् | ३ | २११ |
| इत्थंव निर्भरं वारि | ३ | ६४ |
| इत्थ्रत्यहमन्योऽन्यो० | ५ | ४३१ |
| इत्थ्रपन्नार्त्तध्यानौ | ४ | ९२ |
| इत्भरतषट्खण्ड० | ५ | २५१ |
| इत विचित्रं निघ्नन्त० | ५ | १८३ |
| इत विचिन्त्य स द्वीपे | ४ | २२० |
| इतचिन्तयतां याव० | २ | ९२ |
| इत्ाकर्ण्य गिरं हृष्टः | ५ | ३०८ |
| इाकर्ण्य वचस्तस्या | २ | २६५ |
| इाकर्ण्य स्वमायुस्ता० | १ | ४८० |
| इादिकं धर्मबुद्ध्या | १ | ४१३ |
| इादीनां स्वपुत्राणां | १ | २९८ |
| युक्ताऽनन्तवीर्येण | २ | १९८ |
| युक्ता निजनेपथ्यं | ५ | ५०२ |
| इत्युक्तोऽनन्तवीर्यस्त० | २ | २३९ |
| इत्युक्तो विष्णुना दत्ता० | २ | १०७ |
| इत्युक्तो विष्णुना दूतो | २ | ८८ |
| इत्युक्तः कान्तया राजा | १ | २४८ |
| इत्युक्त्वा नारदमुनि० | २ | ८९ |
| इत्युक्त्वा मुक्तसन्नाहौ | १ | १३१ |
| इत्युक्त्वा यावदात्मानं | ५ | ४९६ |
| इत्युक्त्वा शक्रमहिषी | २ | ३८६ |
| इत्युक्त्वा साऽर्पयामास | ५ | १६० |
| इत्युत्पत्तिं विपत्तिं च | ३ | १२९ |
| इत्युदित्वा जग्मतुस्तौ | १ | ४५९ |
| इत्युदित्वा नमस्कृत्य | ५ | २७४ |
| इत्युदित्वा नृपं कृत्वा | ४ | २८६ |
| इत्युदित्वा सोऽश्वघोषं | १ | ४४२ |
| इत्युदित्वा स्थिते तस्मिं० | १ | १९७ |
| इदं चमरचञ्चायां | १ | ४४१ |
| इदमौपयिकं तस्मात् | १ | २१९ |
| इदानीमनुभवितुं | ४ | १२६ |
| इदानीं नारकं जन्मा० | ४ | ३१० |
| इन्दुलेखामिवाऽहःस्थां | १ | ३७५ |
| इन्दुषेण-बिन्दुषेणा० | १ | १२३ |
| इन्दुषेणो बिन्दुषेण० | १ | १९ |
| इन्द्रजालमिवाऽसारं | ३ | २२१ |
| इन्द्रनीलावनीकानि | ५ | ९ |
| इन्द्रस्येव मुनीन्द्रस्य | ३ | २१५ |
| इन्द्रियैर्विजितो जन्तुः | ५ | ३२५ |
| इन्द्रियैः स्वार्थविवशैः | ५ | ३२७ |
| इमान्यायतनान्युच्चैः | ४ | १७९ |
| इमां धरित्रीं विहरन् | २ | ३२४ |
| इमां पाणिगृहीतीं स्वां | १ | ७७ |
| इमे च ते बर्बरिका | २ | ११५ |
| इयं च जगती जम्बू० | ४ | १८३ |
| इयं प्रतारणी विद्या | १ | २८५ |
| इयं हि साधयन्त्यासी० | ३ | ९८ |
| इष्टेभ्यस्तानि दास्यामी० | ५ | ३८३ |
| इह मर्त्यत्वमाप्तस्य | ३ | २८ |
| **ई** | | |
| ईदृग् भूयो न तत्कार्य० | २ | ३०९ |
| ईशानेन्द्रमहिष्यौ च | ४ | ३२३ |
| ईशानेन्द्रसभां गत्वा | ३ | ३७ |
| ईशानेन्द्रस्तदानीं च | ४ | ३१७ |
| ईशानेन्द्रः शशंसैव० | ४ | ३१९ |
| ईषद्वद्धे च तत्पाशे | ५ | ४४९ |
| **उ** | | |
| उग्रैस्तपोभिर्ध्यानेन | ३ | १३३ |
| उत्कृत्योत्कृत्य मांसं स्वं | ४ | २७६ |
| उत्खन्यमाने पिच्छेऽपि | ४ | २६१ |
| उत्खातदन्तिदन्तेन | २ | २२४ |
| उत्ततार तरङ्गिण्यौ | ५ | १७० |
| उत्तप्तस्वर्णवर्णं तं | ३ | १८१ |
| उत्पन्नकरुणैस्तैश्च | १ | २१३ |
| उत्पन्नकेवलज्ञानो | ४ | १९१ |
| उत्पन्नचक्रो विजित० | २ | ३०५ |
| उत्पन्नावसुरत्वेन | ३ | २०५ |
| उत्पपात विमानं त० | ४ | १७६ |
| उत्पेततुः पेततुश्च | ४ | ७४ |
| उत्सङ्गस्थितपुष्पस्र० | ४ | १२० |
| उत्सृज्य सहजं मानं | २ | १८४ |
| उदग्रुचकतोऽप्येत्य | ५ | ६० |
| उदधिर्लवणोदोऽयं | ४ | १८४ |
| उद्दिश्य वरदामान० | ५ | १४९ |
| उद्दामा सत्यभामोचे | १ | ७८ |
| उद्भ्रान्तयोरिवाम्भोध्यो० | ४ | ४९ |
| उद्याने कनकशक्ति० | ३ | १६६ |
| उद्यौवनः पर्यणैषीत् | ३ | १२२ |
| उद्यौवनावेकदा तौ | ४ | १११ |
| उद्यौवनां रूपवतीं | १ | ८२ |
| उन्नालमुकुलीभूत० | ५ | ३० |
| उन्मत्त इव दत्तोऽपि | ३ | ११३ |
| उपपन्नमिदं तेषां | २ | १६६ |
| उपर्यनन्तवीर्यस्य | २ | २४० |
| उपशान्तो दानधर्म० | ३ | ११८ |
| उपसर्गपरीषहै० | २ | ४२१ |
| उपसर्गान् सहिष्येऽह० | ३ | २०३ |
| उपादत्त परिव्रज्यां | १ | १८९ |
| उपाया एव युज्यन्ते० | ५ | ४५५ |
| उपायाभावतोऽप्राप्ये | ५ | ४५७ |
| उप्ताः प्रभाते मध्याह्ने | ५ | २२० |
| उभयोरपि वैताढ्य० | २ | ४१० |
| उभे नाटककारिण्यौ | २ | ८५ |
| उभौ लोकौ सञ्चरामि | २ | ७८ |
| उल्ललन्तो दुर्ललिताः | ५ | १८४ |
